ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग प्रकाशक

ब्रह्मसूत्रशांकरभाष्यमिदं टीकाभिरेकादशभिः सह भागेष्वष्टसु प्रकाश्यते। सर्वासां टीकानां क्रम एवं व्यवस्थापितः। भामती-ऋजुप्रकाशिका- भाष्यभावप्रकाशिका- प्रदीप-ऋजुविवरण- तत्वदीपन- वार्त्तिक- पञ्चपादिका-पञ्चपादिकाविवरण-श्रीकण्ठभाष्य-शिवार्कमणिदीपिकाख्याः।

एतासां सर्वासां टीकानां केचिदंशाः प्रकाशिता आसन् केचिच्चाप्रकाशिताः। ते सर्वेऽशाः इतस्ततः प्रकाशितेभ्यो ग्रन्थेऽभ्योऽप्रकाशितेभ्यो ग्रन्थेभ्यो वा यथासम्भवं संकलय्यात्र व्यवस्थापिताः। अधुनापर्यन्तं सर्वा एताः टीकाः सममेव प्रकाशिताः आसन्। परमधुना प्रतिवर्णकं टीकैका पूर्वं सामग्र्येण प्रकाशिता।

तदनन्तरं द्वितीया टीका प्रारब्धा। आशास्यते च वेदान्तविषयाब्धिं प्रविविक्षूणां शोधकानां कृते प्रयास एष समर्द्धिकरो भविता।

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

ब्रह्मसूत्रशाङ्करभाष्यम्

षष्ठ-खण्डः

वार्त्तिकम् — श्रीकण्ठभाष्यम् (ब्रह्मसूत्रस्य)
प्रदीपः — शिवार्कमणिदीपिका (श्रीकण्ठभाष्यस्य)
भामती

सम्पादकः
प्रो. योगेश्वरदत्तशर्मा (पाराशरः)
हिन्दू कालेज, दिल्ली विश्वविद्यालय
दिल्ली-110007

NAG PUBLISHERS
नाग पब्लिशर्स
11 ए. यू. ए. जवाहर नगर, दिल्ली-110007
भारत

ब्रह्मसूत्रशाङ्करभाष्यम्

षष्ठ-खण्डः

वार्त्तिकम्

प्रदीपः

भामती

श्रीकण्ठभाष्यम् (ब्रह्मसूत्रस्य)

शिवार्कमणिदीपिका (श्रीकण्ठभाष्यस्य)

सम्पादकः

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

हिन्दू कालेज, दिल्ली विश्वविद्यालय

दिल्ली-110007

NAG PUBLISHERS

नाग पब्लिशर्स

11 ए. यू. ए. जवाहर नगर, दिल्ली-110007

भारत

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

नाग प्रकाशक

(१) 11ए/यू. ए. जवाहर नगर, दिल्ली-110007
टेलिफोन-3915883, 3967975, 3957440

(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

© प्रकाशक

ISBN : 81-7081-365-4 (set)
81-7081-515-0 (Vol VI)

प्रथम संस्करण : 2002

मूल्य : 174.00

श्री सुरेन्द्र प्रताप द्वारा नाग प्रकाशक 11 ए० यू० ए०, जवाहर नगर, दिल्ली 110007 द्वारा प्रकाशित तथा जी. प्रिंट. प्रोसेस, 308/2 शहजादा बाग, दयाबस्ती दिल्ली द्वारा 110035 द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-102 न्यू सीलमपुर, दिल्ली-110053 ।

विषयनुक्रमणिका

(अ०१ पा०४ सू० २८-२९)
सर्वव्याख्यानाधिकरणम्

शाङ्करभाष्यम्	२६७१-२६७१
वार्त्तिकम्	२६७२-२६७२
प्रदीप:	२६७३-२६७६
भामती	२६७७-२६७७
श्रीकण्ठभाष्य	२६७८-२६७९
शिवार्कमणिदीपिका	२६८०-२६९७

(अ०२ पा०१ सू० १-२)
स्मृत्यधिकरणम

शाङ्करभाष्यम्	२६९८-२७००
वार्त्तिकम्	२७००-२७०७
प्रदीप:	२७०८-२७१४
भामती	२७१५-२७१६
श्रीकण्ठभाष्य	२७१७-२७१७
शिवार्कमणिदीपिका	२७१८-२७२१

(अ०२ पा०१ सू० ३)
योगप्रत्युत्तपधिकरणम्

शाङ्करभाष्यम्	२७२२-२७२३
वार्त्तिकम्	२७२४-२७२५
प्रदीप:	२७२६-२७२६
भामती	२७२७-२७२८
श्रीकण्ठभाष्य	२७२९-२७२९
शिवार्कमणिदीपिका	२७३०-२७३१

(अ०२ पा०१ सू० ४-११)
नविलक्षणत्वाधिकरणम्

शाङ्करभाष्यम् २७३२-२७३९
वार्त्तिकम् २७४०-२७४७
प्रदीप: २७४८-२७५४
भामती २७५५-२७५९
श्रीकण्ठभाष्य २७६०-२७६२
शिवार्कमणिदीपिका २७६३-२७६८

(अ०२ पा०१ सू० १२)
शिष्टापरिग्रहाधिकरणम्

शाङ्करभाष्यम् २७६९-२७६९
वार्त्तिकम् २७७०-२७८१
प्रदीप: २७८२-२७८२
भामती २७८३-२७८४
श्रीकण्ठभाष्य २७८५-२७८५
शिवार्कमणिदीपिका २७८६-२७८६

(अ०२ पा०१ सू० १३)
भोक्त्रापत्त्यधिकरणम्

शाङ्करभाष्यम् २७८७-२७८७
वार्त्तिकम् २७८८-२७८९
प्रदीप: २७९०-२७९१
भामती २७९२-२७९२
श्रीकण्ठभाष्य २७९३-२७९३
शिवार्कमणिदीपिका २७९४-२७९४

(अ०२ पा०१ सू० १५-२०)
आरम्भणाधिकरणम्

शाङ्करभाष्यम् २७९५-२८०३
वार्त्तिकम् २८०४-२८२१
प्रदीप: २८२२-२८२६
भामती २८२७-२७३५
श्रीकण्ठभाष्य २८३६-२८३८
शिवार्कमणिदीपिका २८३९-२८४६

(अ०२ पा०१ सू० २१-२३)
इतरव्यपदेशाधिकरणम्

शाङ्करभाष्यम् २८४७-२८४८
वार्त्तिकम् २८४९-२८४९
प्रदीपः २८५०-२८५१
भामती २८५२-२८५२
श्रीकण्ठभाष्य २८५३-२८५४
शिवार्कमणिदीपिका २८५५-२८५६

(अ०२ पा०१ सू० २४-२५)
उपसंहारदर्शनाधिकरणम्

शाङ्करभाष्यम् २८५७-२८५८
वार्त्तिकम् २८५९-२८६१
प्रदीपः २८६२-२८६२
भामती २८६३-२८६३
श्रीकण्ठभाष्य २८६४-२८६४
शिवार्कमणिदीपिका २८६५-२८६६

(अ०२ पा०१ सू० २६-२९)
कृत्स्नप्रसक्त्यधिकरणम्

शाङ्करभाष्यम् २८६७-२८६९
वार्त्तिकम् २८७०-२८७१
प्रदीपः २८७२-२८७४
भामती २८७५-२८७६
श्रीकण्ठभाष्य २८७७-२८७७
शिवार्कमणिदीपिका २८७८-२८७९

(अ०२ पा०१ सू० ३०-३१)
सर्वोपेताधिकरणम्

शाङ्करभाष्यम् २८८०-२८८०
वार्त्तिकम् २८८१-२८८१
प्रदीपः २८८२-२८८२
भामती २८८३-२८८३
श्रीकण्ठभाष्य २८८४-२८८४
शिवार्कमणिदीपिका २८८५-२८८५

(अ०२ पा०१ सू० ३२-३३)
नप्रयोजनवत्त्वाधिकरणम्

शाङ्करभाष्यम् २८८६-२८८६
वार्त्तिकम् २८८७-२८८७
प्रदीपः २८८८-२८८८
भामती २८८९-२८९०
श्रीकण्ठभाष्य २८९१-२८९१
शिवार्कमणिदीपिका २८९२-२८९३

(अ०२ पा०१ सू० ३४-३६)
वैषम्यनैर्घृण्याधिकरणम्

शाङ्करभाष्यम् २८९४-२८९५
वार्त्तिकम् २८९६-२८९८
भामती २८९९-२९००
श्रीकण्ठभाष्य २९०१-२९०२
शिवार्कमणिदीपिका २९०३-२९०७

(अ०२ पा०१ सू० ३७)
सर्वधर्मोपपत्त्यधिकरणम्

शाङ्करभाष्यम् २९०८-२९०८
वार्त्तिकम् २९०९-२९०९
प्रदीपः २९१०-२९१०
भामती २९११-२९११
श्रीकण्ठभाष्य २९१२-२९१२
शिवार्कमणिदीपिका २९१३-२९१३

(अ०२ पा०२ सू० १-१०)
रचनानुपपत्त्यधिकरणम्

शाङ्करभाष्यम् २९१४-२९२०
वार्त्तिकम् २९२१-२९३३
प्रदीपः २९३४-२९३८
भामती २९३९-२९४६
श्रीकण्ठभाष्य २९४७-२९४८
शिवार्कमणिदीपिका २९४९-२९५५

(अ०२ पा०२ सू० ११)

महद्दीर्घाधिकरणम

शाङ्करभाष्यम् २९५६-२९५७
वार्त्तिकम् २९५८-२९६२
प्रदीप: २९६३-२९६५
भामती २९६६-२९६८
श्रीकण्ठभाष्य २९६९-२९६९
शिवार्कमणिदीपिका २९७०-२९७४

(अ०२ पा०२ सू० १२-१७)

परमाणुजगदकारणत्वाधिकरणम्

शाङ्करभाष्यम् २९७५-२९८१
वार्त्तिकम् २९८२-२९९५
प्रदीप: २९९६-२९९८
भामती २९९९-३००६
श्रीकण्ठभाष्य ३००७-३००८
शिवार्कमणिदीपिका ३००९-३०१९

(अ०२ पा०२ सू० १८-२७)

समुदायाधिकरणम्

शाङ्करभाष्यम् ३०२०-३०२५
वार्त्तिकम् ३०२६-३०३६
प्रदीप: ३०३७-३०५०
भामती ३०५१-३०६२
श्रीकण्ठभाष्य ३०६३-३०६५
शिवार्कमणिदीपिका ३०६६-३०७९

(अ०२ पा०२ सू० २८-३२)

अभावाधिकरणम

शाङ्करभाष्यम् ३०८०-३०८४
वार्त्तिकम् ३०८५-३०९०
प्रदीप: ३०९१-३०९६
भामती ३०९७-३१०५
श्रीकण्ठभाष्य ३१०६-३१०७
शिवार्कमणिदीपिका ३१०८-३११०

(अ०२ पा०२ सू० ३३-३६)
एकस्मिन्नसम्भवाधिकरणम्

शाङ्करभाष्यम्	३१११-३११३
वार्त्तिकम्	३११४-३११९
प्रदीपः	३१२०-३१२९
भामती	३१३०-३१३३
श्रीकण्ठभाष्य	३१३४-३१३५
शिवार्कमणिदीपिका	३१३६-३१३९

(अ०२ पा०२ सू० ३७-४१)
अथ पत्यधिकरणम

शाङ्करभाष्यम्	३१४०-३१४२
वार्त्तिकम्	३१४३-३१४५
प्रदीपः	३१४६-३१४७
भामती	३१४८-३१५०
श्रीकण्ठभाष्य	३१५१-३१५३
शिवार्कमणिदीपिका	३१५४-३१६०

(अ०२ पा०२ सू० ४२-४५)
उत्पत्त्यधिकरणम्

शाङ्करभाष्यम्	३१६१-३१६३
वार्त्तिकम्	३१६४-३१६५
प्रदीपः	३१६६-३१७३
भामती	३१७४-३१७४
श्रीकण्ठभाष्य	३१७५-३१७६
शिवार्कमणिदीपिका	३१७७-३१८१

सर्वव्याख्यानाधिकरणम्।

शाङ्करभाष्यम्

***एतेन सर्वे व्याख्याता व्याख्याता:*॥२८॥**

''ईक्षतेर्नाशब्दम्'' (ब्र० सू० १/१/५) इत्यारभ्य प्रधानकारणवाद: सूत्रैरेव पुन: पुनराशङ्क्य निराकृत:–तस्य हि पक्षस्योपोद्बलकानि कानिचिल्लिङ्गाभासानि वेदान्तेष्वापातेन मन्दमतीन् प्रतिभान्तीति। स च कार्यकारणानन्यत्वाभ्युपगमात्प्रत्यासन्नो वेदान्तवादस्य। देवलप्रभृतिभिश्च कैश्चिद् धर्मसूत्रकारै: स्वग्रन्थेष्वाश्रित:। तेन तत्प्रतिषेधे यत्नोऽतीव कृत:, नाण्वादिकारणवादप्रतिषेधे। तेऽपि तु ब्रह्मकारणवादपक्षस्य प्रतिपक्षत्वात्प्रतिषेद्धव्या:–तेषामप्युपोद्बलकं वैदिकं किञ्चिद्लिङ्गमापातेन मन्दमतीन् प्रति भायादिति। अत: प्रधानमल्लनिबर्हणन्यायेनातिदिशति–एतेन प्रतिषेधन्यायकलापेन सर्वे=अण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्या:; तेषामपि प्रधानवदशब्दत्वात्, शब्दविरोधित्वाच्चेति। *व्याख्याता व्याख्याता* इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति।।२८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य चतुर्थ: पाद: समाप्त:।।४।।

।।इति श्रीमद्ब्रह्मसूत्रशाङ्करभाष्ये समन्वयाख्य: प्रथमोऽध्याय:।।१।।

इति शाङ्करभाष्यम् सर्वव्याख्यानाधिकरणम् समाप्तम्

वार्तिकम्

एतेन सर्वे व्याख्याता व्याख्याता:॥२८॥ निगदव्याख्यातमस्य भाष्यम्। ननु–अतिदेशाधिकरणत्वादस्याभ्यधिका शङ्का–वाच्या, उच्यते;

जगतः प्रकृतिर्ब्रह्म यदि स्याद् मृन्निदर्शनात्।

अण्वादयोऽपि किं न स्युर्वटवानानिदर्शनात्॥

अनेनावान्तरसङ्गतिरप्युक्ता भवति। छान्दोग्ये हि–जगत: प्रागवस्थायां दृष्टान्त: श्रुयते–"न्यग्रोधफलमाहरेति, भिन्धीति, किमत्र पश्यसीति, न किञ्चन भगव इति, एतस्यैव सोम्याणिम्न:" इत्यदृश्यमानाणुनिर्देशात्, अणुवादश्च भाति दार्ष्टान्तिक इति॥ सिद्धान्तस्तु–

मृदादयस्तु दृष्टान्ताः प्रतिज्ञामनुरुन्धते।

धानास्तामनुरुन्धाना भक्तिमार्गे प्रपेदिरे॥

इह खल्वेकविज्ञानेन सर्वविज्ञानं प्रधानं नासदादिपक्षेष्ववकल्पते। अतो "न किञ्चने" त्यनभिव्यक्ति:। अणिम्न इति सूक्ष्मतोक्तेति॥२८॥ इत्यष्टमं सर्वव्याख्यानाधिकरणम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दसरस्वतीपूज्यपादशिष्य श्रीनारायण-सरस्वतीकृतौ श्रीमच्छारीरकभाष्यवार्तिके प्रथमाध्यायस्य चतुर्थः पाद:॥

॥ समाप्तश्चाध्याय:॥

इति वार्त्तिकम् सर्वव्याख्यानाधिकरणम् समाप्तम्

प्रदीपः

एतेन सर्वे व्याख्याता व्याख्याताः॥२८॥ एतेन–प्रधानवाददिनिराकरणेन सर्वे=अचेतनाण्वादि-कारणवादा अपि, व्याख्याताः=प्रत्याख्याताः ; न्यायसाम्यादिति सूत्रार्थः। अतिदेशसङ्गतिरनन्तरा। अण्वादिपदानां सौक्ष्म्यमात्रपरत्वव्यवस्थापनेन गतिसामान्यव्यवस्थापनात् पादसङ्गतिः। अध्याय-सङ्गतिस्तु विशदैव। अधिकाशङ्का तु–

जगतः प्रकृतिर्ब्रह्म यदि स्याद् मृन्निदर्शनात्।
अण्वादयोऽपि किं न स्युर्वटधानानिदर्शनात्॥

इति कल्पतरुकारिकया व्यवस्थापिता। वार्तिके चैतत् स्पष्टं कल्पतर्वनुसारेणैव व्याख्यातमिति नेह पुनरपि संगृह्यते। ब्रह्मकारणवादप्रतिपक्षत्वमेव तन्निरसने कारणम्, न तु वैयक्तिकविद्वेषादिकमित्याह– *तेऽपि त्विति*॥

सन्दिग्धार्थस्य पदस्य नियतार्थपदान्तरार्थाविरोधेन बोधकत्वमेव युक्तमिति शारीरकन्यायसंग्रहः। युक्तं चैतत्। तदुक्तं वार्तिके भट्टपादैः–पदमज्ञातसन्दिग्धं प्रसिद्धैरपृथक्श्रुति। निर्णीयते निरूढं तु न स्वार्थादपनीयते॥'' इति। अयमेवार्थः–कारणत्वाधिकरणे ''समाकर्षादि'' ति सूत्रेणापि साधितः ; तथापि पुनरपि तस्यानुसन्धानमध्यायसमापनार्थमुपरितनाध्यायार्थस्याविरोधाख्यसय सूचनार्थं चेति नोक्ताधिकरणवैयर्थ्यम्। अत एव–एतेन सर्वे व्याख्याता इत्यतिदेशसूचकैतच्छब्दप्रयोगः। अधिकाशङ्का तु स्वभावपरमाणुकारणतावादयोरपि शिष्टपरिगृहीतत्वं श्रुतिमूलत्वं वाऽऽदायेति मन्तव्यम्। अत्र समर्थननिराकरणोभयसाधारणस्य व्यख्यानपदस्य प्रयोगेण मतान्तराणां केषाञ्चनांशतः प्रमाण्यम्, केषाञ्चन सर्वात्मनाऽप्रामाण्यं च द्वितीयद्वितीये साधयिष्यमाणं सूच्यते॥

अयमत्र निष्कर्षः–अत्रानन्दमयाधिकरणान्तः सङ्ग्रहरूपो ब्रह्मविचार इति पक्षेणानन्दमयाधिकरणान्तानां प्रथमाध्योपक्रमपरामर्शोपसंहारास्तद्भावार्थश्चैकवाक्यतासिद्धाः

सङ्गृह्यन्ते–

उपक्रमाः	परामर्शाः	उपसंहाराः
(१) जिज्ञासाधिकरणम्	(१) भूमाधिकरणम्	(१) सर्वव्याख्यानाधिकरणम्
(२) जन्माधिकरणम्	(२) द्युभ्वाद्यधिकरणम्	(२) प्रकृत्यधिकरणम्
(३) शास्त्रयोनित्वाधिकरणम्	(३) वैश्वानराधिकरणम्	(३) वाक्यान्वयाधिकरणम्
(४) ईक्षत्यधिकरणम्	(४) अदृश्यत्वाधिकरणम्	(४) जगद्वाचित्वाधिकरणम्
(५) आनन्दमयाधिकरणम्	(५) अन्तर्याम्यधिकरणम्	(५) कारणत्वाधिकरणम्

तत्र प्रथमोपक्रमपरामर्शोपसंहारे: जिज्ञास्यं ब्रह्म सुखस्वरूपम् निर्विशेषम्, तत्रैव सर्वेषां वेदान्तानां पर्यवसानमिति प्रतिपाद्यते। द्वितीयोपक्रमपरामर्शोपसंहारास्तु तत्तु निर्विशेषं ब्रह्म जगत्कारणत्वादितटस्थलक्षणलक्ष्यम्। तच्च द्युभ्वाद्यायतनत्वादिनोपादानमिव प्रकृतिश्चेति निमित्तमपीति गमयन्ति।।

तद् अभिन्ननिमित्तोपादानं ब्रह्म शास्त्रगम्यम्, "को न आत्मा किं ब्रह्मे" ति ह्युपदिश्यमानं सर्वेषामात्मस्वरूपम्; यतः "आत्मा वा अरे द्रष्टव्य" इत्यादिवाक्यानां तथैवान्वयः स्वीकर्तव्य इति तृतीयोपक्रमपरामर्शोपसंहारैरवगच्छामः। अत्र शास्त्रयोनित्वाधिकरणसिद्धान्तस्यैव समन्वयाधिकरणेनापि सूचनात् समन्वयसूत्रमपि तृतीयसूत्रत्वेनैव गृह्यते। सति चैवम् "समन्वयात्" "वाक्यान्वयादि" त्युभयत्रोपक्रमोपसंहारयोरन्वयघटनमपि सङ्गच्छते। वैश्वानराधिकरणे "आमनन्ति चैनमस्मिन्नि" ति शास्त्रगम्यत्वपरामर्शोऽप्यत एव व्याख्यातः।।

तदेवं प्रत्यगभिन्ननिर्विशेषात्मस्वरूपस्यैव शास्त्रार्थत्वे सिद्धे साङ्ख्यानामस्थूलादिवाक्यपर्यालोचनया प्रधानस्यैव कारणत्वं साक्षाद्भवत्विति शङ्कावारणार्थमीक्षत्यधिकरणं सद्विद्यामधिकृत्य, अदृश्यत्वाधिकरणं परविद्यामधिकृत्य, अचेतनस्य प्राणस्यैव सर्वप्रलयाधिष्ठानत्वेन सर्वशास्त्रगम्यत्वमिति च बालाक्यजातशत्रुविद्यामधिकृत्य च विचारार्थं तुरीयोपक्रमपरामर्शोपसंहाराः।।

पञ्चमोपक्रमपरामर्शोपसंहारास्तु–तत्तु ब्रह्मान्नमयादिद्वारोपदिश्यमानमपि न वस्तुगत्या विशिष्टो जीवः, किन्तु तस्याप्यन्तर्यामितया "तस्यैष एव शारीर आत्मे" ति तैत्तिरीयश्रुतौ बृहदारण्यके च सर्वान्तर्यामितया प्रतिपाद्यमानं पुच्छं ब्रह्मैव, तस्यैव तद्रूपस्य "सोऽकामयत" "असद्वा इदमग्र

आसीदि'' त्यादौ कारणत्वेन परामर्श इति ज्ञापयन्ति। अनेन च जीवकारणत्वपक्षो व्यावर्त्यते।।

सति चैवमचेतनप्रधानप्राणादिव्यावृत्तं चेतनजीवव्यावृत्तं च चैतन्यमेव जगत्कारणताविधया प्रतिपाद्यं ब्रह्मेति प्रथमाध्यायार्थः सर्वोऽप्येकवाक्यतया गृहीतो भवति। एतेन–पदविशेषाणां ब्रह्मणि समन्वये व्यवस्थापनोये कारणत्वाधिकरण जगद्वाचित्वाधिकरण वाक्यान्वयाधिकरणं प्रकृत्यधिकरण सर्वव्याख्यानाधिकरणेषु वाक्यार्थविचारोऽप्युपक्रमादिपर्यालोचनेन कथं सङ्गत इति शङ्काऽपि–परास्ता; सङ्ग्रहात्मकब्रह्मविचारोपक्रमादिसङ्कलनस्यापि कर्तव्यत्वेन तदुपपत्तेः।।

सति चैवमन्तरधिकरणादीनामप्युपक्रमादिपर्यालोचनावसरे–आनुमानिकाधिकरण चमसाधिकरण नसङ्ख्योपसङ्ग्रहाधिकरणानां पदविशेषमात्रार्थविचारपराणां देवतापशूदाधिकरणयोश्च त्यागेन तृतीयपादान्तिमाधिकरणस्यैवोपसंहारत्वं गृहीत्वोपक्रमपरामर्शोपसंहाराः सङ्ग्रहणीया भवन्ति। ते यथा–

उपक्रमाः	परामर्शाः	उपसंहाराः
अन्तरधिकरणम्	सर्वत्रप्रसिद्धाधिकरणम्	सुषुप्त्युत्क्रान्त्यधिकरणम्
आकाशाधिकरणम्	तथानुगमाधिकरणम्	अर्थान्तरत्वाधिकरणम्
ज्योतिश्चरणाधिकरणम्	ज्योतिश्चरणाधिकरणम्	ज्योतिरधिकरणम्
तथानुगमाधिकरणम्	प्राणाधिकरणम्	कम्पनाधिकरणम्

इति। तत्रान्तरधिकरणेन हिरण्यश्मश्रुत्वादिविशिष्टः सर्वत्रप्रसिद्धाधिकरणेन मनोमयत्वादिविशिष्टो भारूपः सुषुप्त्युत्क्रान्त्यधिकरणेन स्वयंज्योतिः पदार्थश्च विचार्यते। तत्र पूर्वतनाधिकरणद्वयेन प्रकाशमानस्य प्रकाशाश्रयस्य च ग्रहणम्, अन्तिमेन तु प्रकाशस्वरूपस्य विचार इति प्रथमोपक्रमादयो गमयन्ति। तत्रोपसंहारे ''योऽयं विज्ञानमय'' इति वाक्यविचारात् सगुणस्य ब्रह्मणोऽपि लक्ष्यत्वम्पदार्थाभेदेनैव शास्त्रसमाप्तिरिति गम्यते।।

एतेन–द्वितीयोपक्रमादयोऽपि–व्याख्याताः। तत्रोपक्रमोपसंहारयोराकाशपदार्थविचारत्वेन साम्यमिवार्थान्तरवाधिकरण आकाशपदार्थस्य नामरूपव्याकर्तृत्वं यदुक्तम्, तदिदम ''नेन जीवेनात्मने'' ति वाक्यान्तरैकवाक्यतया जीवात्मनैवेति ज्ञापनात् तैरपि जीवब्रह्माभेद एव शास्त्रार्थ इति गम्यत एव। न केवलमियत्, किन्तु मध्यमं तथाऽनुगमाधिकरणमपि जीवब्रह्माभेदमेवादाय प्रवर्तते।।

तृतीयोपक्रमपरामर्शोपसंहारास्त्रयोऽपि ज्योतिः पदार्थमेव वाक्यविशेषं गृहीत्वा समालोचयन्ति। तत्रापि ज्योतिरधिकरणे स्वयञ्ज्योतिरुपसम्पद्यति वाक्यार्थविचाराद्वारा जीवब्रह्माभेद एव व्यवस्थाप्यते।।

तुरीयोपक्रमपरामर्शोपसंहारा अप्येवमेव प्राणपदार्थमेवाधिकरणेषु त्रिष्वपि व्यवस्थापयन्ति। तत्र तु तथाऽनुगमाधिकरणं ''शास्त्रदृष्टया तूपदेशो वामदेववदि'' ति जीवब्रह्माभेदाभिप्रायेणैव माम्पदार्थ इति व्यवस्थापयतीति निगदव्याख्यातमिदमिति दिक्।।२८।। इत्यष्टमं सर्वव्याख्यानाधिकरणम्।।

इति महामहोपाध्यायादिपूज्यपादश्रपिञ्चापगेशशास्त्रिचरणानामन्तेवासिनो महामहोपाध्यायादि-श्रीमदनन्तकृष्णशास्त्रिणः कृतौ शारीरकमीमांसाभाष्यटिप्पणे प्रदीपे प्रथमाध्यायस्य चतुर्थः पादः समाप्तः।।

इति प्रदीपः सर्वव्याख्यानाधिकरणम् समाप्तम्

भामती

स्यादेतत्–मा भूत्प्रधानं जगदुपादानं तथापि न ब्रह्मोपादानत्वं सिध्यति, परमाण्वादीनामपि तदुपादानानामुपप्लवमानत्वात्तेषामपि हि किञ्चित् किञ्चिदुपोद्बलकमस्ति वैदिकं लिङ्गमित्याशङ्कामपनेतमाह सूत्रकारः–एतेन सर्वे व्याख्याता व्याख्याताः निगदव्याख्यातेन भाष्येण व्याख्यातं सूत्रम्।

प्रतिज्ञालक्षणं लक्ष्यमाणे पदसमन्वयः।
वैदिकः स च तत्रैव नान्यत्रेत्यत्र साधितम्॥२८॥

इति श्रीमद्वाचस्पतिमिश्रविरचिते श्रीमच्छारीरकभाष्यविभागे भामत्यां प्रभमाध्यायस्य चतुर्थः पादः॥

इति भामती सर्वव्याख्यानाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। योनिश्च हि गीयते।।२८।।

साक्षात्परमेश्वर एव भूतयोनिरित्युच्यते। 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्।।' इति समस्तसाक्षिणः सर्वज्ञस्य तमसः विश्वोत्तीर्णस्य परम शक्त्या उमया सहितस्य विशिष्टस्य परमेश्वरस्येव भूतयोनित्वं भूतप्रकृतित्वं च गीयते। ततश्चोपादानमपि निमित्तं परं ब्रह्मैव।।

इति प्रकृत्यधिकरणम्।।६।।

।। अथ प्रकृत्यधिकरणम्।।६।।

अथ सर्वव्याख्यानाधिकरणम्।।७।।

।।सू।। एतेन सर्वे व्याख्याता व्याख्याताः।।२९।।

'जन्माद्यस्य यतः' इत्यादिनैतदन्तेन वेदान्तवाक्यानां व्याख्यानेन ब्रह्मलिङ्गाभिधायिनो वेदान्तरूपाः कर्मकाण्डमध्यपातिनः पुरुषसूक्तशतरुद्रीयप्रभृतयो मन्त्रब्राह्मणभागाः स्मृतीतिहासपुराणागमाभियुक्तसूक्तिविशेषाश्च व्याख्याता इति। द्विरुक्तिरध्यायसमाप्त्यर्था।।

अत्र कर्मप्रकरणपठितानां पुरुषसूक्तशतरुद्रीयादीनां स्मृतीतिहासपुराणादीनां च तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधकत्वमस्ति न वेति संशयः। संशयबीजं प्रकरणभेदादिकम्।।

कर्मप्रकरणगतानां पुरुषसूक्तादीनामनुष्ठातृजीवपरत्वमेव समीचीनम्, न नित्यमुक्तब्रह्मविषयत्वं, प्रयोजनाभावात्। स्मृतिपुराणादीनामपि नैकार्थपरत्वमस्ति, यतस्तेषु कतिचित् ब्रह्माणं परं ब्रह्मेत्याहुः, कतिचत् विष्णुं, कतिचित् रुद्रं, कतिचित् शक्तिमेव, कतिचिदग्निं, कतिचित् सूर्यं, कतिचिद्वायुं, कतिचित् अन्यम्, एवमनवस्था भवतीत्यत एतेषां न ब्रह्मबोधकत्वम्।।

इति प्राप्ते ब्रूमः–पुरुषसूक्तादीनां ब्रह्मबोधकत्वमस्ति, तल्लिङ्गदर्शनात् 'तस्माद्विराडजायत' 'आदित्यवर्णं तमसस्तु पारे' 'तमेवं विद्वानमृत इह भवति' इति सकलकारणत्वतमःपरत्वामृतहेतुत्वादीनां परमेश्वरलिङ्गानामत्र संबन्धो दृश्यते। अत ईश्वर एवात्र पुरुषशब्देन प्रतिपाद्यते।

शतरुद्रीये च साक्षात् परमेश्वरस्य जगदाधिपत्यं जगदात्मकत्वं नीलग्रीवत्वादिलक्षणं च श्रूयते। अतः परमेश्वरस्य तद्बोध्यत्वं युक्तम्।।

ननु परमेश्वरस्य मङ्गलगुणैकनिधानस्य शतरुद्रीयप्रतिपाद्यत्वमयुक्तमिव प्रतिभाति। प्रथममेवात्र 'नमस्ते रुद्र मन्यवे' इति हेयगुणमन्युसंबन्धावगमात् इति चेत्–नैवं विचारणीयम्, मन्युशब्दस्यात्र यज्ञवाचकत्वात्। अथवा क्रोधपर्यायत्वेऽपि मन्युशब्दस्य न दोषः, दुष्टनिग्रहार्थं स्वेच्छागृहीतमप्रकृतिगुणत्वेनास्य परमेश्वरे संबन्धाभावात्।। पुराणादीनां च तात्पर्यलिङ्गवशेन ब्रह्मविष्ण्वादितत्तच्छब्दवाच्यं सर्वात्मकं सर्वज्ञं सर्वशक्तिकं सर्वाधिकमनन्यसामान्यवैभवं ब्रह्मशब्दार्थविश्रान्तिपदं निखिलवेदान्तवाक्यसामरस्यसमन्वयतात्पर्यपर्यवसानविषयं शिवमुमासहितं परमेश्वरं प्रति बोधकत्वं युक्तमेव। यदुक्तंकर्मप्रकरणमिति, तत्र लिङ्गेन प्रकरणबाधो युक्तः। अनेनैव न्यायेन यत्रयत्र चेतनेऽचेतने वा जगत्कारणत्वादिकं शिवतात्पर्यलिङ्गं श्रूयते वेदादिषु प्रमाणवचनेषु तत्रतत्र तदात्मा शिव एव वाच्यः। यत्रयत्र अपुरुषार्थविकाराज्ञत्वादिको धर्मस्तत्रतत्र शिवस्य परब्रह्मणः शरीरं चिदचिद्वस्त्वेव बोध्यमिति निपुणतरं निरूप्यमिति सर्वं समञ्जसमेव।।

इति सर्वव्याख्यानाधिकरणम्।।७।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः।।

इति श्री कण्ठभाष्य सर्वव्याख्यानाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

ननु परिणामासम्भवशङ्कायां परिणामादित्येतदेव कथमुत्तरं स्यादिति शङ्कते–**हन्तेति।** 'परिणामा'दिति सूत्रस्य निर्विकारत्वाद्यविरोधिपरिणामविशेषसम्भवादित्यर्थमभिप्रेत्य परिहरति–**सत्यमिति।** निर्विकारत्वविरोधि विकारवत्त्वरूपं परिणामित्वं न सम्भवतीति शङ्कते - **कोऽयमिति।** तत्सम्भवमुपपादयितुं प्रतिजानीते–**विवेचयाम इति।** अयमाशयः। 'निष्कलं निष्क्रियं शान्त'मित्यादि श्रुतिभिः शिवस्य निर्विकारत्वमिव प्रागुदाहृतश्रुतिभिः प्रपञ्चोपादानत्वमपि प्रतिपन्नम्। उभयमपि यथोपपद्यते तथोपपादनीयम्। शक्यं चोपपादयितुं स्वयं साक्षान्निर्विकारोऽपि शिवः किञ्चिद्द्वारा विकारवत्त्वेनोपादानमिति। ततश्च यथा 'यदाग्नेयोऽष्टाकपाल' इत्युत्पत्तिवाक्यावगतपुरोडाशसाधनके यागे साक्षात्साधनभावानर्हाणां व्रीहीणां 'व्रीहिभिर्यजेते' ति श्रुतं साधनत्वं पुरोडाशनिर्वर्तनद्वारोपपाद्यते, यथा वा गुणाभिधानरूपायां ऋक्साध्यायां स्तुतौ गीतिक्रियारूपतया साक्षात्साधनभावानर्हाणां साम्नां 'रथन्तरेण स्तुवीते'ति श्रुतिप्रतिपन्नं साधनत्वमृगक्षराभिव्यक्तिद्वारोपपाद्यते, यथा वा सङ्ख्यायाः क्रियायां द्रव्यवत्साक्षात्कारकभावानर्हाया 'श्चतुरो मुष्टीन्निर्वपती' ति श्रुतं निर्वापकर्मत्वं मुष्टिद्रव्यावच्छेदद्वारोपपाद्यते, तथेहापि श्रुतं शिवस्य जगदुपादानत्वं श्रुत्यन्तरावगतजगदुपादान-भावप्रकृतिपुरुषद्वारोपपादयितुं युक्तम्। न च वाच्यं, लक्षणमुखेन वेदान्ते ब्रह्मावधार्यते लक्षणं तस्योपादानत्वमित्युत्पत्तिशिष्टमुपादानत्वम्। उत्पत्तिशिष्टं तु नान्यद्वारोपपादनीयम्। साक्षात्वस्यौत्सर्गि-कत्वादिति। 'पशुना यजेत' 'सोमेन यजेते' त्युत्पत्तिशिष्टयोरपि पशुसोमयोर्विश-सनाभिषवादिवाक्यानुरोधेन हृदयादिद्वारा रसद्वारा च हविष्ट्वाङ्गीकारात्। ननु, भवत्वन्यद्वारा करणत्वादिनिर्वाहः। व्यापारव्यवधानेन कारणत्वाक्षतेः। उपादानत्वं त्वन्यद्वारा न निर्वहति तस्य साक्षादपृथक्सिद्धकार्यावस्थाश्रयत्वम्। न चान्यद्वारा कश्चिकस्यचिदाश्रयो भवति दण्डाश्रयाश्रयत्वे तद्द्वारा तदाश्रिताश्रयत्वाभावादिति चेन्न। 'प्रासादे शेते' 'पर्यङ्के शेते' इत्यादिलोकव्यहारे 'अक्षरमम्बरान्तधृते'रिति (ब्र० १.३.९) सूत्रकारव्यवहारे चान्यद्वारकाश्रयत्वानुमतावैकमत्यप्रदर्शनात्। न चान्यद्वारा कार्यावस्थाश्रयस्योपादानत्वे पटरूपं प्रति तन्तूनामुपादानत्वप्रसङ्गो दोषः। इष्टापत्तेः। एतेन

यथै 'न्द्या गार्हपत्यमुपतिष्ठेत' इत्यत्रो 'पान्मन्त्रकरणे' मन्त्रकरणकेऽर्थे वर्तमानादुपपूर्वात्तिष्ठतेरात्मनेपदविधानात् प्रतीयमानस्य मन्त्रे धात्वर्थ समीपावस्थानं प्रति करणत्वस्य मुख्यस्य कथञ्चिदपि निर्वोढुमशक्यत्वादभिधानशिरस्कत्वविशेषितं समीपावस्थानं प्रति करणत्वमौपचारिकमात्मनेपदालम्बनमिति कल्प्यते। एवं परम्परया कार्यावस्थाश्रयस्य कार्यं प्रति मुख्यमुपादानत्वं सम्भवतीति उपादानभूतप्रकृत्यादिविशिष्टस्य मुख्यमुपादानत्वं ब्रह्मोपादानत्वप्रतिपादकश्रुतीनामालम्बनं स्यादित्यपि शङ्का निरस्ता। साक्षात्परम्परासाधारण्येनापृथक्सिद्धकार्यावस्थाश्रयत्वमात्रस्य लक्षणत्वसम्भवेन गौरवपराहतसाक्षात्त्वविशेषणस्याप्रवेशादिति। तदेवं स्वतो निर्विकारस्यापि शिवस्य प्रकृतिद्वारा विकाराश्रयत्वं सम्भवतीति तस्य जगदुपादानत्वोपपादनं मनसि निधाय शिवस्य प्रकृतिद्वारा विकाराश्रयत्वं प्रकृतित्वेनाभिमतायास्तदीयचिच्छक्तेः परिणामित्वे सम्भवेत्तदेवाप्रमाणकमित्याशङ्का-निरासाय तत्र श्वेताश्वतरोपनिषदि श्रुतो मन्त्रः प्रमाणमित्यभिप्रेत्य तन्मन्त्रं पठित्वा तदर्थमाह—**यदा तम इति।** यद्य 'प्यत्ता चराचरग्रहणा' दित्यधिकरणे पूर्वार्धस्यार्थो वर्णितः, तथाप्युत्तरार्धस्यार्थं वर्णयितुं सोऽप्यनूदितः। अस्य मन्त्रस्याभिप्रायो भाष्यकाराभिमतोऽस्माभिर्जन्मादिसूत्रे प्रपञ्चितोऽनुसन्धेयः। महास्फुरत्तारूपा सकलप्रपञ्चानुगतस्फुरणरूपेत्यर्थः। अत एव तत्कालतमोऽपनोदिनी, तस्मिन्काले प्रलयारम्भादारभ्य सुषुप्ताविव जीवानां प्रपञ्चास्फुरणरूपं यत्तमोऽनुवृत्तं तस्यापनोदिनीत्यर्थः। **ज्ञानशक्तिः प्रसृतेति।** प्रलयदशायां शिवेनाविभागापन्नतया स्थिता पराशक्तिर्ज्ञानशक्तिरूपेण प्रवृत्तेत्यर्थः। अनेन मन्त्रे शक्तेः 'प्रसूतेत्यु' क्तिः तस्याः परिणामित्वे प्रमाणमिति दर्शितं भवति। एवं शक्तेः परिणामित्वे सम्भाविते सति शरीरस्य परिणामित्वात् शरीरविशिष्टस्य 'कृशोऽहं पुष्टः स्या'मिति सङ्कल्प इव सूक्ष्मचिदचित्प्रपञ्चरूपापन्नचिच्छक्तिविशिष्टस्य परमेश्वरस्य संविभक्तनामरूपचिदचित्प्रपञ्चापन्नचिच्छक्तिशरीरको भवेयमित्येवंभूतः 'सोऽकामयते' त्यादिश्रुत्युक्तः बहुभवनसङ्कल्पः 'इदं सर्वमसृजते' त्यादिश्रुत्युक्तस्संविभक्तनामरूपस्थूलप्रपञ्चसर्गः 'तस्माद्वे' त्यादिश्रुत्युक्तः सृष्टप्रपञ्चानुप्रवेशः 'तदनुप्रविश्ये'त्यादिश्रुत्युक्तः प्रविष्टचेतनाचेतनप्रपञ्चरूपापन्नचिच्छक्तिशरीरकतया प्राग्वर्णितरूपश्शिवस्य बहुधा परिणामः पुरुषस्य बालत्वयुवत्ववत्प्रपञ्चशरीरिणस्तस्य कारणत्वं कार्यत्वं च बालयुवपुरुषानन्यत्ववत् प्रतिज्ञादृष्टान्तसिद्धं कार्यकारणानन्यत्वं चेति सर्वमिदमुपपद्यत इत्याह— **ततस्सोऽकामयतेत्यादिना।** 'तत्सृष्ट्वा तदनुप्राविश' दित्यत्रानुप्रवेशे स्थूलसृष्ट्यनन्तरभावित्वं न विवक्षितम्। व्यापकस्य शिवस्य स्वापृथक्सिद्धे सूक्ष्मप्रपञ्चेऽपि अनुप्रवेशस्याविशिष्टत्वात्। किं तु 'मुखं व्यादाय स्वपिती'त्यत्र व्यादानोत्तरकालानुवर्तमानस्वापाभिप्रायेणेव सृष्टनन्तरकालानुवर्तमानानुप्रवेशाभिप्रायेण क्त्वाप्रयोगः। तदनन्तरकालानुवर्तमानानुप्रवेशानुवादश्च 'तदनुप्रविश्ये' त्यादिवाक्यफलभूतकार्यकारणानन्यत्वोपपादनार्थः। ननु, सर्वमिदमुपपद्यते यदि 'प्रज्ञा च तस्मा' दिति श्रुतौ परिणामित्वेन प्रसिद्धा शैवी

चिच्छक्तिः प्रपंञ्चस्य प्रकृतिर्भवेत्। तत्र प्रमाणं वक्तव्यम्। 'यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपिवा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इति नारायणस्यान्तर्बहिश्च जगव्द्याप्तिश्रुत्या जगदुपादानत्वमवसीयते। 'तस्माद्विराडजायते'त्यादिमन्त्रेषु साक्षाच्च तस्य तदाम्नायते। तद्विरोधश्च परिहरणीयः। नारायणस्य शिवशक्त्यंशत्वात्तद्वारा तस्याः प्रपञ्चप्रकृतित्वमिति न विरोध इति चेत् तर्हि तत्र प्रमाणं वाच्यमित्युक्ताकाङ्क्षायां तत्रोभयप्रमाणत्वमभिप्रेत्य श्वेताश्वतरमन्त्रं पठित्वा तस्य तात्पर्यमाह—**मायां त्विति।** वैदिकनिखण्टौ ज्ञानपर्यायेषु पठितेन मायाशब्देनात्र शैवी चिच्छक्तिरभिप्रेयते। ननु 'छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। तस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः'।। इति पूर्वस्मिन्मत्रे मायाया जीवं प्रति निरोधकत्वरूपं बन्धहेतुत्वमुक्तम्। सैव 'मायां तु प्रकृतिं विद्या'दित्यत्रापि परामृश्यते सा कथं सर्वानुग्राहकत्वेन प्रसिद्धा शैवी चिच्छक्तिः स्यात्। स्यादेव। जीवानां जीवत्वापादकस्य सकलसंसारनिदानस्य मलावरणस्याग्राहकतया रोधशक्तयाख्यस्य पाशत्वव्यपदेशस्य शिवागमेषु तस्यां प्रसिद्धत्वात्। यदाहुः 'तासां माहेश्वरी शक्तिस्सर्वानुग्राहिका परम्। परानुवर्तनादेव पाश इत्युपचर्यते।।' इति। अत एवाजामत्रे भजनीयाया अपि तस्यास्स्वेन रूपेण हातव्यत्वमुक्तं 'जहात्येनां भुक्तभोगामजोऽन्य'इति। कूर्म पुराणे च'कैषा भगवती देवी शङ्करार्धशरीरिणी। शिवा सती हैमवती यथावद्ब्रूहि पृच्छता'मिति प्रश्नोत्तरमध्ये तस्य सर्वजगत्सूतिः शक्तिर्मायेति विश्रुता। तयेदं भ्रामये दीशो मायावी पुरुषोत्तमंः। सैषा माहेश्वरी शक्तिस्सर्वाकारा सनातनी। सैव रूपं महेशस्य सर्वदा सम्प्रकाशयेत्। सर्वशक्त्यात्मिका माया दुर्निवारा दुरत्यया।' इत्यादिवचनजातं दृश्यते। या 'मायाया सन्निरुद्ध'इति पूर्वमन्त्रे प्रकृता तां मायामेव प्रकृतिं प्रपञ्चाकारेण परिणामिनीं विद्यात्। परमेश्वरं मायिनमेव तथातथा परिणममानमायाधिष्ठातारमेव विद्यात्। न तु साक्षात्स्वयं परिणामिनमिति पूर्वार्धस्यार्थः। 'तस्मान्मायी सृजते विश्वमेत'दिति पूर्वमन्त्रे पञ्चम्यन्तपदनिर्दिष्टमन्यदेव प्रकृतित्वेनोक्तम्। कथमस्मिन्मत्रे माया प्रकृतिरुच्यते। नैष दोषः। 'ऋचो अक्षरे परमे व्योमन्, गलिन्देवा अधिविश्वे निषेदुः यस्तन्न वेद किमृचा रिष्यति य इत्तद्विदुस्त इमे समासत'इति ततः पूर्वस्मिन्मन्त्रे 'यो वेद निहितं गुहायां परमे व्योम'न्निति श्रुत्यन्तरेषु ब्रह्मणो भिन्नत्वेन प्रसिद्धं परमव्योम प्रकृतं 'तस्मा' दितिपदेन निर्दिश्यते। ननु तस्य प्रकृतित्वे कथमजामन्त्रादिषु शिवशक्तेः प्रकृतित्वमित्याकाङ्क्षायां 'मायां तु प्रकृतिं विद्या' दित्युक्तम्। या पूर्वमुक्ता परमव्योमशब्दिता प्रकृतिः तां मायां शिवशक्तिमेव विद्यात् न तु ततोऽन्यत्परमव्योमेति न तद्विरोध इति भावः। मायायाः प्रकृतित्वेऽपि'आत्मन आकाशस्सम्भूत' इत्यादिश्रुतिषु ब्रह्मणः प्रकृतिव्यवहारेण विरोध इत्याकाङ्क्षायां तस्य प्रकृतित्वं मायाद्वारकं श्रुत्यन्तरेषूक्तं न तु साक्षादित्यभिप्रायेणं 'मायिनं तु महेश्वर'मिति शिवस्य मायाधिष्ठातृत्वमुक्तम्। एवं शिवपरमव्योममायाप्रकृतित्वव्यवहाराविरोधेऽपि 'अन्तर्बहिश्च तत्सर्वं

व्याप्य नारायणः स्थित' इत्यादिश्रुत्यन्तरे नारायणस्य प्रकृतित्वव्यवहारेण विरोधोऽस्तीत्याशङ्कायामुत्तरार्धम्। येन नारायणेन सर्वमिदं जगद्व्याप्तमिति श्रुत्यन्तरे प्रसिद्धं तेन मायाशब्दितपरमव्योमांशभूतेनैवैतद्व्याप्तं न तु स्वतत्रेणेति तस्यार्थः। एवमुत्तरार्धं 'येन नारायणेन व्याप्तं जग' दिति श्रुत्यन्तरे प्रसिद्धं तमनूद्य तस्य परमव्योमांशत्वविधायकं न तु परमव्योमांशमनूद्य तस्य जगत्प्रकृतित्वविधायकम्। तदंशस्य कस्यचित् जगदुपादानत्वे योग्यस्यानुवादार्हस्य कस्यचिदभावात्। नापि तदवयवस्य तदीयजगद्व्यापकत्वस्य च विधायकम्। वाक्यभेदप्रसङ्गात्। अतो मन्त्रोऽयमुभयत्राप्युक्तार्थे प्रमाणं भवत्येवेति भावः। एवं नारायणस्य शिवशक्तयंशत्वे 'मम योनिरप्स्वन्तस्समुद्र' इत्याम्भ्रणीसूक्तवचनमपि प्रमाणम्। स्वांशभूतस्य नारायणस्य समुद्रः योनिः स्थानमित्येवंपरतायां हि मम योनिरिति वचनं समञ्जसं भवति। इदं च नारायणस्य शिवशक्त्यंशत्वं हरिवंशे पारिजातसंहितायां पारिजातप्रार्थनार्थं भगवता निसृष्टार्थदूततयेन्द्रं प्रति प्रेषितेन नारदेन नानाविधोपायैः प्रार्थित इन्द्रः यदा पारिजातं न दातुमैच्छत्तदा 'य एको विश्वमध्यास्ते प्रधानं जगतो हरः। प्रकृत्या यं परं सर्वे क्षेत्रज्ञं वै विदुर्बुधाः। तस्याव्यक्तस्य यो व्यक्तो भागः स च सवोद्भवः। तस्यात्मा प्रथमो देवो विष्णुस्सर्वत्र धीमतः। प्रकृत्याः प्रथमो भाग उमा देवीह शाश्वती। व्यक्तस्सर्वमयो विष्णुः स्त्रीसंज्ञो लोकभावनः। रुक्मिण्याद्याः स्त्रियस्तस्य व्यक्तत्वे प्रथमो गुणः। अव्यक्ता प्रकृतिर्देवी गुणी देवो महेश्वरः। न विशेषोऽस्ति रुद्रस्य विष्णोश्चामरसत्तम। गुणिनश्चाव्यवायाच्च सादरः प्रभृतो गुणः। नारायणो महातेजाः सर्वकृल्लोकभावनः। भोक्ता महेश्वरो देवः कर्ता विष्णुरधोक्षजः। ब्रह्मा देवगणाश्चान्ये पश्चात्सृष्टा महात्मना। महादेवेन देवेशाः प्रजापतिगणास्तथा। एवं पुराणपुरुषो विष्णुर्वेदेषु पठ्यते। अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा॥' इति भगवद्वाक्यस्यावश्यपरिपालनीयत्वोपदेशनार्थे तस्य महिमातिशयं दर्शयता नारदेनाविष्कृतम्। तत्र हि 'य एक' इति श्लोकेन शिवं प्रकृत्य 'तस्याव्यक्तस्ये'ति श्लोकार्धे 'प्रज्ञा च तस्मा'दिति श्रुतिसिद्धं ततश्चिच्छक्त्युन्मेषं पुरस्कृत्य 'तस्यात्मे'ति तदुत्तरार्धेन विष्णोश्चिच्छक्त्यंशत्वमुक्तम्। एवं 'प्रकृत्याः प्रथमो भाग' इति श्लोकेनापि, श्रुतम्। तत्र 'स्त्रीसंज्ञ' इत्यस्य विष्णुरुमारूपतया स्त्रीत्वेन सम्यक्पुराणादिभिर्ज्ञायत इत्यर्थः। 'घञर्थे कविधानं कर्तव्य' मिति घञर्थे कर्मणि प्रत्ययः। इदं विष्णोरुमांशतया तद्रूपत्वं श्रीकूर्मपुराणे 'कैषा भगवती देवी शङ्करार्धशरीरिणी। शिवा सती हैमवती यथावद्ब्रूहि पृच्छता'मिति ऋषीणां प्रश्नमवतार्य 'तेषां तद्वचनं श्रुत्वा ऋषीणां पुरुषोत्तमः। प्रत्युवाच महायोगी ध्यात्वा स्वं परमं पद'मिति श्लोके तदानीमुपदेश्यत्वेनौचित्याद्ध्यानविषयतया प्राप्तायामुमायां 'स्वं परमं पद' मिति विशेषणेनाविष्कृतम्। तत्रैव कृष्णतपश्चर्य्यानन्तरं शिवेन सह प्रत्यक्षीभूताया उमायाः कृष्णं प्रति 'वत्स जाने तवानन्तां निश्चलां सर्वदाच्युत। अनन्यामीश्वरे भक्तिमात्मन्यपि च केशव। त्वं हि नारायणस्साक्षात्सर्वात्मा पुरुषोत्तमः। प्रार्थितो दैवतैः पूर्वं सञ्जातो

देवकीसुतः। पश्य त्वमात्मनात्मानममलं परमं पदम्। नावयोर्विद्यते भेद ऐक्यं पश्यन्ति सूरयः।।' इति वचनेनापि स्फुटीकृतम्। एवमादित्यपुराणादिष्वपि वचनान्युदाहर्तव्यानि। एवं स्त्रीत्वेन पुराणादिप्रसिद्धस्य कथं रुक्मिण्याद्याः स्त्रिय इत्याशङ्कापरिहाराय 'रुक्मिण्याद्या'इत्यर्धे शिवशक्तिरूपतया स्त्रीत्वेऽपि तस्य पुरुषरूपेण व्यक्तत्वे सति रुक्मिण्याद्याः स्त्रिय इत्येतदुपपन्नमिति भावः। 'प्रथमो गुण' इति तासां प्रधानमहिषीत्वेन तदर्थं पारिजातप्रदानस्यावश्यकत्वज्ञापनाय प्रकृतोपयोगितयोक्तम्। 'अव्यक्ता प्रकृति'रिति श्लोकेन शक्तिशिवयोर्गुणगुणिभावेनाविशेषं प्रदर्श्य शक्तयंशत्वाद्विष्णोरपि शिवान्नास्ति विशेप इति समर्थितम्। एतदभिप्रायेणैव श्रीकूर्मपुराणे देवकन्याः प्रति शिववचनम्—'मामेव केशवं देवमाहुर्देवीमथाम्बिकाम्। एष धाता विधाता च कारणं कार्यमेव च। कर्ता कारयिता विष्णुर्भुक्तिमुमुक्तिफलप्रदः। भोक्ता पुमानप्रमेयः संहर्ता कालरूपभृत्। स्रष्टा पाता वासुदेवो विश्वात्मा विश्वतोमुखः। कूटस्थो ह्यक्षरो व्यापी योगी नारायणाह्वयः। तारकः पुरुषो ह्यात्मा केवलं परमं पदम्। सैषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना। शान्ता सत्या सदानन्दा परं पदमिति श्रुतिः। अस्यास्सर्वमिदं जातमत्रैव लयमेष्यति। एषैव सर्वभूतानां गतीनामुत्तमा गतिः। तयाहं सङ्गतो देव्याः केवलो निष्कलः परः। पश्याम्यशेषमेवेदं यस्तद्वेद स मुच्यते। तस्मादनादिमध्यान्तं विष्णुमात्मानमीश्वरम्। एवमेकं विजानीध्वं ततो यास्यथ निर्वृति'मिति। एवं शिवशक्तयंशत्वेन नारायणस्य तदुभयगुणत्वं रुक्मिणीसत्यभामादिस्वशक्तिसहितस्यैव न तु केवलस्येति प्रकृतोपयोग्यर्थो 'गुणिनश्चे' ति श्लोकेन दर्शितः। 'भोक्ता महेश्वरो देव' इति श्लोकेन संहारपालनसृष्ट्यधिकृतानां गुणमूर्तीनामिन्द्रादीनां च सृष्टेः प्रागेव चिच्छक्त्यंशभूता-दिनारायणोन्मेषप्रदर्शनेन तस्य सर्वोत्तरत्वमाविष्कृतम्। उक्तस्य सर्वस्याप्यर्थस्य वेदमूलतया श्रद्धेयत्वमेव 'पुराणपुरुष' इति श्लोकेन दर्शितम्। 'तदीयचिच्छक्तिशकलेने'त्यनेन 'विश्वोत्तरोत्तरविचित्रमनोरथस्य यस्यैकशक्तिशकले सकलः समाप्त' इति पुराणवचनार्थः स्मारितः।

भोक्तृत्वदशायां पुरुषसंज्ञकेनेति अयमर्थो भट्टभास्कराचार्यैरपि तैत्तिरीयारण्यकभाष्ये आनन्दवल्लीविवरणोपक्रमे दर्शितः। तत्र हि'अत्रेयमौपनिषदस्थिति'रित्युपक्रम्य 'ब्रह्मैकं नित्यं स्वप्रकाशं विचित्रानन्तशक्तिकं स्वतन्त्रैकस्वभावं स्वे महिम्नि सदा महीयमानं प्रकृतिश्चोपादानं च विश्वस्य भवति, निमित्तं च भूत्वा विश्वमधितिष्ठती'त्यादिना शिवं निरूप्य तत्रैव प्रकृतिश्चिदचिदात्मकप्रपञ्चत्वेन परिणमते सैषा परस्य ब्रह्मणः प्रभास्थानीयेति तदीयचिच्छक्तिस्वरूपनिरूपणमुपक्रम्य 'तत्र सर्वेऽप्यात्मानः प्रभवन्ती'ति सर्वेषां जीवानां प्रभाशालित्वस्य तादधीन्यमुक्तम्। अतस्स परमात्मा सर्वात्मप्रभासमष्टिरिति सर्वात्मप्रभा-समष्टिरूपतया तस्याः परमात्मशब्दनिर्देश्यतामभिधाय तस्याश्शिवापृथग्भावे 'अग्नेरौष्ण्यं यथा यद्वदादित्यस्य प्रभा तथा। परमात्मा शिवादन्यो नास्तीति मुनयो विदु'रिति प्राचीनश्लोकमदाहृत्य 'सैव

भोक्तृत्वशरीरे'त्यभिधानात् पुरुषो भवतीत्युक्तम्। तत्र च तस्य भोक्तृत्वं स्वोपादानचतुर्मुखादि-प्रपञ्चाधिष्ठातृत्वं विवक्षितम्। तस्मिन्नेव भाष्ये 'यस्मिन्निदं संचविचैकं स ओतः प्रोतश्च विभुः प्रजा'स्विति मन्त्रगतोतप्रोतशब्दयोः 'ओतः कारणत्वेन सन्ततः, प्रोतोऽधिष्ठातृत्वेन भोक्तृत्वपर्यायेण तस्मिन्नविकारेण सन्तत' इति व्याख्यानसमये भोक्तृत्वमधिष्ठातृत्वमिति दर्शितत्वात्। ततश्च 'भोक्तृत्वदशायां पुरुषसंज्ञकेने'त्यनेन ब्रह्मादिसकलचिदचित्प्रपञ्चाधिष्ठातृत्वरूपस्वातन्त्र्यनिमित्ता नारायणस्य पुरुषसंज्ञेत्युक्तं भवति। एतदभिप्रायेणैवोक्तं नारसिंहपुराणे 'सदैव वासुदेवोऽयं साक्षात्पुरुष उच्यते। स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरस्सर' मिति। **सकलजगव्द्याप्तिश्चेति।** ननूदाहृतमन्त्रेण महेश्वरस्य मुक्तौ **जीवस्य स्वप्र**भाद्वारेव नारायणद्वारा सकलजगव्द्याप्तिर्नावगम्यते किं तु नारायणस्यैव। 'तदवयवभूते' नेति **हि** कर्तरि तृतीया। सत्यम्। तथापि नारायणस्य महेश्वरशत्तय-वयवत्वोक्तिसामर्थ्यात्तदीया व्याप्तिरवयवद्वारा शिवस्यैव। यथा देवदत्तावयवभूतहस्तकर्तृकः स्पर्शोऽवयवद्वारा देवदत्तस्यैव भवतीति श्रुतेस्तात्पर्यमवगम्यत इत्यभिप्रेत्य तथा व्याख्यातम्। इयांस्तु भेदः। जीवस्य मुक्तौ प्रभयैव जगव्द्याप्तिश्शिवस्य तु स्वरूपेण प्रभया तदंशभूतेन नारायणेन चेति। स्यादेतत्। चिच्छक्तेः परिणामित्वं 'प्रज्ञा च 'तस्मा' दिति श्रुत्या जगदुपादानत्वं 'मायां त्वि'ति श्रुत्या चावगम्यते। ततोऽस्या एवोपादानत्वमस्तु किमपरिणामिस्वभावस्य शिवस्यापि पारिभाषिकोपादान-त्वाश्रयणेनेत्याशङ्क्याह–**यथेति।** शरीरात्मनोः परिणाम्यपरिणामिस्वभावत्वेऽपि केवलस्य शरीरस्य लोमनखाद्युपादानत्वं नास्ति किं तु सात्मकस्यैव यथा, एवं परिणामिन्या अपि केवलायाश्चिच्छक्तेर्न जगदुपादानत्वं किं तु शिवाश्रिताया एव। अतश्शरीरविशिष्टस्यात्मनोऽपि केशनखादाविव मायाविशिष्टस्य शिवस्यापि जगदुपादानत्वं न पारिभाषिकं किं तु 'तथा सतः पुरुषात् केशलोमानि तथाक्षरात्सम्भवतीह विश्व'मिति सयुक्तिकश्रुतिसिद्धमिति भावः। दृष्टान्तदार्ष्टान्तिकवाक्ययोरात्मनः महेश्वराच्चेति केवलात्मनः केवलमहेश्वराच्च कार्योत्पत्त्यसम्भवप्रदर्शनं दृष्टान्तार्थम्। ननु शरीरविशिष्टादात्मनः केशनखादेरिव मायाविशिष्टन्महेश्वराज्जगत उत्पत्तिरित्यङ्गीकारे तत्रैवोपादान-त्वविश्रान्तिः स्यात् कथं पुरुषस्याप्युपादानकोटिप्रवेश इत्याशङ्क्याह–**मायिन इति।** तथा च सर्गाद्यकाले प्रथमोन्मिषितायाश्चिच्छक्तेस्सकाशादभिव्यक्ते पुरुषे तच्छरीरात्परमेश्वरादव्यक्त-चतुर्मुखाद्युत्पत्तिरिति युक्तमस्याप्युपादानकोटिप्रवेश इति भावः। यद्यप्यव्यक्तं सूक्ष्मरूपेण प्रलयेऽप्यस्ति तथापि यथा चतुर्मुखस्य ज्ञानविकासवत्त्वेन शरीरविशिष्टत्वेन च पुरुषादुत्पत्तिः एवमव्यक्तस्यापि 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यह' मित्यादिवचनोक्तरीत्या कार्यौन्मुख्यविशिष्टरूपेण तत उत्पत्तिरस्तीत्यभिप्रेत्याव्यक्तग्रहणं कृतम्। परमेश्वरस्य पुरुषशरीरकत्वे श्रुतिमुदाहरति–**तथेति।** 'पुरुषो वै रुद्र' इति सामानाधिकरणं पुरुषशरीरकत्वाभिप्रायमिति भावः। तस्मान्निर्विकारस्यापि परमेश्वरस्य जगदुपादानत्वं सर्वविज्ञानोपपादकं स्वयमेवोपादानत्वं चोपपन्नमित्युपसंहरति–**तत इति**।।सू।। **योनिश्च**

हि गीयते॥२८॥ स्यादेतत्। चिच्छक्त्यवस्थाविशेषरूपस्य पुरुषस्य जगदुपादानत्वाङ्गीकारे प्रतिज्ञादृष्टान्ताभिध्योपदेशसाक्षादुभयाम्नानात्मकृतयस्तद्विषयतया चिच्छक्तिविषयतया वा प्रामाण्यं लभन्ते। परिणामहेतुश्च सामञ्जस्यं लभते। निर्विकारसाक्षिरूपतया श्रुतिशतप्रतिपन्नस्य परमशिवस्य जगदुपादानतायां नैतानि प्रमाणानि भवितुमर्हन्तीत्याशङ्कां मनसि धारयन्निराकरणार्थत्वेनेदं सूत्रं व्याचष्टे—**साक्षादिति।** 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्।' इति कैवल्योपनिषदि समस्तसाक्षित्वतमः परत्वलिङ्गाभ्यां 'स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमः स्वराट्' 'स एव विष्णुः स प्राणः स कालोऽग्निस्स चन्द्रमाः। स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्। ज्ञात्वा यं मुत्युमत्येति नान्यः पन्था विमुक्तये' इति तद्वाक्यशेषे सकलप्रपञ्चशेषित्वमोक्षोपायसाक्षात्करणीयत्वलिङ्गाभ्यां चावगमिते साक्षात्परब्रह्मणि परमशिव एव सकलकार्योपादानत्ववाचिभूतयोनिशब्दो दृश्यते। अतस्तस्योपादानत्वाभ्युपगम आवश्यक इति नोपादानत्वप्रापकाणां परब्रह्मपरश्रुत्यन्तराणामन्यत्र नयनक्लेशस्समाश्रयणीय इति भावः। अधिकरणमुपसंहरति—**ततश्चेति।** यन्निमित्तं परं ब्रह्म तदेवोपादानमपीत्यर्थः॥

अथ सर्वव्याख्यानाधिकरणम्।

॥सू॥ **एतेन सर्वे व्याख्याता व्याख्याताः**॥२९॥

'एतेन योगः प्रत्युक्त' इत्यादाविवैतेनेत्यस्याव्यवहितपूर्वाधिकरणन्यायमात्रातिदेशार्थत्वशङ्कामपाकरोति—**एतेनेति।** पूर्वोत्तराधिकरणोदाहृतोदाहरिष्यमाणेभ्यो वेदान्तवाक्येभ्योऽन्यानि यानि ब्रह्मपराण्यनिर्णीतार्थानि वेदान्तवाक्यानि तेषामेव परामर्शार्थः सर्वशब्दो न भवति किं तु ये कर्मकाण्डे ब्रह्मप्रतिपादका मन्त्रब्राह्मणभागाः स्मृतिपुराणेतिहासाः सिद्धान्ततन्त्रादय आगमाः योगशास्त्रादयोऽभियुक्तसूक्तिविशेषाश्च तेषां सर्वेषामपि परामर्शार्थः। शास्त्रयोनिसूत्रे शास्त्रशब्दस्य ब्रह्मप्रतिपादकसकलशब्दज्ञानपरत्वादित्यभिप्रेत्याह—**कर्मकाण्डेत्यादि। द्विरुक्तिरिति।** यद्यपि द्विरुक्तेर्नित्यवीप्सादिरिव समाप्तिरर्थत्वेन नानुशिष्टा। तथापि 'न च पुनरावर्तते न च पुनरावर्तते'इत्यादिश्रुतिषु 'मातेत्येके मातेत्येके'इत्यादिस्मृतिषु च समाप्तेर्द्विरुक्तेरर्थत्वावगमादिहापि तदर्थत्वमवसीयत इति भावः। तत्र वा कथं तयोः समाप्त्यर्थत्वमवसीयते येन तद्वदिहापि समाप्त्यर्थत्वं स्यादिति चेत् उच्यते। इतः परमस्मिन्विषये वक्तव्यान्तरं नास्तीति श्रोतृणामाकाङ्क्षाशान्तये स्वयमेव स्वसमाप्तिप्रतिपादनमथर्वशिखायां दृष्टं 'शिव एको ध्येयश्शिवंकरः सर्वमन्यत्परित्यज्य समाप्ताथर्वशिखे' ति। एवं श्रोतृबुद्धिसौकर्याय स्वयमेव स्वसमाप्तिप्रतिपादनस्य क्वचिद्दृष्टत्वात् अन्यत्र द्विरुक्तेरोचित्यात् स एवार्थोऽवसीयते। **प्रकरणभेदादिकमिति।** पुरुषसूक्तादीनां कर्मकाण्डमध्यपठितानां मन्त्रब्राह्मणानां

प्रकरणभेद: पूर्वपक्षकोटिबीजम्। तेषां स्मृतिपुराणादीनां च नानादेवताविषयं श्रुतिलिङ्गादिक-मादिशब्दग्राह्यं कोटिद्वयस्यापि बीजम्। **पुरुषसूक्तादीनामिति।** अयं भाव:। पुरुषसूक्तं तावत्सर्वेष्वपि वेदेषु कर्मकाण्डमध्य एवाग्निचयनादिप्रकरणेषु पठ्यते। ततश्च तस्य प्रकरणादवगम्यमानं कर्माङ्गत्वं तत्प्रतिपाद्यसमर्पकचेतनवाचिपुरुषशब्दसामर्थ्यरूपाल्लिङ्गात् कर्तृप्रकाशानद्वारकं पर्यवस्यति। अग्निचयनादिषु चेतनस्य हविरादिरूपेण विनियोगाभावात् तेषु पुरुषशब्दनिर्दिष्टदेवताविरहाच्च। न च कर्मानुष्ठाने तत्प्रत्युपयोगिदेहान्तरभोग्यस्वर्गकामनादिसिद्धये तत्प्रवृत्ते: पूर्वदेहातिरिक्तकर्तृभोक्तृ-रूपात्मनिश्चयापेक्षणेऽपि कर्मानुष्ठानमध्ये तत्प्रकाशनं नापेक्षितमिति वाच्यम्। तन्मध्येऽ'प्यगन्म सुव: सुवरगन्म' 'अपाम सोमममृता अभूम' इत्यादिमन्त्रप्रतिपाद्यभाविस्वर्गप्राप्त्याद्यनुसन्धानार्थं देहातिरिक्तजीवात्मप्रतिपत्त्यनुवृत्तेरपेक्षितत्वात्। 'अगन्म सुव'रित्यादिमन्त्रेषु स्वर्गादिफलविवक्षाया: फलदेवताधिकरणे स्थापितत्वात्। सम्भवति च पुरुषसूक्तत: देहातिरिक्तजीवात्मप्रतिपत्ति:। तत्र हि प्रथममेव सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् सर्वभूमिव्यापक: तामतीत्योर्ध्वमवस्थाता च प्रतिपाद्यते। तत्रापरिमितसङ्ख्यापर: सहस्त्रशब्द:। ततश्चानादावस्मिन्संसारे पर्यायेणापरिमितयशरीर-परिग्रहादपरिमितमूर्धाननो भवति। एवं प्रतिपादनेनाक्षिशिर: पर्यायेण तत्रतत्र देहे जन्मना सञ्चारेण सर्वभूतव्यापक: कदाचित् पक्षिजन्मना वायूद्धारणाभ्यासेन वा भूमिमतीत्यावस्थाता च यजमानो भवति। एवं प्रतिपादनेन चानादिकालप्रवृत्ततत्कर्मफलभूतापरिमितशरीरानुस्यूत: एक: कर्त्ता भोक्ता चात्मा सिद्ध्यति। यदि च 'सहस्त्रशीर्षे'त्यादिपदेषु व्यवस्थितसङ्ख्याविशेषपर: सहस्त्रशब्द: तथापि क्वचिज्जन्मनि शेषभावेन सहस्त्रशीर्षा क्वचन शक्रभावेन सहस्त्राक्ष: कदाप्यादित्यभावेन सहस्रपादित्यधरोत्तरमध्यलोकप्रधानभूतशेषशक्रादित्यभावोपलक्षितत्रैलोक्यान्तर्गतसर्वप्राणिभावप्राप्त्यु-पयोगि 'वेदाहमेत' मिति मन्त्रेण वर्ण्यते। यजमानो ह्यनादिकालप्रवृत्तापरिमितशरीरानुस्यूततया कालानवच्छिन्नो महान्भवति। आदित्यवर्णश्च 'प्राणधिपस्सञ्चरति स्वकर्मभि: अङ्गुष्ठमात्रो रवितुल्यरूप'इति श्रुत्यन्तरप्रसिद्धे:। तमस: पारे दिव्ये धाम्नि भविता 'दिव्यं धामाशास्ते दिवि ज्योतिरजरमारभेताम्'इत्यादिप्रस्तरप्रहरणपत्नीयाजहोमादिकरणमन्त्रप्रतिपन्नस्य दिव्यधामप्राप्त्यादि-फलस्य विवक्षितत्वात्। अङ्गेष्वर्थवादगतैव फलश्रुतिरविवक्षिता, करणमन्त्रप्रतिपन्ना तु विवक्षितेति सूक्तवाकाधिकरणादिषु प्रसिद्धत्वात्। कर्मणामप्यन्त: करणशुद्धिद्वारा ब्रह्मसाक्षात्कारोपयोगितया मुक्तिफलकत्वसम्भवात्। 'अपाम सोमममृता अभूमे' ति मन्त्रे अमृतत्वप्राप्तिद्वारतया ब्रह्मसाक्षात्कारस्य 'अदृश्य ज्योति'रिति वाक्येन दर्शितत्वाच्च। यजमान: पर्यायेण देवमनुष्यादिरूपाणि तत्तदुचितनामानि चादृष्टद्वारेण संप्राप्य तैस्सहाभिमुख्येन व्यवहरतीति 'सर्वाणि रूपाणि'त्यादि तदुत्तरार्धमप्युपपद्यते। 'धाता पुरस्ता'दिति मन्त्रेण यदेत्तत्सूक्तप्रतिपाद्यपुरुषस्य धात्रा शक्रेण वर्णितत्वमुक्त्वा तद्वर्णितरूपेण तद्विशिष्ट एवामृतत्वपित्युच्यते। तज्जीव एवसङ्गच्छते। न ब्रह्मणि।

धात्रा शक्रं प्रति शक्रेण प्रतर्दनं प्रति च वर्णितेनापहतपाप्मत्वादिना शरीराद्यतिरिक्तेन च रूपेण स्वात्मानं जानत एवामृतत्वमिति युज्यते हि, 'एक आत्मन (ब्र० ३.३.५१. सू)' इत्यधिकरणे तथा वक्ष्यमाणत्वात्, प्रजापतिविद्योक्तेन प्रतर्दनाख्यायिकोक्तेन च रूपेण ब्रह्म विदुषोऽप्यमृतत्वप्राप्तिसत्त्वात्। 'यज्ञेन यज्ञमयजन्त'त्यादिमन्त्रे च यष्टृप्रतिपादनमपि देहातिरिक्तकर्तृभोक्तृरूपतया सूक्तस्य यजमानपरत्वेन सङ्गच्छते। यत्तु, यजमाने 'ब्राह्मणोऽस्य मुखमासी'दित्यादि नान्वेति तत्सर्वमदृष्टार्थं काल्पनिकविशेषणाभिधानमस्तु। असमवेतस्यापि समवेतविशेषणस्याभिधानं मन्त्रश्रुतविशेषणविशिष्टरूपप्रकाशनमभ्युदयकारि 'नियमादृष्टार्थमिति वचनं तेषामितरार्थं प्रयुज्यत' इति नावमिकाधिकरणे व्यवस्थापितत्वात्। 'अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां निर्वपामी'ति मन्त्रान्तरेषु तथा दर्शनात्। इह 'कतिधा व्यकल्पय'न्निति पूर्वत्र तथा लोका अकल्पय'न्नित्युत्तरत्र च 'ब्राह्मणोऽस्य मुखमासी'दित्यादेः काल्पनिकार्थविषयत्वस्य स्पष्टीकरणाच्च। एवं पुरुषसूक्तस्य यजमानपरत्वादेव ब्रह्ममेधसंस्कारेऽप्यस्यानुवाकस्य 'अभ्द्यस्सम्भूत' इत्येतदेक-विषयस्योत्तरानुवाकस्य च प्रमीतयजमानोपस्थाने विनियोगः कल्पसूत्रे दृश्यते। अथ 'नारायणाभ्यामुपस्थान'मिति। यत्तु शतपथब्राह्मणेन 'युक्तात् पुरुषात् ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिप्रैति सहस्त्रशीर्षा पुरुषः सहस्त्राक्षस्सहस्त्रपा' दित्येतेन षोडर्चेन ''षोडशकलं वा इदं सर्वं सर्वस्याप्त्यै, सर्वस्यावरुध्द्यै' इति ''उपाकृतान्दक्षिणतोऽवस्थाप्य ब्रह्मा 'सहस्त्रशीर्षा पुरुष' इति पुरुषेण नारायणेन परा चानुशंसती'' त्यापस्तम्बसूत्रेण च पुरुषमेधे पशुत्वेन नियुक्तानां पुरुषाणां स्तवने विनियोगविधानं तदप्यस्य सूक्तस्य जीवपरत्वादेवोपपद्यते। न हि यजमानासाधारणमिदं सूक्तमिष्यते। पर्यायेण 'सहस्त्रशीर्षे' त्यादेर्लिङ्गस्य सर्वजीवसाधारण्यात् उदाहृतब्राह्मणे 'षोडशर्चेने' त्यर्थवादे 'षोडशकलं वा इदं सर्व'मिति वाक्येन 'षोडशकलस्सोऽस्य पुरुषः षोडशकलाः पुरुषायणाः' इति श्रुत्यन्तरानुसारात् सर्वमिदं जीवजातं षोडशकलमित्येतदर्थकेनास्य सर्वजीवसाधारण्यस्फुटीकरणाञ्च। एवं जीवसाधारण्यपरत्वे स्थिते 'यजेत्पुरुषसूक्तेन वरुणं विश्वरूपिणम्।' 'यजेत्पुरुषसूक्तेन धनदं विश्वरूपिण'मित्यादीनि शातातपस्मृत्यादिदृष्टानि विनियोगान्तराण्युपपद्यन्ते। यत्त्वापस्तम्बसूत्रे 'पुरस्तात्प्रतीची पुरुषाकृति चिनोति पुरुषशिरोऽस्याः शिरो भवीत'ति यदग्नौ पुरुषाकृत्युपधानं विधाय 'सहस्त्रशीर्षा पुरुष' इत्युपहितां 'पुरुषेण नारायणेन यजमान उपतिष्ठत' इति तदुपस्थाने विनियोगविधानं तत् पुरुषाकृतिसत्त्वात् पुरुषशिरस्संयोजनाच्च पुरुषत्वकल्पनयोपपद्यते। नन्वस्य सूक्तस्य श्रुतिस्मृतिपुराणपाञ्चरात्रागमेषु विष्णुपूजायां विनियोगः प्रसिद्धतरः। एतत्सूक्तप्रतिपाद्यसहस्त्रशीर्षत्वादिविशिष्टब्राह्मणाद्युत्पत्तिस्थानभूततत्तदवयवयुक्तं च रूपं विष्णोरुपदिष्टं विष्णुपरतयोपबृंहणं च पुराणेषु दृश्यते। सत्यम्। 'ब्राह्मणोऽस्य मुखमासी' दित्यादिनोक्तानि विशेषणानि सर्वोपादाने विष्णावन्वितान्येव सूक्तप्रतिपाद्ये पुरुषे समारोप्य वर्णितानि

'इयमेव सा या प्रथमा व्यौच्छत्। अन्तरस्यां चरति प्रविष्टा। वधूर्जजान नवगज्जनित्री। त्रय एनां महिमानस्सचन्ते' इति मन्त्रे चिच्छक्तयन्वितविशेषणानीवेष्टकाविशेषे। चिच्छक्तिर्हि सर्गादौ प्रथममाविर्भूता सती वौच्छत् तमो विवासितवतीति 'प्रज्ञा च तस्मात्प्रसृता पुराणी'ति 'एषो उषा अपूर्वा व्युच्छती प्रिया दिव' इत्यादिश्रुतिप्रसिद्धा। सैवास्यां भूमौ सर्वोपादानभावेन सर्वस्यान्तःप्रविष्टा। सैव नवगत् नवं नित्ययुवानं पतिं शिवं गता प्राप्ता सती वधूर्नवोढेव स्थिता जनित्री जजान सर्वस्य लोकस्य जनयित्री जाता। तामेव त्रयो महिमानः इन्द्राद्यपेक्षया महिमवन्तः त्रयो देवाः ब्रह्मविष्णुरुद्राः। सचन्ते समवयन्ति सेवन्ते। तथापि-'इयमेव से' त्युपधेयेष्टकैव मन्त्रोक्तविशेषणविशिष्टतया वर्ण्यते। अत एव 'इयमेव सा या प्रथमा न्यौच्छ' दित्यादेः 'एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्य'दित्यन्तस्य पञ्चदशर्चस्यानुवाकस्य पञ्चदशेष्टकोपधाने विनियुक्तस्यापि वास्तव-विशेषणान्वयानुसारेण देवीसूक्तत्वेनापि प्रसिद्धिः। एवमिहापि विष्णुपूजासु विनियोगा उपपद्यन्ते। एतेन उत्तरनारायणाख्यतदुत्तरानुवाकोऽपि व्याख्यातः। तस्यापि 'वेदाहमेत'मिति मन्त्राम्नानेन तदैकार्थ्यात्। किं चात्र प्रथमं 'अभ्द्यस्सम्भूतः पृथिव्यै रसाच्चे' ति अप्शब्दोपलक्षितेभ्यः भूतेभ्यः पृथिवीरसादन्नञ्च सम्भूततया विश्वकर्मशब्दोक्तस्य स्त्रष्टुरीशितव्यतया च सूक्तप्रतिपाद्यः पुरुषो वर्णितः। 'विश्वकर्मण' इत्यत्र सप्तम्याश्छान्दसेन व्यत्ययेन षष्ठी। ऐश्वर्यार्थस्याधेः कर्मप्रवचनीयस्य योगे 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी'ति सप्तम्या हि भाव्यम्। 'तस्य त्वष्टा विदधद्रूपमेती' त्यनेन तस्य पुरुषस्य रूपनिर्माण एव स्त्रष्टान्तः प्रविशतीति सृष्ट्वा तस्येशितव्यतया उपयुक्तं तेनान्तः प्रविष्टत्वमुक्तम्। तदेतदग्रे प्राक् सञ्जातं पुरुषस्य सर्ववृत्तान्तमाजानं ज्ञातवानस्मीति कर्मानुष्ठातुस्तद्विषयं ज्ञानमनूदितम्। 'आजान' मित्याङ्पूर्वाज्जानातेर्लङि ह्रस्वश्छान्दसः। 'वेदाहमेत'मिति मन्त्रेणोक्तरूपवेदनमनूद्य तथा विदुष एवामृतत्वप्राप्तिरुक्ता। 'प्रजापतिश्चरती'ति मन्त्रेण तस्य स्वतो नित्यस्यापि गर्भवासपूर्वकं नानाशरीरोपाधिकं बहुधा जननमुक्त्वा तज्जनने मरीचीनां पदं कारणमुक्तम्। मरीचिसमष्टिरूपा चिच्छक्तिः मरीचीनां पदम्। एतदनुसारेणोत्तर-मन्त्रनयनमपि न्याय्यम्। एवमन्येषामपि कर्मप्रकरणगतानां मन्त्रब्राह्मणानां कर्मान्वयितत्तदर्थविषयत्वेन योजनं द्रष्टव्यमिति। **कतिचिच्छक्तिमेवेति।** सिद्धान्तेऽपि शक्तेर्जीवविशेषणतया ब्रह्मकोटिनिवेशा-देवकारः। **एवमनवस्थेति।** अव्यवस्थेत्यर्थः। लिङ्गदर्शनादित्युक्तमर्थं विवृणोति-**तस्मादिति।** अयमाशयः। 'तस्माद्विराडजायत विराजो अधिपूरुष' इति अव्यक्तचतुर्मुखकारणत्वप्रतिपादनमुखेन सकलजगत्कारणत्वमिह प्रतिपाद्यते। न चेदमारोपितमिति युक्तम्। बाधकाभावात्। न हि प्रकरणं लिङ्गस्य बाधकम्। 'तमसस्तु पार'इत्यत्र तमःपारवर्तित्वं नित्यसिद्धमेवात्र ग्राह्यं न तु श्रवणमननादिहेतुसाध्यम्। हेत्वाक्षेपकल्पनागौरवात्। 'तमेवं विद्वानमृत इह भवती'त्यत्र यः श्रवणमननादिपूर्वकेण ज्ञानयोगेनाराधितः प्रसन्नस्सन्नमृतत्वं दातुमीष्टे तज्ज्ञानादिहामृतत्वमुच्यत इति

वक्तव्यम्। 'उतामृतत्वस्येशान'इति प्रागुक्तत्वात्। तस्मादिह 'अमृतहेतुत्वादीनां परमेश्वरलिङ्गाना' मिति आदिशब्देनोत्तरनारायणादिगतानि श्रीपतित्वलिङ्गान्यपि सङ्गृहीतानि। तैत्तिरीयपाठे ह्रीशब्दोऽपि श्रीपर एव। वाजसनेयके समानप्रकरणे 'ह्रश्च ते लक्ष्मीश्च पत्न्या'विति पाठादिति। **अत ईश्वर एवात्रेति।** पूर्वपक्षोक्तरीत्या जीवपरत्वशङ्काया निरासार्थ एवकारः। अत्रायमाशयः। पुरुषशब्दस्य चेतनसामान्यवाचितया कर्मप्रकरणानुरोधेन यजमानपरत्ववर्णनं तावदयुक्तम्। 'पुरुषेण नारायणेन उपहितां चितिमुपतिष्ठमान इह जन्मनि पुरुषो भवे'दिति वाधूलसूत्रगतपुरुषसूक्तकरण-कोपस्थानार्थवादविरोधात्। तेन ह्यर्थवादेन पुरुषसूक्तप्रतिपाद्यपुरुषभावप्राप्तिफलकतया पुरुषसूक्तेनोपस्थानं स्मर्यते। यदि तत्प्रतिपाद्यपुरुषभावः प्राक्सिद्धो यजमानभाव एव तदा कथं तत्प्राप्तिफलकतया स्मर्येत। पर्यायेणापरिमितशीर्षत्वादिविषयं 'सहस्त्रशीर्षा पुरुष'इत्यप्ययुक्तम्। 'सहस्त्रशीर्षा पुरुषः। सहस्त्राक्षस्सहस्त्रपाद्भूत्वोदतिष्ठ'दित्यारुणकेतुकाम्नानविरोधात्। तत्र हि कूर्माकृतिलिङ्गौपस्थापितस्य नारायणस्य युगपत्सहस्त्रशीर्षत्वादिविशिष्टपुरुषभावोत्थानं वर्णितम्। तदैकार्थ्यमेव पुरुषसूक्तमन्त्रस्यापि शब्दार्थैकरूप्यप्रत्यभिज्ञानेनावसीयते। 'सर्वाणि रूपाणी' त्यादि नामरूपव्याकर्तृपरम्। 'अभिवद'न्निति भर्तव्यैश्वर्यपरम्। 'नान्यः पन्था'इत्यत्रान्यशब्दो नोक्तरूपवेदनान्यपरः किं तु तद्विषयपुरुषान्यपरः। 'यज्ञेन यज्ञमयजन्त'ेति मन्त्रो न ब्रह्मप्रकाशनपरः। किं तु यज्ञाराधनीययज्ञशब्दोक्तपुरुषप्रधानः। 'ब्राह्मणोऽस्य मुखमासी'दित्यादिर्वस्तुतो मुखादिप्रभवानां ब्राह्मणादीनामुपासनाय मुख्यत्वादिकल्पनार्थम्। 'यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते' इति प्रश्नोत्तरत्वेन 'ब्राह्मणोऽस्य मुखमासी'दित्याद्यवतारितत्वात्। सर्वत्र तत्तदङ्गत्वेन कल्प्यन्त इति ज्ञापनार्थं 'कौ पादा' विति प्रश्ने 'पभ्द्या ँ शूद्रो अजायते'त्युक्तिः। अत एवात्र मुखबाहूरुत्वेन कल्पितानां त्रैवर्णिकानां 'मुखबाहूरुपज्जास्स्युस्तस्य वर्णा यथाक्रम'-मित्यादिस्मृतिपुराणागमेषु मुखबाहूरुजत्वप्रसिद्धिः। अत्र शिरश्चक्षुःप्राणनाभिपादप्रभवत्वेनोक्तानां द्युसूर्यवाय्वन्तरिक्षपृथिवीनां वैश्वानरविद्यायां शिरश्चक्षुः प्राणमध्यावयवपादत्वकल्पना च दृश्यते। 'अभ्द्यस्सम्भूत'इति मन्त्रे त्वष्टुरेव विश्वकर्मशब्दोक्तेः स्त्रष्टा नियन्ता चेश्वरः पुरुषशब्देन परामृश्यते। न तु स्त्रष्टा नियन्ता चाभ्द्यस्सम्भूतः। 'प्रजापतिश्चरती'त्यत्र गर्भवासरूपमवताररूपेण जननमुक्तम्। तत्र योनिशब्दो 'योनिष्ट इन्द्र' इत्यत्रेव स्थानवाच। तस्य पुरुषस्य मरीचीनां पदमादित्यमण्डलं परमव्योम वा स्थानमित्यर्थः। एवं प्रबललिङ्गानुरोध्यर्थवर्णने सम्भवति न दुर्बलप्रकरणानुरोध्यर्थवर्णनं न्याय्यमिति पुरुषशब्देन प्रतिपाद्यत इति पुरुषसूक्तोत्तरनारायणयोः 'सहस्त्रशीर्षा पुरुष' इत्यारुणकेतुकब्राह्मणे च पुरुषशब्देन पुरुषस्य नारायणस्यात्मभूतः परमेश्वरः प्रतिपाद्यत इत्यर्थः। एवं च नारायणपूजादिषु शिवपूजादिषु च विनियोगः। तत्तत्परत्वेन सर्वमुपपन्नं भवति। अस्ति हि शिवपूजायामपि विनियोगः। यथा–लैङ्गादिषु शिवाभिषेकमन्त्रपरिगणने 'ज्येष्ठसाम्नां त्रयेणैव तथा

देवव्रतैरपि। रथन्तरेण पुण्येन सूक्तेन पुरुषस्य चे'ति पुरुषसूक्तमपि परिगणितम्। बोधायनसूत्रे रुद्राङ्गन्यासमन्त्रेषु पुरुषसूक्तोत्तरनारायणानुवाकौ शिरःशिखामन्त्रत्वेन निवेशितौ। लिङ्गपुराणे 'द्यौर्मूर्धा तु विभोस्तस्य खं नाभिः परमेष्ठिनः। सोमसूर्याग्नयो नेत्रं दिशश्श्रोत्रे महात्मनः। वक्त्राद्वै ब्राह्मणा जाताः ब्रह्मा च भगवान्प्रभुः। इन्द्राविष्णू भुजाभ्यां तु क्षत्रियाश्च महात्मनः। वैश्याश्चोरुप्रदेशात्तु शूद्राः पादात्पिनाकिनः।' इति पुरुषसूक्तमुपबृंहितम्। तत्रैव ब्रह्मनारायणकृतशिवस्तोत्रे 'नमोऽस्तु लक्ष्मीपतये श्रीपते ह्रीपते नमः।' इति उत्तरनारायणं च शिवपरतयोपबृंहितम्। एवं च तत्र यान्य 'प्यत्यतिष्ठद्दशाङ्गुलं, पुरुष एवेदं सर्व' मित्यादिविशेषणानि 'पुरुषो ह नारायणोऽकामयत अतितिष्ठेयं सर्वाणि भूतानि अहमेवेदं सर्वं स्यामिति स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत् तदाहरत् तेनायजत तेनेष्ट्वा प्रत्यतिष्ठत्सर्वाणि भूतानि इदं सर्वमभव' दित्यादिशतपथदर्शितेन सर्वोपादानत्वादिना च नारायणे सम्भवन्ति। तेषां तदात्मभूते परमेश्वरे तद्द्वारान्वयः। या 'न्युतामृतत्वस्येशान' इत्यादीशानश्रुत्यमृतप्रदत्वलिङ्गादीनि तेषां साक्षादन्वयः। ईशानशब्दस्य योगेनामृतत्वप्रतियोगिकैश्वर्यसमर्पकत्वेऽपि अङ्गुष्ठाधिकरणन्यायेन रुद्रशिवाभिधानत्वमप्यस्तीति समर्थितमस्माभिः शिवतत्वविवेके। यत्तु, धनदपूजादिषु पुरुषसूक्तस्य विनियोजनं तत्तदन्तर्यामिदृष्टयैव। अत एव 'धनदं शिवरूपिण'मित्यादिषु चैश्वर्यवर्णनं ब्रह्ममेधसंस्कारसंस्कृत-यजमानोपस्थाने विनियोजनमपि ब्रह्ममेधसंस्कारस्य 'वेष्टितुं परुषोत्तम'मिति परब्रह्मप्राप्ति-हेतुत्वस्मरणात्तेन संस्कृतः परब्रह्मकल्प इति तदात्मत्वदृष्टयैव पुरुषमेधे विनियुक्तपुरुष-परलिङ्गवत्त्वाच्चाग्निचयने कल्पितपुरुषाकृत्युपस्थाने विनियोजनं 'यत्पुरुषं व्यदधुः, कतिधा व्यकल्पय'न्निति कल्पितपुरुषप्रकाशकत्वादिति सर्वं समञ्जसम्।। यदन्यत्पुरुषसूक्तादिविषये विचारणीयं सर्वं 'तथान्यप्रतिषेधा'दित्यधिकरणे (ब्र० ३-२.३६सू) विचारष्यिते।। शातरुद्रीयस्य प्रकरणेनाग्निपरत्वं यद्यपि कल्पयितुं न युक्तम्। प्रकरणात् श्रुतिलिङ्गानां प्रबलत्वात्। तथापि 'रुद्रो वा एष यदग्निस्स एतर्हि जातो यर्हि सर्वश्चित' इति प्रपञ्चप्रस्तारचयनानन्तरं निष्पन्नं स्थण्डिलरूपमग्निं रुद्रमुक्त्वा 'स यथा वत्सो जातः स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्याये'दित्यर्थवादपूर्वकं 'शातरुद्रीयं जुहोती'ति विधानात् शातरुद्रीये 'नमस्ते रुद्रे' त्यादिमन्त्रेषु श्रुत एव रुद्रशब्दो 'रुद्रो वा एष यदग्नि'रिति वाक्येनाग्निपरतया व्याख्यात इत्यवसीयते। तथा च शतरुद्रीयस्याग्निपरत्वमेवाङ्गीकर्तुं युक्तम्। 'गौणं लाक्षणिकं वापि वाक्यभेदेन वा पुनः। वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलये'दिति तन्त्रवार्तिकोक्तन्यायेन साक्षाद्वेदेन कृतं व्याख्यानमनादृत्य श्रुतिलिङ्गादिन्यायैरन्यपरत्वस्य कल्पयितुमशक्यत्वादित्याशङ्क्याह-**शतरुद्रीये चेति।** तत्र 'दिशां च पतय'इत्यादिषु सर्वाधिपतित्वं 'नमः स्त्रोतस्याय चे' त्यादिषु सर्वान्तर्यामित्वं 'नमो हिरण्यबाहव'इत्यादिषु नीलग्रीवत्वकपर्दित्वादिविशिष्टं शैवरूपमित्यादि लिङ्गजातं 'नमो भवाय

चे'त्यादिषु भवरुद्रशर्वपशुपतिशिवशङ्करादिश्रुतिवृन्दं च शतरुद्रीयश्रवणकाल एव प्रथममवगम्यमानमनादृत्य शतरुद्रीयावगतिसापेक्षस्य तन्मन्त्रकहोमविधानस्यार्थवादे श्रुतं 'रुद्रोऽग्नि'रिति कीर्तनं प्रमाणीकृत्य शतरुद्रीयस्याग्निप्रतिपादकत्वकल्पनमयुक्तम्। तथाकीर्तनस्य 'इयमेव सा ये'ति मन्त्रे चिच्छक्त्यात्मना इष्टकाविशेषस्येव शिवात्मनाग्नेस्स्तुतिरिति कीर्तनं प्रमाणीकृत्य शतरुद्रीयस्तावकत्वेन नेतुं शक्यत्वात्। 'रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्ये'त्यर्थवादे तनुद्वयवर्णनस्य 'द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः। घोरा चान्या शिवा चान्या ते चैव शतधा पुनः।' इति महाभारते शिवविषयतयोपबृंहिततया तत्र 'रुद्रो वा एष यदग्नि'रित्यस्य द्विविधतनुयुक्तशिवात्मनाग्नेस्स्तुतिरित्यवश्याङ्गीकर्तव्यत्वात् तथैवेदमपीति भावः। स्यादेतत्। अग्निपरत्वासम्भवेऽपि परमशिवपरत्वमप्यङ्गीकर्तुमयुक्तम्। क्रोधवत्त्वश्रवणात्। परमकारुण्यादिमङ्गलगुणैकनिधानस्य तस्य क्वचिदपि क्रोधासम्भवात्। अतोऽस्य संहाररुद्रादि-रूपसम्भावितक्रोधरुद्रान्तरपरत्वकल्पनं युक्तम्। संहाररुद्रेऽपि ह्युदाहृतश्रुतिलिङ्गादीन्युपपद्यन्ते। 'तन्नामनामा तद्रूपस्तत्कार्यकरणक्षमः। तत्तुल्यव्यवहारश्च तदाज्ञापरिपालक'इति वायुसंहितायां संहाररुद्रं प्रकृत्य तस्य शिवनामरूपादिमत्त्वोक्तेरित्याशयेनाशङ्कते—**नन्विति। नैवं विचारणीयमिति।** 'या ते रुद्र शिवा तनूः।' 'यामिषुं गिरिशंत हस्ते'इति 'मानस्तोके तनये मान आयुषी'ति च श्वेताश्वतरोपनिषदि परमशिवप्रकरणे समाम्नातानां मन्त्राणामिहाम्नानेन जाबालोपनिषदि 'जप्येनामृतत्वं ब्रूही'ति प्रश्नस्य'शतरुद्रीयेणे' त्युत्तरानन्तर'मेतानि वा अमृतस्य नामधेयानि एतैर्ह वा अमृतो भवती'त्यस्मिन्नाम्नातानां नाम्नामनादिमुक्तपरमशिवनामत्पप्रतिपादनात् 'एकशतं च यजुश्शाखास्तासु सर्वासु रुद्रोपनिषदाम्नायत'इत्युपनिषच्छब्देनास्य ब्रह्मविद्यात्वप्रतिपादनाच्च परमशिवपरत्वमेवास्याङ्गीकर्तव्यमिति भावः। क्रोधश्रवणमसिद्धमित्याह—**मन्युशब्दस्येति।** नन्वेतदयुक्तम्। शतपथे शतरुद्रीयब्राह्मणे 'प्रजापतेर्विस्तदेवता उपाक्रामन् तमेक एव देवोनामन्युरेव सोऽस्मिन्नन्तर्विततोऽतिष्ठ'दिति मन्युदेवं प्रस्तुत्य 'शतशीर्षो रुद्रस्समभवत् सहस्राक्षश्शतेषुधी'रिति तस्य शतशीर्षत्वादिविशिष्टरुद्रात्मना सम्भूतिमुक्त्वा 'सोऽयं शतशीर्षो रुद्रस्सहस्त्राक्षश्शतेषुधिः। अधिज्यधनुः परंप्रतिहिता धीर्भीषयमाणोऽतिष्ठत्'इति तस्य भयङ्करत्वं चोक्त्वा 'नमस्ते रुद्र मन्यव'इति य एव सोऽन्तर्मन्युर्विततोऽतिष्ठत्तस्मा एवैतं नमस्करोती'ति 'नमस्ते रुद्र मन्यव' इत्यस्य तन्नमस्कारवर्णनात् तस्य च भीषयमाणत्वात् श्रुत्या क्रोधदेवतात्वावसायादित्यस्वरसादाह—**अथवेति।** यद्यपि सर्वानुग्राहकस्य शिवस्य स्वतः क्रोधो नास्ति तथापि दुष्टनिग्रहार्थं स्वेच्छया गृहीतः प्रकृतिगुणभूतः क्रोधस्सम्भवतीति तस्य च परिग्रहशक्तिभूतप्रकृतिगुणत्वेनास्मदादिक्रोधस्येव परमेश्वरे सम्बन्धो नास्तीति न कश्चिद्दोष इत्यर्थः। अथ पुराणादीनामविरोधेन शिवपरत्वमुपपादयति-**पुराणादीनां चेति।** केचिदाहुः— वैष्णवपुराणविरोधीनि शैवादिपुराणवचनानि अप्रमाणानि। पुराणानां

प्रणेतृगुणानुगुणबलाबलविशेषवत्त्वात्। तथा सर्वेषां पुराणानां प्रणेता चतुर्मुखः स केषुचित्कल्पेषु सत्त्वोद्रिक्तो भवति केषुचिद्रजोऽभिभूतः केषुचित्तमश्छन्नः। येषु कल्पेषु स्वकीयसत्वोद्रेकादिना सात्विकराजसतामसाभिधानेषु वैष्णवब्राह्मशैवादिपुराणानि प्रणिनाय, तेन पुराणान्यपि तानि वक्तृगुणानुसारेण सात्विकराजसतामसान्युच्यन्ते। अतस्तमोऽभिभूतान्तःकरणेन प्रणीतैश्शैवपुराणैरुक्तं सात्विकपुराणविरुद्धं न ग्राह्यम्। तदेतत्सर्वं 'सङ्कीर्णास्सात्विकाश्चैव राजसाश्चैव तामसा'इति कल्पानां सात्विकादिविभागप्रतिपादनपूर्वकं 'यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते। 'अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते। राजसेषु तु माहात्म्यमधिकं हरेः। तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गति'मिति मात्स्यपुराणे प्रतिपादितम्। अत्र हि 'यस्मिन्कल्प'इत्यादिश्लोकेन तत्तत्कल्पे ब्रह्मप्रोक्तानां पुराणानां तत्तत्कल्पविषयत्वमुक्त्वा 'अग्नेश्शिवस्य महात्म्य'मित्यादिना शैवादिपुराणानां तामसादिकल्पविषयत्वप्रतिपादनात् तेषां तामसादिकल्पेष्वेव ब्रह्मणा प्रणीतत्वं सिद्ध्यतीति। ततः पुराणानां वक्तृगुणानुगुणबलाबलविभागो लभ्यते। यद्यपि कल्पानां तामसत्वादि ब्रह्मणस्तत्तद्गुणोद्रेकादिति स्पष्टं न प्रतिपादितम्। तथापि कल्पानामिह सात्विकादिविभागः तत्तत्कल्पे पुराणवक्तुः ब्रह्मणः तत्तद्गुणप्राचुर्याभिप्राय एव वर्णनीयः। तथा विभागस्य तत्तत्कल्पेषु तेन प्रणीतानां परस्परविरुद्धानां देवतोत्कर्षापकर्षपराणां पुराणानां कात्स्न्र्येन प्रामाण्यायोगे सति तेषु हेयोपादेयविशेषपरिज्ञानाय वक्तृगुणानुगुणबलाबलसूचनेन सप्रयोजनत्वात् विधान्तरेण सात्विकादिविभागस्य निष्प्रयोजनत्वात् अनन्तरसन्दर्भानुरोधित्वाच्च। तत्रापि विष्णुपुराणं प्रबलं पुलस्त्यवरदानलब्धदेवतापरमार्थवेदनेन पराशरेण उपदिष्टत्वात् जगत्कारणवस्तुविषयसामान्यप्रश्ने 'विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थित'मित्याद्युत्तर-क्रमेणावतीर्णतया देवताविशेषमहिमविषयप्रश्नोत्तरसन्दर्भरूपपुराणान्तरव'न्न बुद्धिभेदं जनेय'दिति न्यायेन प्रष्टुरभिमतार्थो बहूकृत इति नेतुमशक्यत्वेनानन्यथासिद्धत्वाच्चेति। तस्यैतस्य सर्वस्यापि निरास'स्तात्पर्यलिङ्गवशेने'त्यनेन सिद्धः। सर्वकारणत्वादिकं यद्ब्रह्मलिङ्गं तदेवात्र तात्पर्यलिङ्गेन विवक्षितम्। अत एवानुपदं वक्ष्यति 'यत्र यत्र चेतने अचेतने वा जगत्कारणत्वादिकं शिवतात्पर्यलिङ्गं श्रूयत' इति। एवं च ब्रह्मविष्णुरुद्रादिषु सर्वकारणत्वं सर्वसंहर्तृत्वं सर्वान्तर्यामित्वमित्वादि यद्ब्रह्मलिङ्गं श्रूयते साक्षात्परब्रह्मपदं वा श्रूयते तत्सर्वं तत्तदात्मभूते शिव एव परब्रह्मणि पर्यवस्यति। यथा 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वे'त्यादिकमिन्द्राद्यन्तर्यामिणि तस्मिन्ब्रह्मलिङ्गाद्यनु-गमाविशेषात् 'स्मृतयश्च पुराणानि भारतादीनि सत्तम। शिवमेव सदा साम्बं हृदि कृत्वा ब्रुवन्ति ही'ति पराशरपुराणवचनाच्च। एवं पुराणादीनामविरोधनयनानङ्गीकारे प्राचीनाधिकरणोदाहृतेषु विषयवाक्येषु सर्वकारणत्वमुमुक्षूपास्यत्वत्वादीनि ब्रह्मलिङ्गानि प्राणाकाशेन्द्रादिषु श्रूयन्त इति तेषां विरोधं को वारयेत्। अवश्यं च श्रुतिवदेव पुराणादीनामप्यविरोधेन प्रामाण्यमुपपादनीयम्। 'पुराणं मानवो

धर्मस्साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभि'रिति स्मरणात्। यत्तु मात्स्यवचनजातमुदाहृतं तत् ब्रह्मविष्ण्वादीनां परस्परस्मादुत्कर्षं प्रतिपादयन्ति पुराणानि कल्पभेदप्रवृत्ततत्तदुत्कर्षविषयतया प्रमाणत्वेनोपपादयितुं प्रवृत्तं न तु पुराणेषु केषांचित् तमश्छन्नतत्त्वावबोधभ्रान्तकल्पितत्वेनाप्रामाण्यं प्रतिपादयितुम्। 'त्रयस्ते कारणात्मानो जातास्साक्षान्महेश्वरात्। चराचरस्य विश्वस्य सर्गस्थित्यन्तहेतवः। पित्रा नियमिताः पूर्वं त्रयोऽपि त्रिषु कर्मसु। ब्रह्मा सर्गे हरिस्त्राणे रुद्रस्संहरणे पुनः। तथाप्यन्योन्यमात्सर्यादन्योन्यातिशयार्थिनः। तपसा तोषयित्वा तं पितरं परमेश्वरम्। ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत्। कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः। विष्णुश्च भगवान्रुद्रं ब्रह्माणमसृजत्पुनः। तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः। तानितानि प्रणीतानि विद्वांस्तत्र न मुह्यति।' इति शिवपुराणे तथैव प्रमाण्यव्यवस्थापनात्। एवं च तत्तत्कल्पानां तामसत्वादिविभागः हेमन्तग्रीष्मवर्षासु हिमातपवृष्टिप्राचुर्यवत् कल्पभेदेषु तमस्सत्वरजः प्राचुर्यं भवतीति तत्तद्गुणप्राचुर्यनिबन्धनः तथा विभागश्चोपाध्युत्कर्षे सति तदुपाधिकोत्कर्षो युक्त इत्यौचित्यरूपेण वस्तुसामर्थ्येन तामसादिसंहाररुद्राद्युत्कर्षोपपादनेन सार्थकः। 'यस्मिन्कल्प'इत्यादिश्लोकः पुराणानामेककल्पविषयत्वे सति विरोधप्रतिभासतादवस्थ्यमिति शङ्कापरिहारार्थः। तत्र पुराणानां तत्तत्कल्पे ब्रह्मप्रोक्तत्ववादः तत्तत्कल्पोत्कृष्टदेवतामहिमवर्णनपरस्य पुराणस्य तत्तत्कल्पविशेषे प्रचारणं युक्तमिति औचित्येन कल्पविशेषे देवताविशेषोत्कर्षस्य उपोद्बलनार्थः। तस्मादुपपन्नमविरोधेन पुराणादीनां प्रामाण्यम्। यत्तु पराशरसंहितारूपस्य विष्णुपुराणस्य प्राबल्यकारणमुक्तं तद्विपरीतम्। तेन हि वायुसंहितारूपस्य शिवपुराणप्रभेदस्यैव बलवत्त्वं सिद्ध्यति। तस्य 'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टय'मिति सहजसार्वज्ञ्यवैराग्यादिमता पितामहेनोपदिष्टत्वात्। तत्र 'मुनीनां षट्कुलीनानां ब्रुवतामितरेतरम्। इदं परमिदं नेति विवादस्सुमहानभूत्। परस्य दुर्निरूपत्वात् जातस्तत्र न निर्णयः।' इत्युपक्रम्य तेषां मुनीनामन्योन्यं विवदमानानां ब्रह्मसभोपसर्पणमुक्त्वा 'भगवन्नन्धकारेण महता वयमावृताः। खिन्ना विवदमानाश्च न पश्यामोऽत्र यत्पर'मित्यारभ्य 'केनेदं चित्रकृत्येन प्रथमं सृज्यते जगत्। अन्तकाले पुनश्चेदं कस्मिन् प्रलयमेष्यती'ति सामान्येन सकलकारणस्य तस्य परदैवतस्य प्रश्नमुत्थाप्य 'एवं पृष्टस्तदा ब्रह्मे'त्यारभ्य 'उत्थाय सुचिरं ध्यात्वा रुद्र इत्युच्चरन् गिरम्। आनन्दक्लिन्नसर्वाङ्गः कृताञ्जलिरभाषत। यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम्। सह भूतेन्द्रियैस्सर्वैः प्रथमं सम्प्रसूयते। कारणानां च यो धाता ध्याता परमकारणम्। न सम्प्रसूयतेऽन्यस्मात् कुतश्चन कदाचन।' इत्यारभ्य अनेकशाखाविप्रकीर्णं बहुविधं शिवस्य वैभवं प्रपञ्चेन प्रदर्श्य 'तेनेदं चित्रकृत्येन प्रथमं सृज्यते जगत्। अन्तकाले पुनश्चेदं तस्मिन्प्रलयमेष्यती'त्यादिना शिव एव सकलकारणभूतं परदैवतमिति व्यवस्थापितत्वेन विष्णुपुराणे प्रष्टुरेकस्य प्रागेव शिष्यभूतस्य मैत्रेयस्य हृदयाभिज्ञेन गुरुणा

सामान्यप्रश्नेऽपि तथैव पूर्वसिद्धभक्तिविवर्धनाय तदनुकूलं विशेषविषयमुत्तरमुक्तमित्यन्यथासिद्धिवदिह परस्परं विवदमानानां बहूनामृषीणां प्रश्ने कस्यचिद्धृदयमनुसृत्योत्तरमुक्तमित्यत्र विनिगमनाविरहेण तथान्यथासिद्धेर्वक्तुमशक्यत्वाच्च। तस्माद्युक्तं पुराणादीनामपि तात्पर्येण शिवे समन्वय इति। उक्तन्यायमविचारितेषु वेदान्तवाक्येष्वप्यतिदिशति-**अनेनेति।** अयमर्थः स्कान्दे सूतसंहितायां दर्शितः-'कानि चिद्वेदवाक्यानि ब्राह्मणा वेदवित्तमाः। रुद्रमूर्ति समाश्रित्य शिवे परमकारणे। पर्यवस्यन्ति विप्रेन्द्रास्तथा वाक्यानि कानिचित्। विष्णुमूर्ति समाश्रित्य ब्रह्ममूर्तिं च कानिचित्। आग्नेयमूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित्। सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित्। एवं मूर्त्यभिधानेन द्वारेणैव मुनीश्वराः। प्रतिपाद्यो महादेवः स्थितस्सर्वासु मूर्ति'ष्विति। तत्र स्थालीपुलाकन्यायेन कानिचिद्वाक्यान्युदाह्रियन्ते। ऐतरेयके विश्वामित्रं प्रकृत्य श्रूयते-'इन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः वरं ते ददामीति स होवाच त्वामेव विजानीयामिति तमिन्द्र उवाच प्राणो वा अहमस्म्यृषे प्राणस्त्वं प्राणस्सर्वाणि भूतानि प्राणो ह्येषः स एष तपति स एतेन रूपेण सर्वा दिशो विष्टोऽस्मी' त्यादि। अत्रेंद्रेणोपदेश्य 'स्त्वामेव विजानीया' मित्युपक्रमादिन्द्र इति प्राणशब्दात्प्राणवायुरिति 'य एष तपती' त्याद्युक्तया सूर्य इति च यद्यपि प्रतीयते। तथापि 'प्राणस्त्वं प्राणस्सर्वाणि भूतानी' ति सर्वात्मत्वलिङ्गादिन्द्रप्राणसूर्याणामन्येषां च भूतानामन्तर्यामी शिवो निश्चीयते। 'प्राणस्तथानुगमा' दि (ब्र० सू०) त्यधिकरणव्युत्पादितप्रतर्दनाख्यायिकान्यायसाम्यात्। ननु, प्रतर्दनाख्यायिकायां सामान्येन हिततमप्रश्ने 'मामेव विजानीही' त्यादेरिन्द्रस्योत्तरप्रपञ्चस्य ब्रह्मलिङ्गाद्यनुगमाद्युक्तं ब्रह्मपरत्वमिह तु'त्वामेव विजानीया'मिति सावधारणस्य इन्द्रस्वरूपजिज्ञासया प्रश्नस्योत्तरं कथमन्यविषयं स्यात्।, अथर्वशिरसि रुद्रं प्रति 'को भवा' निति प्रश्नोत्तरस्य हि तदन्यविषयत्वं कल्पयितुमयुक्तमित्युक्तम्। सत्यमत्रोत्तरस्य इन्द्रविषयत्वे बाधकमस्ति। तद्विषयत्वे हि 'प्राणो वा अहमस्मी' त्येतावदेव वक्तव्यं न तु 'प्राणस्त्वं प्राणस्सर्वाणि भूतानि प्राणो ह्येष तपती'ति सर्वात्मकत्वम्। न ह्यस्य प्राणस्येन्द्रत्वे सम्बोध्यस्य ऋषेस्सर्वभूतानां सूर्यस्य च तदात्मकत्वं सम्भवति। न वा 'स एतेन रूपेण सर्वा दिशो विष्टोऽस्मी'त्युक्तमादित्यात्मना सकलदिग्व्यापकत्वमिन्द्रस्योपपद्यते। अत'स्त्वामेव विजानीया'मिति प्रश्नस्तेजोबाहुल्यादिन्द्रे परब्रह्माविर्भूतमुन्नीयते न तद्विषय एव प्रवृत्त इति कल्प्यते। अथवा इन्द्रशब्दः परमेश्वर पर एवास्तु। एतरेय एव 'तद्वा इदं बृहती सहस्त्वं सम्पन्नं तद्यशः स इन्द्रः सर्वभूतानामधिपतिः स य एवमेतमिन्द्रं भूतानामधिपतिं वेदे'ति भूताधिपत्यलिङ्गेन 'तस्य नाम महद्यश' इति श्रुत्यन्तरप्रसिद्धयशोनाम्ना च समर्पिते परमेश्वर एवेन्द्रशब्दस्य प्रयुक्तत्वात्। तथा ऐतरेयारण्यक एव संवत्सरं प्रकृत्य श्रूयते-'तस्यैतस्यासावादित्यो रसः स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्यः एकमेव तदिति विद्यात्तस्मात्पुरुषं प्रत्यादित्यो भवतीति तदप्येतदृषिणोक्तं चित्रं

देवानामुदगादनीक'मित्यादि। अत्र संवत्सरस्य स्वामित्वेनोक्तस्सूर्यः। आदित्यश्रुतेः 'तस्मात्सर्व एव मन्यते मां प्रत्युदगा'दिति श्रुत्यन्तरतो लोकाच्च प्रतिपन्नस्य तल्लिङ्गस्य वर्णनात् एकार्थे तन्मन्त्रे दर्शनाच्चेति। तथाप्यादित्यान्तर्यामी शिव एवात्र प्रतिपाद्यत इति 'स यश्चायमशारीरः प्रज्ञात्मे'त्यादिना प्रतिपाद्यस्यार्थस्य 'स यश्चायं पुरुषे यश्चासावादित्ये स एक' इति श्रुत्यन्तरेऽस्य शिवविषयत्वदर्शनात् इहापि 'शक्तिपुरुष इति यमवोचाम स एवायं दैहिक आत्मे'ति जीवं प्रकृत्य तस्य 'योऽयमशारीरः प्रज्ञात्मा स रस' इति तदन्तर्यामित्वेनोक्तेन तदन्तर्यामिणा सहैक्यप्रतिपादनाच्च। अग्रे 'चैतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यवः एतं महाव्रते छन्दोगा' इति 'एतमस्यामेतं दिवि एतमन्तरिक्षे एतं वायौ एतमेवाकाशे एतमप्सु एतमोषधिवनस्पतिषु एतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूते'ष्विति प्रकृतं देवं त्रयीविद्यासकलवस्तुनिष्ठत्वेन विचार्य निर्णीयत इति प्रतिपादनाच्च। 'एतमेव ब्रह्मेत्याचक्षत'इति सावधारणं ब्रह्मपदमुख्यार्थत्ववर्णनाच्च। यद्यप्यादित्यश्रुतिरुपक्रमगता तथाप्युपक्रमगतमेकं प्रमाणमौपसंहारिकानेकप्रमाणविरोधे दुर्बलं 'भूतादिपादव्यपदेशोपपत्तेश्चे'ति (ब्र० १-१-२६) सूत्रव्युत्पादितगायत्रीवाक्यन्यायसाम्यात्। ननु 'महापुरुष इति यमवोचाम संवत्सर एव प्रध्वंसयन्नन्यानि भूतानि हापयन्नन्यानी'ति प्रकृतसंवत्सरस्वामित्वं सौरचान्द्रादिसंवत्सरविभागे सूर्यस्यैव प्रसिद्धम्। सत्यं तस्य संवत्सरस्वामित्वं 'येन सूर्यस्तपति तेजसेद्ध'इति मन्त्रवर्णात् सवितृवरेण्यत्वश्रवणाच्चान्तर्याम्यधीनमिति तदन्तर्याम्येव मुख्यसंवत्सरस्वामी। तथा चतुर्वेदारण्यके-'इन्द्रो राजा जगतो य ईशे'इति श्रूयते। तस्य इन्द्रश्रुतेः। इन्द्रो राजा जगतश्चर्षणीनामिन्द्रो यातोऽवसितस्य राजे'त्यत्रैन्द्रमन्त्रान्तरेष्विन्द्रस्य जगद्राजत्ववर्णनाच्च शक्र एव प्रतिपाद्य इति यद्यपि प्रतीयते। तथापि 'अन्तःप्रविष्टश्शास्ता जनानामन्तः प्रविष्टं कर्तारमेत'मित्यन्तर्यामित्वलिङ्गात् 'अन्तरादित्ये मनसा चरन्तमन्तश्चन्द्रमसि मनसा चरन्तं अन्तस्समुद्रे मनसा चरन्त'मिति चन्द्रादित्यादिसकलदेवतानियामकसङ्कल्परूपमान-सव्यापारवत्त्वलिङ्गात् सहैव सन्तं न विजानन्ति देवा' इति देवाविज्ञेयत्वलिङ्गात् 'इन्द्रस्यात्मानं शतधा चरन्त'मिति शक्राद्भेदव्यपदेशात् 'ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां दिव आत्मानं सवितारं बृहस्पति'मिति अग्निसवितृबृहस्पत्यादिशब्दप्रयोगाच्च इन्द्रान्तर्यामी परं ब्रह्म परमशिव एवात्र प्रतिपाद्योऽवसीयते। य'त्त्विन्द्रो यातोऽवसितस्य राजा। इशानमस्य जगतस्सुवर्दृशमीशानमिन्द्रतस्थुषः, 'विश्वस्मादिन्द्र उत्तरः' इत्यादिमन्त्रेषु इन्द्रस्य सर्वाधिपत्यसर्वोत्तरत्वश्रवणं तत्सर्वमन्तर्यामिदृष्टयैव। अत एव कर्मकाण्डे इन्द्रसूक्तेषु पठितस्य 'अभित्वा शूर नोनुम' इति मन्त्रस्याथर्वशिरसि शिवपरत्वेनाम्नानं दृश्यते। एव 'मापो वा सर्व'मित्यादिष्वपि सर्वात्मकत्वादिलिङ्गादबाद्यन्तर्यामी प्रतिपाद्यत इत्यादि द्रष्टव्यम्। नन्वन्तर्यामिपरत्वं कारणत्वादिब्रह्मलिङ्गवत्सु वाक्येष्विति सङ्कोचः किमर्थं क्रियते। अन्येष्वपि भवत्वेव सर्वेषामपि शब्दानां तत्र मुख्यत्वादित्याशङ्क्याह-**यत्रयत्रेति**। अयमाशयः। यत्र

शरीरादिषु वैराग्यसिद्धयर्थं तेषां जुगुप्सितविकाराश्रयत्वं प्रतिपाद्यते यथा मैत्रायणोपनिषदि 'भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्लशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तसङ्घाते दुर्गन्धे निस्सारेऽस्मिन् शरीरे किं कामोपभोगै'रिति तादृग्वाक्यजातस्य शरीरादिदूषण एव तात्पर्यं न तु ब्रह्मणस्तदन्तर्यामित्वप्रतिपादने। यत्र जीवस्य वैराग्यार्थजननमरणपरलोकगतागतक्लेशरूपविकारः प्रतिपाद्यते। यथा गर्भोपनिषदि छान्दोग्यबृहदारण्यकादिषु तादृग्वाक्यजातस्य संसारदूषण एव तात्पर्यं न तु जननमरणादिवज्जीवान्तर्यामित्वप्रतिपादने। तत्प्रतिपादनस्य दूषणानुपयोगित्वात्। यत्र जीवान्तर्यामिब्रह्मप्रतिपादनार्थं जीवस्य ब्रह्माश्रयत्वब्रह्मशरीरत्वादिकं प्रदर्श्यते यथा 'यं पृथिवी न वेद यस्य पृथिवी शरीर'मित्यादौ तत्र पृथिव्यादिपदस्य नियम्यपृथिव्यादिदेवतासमर्पण एव तात्पर्यं न तु तदन्तर्यामिसमर्पणे। पृथिव्याद्यविज्ञेयत्वं तच्छरीरत्वादिना तदनन्तरमेवोपदेश्यत्वादन्तर्यामिणः। तस्मादेतादृशेषु वाक्येषु 'देवदत्तो विद्वान्' 'घटः श्याम' इत्यादिलौकिकवाक्येष्विव चिदचिद्वस्त्वेव बोद्धव्यम्। न हि लौकिकवाक्यवत् वैदिकवाक्येषु शक्तिभ्रमात् पदप्रयोगः पदार्थप्रतिपत्तिर्वा वक्तुं शक्यते इत्याशङ्क्य शिवस्य ब्रह्मणश्शरीरमिति चेदस्तु चिदचिद्वस्तु विशेषितम्। लोके चिदचिद्वस्तुषु प्रयुज्यमानाश्शब्दाः केवलस्यान्तर्यामिणः वाचका नेष्यन्ते। किं तु तत्तद्वस्तुरूपशरीरविशिष्टस्य। तथापि विशिष्टवादिनां शब्दानामेकदेशैकदेशिसम्बन्धेन विशेषणेषु लक्षकत्वं युक्तमिति भावः॥

॥ **इति सर्वव्याख्यानाधिकरणम्**॥७॥

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः।

इति शिवार्कमणिदीपिका सर्वव्याख्यानाधिकरणम् समाप्तम्

स्मृत्यधिकरणम्।

शाङ्करभाष्यम्

प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणम्, मृत्सुवर्णादय इव घटरुचकादीनाम्। उत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणम्, मायावीव मायायाः। प्रसारितस्य च जगतः पुनः स्वात्मन्येवोपसंहारकारणम्, अवनिरिव चतुर्विधस्य भूतग्रामस्य। स एव च सर्वेषां न आत्मेत्येतद्वेदान्तवाक्यसमन्वयप्रतिपादनेन प्रतिपादितम्। प्रधानादिकारणवादाश्चाशब्दत्वेन निराकृताः।। इदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः, प्रधानादिवादानां च न्यायाभासोपबृंहितत्वम्, प्रतिवेदान्तं च सृष्टयादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्वितीयोऽध्याय आरम्भ्यते। तत्र प्रथमं तावत्स्मृतिविरोधमुपन्यस्य परिहरति– *स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाश-दोषप्रसङ्गात्*।।१।।

यदुक्तम्–ब्रह्मैव सर्वज्ञं जगतः कारणम्–इति, तदयुक्तम्; कुतः? *स्मृत्यनवकाशदोषप्रसङ्गात्*।। स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता, अन्याश्च तदनुसारिण्यः स्मृतय एवं सत्यनवकाशाः प्रसज्येरन्। तासु ह्यचेतनं प्रधानं स्वतन्त्रं जगतः कारणमुपनिबध्यते। मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना धर्मजातेनापेक्षितमर्थं समर्पयन्त्यः सावकाशा भवन्ति, अस्य वर्णस्यास्मिन्कालेऽनेन विधानेनोपनयनम्, ईदृशश्चाचारः, इत्थं वेदाध्ययनम्, इत्थं समावर्तनं सहधर्मचारिणीसंयोगः–इति तथा पुरुषार्थांश्च वर्णाश्रमधर्मान्नाना-विधान्विदधति। नैवं कपिलादिस्मृतीनामनुष्ठेये विषयेऽवकाशोऽस्ति। मोक्षसाधनमेव हि सम्यगदर्शनमधिकृत्य ताः प्रणीता यदि तत्राप्यनवकाशाः स्युः,आनर्थक्यमेवाऽऽसां प्रसज्येत। तस्मात्तदविरोधेन वेदान्ता व्याख्यातव्याः।। कथं पुनरीक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधारितः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसङ्गेन पुनराक्षिप्यते? भवेदयमनाक्षेपः स्वतन्त्रप्रज्ञानाम् परतन्त्रप्रज्ञास्तु प्रायेण जनाः स्वातन्त्र्येण श्रुत्यर्थमवधारयितुमशक्नुवन्तः प्रख्यातप्रणेतृकासु स्मृतिष्ववलम्बेरन्। तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन्। अस्मत्कृते च व्याख्याने न विश्वस्युर्बहुमानात्स्मृतीनां प्रणेतृषु। कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते। श्रुतिश्च

भवति–"ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्" (श्वे॰ ५/२) इति। तस्मान्नैषां मतमयथार्थं शक्यं सम्भावयितुम्। तर्कावष्टम्भेन चैतेऽर्थं प्रतिष्ठापयन्ति। तस्मादपि स्मृतिबलेन वेदान्ता व्याख्येया इति पुनराक्षेपः।।

तस्य समाधिः– *नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति*।। यदि स्मृत्यनवकाशदोष-प्रसङ्गेनेश्वरकारणवाद आक्षिप्येत एवमप्यन्या ईश्वरकारणवादिन्यः स्मृतयोऽनवकाशाः प्रसज्येरन्। ता उदाहरिष्यामः–"यत्तत्सूक्ष्ममविज्ञेयम्" इति परं ब्रह्म प्रकृत्य "स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते" इति चोक्त्वा "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इत्याह। तथान्यत्रापि "अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे सम्प्रलीयते" इत्याह। "अतश्च संक्षेपमिमं श्रृणुध्वं नारायणः सर्वमिदं पुराणः। स सर्गकाले च करोति सर्वं संहारकाले च तदत्ति भूयः।।" इति पुराणे। भगवद्गीतासु च "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" (भ॰ गी॰ ७/६) इति। परमात्मानमेव च प्रकृत्यापस्तम्बः पठति–"तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्य" (ध॰ सू॰ १/८/२३/२) इति। एवमनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते।। स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्यामीत्यतोऽयमन्यस्मृत्यनवकाशदोषोपन्यासः। दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यम्। विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणम्, अनपेक्ष्या इतराः। तदुक्तं प्रमाणलक्षणे–"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" (जै॰ सू॰ १/३/३) इति। न चातीन्द्रियानर्थाञ्श्रुतिमन्तरेण कश्चिदुपलभत इति शक्यं सम्भावयितुम्; निमित्ताभावात्।।

शक्यं कपिलादीनां सिद्धानामप्रतिहतज्ञानत्वादिति चेत्, न; सिद्धेरपि सापेक्षत्वात्। धर्मानुष्ठानापेक्षा हि सिद्धिः। स च धर्मश्चोदनालक्षणः। ततश्च पूर्वसिद्धायाश्चोदनाया अर्थो न पश्चिमसिद्धपुरुषवचनवशेनातिशङ्कितुं शक्यते। सिद्धव्यपाश्रयकल्पनायामपि बहुत्वात्सिद्धानाम्, प्रदर्शितेन प्रकारेण स्मृतिविप्रतिपत्तौ सत्यां न श्रुतिव्यपाश्रयादन्यन्निर्णयकारणमस्ति। परतन्त्रप्रज्ञस्यापि नाकस्मात्स्मृतिविशेषविषयः पक्षपातो युक्तः ; कस्यचित्क्वचित्पक्षपाते सति पुरुषमतिवैश्वरूप्येण तत्त्वाव्यवस्थानप्रसङ्गात्। तस्मात्तस्यापि स्मृतिविप्रतिपत्त्युपन्यासेन श्रुत्यनुसारानुसारविषयविवेचनेन च सन्मार्गे प्रज्ञा सङ्गृहणीया।।

या तु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता, न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यम्; "कापिलमिति" ति श्रुतिसामान्यमात्रत्वात्, अन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात्, अन्यार्थदर्शनस्य च प्राप्तिरहितस्यासाधकत्वात्।। भवति चान्या मनोर्माहात्म्यं प्रख्यापयन्ती श्रुतिः–"यद्वै किञ्च मनुरवदत्तद्भेषजम्" (तै॰ सं॰ २/२/१०/२) इति।

मनुना च "सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। सम्पश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति।।" (१२/९१) इति सर्वात्मत्वदर्शनं प्रशंसता कापिलं मतं निन्द्यत इति गम्यते।।

कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते; आत्मभेदाभ्युपगमात्। महाभारतेऽपि च "बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु" इति विचार्य "बहवः पुरुषा राजन्साङ्ख्ययोगविचारिणाम्" इति परपक्षमुपन्यस्य तद्व्युदासेन–"बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्।।" इत्युपक्रम्य "ममान्तरात्मा तव च ये चान्ये देहसंस्थिताः। सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्क्वचित्।। विश्वंमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः। एकश्चरति भूतेषु स्वैरचारी यथासुखम्।।" इति सर्वात्मतैव निर्धारिता। श्रुतिश्च सर्वात्मतायां भवति–"यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः" (ई० ७) इत्येवंविधा। अतश्च सिद्धमात्मभेदकल्पनयापि कपिलस्य तन्त्रं वेदविरुद्धं वेदानुसारिमनुवचनविरुद्धं च, न केवलं स्वन्त्रप्रकृतिकल्पनयैवेति।।

वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये। पुरुषवचसां तु मूलान्तरापेक्षं वक्तृस्मृतिव्यवहितं चेति विप्रकर्षः। तस्माद्वेदविरुद्धे विषये स्मृत्यनवकाशप्रसङ्गो न दोषः।।१।।

कुतश्च स्मृत्यनवकाशप्रसङ्गो न दोषः?– *इतरेषां चानुपलब्धेः*।।२।।

प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ कल्पितानि महदादीनि, न तानि वेदे लोके वोपलभ्यन्ते। भूतेन्द्रियाणि तावल्लोकवेदप्रसिद्धत्वाच्छक्यन्ते स्मर्तुम्। अलोकवेदप्रसिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते। यदपि क्वचित्तत्परमिव श्रवणमवभासते, तदप्यतत्परं व्याख्यातम्–"आनुमानिकमप्येकेषाम्" (ब्र० १४/१) इत्यत्र। कार्यस्मृतेरप्रामाण्यात्कारणरमृतेरप्यप्रामाण्यं युक्तमित्यभिप्रायः। तस्मादपि न स्मृत्यनवकाशप्रसङ्गो दोषः। तर्कावष्टम्भं तु "न विलक्षणत्वात्" (ब्र० २/१/४) इत्यारभ्योन्मथिष्यति।।२।। इति प्रथमं स्मृत्यधिकरणम्।।

इति शाङ्करभाष्यम् स्मृत्यधिकरणम् समाप्तम्

वार्तिकम्

द्वितीये प्रथमे पादे स्मृतिन्यायविरोधयोः।
परिहारः स्वपक्षस्य, विपक्षस्य च मर्दनम्॥

कृतं द्वितीयपादेऽत्र, पादयोरवशिष्टयोः।
श्रुतीनामपि कार्याणामविगानं प्रसाधितम्॥
परस्परविगानं तु कार्याणां कारणेऽपि हि।
विगानमावहेत् क्वापि तस्मात् तस्य निराक्रिया॥

तत्रादिमपादाद्याधिकरणद्वयेन स्मृतिविरोधः परिह्रियते। "न विलक्षणत्वात्" इत्यारभ्याऽऽपादसमाप्तिपर्यन्तेनाधिकरणकलापेन तर्कविरोध इति॥

ननु–कासां स्मृतीनामनवकाशोऽत्र चोद्यते? न तावत् वेदानुयायिमन्वादिस्मृतीनाम्; असम्भवात्, वेदानुयायित्वविरोधाच्च। अविरोधे वा व्रीहियवबाक्ययोरिव विकल्प एव स्यात्। न हि वैदिकस्मृतीनामंशेऽप्यप्रामाण्यमिति शङ्कितुं शक्यते। तथा सत्यंशे लब्धप्रसरा सत्यप्रामाण्यपिशाची सर्वांशेऽपि स्मृतीनामप्रामाण्यमावहेत्। तथोक्तमभियुक्तैः–"प्रसरं न लभन्ते तु यावत् क्वचन मर्कटाः। नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे॥" इति। एतेन–अन्यस्मृत्यनवकाशप्रसङ्गेन तत्परिहारकरणमपि–प्रत्युक्तम्। न च क्रियायामिव वस्तुनि विकल्पानुपपत्तिरिति–वाच्यम्; तृणारणिमणिप्रभववह्निष्विव सर्गभेदेन ब्रह्मप्रधानादिप्रभवजगद्भेदोपपत्तेरुक्त दोषानवतारात्। नाप्यवैदिकमार्गानुयायिप्रणीतस्मृतीनाम्; तासां म्लेच्छस्मृतिवद् वैदिकैरनुपादेयत्वेन तान् प्रति तदनवकाशस्यादोषत्वेन तत्प्रसङ्गस्याचोद्यत्वादिति–चेत्, तत्राह–*स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता चेति*॥ तन्त्र्यते=व्युत्पाद्यते स्वातन्त्र्येणार्थजातं स्वशिष्येभ्यः कर्त्राऽनेनेति तन्त्रम्, एतदेवाख्या=संज्ञा=नाम यस्याः सा स्मृतिरवकाशप्रतियोगित्वेन गृह्यते। तेन

"पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिता:। वेदा: स्थानानि विद्यानां धर्मस्य च चतुर्दश।।" इति याज्ञवल्क्यादिभिर्धर्मशास्त्रकारै: परिगणितानां वैदिकनिबन्धानां परिवर्जनं कृते भवति; तन्त्रमित्याख्यानाभावात्। तथाच न तावद् वेदानुयायिमन्वादिस्मृतीनामनवकाशोऽत्र चोद्यत इत्यादिना यत् प्रथमपक्षदूषणमासञ्जितम्, तत्परिहृतं भवति।।

ननु—एवं तर्हि तन्त्राख्यानामवैदिकत्वाद् द्वितीयपक्षोक्तदोषोऽस्त्येवेति—चेत्. तत्राह—*परमर्षिप्रणीता शिष्टपरिगृहीता चेति*।। न सर्वासां तन्त्राख्यानामनवकाश इह चोद्यते, येन बौद्धार्हत-पाशुपत-कापालिक-नाकुल-वामागमप्रभृतीनां वेदविद्वेषिप्रणीतानां म्लेच्छप्रायैरेव कैश्चित् परिगृहीतानां सर्वशिष्टलोकविगीतानां प्रमाणत्वेन वेदामार्गानुयायिबुद्ध्यविषयाणां स्मृतीनामनवकाश-प्रसङ्गस्येष्टत्वेनादोषादचोद्यता भवेत्, किं तर्हि? वेदप्रामाण्यवादिभि: परमर्षिभि: कपिलपतञ्जलि-प्रभृतिभि: प्रणीतानां शिष्टैश्च पूर्वाचार्यैर्व्यासादिभि: कुतश्चिद् निमित्ताद् वेदानुयायिनिबन्धेषु कुत्रचिद् उपनिबद्धानां शिष्टैश्चाविगानेनाध्ययनाध्यापनद्वारा परिगृहीतानामंशतो वेदाविरुद्धाना-मनवकाशश्चोद्यते। भवति हि तासु शिष्टाविगानादंशत: अंशतो विरोधाच्च प्रामाण्यशङ्का; अर्धजरतीन्यायानवतारात्। अतो युक्ता शङ्का।।

ननु—एवमपि न युक्ता; "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमि" ति न्यायेनास्या: शङ्काया व्युदस्तत्वादिति—चेत्, न; भवेदेवम्, यदि हि वेदप्रस्थानमूलकमेव तासां प्रणयनं निश्चीयेत। न चैतदस्ति; स्वत: सिद्धार्थज्ञानमूलकत्वस्याप्यासां सम्भवात्। तथाच वेद-तद्विरुद्धस्मृतिवाक्योर्मूलमूलिभावाभावेन समकक्षत्वाद् एकतरेणान्यतरबाधानुपपत्तेरुक्तन्यायावतारा-सम्भवाद् युक्ता पुनरत्राशङ्केति मन्यते।।

अत्रेदं चिन्त्यते—किं वेदतद्विरुद्धकपिलादिस्मृतिवाक्ययो: समबलत्वम्, उत न—इति। तदर्थं चायमन्यो विचार:—किमार्षज्ञानमूलत्वेन तत्स्मृतीनां प्रामाण्यमभिधीयते, किं वा वेदमूलत्वेन? तदपि किमार्षज्ञानं वेदार्थानुष्ठानपरिपाकलब्धम्, किं वेश्वरज्ञानवत् स्वत: सिद्धमिति।।

किं तावत् प्राप्तम्? स्वत: सिद्धमिति। कुत:? कपिलादेरीश्वरस्येव ज्ञानवैराग्यादिस्मरणात्। श्रुतिरप्येवमर्थमनुमन्यते स्म—"ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्।" इति।।

ननु—मा भूदस्मिन् भवे कपिलादीनां सार्वज्ञयसिद्धये वेदार्थानुष्ठानम्, तस्योत्पत्त्या सहभावस्मरणादिविरोधात्, प्राचि भवे तु जातिस्मरत्वार्थमिव तदर्थं तेषां वेदार्थानुष्ठानं न विरोत्स्यते। तथाच तज्ज्ञानस्याजानसिद्धत्वेऽपि नेश्वरज्ञानवदन्यनिरपेक्षं प्रामाण्यम्। किं तर्हि वेदमूलत्वात्

तत्सापेक्षमिति-चेत्, मैवम्; प्राचि भवे कपिलादिभिरेतद्धवीनसार्वज्ञ्यसिद्धये वेदार्थानुष्ठानं कृतमित्यस्मिन्नर्थे प्रमाणाभावात् तत्कल्पनानुपपत्तेः। तथाचेश्वरत्वव्याहतिः। ईश्वरत्वव्याहतेरेव बाधकाद् न तत्र कल्पनम्, कपिलादेस्त्वनीश्वरत्वाद् न तद्बाधकमस्तीति चेत्, न; कपिलेश्वरावतारत्वस्मरणादनीश्वरत्वासिद्धेः। तस्माद् यथेश्वरस्य सार्वज्ञ्यमनादिसिद्धम्, एवं कपिलतदनुयायिस्मृतिकर्तृणामपि तदनादिसिद्धमेव, इति स्मृतीनां वेदादविशेषः ; "शास्त्रयोनित्वात्" इति न्यायेन वेदस्येश्वरकर्तृत्वाभ्युपगमात्। एवञ्च सति-

विरोधे वेदवाक्यानां स्मृतीनां च परस्परम्।
समप्रमाणभावानां केषां भङ्गः प्रकल्प्यताम्॥
समयोः समरे तावत् मल्लयोरिव युद्धयतोः।
परस्परानपेक्षाणां वह्नौ साधनभावता॥
तृणारणिमणीनां स यथा लोके प्रसिद्धयति।
ब्रह्मप्रधानयोस्तद्वद् जगत्कारणतेष्यताम्॥

ननु-एवं तर्हि तार्णादिवह्निवद् नानाजातीयानेकजगत्प्रसङ्गः, प्रसज्यताम्; का नो हानिः? यथा भवन्मतेऽनेकाज्ञानपक्षे दृष्टिसृष्टिपक्षे चानेके प्रपञ्चा अभ्युपगम्यन्ते, तद्वदविरोधोऽस्मन्मतेऽपि भविष्यति। यदि ब्रूयात्-अस्मन्मते बन्धमोक्षादिव्यवस्थासिद्धये प्रपञ्चानेकत्वं कल्पितम्; अन्यथा तदनुपपत्तेः, त्वत्पक्षे तु भोक्त्रीणां चितिशक्तीनां प्राधानिकमहदादिप्रपञ्चेनैव भोगापवर्गसिद्धेर्व्यर्थं ब्रह्मकारणकप्रपञ्चान्तरम्, द्विगुणीकृत्य भोगापवर्गानुपपत्तेश्चेति-चेत्, मैवम्; श्रुति स्मृतिप्रमाणानुरोधेन भोक्तृभेदकल्पनोपपत्तेः। यः प्राधानिकः सर्गः स्मृतिसिद्धः, तस्य भोक्तारः परस्परं ब्रह्मणश्च भिन्ना एव स्मृतिसिद्धा उपेयन्ते, यस्तु ब्रह्मोपादानक उपनिषत्सिद्धः, तस्य भोक्तारो ब्रह्माभिन्ना एवोपनिषत्सिद्धा अविद्या-तत्कार्यबुद्धयाद्युपाध्यवच्छिन्नाः, इति श्रुतिस्मृत्युभयप्रामाण्याद् भोक्तृभेदकल्पनया भोगव्यवस्थोपपत्तिः, अपवर्गव्यवस्थोपपत्तिश्च। ब्रह्माभिन्नतया श्रुतिसिद्धा आत्मानः श्रुतिसिद्धेनैव ज्ञानेन विमुच्यन्ते, साङ्ख्यात्मानस्तु साङ्ख्यशास्त्रविहितेन ज्ञानेन-इति। न च-एवं किमहं साङ्ख्यात्मा, किं वा श्रौत इति सन्देहात् तावकीयमोक्षशास्त्रानध्यवसानाद् मोक्षार्थिनस्तत्र प्रवृत्त्यनुपपत्तिरिति-वाच्यम्; पक्षपातवशेषेण तदध्यवसानात् तदुपपत्तेः। अत एव सूतसंहितायां ततत्पक्षपातिनो वेदे प्रवृत्तिर्निरुद्धा, वेदपक्षपातिनस्तु तन्त्रे प्रवृत्तिः-इति॥

ननु–एवं सामञ्जस्येऽभ्युपगम्यमाने वेदान्तानां प्रदर्शिते समन्वये को दोषः स्यात्? उच्यते; 'येनाश्रुतं श्रुतं भवति'' ''कस्मिन्नु खलु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति'' इत्यादिपदसमन्वयस्य प्रदर्शितमार्गेण सर्वाद्वैतपरस्यासामञ्जस्यमेव दोषः स्यात्–इति। यद्वा–

व्यवस्था कल्पभेदेन सर्गयोरनुमन्यताम्।
पुराणादौ कल्पभेदाद् वंशादिक्रमभेदवत्॥

पुराणेतिहासादि–प्रस्थानभेदे हि वंश–तदनुचरितादिभेदः, तत्क्रमभेदश्च स्मर्यमाणो दृश्यते। तत्राविरोधसिद्धये कल्प–मन्वन्तरादिभेदेन यथा तद्भेदे व्यवस्था क्रियते, तत्कस्य हेतोः? उभयपुराणप्रस्थानयोः समबलत्वेनैकतरवाधानुपपतेः, तद्वत् श्रुतिस्मृतिप्रस्थानयोरुभयोरप्युक्तप्रकारेण समबलत्वाध्यवसानात् कल्पभेदेन ब्रह्मप्रधानकारणकसर्गयोस्तदविरोधसिद्धये व्यवस्था स्वीक्रियतामिति।। यद्वा–

सावकाशा श्रुतिर्धर्मे न स्मृतिः कर्हिचित् क्वचित्।
अतः स्मृत्यनुसारेण श्रुत्यर्थोऽनुनियम्यताम्॥

श्रुतिर्हि धर्म–तत्साधन–तत्फलेषु प्रतिपाद्यमानेषु सावकाशा सत्यध्यात्मप्रतिपादन–मन्तरेणाप्युपपद्यते, वेदानुयायिमन्वादिस्मृतिश्च, न कपिलादिस्मृतयः ; अध्यात्मप्रतिपादनपरत्वात्, अतस्तदपि चेत् न प्रतिपादयेत्, निरवकाशा सती प्रामाण्यं चात्मनो जह्यात्। न चैतत् युक्तमित्युक्तमधस्तात्। तथाच ''सावकाशनिरवकाशयोर्निरवकाशं बलवत्'' इति न्यायात् कपिलादिस्मृत्यनुसारेणैवोपनिपदाम्, तदनुयायिमन्वादिस्मृतीनां चान्यथानयनमुचितम्; विशेषश्रुत्यनुसारेणैव सामान्यश्रुतीनां नेत्यत्वात्। एतेषां च पक्षाणामन्यतरपक्षानाश्रयणे स्मृत्यनवकाशदोषप्रसङ्गस्तव मते भवेत्। तदेतत् सर्वमभिप्रेत्योक्तम्– *स्मृत्यनवकाशदोषप्रसङ्ग इति चेदिति*।। *मन्वादिस्मृतयस्तावदिति*।। भाष्यं श्रुतीनामुपलक्षणमिति द्रष्टव्यम्। ''विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमि'' ति न्यायेनास्य विचारस्यासङ्गतार्थत्वमाशङ्कते– *कथं पुनरित्यादिना*।। कपिलादिप्रणीतस्मृतीनां श्रुतिमूलत्वमङ्गीकृत्यैवापातसमाधानमाह– *भवेदयमनाक्षेपः स्वतन्त्र–प्रज्ञानामिति*।। कपिलादेः स्वातन्त्र्यमङ्गीकृत्य परमसमाधानमाह– *कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यत इति*।। एतच्च व्याख्यातमस्मांभिरधस्तात्। *तर्कावष्टम्भेन चेति*।। ''न विलक्षणत्वादि'' त्यादिवक्ष्यमाणतर्कावष्टम्भनेति बौद्धव्यम्। एवमाक्षिप्ते तत्परिहारपरतया सूत्रावयवमवतारयति– *तस्य समाधिरिति*।।

अयमभिप्रायः—यद् भवता कपिलादिसिद्धानां वेदवाक्यानां च समबलत्वमभिधीयते, तन्न युक्तम्; परस्परविगानाविगानाभ्यां विशेषदर्शनस्य विद्यमानत्वात्।।

विगानं वेदावाक्यानां न परस्परमीयते।
दृश्यते सिद्धवाक्यानां तस्माद् वेदो बलाधिकः।।

यथा कपिलप्रभृतयः सिद्धविज्ञानैश्वर्यसम्पन्ना इति स्मर्यते, तथा मनुयाज्ञवल्क्यव्यासादयोऽपि; अविशेषात्। ते च ब्रह्मणः कारणतां सर्वज्ञतां च स्मरन्ति। तत्स्मृतयश्चोदाहृता भाष्ये द्रष्टव्याः। न च तद्विरोधे कपिलादिस्मृतयः सत्प्रतिपक्षानुमानवत् प्रामाण्यं लभन्ते। न खलु कपिलादिस्मृतय एव अनादिसिद्धार्षज्ञानपूर्वकाः, न मानवादिस्मृतय इति किञ्चित् नियमकारणमस्ति, येन तद्विरोधेन मान्वादिस्मृतीनामेवाप्रामाण्यं परिकल्प्येत, न मानवादिस्मृतिविरोधेन साङ्ख्यादिस्मृतीनामिति। न च—कपिलस्येश्वरावतारत्वाद् मन्वादिभ्यो विशेष इति—वाच्यम्; तत्कर्तुः कपिलाद् ब्रह्मणः पुत्रात् अन्यस्यैव कश्यपसुतस्येश्वरावतारत्वेन श्रवणात् तदप्रामाण्यसिद्धेः। एवं काणादगौतमबौद्धार्हतादिस्मृतिभिरपि साङ्ख्यादिस्मृतीनां विरोधः प्रदर्शनीयः ; तेषामपि ह्यनादिसिद्धार्षज्ञानमूलकत्वादेर्वक्तुं शक्यत्वात्। न चैवं वेदवाक्यानां परस्परं विगानमस्ति; तेषां गतिसामान्यस्य प्रपञ्चितत्वात्। तस्माद् अन्यस्मृत्यनवकाशदोषप्रसङ्गात् सत्यप्रतिपक्षपराहतानुमानवत् साङ्ख्यस्मृतीनां स्वार्थप्रमापकत्वानुपपत्तौ निष्प्रत्यूहतया स्वार्थं प्रमापयद् न स्मृत्यर्थेन सह स्वार्थस्य विकल्पसमुच्चयौ तद्वशेनान्यथा नयनं वाऽनुमन्यते; उक्तप्रकारेण ततो बलाधिकत्वादिति। तदेतदभिप्रेत्योक्तमन्यस्मृत्यनवकाशदोषप्रसङ्गादिति।

अपिच वेदस्यापौरुषेयतया स्वतः सिद्धप्रमाणभावत्वस्य दर्शितत्वाद् ईश्वरकर्तृकत्वेऽपि तदर्थज्ञानपूर्वकरचनाया अभावात् स्मृतेस्तु तद्वैपरीत्याद् न समानबलत्वं वेदेन सहास्योत्प्रेक्षितुं शक्येत। अंपिच ईश्वरज्ञानवद् आर्षज्ञानं न मूलान्तरनिरपेक्षम्; तस्य स्मृतिरूपत्वात्। ऋषिप्रभवं हि ज्ञानमार्षमित्युच्यते। ऋषिश्च मन्त्रः, तद्द्रष्टा वोच्यते; "तदुक्तमृषिणा" "ऋषिरवोचदि" त्यादिब्राह्मणवाक्ये तयोरेवापि प्रयोगदर्शनात्। न च तयोः स्वातन्त्र्येणानुभावकत्वमस्ति ब्राह्मणार्थस्मरकत्वेन मन्त्रतदर्थस्मर्तृत्वेन च तयोरध्यवसानात्। अत एव स्मृतिमूलत्वात् ऋषिवाक्यं स्मृतिरित्यभिधीयते लोके। स्वतन्त्रानुभवमूलत्वे, अबुद्धिपूर्वकत्वेन कविकाव्यादिवाक्यवद् वेदवाक्यवच्च न स्मृतिरित्यभिदध्यात्। तस्मादार्षज्ञानस्य स्मृतिरूपत्वेन प्रमाणान्तरसापेक्षत्वाद् न तन्मूलकवाक्यानां वेदेन समकक्षत्वमस्ति; कक्षाद्वयान्तरितत्वात्। ननु—एवं तर्हि अजादिमन्त्रार्थ एव कपिलेन महर्षिणा स्मर्यत इति किमिति न कल्प्यते? मैवम्; "चमसवदविशेषात्" इत्यादिन्यायेन

तेषामन्यपरत्वस्य दर्शितत्वात्। यदि मन्त्राणां यथाश्रुतार्थानुवादेनात्मसङ्गतापरत्वं कपिलेन स्मर्यत इत्युच्येत, काममेव सत्यं तत्स्मृतेः तस्मिन्नर्थे प्रामाण्यम्; प्रत्यक्षश्रुत्यविरुद्धत्वात्, न तत्राप्रामाण्यं वदामः। प्रधानजगत्कारणतायाम्, आत्मभेदे च तत्स्मृतेरप्रामाण्यं तु प्रत्यक्षश्रुतिविरोधात् तदनुयायिस्मृतिविरोधाच्च वदामः। सर्वथाऽपि न वेदविरुद्धकपिलादिस्मृतीनामपि प्रामाण्यम्। तथाच नोक्तव्यवस्थाकल्पनमुचितमिति।

ननु–प्रत्यक्षश्रुतिविरोधं विहाय किमिति सूत्रकारेण स्मृतिविरोध एवोपन्यस्यते– ''नान्यस्मृत्यनवकाशदोषप्रसङ्गादि'' ति? तत्राह–*स्मृतिबलेन प्रत्यवतिष्ठमानस्येति*।। सत्प्रतिपक्षोद्भावनाभिप्रायमित्यर्थः। तर्हि किं श्रुतिविरोधो न सूत्रकृतोद्भावनीयः? तर्हि परपक्षे सत्प्रतिपक्षोदभावनमात्रेण स्वपक्षे सिद्धिरस्ति, तत्राह–*दर्शितन्त्विति*।। तत् किं सर्वाः स्मृतयः परस्परव्याहतत्वाद् अप्रमाणम्? नेत्याह–*विप्रतिपत्तौ चेति*।। *न चातीन्द्रियानर्थानिति*।। लौकिकप्रमाणाविषयानित्यर्थः। यथाच जगत्कारणस्य लौकिकप्रमाणाविषयत्वम्, तथोक्तमधस्तात्। कश्चित्=अनीश्वर इत्यर्थः। अनीशानामपि सिद्धानां सार्वज्ञ्यस्मरणाद् अस्ति तदुपलम्भयोग्यतेति शङ्कते–*शक्यं कपिलादीनामिति*।। एवमपि वेदप्रमाणस्य तन्मूलत्वेन बलवत्त्वात् तद्विरोधेऽप्रमा। तथाऽपि न वेदविरुद्धांशे तज्ज्ञानं प्रमाणं भवेत्; वेदार्थानुष्ठानपूर्वकत्वात् तस्य। प्राचि भवे ह्येतद्भवीनसार्वज्ञ्यसिद्ध्यर्थं कपिलादिभिर्वेदार्थानुष्ठानं कृतमित्युक्तम्; अन्यथाऽमीषां सार्वज्ञ्याऽनुपपत्तेः। न च वेदप्रामाण्यमनभ्युपगच्छतां तदर्थानुष्ठानमुपपद्यते, उपपत्तौ वा ततः फलमुत्पद्यते। तस्मात् सिद्धेरपि धर्माऽनुष्ठानद्वारा तत्प्रामाण्यसापेक्षत्वात् तद्विरोधे सत्यसिद्धत्वमेवात्मन आवहेदिति परिहरति–*न सिद्धेरपि सापेक्षत्वादिति*।। ननु–भवतु धर्मानुष्ठानापेक्षा सिद्धिः, नैतावता वेदप्रामाण्यमपेक्ष्यते, येन तस्य पूर्वसिद्धज्ञानवत्त्वात्, अनुष्ठेयधर्मस्य चैत्यवन्दनादिलक्षणत्वात्–इति, नेत्याह–*स धर्मश्चोदनालक्षण इति*।। चोदना=वेदिकविधिवाक्यम्, तदेव लक्षणम्–प्रमाणं यत्र, स चोदनालक्षणः, स एव धर्मो नान्य इत्यर्थः। यथा चैतत् तथोपपादितं प्राच्यां मीमांसायाम्। सूत्रोपात्तमुक्तं दूषणान्तरं पुनरत्राप्यभिसन्धत्ते–*सिद्धव्यपाश्रयकल्पनायामिति*।।शिष्यान् बोधयति– *परतन्त्रप्रज्ञस्यापीति*।।१।।

नेत्याह– *सधर्मश्चोदनालक्षण इति*।। चोदना=वैदिकविधिवाक्यम्, तदेव लक्षणम्=प्रमाणम् यत्र स चोदनालक्षणः, स एव धर्मः, नान्य इत्यर्थः। यथा चैतत् तथोपपादितं प्राच्यां मीमांसायाम्। सूत्रोपात्तमुक्तं दूषणान्तरं पुनरत्राप्यभिसन्धत्ते–*सिद्धव्यपाश्रयकल्पनायामिति*।। शिष्यान् बोधयति– *परतन्त्रप्रज्ञस्यापीति*।।१।।

इतरेषाञ्चानुपलब्धेः।। अपि च आकाशादिभूतभौतिकप्रपञ्चस्य न साक्षात् प्रधानमुपादानम्, किं तर्हि महदादीन् द्वारीकृत्येति तवाऽभ्युपगमः,–''प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राणि, पञ्चतन्मत्रेभ्यो भूतानी'' ति स्मरणात्, ''महदाद्याः प्रकृतविकृतयः सप्ते'' ति च। न चैतदुपपद्यते; महदादीनामाकाशादिष्वन्वयानुपलब्धेः। न हि महदादीनामन्वय आकाशादिपु लोकदृष्टिपथमवतरति। न च तदनुपलब्धौ लिङ्गाभावात् तत्कारणत्वं सिद्धयति। तस्मात् महदादीनामकारणत्वाद् न प्रधानस्यापि कारणत्वमस्ति। ननु–महदादीनामन्वयाभावेऽपि सुखदुःखमोहाऽन्वयदर्शनात् त्रिगुणात्मकं प्रधानमन्वयि कारणमिति–चेत्, न; सुखदुःख मोहानामन्तःकरणधर्मत्वेन भूतभौतिकबाह्यप्रपञ्चेषु तदन्वयदर्शनस्याप्यसिद्धेः, तन्निमित्तत्त्वेऽपि तेषां तदात्मत्वाभावात्। श्रुतिप्रसिद्धं तु ब्रह्म सर्वत्रावयोर्दृश्यते; सत्त्वेन सर्वोपलब्धेरिति।।२।। इति प्रथमं स्मृत्यधिकरणम्।।

इति वार्तिकम् स्मृत्यधिकरणम् समाप्तम्

प्रदीपः

स्मृत्यनवकाशदोषप्रसङ्गादिति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्।।१।। प्रथमाध्यायस्य वेदान्तवाक्यतात्पर्यावधारणार्थत्वात् श्रवणरूपत्वम्, द्वितीयस्य तु तदसम्भावनानिरासार्थत्वात् मननरूपत्वम्, अतः श्रुतार्थोपपादकस्मृतियुक्तिविरोधपरिहारार्थत्वादस्याविरोधाध्याय इति नाम। वेदान्तवाक्यानां विधिनिषेधानात्मकानां वस्तुस्वरूपपर्यवसायिनां प्रमाणान्तरसंवादोऽप्युपकारक एव स्वार्थनिर्णये। तथाच श्रुत्यर्थनिर्णायकत्वेनोपयुक्तत्वात् ब्रह्मकारणपराणां स्मृतीनां यथा तत्सावकाशत्वं स्यात्, तदनुसार्येव वेदार्थः समादरणीयः, इति साङ्ख्यादिस्मृतिविरोधेन वेदार्थो व्यवस्थापनीया, इति तासां प्रधानादिकारणपरत्वात् तत्रैव वेदान्तानामपि तात्पर्यमूरीकर्तव्यमिति ब्रह्मकारणतावादायोग इति प्रत्यवस्थानात् प्रथमाध्यायेन द्वितीयाध्यायस्याक्षेपिकी सङ्गतिः। तत्र स्मृतीनां स्मृतियुक्त्यादिविरोधः प्रथमे पादे, युक्तीनां युक्तिभिर्विरोधो द्वितीये पादे, कार्यश्रुतीनां परस्परविरोधः तृतीय तुरीयपादयोश्च परिह्रियते, इति पादार्थविवेकः, इति स्मृतीनां स्मृतिविरोधपरिहारादत्र प्रादसङ्गतिः। ''प्रकृतिश्च प्रतिज्ञाद्रष्टान्तानुपरोधादि'' ति सूत्रप्रतिपादितस्य निमित्तकारणत्वस्य प्रधानकारणत्वस्य चोभयस्याक्षेपाद् आक्षेपसङ्गतिरनन्तरा।।

अस्मिन् पादे त्रयोदशाधिकरणानि वर्तन्ते–(१) स्मृत्यधिकरणम्, (२) योगप्रत्युक्त्यधिकरणम्, (३) नविलक्षणत्वाधिकरणम्, (४) शिष्टापरिग्रहाधिकरणम्, (५) भोक्त्रापत्त्यधिकरणम्, (६) तदनन्यत्वाधिकरणम् (७) इतरव्यपदेशाधिकरणम्, (८) उपसंहाराधिकरणम्, (९) कृत्स्नप्रसक्त्यधिकरणम्, (१०) सर्वोपेताधिकरणम्, (११) न प्रयोजनवत्त्वाधिकरणम्, (१२) वैषम्यनैर्घृण्याधिकरणम्, (१३) सर्वधर्मोपपत्त्यधिकरणम्–इति।।

अस्य पादस्य स्वपक्षस्थापनं प्रधानो विषयः, तदुपयोगितया प्रधानवादादिनिरासः, इति सर्वधर्मोपपत्त्यधिकरणेनोपसंहारगतेन ज्ञाप्यते।।

तत्र–ब्रह्मणो निमित्तत्वोपादानत्वोभयाक्षेपपरिहारः प्रथमेनाधिकरणेन, द्वितीय-तृतीय-तुरीय-

पञ्चमैरुपादानत्वमात्राक्षेपपरिहारः, पृष्ठेन विवर्तोपादानत्वोपसंहारः, सप्तमाष्टमाभ्यामद्वितीयस्यापि ब्रह्मणो निमित्तकारणत्वोपपादनम्, नवमेनाद्वितीयस्याप्युपादानत्वोपपादनम्, दशमैकादशाभ्यामकरण-स्याप्यद्वितीयस्य ब्रह्मणो प्रयोजनमनपेक्ष्यापि कर्तृत्वोपपादनम्, द्वादशेन निरपेक्षब्रह्मकारणतायामाक्षेपपरिहारः, त्रयोदशेन स्वपक्षोपसंहार इति पादार्थनिष्कर्षः।।

सर्वेष्वधिकरणेषु स्वपक्षसाधनं साक्षात्परम्परया वा क्रियत इति पादसङ्गतिस्तत्तत्स्मृत्यादिविरोधपरिहारादविरोधाध्यायसङ्गतिश्च। अध्यायादित्वात्तु नानन्तरसङ्गतिः। *स्मृत्यनवकाशदोषप्रसङ्गः*=साङ्ख्यादिस्मृतिविरोधापत्तिरद्वितीयब्रह्माभिन्ननिमित्तोपादानतायामिति चेत्, न=नैतद्युक्तम्; *अन्यस्मृत्यनवकाशदोषप्रसङ्गात्=मन्वादिस्मृतिवैयर्थ्यापत्तेरिति सूत्रार्थः।।

अयं भावः—"जन्माद्यस्य यत" इति सूत्रे ब्रह्मणि प्रत्यक्षानुमानागमानां त्रयाणां प्रामाण्यम्, धर्मे तु श्रुतिमात्रस्य प्रामाण्यमिति व्यवस्थापितम्। अत एव मन्तव्य इति मननविधिरुपपद्यते। तच्च मननमनुमानरूपं श्रुतिसापेक्षमेव प्रमाणम्, श्रवणाङ्गत्वान्मननस्येति सत्यं तत्र प्रतिपादितम्, परन्तु तत्सूत्रमनपेक्ष्योक्तम्। अनेन तु पादेन श्रुतिनिरपेक्षानुमानप्रमाण्यं निरस्यत इति "शास्त्रयोनित्वादि"ति प्रतिज्ञातवेदप्रामाण्यस्यैव ब्रह्मणि साक्षात्साधनेऽपि वेदविरोधे स्मृत्यप्रामाण्यस्य पूर्वतन्त्रसिद्धत्वेऽपि नाधिकरणानुत्थितिः। तथाच—श्रोतव्य इत्यंशमूलकः प्रथमाध्यायः, मन्तव्य इति विध्यंशमूलकश्च द्वितीयाध्यायः, निदिध्यासनविधिमूलकस्तृतीयाध्यायः, द्रष्टव्य इत्यंशमूलकश्चतुर्थाध्याय इति फलति। तत्र पूर्वपक्षे श्रवणमननयोः समप्राधान्यम्, सिद्धान्ते तु वस्तुनि विकल्पायोगात् स्मृतीनां युक्तीनां चाप्रामाण्यप्रसङ्गात् श्रवणप्राधान्यं निदिध्यासनप्राधान्यं वा विवक्षितमिति जन्मादिसूत्रे श्रुतिसापेक्षस्यैवानुमानस्य प्रामाण्यं व्यवस्थापितमुक्ता-धिकरणार्थनिबन्धनमिति नानुपपत्तिः।।

अत्र श्रवणप्राधान्यपक्षे, भामत्यभिमते निदिध्यासनप्राधान्ये चोभयत्र मननाप्राधान्ये श्रवणोत्तरत्वे च मननस्य न विप्रतिपत्तिः। त्रितयप्राधान्ये तु मननस्यापि स्वतन्त्रत्वात् कापिलादिस्मृतिप्रामाण्यं गृहीत्वा पूर्वपक्ष इति ध्येयम्। एतेन—श्रुतिविरुद्धां स्मृतिमवलम्ब्य श्रुत्यर्थाक्षेपोऽनुपपन्न इति शङ्काऽपि—परास्ता; "विरोधे त्वनपेक्षमि" त्यस्य श्रुतिप्राधान्य एव प्रवृत्त्याऽत्र शङ्कोत्थितिसम्भवात्। तथाच स्मृतिविरोधेन शङ्कायाः स्मृतिविरोधेन परिहारः, अनुमानविरोधेन शङ्कायास्तर्काप्रतिष्ठानादित्यनुमानान्तरविरोधेन परिहार इव। अनेन हि स्वतन्त्रप्रामाण्ये स्मृत्यनुमानयोरव्यवस्थाऽप्रामाण्यशङ्कास्कन्दितत्वेनोभयाप्रामाण्यम्, इति पदार्थप्राबल्याधिकरणन्यायेन 'विप्रतिषेधे भूयसां स्यात् स्वधर्मत्वमि' ति न्यायेन वा श्रुतिस्मृतिविशेषयोरुभयोरपि प्रामाण्यम्, न स्मृतिमात्रस्यानुमानमात्रस्य वेति निष्कर्षः सिद्धो भवति।।

अत्रेयं शङ्का समुदेति—स्मृत्यनवकाशप्रसङ्गस्यैकस्यैव पूर्वोत्तरपक्षोपष्टम्भकत्वं कथमिति? अत्रेदं समाधानम् —मन्वादिस्मृत्यनवकाशाभावमभिप्रेत्य पूर्वपक्षः, धर्मविषये तत्तत्प्रामाण्यात्। सिद्धान्तस्तु तत्तद्विषये प्रामाण्यस्यैव विवक्षणीयत्वात् मोक्षसाधनांशेऽप्रामाण्यापत्तितादवस्थ्यात् स्मृत्यनवकाशप्रसङ्गस्समान इति कृत्वेति न दोष इति। तदेतत्सर्वमाह—*स्मृतिश्च तन्त्राख्येत्यादिना—*प्रसज्येतेत्यन्तेन*।। श्रुतिविरोधे स्मृत्यप्रामाण्यात् कथं स्मृत्यनुसारेणाक्षेप इति शङ्कते—*कथमित्यादिना*।। ब्रह्मणि स्मृतीनामपि पौरुषेयीणामनाप्ताप्रणीतत्वेन वेदवत् स्वतः प्रामाण्यात् समप्राधान्ये श्रुतिस्मृत्योः श्रुत्यर्थस्यैव ग्रहणे विनिगमनाविरहात् केषाञ्चन पक्षेण प्रधानकारणवादोऽपि युक्त इति नाशङ्काविरोधः। तथाच श्रुतिद्वयविरोध इव सिद्धार्थे श्रुतिस्मृतिविरोधेऽपि प्रबलाश्रितप्रामाण्यमुभयाप्रामाण्यं वा स्वीकर्तव्यम्। तत्र प्रथमपक्षे प्रबलाप्तकपिलावलम्बात् स्मृतिप्रामाण्यम्, पक्षान्तरे तु न ब्रह्मैव कारणमिति व्यवस्थेति न तत्रैव वेदान्तानां प्रामाण्यमिति पूर्वपक्षाभिप्रायः। *परतन्त्रेति*।। स्मृतिप्रामाण्याश्रयणे कारणमाह—*प्रख्यातेति*।। आप्तत्वेन श्रुतिप्रसिद्धेत्यर्थः। उक्तामेव प्रसिद्धिमुपपादयति—*कपिलेति*।। न केवलमाप्तप्रणीतत्वेनानाप्ताप्रणीतत्वेन वा साङ्ख्यस्मृतिप्रामाण्यम्, किन्तु "विप्रतिषेधे भूयसां स्यात् स्वधर्मत्वमि" तिन्यायेनापीत्यभिप्रेत्याह—*तर्कावष्टम्भेनेति*।। वेदानामपौरुषेयत्वाद् वैदिकब्रह्मकारणतावादे वेदमात्रप्रामाण्यम्, आनुमानिकप्रधानकारणवादे तु तर्कस्मृत्युभयप्रामाण्यमिति प्रथमपक्षे प्रमाणद्वयबाधः, द्वितीयपक्षे त्वेकस्यैव प्रमाणस्य बाध इति भूयोऽनुग्रहन्यायेन स्मृतिप्रामाण्यपक्ष एव युक्त इति भावः।।

एवं पूर्वपक्षे सिद्धान्तमाह—*तस्येति*।। यदि भूयोऽनुग्रहन्यायेन कारणस्वरूपं व्यवस्थाप्यमित्याग्रहः, श्रुतिस्मृत्योश्च सममेव प्रामाण्यमिति, एवमपि ब्रह्मकारणतावाद एव समुचितः, तस्मिन् पक्षे श्रुतितर्कस्मृतीनां त्रयाणां प्रामाण्येन तद्बाधे त्रितयबाधापत्तेः। तथाच श्रुत्यनपेक्षस्मृतियुक्तिप्रामाण्यबाध एव युक्त इति वेदान्तानां ब्रह्मण्येव समन्वयो न विरुद्ध इत्यभिप्रायेणाह सूत्रकारः—*नान्येति*।। अन्या=विलक्षणा स्मृतिर्मन्वादिप्रणीता। अन्यत्वं तु श्रुतिनिरपेक्षत्वसापेक्षत्वाभ्याम्। दर्शितं च भाष्यकारेण मन्वादिस्मृतीनां श्रुत्यनुसारित्वमुत्तरत्र—*न चातीन्द्रियानित्यादिना*।। सर्वथा तु भूयोऽनुग्रहन्यायः सिद्धान्तपक्षस्यैवानुकूलः। तर्कस्यापि श्रुतिवत् स्वतः प्रामाण्यं स्वीकृत्योक्ताधिकरणप्रवर्तनात् श्रुतिविरोधेन स्मृत्यप्रामाण्ये प्रतिक्षिप्तेऽपि न तर्काप्राधान्यं प्रतिक्षिप्तमिति न—"न विलक्षणत्वादि" ति केवलतर्कावष्टम्भेन शङ्काया अनुत्थितिः।।

ब्रह्मकारणतानुगुणाः स्मृतीरुदाहरति—*यत्तत्सूक्ष्ममित्यादिना*।। तदेवमन्यत्वं विलक्षणत्व-

मित्यभिप्रेत्य व्याख्याने साङ्ख्यस्मृत्यप्रामाण्यं पर्यवस्यति। यदि तु अन्यत्वेन भेदमात्रं विवक्ष्यते–स्मृत्यन्तरानवकाशप्रसङ्गादिति, तदाप्युभयाप्रामाण्यात्, श्रुतेरेव व्यवस्थापकत्व-मित्यभिप्रेत्याह–*स्मृतिबलेनेति*।। ननु–एवं सति मनुस्मृतेरप्यप्रामाण्यापत्तिरिति–चेत्, मैवम्; न हि मन्वादिस्मृतीनां स्मृतित्वेन स्वतन्त्रं प्रामाण्यं कापिलादिस्मृतीनामिव स्वीक्रियते, किं तर्हि वेदमूलकत्वेनैवेति न कोऽपि दोष इत्याह–*दर्शितं त्विति*।। अनपेक्ष्याः=अप्रमाणम्। *इतराः*।। स्मृतय इति शेषः। श्रुतिविरुद्धानामपि स्मृतित्वं तु वर्तत एव, परन्तु स्वप्नभ्रमादिमूलकत्वं तासामिति न प्रामाण्यमिति भावः। तर्कावष्टम्भस्तु समान एवोभयासाम्। तथाच समानेऽपि तर्कावष्टम्भे श्रुत्यनुसारिणीनामेव प्रामाण्यम्; भूयोऽनुग्रहादिति भावः। यद्यप्यत्र साङ्ख्यस्मृतीनां मन्वादिस्मृतीनां वा स्मृतित्वेनैव प्रामाण्यमभिप्रेत्य पूर्वपक्षः सिद्धान्तश्चेति "विरोधे त्वनपेक्षं स्यादि" ति सौत्रन्यायस्य नावसरः ; तस्य श्रुतिमूलकत्वेन स्मृतिप्रामाण्यमुपजीव्य प्रवृत्तत्वात्, तथापि साङ्ख्यस्मृतिब्रह्मकारणताश्रुत्योस्तर्कमात्रोपष्टब्धा साङ्ख्यस्मृतिः स्मृतितर्कोभयोपष्टब्धश्रुत्यपेक्षया दुर्बलेति बोधनार्थमुक्तन्यायोपष्टम्भो न दोषाय। तथाच नात्र मन्वादिस्मृतिप्रामाण्यव्यवस्थापने तात्पर्यम्, किन्तु तन्मूलभूतवेदान्तवाक्यप्रामाण्यव्यवस्थापन एवेति श्रुत्यप्रामाण्यतत्प्रामाण्यपूर्वोत्तरपक्षौ न विरुद्धावित्यभिप्रेत्योक्तं सूत्रं सङ्गृह्णाति–*तदुक्तं प्रमाणलक्षण इत्यादिना*।। एतावता श्रुतिसाङ्ख्यादिस्मृतीनां समं प्रमाण्यमूरीकृत्य साङ्ख्यस्मृत्यप्रामाण्यं व्यवस्थापितम्, साम्प्रतं तु साङ्ख्यस्मृतीनां कारणस्वरूपे न स्वतः प्रामाण्यमित्याह–*न चातीन्द्रियानिति*।। अतीन्द्रियान्=लौकिकप्रत्यक्षाविषयान्। *निमित्ताभावादिति*।। लौकिकप्रत्यक्षस्य तन्मूलकस्यानुमानस्य वा स्मृतिमूलस्या प्रमाणस्यासम्भवादित्यर्थः।।

ननु–अलौकिकं यौगिकं ज्ञानं तत्र मूलमिति शङ्कते–*शक्यमिति*।। ज्ञानमपि जगत्कारणस्य धर्मोपासनाश्रवणादिनिबन्धनमेव भवितुमर्हति, न तु कल्पितसाधननिबन्धनमिति ब्रह्मकारणतौपनिषदतायामेव पर्यवसानम्; श्रुतिनिरपेक्षयोगजालौकिकप्रत्यक्षासम्भवादित्यभिप्रायेण समाधत्ते–*नेति*।। ननु–योगस्यापि तर्कनिर्णीतस्य प्रत्यक्षसाधनत्वाद् न श्रुत्यपेक्षेत्यत आह–*परतन्त्रेति*।। तथाच मन्वादिस्मृतीनामपि प्रामाण्याविशेषाद् न साङ्ख्यस्मृतिमात्रस्य व्यवस्थापकत्वम्; मन्वादीनामप्याप्तत्वेन प्रसिद्ध्यविशेषादिति भावः। मन्वादीनामप्याप्तत्वे श्रुतिं प्रमाणयति–*भवति चेति*।। एतावता प्रमाणेन स्मृत्यन्तरविरोधेन साङ्ख्यस्मृत्यप्रामाण्यं व्यवस्थापितम्, साम्प्रतं तु "तेऽप्याचार्या वयमप्याचार्या" इति न्यायात् स्वस्मृतिविरोधेनापि साङ्ख्यस्मृत्यप्रामाण्यं सूत्रकारो मन्यत इत्यभिप्रायेणाह–*महाभारतेऽपीति*।। महाभारतस्य मदीयस्यापि कापिलस्मृतिवत् कथं न प्रामाण्यम्; मयाऽपि वेदव्यासेन तर्केण

कापिलतर्कनिरसनपूर्वकं ब्रह्मकारणतावादस्य निरासादिति सूत्रकारो मन्यते। अन्यस्मृतिशब्देन साङ्ख्यस्मृतिभिन्नमदीयस्मृतिविरोधादिति सूत्रकाराशय इति भावः ; अन्यथा कपिलस्मृति-निरासावसरे व्यासस्मृतिविरोधकथनमसङ्गतं स्यादिति महाभारतविरोधोद्भावनमकिञ्चित्करमेव स्यात्।।

ननु–आत्मभेदस्य प्रत्यक्षसिद्धत्वाद् आनुमानिकत्वाच्च तदभेदवादो व्यासिको न प्रमाणमिति ब्रह्मकारणतावादोऽपि तदीयोऽप्रमाणमित्यत आह–*श्रुतिश्चेति*।। अहमादिप्रत्यक्षस्य शरीरादिविषयस्याध्यासभाष्योपक्रमगतभामतीरीत्याऽऽत्माविषयकत्वात् श्रुतिरेवात्मा न प्रमाणमिति धर्मिग्राहकप्रामाणेनैव तदैक्यस्यापि सिद्धत्वाद् मदीयमात्मैक्यमेव प्रामाणिकमिति "तत्सामान्यादितरेषु तथात्वमि" तिन्यायेन जगत्कारणतायामपि मदीय एव सिद्धान्तः स्वीकर्तव्यो न कपिलादीनामिति सूत्रकाराशयः। वस्तुतस्तु श्रुतिसाङ्ख्यादिस्मृत्योर्न समानं प्रामाण्यम्; "अत एव च नित्यत्वम्" इति तदपौरुषेयत्वव्यवस्थापनादित्याह–*वेदस्येति*।। निरपेक्षम्=प्रत्ययान्तरानपेक्षम्; पूर्वपूर्वक्रममपेक्ष्यैव वेदवाक्यानां प्रवर्तनेन तत्रेश्वरस्यापि स्वतन्त्रकर्तृत्वाभावात्। तदुक्तम्–"यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता।।" इति। साङ्ख्यादिस्मृतीनामपि निरपेक्षं प्रामाण्यमित्यत आह–*पुरुषवचसामिति*।। साङ्ख्यादिस्मृतीनां पौरुषेयत्वे तत्स्मृतित्वव्यवहार एव कारणम्। स्मृतित्वं हि प्रत्ययान्तरापेक्षम्, न निरपेक्षमिति भावः। तदेतदाह–*वक्तृस्मृतीति*।। वाक्यानि हि स्वतः प्रमाणानि, स्मृतिपदेन वयवह्रियमाणानि तु स्मृतिवदेव न प्रमाणानि; अन्यथा तत्स्मृतित्वव्यपदेशानुपपत्तेरिति भावः।।१।।

*इतरेषां चानुपलब्धेः।।२।। ननु–भवतु स्मृतीनां प्रमाणान्तरापेक्षत्वम्, तथापि साङ्ख्यादिस्मृतिरेव श्रुतिसापेक्षतया प्रमाणम्, न मन्वादिस्मृतिः, महाभारतादिर्वेत्यत आह सूत्रकारः–*इतरेषामिति*।। महाभारतादौ वैदिकवादा बहव एव दृश्यन्ते, इति "अपि वा कर्तृसामान्यादि" ति न्यायेन तेषां प्रामाण्यम्, साङ्ख्यस्मृतीनां तु न तथेति भावः। तदेतदुपपादयति–*प्रधानादिति*।। अयं चार्थः प्रथमाध्यायतुरीयपाद एव व्यवस्थापित इति स्मारयति–*यदपीत्यादिना*।। प्रथमाध्याये साङ्ख्यस्मृतीनां वैदिकत्ववादनिरासः, द्वितीयाध्याये स्वतन्त्रं साङ्ख्यस्मृतिप्रामाण्यवादस्य, तथा तदीयतर्कप्रामाण्यवादस्य च निरासः।।

एतेन प्रथमाध्याये साङ्ख्यवादनिरासोऽसङ्गतः ; अन्यथा द्वितीयाध्यायद्वितीयपादनिरस्यवेद-निरपेक्षतर्कप्रामाण्यवादिवैशेषिकनैयायिकसौगतजैनपाशुपतपाञ्चरात्रनिरासोऽपि सूत्रकाराणामावश्यकः स्यादिति शङ्का–परास्ता; पूर्वोक्तरीत्या भिन्नविषयत्वात्। तथाच प्रथमाध्याय इव द्वितीयाध्यायो न जगत्कारणब्रह्मस्वरूपमात्रविषयः, किन्त्वात्मैक्यतदखण्डत्वादिपर्यवसायितद्विषयः। जगत्कारणं

वेदान्तेष्वभिन्ननिमित्तोपादानब्रह्ममात्रसत्यतावादं तदितरमिथ्यात्ववादं जीवात्मपरमात्मैक्यवादं चोपजीव्यावकाशं लभते तत्र साङ्ख्यादिस्मृतिष्वितरेषामुपलम्भो न वर्तते, किन्तु मन्वादिसमृतिषु महाभारतादिष्वेवेतरेषामुपलम्भो वर्तते। अतो ब्रह्मसूत्रमहाभारताद्यनुमतजगत्कारणवाद एव प्रामाणिकः, न तु दर्शनान्तरसम्मतः। अत्रे "तरेषां चानुपलब्धेरि" त्यत्रेतरपदेन जगदभिन्ननिमित्तोपादानत्वानुबन्धिनो जगन्मिथ्यात्वाऽऽत्मैक्यवादादयो गृह्यन्ते। तथाच श्रवणादिसाधनविशेषाणां पातञ्जलयोगादावुपलम्भेऽपि न तत्प्रामाण्यमिति साधयिष्यमाणं न विरुद्धम्।।

अत्र साङ्ख्याद्यभिमतानामितरेषां वेदेष्वनुपलम्भात् तत्स्मृतीनां न प्रामाण्यमिति व्यवस्थापनेन साङ्ख्यस्मृतीनां वेदमूलकत्वं निरुध्यते। इदं तु तदभिमतात्मभेदादीनामप्युपलक्षणमिति मन्तव्यम्। अत्र द्वितीयाध्यायप्रथमपादे साङ्ख्ययोगप्रक्रियाया एवावलम्बेन पूर्वोत्तरपक्षाः प्रवर्त्यन्ते, न वैशेषिकादिप्रक्रियाया अवलम्बेन। अतो ज्ञायते वैशेषिकादिदर्शनानामपि महर्षिप्रवर्तितानां न स्मृतित्वव्यपदेश इति। अत एव महाभारते "साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।" इति साङ्ख्ययोगपाञ्चरात्रपाशुपतानामेवाध्यात्मचिन्तायामुपयोग इति ज्ञाप्यते।।

तत्र वेदान्तिभिरपि प्रधानकारणतावादः स्वीकृत एव; मायापरिणामस्वीकारात्, इति साङ्ख्यस्याध्यात्मचिन्तायामुपयोगो वर्तते। एतेन योगोऽपि व्याख्यातः ; जीवोत्पत्तिवादाद्यंशान् विहाय ब्रह्मणोऽपि प्रकृतेरेव परिणामित्वेऽप्युपादानत्वस्वीकारात् पाञ्चरात्रस्याप्यस्त्यध्यात्मचिन्तायामुपयोगः। पाशुपतस्य तु ब्रह्मकर्तृत्वतद्योगादिसाधनाङ्गीकारादस्त्यध्यात्मचिन्तायामुपयोगः। वैशेषिकनैयायिकाभ्यां तु स्वतन्त्राध्यात्मचिन्तोपयोगिनी न काऽपि चिन्ता क्रियते। अणुकारणतावादस्तु विशिष्टस्तैः साध्यमानः केवलमध्यात्मचिन्ताविरोध्येव। एवं सौगतजैनप्रक्रिया अपि। तथाचात्रांशतोऽध्यात्मचिन्तोपयोगिनां मतानां तन्मतविरुद्धप्रक्रियाविशेषमात्रनिरासः, द्वितीयपादेन तु सौत्रमविरुद्धतत्तत्प्रक्रियाणां निरसनं क्रियत इति वस्तुस्थितिः।।

तत्र योगसाङ्ख्याभिमतस्वतन्त्रप्रधानविकारितानिरासार्थं ब्रह्मण उपादानत्वासंभवशङ्कानिरासार्थं चाद्यानि त्रीण्यधिकरणानि। तुरीयं तु शिष्टापरिग्रहपदेन वैशेषिकादिदर्शनानां स्मृतिपादासङ्गतिसूचनात् प्रासङ्गिकमेव; अध्यात्मचिन्तानुपयोगाच्च। अनेन च विचारेण जीवब्रह्माभेदमनूद्य तस्य विभागाविरोधित्वार्थं व्यवहारदृष्टया सत्तात्रैविध्यवादव्यवस्थापनार्थं पञ्चममधिकरणम्। अनेन तु जीवब्रह्मैक्यपर्यवसायी ब्रह्मोपादानतावाद इति सूचनाद् अद्वैतवाद एव वेदान्तानां तात्पर्यमिति सूच्यते। मतान्तरेषु तु नोक्ताशङ्काया उत्थितिरपि। पाञ्चरात्रमतेऽप्यभिन्ननिमित्तोपादानतायाः स्वीकारात् यद्यपि शङ्कासमाधाने कथञ्चिदुपपद्येते, इति सूत्रकारेणाध्यात्मचिन्तोपयोगिनि तत्रैव तात्पर्यावसाय्येवोपादानत्वं ब्रह्मणो व्यवस्थाप्यत इति पाञ्चरात्रं

''साङ्ख्यं योगः पाञ्चरात्रमि''ति तृतीयतया निर्दिष्टं न वेदान्ताभिमतमिति सूत्रकारेण ज्ञाप्यते; यत इतरेषां वाचारम्भणत्वादीनां तत्र नोपलम्भः, तत्रोपलभ्यमानप्रपञ्चसत्यत्वादीनां वा वेदान्तेषु नोपलम्भः।।

अनेन चात्मनोऽखण्डत्वे व्यवस्थापिते–कथं जीवात्मभेदादिव्यपदेशादिकमिति शङ्कायां व्यवहारदृष्ट्यैव भेदो न परमार्थदृष्ट्येति व्यवस्थापनार्थमितरव्यपदेशाधिकरणम्। मतान्तरे तु पाञ्चरात्रे नोक्तायाः शङ्काया उत्थितिरपि। इतः परमवशिष्यतेऽध्यात्मचिन्तोपयोगि पाशुपतमतं पञ्चमतया निर्दिश्यमानम्। एतस्मिन् हि मते ब्रह्म निमित्तकारणमेव नोपादानम्। तथाच यदि ब्रह्म निमित्तकारणम्, तर्हि ससहायमिति नोपादानम्, इति शङ्कायामसहायस्यापि ब्रह्मणो विचित्रशक्तियोगादुपादानत्वं दध्यादिवद्देवादिवद्वा न विरुद्धमिति न पाशुपताभिमततर्कविरोध इति निरूपणार्थमुपसंहारदर्शनाधिकरणम्। तथाच वेदान्तेपूपलभ्यमानमुपादानत्वं पाशुपतमते नास्ति, तत्रोपलभ्यमानं केवलनिमित्तत्वमत्र .नास्तीति नास्याप्यध्यात्मचिन्तोपयोगिनो वैदिकत्वम्।।

अथ पाशुपतापाद्यमानामुपादानताऽनुपपत्तिं निरसितुं कृत्स्नप्रसक्त्यधिकरणम्। एतेषु चतुर्षु दर्शनेषु ब्रह्मानुपादानवादिनस्त्रय एव, साङ्ख्या योगिनः पाशुपताश्च। तत्र च नविलक्षणत्वाधिकरणेन साङ्ख्या योगिनश्च परिहृताः ; युक्त्याऽऽक्षेपस्य युक्त्यैव परिहारात्। पाशुपतास्त्वन्येनाधिकरणेन परिह्रियन्ते। निमित्तकारणत्वांशे तु न तैः साकमद्वैतिनामपि विरोध इत्याक्षेपसमाधानाभ्यां तत्संसाध्यान्ते सर्वधर्मोपपत्तिरद्वैताभि मतेऽभिन्ननिमित्तोपादानतावाद एवेति व्यवस्थाप्यते। तथाच सर्वधर्माणामद्वैताभिमतानां वेदेषूपलम्भो वर्तते; यथायोगं सर्वेषां भेदाभेदादिवाक्यानां प्रामाण्यस्य तैः स्वीकारात्। मतान्तरोपलभ्यमानानां सर्वासां प्रक्रियाणां तु न वेदेषूपलम्भ इति न सर्वधर्मोपपत्तिरन्येषु दर्शनेषु। तथाच द्वितीयाध्यायप्रथमपादप्रथमाधिकरणान्तिमसूत्रेण साकं तदीयान्तिमसूत्र-स्यैकवाक्यताऽद्वैतवाद एव भवति, नान्यत्र। न केवलमितरेषां वेदेष्वनुपलम्भमात्रेण तेषामप्रामाण्यम्, वेदविरुद्धानामपि बहूनां तत्रोपलम्भ इति ततोऽपि तेषामप्रामाण्यमिति निरूपणार्थ द्वितीयपाद इति निष्कर्षः।।

तदिदं सिद्धम्– यद् अध्यात्मचिन्तोपयोगिनां साङ्ख्ययोगादिमतानां निरासार्थः द्वितीयाध्याय-प्रथमपादः। तत्रापि तर्कावष्टम्भेन साङ्ख्यादिस्मृतिप्रामाण्यशङ्कानिरासार्थं प्रथमाधिकरणम्, स्वतन्त्रतया वेदवदेवागमविधया स्वनिबन्धप्रामाण्यनिरासार्थान्यपराण्यधिकरणानीति। तदिदमाह– *तर्कावष्टम्भं त्विति*।। वैशेषिकादयस्तु तर्काणामेव प्रामाण्यम्, न तु तदुपष्टब्धनिबन्धानामिति मन्यन्ते, न तेषामत्र पादे मुख्या सङ्गतिरिति भावः।।२।। इति प्रथमं स्मृत्यधिकरणम्।।

इति प्रदीपः स्मृत्यधिकरणम् समाप्तम्

भामती

वृत्तवर्तिष्यमाणयोः समन्वयविरोधपरिहारलक्षणयोः सङ्गतिप्रदर्शनाय च सुखग्रहणाय चैतयोः संक्षेपतस्तात्पर्यार्थमाह *प्रथमेऽध्याये इति*। अनपेक्षवेदान्तवाक्यस्वरससिद्धसमन्वयलक्षणस्य विरोधतत्परिहाराभ्यामाक्षेपसमाधानकरणादनेन लक्षणेनास्ति विषयविषयिभावः सम्बन्धः। पूर्वलक्षणार्थो हि विषयस्तद्गोचरत्वादाक्षेपसमाधानयोरिव च विषयीति। तदेवमध्यायमवतार्य तदवयवमधिकरणमवतारयति। *तत्र प्रथमं तावद् इति*। तन्त्र्यते व्युत्पाद्यते मोक्षसाधनमनेनेति तन्त्रं, तदेवाख्या यस्याः सा स्मृतिस्तन्त्राख्या परमर्षिणा कपिलेनादिविदुषा प्रणीता। अन्याश्चासुरिपञ्चशिखादिप्रणीताः स्मृतयस्तदनुसारिण्यः। न खलु अमूषां स्मृतीनां मन्वादिस्मृतिवदन्योऽवकाशः शक्यो वदितुमृते मोक्षसाधनप्रकाशनात्। तदपि चेन्नाभिदध्युरनवकाशाः सत्योऽप्रमाणं प्रसज्येरन्। तस्मात् तदविरोधेन कथञ्चिद्वेदान्ता व्याख्यातन्या। पूर्वपक्षमाक्षिपति *कथं पुनरीक्षत्यादिभ्यः इति*। प्रसाधितं खलु धर्ममीमांसाया 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इत्यत्र, यथा श्रुतिविरुद्धानां स्मृतीनां दुर्बलतयाऽनपेक्षणीयत्वं तस्मान्न दुर्बलानुरोधेन वलीयसीनां श्रुतीनां युक्तमुपवर्णनम्, अपि तु स्वतः सिद्धप्रमाणभावाः श्रुतयो दुर्बलाः स्मृतीर्बाधन्त एवेति युक्तम्। पूर्वपक्षी समाधत्ते। *भवेदयम् इति*। प्रसाधितोऽप्यर्थः। श्रद्धाजडान् प्रति पुनः प्रसाध्यत इत्यर्थः। आपाततः समाधानमुक्तवा परमसमाधानमाह पूर्वपक्षी *कपिलप्रभृतीनां चायम् इति*। अयमस्याभिसन्धिः—ब्रह्म हि शास्त्रस्य कारणमुक्तं 'शास्त्रयोनित्वाद्' इति, तेनैष वेदराशिर्ब्रह्मप्रभवः सन्राजानसिद्धानावरणभूतार्थमात्रगोचरतद्बुद्धिपूर्वको यथा तथा कपिलादीनामपि श्रुतिस्मृतिप्रथिताजानसिद्धभावानां स्मृतयोऽनावरणसर्वविषयतद्बुद्धिप्रभवा इति न श्रुतिभ्योऽमूषामस्ति कश्चिद्विशेषः। न चैताः स्फुटतरं प्रधानादिप्रतिपादनपराः शक्यन्तेऽन्यथयितुम्। तस्मात् तदनुरोधेन कथञ्चिच्छ्रुतय एव नेतव्याः। अपि च तर्कोऽपि कपिलादिस्मृतीरनुमन्यते, तस्मादप्येतदेव प्राप्तम्।

एवं प्राप्त आह *तस्य समाधिः इति*। यथा हि श्रुतीनामविगानं ब्रह्मणि गतिसामान्यात्, नैवं स्मृतीनामविगानमस्ति प्रधाने, तासां भूयसीनां ब्रह्मोपादानत्वप्रतिपादनपराणां तत्र तत्र दर्शनात्। तस्मादविगानाच्छ्रौत एवार्थः आस्थेयो न तु स्मार्तो विगानादिति। तत्किमिदानीं परस्पर विगानात् सर्वा एव स्मृतयोऽवहेया इत्यत आह *विप्रतिपत्तौ च स्मृतीनाम् इति*। *न चातीन्द्रियानर्थान् इति*

अर्वाग्दृगभिप्रायम्। शङ्कते *शक्य कपिलादीनाम् इति*। निराकरोति। *न सिद्धेरपि इति*। न तावत्तकपिलादय ईश्वरवदाजानसिद्धाः, किन्तु विनिश्चितवेदप्रामाण्यानां तेषां तदनुष्ठानवतां प्राचिभवेऽस्मिन् जन्मनि सिद्धिरत एवाजानसिद्धा उच्यन्ते। यदस्मिन् जन्मनि न तैः सिद्ध्युपायोऽनुष्ठितः प्राग्भवीवेदार्थानुष्ठानलब्धजन्मत्वात्सिद्धीनां तथा चावधृतवेदप्रामाण्यानां तद्विरुद्धार्थाभिधानं तदपबाधितमप्रमाणमेव। अप्रमाणेन च न वेदार्थोऽतिशङ्कितुं युक्तः प्रमाणसिद्धत्वात्तस्य। तदेवं वेदविरोधे सिद्धवचनमप्रमाणमुक्त्वा सिद्धानामपि परस्परविरोधे तद्वचनादनाश्वास इति पूर्वोक्तं स्मारयति *सिद्धव्यपाश्रयकल्पनायामपि इति*। श्रद्धाजडान् बोधयति। *परतन्त्रप्रज्ञस्यापि इति*। ननु श्रुतिश्चेत्कपिलादीनामनावरणभूतार्थगोचरज्ञानातिशयं बोधयति, कथं तेषां वचनप्रमाणं? तदप्रामाण्ये श्रुतेरप्यप्रामाण्यप्रसङ्गादित्यत आह *या तु श्रुतिः इति*। न तातावत्सिद्धानां परस्परविरुद्धानि वचांसि प्रमाणं भवितुमर्हन्ति। न च विकल्पो वस्तुनि, सिद्धे तदनुपपत्तेः। अनुष्ठानमनागतोत्पाद्यं विकल्प्यते, न सिद्धम्। तस्य व्यवस्थानात्। तस्मात् श्रुतिसामान्यमात्रेण भ्रमः सांख्यप्रणेता कपिलः श्रौत इति। स्यादेतत्—कपिल एव श्रौतो नान्ये मन्वादयः। ततश्च तेषां स्मृतिः कपिलस्मृतिविरुद्धाऽवहेयेत्यत आह *भवति चान्या मनोरिति*। तस्याश्चागमान्तरसंवादमाह महाभारतेऽपि च इति। न केवलं मनोः स्मृतिः स्मृत्यन्तरसंवादिनी श्रुतिसंवादिन्यपीत्याह *श्रुतिश्च इति*। उपसंहरति *अतः इति*। स्यादेतत्—भवतु वेदविरुद्धं कापिलं वचस्तथापि द्वयोरपि पुरुवबुद्धिप्रभवतया को विनिगमनायां हेतुर्यतो वेदविरोधि कापिलं वचो नादणीयमित्यत आह *वेदस्य हि निरपेक्षम् इति*। अयमभिसन्धिः—सत्यं शास्त्रयोनिरीश्वरस्तथाप्यस्य न शास्त्रक्रियायामस्ति स्वातन्त्र्यं कपिलादीनामिव, स हि भगवान् यादृशं पूर्वस्मिन् सर्गे चकार शास्त्रं तदनुसारेणास्मिन्नपि सर्गे प्रणीतवान्। एवं पूर्वतरानुसारेण पूर्वस्मिन्, पूर्वतमानुसारेण च पूर्वतर इत्यनादिरयं शास्त्रेश्वरयोः कार्यकारणभावः। तत्रेश्वरस्य न शास्त्रार्थज्ञानपूर्वा शास्त्रकिया येनास्य कपिलादिवत् स्वातन्त्र्यं भवेत्। शास्त्रार्थज्ञानं चास्य स्वयमाविर्भवदपि न शास्त्रकारणतामुपैति, द्वयोरप्यपर्यायेणाविर्भावात्। शास्त्रं च स्वतो बोधकतया पुरुषस्वातन्त्र्याभावेन निरस्तसमस्तदोषाशङ्कं सदनपेक्षं साक्षादेव स्वार्थे प्रमाणम् कपिलादिवचांसि तु स्वतन्त्रकपिलादिप्रणेतृकाणि तदर्थस्मृतिपूर्वकाणि, तदर्थस्मृतयश्च तदर्थानुभवपूर्वाः। तस्मात्तासामर्थप्रत्ययाङ्गप्रामाण्यविनिश्चयाय यावत् स्मृत्यनुभवौ कल्प्येते तावत् स्वतःसिद्धप्रमाणभावयाऽनपेक्षयैव श्रुत्या स्वार्थो विनिश्चायित इति शीघ्रतरप्रवृत्तया श्रुत्या स्मृत्यर्थो स्मृत्यर्थो बाध्यत इति युक्तम्।।१।।

प्रधानस्य तावत् क्वचिद्वेदप्रदेशे वाक्याभासानि दृश्यन्ते, तद्विकाराणां तु महदादीनां तान्यपि न सन्ति। न च भूतेन्द्रियादिवन्महदादयो लोकसिद्धाः। तस्मादात्यन्तिकात् प्रमाणान्तरासंवादात् प्रमाणमूलत्वाच्च स्मृतेर्मूलाभावादभावो वन्ध्याया इव दौहित्र्यस्मृतेः। न चार्षं ज्ञानमत्र मूलमुपपद्यत इति युक्तम्। तस्मान्न कापिलस्मृतेः प्रधानोपादानत्वं जगत इति सिद्धम्।।२।।

इति भामती स्मृत्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू०।। **स्मृत्यनवकाश्शदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्।।१।।**

अतीतेऽध्याये सच्चिदानन्दस्वरूपे सर्वज्ञत्वसर्वशक्तित्वादिस्वरूपलक्षणे सकलजगज्जन्माद्युपलक्षणे सर्वविलक्षणे सर्वात्मनि विरूपाक्षत्वकृष्णपिंगलत्वनीलकण्ठत्वादिविशिष्टलीलामंगलस्वरूपस्वभावे भवशिवशर्वमहादेवपरमेश्वरशब्दादिमुख्यवाचके परमकारुणिके परब्रह्मणि शिवे निखिलवेदांतवाक्यानां तदनुगुणानां स्मृत्यादीनां च तात्पर्येण समन्वयोऽभिहित:। इदानीमनेनाध्यायेन तस्य समन्वयस्य वेदांतविरुद्धस्मृतितर्कादिभिर्विरोध: परिह्रियते। प्रथमं सांख्यस्मृतिविरोध: परिह्रियते। अस्मिन् सर्वत्र पूर्वोक्त: समन्वयो विषय:। इह वैदिकसमन्वयस्य सांख्यसमृत्या संकोचोऽस्ति न वेति संदेह:। कथम्। ब्रह्मणो जगत्कारणत्वं वेदोऽभिधत्ते। कपिलस्मृति: प्रधानस्य। कपिलो हि महातपस्वी। ततस्तद्वचनमपि प्रमाणमेव। वेदोऽपि भगवानखिलप्रमाणसार्वभौम:। स चाप्राण्यगंधमपि न सहते। तदनयो: कस्य केन बाध इति संशयप्राप्ति:। तत्र सांख्यस्मृतेरनवकाशत्वेन प्रबलत्वात् वेदस्य धर्मेण सावकाशतया दुर्बलत्वादनवकाशया स्मृत्या वेदस्य संकोचो युक्त इति चेद्वदति पूर्वपक्षी वयमपि नेति वदाम:। कथम्? अन्यासां वेदाविरोधिनीनां मन्वादिस्मृत्यादीनामनवकाशदोषप्रसङ्गात्। 'अप एव ससर्जादौ तासु वीर्यमवासृजत्' इत्यादिना 'हिरण्यगर्भं पश्यत जायमानम्' इत्यादिप्रत्यक्षश्रुतिसिद्ध-ब्रह्मकारणत्ववादिनीभिर्मन्वादिस्मृतिभिस्तद्विरुद्धाभिधायिन्या अनुमेयश्रुतिमूलाया: साङ्ख्यस्मृतेरेव बाध: प्रमाणिकजनपरिग्राह्य इति।।

।।सू।। **इतरेषां चानुपलब्धे:।।२।।**

इतरेषां च मन्वादीनां सर्वज्ञानां स्मृतिषु कपिलदृष्टस्य प्रधानकारणत्वादेरनुपलब्धे: प्रधानस्मृतिरनागममूलैवेति वक्तुं युक्तम्। अत: साङ्ख्यसमृत्या समन्वयस्य न संकोच:।। 'इति स्मृत्यधिकरणम्।।१।।

इति श्री कण्ठभाष्य स्मृत्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

वृत्तवर्तिष्यमाणयोरध्याययोः प्रतिपाद्यं संगतिसूचनार्थमुपन्यस्य उत्तराध्यायमवतारयति **अतीतेऽध्याय इति।** भगवता सूत्रकारेण 'अथातो ब्रह्मजिज्ञासे'ति (ब्र० १.१.१.सू) ब्रह्मविचारं प्रतिज्ञाय जगज्जन्मादिकं सच्चिदानन्दरूपत्वविग्रहविशेषविशिष्टत्वादिकं च ब्रह्मणो लक्षणं प्रदर्श्य प्रदर्शितलक्षणविशिष्टे तस्मिन्वेदांततदुपबृंहणस्मृत्यादीनां प्रामाण्यं प्रतिज्ञाय प्रतिज्ञातार्थोपपादनाय तेषां ब्रह्मण्येव तात्पर्येण समन्वयः प्रथमाध्यायेनाभिहितः न तु शिवे इत्याशङ्क्य 'परब्रह्मणि शिव' इति विशेषितम्। तस्य परब्रह्मत्वोपपादनाय ब्रह्मस्वरूपतटस्थलक्षणानां तत्रैव पर्यवसानं 'लीलामङ्गलस्वरूपस्वभाव' इत्यन्तैर्दर्शितम्। सर्वविधतदुपपादकोपलक्षणतया 'शिवभवे' त्यादि विशेषणं कृतम्। शिवस्य स्वोपासनानुगुणनिखिलफलप्रदानोन्मुखस्वभावत्वेन उपासनासिद्ध्यर्थमुपासकसौलभ्यं 'परमकारुणिक' इति विशेषणेन सूचितम्। **तस्य समन्वयस्येति।** तथा च समन्वये निरूपिते तस्य स्मृतितर्कादिभिः विरोधेनाक्षेपस्तत्समाधानं चावकाशं लभत इति समन्वयाध्यायानन्तर्यमस्वाध्यायस्येति संगतिरिति भावः। 'स्मृतितर्कादिभि' रित्यादिशब्देन भूतभौतिकसृष्टयादिविषयस्मृतीनां परस्परविरोधः परिगृह्यते। समन्वयस्य संभावितसकलविरोधपरिहारोऽध्यायार्थ इत्यध्यायार्थैक्यमिति भावः। पादार्थभेदस्त्वग्रे प्रदर्शयिष्यते। प्रथमाधिकणार्थमाह– **प्रथममिति। अस्मिन्त्सर्वत्रेति।** अस्मिन्नध्याये सर्वेष्वप्यधिकरणेषु प्रथमाध्यायव्यवस्थापितस्समन्वयो विषय इत्यर्थः। **इहेति।** इहाधिकरणे ब्रह्मविषयस्य वेदान्तसमन्वयस्य प्रधानविषयया कपिलस्मृत्या बाध्यत्वमन्यपरत्वेन नेयत्वलक्षणमस्ति न वेति संशय इत्यर्थः। ननु, नायं संशयः वदान्तेष्वऽपि 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'अक्षरात्परतः पर' इत्यादौ प्रधानप्रसिद्धिसत्त्वेन सेश्वरसांख्यमते ब्रह्मप्रसिद्धिसत्त्वेन च विरोधाभावात् तत्सत्त्वेऽपि श्रुतिस्मृत्योर्विरोधे श्रुत्या स्मृतिर्बाध्येत्यौदुंबरीस्पर्शसर्ववेष्टनस्मृत्यादिषु सम्प्रतिपन्नत्वाच्चेत्याक्षिपति– **कथमिति।** प्रथमस्याक्षेपस्योत्तरं **ब्रह्मण इति।** कपिलस्मृतिर्वेदान्तवत् ब्रह्मणो जगत्कारणत्वं न प्रतिपादयति। वेदान्ताः कपिलस्मृतिवत् प्रधानस्य स्वतन्त्रकारणत्वं न प्रतिपादयन्ति इति अस्ति तावद्विरोध इति भावः। द्वितीयस्योत्तरमाह– **कपिल इति।** 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति

जायमानं च पश्ये' दिति कपिलस्य हिरण्यगर्भस्येव जायमानावस्थाप्रसृतपरमेश्वरकटाक्षलब्धाप्रतिघज्ञानातिशयत्वं प्रसिद्धम्। तथा तपोबलवशीकृतपरमेश्वरप्रसादलब्धसार्वज्ञ्यस्य कपिलस्य वचनमप्रमाणमिति वक्तुमयुक्तमिति सर्ववेष्टनस्मृत्याद्यपेक्षयास्ति विशेष इति भावः। 'तत्र सांख्यस्मृते' रित्यादिपूर्वपक्षभाष्यस्यायमाशयः। श्रुतिस्मृत्योर्न। श्रुतिस्मृतित्कृतं नियतं प्राबल्यदौर्बल्यं किं तु बलाबलवैपरीत्यकारणान्तराभावसापेक्षमौत्सर्गिकम्। अत एव 'वेदं कृत्वा वेदि' रिति पदार्थधर्मभूतक्रमविषयश्रुतितः 'क्षुत आचामे' दिति स्मृतेर्धार्मभूतपदार्थविषयत्वं प्राबल्यकारणमस्तीति बलाबलवैपरीत्यमाश्रितम्। यथोक्तं वार्तिककारैः – 'दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा। तदापि विपरीतत्वं शिष्टाकोपे यथोदितम्। अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः। दुर्बलैरेव बाध्यन्ते पुरुषैः पार्थिवाश्रितै' रिति। इहाप्यस्त्यग्निहोत्रादिधर्मविषयत्वेन सावकाशायाः श्रुतितो निरवकाशत्वं कपिलस्मृतेः प्राबल्यकारणम्। क्लृप्तं च सावकाशात् 'यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरंती'त्युपांशुस्वरविधाना'न्मन्द्रं प्रायणीयायामनुब्रूयात् मन्द्रतरमातिथ्याया'मिति प्रायणीयादिगतस्वरान्तरविधानस्य निरवकाशत्वेन प्राबल्यम्। तस्माद्यद्यपि श्रुतिस्मृत्योर्बलाबलमौत्सर्गिकम्। किं बहुना। स्मार्तश्रुत्येपेक्षयापि वैदिकं लिंगमात्रं बलवदित्युत्सर्गः। अत एव वार्तिके यत्र पुनः श्रुतिरानुमानुकी लिंगं प्रत्यक्षं तत्र कथं यथाश्रुति वैदिकलिंगविरोध इति प्रश्नमुद्भाव्य तत्र स्मृतेर्मूलान्तरमपि संभाव्यते न तु वैदिकलिंगस्येति तदेव बलवदित्यनुसर्तव्यमित्युक्तम्। तथाप्यत्र निरवकाशत्वरूपस्यापवादस्य सद्भावात् नात्रोत्सर्गः प्रवर्तते। सिद्धांतिनोऽपि हि 'अस्य लोकस्य का गतिरिति आकाश इति होवाचे' त्यादिषु वाक्येषु श्रुतिलिंगादिपारदौर्बल्योत्सर्गो न प्रवर्तते। आकाशादिश्रुतितोऽनन्तत्वादिलिंगप्राबल्यहेतोरपवादस्य सद्भावादित्यभ्युपगन्तव्यम्। अपि च। सावकाशनिरवकाशत्वेनव अव्यवस्थितार्थत्वव्यवस्थितार्थत्वमपि बलाबलवैपरीत्यकारणम्। अत एव 'यदृचास्तुव तदसुरा अन्ववायन् यत्साम्नास्तुवत तदसुरा नान्ववायन् य एवं विद्वान् साम्ना स्तुवीते'त्यृक्सामस्तुतिविधिरूपयोरुपक्रमोपसंहारयोरश्वप्रतिग्रहेष्टिगतयोरिव प्राप्तस्य प्राबल्यदौर्बल्योत्सर्गस्य 'यदृचास्तुवते' त्यादीनामसुरागमहेतुतया निन्द्यता उत वशीकर्तुमशक्यानामसुराणामऽपि वशीकरणहेतुतया स्तुत्यता इति संदेहावकाशसद्भावेन उपक्रमस्याव्यवस्थितार्थत्वं सामविधिपरत्वेनोपसंहारस्य व्यवस्थितार्थत्वं चापवादकमस्तीत्युपसंहारानुसारेण उपक्रमस्य निंदापरत्वमाश्रितम्। अस्त्यत्र तदपि बलाबलवैरीत्यकारणम्। अतिगंभीरा हि वेदांताः स्वल्पमतीनामशक्यार्थनिश्चयाः। 'कश्छंदसां योगमावेद धीर' इति श्रुत्यैव च वेदानामशक्यार्थनिश्चयत्वमुक्तम्। विशिष्य च वेदांतवेद्यस्य जगत्कारणस्याशक्यनिर्णयत्वं 'को अद्धा वेद क इह प्रवोचदियं विसृष्टिर्यत आबभूवेति' प्रतिपादितम्। वादिनां च वेदांतार्थे भूयसी विप्रतिपत्तिर्दृश्यते। एवमव्यवस्थितार्था वेदान्ताः'

कपिलस्मृतिस्तु प्रधानकारणत्वैकविषया त्र्यवस्थितार्था। तस्माद्व्यवस्थितार्थया कपिलस्मृत्या उपबृंहणीया वेदान्ता अपि तदेकविषया इत्येव युक्तम्। न च, ब्रह्मैककारणत्ववादिन्यो मनुस्मृत्यादयोऽपि व्यवस्थितार्था:। 'यद्वै किंच मनुरवदत्तद्भेषज' मिति मनोरप्याप्ततमत्वं श्रुतिप्रसिद्धम्। अतो मनुस्मृत्यादिभिरुपबृंहणं भवेदिति वाच्यम्। धर्मप्रतिपादनपराणां स्मृतीनां कर्मकांडोपबृंहणेन सावकाशत्वात्। अत एव मनोराप्ततमत्वं कर्मकांडादावेव वर्ण्यते न तु कपिलस्येव वेदांतभागे। तस्मादनवकाशकपिलस्मृत्यनुसारेण वेदांतानामर्थनयनं युक्तम्। सैन्यस्य प्रतिपक्षजेतृत्वं राज्ञीव प्रधानस्य जगद्रचयितृत्वं पुरुषे समारोप्य वेदांतेषु ब्रह्मकारणवादा: प्रवृत्ता: इति प्राप्ते सिद्धान्तमाह – **वयमपीति**। अयमाशय:। मन्वादयस्तावत् ब्रह्मण एव जगत्कारणतां स्मरन्ति। ते च बहव:। न तु कपिलतदाशयासुरिपंचशिखादिवत् कतिपये स्वस्वप्रतीयमानवेदान्तार्थानुवर्तिन: शकादिवत् तद्विरुद्धार्थवादिन:। तत्र च मनो 'यद्वै किंच मनुरवदत्तद्भेषज' मिति श्रुतौ 'यत्किंचे' ति वीप्सासमानार्थेन शब्देन 'भेषज' मित्युक्त्या च स्वोक्ते सर्वस्मिन्नर्थे भ्रांतिविप्रलंभराहित्यं दर्शितम्। कपिले तु ज्ञानमात्रमुक्तम्। तत् कतिपयविषयज्ञानवत्त्वेनापि चरितार्थम्। न सर्वथा भ्रांतिप्रतिक्षेपकम्। न वा सांख्यवक्तैव कपिल: श्वेताश्वतरमत्रेणानूदित इत्यत्र प्रमाणमस्ति। 'यद्वै किंच मनुरवद' दित्यत्र स्मृतिवक्तैवानूदित इत्यत्र प्रमाणं वक्तृत्वेनानुवाद:। न हि मानवधर्मशास्त्रव्यतिरेकेण मनुवक्तृक: कश्चित् ग्रन्थ: प्रसिद्धोऽस्ति। मन्वनुवर्तिनश्च सर्वेऽपि स्मर्तार:। अत एव स्मृतिषु संगृहीतस्य सर्वस्याऽपि धर्मजातस्य 'मानवो धर्म' इति पुराणेषु प्रसिद्धिर्दृश्यते। 'मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते।' इति च स्मर्यते। याज्ञवल्क्यादीनामपि वेदांतनिष्णाततत्वं बृहदारण्यकादिषु प्रसिद्धम्। तस्मादाप्ततमबहुप्रणीताभिरुपबृंहणीयानुगुणाभिर्मन्वादिस्मृतिभिरेव वेदांतानामुपबृंहणं युक्तं न त्वतथाभूतया कपिलस्मृत्या। नन्वनवकाशा कपिलस्मृति: कि 'मप एव ससर्जादा' वित्यादयो मन्वादयस्सावकाशा:। कर्मविधिभिस्सावकाशा इति चेन्न। कर्मणां ब्रह्माराधनरूपत्वेन तद्विधीनामपि ब्रह्मप्रधानत्वात्। कूर्मपुराणे व्यासगीतासु स्मृत्युक्तसकलाचारनिरूपणानंतर 'मित्येष मानवो धर्मो युष्माकं कथितो मया। महेश्वराराधनाय यज्ञयोगश्च शाश्वत:।'इत्यन्त उपसंहारात्। न तु कर्मणां ब्रह्मानाराधनत्वेऽपि वेदान्तानामुपबृहणं कर्तुमयुक्तम्। एतेन वेदान्तानां सावकाशत्वाव्यवस्थितार्थत्वशंकापि निरस्ता। कर्मविधिसमभिव्याहाराभावेन तत्स्तावकतया सावकाशत्वासिद्धे: उपासनाविधिसमभिव्याहारसत्त्वेऽपि तत्समभिव्याहाररहितस्मृत्यादिगत-स्वतन्त्रब्रह्मकारणवादोपबृंहणीयानां तेषामुपासनाविधिविषयस्तावकतयाऽपि सावकाशत्वासिद्धे: निरपेक्षतया विभ्रमविप्रलंभमूलत्वेनापि सावकाशत्वासिद्धे: अनादिमीमांसासिद्धैर्न्यायैराप्ततम-बहुमुनिप्रणीतानुगुणस्मृतीतिहासपुराणरूपैरुपबृंहणैश्चार्थाव्यवस्थित्यसिद्धेश्च। तस्मात्सांख्यमृत्य-नुसारेण न वेदान्तानामन्यथानयनं कार्यं प्रत्युत स्मृत्यादितदुपबृंहणीयवेदान्तानुसारेण

सांख्यस्मृतितदनुसारिणोरेव बाधः स्वीकार्य इति। 'अप एव ससर्जादा' वित्यादीनि मनुस्मृतिवचनानि 'संज्ञामूर्तिक्लृप्त्यधिकरणे (२ – ४ – १७) व्याकरिष्यन्ते। ननु, योगप्रभावाक्षात्कृत-सकलवेदार्थतत्वदर्शी कपिल एव न तु कर्मानुष्ठानव्यग्रा मन्वादयः। अतः कपिलस्मृत्यैव वेदान्तानामुपबृंहणं युक्तमित्याशंकानिराकरणार्थं सूत्रम् – सू०।। इतरेषां चानुपलब्धेः।।२।। यदि प्रधानकारणवादो वेदान्तार्थोऽभविष्यत् तदा वेदार्थतत्वनिर्णयप्रकरणेषु मन्वादीनां स्मृतिष्वपि निबन्ध उपालप्स्यत। न चोपलभ्यते। कर्मानुष्ठानव्यग्राणां मन्वादीनां योगानुष्ठानं न सार्वज्ञ्यसंपादकमिति चेन्न। कपिलस्य योगांगकर्मानुष्ठानाभावात्तदीययोगस्यैव वैकल्यप्रसंगेन तस्याऽपि कर्मानुष्ठानपरत्वस्या-वश्यवक्तव्यत्वादित्यभिप्रेत्य सूत्रं व्याचष्टे – **इतरेषामिति।** अधिकरणार्थमुपसंहरति – **अत इति।।** **इति स्मृत्यधिकरणम्।।१।।**

इति शिवार्कमणिदीपिका स्मृत्यधिकरणम् समाप्तम्

योगप्रत्युक्तपधिकरणम्।

शाङ्करभाष्यम्

*एतेन योगः प्रत्युक्तः।।३।। एतेन साङ्ख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति। तत्रापि श्रुतिविरोधेन प्रधानं स्वतन्त्रमेव कारणम्, महदादीनि च कार्याण्यलोकवेदप्रसिद्धानि कल्प्यन्ते।।

ननु–एवं सति सामानन्यायत्वात्पूर्वेणैवैतद्गतम्, किमर्थं पुनरतिदिश्यते? अस्ति ह्यत्राभ्यधिकाशङ्का–सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ॰ २/४/५) इति। "त्रियुन्नतं स्थाप्य समं शरीरम्" (श्वे॰ २/८) इत्यादिना चासनादिकल्पनापुरः सरं बहुप्रपञ्चं योगविधानं श्वेताश्वतरोपनिषदि दृश्यते। लिङ्गानि च वैदिकानि योगविषयाणि सहस्त्रश उपलभ्यन्ते–"तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्" (का॰ २/६/११) इति, "विद्यामेतां योगविधिं च कृत्स्नम्" (का॰ २/६/१८) इति चैवमादीनि। योगशास्त्रेऽपि "अथ तत्त्वदर्शनोपायो योगः" इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते। अतः सम्प्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीया भविष्यतीति–इति।।

इदमप्यधिकाशङ्काऽतिदेशेन निवर्त्यते; अर्थैकदेशसम्प्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेः पूर्वोक्ताया दर्शनात्। सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु साङ्ख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः–साङ्ख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ, शिष्टैश्च परिगृहीतौ, लिङ्गेन च श्रौतेनोपबृंहितौ; "तत्कारणं साङ्ख्ययोगाभिपन्नं" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" (श्वे॰ ६/१/३) इति। निराकरणं तु न साङ्ख्यज्ञानेन वेदनिरपेक्षेण योगमार्गेण वा निःश्रेयसमधिगम्यत इति। श्रुतिर्हि वैदिंकादात्मैकत्वविज्ञानादन्यन्निः श्रेयससाधनं वारयति–"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" (श्वे॰ ३/८) इति। द्वैतिनो हि ते साङ्ख्या योगाश्च, नात्मैकत्वदर्शिनः।। यत्तु दर्शनमुक्तम्–"तत्कारणं साङ्ख्ययोगाभिपन्नम्" इति, वैदिकमेव तत्र ज्ञानं ध्यानं च साङ्ख्ययोगशब्दाभ्यामभिलप्यते; प्रत्यासत्तेरित्यवगन्तव्यम्। येन त्वंशेन न विरुध्येते, तेनेष्टमेव साङ्ख्ययोगस्मृत्योः सावकाशत्वम्। तद्यथा–"असङ्गो ह्ययं पुरुषः" (बृ॰ ४/३/१६)

इत्येवमादिश्रुतिप्रसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन साङ्ख्यैरभ्युपगम्यते। तथाच योगैरपि–"अथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः" (जाबा० ५) इत्येवमादिश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते।।

एतेन–सर्वाणि तर्कस्मरणानि प्रतिवक्तव्यानि। तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेत्, उपकुर्वन्तु नाम, तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति; "नावेदविन्मनुते तं बृहन्तम्" (तै० ब्रा० ३/१२/९/७) "तं त्वौपनिषदं पुरुषं पृच्छामि" (बृ० ३/९/२६) इत्येवमादिश्रुतिभ्यः।।३।। इति द्वितीयं योगप्रत्युक्त्यधिकरणम्।।

इति शाङ्करभाष्यम् योगप्रत्यक्त्यधिकरणम् समाप्तम्

वार्तिकम्

एतेन योगः प्रत्युक्तः॥३॥ एतेन–साङ्ख्यस्मृतिनिराकरणहेतुना योगस्मृतिरपि न प्रधानतत्कार्यमहदादिसाधनपरा भवतीति निराकृता–वेदितव्या॥

ननु–एवं तर्हि पूर्वेणैव न्यायेनास्य विचारस्य गतत्वात् पुनरारम्भो व्यर्थः, मैवम्; अभ्यधिकशङ्काया विद्यमानत्वात् पुनरारम्भोपपत्तेः। योगो हि तत्त्वज्ञानोपायताया श्रुतिसिद्धः ; "यच्छेद् वाङ्मनसी प्राज्ञः तद् यच्छेद् ज्ञान आत्मनि। ज्ञानमात्मनि महति तद् यच्छेत् शान्त आत्मनि। तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणामि" त्यादि श्रुतेः। स न वेदवादिभिः पञ्चविंशतितत्वानीव वेदनिरपेक्षसांख्यशास्त्राप्रतिपाद्यानि प्रत्याख्यातु' शक्यः। स च योगः स्वरूपतत्साधनयमनियमादि तदवान्तरफलविभूति तन्महाफलकैवल्यैः योगशास्त्रेणैव वेदार्थव्युत्पादकेन पातञ्जलप्रभृतिना कल्पसूत्रेणेव धर्मः प्रतिपाद्यते। अतः कल्पसूत्रवदेव योगशास्त्रमपि वेदार्थ निबन्धनरूपत्वाद् निरपवादं प्रमाणम्। तेन च प्रमाणभूतेन योगं व्युत्पादयता तदङ्गतया प्रधानकारणतावादो दर्शितः। न च–तदङ्गे तदप्रमाणमिति वाच्यम्; अंशतस्तदप्रामाण्याभ्युपगमे सर्वांशेऽपि तत्प्रसङ्गस्य दुर्वारत्वात्। तदुक्तमभियुक्तैः–"प्रसरं न लभन्ते च यावत्क्वचन मर्कटाः। नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे॥" इति। तस्मात् यथा कल्पसूत्रविरोधे साक्षात् श्रूयमाणोऽपि वेदार्थो वैदिकैर्नाद्रियते, तत्कस्य हेतोः? सूत्रवाक्ये तेषामत्यन्तं गौरवात्, तद्वद् योगसूत्रविरोधे साक्षाच्छ्रूयमाणोऽपि ब्रह्मकारणतावादो नाद्रियेत–इत्यभ्यधिका शङ्का। तामिमां शङ्कामतिदेशेन निराकरोत्याचार्यः–*एतेन योगः प्रत्युक्त इति*॥

अयमाशयः–यो ह्यर्थः तात्पर्येण येन प्रतिपाद्यते, स एव तस्यार्थः, नान्यस्तत्र प्रतीयमानोऽपि। कुतः? अन्यार्थतया तदुपन्यासात्। तद्यथा श्वेतोपालम्भवाक्ये वायोः क्षिप्रगतित्वम्, बर्हिषि रजताभाववाक्ये च रुद्ररोदनम्। प्रकृते च योगशास्त्रे–'अथ योगानुशासनमि" ति योगाधिकारं प्रतिज्ञाय–"योगश्चित्तवृत्तिनिरोधः" इत्यारभ्य प्रथमपादेन तात्पर्यतः तत्स्वरूपमवधारितम्,

द्वितीयपादेन च तद्बहिरङ्गसाधनानां यमनियमप्राणायामप्रत्याहारलक्षणानां स्वरूपम्, तृतीयेन च पादेन तदन्तरङ्गसाधनानां ध्यानधारणसमाधीनां स्वरूपमवधार्य, तदवान्तरफलानि विभूतयो दर्शिताः, चतुर्थेन च तस्याष्टाङ्गयोगस्य परमफलं कैवल्यम्–इति। या तु प्रधानादि प्रक्रिया मध्ये प्रदर्श्यते, सा वपोत्खातादिप्रदर्शनवद् अन्यपरा; अष्टाङ्गयोगव्युत्पादनार्थतयोपादीयमानत्वात्, स्वतः प्रयोजनाभावाच्च। अतो न तत्र तात्पर्यम्। न च–महातात्पर्याभावेऽप्यर्थवादवाक्यस्येव देवतादौ, अवान्तरतात्पर्ये तात्पर्यं शास्त्रस्याविरुद्धमिति–वाच्यम्; प्रत्यक्षब्रह्मकारणतावादिनीनामुक्तप्रकारेण स्वार्थपराणां श्रुतीनां विरोधेन तदसिद्धेः। तस्माद् अनादिपूर्वपक्षाभाससिद्धप्रधानकारणतावादमादाय योगव्युत्पादनं कृतमिति मन्तव्यम्। अत एव योगशास्त्रव्युत्पादयिता भगवान् वार्षगण्य आह स्म–''गुणानां परमं रूपं न दृष्टिपथमृच्छति। यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम्''।। इति योगं व्युत्पिपादयिषता निमित्तमात्रेणेह गुणाः प्रदर्शिताः, न तु भावतः ; तेषामतात्त्विकत्वादित्यर्थः। ततश्च योग एव सा साध्यते; सफले तस्य तात्पर्यतः प्रामाण्यम्। एतेन–''प्रसरं न लभन्ते'' इत्यादि–प्रत्युक्तम्; अर्थवादादिवत् स्वार्थे तद्वाक्यस्य प्रामाण्याभावेऽपि तात्पर्यार्थे प्रामाण्यादिति। एतदेवाभिप्रेत्य भाष्यकृदाह–*अर्थैकदेशसम्प्रतिपत्तावपीति*।। ननु–सतीष्वपि बह्वीषु कणाद–बुद्धार्हतप्रभृतिप्रणीतासु स्मृतिष्वात्मविषयासु वेदान्तविरुद्धासु किमिति साङ्ख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः सूत्रकृता, न तासामिति? तत्राह–*सतीष्वपीति*।।

एतच्च व्युत्पादितमस्माभिः–''स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्ट–परिगृहीता चे'' ति भाष्यं व्युत्पादयद्भिः तदभाष्यस्यैव तात्पर्यादिभावनं भाष्यकृताऽत्र कृतम्, इति न पौनरुक्तयम्। एवं तर्हि लोकवेदशिष्टसम्पतिपन्नत्वात् किमिति तयोर्निराकरणं क्रियत इति? तत्राह–*निराकरणं तु न साङ्ख्यज्ञानेन वेदनिरपेक्षेण योगमार्गेण वेति*।। एतेनेति वेदविरुद्धांऽशे सावकाशत्वप्रदर्शनेनेत्यर्थः। *सर्वाणि तर्कस्मरणीति*।। अत्र अभ्युपगतवेदप्रामाण्यानां कणभुगक्षचरणप्रभृतीनामिति शेषः।। *तर्कोपपत्तिभ्यामिति*।। अत्र स्वप्रतिपाद्याभ्यां वेदाविरुद्धाभ्यामिति शेषः।।३।। इति द्वितीयं योगप्रत्युक्तयधिकरणम्।।

इति वार्त्तिकम् योगप्रत्युक्त्यधिकरणम् समाप्तम्

प्रदीपः

एतेन योगः प्रत्युक्तः।।३।। एतेन=साङ्ख्यमतनिराकरणेन। योगः=योगस्मृतिः। प्रत्युक्तः=व्याख्यातः*।। निरस्यतया विवृतो भवतीति सूत्रार्थः। न्यायसाम्येऽपीतरेषां केषाञ्चनोपलम्भादधिकाशङ्कावारणाथ पृथगधिकरणान्तरम्। अत एवातिदेशिक्यनन्तरसङ्गतिः। स्मृतिविरोधपरिहारात्पादसङ्गतिरध्यायसङ्गतिश्च। केषामितरेषां योगस्मृतिगतानां वेदेषूपलम्भ इत्यत आह– *सम्यगित्यादिना*। तथाचांशतः साङ्ख्ययोगयोरपि प्रामाण्येऽप्यध्यात्मचिन्तायां न विरोध इति भावः। तदिदमाह– *यत्तु दर्शनमित्यादिना* *उपकुर्वन्तु नामेत्यन्तेन*।।३।। इति द्वितीयं योगप्रत्युक्तयधिकरणम्।।

इति प्रदीपः योगप्रत्युक्त्यधिकरणम् समाप्तम्

भामती

नानेन योगशास्त्रस्य हैरण्यगर्भपातञ्जलादेः सर्वथा प्रामाण्यं निराक्रियते, किन्तु जगदुपादानस्वतन्त्रप्रधानतद्विकारमहदहङ्कारपञ्चतन्मात्रगोचरं प्रामाण्यं नास्तीत्युच्यते। न चैतावतैषामप्रामाण्यं भवितुमर्हति। यत्पराणि हि तानि तत्राप्रामाण्येऽप्रामाण्यमश्नुवीरन्। न चैतानि प्रधानादिसद्भावपराणि। किन्तु योगस्वरूपतत्साधनतदवान्तरफलविभूतिंतत्परमफल-कैवल्यव्युत्पादनपराणि। तच्च किञ्चिन्निमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतं पुराणेष्विव सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितं तत्प्रतिपादनपरेषु, न तु तद्विवक्षितम्। अन्यपरादपि चान्यनिमित्तं तत्प्रतीयमानमभ्युपेयेत, यदि न मानान्तरेण विरुध्येत। अस्ति तु वेदान्तश्रुतिभिरस्य विरोध इत्युक्तम्। तस्मात् प्रमाणभूतादपि योगशास्त्रान्न प्रधानादिसिद्धिः। अत एव योगशास्त्र व्युत्पादयिताऽऽह स्म भगवान् वार्षगण्यः–

'गुणानां परमं रूपं न दृष्टिपथमृच्छति।
यत् तु दृष्टिपथप्राप्तं तन्मायैव सुतुच्छकम्'॥ इति॥

योगं व्युत्पिपादयिषता निमित्तमात्रेणेह गुणा उक्ताः न तु भावतः, तेषामतात्त्विकत्वादित्यर्थः। अलोकसिद्धानामपि प्रधानादीनामनादिपूर्वपक्षन्यायाभासोत्प्रेक्षितानामनुवाद्यत्वमुपपन्नम्। तदनेनाभिसन्धिनाह *एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि* प्रधानादिविषयतया। *प्रत्याख्याता द्रष्टव्या इति*। अधिकरणान्तरारम्भमाक्षिपति *नन्वेवं सति समानन्यायत्वाद् इति*। समाधत्ते *अस्त्यत्राभ्यधिकाशङ्का*। मा नाम सांख्यशास्त्रात् प्रधानसत्ता विज्ञायि। योगशास्त्रात्तु प्रधानादिसत्ता विज्ञानपयिष्यते। बहुलं हि योगशास्त्राणां वेदेन सह संवादो दृश्यते। उपनिषदुपायस्य च तत्त्वज्ञानस्य योगापेक्षास्ति। न तु जातु योगशास्त्रविहितं यमनियमादिबहिरङ्गमुपायमपहायान्तरङ्गञ्च धारणादिकमन्तरेणौपनिषदात्मेतत्त्वसाक्षात्कार उदेतुमर्हति। तस्मादौपनिषदेन तत्वज्ञानेनापेक्षणात् संवादबाहुल्याच्च वेदेनाष्टकादिस्मृतिवद्योगस्मृतिः प्रमाणम्। ततश्च प्रमाणात्

प्रधानादिप्रतीतेर्नाशब्दत्वम्। न च तदप्रमाणं प्रधानादौ प्रमाणञ्च यमादाविति युक्तम्। तत्राप्रामाण्येऽन्यत्राप्यनाश्वासात्। यथाहुः—

"प्रसरं न लभन्ते हि यावत् क्वचन मर्कटाः।
नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे॥" इति।

सेयं लब्धप्रसरा प्रधानादौ योगाप्रमाणतापिशाची सर्वत्रैव दुर्वारा भवेदित्यस्याः प्रसरं निषेधता प्रधानाद्यभ्युपेयमिति नाशब्दं प्रधानमिति शङ्कार्थः। सा *इयमभ्यधिकाशङ्कातिदेशेन निवर्त्यते*। निवृत्तिहेतुमाह *अर्थैकदेशसम्प्रतिपत्तावपि इति*। यदि हि प्रधानादिसत्तापरं योगशास्त्रं भवेत् भवेत् प्रत्यक्षवेदान्तश्रुतिविरोधेनाप्रमाणम्। तथा च तद्विहितेषु यमादिष्वप्यनाश्वासः स्यात्। तस्मान्न प्रधानादिपरं तत् किन्तु तन्निमित्तीकृत्य योगव्युत्पादनपरमित्युक्तम्। न चाविषयेऽप्रामाण्यं विषयेऽपि प्रामाण्यमुपहन्ति। नहि चक्षूरसादावप्रमाणं रूपेऽप्यप्रमाणं भवितुमर्हति। तस्माद्वेदान्तश्रुतिविरोधात् प्रधानादिरस्याविषयो न त्वप्रामाण्यमिति परमार्थः। स्यादेतत्—अध्यात्मविषयाः सन्ति सहस्त्रं स्मृतयो बौद्धार्हतकापालिकादीनां, ता अपि कस्मान्न, निराक्रियन्त इत्यत आह *सतीष्वपि इति*। तासु खलु बहुलं वेदार्थविसंवादिनीषु शिष्टानादृतासु कैश्चिदेव तु पुरुषापसदैः पशुप्रायैर्म्लेच्छादिभिः परिगृहीतःसु वेदमूलत्वाशङ्कैव नास्तीति न निराकृताः, तद्विपरीतास्तु सांख्ययोगस्मृतय इति ताः प्रधानादिपरतया व्युदस्यन्त इत्यर्थः। *न सांख्यज्ञानेन वेदनिरपेक्षेण इति*। प्रधानादिविषयेणेत्यर्थः। *द्वैतिनो हि ते सांख्या योगाश्च* ये प्रधानादिपरतया तच्छास्त्रं व्याचक्षत इत्यर्थः। संख्या सम्यग्बुद्धिर्वैदिकी तया वर्तन्त इति सांख्याः। एवं योगो ध्यानम्, उपायोपेययोरभेदविवक्षया, चित्तवृत्तिनिरोधो हि योगः, तस्योपायो ध्यानं प्रत्ययैकतानता। एतच्चोपलक्षणम्। अन्येऽपि यमनियमादयो बाह्या आन्तराश्च धारणादयो थोगोपाया द्रष्टव्याः। एतेनाभ्युपगतवेदप्रामाण्यानां कणभक्षाक्षचरणादीनां सर्वाणि तर्कस्मरणानीति योजना। सुगममन्यत्॥३॥

इति भामती योगप्रत्युक्त्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। **एतेन योगः प्रत्युक्तः।।३।।**

योगाङ्गप्रतिपादिनी हिरण्यगर्भस्मृतिरपि प्रधानकारणत्वमेव वदति। तथा च यथा प्रधानकारणत्ववादिन्या साङ्ख्यस्मृत्या विरोधात् वैदिकसमन्वयस्य संकोचो नाभवत् तथाऽनयाऽपि श्रुत्या संकोचो न भवति भवति वा।

इति सन्देहे भवतीति वदामः। कथम्? श्वेताश्वतरोपनिषदि ब्रह्मसाक्षात्कारहेतुतया प्रपञ्चिता योगविद्या। तथा च सांख्यस्मृतेरनुमेयश्रुतिमूलत्वेऽपि प्रत्यक्षश्रुतिमूलया हिरण्यगर्भस्मृत्या प्रधानकारणवादिन्या ब्रह्मकारणवादिन्याः श्रुतेः समन्वयस्य संकोचो युक्तः।।

इति प्राप्ते ब्रूमः—न योगस्मृत्या श्रुतिसमन्वयसंकोचः। तस्या 'योगश्चित्तवृत्तिनिरोधः' इत्यारभ्य वैदिकाष्टाङ्गयोगप्रतिपादनमात्रे हि तात्पर्यं, नावैदिके प्रधानकारणवादेऽपि। यदि तत्रापि तात्पर्यं, साङ्ख्यस्मृतिवदस्या अपि प्रत्याख्यानमेव न्याय्यम्। ततो हिरण्यगर्भस्मृत्याऽपि प्रधानकारणवादिन्या ब्रह्मकारणवादिश्रुतिसमन्वयस्य न संकोच इति युक्तमेव।। इति योगप्रत्युक्त्यधिकरणम्।।२।।

अथ नविलक्षणत्वाधिकरणम्।।३।।

इति श्री कण्ठभाष्य योगप्रत्युक्त्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सू०।। एतेन योग: प्रत्युक्त:।।३।। अतिदेशाधिकरणस्यास्य पूर्वाधिकरणरीत्या पूर्वोत्तरपक्षौ दर्शयति – **योगांगेत्यादिना।** ननु, कास्मिन्नभ्यधिकाशंका? योगशास्त्रकर्ता हिरण्यगर्भ:। स किल कर्ता हिरण्यगर्भस्सकलवेदप्रवर्तनाधिकृत: तदर्थतत्त्वाभिज्ञ इत्यधिकाशंकेति। न। 'हिरण्यगर्भं पश्यत जायमान' मिति श्रुतौ हिरण्यगर्भस्येव कपिलस्याऽपि 'ज्ञानैर्बिभर्ति जायमानं च पश्ये' दिति श्रुतौ सार्वज्ञ्योपयोगिजायमानावस्थालब्धपरमेश्वरकटाक्षेक्षितत्वश्रवणाविशेषात्। योगशास्त्रादरणीयत्व-हेतुरीश्वरांगीकारोऽस्तीति चेन्न काणादगौतममतयोरप्यपरिग्राह्यत्वस्य शिष्टापरिग्रहाधिकरणे प्रदर्शयिष्यमाणत्वेन तेन तस्यादरणीयताशंकानुत्थानात्, पूर्वाधिकरणनिरस्तसांख्यपक्षेऽपि तदंगीकारसत्त्वाच्च। न च निरीश्वरसांख्य एव तत्र निराकृत:। तत्पक्षे वेदान्तानां जीवपरत्वमांशक्य 'अधिकोपदेशात्तु बादरायणस्य' (ब्र० ३ – ४ – ८) इति सूत्रेण जीवाधिकपरमेश्वरपरत्वं वेदान्तानां समर्थितम्। तस्मादधिकाशंकाभावान्नैतदधिकरणमारंभणीयमित्यभिप्रायेणाशंकते – **कथमिति।** योगांगप्रतिपादिनीति प्राग्विशेषणेन सूचितामधिकाशंकां दर्शयति – **श्वेताश्वतरेति।** श्वेताश्वतराणां मंत्रोपनिषदुपक्रममारभ्ययासमाप्ति शिवमेव जगत्कारणत्वजगदन्तर्यामित्वादिधर्मवत्तया प्रपंचेन प्रतिपादयति। तत्र द्वितीयाध्याये शिवसाक्षात्कारोपयोगिनी शिवयोगविद्या निरूपिता। सैव योगशास्त्रे प्रपंचिता। योगशास्त्रे हि 'ईश्वरप्रणिधानाद्वा। (पा० १ सू २३) 'क्लेशकर्मविपाकाशयैरपरामृष्ट: पुरुषविशेष ईश्वर:। तत्र निरतिशयं सर्वज्ञबीजम्। स पूर्वेषामपि गुरु: कालेनानवच्छेदात्। तस्य वाचक: प्रणव:। तज्जपस्तदर्थभावनम्। तत: प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च।' इत्येवमीश्वरविषयाणि सप्त सूत्राणि शिवपुराणे परमेश्वरप्रतिपादकानि वचनान्यनुसृत्यैव कृतानि। शिवपुराणे हि वायुसंहितायां वचनानि दृश्यंते – न शिवस्याणवो बन्ध: कार्मो मायये एव च। प्राकृतो वाथवा बन्ध: अहंकारात्मकस्तथा। न रागो न च विद्वेष: शंभोरमिततेजस:। न वाप्यभिनिवेशोऽस्य कुशलाकुशलान्यपि। स पुंविशेष: कथित: भगवानन्तकांतक:। लोके सातिशयत्वेन ज्ञानैश्वर्ये विलोकिते। शिवेनातिशयत्वेन स्थितिं प्राहुर्मनीषिण:। प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरम्।

उपदेष्टा स एवादौ कालावच्छेदवर्तिनाम्। कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः। सर्वेषामेव सर्वेशः कालावच्छेदवर्जितः। प्रणवो वाचकस्तस्य शिवस्य परमात्मनः। शिवरुद्रादिशब्दानां प्रणवो हि परः स्मृतः। तज्जपादपि या सिद्धिः सा परैव न संशयः।' इति। अतो योगशास्त्रे उपबृंहिता योगविद्या श्वेताश्वतरनिरूपिता शिवयोगविद्यैव। एवं च यद्यपि प्रधानकारणवादिस्मृत्यनुसारेण वेदान्ता नेतव्या इति पूर्वपक्षे निराकरणमिह पूर्वाधिकरणे चाविशिष्टम्। तथापि प्रधानार्थे प्रत्यक्षश्रुतिमूलं योगशास्त्रं प्रधानं तु सांख्यशास्त्र इव तत्र न प्राधान्येन प्रतिपाद्यं किंत्वतिसूक्ष्मशिवयोगाभ्यासार्थं तत्पूर्वप्रवर्तनीयस्थूलयोगलक्ष्यतया। तथा च प्रधानार्थे प्रत्यक्षश्रुतिमूलं योगशास्त्रमतथा-भूतात्सांख्यशास्त्रत् प्रबलमिति सांख्यशास्त्रानुसारेण वेदान्तानामन्यथानयनासिद्धावप्येतदनुरोधेन तत्सिध्यतीत्यधिकाशंकावलक्षणः। तन्निराकरणार्थमिदमधिकरणम्। निराकरणप्रकारस्तु–प्रत्यक्षश्रुति-मूलशिवयोगाभ्यासो यदि तदर्थं पूर्वं लक्षीकर्तव्यस्य प्रधानस्य तात्विकत्वमन्तरेण न संभवति तदा प्रत्यक्षश्रुत्याम्नातप्रधानप्रतिपादकं योगशास्त्रमिति तदनुसारेण वेदान्तानामन्यथानयनं कल्प्येतापि। न त्वेवम्। तन्त्रांतरसिद्धस्य स्वतंत्रप्रधानस्य कल्पितस्याकल्पितस्य वेदान्तसिद्धपरतन्त्रप्रधानस्य वा स्थूलयोगलक्ष्यत्वोपपत्तेः। यदि योगशास्त्रश्रद्धाजडः कश्चन प्रधानेऽपि तात्पर्यं कल्पयेत्तदा तसय प्रत्याख्यानाय सिद्धान्तातिदेश इति भावः।

इति योगप्रत्युक्तयधिकरणम्॥२॥

इति शिवार्कमणिदीपिका योगप्रत्युक्त्यधिकरणम् समाप्तम्

नविलक्षणत्वाधिकरणम्।

शाङ्करभाष्यम्

***न विलक्षणत्वादस्य तथात्वं च शब्दात् *।।४।।** ब्रह्मास्य जगतः कारणम्, प्रकृतिश्चेत्यस्य पक्षस्याक्षेपः स्मृतिनिमित्तः परिहृतः, तर्कनिमित्त इदानीमाक्षेपः परिह्रियते।। कुतः पुनरस्मिन्नवधारित आगमार्थे तर्कनिमित्तस्याक्षेपस्यावकाशः? ननु—धर्म इव ब्रह्मण्यप्यनपेक्ष आगमो भवितुमर्हति?

भवेदयमवष्टम्भो यदि प्रमाणान्तरानवगाह्य आगममात्रप्रमेयोऽयमर्थः स्याद्अनुष्ठेयरूप इव धर्मः, परिनिष्पन्नरूपं तु ब्रह्मावगम्यते। परिनिष्पन्ने च वस्तुनि प्रमाणान्तराणामस्त्यवकाशः—यथा पृथिव्यादिषु। यथा च श्रुतीनां विरोधे सत्येकवशेनेतरा नीयन्ते एवं प्रमाणन्तरविरोधेऽपि तद्वशेनैव श्रुतिर्नीयेत। दृष्टसाधर्म्येण त्वदृष्टमर्थं समर्थयन्ती युक्तिरनुभवस्य संनिकृष्यते, विप्रकृष्यते तु श्रुतिः ; एतिह्यमात्रेण स्वार्थाभिधानात्। अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्षसाधनं च दृष्टफलतयेष्यते। श्रुतिरपि-''श्रोतव्यो मन्तव्य'' इति श्रवणव्यतिरेकेणमननं विदधती तर्कमप्यत्रादर्तव्यं दर्शयति। अतस्तर्कनिमित्तः पुनराक्षेपः क्रियते—''न विलक्षण त्वादस्य'' इति।।

यदुक्तम्—चेतनं ब्रह्म जगतः कारणं प्रकृतिः-इति, तन्नोपपद्यते। कस्मात्? विलक्षणत्वादस्य विकारस्य प्रकृत्याः। इदं हि ब्रह्मकार्यत्वेनाभिप्रेयमाणं ब्रह्मविलक्षणमचेतनमशुद्धं च दृश्यते, ब्रह्म च जगद्विलक्षणं चेतनं शुद्धं च श्रूयते। न च विलक्षणत्वे प्रकृतिविकारभावो दृष्टः। न हि रुचकादयो विकारा मृत्प्रकृतिका भवन्ति, शरावादयो वा सुवर्णप्रकृतिकाः, मृदैव हि मृदन्विता विकारा क्रियन्ते, सुवर्णेन च सुवर्णान्विताः। तथेदमपि जगदचेतनं सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हति, न विलक्षणस्य ब्रह्मणः। ब्रह्मविलक्षणत्वं चास्य जगतोऽशुद्धयचेतनत्वदर्शनादवगन्तव्यम्। अशुद्धं हि जगत्; सुखदुःखमोहात्मकतया प्रीतिपरितापविषादादिहेतुत्वात्, स्वर्गनरकाद्युच्चावचप्रपञ्चत्वाच्च। अचेतनं चेदं जगत्; चेतनं प्रति कार्यकारणभावेनोपकरणभावोपगमात्। न हि साम्ये सत्युपकार्योपकारकभावो भवति; न हि प्रदीपौ परस्परस्योपकुरुतः।।

ननु—चेतनमपि कार्यकारणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति? न; स्वामिभृत्ययोरप्य-

चेतनाशस्यैव चेतनं प्रत्युपकारकत्वात्। यो ह्येकस्य चेतनस्य परिग्रहो बुद्ध्यादिरचेतन भागः, स एवान्यस्य चेतनस्योपकरोति, न तु स्वयमेव चेतनश्चेतनान्तरस्योपकरोति, अपकरोति वा। निरतिशया ह्यकर्तारश्चेतना इति साङ्ख्या मन्यन्ते। तस्मादचेतनं कार्यकारणम्। न च काष्ठलोष्टादीनां चेतनत्वे किंचित्प्रमाणमस्ति। प्रसिद्धश्चायं चेतनाचेतनविभागो लोके। तस्माद् ब्रह्मविलक्षणत्वान्नेदं जगत् तत्प्रकृतिकम्।।

योऽपि कश्चिदाचक्षीत–श्रुत्वा जगतश्चेतनप्रकृतिकतां तद्बलेनैव समस्तं जगच्चेतनमवगमिष्यामिः प्रकृतिरूपस्य विकारेऽन्वयदर्शनात्। अविभावनं तु चैतन्यस्य परिणामविशेषाद्भविष्यति। यथा स्पष्टचैतन्यानामप्यात्मनां स्वापमूर्च्छाद्यवस्थासु चैतन्यं न विभाव्यते, एवं काष्ठलोष्टादीनामपि चैतन्यं न विभावयिष्यते। एतस्मादेव च विभाविताविभावित-त्वकृताद्विशेषाद्रूपादिभावाभावाभ्यां च कार्यकरणानामात्मनां च चेतनत्वाविशेषेऽपि गुणप्रधानभावो न विरोत्स्यते। यथा च पार्थिवत्वाविशेषेऽपि मांससूपौदनादीनां प्रत्यात्मवर्तिनो विशेषात्परस्परोप-कारित्वं भवत्येवमिहापि भविष्यति। प्रविभागप्रसिद्धिरप्यत एव न विरोत्स्यते–इति। तेनापि कथञ्चिच्चेतनात्वलक्षणं विलक्षणत्वं परिह्रियेत, शुद्ध्यशुद्धिलक्षणं तु विलक्षणत्वं नैव परिह्रियते।।

न चेतरदपि विलक्षणत्वं परिहर्तुं शक्यत इत्याह– *तथात्वं च शब्दादिति*।। अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनश्चेतनत्वं चेतनप्रकृतिकत्वश्रवणाच्छब्दशरणतया केवलयोत्प्रेक्षेत, तच्च शब्देनैव विरुध्यते। यतः शब्दादपि तथात्वमवगम्यते। तथात्वमिति प्रकृतिविलक्षणत्वं कथयति। शब्द एव ''विज्ञानं चाविज्ञानं च'' (तै॰ २/७) इति कस्यचिद्विभागस्याचेतनतां श्रावयंश्चेतनाद् ब्रह्मणो विलक्षणमचेतनं जगच्छ्रावयति।।४।।

ननु–चेतनत्वमपि क्वचिदचेतनत्वाभिमतानां भूतेन्द्रियाणां श्रूयते। यथा ''मृदब्रवीत्'' ''आपोऽब्रुवन्'' (श॰ प॰ ब्रा॰ ६/१/३/२/४) इति। ''तत्तेज ऐक्षत'' ''ता आप ऐक्षन्त'' (छा॰ ६/२/३/४) इति चैवमाद्या भूतविषया चेतनत्वश्रुतिः, इन्द्रियविषयापि–''ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः'' (बृ॰ ६/१/७) इति, ''ते ह वाचमूचुस्त्वं न उद्गायेति'' (बृ॰ १/३/२) इत्येवमाद्येन्द्रियविषयेति? अत उत्तरं पठति– ***अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्*।।५।।**

तुशब्द आशङ्कामपनुदति। न किल मृदब्रवीदित्येवञ्जतीयकया श्रुत्या भूतेन्द्रियाणां चेतनत्वमाशङ्कनीयम्; यतोऽभिमानिव्यपदेश एषः। मृदाद्यभिमानिन्यो वागाद्यभिमानिन्यश्च चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते, न भूतेन्द्रियमात्रम्। कस्मात्?

विशेषानुगतिभ्याम्। विशेषो हि भोक्तृणां भूतेन्द्रियाणां चेतनाचेतनप्रविभागलक्षणः प्रागभिहितः। सर्वचेतनतायां चासौ नोपपद्येत। अपि च कौषीतकिनः प्राणसंवादे करणमात्राशङ्काविनिवृत्तयेऽधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशिंषन्ति–"एता ह वै देवता अहंश्रेयसे विवदमानाः" इति, "ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा" (२/१४) इति च। अनुगताश्च सर्वत्राभिमानिन्यश्चेतना देवता मन्त्रार्थवादेतिहासपुराणादिभ्योऽवगम्यन्ते। "अग्निर्वाग्भूत्वा मुखं प्राविशत्" (ऐ॰ आ॰ २/४/२/४) इत्येवमादिका च श्रुतिः करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति। प्राणसंवादवाक्यशेषे च "ते ह प्राणाः प्रजापतिं पितरमेत्योचुः" (छा॰ ५/१/७) इति श्रेष्ठत्वनिर्धारणाय प्रजापतिगमनं तद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यां प्राणश्रेष्ठ्यप्रतिपत्तिः। "तस्मै बलिहरणम्" (बृ॰ ६/१/१३) इति चैवज्जातीयकोऽस्मदादिष्विव व्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशं द्रढयति। "तत्तेज ऐक्षत" इति परस्या एव देवताया अधिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यणदिश्यत इति द्रष्टव्यम्। तस्माद्विलक्षणमेवेदं ब्रह्मणो जगत्। विलक्षणत्वाच्च न ब्रह्मप्रकृतिकम्॥५॥

इत्याक्षिप्ते प्रतिविधत्ते *दृश्यते तु*॥६॥ तुशब्दः पक्षं व्यावर्तयति। यदुक्तम्–विलक्षणत्वान्नेदं जगद् ब्रह्मप्रकृतिकमिति, नायमेकान्तः। दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामुत्पत्तिः, अचेतनत्वेन च प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनाम्॥ ननु–अचेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां कारणानि, अचेतनान्येव च वृश्चिकादिशरीराण्यचेतनानां गोमयादीनां कार्याणीति? उच्यते–एवमपि किञ्चिदचेतनं चेतनस्यायतनभावमुपगच्छति, किञ्चिन्नेत्यस्त्येव वैलक्षण्यम्। महांश्चार्य पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखानां च; स्वरूपादिभेदात्। यथा गोमयादीनां वृश्चिकादीनां च अत्यन्तसारूप्ये च प्रकृतिविकारभाव एव प्रलीयते। अथोच्येत–अस्ति कश्चित्पार्थिवत्वादिस्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानः, गोमयादीनां वृश्चिकादिषु। इति ब्रह्मणोऽपि तर्हि सत्तालक्षणः स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते। विलक्षणत्वेन च कारणेन ब्रह्मप्रकृतिकत्वं जगतो दूषयता किमशेषस्य ब्रह्मस्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयत, उत यस्य कस्यचित्, अथ चैतन्यस्येति वक्तवयम्। प्रथमे विकल्पे समस्तप्रकृतिविकारोच्छेदप्रसङ्गः। न ह्यसत्यतिशये प्रकृतिविकार इति भवति। द्वितीये चासिद्धत्वम् दृश्यते हि सता लक्षणो ब्रह्मस्वभाव आकाशादिष्वनुवर्तमान इत्युक्तम्। तृतीये तु दृष्टान्ताभावः। किं हि–यच्चैतन्येनानन्वितम्, तदब्रह्मप्रकृतिकं दृष्टमिति ब्रह्मवादिनं प्रत्युदाह्रियेत? समस्तस्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात्। आगमविरोधस्तु प्रसिद्ध एव; चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यागमतात्पर्यस्य प्रसाधितत्वात्॥

यत्तूक्तम्–परिनिष्पन्नत्वाद् ब्रह्मणि प्रमाणान्तराणि सम्भवेयुः-इति, तदपि मनोरथमात्रम्। रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः। लिङ्गाद्यभावाच्च नानुमानादीनाम्। आगममात्रसमधिगम्य एव त्वयमर्थः, धर्मवत्। तथाच श्रुतिः–"नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ" (का० १/२/९) इति। "को अद्धा वेद क इह प्रवोचत्"। "इयं विसृष्टिर्यत आबभूव" (ऋ० सं० १/३०/६) इति चैते ऋचौ सिद्धानामपीश्वराणां दुर्बोधतां जगत्कारणस्य दर्शयतः। स्मृतिरपि भवति–"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति, "अव्यक्तोऽयमचिन्त्योऽयम-विकार्योऽयमुच्यते" (गी० २/२५) इति च। "न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्वशः" (गी० १०/२) इति चैवञ्जातीयका।।

यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तम्, नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः सम्भवति। श्रुत्यनुगृहीत एव ह्यत्र तर्काऽनुभवाङ्गत्वेनाश्रीयते– स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्वागतत्वम्, सम्प्रसादे च प्रपञ्चपरित्यागेन सदात्मना सम्पत्तेर्निष्प्रपञ्चसदात्मत्वम्, प्रपञ्चस्य ब्रह्मप्रभवत्वात्कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवञ्जातीयकः। "तर्काप्रतिष्ठानाद्" (ब्र० २/१/११) इति च केवलस्य तर्कस्य विप्रलम्भकत्वं दर्शयिष्यति।। योऽपि चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षते, तस्यापि "विज्ञानं चाविज्ञानं च" इति चेतनाचेतनविभागश्रवणं विभावनाविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुम्, परस्यैव त्विदमपि विभागश्रवणं न युज्यते।।

कथम्? परमकारणस्य ह्यत्र समस्तजगदात्मना समवस्थानं श्राव्यते–"विज्ञानं चाविज्ञानं चाभवत्" इति। तत्र यथा चेतनस्याचेतनभावो नोपपद्यते। प्रत्युक्तत्वात्तु विलक्षणत्वस्य यथाश्रुत्यैव चेतनं कारणं ग्रहीतव्यं भवति।।६।।

असदिति चेन्न प्रतिषेधमात्रत्वात्।।७।। यदि चेतनं शुद्धं शब्दादिहीनं च ब्रह्म तद्विपरितस्याचेतनस्याशुद्धस्य शब्दादिमतश्च कार्यस्य कारणमिष्येत, असत्तर्हि कार्यं प्रागुत्पत्तेरिति प्रसज्येत। अनिष्टं चैतत् सत्कार्यवादिनस्तवेति चेत्? नैष दोषः; प्रतिषेधमात्रत्वात्। प्रतिषेधमात्रं हीदम्, नास्य प्रतिषेधस्य प्रतिषेध्यमस्ति। न ह्ययं प्रतिषेधः प्रागुत्पत्तेः सत्त्वं कार्यस्य प्रतिषेद्धुं शन्कोति।।

कथम्? यथैव हीदानीमपीदं कार्यं कारणात्मना सत्, एवं प्रागुत्पत्तेरपीति गम्यते। न हीदानीमपीदं कार्यं कारणात्मानमन्तरेण स्वतन्त्रमेवास्ति; "सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद" (बृ० २/४/६) इत्यादि श्रवणात्। कारणात्मना तु सत्त्वं कार्यस्य प्रागुत्पत्तेरविशिष्टम्।।

ननु–शब्दादिहीनं ब्रह्म जगतः कारणम्? बाढम्; न तु शब्दादिमत्कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं वाऽस्ति। तेन न शक्यते वक्तुं प्रागुत्पत्तेरसत्कार्यमिति। विस्तरेण चैतत्कार्यकारणानन्यत्ववादे वक्ष्यामः॥

***अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्*॥८॥** अत्राह–यदि स्थौल्यसावयवत्वाचेतनत्व-परिच्छिन्नत्वाशुद्धयादिधर्मकं कार्यं ब्रह्मकारणकमभ्युपगम्येत, तदाऽपीतौ प्रलये प्रतिसंसृज्यमानं कार्यं कारणाविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेत्, इत्यपीतौ कारणस्यापि ब्रह्मणः कार्यस्येवाशुद्धयादिरूपप्रसङ्गात्सर्वज्ञं ब्रह्म जगत्कारणमित्यसमञ्जसमिदमौपनिषदं दर्शनम्॥ अपि च समस्तस्य विभागस्याविभागप्राप्तेः पुनरुत्पत्तौ नियमकारणाभावाद्भोक्तृभोग्यादिविभागेनोत्पत्तिर्न प्राप्नोतीत्यसमञ्जसम्॥

अपिच भोक्तृणां परेण ब्रह्मणाऽविभांग गतानां कर्मादिनिमित्तप्रलयेऽपि पुनरुत्पत्तावभ्युपगम्यमानायां मुक्तानामपि पुनरुत्पत्तिप्रसङ्गादसमञ्जसम्॥ अथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणाऽवतिष्ठेत, एवमप्यपीतिश्च न सम्भवति, कारणव्यतिरिक्तं च कार्यं न सम्भवतीत्यसमञ्जरामेवेति॥८॥

अत्रोच्यते– *न तु दृष्टान्तभावात्*॥९॥ नैवास्मदीये दर्शने किञ्चिदसामञ्जस्यमस्ति। यत्तावभिहितम्–कारणमपिगच्छत्कार्यं कारणमात्मीयेन धर्मेण दूषयेत–इति, तददूपणम्; कस्मात्? दृष्टान्तभावात्। सन्ति हि दृष्टान्ता यथा कारणमपिगच्छत्कार्यं कारणमात्मीयेन धर्मेण न दूषयन्ति। तद्यथा–शरावादयो मृत्प्रकृतिका विकारा विभागावस्थायामुच्चावचमध्यमप्रभेदाः सन्तः पुनः प्रकृतिमपिगच्छन्तो न तामात्मीयेन धर्मेण संसृजन्ति, रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजति। पृथिवीविकारश्चतुर्विधो भूतग्रामो न पृथिवीमपीतावात्मीयेन धर्मेण संसृजन्ति; त्वत्पक्षस्य तु न कश्चिद् दृष्टान्तोऽस्ति। अपीतिरेव हि न सम्भवेत्, यदि कारणे कार्यं स्वधर्मेणैवावतिष्ठेत। अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वम्, न तु कारणस्य कार्यात्मत्वम्, "आरम्भणशब्दादिभ्यः" इति वक्ष्यामः (ब्र॰ सू॰ २/१/१४)। अत्यल्पं चेदमुच्यते–कार्यमपीतावात्मीयेन धर्मेण संसृजेत–इति, स्थितावपि समानोऽयं प्रसङ्गः ; कार्यकारणयोरनन्यत्वाभ्युपगमात्। "इदं सर्वं यदयमात्मा" (बृ॰ २/४/६), "आत्मैवेदं सर्वम्" (छा॰ ७/२५/२), "ब्रह्मैवेदममृतं पुरस्तात्" (मु॰ २/२/११), "सर्वं खल्विदं ब्रह्म" (छा॰ ३/१४/१) इत्येवमाद्याभिर्हि श्रुतिभिरविशेषेण त्रिष्वपि कालेषु कार्यस्य कारणानन्यत्वं श्राव्यते। तत्र यः परिहारः–कार्यस्य तद्धर्माणां चाविद्याध्यारोपितत्वान्न तैः कारण संसृज्यते–इति, अपीतावपि स

समानः। अस्ति चायमपरो दृष्टान्तो यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते; अवस्तुत्वात्, एवं परमात्माऽपि संसारमायया न संस्पृश्यत इति। यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यत इति; प्रबोधसंप्रसादयोरनन्वागतत्वात्। एवमवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते। मायामात्रं ह्येतत्–यत्परमात्मनोऽवस्थात्रयात्मनाऽवभासनं रज्ज्वा इव सर्पादिभावेन–इति अत्रोक्तं वेदान्तार्थसंप्रदायविद्भिराचार्यैः–"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा" (गौडपा॰ कारि॰ १/१६) इति। तत्र यदुक्तम्–अपीतौ कारणस्यापि कार्यस्येव स्थौल्यादिदोषप्रसङ्गः–इत्येतदयुक्तम्॥

यत्पुनरेतदुक्तम्–समस्तस्य विभागस्याविभागप्राप्तेः पुनर्विभागेनोत्पत्तौ नियमकारणं नोपपद्यते–इति, अयमप्यदोषः ; *दृष्टान्तभावादेव*॥ यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत्पुनः प्रबोधे विभागो भवति, एवमिहापि भविष्यति। श्रुतिश्चात्र भवति–"इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति" (छा॰ ६/९/२,३) इति। यथा ह्यविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो लोकव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभाग-शक्तिरनुमास्यते॥ एतेन–मुक्तानां पुनरुपत्तिप्रसङ्गः–प्रत्युक्तः ; सम्यग्ज्ञानेन मिथ्याज्ञानस्या-पोदितत्वात्। यः पुनरयमन्तेऽपरो विकल्प उत्प्रेक्षितः–अथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणाऽवतिष्ठेत–इति, सोऽप्यनभ्युपगमादेव प्रतिषिद्धः। तस्मात् समञ्जसमिदमौपनिषदं दर्शनम्॥९॥

***स्वपक्षदोषाच्च*॥१०॥** स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुःष्यु। कथमिति? उच्यते; यत्तावदभिहितम्–विलक्षणत्वान्नेदं जगद् ब्रह्मप्रकृतिकमिति, प्रधानप्रकृतिकतायामपि समानमेतत्; शब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात्। अत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात्समानः प्रागुत्पत्तेरसत्कार्यवादप्रसङ्गः। तथाऽपीतौ कार्यस्य कारणविभागाभ्युपगमात् तद्वत्प्रसङ्गोऽपि समानः। तथा मृदितसर्वविशेषेषु विकारेष्वपीतावविभागात्मतां गतेष्विदमस्य पुरुषस्योपादानमिदमस्येति प्राक्प्रलयात्प्रतिपुरुषं ये नियता भेदाः, न ते तथैव पुनरुपत्तौ नियन्तुं शक्यन्ते; कारणाभावात्। विनैव कारणेन नियमेऽभ्युपगम्यमाने कारणाभावसाम्यान्मुक्तानामपि पुनर्बन्धप्रसङ्गः। अथ–केचिद्भेदा अपीतावविभागमापद्यन्ते, केचिन्नेति–चेत्, ये नापद्यन्ते, तेषां प्रधानकार्यत्वं न प्राप्नोतीत्येवमेते दोषाः साधारणत्वान्नान्यतरस्मिन् पक्षे चोदयितव्या भवन्तीत्यदोषतामेवैषां द्रढयति; अवश्याश्रयितव्यत्वात्॥१०॥

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः॥११॥ इतश्च नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यम्; यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिता भवन्ति; उत्प्रेक्षाया निरङ्कुशत्वात्। तथाहि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यन्ते। तैरप्युत्प्रेक्षिताः सन्तस्ततोऽनयैराभास्यन्ते, इति न प्रतिष्ठित्वं तर्काणां शक्यमाश्रयितुम्; पुरुषमतिवैरूप्यात्। अथ–कस्यचित्प्रसिद्धमाहात्म्यस्य कपिलस्य चान्यस्य वा संमतस्तर्कः प्रतिष्ठितः –इत्याश्रीयेत, एवमप्यप्रतिष्ठिततत्वमेव; प्रसिद्धमाहात्म्यानुमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात्॥

अथोच्येतान्यथा वयमनुमास्यामहे–यथा नाप्रतिष्ठादोषो भविष्यति। न हि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुम्। एतदपि हि तर्काणामप्रतिष्ठिततत्वं तर्केणैव प्रतिष्ठाप्यते; केषांचित्तर्काणामप्रतिष्ठिततत्वदर्शनेनान्येषामपि तज्जातीयकानां तर्काणामप्रतिष्ठिततत्वकल्पनात्। सर्वतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसङ्गः। अतीतवर्तमानाध्वसाम्येन ह्यनागतेऽप्यध्वनि सुखदुःखप्राप्तिपरिहाराय प्रवर्तमानो लोको दृश्यते। श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिराकरणेन सम्यगर्थनिर्धारणं तर्केणैव वाक्यवृत्तिनिरूपणरूपेण क्रियते। मनुरपि चैवं मन्यते–"प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥" इति। 'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥" (१२/१०५, १०६) इति च ब्रुवन्। अयमेव तर्कस्यालङ्कारः यदप्रतिष्ठिततत्वं नाम्। एवं हि सावद्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्यो भवति। न हि पूर्वजो मूढ आसीदित्यात्मनाऽपि मूढेन भवितव्यमिति किञ्चिदस्ति प्रमाणम्। तस्मान्न तर्काप्रतिष्ठानं दोष इति–चेत्?

एवमप्यविमोक्षप्रसङ्गः। यद्यपि क्वचिद्विषये तर्कस्य प्रतिष्ठिततत्वमुपलभ्यते; तथापि प्रकृते तावद्विषये प्रसज्यत एवाप्रतिष्ठिततत्वदोषादनिर्मोक्षस्तर्कस्य। न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनमागममन्तरेणोत्प्रेक्षितुमपि शक्यम्। रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्गोचरः, लिङ्गाद्यभावाच्च नानुमानादीनामिति चावोचाम्। अपिच सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः। तच्च सम्यग्ज्ञानमेकरूपम्; वस्तुतन्त्रत्वात्। एकरूपेण ह्यवस्थितो योऽर्थः, स परमार्थः। लोके तद्विषयं ज्ञानं सम्यग्ज्ञानमित्युच्यते–यथाऽग्निरुष्ण इति। तत्रैवं सति सम्यग्ज्ञाने पुरुषाणां विप्रतिपत्तिरनुपपन्ना। तर्कज्ञानानां त्वन्योन्यविरोधात्प्रसिद्धा विप्रतिपत्तिः। यद्धि केनचित तार्किकेणेदमेव सम्यग्ज्ञानमिति प्रतिपादितम्, तदपरेण व्युत्थाप्यते, तेनापि प्रतिष्ठापितं ततोऽपरेण व्युत्थाप्यत इति प्रसिद्धं लोके। कथमेकरूपानवस्थितविषयं तर्कप्रभवं सम्यग्ज्ञानं भवेत्? न च प्रधानवादी तर्कविदामुत्तम इति सर्वैस्तार्किकैः परिगृहीतः, येन तदीयं मतं सम्यग्ज्ञानमिति

प्रतिपद्येमहि। न च शक्यन्तेऽतीतानागतवर्तमानास्तार्किका एकस्मिन्देशे काले च समाहर्तुम्, येन तन्मतिरेकरूपैकार्थविषया सम्यङ्मतिरिति स्यात्। वेदस्य तु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेस्तज्जनितस्य ज्ञानस्य सम्यक्त्वमतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतुमशक्यम्। अतः सिद्धमस्यैवौपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वम्। अतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष एव प्रसज्येत। अत आगमवशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेति स्थितम्।।११। इति तृतीयं नविलक्षणत्वाधिकरणम्।।

इति शाङ्करभाष्यम् नविलक्षणत्वाधिकरणम् समाप्तम्

वार्तिकम्

न विलक्षणत्वादस्य तथात्वं च शब्दात्।। अवान्तरसङ्गतिमाह– *ब्रह्मास्य जगतः कारणं प्रकृतिश्चेति*।। कारणम्=निमित्तमित्यर्थः। सामान्यशब्दस्य विशेषाभिप्रायेण प्रयोगात्, अन्यथा प्रकृतिश्चेति पृथगभिधानानुपपत्तेः। अत्र च किं तर्को बलवान्, किं वाऽऽगमः, तदर्थं च तयोरत्र समानविषयत्वमस्ति, उत नेति विचार्यते। चक्षुःश्रोत्रयोरिव श्रुतितर्कयोर्भिन्नविषयत्वेन विरोधाशङ्काऽनुपपत्तेश्वेत्याक्षिपति– *कुतः पुनरिति*।। सिद्धत्वेन ब्रह्मणो धर्मवैलक्षण्याद् मानान्तरविषयत्वशङ्का। तथाचोपपद्यते तर्केण तद्विषयाक्षेप इति परिहरति– *भवेदयमवष्टम्भ इति*।। ननु–भवतु नाम समानविषयत्वात् श्रुतितर्कयोर्विरोधः, तथापि तर्कादरे को हेतुः? येन तमादाय श्रुतिविषयाक्षेपसिद्धिः, इत्याशङ्क्य, अस्ति च तर्काणां निरवकाशत्वलक्षणमधिकं बलम्; श्रुतीनां धर्मे कथञ्चित् सावकाशत्वस्य दर्शयितुं शक्यत्वादित्यभिप्रायेण च सदृष्टान्तमाह– *तथाच श्रुतीनां विरोधे सतीति*।। अपिच ब्रह्मसाक्षात्कारो हि मोक्षसाधनमिष्यते; अविद्यानिवर्तकत्वेन दृष्टद्वारत्वात्, अतस्तदेव प्रधानम्, श्रुतियुक्ती तु तदङ्गे; ''श्रोतव्यो मन्तव्यः'' इति श्रुतेः। तत्र दृष्टसाधर्म्येणादृष्टमर्थं समर्पयन्ती युक्तिरनुभवस्य संनिकृष्टत्वादन्तरङ्गसाधनम्, बहिरङ्गं तु श्रुतिः ; सर्वात्मना परोक्षविषयत्वेन विप्रकृष्टत्वात्, संनिकृष्टविप्रकृष्टयोश्च संनिकृष्टं बलवत्। अतोऽपि युक्तयन्तरेण श्रुतेराक्षेप इत्याह– *दृष्टसाधर्म्येण त्विति*।। इतोऽपि तर्कस्य बलवत्त्वम्, यतः श्रुत्यैव स्वविषये ब्रह्मणि तर्कस्यादरप्रदानमित्याह– *श्रुतिरपीति*।। *पुनराक्षेप इति*।। श्रुतिस्मृतिनिमित्ताक्षेपापेक्षया। अथ कस्तर्कः? येन ब्रह्मणो जगदुपादानत्वं श्रुतिसिद्धमाक्षिप्येत? उच्यते; जगत्, न ब्रह्मोपादानकं भवितुमर्हति, ततो विलक्षणस्वभावत्वात्; यत् यतो विलक्षणस्वभावं भवति, न तत् तदुपादानकं दृष्टं लोके, यथा तन्तुभ्यो विलक्षणस्वभावो घटो न तन्तूपादानक इति। ततो विलक्षणस्वभावत्वं तु जगतः, अचेतनत्वात्, अशुद्धत्वाच्च। अचेतनत्वाशुद्धत्वे च जगतः सुखदुःखमोहात्मकत्वात्। सुखदुःखमोहात्मकत्वं तु प्रीतिपरितापविषादादिहेतुत्वात् इतश्चाचेतनं जगत्; चेतनं प्रति गुणभावात्। गुणभावश्च भोगोपकरणत्वात्, तत्त्वं च कार्यकारणादिभावेनेत्यन्यदेतत्।।

ननु–भृत्यादिषु चेतनेषु गुणभावस्य दर्शनादचेतनत्वं व्यभिचरति स इति–चेत्, न; तत्रापि तत्कार्यकारणसङ्घातस्यैव गुणभावदर्शनेन व्यभिचारासिद्धेः। एवमपि बुद्ध्यादिकार्यकरणसङ्घात-प्रयोक्तृत्वात् तद्द्वाराऽस्त्येव पुरुषान्तरं प्रति तद्गुणभाव इति चेत्, न; साङ्ख्यमते चेतनानां निरतिशयत्वेन तत्प्रवर्तकत्वासिद्धेः, काष्ठलोष्टादीनाञ्च प्रत्यक्षमेवाचेतनत्वम्। तस्मादचेतनं जगदिति।।

योऽपि कश्चिन्मन्यते–जगतश्चेतनकारणताश्रुतिसामर्थ्यादेव चेतनत्वमवगमयिष्यामि, चेतनाचेतनविभागव्यवहारस्तु चैतन्यस्य विभाविताविभावितत्वाभ्यां भविष्यति। तद्विभावितत्वाविभावितत्वे च परिणामविशेषकृते, अवस्थाविशेषकृते वा भविष्यतः। दृश्यते च स्पष्टचैतन्यानामपि स्वापमूर्च्छाद्यवस्थासु चैतन्याविभावनम्। अत एव चेतनत्वाविशेषेऽप्युपकार्योपकारकभावोऽपि न विरोत्स्यते; पाथिवत्वाविशेषेऽपि मांससूपौदनादिना शरीरादेरुपकारदर्शनात्–इति, तत्प्रत्युच्यते–*तथात्वं च शब्दादिति*। अनवगम्यमानमपि समस्तस्य जगतश्चेतनत्वं श्रुतचेतनकारणताऽन्यथाऽनुपपत्त्या कल्पनीयम्, न च तत्कल्पयितुं शक्यते; प्रत्यक्षश्रुत्यन्तरविरोधेन तत्कल्पनाया एवानुदयात्। प्रत्यक्षशब्दाद्धि कस्यचित् कार्यभागस्य ब्रह्मप्रकृतिवैलक्षण्यमचेतनत्वमवगम्यते–'विज्ञानञ्चाविज्ञानञ्चाभवदि'' ति। तस्माद् नोक्तकल्पनं युक्ततरमित्यभिप्रायः। शुद्ध्यशुद्धिकृतं वैलक्षण्यमनाशङ्क्यमेवावतिष्ठते।।४।।

ननु–अचेतनत्वाभिमतानामपि भूतेन्द्रियाणां चेतनत्वं श्रूयते। तथाहि–''मृदब्रवीत्'' ''आपोऽब्रुवन्'' ''तत्तेज ऐक्षन्त'' ''ता आप ऐक्षन्त'' इति भूतविषया चेतनत्वश्रुतिः, ''ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः'' ''वाग्घोच्चक्राम ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायत'' इत्येवमाद्या चेन्द्रियविषया। तथाच तच्चेतनत्वप्रतिपादकानेकश्रुतिविरोधात्, श्रयमाणचेतनकारणताविरोधाच्च ''त्यजेदेकं कुलस्यार्थ'' इति न्यायेन तदविज्ञानत्वश्रुतेरविभावित-चैतन्याभिप्रायेणैव व्याख्यानमुचितम्–इति, तत्रोत्तरं पठति–*अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्*।।५।।

तुशब्द उक्ताऽशङ्कानिवृत्त्यर्थः। नैवमाशङ्कितव्यम्–यत्–''मृदब्रवीदि'' त्यादौ मृदादिशब्देन भूतेन्द्रियाणां ग्रहणात् तच्चेतनत्वमुच्यते–इति। किं तर्हि? मृदादिभूतानां वागादीन्द्रियाणां च या अभिमानिन्योऽग्न्यादिदेवताश्चेतनाः, तासामयं मृदादिशब्देन व्यपदेश इति। भवति हि वेदे लोके चादित्यादिशब्दवद् मृदादिशब्दो ह्युभयेषां व्यपदेशकः। तत्र व्यपदेशकाविशेषेऽपि यथा ''गामभ्याजेत्यु''क्ते योग्यतया न पृथिव्यादेरन्वयप्रतियोगित्वेन प्रत्ययः, किं तर्हि? योग्यत्वात् पशुविशेषस्येति विशेषनिर्णयः, तद्वत् ''मृदब्रवीदि'' त्यादावपि न

भूतेन्द्रियाणामन्वयप्रतियोगित्वमुपपद्यते, किं तर्हि? सचेतनानां तदभिमानिनीनां योग्यत्वात् तत्प्रतियोगित्वम इति भवति तद्व्यपदेश इति विशेषनिर्णयः।।

ननु–भूतेन्द्रियाणामपि चेतनोपादनकत्वेन चेतनत्वमाशङ्कितम्, तत् कुतो विशेषनिर्णय इति–चेत्, मैवम्; विशेषानुगतिभ्यां तच्छङ्काऽनुपपत्तेस्तन्निर्णयध्रौव्यात्। विशेषस्तावत् पूर्वमभिहितः–भोग्यभोक्तृविभागलक्षणः, "विज्ञानञ्चाविज्ञानञ्चाभवदि" ति श्रुतेश्च। यदि हि भोग्यत्वेनाभिप्रेतभूतेन्द्रियादिकमपि भोग्यवत् चेतनं स्यात्, तदा भोक्तृभोग्यलक्षणो विभागो नोपपद्यते, चेतनाचेतनविभागश्रुतिश्च। तथा मन्त्रार्थवादेतिहासपुराणेषु भूतेन्द्रियादिनियामकत्वेनावगम्यमान-देवतानुगतिरपि नोपपद्यते; स्वतश्चेतनत्वेन स्वकार्यनियमनोपपत्तौ तदर्थं चेतनान्तराऽनुगतिवैफल्यात्। ननु–"तत्तेज ऐक्षत बहु स्यां प्रजायेये" त्यादिवाक्याद् भूतचेतनत्वमवगम्यते। न च–तदभिमाननिदेवताया एव तद्व्यपदेश इति–वाच्यम्; देवतायास्तत्कार्यरूपेण बहुभवनासम्बन्धादिति–चेत्, नैष दोषः ; तदीक्षणौपचारिकत्वस्य–"ईक्षतेर्नाशब्दमि" त्यत्र प्रदर्शितत्वात्। अपिच यद्यपि जीवरूपायास्तदभिमानिदेवतायास्तादृशमीक्षणं न सम्भवति; बहुभवने स्वातन्त्र्यासम्भवाच्च, तथापि तेजआदिभावापन्नाया एव परस्या देवताया अस्ति तदनुगतिः, इति तस्या एव तदीक्षणकर्तृत्वाद् न तद्बलादपि भूतचेतनत्वसिद्धिरिति। तदिदमुक्तम्–*"तत्तेज ऐक्षते" ति परस्या एव देवतायाः अधिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यपदिश्यत इति द्रष्टव्यमिति*।। पूर्वपक्षमुपसंहरति–तस्मादिति।।

सिद्धान्तसूत्रमवतारयति–* इत्याक्षिप्ते प्रतिविधत्ते दृश्यते त्विति*।। अनेन सूत्रेण "विलक्षणत्वादि" ति पूर्वपक्षोक्तहेतौ व्यभिचारमुद्भावयन् ब्रह्मकारणतावादं समर्थयति। किं सर्वकारणस्वभावानामननुवर्तनं कार्ये, कारणे वा सर्वकार्यस्वभावानामननुवर्तनं वैलक्षण्यं कार्यकारणभावाभावे हेतुः क्रियते, किं वा यस्य कस्यापि स्वभावस्याननुवर्तनमिति। तत्र प्रथमपक्षे व्यभिचारमुद्भावयति–*दृश्यते हीत्यादिना*।। पुरुषादिसर्वस्वभावानां केशनखादिष्वननुवतनेऽपि कार्यकारणभावदर्शनादित्यर्थः। अचेतनत्वेन प्रसिद्धेभ्य इत्यादिना च कारणपक्षकोक्तवैलक्षण्ये व्यभिचारोद्भावनम्; वृश्चिकादिकार्यगतसर्वस्वभावानां गोमयादिकारणेऽननुवृत्तिदर्शनात्। अस्ति चात्र कार्यकारणयोः सर्वस्वभावानुवृत्तिः, अतो न व्यभिचार इत्याशङ्कते–*नन्ववेतनान्येवेति*।। सर्वस्वभावानुवृत्तिरसिद्धेति परिहरति–*उच्यते–एवमपीति*।। अचेतनत्वस्वभावसाम्येऽपीत्यर्थः। वैलक्षण्यान्तरमाह–*महांश्चायमिति*।। व्यतिरेकासिद्धिश्च; हेतोरसम्भवादित्याह–*अत्यन्तसारूप्ये चेति*।। द्वितीयपक्षमाशङ्क्य, असिद्ध्या परिहरति–*अथोच्येतेत्यादिना*।। चेतनत्वाचेतनत्वकृतं

पराभिमतवैलक्षण्यविशेषं निराकर्तुं सामान्यतस्तद्विकल्प्य प्रथमद्वितीयपक्षयोरभिहितं दूषणमनुवदति– *विलक्षणत्वेन च कारणेनेत्यादिना*।। द्वितीये चाप्रसिद्धत्वम्=असिद्धत्वमित्यर्थः। *तृतीये तु दृष्टान्ताभाव इति*।। परसम्प्रतिपन्नस्यैव दृष्टान्तत्वादित्यभिप्रायः। एतदेवाह– *किं हीति*।। चैतन्येनानन्वितम्=अचेतनस्वभावम्। कार्यमिति शेषः ; अन्यथा पराभिमताविद्या निदर्शनं स्यादिति।।

यद्वा अविद्याया ब्रह्मशक्तित्वात् ततो व्यतिरिच्य निदर्शयितुमशक्यत्वात् यथाश्रुतमप्युपपन्नमिति। ननु–किमिति व्यभिचारोद्भावनमेव सूत्रकृता कृतम्, न वस्तुविषयकबलबदागमं–प्रमाणविरोधोद्भावनमपीति? अत आह– *आगमविरोधस्तु प्रसिद्ध एवेति*।। ननु–उक्तमागमापेक्षयाऽनुमानं बलवत्; शास्त्रविहितमोक्षोपायस्य ब्रह्मसाक्षात्कारस्यागमापेक्षया संनिकृष्टत्वात्, "श्रोतव्यो मन्तव्यः" इति श्रवणोत्तरमननविधानाच्च, परिनिष्पन्नत्वेन ब्रह्मणि प्रमाणान्तरसम्भवात्, अतो नागमेनानुमानविषयो बाध्यते। किं तर्हि? वैपरीत्यमिति; तत्राह– *यत्तक्तमिति*।। *नैषा तर्केणेति*।। एषा=श्रुतिप्रभवाऽद्वितीयात्मविषया, मतिः, न शुष्कतर्केण तद्विरोधिना, आ=समन्तात्, न निराकरणोपायतः। अन्येनैव=कार्येणैव, प्रोक्ता=कथिता सती, सुज्ञानाय=सुष्ठुतरविज्ञानाय भवति, न स्वमतिप्रभवतर्कादिना। हे प्रेष्ठ! प्रियतम नचिकेत इत्यर्थः। *अनुभवाङ्गत्वेनेति*।। अनुभवाङ्गत्वं तु तर्कस्य प्रतिबन्धनिरासद्वारैवेति द्रष्टव्यम्। श्रुत्यनुगृहीतानेव तर्कान् दर्शयति– *स्वप्नान्तबुद्धान्तयोरित्यादिना*।। आत्मनोऽनन्वागतत्वम्= स्वप्नाद्यवस्थाभिरसम्पृक्तत्वम्, असङ्गत्वमिति यावत्। यदपि–एकदेशिमते पूर्वपक्षिणा दूषणम्–अभिहितम्, तदपि न तन्मतमास्कन्दति। किं तर्हि? पूर्वपक्षिमतमेवाभासी-करोतीत्याह– *योऽपीति*।। अस्माभिस्तु कार्यकारणयोश्चेतनाचेतनत्वलक्षणविभागमङ्गीकृत्यापि परोक्तहेतुर्विकल्प्य व्यभिचारादिदोषेण निराकृत इत्याह– *प्रत्युक्तत्वात्तु विलक्षणत्वस्येति*।।६।।

असदिति चेन्न प्रतिषेधमात्रत्वात्।। यदि भवता चेतनात् शब्दादिहीनात् शुद्धाद् ब्रह्मणस्तद्विलक्षणम्, अचेतनम्, शब्दादिमत्, अशुद्धं जगत् कार्यमभ्युपगतम्, हन्त तर्हि असत्कार्यतावाद प्रसङ्गः, न हि सृष्टेः पूर्वमुक्तलक्षणकार्यस्वरूपमस्ति; अनभ्युपगमात्। अभ्युपगमे वा कारणाभेदेनास्तित्वे कारणस्य शुद्धत्वादिरूपप्रच्युतिः, तद्भेदेनास्तित्वे चापसिद्धान्तः, "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि" त्यादिश्रुतिविरोधश्च, सर्गतत्पूर्वकालयोरविशेषप्रसङ्गश्च। तस्मात् सत्कार्यवादिनां भवतां सृष्टेः पूर्वमुक्तलक्षणं कार्यमप्रसक्तम्। तथा चापसिद्धान्त इति चेत्, नैतदेवम्, कुतः? प्रतिषेधमात्रत्वात्। नैवास्मन्मते सृष्टेः पूर्वमसत् कार्यं प्रसज्यते; यतः–"असदि" ति प्रतिषेधमात्रं प्रतिषेध्यं विनैव त्वया क्रियते, न ह्यस्य प्रतिषेधस्य "नरश्रृङ्गं नास्ती" तिवत्

प्रतिपेध्यमस्ति। ननु–सृष्टेः पूर्वं कार्यसत्त्वमेवास्य प्रतिषेध्यम्, मैवम्; कारणसत्त्वस्यैव कार्यसत्त्वाभ्युपगमात्, तस्य च सर्गकाल इव पूर्वकालेऽपि विद्यमानत्वात् तत्प्रतिषेध्यत्वासिद्धेः। ननु–पूर्वं कारणरूपेण सत्त्वेऽपि कार्यस्य न स्वरूपेण सत्त्वमस्ति, अतस्तदेव प्रतिषेध्यमिति–चेत्, न; कार्यस्य कारणरूपमन्तरेण स्वरूपान्तरानभ्युपगमात्। दृश्यमानमस्ति रूपान्तरमिति चेत्, सत्यम्; तस्य प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वस्य मिथ्यात्वापरपर्यायस्य विद्यमानकालेऽप्यभ्युपगमेन तत्प्रतिषेध्यत्वस्येष्टत्वात्।।

अपीतौ तद्वत् प्रसङ्गादसमञ्जसम्।।८।। अपीतिर्हि=प्रलयः ; अपिपूर्वस्येतेः प्रलयार्थत्वात्। स च द्विविधः–आत्यन्तिकः, अनात्यन्तिकश्चेति। तत्रात्यन्तिको ब्रह्मसाक्षात्काराद् द्वैतप्रपञ्चस्य बाधात् भवति, अनात्यन्तिकस्तु ब्रह्मणो द्विपरार्धावसानादौ। न हि तदाऽऽत्यन्तिकः कार्यलयोऽस्ति; कूर्माङ्गानामिव कारणे सङ्कोचेन कार्यावस्थानाभ्युपगमात्, अन्यथा पूर्ववद् नियमेन तदुद्भवानुपपत्तेः। श्रूयते च तथोद्भवः–''त इह व्याघ्रो वा सिंहो वा वृको वा बराहो वा दंशो वा मशको वा कीटो वा पतङ्गो वा यद्यद्भवन्ति तदा भवन्ती'' ति श्रूतेः। एवं च सति तस्मिन्नात्यन्तिके प्रलये यदोक्तविधया कार्यं कारणे तदात्मनाऽवतिष्ठते, तदा स्वधर्मेणाऽशुद्धयादिना कारणं दूषयेदेव नीलद्रव्यमिव स्वधर्मेण नीलगुणेन। तथाचापीतौ ब्रह्मणोऽशुद्धयादिगुणवत्त्वप्रसङ्गाद् असमञ्जसमौपनिषदं दर्शनं स्यात्। *तद्वदिति* भावप्रधानो निर्देशः। तद्वत्त्वप्रसङ्गादित्यर्थः। तदेतदाह– *अत्राहेत्यादिना*।। ननु–कार्याणां कारणात्मनाऽवस्थानेऽपि तत्काले कार्यधर्माणामत्यन्तलयाद् न तद्धर्मप्रसङ्गः कारणे भविष्यतीति–चेत् कश्चिद् ब्रूयात्, तत्राह– *अपिच समस्तस्येति*।। अस्मिन् पक्षे दोषान्तरमाह– *अपिच भोक्तृणामिति*।। तथाच कार्यधर्माणामप्यन्तप्रलयो नाभ्युपगन्तव्य इत्याशयः। एवं तर्हि विभक्तमेव प्रलये कारणात् कार्यमस्तु, तथाच नोक्तदूषणमित्याशङ्क्य, तत्पेक्षेऽपि दोषमाह– *अथेदं जगदित्यादिना*।।८।।

तस्मात् असामञ्जस्याद् न ब्रह्म जगतः कारणमिति सूत्रेणाक्षिप्य सूत्रेणैव समाधत्ते– *न तु दृष्टान्तभावात्*।। तुशब्दोऽवधारणार्थः। तेन नञ न पौनरुक्तयम्। शेषं भाष्ये स्पष्टम्। ननु–अपीतौ कार्यस्य कारणे स्वधर्मेणानवस्थानं–चेत्, कथं कार्यकारणयोरनन्यत्वम्? न ह्यौष्ण्यापगमेऽग्निरिव स्वधर्मापगमे कार्यमवस्थातुमर्हति। न च तदनवस्थाने कार्यकारणयोरनन्यत्वं सिद्धयति, नापि सत्कार्यवाद इति, अत आह– *अनन्यत्वेऽपि कार्यकारणयोरिति*।। यथा रजतस्यारोपितस्य पारमार्थिकं रूपं शुक्तिः, न शुक्तेः पारमार्थिकं रूपं रजतम्; तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात्। न हि बाधेनानिर्वचनीयरूपापगमेऽपि शुक्तेः रजतस्य च पारमार्थिकं रूपं शुक्तिरपैति; एवमिदमपि, इत्यतो

नोक्तदोषोऽस्मन्मते, किं तर्हि? पारमार्थिककार्यकारणभाववादिमत इत्यभिप्रायः। किञ्च त्रिष्वपि स्थित्युत्पत्तिप्रलयकालेषु कार्यस्य कारणाभेदमभिदधती श्रुतिर्नाशङ्कनीया वेदवादिभिः। तत्र यत्परिहारः स्थित्युत्पत्त्योः—कार्यस्याविद्यासमारोपितत्वेन न तद्धर्मसंसर्गः कारणस्यास्ति—इति, स एव प्रलयेऽप्यविशिष्टः, इति नापीतिमात्रं विनियोज्यमित्याह—*अत्यल्पञ्चेदमुच्यत इति*।। दृष्टान्तान्तरमाह—*अस्ति चायमपरो दृष्टान्त इति*।। यदाऽज्ञस्येयं कथा, तदा किमु वक्तव्यम्—भगवतः परमात्मनः सर्वज्ञस्य? इति कैमुतिकन्यायमनुसृत्य दृष्टान्तान्तरमाह—*यथा च स्वप्नदृगेक इति*।। अवस्थात्रयम्=जाग्रत्स्वप्नसुषुप्त्याख्यम्, तस्य साक्षीत्यर्थः। न च कस्यापि द्रष्टृत्वतत्साक्षित्वाभ्यां दृष्टान्तदार्ष्टान्तिकभावोऽविरुद्धः। तथाच जीवेश्वरयोरभिमानानभिमानकृत एव भेदः, नोपाधिकृतभेदोऽपीति दर्शितं भवति; ''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वद्वत्त्यनश्नन्नन्योऽभिचाकशीती'' ति मन्त्रवर्णात्, ''एको देवः सर्वभूतेषु गूढः'' इत्यादिमन्त्राच्च, ''स इह प्रविष्टः'' ''तत्त्वमसी'' त्यादिब्राह्मणेभ्यश्च।।

केचित्तु—इमं विशेषमबुद्ध्वा स्थित्युत्पत्तिप्रलयाख्यमवस्थात्रयम्—व्याकुर्वन्ति, तन्मते भाष्योदाहृतं सम्प्रदायविद्वाक्यं नोपपद्यते; स्थित्युत्पत्तिप्रलयानामपि जाग्रदाद्यवस्थात्रयान्तर्भूतत्वात्। तच्चासङ्गत्वे दर्शिते दर्शितमेव भवति स्थित्यादिधर्मैरसङ्गत्वमिति। तस्माद् यथाश्रुतमेवास्तु व्याख्यानम्। कल्पान्तरेणासामञ्जस्यपरिहारचोदनायां कल्पान्तरेण दृष्टान्तभावं परिहारमाह—*यत्पुनरेतदुक्तमिति*।। *एतेनेति*।। मिथ्याज्ञानविभागशक्तिप्रतिनियमेनेत्यर्थः।।९।।

स्वपक्षदोषाच्च।।१०।। अपिच ''ययोरेव समो दोषः परिहारश्च तादृशः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे'' इति न्यायाद् न ब्रह्मकारणतावादे प्रतिवादिना विलक्षणत्वादयो दोषा उद्भावनीयाः, यतस्तस्य स्वपक्षेऽप्येते दोषाः प्रसज्यन्ते। तथाहि—शब्दादिहीनं हि प्रधानं मूलकारणं परेणभ्युपगम्यते, तस्माच्च शब्दादिमद् महदादि कार्यम्, इत्यस्ति कार्यकारणयोर्वैलक्षण्यं दोषः। अत एव प्रागुत्पत्तेः शब्दादिमत्कार्यरूपाभावात् असत्कार्योत्पत्तिर्दोषः, तथाऽपीतौ कार्यकारणयोरविभागाभ्युपगमात् कारणे कार्यधर्मसंसर्गप्रसङ्गो दोषः, अत एव—''इदमस्य पुरुषस्य क्लेशकर्मादि संसारबीजम्, इदमस्ये'' ति नियमकारणाभावात् तथैव पुनरुत्पत्तिप्रसङ्गश्च दोषः स्यात्—इति। अस्मत्पक्षे त्वेते दोषाः परिहृता एव। अतस्त्वत्पक्षमेव दूषयेयुरित्यभिप्रायः। यद्यप्येते दोषाः परपक्षदूषणप्रधानप्रवरेण परं प्रत्यभिधास्यन्ते; तथाप्यत्र साम्यापादनार्थमुद्भाविता इति द्रष्टव्यम्।।१०।।

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः:॥११॥ अपिच न श्रुतिमात्रगम्येऽतिगभीरे तद्विरुद्धैः शुष्कतर्कैः प्रत्यवस्थातव्यं भवता, यस्मात् तादृशेऽर्थे निरागमानां तर्काणामप्रतिष्ठानात्। न हि जगत्कारणे निरागमिकास्तर्काः प्रतिष्ठिता दृश्यन्ते; वैपरीत्यदर्शनात्। एकेन ह्यभियुक्तेन तर्ककुशलेनाऽऽगमनिरपेक्षस्तर्को जगत्कारण उत्प्रेक्षितः, सोऽन्येनाभियुक्ततरेण तर्कान्तरमादायाऽऽभासीक्रियते, तदप्यन्येनाभियुक्ततमेन तर्कान्तरमादायेत्यद्यत्वेऽपि दृश्यते। तथाहुः—"यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते"॥—इति। एतेन—कपिलाद्यन्यतममहापुरुषपरिगृहीततर्कस्यानाभासत्वमिति—अपास्तम्; अतस्तर्काणां परस्पर-विरोधेन जगत्कारणेऽप्रतिष्ठितत्वादपि न तैः श्रुतिगम्ये तादृशे विषये विरोध उद्भावनीयः। यदि ब्रूयात्—अन्यथा=प्रकारान्तरेण प्रधानमनुमेयमस्माभिः, यथा तर्कस्याप्रतिष्ठितत्वदोषो न भविष्यति। न हि कस्यचित् कस्मिंश्चित् विषये कश्चित् तर्को व्यभिचारादिदोषेण दुष्टतया न प्रतिष्ठां लभते, इति सर्वेषां सर्वे तर्काः सर्वविषयेऽप्रतिष्ठिता भवन्ति। तथा सति प्रत्यक्षस्यापि कुत्रचिद् व्यभिचारित्वेन सर्वत्र प्रतिष्ठाया वक्तुमशक्यत्वात् प्रत्यक्षानुमानकृतः सर्वोऽपि व्यवहारो दत्तजलाञ्जलिः स्यात्। अपिच सर्वतर्काप्रतिष्ठाऽपि तर्कणैव साध्यते। तस्य च तर्कस्य स्वविषयप्रतिष्ठितत्वे कुतः सर्वतर्काप्रतिष्ठा? तत्रैव व्यभिचारात्, अपतिष्ठितत्वे च नतरां सा। अपिच श्रुत्यर्थविप्रतिपत्तावर्थाभासनिराकरणेन सम्यगर्थावधारणं वाक्यवृत्तिनिरूपणद्वारा तर्केणैव क्रियते। मनुरप्यस्मिन्नर्थे तर्कस्यादर्तव्यतां दर्शयति—

"प्रत्यक्षमनुमानञ्च शास्त्रं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥"

इति॥ अतोऽपि न सर्वतर्कप्रतिष्ठा। अपिचालङ्कारोऽयं तर्कस्य—यत् केषाञ्चित् तर्काणां स्वविषयाप्रतिष्ठितत्वं नाम। सर्वतर्काप्रतिष्ठायां तु दूष्यपक्षस्याभावेन तद्बाधकत्वलक्षणं तर्कस्य तर्कत्वं हीयेत। तदुक्तम्—"तत्राननुकूलत्वमिथोविरोधौ द्वौ मूलशैथिल्यं तर्कदोषाः" इति। तस्माद् यद्यप्युक्तप्रकारेण "न विलक्षणत्वादस्य तथात्वञ्च शब्दात्" इत्यादिसूत्रोपात्तानां तर्काणां जगत्कारणेऽप्रतिष्ठितत्वम्; तथापि ततो भिन्नप्रकारैः स्वाभाविकप्रतिबन्धयुक्तैस्तर्कदोषहीनैः स्वविषयप्रतिष्ठितैरेव तर्कैः साङ्ख्यशास्त्रोक्तैः परिमितत्वादिलक्षणैः प्रधानं जगत्कारणमनुमेयम्—इति,

तदिदमुक्तम्–''अन्यथाऽनुमेयमिति चेदि''ति। तथाच न सर्वतर्काणां स्वविषयेऽप्रतिष्ठितत्वम्; तथापि श्रुतिप्रमाणमूलहीनानां केवलशुष्कतर्काणां परिमितत्वादिलक्षणानां न जगत्कारणे विषयेऽप्रतिष्ठादोषाद् निस्तारोऽस्ति। यथाच तत्, तथा ''रचनाऽनुपपत्तेश्च नानुमानम्'' इत्यत्र निवेदयिष्यते। अपिच तर्को हि प्रमाणविषयं विवेचयन् प्रमाणस्यानुग्राहको भवति, न स्वातन्त्र्येण कस्यचिदर्थस्य साधनायेष्टे। तत्र जगत्कारणविषयकसाङ्ख्याभिहिततर्काणां नागमप्रमाणानुग्राहकत्वम्; तद्विरुद्धार्थप्रतिपादकत्वात्। प्रमाणान्तरानुग्राहकत्वमिति चेत्, तत्राह–*न हीदमतिगम्भीरमिति*।। सम्यग्ज्ञानानुपपत्तिरपि साङ्ख्यतर्कानादरे हेतुरित्याह–*अपि च सम्यग्ज्ञानादिति*।। ननु–**वैदिकज्ञाने**ऽप्यसित तार्किकाणां विप्रतिपत्तिः, तथाच न तदपि सम्यग् ज्ञानं स्यात्–इति, नेत्याह–***वेदस्य तु** नित्यत्व इति*।।११।। इति तृतीयं नविलक्षणत्वाधिकरणम्।।

इति वार्तिकम् नविलक्षणत्वाधिकरणम् समाप्तम्

प्रदीपः

न विलक्षणत्वादस्य तथात्वं च शब्दात्।। ब्रह्म, न जगदुपादानम्, जगद्विलक्षणत्वात्। यद् यद्विलक्षणम्, न तत् तदुपादानम्, यथा तन्तवो घटस्येति युक्तिविरोधाद् न ब्रह्मण्येव वेदान्तानां समन्वय इत्याक्षेपसङ्गतिः प्रथमाध्यायान्तिमाधिकरणेन। मानान्तरगोचरत्वात्तु सिद्धस्य ब्रह्मणः प्रमाणान्तरविषयत्वमपि स्वतन्त्रं वर्तत इति युक्तिविरोधशङ्कासमुत्थितिः।।

तत्र पूर्वपक्षे निरवकाशत्वं युक्तिप्राबल्यनिमित्तम्, यस्य निरूपणार्थमाक्षेपसमाधानमुखेन प्रवृत्तं भाष्यम्–*नन्वित्यादि-पुनराक्षेपः क्रियते न विलक्षणत्वादस्येत्यन्तम्*।। सिद्धान्ते तु नाबाधिता युक्तिः श्रुतिविरुद्धा सम्भवदुक्तिकेति न प्रमाणद्वयविरोधोऽत्रेति श्रुतेरेव व्यवसथापकत्वमाद्रियते। अत्र पूर्वोक्तविधया जगत्कारणताबाधकमनुमानमेकम्, द्वितीयं तु प्रधानम्, जगदुपादानम्, तत्सलक्षणत्वादिति सत्प्रतिपक्षानुमानमिति तर्कद्वयं विवक्ष्यते। प्रथमं साक्षात् सूत्रारूढम्, द्वितीयं तु आर्थिकमिति विशेषः। तत्र प्रथमानुमानमभिप्रेत्य–*यदुक्तमित्यादि–सुवर्णप्रकृतिका* इत्यन्तं भाष्यम्, द्वितीयमभिप्रेत्य तु *वृथैवेत्यादि न विलक्षणस्य ब्रह्मण* इत्यन्तम्। तत्र द्वितीयानुमानपरतया सूत्रस्य–'प्रधानम्, जगदुपादानम्, तत्सलक्षणत्वा' दित्यनुमानविरोधप्रयुक्ते श्रुत्यप्रामाण्ये फलितार्थनिरूपणपरं सूत्रम्। तत्र ब्रह्मणोऽपि सालक्षण्यं तु सर्वस्य जगतश्चेतनतावादेन न सम्भवति; सङ्घातपरार्थत्वेन चेतनानुमानवादिनो हि साङ्ख्याः। तथाच जगतामपि चेतनत्वे तदुपकारकत्वानुपपत्तिः ; अन्यथाऽऽत्मनोऽप्युपकारकत्वापत्त्याऽनवस्थापत्तिः। तदिदं सर्वमभिप्रेत्याह– *अचेतनं चेत्यादिना–विभागो लोक इत्यन्तेन*।।

ननु ''अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमि'' ति सिद्धान्ताद् मिथ्याभूतस्यापि प्रपञ्चस्य सद्रूपत्ववत् तादात्म्याध्यासाद् जडस्यापि जगतश्चेतनत्वमपि न विरुद्धम्; कारणरूपस्य कार्येऽनुगमावश्यम्भावात्, उपकार्योपकारकभावस्तु स्वरूपतश्चेतनाचेतनयोरित्यङ्गीकारेऽपि न विरुद्धः। चैतन्याविभावनमपि काष्ठलोष्टादीनां चिद्रूपेणाज्ञातानामुपादानतामादायोपपद्यते।।

तदयं निष्कर्षः–त्रिविधमज्ञानमसत्त्वापादकमभानापादकमनानन्दतापादकम्। एकरूपेण ज्ञानमपररूपेणाज्ञानं चादाय ब्रह्मणः कारणत्वव्यपदेशः। यद्रूपेण ज्ञातं सदुपादानम्, तद्रूपेणैव तादात्म्यं कार्यस्य। तथाच सद्रूपेणेव चिद्रूपेणापि ज्ञाततायां चैतन्यविभावनम्, केवलं सद्रूपेण ज्ञाततायामेव कारणत्वे चैतन्यस्याविभावनमिति निष्कर्षः। तथाच चेतनत्वाचेतनत्वलक्षणं वैलक्षण्यं ब्रह्मजगतोर्नास्त्येवेत्यभिप्रायेण सिद्धान्तिनः शङ्कामनूद्य प्रकारान्तरेण वैलक्षण्यमुपपादयति– *योऽपीत्यादिना *नैव परिह्रियत इत्यन्तेन*।। इदं च चैतन्यस्य स्वयंप्रकाशमानस्यैवाधिष्ठानत्वम्, न तु ज्ञायमानस्य, ज्ञायमानस्यैवाधिष्ठानत्वम्, न तु स्वयं प्रकाशमानमात्रस्येति मतद्वयमभिप्रेत्य प्रवृत्तम् तत्र प्रथममते जगतोऽपि चेतनत्वम्। 'अत एव घटो भातीति व्यपदेशः'; सच्चिद्रूपस्य ब्रह्मणोऽधिष्ठानत्वात्। द्वितीयमते तु सद्रूपेण ज्ञातमेव चैतन्यमधिष्ठानम्, न चिद्रूपेण। अत एव सन् घट इत्येवं सदन्वितमेव सर्व भासते। विषयावच्छिन्नस्य सद्रूपस्यैव वस्तुतश्चैतन्यरूपत्वाद् विषयावच्छिन्नं चैतन्यं विषयाधिष्ठानं मन्यते। तथाच घटादीनामध्यासनिबन्धनमपि बिद्रूपत्वं न संभवतीति परिहाराभिप्रायः। शुद्धिस्तु न ब्रह्मणोऽधिष्ठानस्य स्वरूपम्, न वा तत्तादात्म्यप्रतीतिः कार्येष्वनुवर्तते, इति न वैलक्षण्यविरोध इति भावः। अस्मिन् सिद्धान्तेऽवष्टम्भः श्रुतिरेवेत्याह– *शब्द एवेति*।। *विज्ञानं चेति*।। इयं श्रुतिः–''सन्मूलाः सोम्येमाः सदायतनाः सत्प्रतिष्ठा'' इति सन्मात्रानुगतिपरश्रुतेरप्युपलक्षणम्।।

अत्राधिष्ठानज्ञानं भ्रमं प्रति कारणमिति मतेन पूर्वपक्षग्रन्थप्रवृत्तिः, सिद्धान्तस्तु अधिष्ठानज्ञानं भ्रमे न कारणम्, किन्तु सकारणस्यैवाध्यास इति मतेन। अत एव ''दृश्यते त्वि'' त्यत्र विनाऽपि सादृश्यमुपादानत्वोपपादनमुपपद्यते। यत्तु–तस्मिननेव सूत्रे यत्किञ्चिद्रूपेण साम्यं जगद्ब्रह्मणोरपि वर्तत इति–वर्णितम्, तदिदमधिष्ठानज्ञानकारणतावादेऽपि न दोष इत्यभिप्रायेणैव। तथाच सिद्धान्तलेशसंग्रहे कवितार्किकनृसिंहभट्टोपाध्यायमतावसरे सादृश्यज्ञानाकारणतावादस्योपपादनमपि व्याख्यातम्। यथा चोक्त एव मते भाष्यकारस्य तात्पर्यम्, तथा श्रीबालकृष्णानन्दसरस्वतीकृतशारीरकमीमांसाभाष्यवार्तिकविवरणयोर्व्यक्तमध्यासभाष्ये। एतेन–अध्यासासम्भवोपपादनावसरे तमः प्रकाशवद्विरुद्धस्वभावयोरित्युपक्षेपेऽपि तत्समाधानार्थं न भाष्यकारैस्तत्र कथं यतितमिति शङ्कापि–परास्ता; सति चैवं शुद्ध्यशुद्धिलक्षणवैलक्षण्यमनयोर्विद्यमानमकिञ्चत्करमेव। सच्चिदादिरूपेण सालक्षण्यस्याबाधादित्येव ''दृश्यते तु'' इत्येतत्सूत्रतात्पर्यम्, न तु जगतश्चित्तादात्म्येन चिद्रूपत्वनिषेधेऽपि; सन् घटो भात्यभीष्टश्चेति प्रत्ययस्यान्यथानुपपत्तेः। तथाच–''न चेतरदपि विलक्षणत्वं परिहर्तुं शक्यमि'' ति भाष्यमभ्युपगमवादाभिप्रायेणैव चेतनाचेतनत्वलक्षणवैलक्षण्यं सूत्रकारोऽभिप्रैतीति मन्यते। एवं विवरणे निमित्तं तु ''तथात्वं चे'' ति सूत्रे चशब्दप्रयोग एव। चस्त्वत्राप्यर्थक इति भाष्याशयः।।

अत्राधिकरणे ब्रह्मणो विलक्षणस्यापि परिणामिकारणत्वं व्यवस्थाप्यते वा, विवर्तमानत्वं वा। आद्येऽसम्भवः ; निरवयवत्वात्, श्रुतिप्रामाण्यात् परिणामिकारणत्वाङ्गीकारे तु प्रपञ्चस्यापि सत्यत्वादद्वैतासिद्धिः। द्वितीये तु विवर्तमानत्वमपि विलक्षणस्य दृष्टमित्यत्र नोदाहरणं किमपि भाष्ये–"दृश्यते तु" इति सूत्रविवरणावसरे प्रदर्शितम्। न केवलमिदम्, किन्तु पूर्वपक्षेऽपि विवर्तमानस्य सलक्षणत्वमपेक्षितमिति नाशङ्कितम्, न वा तत्रोदाहरणं दत्तम्।।

तथाच साङ्ख्यानां प्रधानकारणवाद एव युक्त इति शङ्का कथमद्वैतवादेऽवसरति? यदि ब्रह्मपरिणामितावादे न सूत्रकाराणां तात्पर्यम्–इति द्वैताद्वैतवादिनां शङ्का त्वेवं परिहरणीया–प्रकृतित्वं ब्रह्मण इति वादो न युक्त इत्येतावन्मात्रमत्र व्यवस्थाप्यते। तच्च प्रकृतित्वं यदि परिणामित्वम्, यदि वा विवर्तमानत्वम्, उभयथाऽपि न तद ब्रह्मणः सम्भवति; उभयत्र सादृश्यस्यापेक्षणात्। भ्रमज्ञानविषयाधिष्ठानत्वं हि विवर्तमानत्वं नाम। भ्रमस्तु पूर्वदृष्टाधिष्ठानसदृशावभास एव; अन्यथाऽङ्गारेऽपि रजतभ्रमापत्तेः। न च ब्रह्म विलक्षणं विवर्तोपादानतामर्हति। परिणाम्युपादानत्वं तु बाधितमेव; विलक्षणत्वाच्च। प्रधानस्य तु परिणामित्वं सलक्षणत्वेनाविरुद्धमिति शङ्काहृदयम्।।

अद्वैताभिमतं विवर्तमानत्वमप्याक्षेप्तुमेवेदमधिकरणं प्रवृत्तमिति "अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकमिति तर्कमप्यत्रादर्तव्यं दर्शयती" ति भाष्यतोऽवगम्यते; अन्यथा ब्रह्मणि तर्कस्य लेशतोऽप्यप्रसङ्गात् तर्काविरोधसमर्थनमेवात्रानुपपन्नं स्यात्। तथाच सामान्यतस्तर्कावसरं ब्रह्मप्रकृतित्वं च श्रुत्वा विलक्षणत्वेन तर्कतस्तत्प्रकृतित्वमात्राक्षेपः क्रियते। परिणामिकारणतायामपि सालक्षण्यनियमाभावे किमु वक्तव्यं विवर्तोपादानतायामघटित-घटनापटीयोमायानिबन्धनायाम्, इति साङ्ख्यानामपि सदृशयोरेवोपादानोपादेयभाव इति नियमाभावाद् जगद्विलक्षणब्रह्मकारणतायां न कोऽपि विरोधः, इति साङ्ख्यसम्मतनियमखण्डनस्यैवात्राभिमतत्वेन विलक्षणस्याप्युपादानत्वं विवर्तमानत्वलक्षणं न विरुद्धमिति सूत्राशयः पृथग् न विशदीकृतः। अत्र सादृश्याभावेऽपि कारणत्वमुपपन्नमित्येकसत्तावादेन। सदाद्यात्मना सादृश्यसत्त्वान्न दोष इति तु सत्तात्रैविध्यवादेन। तथाच वादद्वयस्याप्यस्यात्रत्यं भाष्यं मूलम्।।

अयं भावः–घटादिषु नामरूपात्मकमंशद्वयं यद्वर्तते, तदिदं मायाकार्यमित्येकः पक्षः। तदपि ब्रह्मविवर्त इति भामतीमतम्, यत्र मायाया निमित्तकारणत्वमेव, नोपादानत्वमपि। तत्र प्रथमे सच्चिदानन्दतादात्म्यं ब्रह्मकार्यम्, तच्च मिथ्यात्वादिना विलक्षणत्वेऽपि न विरुद्धम्; घटादीनां सत्त्वाद्यनङ्गीकारात्। द्वितीये तु घटादिव्यावहारिकस्वरूपमपि विलक्षणब्रह्मकार्यमिति विशेषः। तत्र

चेतनत्वाचेतनत्वादिवैलक्षण्यमात्रमादाय शङ्कैकसत्तावादेन। शुद्ध्यशुद्धिकृतवैलक्षण्यमादाय शङ्का तु सत्तात्रैविध्यवादेन।।

एतेन–अविद्याप्रकृतिकत्वेन सिद्धसाधनशङ्काऽपि–परास्ता। तथाच घटादीनां सदाद्यात्मना प्रतीत्यनुपपत्तिरेव प्रधानकारणतायां बाधिकेति फलितम्, इत्येकसत्तावादोऽविद्याया उपादानत्वमपि स्वीकृत्य प्रवर्तमानोऽपि न प्रधानकारणतावादेनैकवाक्यतां भजते; सत्ताया एवाभावे कार्यस्य कार्यकारणयोरेकसत्ताऽसम्भवात्। सत्तात्रैविध्यवादे तु मायाया नोपादानत्वमिति न तेनैकवाक्यता। पञ्चमषष्ठसूत्रभाष्यं तु निगदव्याख्यातम्।।६।।

अत्रेयं शङ्का भवति–यद्येकसत्तावादे वेदान्तानां तात्पर्यम्, तर्हि असत्कार्यवादापत्तिः। न चेष्टापत्तिः ; ''सदेव सोम्येदमग्र आसीदि'' ति सत्कार्यवादश्रवणात्–इति। तामिमामाशङ्कां समाधत्ते सूत्रकारः– *असदिति चेन्न प्रतिषेधमात्रत्वादिति*।।७।।

सत्तादात्म्यमध्यस्यते जगतीत्यादिवादे कार्यमसत्स्यादिति चेत्, न; प्रतिषेधमात्रत्वात्, वस्तुगत्या सत्त्वप्रतिषेधमात्रे तात्पर्यात्। तथाच कार्यं न सत्, न वाऽसत्, किन्तु सदसद्विलक्षणं स्वरूपेणैव स्वाधिकरणेऽविद्यमानं वेत्येवात्र विवक्षितम्। व्यवस्थापितं चेदं तदनन्यत्वाधिकरण इति भावः। तथाच न केवलं भाष्यम्, किन्तूक्तं सूत्रमपि सत्तैक्यवादे मूलम्। तथाच कार्यकारणभावो न सत्कार्यवादेन साङ्ख्याभिमतेन, न वाऽसत्कार्यवादेन वैशेषिकाद्यभिमतेन, किन्तु सद्विवर्तवादेनैवेति केचन। विस्तृतं चैतदद्वैतब्रह्मसिद्धौ।।

एतेन–परिणामकारणवाद एव सूत्रकाराभिमते साङ्ख्यप्रत्यवस्थानप्रसक्तिः, न विवर्तवादे, इति सूत्राणां परिणामवाद एव तात्पर्यमिति शङ्का–परास्ता; उक्तसूत्राशयविरोधात्। इदं हि सूत्रं ब्रह्मपरिणामवादिना भास्करेण–ब्रह्मणः शब्दादिरहितस्य कारणत्वेऽसत्कार्यवादापत्तिरिति शङ्कायाम् साङ्ख्यानां सत्कार्यवादिनामयमाक्षेपो न युक्तः, इति नैयायिकादीनामेवायमाक्षेपो भवतीति–व्याख्यातम्। इदमेवात्रालोचनीयम्–यत् असत्कार्यवादापत्तेः परिहारः को वात्र सूत्रकारैः सूचित इति? अयमत्र भास्कराचार्याणामाशयः–परमाणुकारणवादनिरासेन करिष्यमाणेन तस्य सिद्धत्वाद् नात्र स सूचनीय इति। परं तूत्तरत्र परमाणुकारणवादनिरासमात्रेणासत्कार्यवादापत्तेः परिहारो न सेत्स्यतीत्यत्रैव परिहारोऽपि यथावसरं सूचनीय एव। तथाच सद्विवर्तवादसमर्थनपरतया योजनमत्रावश्यं विवक्षणीयम्।।

श्रीभाष्कारास्तु ब्रह्मणो जगद्विलक्षणस्य कारणत्वेऽसत्कार्यवादापत्तिरित्याशङ्कायां "दृश्यते तु" इति सूत्रस्य कार्यकारणयोः सालक्षण्यनियमाभाव एव तात्पर्यात् कार्यद्रव्यान्तरत्वबोधनेऽतात्पर्याद् नोक्तशङ्कायाः संभव इति "असदिति चेदि" ति सूत्रं व्याचक्षते। अत्रापि जगतो ब्रह्मविलक्षणत्वे ब्रह्मकार्यत्वस्थापनमात्रेण पूर्वसूत्रसिद्धस्यैवार्थस्य पुनः सूत्रणं वितथमेव।।

श्रीबल्लभाचार्यास्तु–समृत्या युक्त्यां श्रुत्या च श्रुतिविरोधपरिहारो द्वितीयाध्यायप्रथमपादार्थ इति स्वीकृत्य स्मृत्या श्रुतिविरोधे प्रसक्ते स्मृत्यप्रामाण्यार्थं स्मृत्यन्तरविरोधः प्रथमाधिकरणेन, अनन्तरेण "न विलक्षणत्वादित्या" दिसूत्रत्रयेण युक्त्या श्रुतिविरोधे प्रसक्ते युक्त्यप्रामाण्यम्, ततः–"असदिति चे" दिति स्वतन्त्राधिकरणान्तरेण श्रुत्या श्रुतिविरोधः परिह्रियत इति मन्यन्ते। एतन्मते तु–"असदिति चेन्न" "असद्व्यपदेशात्" इति सूत्रद्वयेऽप्य "सदेवेदमग्र आसीदि" ति वाक्यमेव विषयः। इयान् विशेषः–"असदिति चेन्न" ति प्रकृतसूत्रेऽसत् कारणं शङ्क्यते, उत्तरत्र तु कार्यमसदिति शङ्क्यत इति। इदमेवात्रालोचनीयम्–कथं वा सूत्रकारैरेकस्यैव पदस्यार्थद्वयमभिप्रेत्य व्याख्यानमनुमन्यतेति? तथाच कार्यगतासत्त्वशङ्कापरिहार एव सूत्रद्वयेऽपि विवक्षणीयः। तत्र चाद्येन सत्त्वनिषेधोऽपरेण धर्मान्तरेणासत्त्वबोधनद्वारा स्वरूपतः सत्त्वं निपिष्यते। तथा चानेकसत्तावादेनेदं सूत्रम्, सत्तैक्यवादेनोत्तरं सूत्रम्, अथवा पारमार्थिकत्वेनाभावोऽनेन, उत्तरेण स्वरूपतोऽभावो बोध्यत इत्येव सूत्रार्थः। अत एव वक्ष्यते भाष्ये–"अभ्युपगम्य चेमं व्यावहारिकं विभागं स्याल्लोकवदिति परिहारोऽभिहितः, न त्वयं विभागः परमार्थतोऽस्ती"ति तदनन्यत्वाधिकरणोपक्रमे।।

श्रीमध्वाचार्या अपि "असदिति चेदि" ति सूत्रादिकमधिकरणान्तरमसदेवेति श्रुतिविरोधपरिहारपरतयैव योजयन्ति। एतन्मते तु श्रुतिविरोधपरिहारस्यैव पादार्थत्वाद् नविलक्षणत्वाधिकरणे पादासङ्गतिरधिको दोषः। अद्वैतमते तु न काप्यनुपपत्तिरिति दिक्।।

अयमत्र नविलक्षणत्वाधिकरणसिद्धाद्वैतप्रक्रियाविशेषनिर्णयः–(१) स्वप्रकाशं चैतन्यमात्रमधिष्ठानम्, (२) ज्ञायमानं चैतन्यमधिष्ठानम्, (३) भ्रमेऽधिष्ठानज्ञानसादृश्यज्ञानयोरकारणता, (४) एकसत्तावादः, (५) सत्तात्रैविध्यवादः, (६) सद्विवर्तवादः, (७) स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वं सद्विलक्षणत्वं वा मिथ्यात्वस्वरूपमिति च।।७।।

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।।८।। अनेन परस्पराध्यासे कारणे कार्यस्याध्यासेन कारणधर्मस्य कार्य इव कार्येऽपि कारणस्याध्यासेन कार्यधर्मस्यापि कारणे प्रसङ्ग इति ब्रह्मणोऽपि मिथ्यात्वापत्त्या शून्यवादापत्तिरिति सद्विवर्तवादे शङ्का क्रियते; अपीतिशब्दस्यात्यन्तप्रलयपरत्वात्,

तत्र च कार्याणां *ब्रह्मभावाभ्युपगमात्। साङ्ख्या हि कारणरूपेणैवावस्थानं कार्यस्य प्रलये स्वीकुर्वन्तोऽपि स्वरूपतोऽपि कार्यसत्त्वं परिणामवादस्वीकारान्मन्यन्ते। अद्वैतिनस्तु न तथेति ब्रह्मप्रकृतितायां कार्याणां कारणरूपेणैवावस्थानात् कारणस्य ब्रह्मणो कार्यभावादशुद्ध्यादिकं स्यादिति शङ्क्यते। तथावापीतिपदं सार्थकम्।।

श्रीभाष्यकारास्तु सृष्टिस्थित्योरपि तद्वद्भावापत्त्याऽऽक्षेपं साङ्ख्याभिमतं मन्यन्ते, अपीतिपदं चोपलक्षणं स्वीकुर्वन्ति।। श्रीमदानन्दतीर्थीयास्तु–असद्वादसमर्थनपरमिदं प्रतिपादयन्ति। ब्रह्मपरिणामवादे तु स्पष्टैव गतिरपीतिपदस्य। अपीतौ मोक्षे तद्वत्प्रसङ्गात् कार्यभावप्रसङ्गात् असमञ्जसम्; परिणामिकारणवाद इव विवर्तवादेऽपि कारणात्मनाऽवस्थानस्यैव प्रलयपदार्थत्वात्, तत्र च कार्यकारणयोरविभागे तादात्म्ये सति कार्येऽपि कारणाध्यासात्, अन्यथा परस्पराध्यासविरोधात् पूर्वोक्तप्रकारेणाद्वैतमतमसमञ्जसमित्याक्षेपाशयः।।८।।

अयमाक्षेपोऽद्वैतमते नावसरति; कार्ये कारणसंसर्गाध्यासमात्रस्यैव तत्र स्वीकारात् कार्यधर्माणां कारणेऽप्रसङ्गात्। अज्ञानविषयः खल्वधिष्ठानम्। न च कार्यमज्ञानविषयः ; "पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः" इति संक्षेपशारीरकवचनात्। अन्यथा सृष्टिस्थित्योरपि कथं वा न तद्वद्भावप्रसङ्गः? कार्यस्य कारणात्मत्वं हि भेदाभेदघटितमिति खलु साङ्ख्यानामपि सिद्धान्तः, इति तन्मते सृष्टिस्थित्योर्यथा न तद्वद्भावः, कार्यात्मना भेदात्, एवमद्वैतमतेऽपि न तद्वद्भावः ; तन्मतेऽपि कार्ये कारणानध्यासेनाधिष्ठानारोप्ययोः कल्पितभेदोरीकारेण तद्वद्भावाप्रसङ्गात्। इयान् विशेषः–साङ्ख्यमते प्रलये कार्याणां कारणरूपेणैवावस्थानम्, अद्वैतमते तु सर्वदा कारणव्यतिरेकेण स्वरूपतोऽपि कार्यस्याभाव इति भावेनोक्तामाशङ्कां समाधत्ते– *न तु दृष्टान्तभावादिति*।।९।।

न तु।। असमञ्जसमित्यनुषङ्गः। न तु अपीतावसमञ्जसम्; दृष्टान्तभावात्। अपीतौ तद्वद्भावाप्रसङ्गे दृष्टान्तानां साङ्ख्याभिमतानामेव परस्सहस्राणां सत्त्वादिति सूत्रार्थः। तत्र प्रथमतः पररीत्यैव दृष्टान्तान् दर्शयति– *सन्तीत्यादिना*।।

स्वमतरीत्या तद्वद्भावासम्भवमेवोपपादयति– *अत्यल्पं चेदमित्यादिना–इत्येतदयुक्तमित्यन्तेन*।। तत्र –अस्ति चायमपरो दृष्टान्त इत्यादि स्वप्रक्रियानुसारी दृष्टान्तः। तथाचाद्वैतमते नोक्तप्रसङ्गस्यावसर इति भावः।।

एवमवस्थात्रयेति।। अत्रावस्थात्रयं दार्ष्टान्तिकपरमात्मनः सृष्टिस्थितिलयाख्यमेव, न जाग्रदादित्रयमिति भामती। वार्तिककारास्तु–जाग्रदाद्यवस्थात्रयमिति मन्यन्ते। अत्रापीतौ

तद्वद्भावप्रसङ्गवारणस्यैव प्रकृतत्वात् भामतीविवरणमेव समुचितम्। संम्प्रदायविद्वचनं तु जीवरूपदृष्टान्तापेक्षयैव।।९।।

अथापीतौ तद्वद्भावप्रसङ्गेनासामञ्जस्यं वस्तुत: साङ्ख्यमत एवेत्याह सूत्रकार:– *स्वपक्षदोषाच्चेति*।।१०।। इदं च सूत्रं ब्रह्मपरिणामिवादिनो भास्करादयो मतद्वयसाधारणोऽयं दोष इति व्याचक्षते। अद्वैतिनस्तु साधारण्यं कृत्वाचिन्तयैव मन्यन्ते। तदेतदाह– *प्रतिवादिन: साधारणा इति*।। प्रतिवादिदृष्टया साधारणा इत्यर्थ:।।१०।।

तदेवं विशिष्य तर्कविरोधं परिहृत्य तर्कविरोध एव नास्ति; भवतां तर्कस्य तर्कान्तरबाधितत्वादिति निरूपणार्थं सूत्रम्– *तर्काप्रतिष्ठानादिति*।।११।। निगदव्याख्यातमस्य भाष्यम्।।११।। इति तृतीयं नविलक्षणत्वाधिकरणम्।।

इति प्रदीप: नविलक्षणत्वाधिकरणम् समाप्तम्

भामती

अवान्तरसङ्गतिमाह *ब्रह्मास्य जगतो निमित्तकारणं प्रकृतिश्चेत्यस्य पक्षस्य इति*। चोदयति *कुतः पुनः इति। समानविषयत्वे हि विरोधो भवेत्। न चेहास्ति समानविषयता, धर्मवद् ब्रह्मणोऽपि मानान्तराविषयतयाऽतर्क्यत्वेनानपेक्षाम्नायैकगोचरत्वादित्यर्थः। समाधत्ते *भवेदयम् इति*।

मानान्तरस्याविषयः सिद्धवस्त्ववगाहिनः।
धर्मोऽस्तु कार्य्यरूपत्वाद् ब्रह्म सिद्धं तु गोचरः॥

तस्मात्समानविषयत्वादस्त्यत्र तर्कस्यावकाशः। नन्वस्तु विरोधः, तथापि तर्कादरे को हेतुरित्यत आह *यथा च श्रुतीनाम इति*। सावकाशा वह्वयोऽपि श्रुतयोऽनवकाशैकश्रुतिविरोधे तदनुगुणतया यथा नीयन्ते एवमनवकाशैकतर्कविरोधे तदनुगुणतया वह्वयोपि श्रुतयो गुणकल्पनादिभिर्व्याख्यानमर्हन्तीन्यर्थः। अपि च ब्रह्मसाक्षात्कारो विरोधितयाऽनादिमविद्यां निवर्त्तयन् दृष्टेनैव रूपेण मोक्षसाधनमिष्यते, त्र ब्रह्मसाक्षात्कारस्य मोक्षसाधनतया प्रधानस्यानुमानं दृष्टसाधर्म्येणादृष्टविषयं विषयतोऽन्तरङ्गं, बहिरङ्गं तवत्यन्तपरोक्षगोचरं शाब्दं ज्ञानं तेन प्रधानप्रत्यासत्त्याप्यनुमानमेव बलीय इत्याह *दृष्टसाधर्म्येण च इति*। अपि च श्रुत्यापि ब्रह्मणि तर्क आदृत इत्याह *श्रुतिरपि इति*। सोऽयं ब्रह्मणो जगदुपादानत्वाक्षेपः पुनस्तर्केण प्रस्तूयते।

प्रकृत्या सह सारूप्यं विकाराणामवस्थितम्।
जगद् ब्रह्मसरूपञ्च नेति नो तस्य विक्रिया॥
विशुद्धं चेतनं ब्रह्म जगज्जडमशुद्धिभाक्।
तेन प्रधानासारूप्यात् प्रधानस्यैव विक्रिया॥

तथाहि—एक एव स्त्रीकायः सुखदुःखमोहात्मकतया पत्युश्च सपत्नीनाञ्च चैत्रस्य च स्त्रैणस्य तामविन्दतोऽपर्य्यायं सुखदुःखविषादानाधत्ते। स्त्रिया च सर्वे भावा व्याख्याताः। तस्मात्

सुखदुःखमोहात्मतय च स्वर्गनरकोच्चावचप्रपञ्चतया च जगदशुद्धमचेतनञ्च, ब्रह्म तु चेतनं विशुद्धं च, निरतिशयत्वात्। तस्मात् प्रधानस्याशुद्धस्याचतत्य विकारी जगन्न तु ब्रह्मण इति युक्तम्। ये तु चेतनब्रह्मविकारतया जगच्चैतन्यमाहुस्तान् इत्याह *अचेतनं चेदं जगद् इति*। व्यभिचारं चोदयति *ननु चेतनमपि इति*। परिहरति *न स्वामिभृत्ययोरपि इति*। ननु मा नाम साक्षाच्चेतनश्चेतनान्तरस्योप कार्षीत्, तत्कार्य्यकरणबुद्ध्यादिनियोगद्वारेण तूपकरिष्यतीत्यत आह *निरतिशया ह्यकर्त्तारश्चेतनाः इति*। उपजनापायंक्द्धर्मयोगोऽतिशयः, तदभावो निरतिशयत्वम्, अत एव निर्व्यापारत्वादकर्त्तारस्तस्मात्तेषां बुद्ध्यादिप्रयोक्तृत्वमपि नास्तोत्यर्थः। चोदकोऽनुशयवीजमुद्धाटयति *योऽपि इति*। अभ्युपेत्यापाततः समाधानमाह *तेनापि कथञ्चिद् इति*। परमसमाधानं तु सूत्रावयवेन वक्तुं तमेवावतारयति *न चैतदपि विलक्षणत्वम् इति*। सूत्रावयवाभिसन्धिमाह *अनवगम्यमानमेव हीदम् इति*। शब्दार्थात् खलु चेतनप्रकृतित्वाच्चैतन्यं पृथिव्यादीनामवगम्यमानमुपोद्वलितं मानान्तरेण साक्षाच्छ्रू यमाणपप्यचैतन्यमन्यथयेत। मानान्तराभावे त्वार्थोऽर्थः श्रुत्यर्थेनापबाधोयः, न तु तद्वलेन श्रुत्यर्थोऽन्यथयितव्य इत्यर्थः।।४।।

सूत्रान्तरमवतारयितुं चोदयति *ननु चेतनत्वमपि क्वचिद् इति*। न पृथिव्यादीनां चैतन्यमार्थमेव, किन्तु भूयसीनां श्रुतीनां साक्षादेवार्थ इत्यर्थः। सूत्रमवतारयति *अत उत्तरं पठति*

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्।।

विभजते *तुशब्द इति*। नेताः श्रुतयः साक्षान्मृदादीनां वागादीनाञ्च चैतन्यमाहुः, अपि तु तदधिष्ठात्रीणां देवतानां चिदात्मनां, तेनैतच्छ्रुतिबलेन न मृदादीनां वागादीनाञ्च चैतत्यमाशङ्कनीयमिति। कस्मात् पुनरेतदेवमित्यत आह *विशेषानुगतिभ्याम्*। तत्र विशेषं व्याचष्टे *विशेषो हि इति*। भोक्तृणामुपकार्य्यत्वाद् भूतेन्द्रियाणां चोपकारकत्वात् साम्ये च तदनुपपत्तेः सर्वजनप्रसिद्धेश्च ''विज्ञानं चाभवत्'' इति श्रुतेश्च विशेषश्चेतनाचेतनलक्षणः प्रागुक्तः स नोपपद्यते। देवताशब्दकृतो वात्र विशेषो विशेषशब्देनोच्यत इत्याह *अपि च कौषीतकिनः प्राणसंवाद इति*। अनुगतिं व्याचष्टे *अनुगताश्च इति*। सर्वत्र भूतेन्द्रियादिष्वनुगता देवता अभिमानिनीरुपदिशन्ति मन्त्रादयः। अपि च 'भूयस्यः श्रुतयोऽग्निर्वाग् भूत्वा मुखं प्राविशद्वायुः प्राणोभूत्बा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्' इत्यादय इन्द्रियविशेषगता देवता दर्शयन्ति। देवताश्च क्षेत्रज्ञभेदाश्चेतनाः। तस्मान्नेन्द्रियादीनां चैतन्यं रूपत इति। अपि च प्राणसंवादवाक्यशेषे प्राणानामस्मदादिशरीराणामिव चेत्रज्ञाधिष्ठितानां व्यवहारं दर्शयन् प्राणानां क्षेत्रज्ञाधिष्ठानेन चैतन्यं द्रढयतीत्याह *प्राणसंवादवाक्यशेषे च इति*। *तत्तेज ऐक्षतेत्यपि इति*। यद्यपि प्रथमेऽध्याषे

भाक्तत्वेन वर्णितं तथापि मुख्यतयापि कथञ्चिन्नेतुं शक्यमिति द्रष्टव्यम्। पूर्वपक्षमुपसंहरति *तस्माद् इति*।।५।।

सिहान्तसूत्रम्–दृश्यते तु।।

प्रकृतिविकारभावे हेतुं सारूप्यं विकल्प्य दूषयति *अत्यन्तसारूप्ये च इति*। प्रकृतिविकारभावाभावहेतुं वैलक्षण्यं विकल्प्य दूषयति *विलक्षणत्वेन कारणेन इति*। सर्वस्वभावाननुवर्तनं प्रकृतिविकारभावाविरोधि। तदनुबर्तने तादात्म्येन प्रकृतिबिकारभावाभावात्। मध्यमस्त्वसिद्धः। तृतीयस्तु निदर्शनाभावादसाधारण इत्यर्थः। अथ जगद्योनितयाऽऽगमाद् ब्रह्मणोऽवगमादागमवाधितविषयत्वमनुमानस्य कस्मान्नोद्भाव्यत इत्यत आह *आगमविरोधस्तु इति*। न चास्मिन्नागमैकसमधिगमनीये ब्रह्मणि प्रमाणान्तरस्यावकाशोऽस्ति येन तदुपादायागम आक्षिप्येतेत्याशयवानाह *यत्तूक्तं परिनिष्पन्नत्वाद् ब्रह्मणि इति*। यथा हि कार्य्यत्वाविशेषेऽप्यारोग्यकामः पथ्यश्नीयात् स्वरकामः सिक्तां भक्षयेवित्यादीनां मानान्तरापेक्षता, न तु दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादीनां, तत्कस्य हेतोः? अस्य कार्य्यभेदस्य प्रमाणान्तरागोचरत्वात्। पथं भूतत्वाविशेषेऽपि पृथिव्यादीनां मानान्तरगोचरत्वं, न तु भूतस्यापि ब्रह्मणः, तस्याम्नयैकगोचरस्यातिपतितसमस्तमानान्तरसीमतया स्मृत्यागमसिद्धत्वादित्यर्थः। यदि स्मृत्त्यागमसिद्धं ब्रह्मणस्तर्काविषयत्वं, कथं तर्हि श्रवणातिरिक्तमननविधानमित्यत आह *यदपि श्रवणव्यतिरेकेण इति*। तर्को हि प्रमाणविषयविवेचकतया तदितिकर्त्तव्यताभूतस्तदाश्रयीऽसति प्रमाणेऽनुग्राह्यस्याश्रयाभावात् शुक्नेतिया नाद्रियते। यस्त्वागनप्रमाणाश्रयस्तद्विषयविवेचकस्तदविरोधी, स मन्तव्य इति विधीयते। *श्रुत्यनुगृहीत इति*। श्रुत्या श्रवणस्य पश्चादितिकर्त्तव्यतात्वेन गृहीतः। *अनुभवाङ्गत्वेन इति* मतो हि भाव्यमानो भावनाया विषयतयाऽनुभूतो भवतीति मननमुनभवाङ्गम्। *आत्मनोऽनन्वागतत्वम् इति*। स्वप्नाद्यवस्थाभिरसंपृक्तत्वमुदासीनत्वमित्यर्थः। अपि च चेतनकारणवादिभिः कारणसालक्षण्येऽपि कार्य्यस्य कथञ्चिच्चैतन्याविर्भावानाविर्भावाभ्यां विज्ञानं चाविज्ञानं चाभवदिति जगत्कारणे योजयितुं शक्यम्। अचेतनप्रधानकारणवादिनां तु दुर्योजमेतत्। नह्यचेतनस्य जगत्कारणस्य विज्ञानरूपता संभविनी, चेतनस्य जगत्कारणस्य सुषुप्ताद्यवस्थास्विव सतोऽपि चैतन्यस्यानाविर्भावतया शक्यमेव कथञ्चिदवविज्ञानात्मत्वं योजयितममित्याह *योऽपि चेतनकारणश्रवणवलेन इति*। परस्यैव त्वचैतनप्रधानकारणवादिनः सांख्यस्य न युज्येत। *प्रत्युक्तत्वात्तु वैलक्षण्यस्य इति*। वैलक्षण्ये कार्य्यकारणभावो नास्तोत्यभ्युपेत्येदमुक्तम्। परमार्थतस्तु नास्माभिरेतदभ्युपेयत इत्यर्थः।।६।।

न कारणात्कार्य्यमभिन्नमभेदे कार्य्यत्वानुपपत्तेः। कारणवत् स्वात्मनि वृत्तिविरोधात् शुद्ध्यशुद्ध्यादिविरुद्धधर्मसंसर्गाच्च। अथ चिदात्मनः कारणस्य जगतः कार्य्याद्भेदः, तथा चेदं जगत्कार्य्य सत्त्वेऽपि चिदात्मनः कारणस्य प्रागुत्पत्तेनास्ति, चेदसदुत्पद्यत इति सत्कार्यवादव्याकोप इत्याह *यदि चेतनं शुद्धम् इति*। परिहरति *नैष दोषः इति*। कुतः? *प्रतिषेधमात्रत्वात्*। विभजते *प्रतिषेधमात्रं हीदम् इति*। प्रतिपादयिष्यति हि तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र। यथा कार्य्य स्वरूपेण सदसत्त्वाभ्यां न निर्वचनीयम्, अपि तु कारणरूपेण शक्यं सत्त्वेन निर्वक्तुमिति। एवं च कारणसत्तैव कार्य्यस्य सत्ता न ततोऽन्येति कथं तदुत्पत्तेः प्राक् सति कारणे भवत्यसत्। स्वरूपेण तूत्पत्तेः प्रागुत्पन्नस्य ध्वस्तस्य वा सदसत्त्वाभ्यामनिर्वाच्यस्य न सतोऽसतो वोत्पत्तिरिति निर्विषयः सत्कार्य्यवादप्रतिषेध इत्यर्थः।।७।।

असामञ्जस्यं विभजते *अत्राह* चोदकः। *यदि स्थौल्य इति*। यथा हि यूषादिषु हिङ्गुसैन्धवादीनामविभागलक्षणो लयः स्वगतरसादिभिर्यूष रूषयत्येवं ब्रह्मणि विशुद्ध्यादिधर्मणि जगल्लीयमानमविभागं गच्छद् ब्रह्म स्वधर्मेण रूषयेन्न चान्यथा लयो लोकसिद्ध इति भावः। कल्पान्तरेणासामञ्जस्यमाह *अपि च समस्तस्य इति*। नहि समुद्रस्य फेनोर्मिबुदबुदादिपरिणामे वा रज्ज्वां सर्पधारादिविभ्रमे वा नियमो दृष्टः। समुद्रो हि कदाचित् फेनोर्मिरूपेण परिणमते कदाचित् बुदबुदादिना, रज्ज्वां हि कश्चित्सर्प इति विपर्य्यस्यति कश्चिद्धारेति। न च क्रमनियमः। सोऽयमत्र भोग्यादिविभागनियमः क्रमनियमश्चासमञ्जस इति। कल्पान्तरेणासामञ्जस्यमाह *अपि च भोक्तृणाम् इति*। कल्पान्तरं शङ्कापूर्वमाह *अथेदम् इति*।।८।।

सिद्धान्तसूत्रम्—*न तु दृष्टान्तभावात्*। नाविभागमात्रं लयोऽपि तु कारणे कार्य्यस्याविभागस्तत्र च तद्धर्मारूषणे सन्ति सहस्रं दृष्टान्ताः। तत्र तु कारणे कार्य्यस्य लये कार्य्यधर्मरूषणे न दृष्टान्तलवोऽप्यस्तीत्यर्थः। स्यादेतत्—यदि कार्य्यस्याविभागः कारणे, कथं कार्य्यधर्मारूषणं कारणस्येत्यत आह *अनन्यत्वेऽपि इति*। यथा रजतस्यारोपितस्य पारमार्थिकं रूपं शुक्तिर्न च शुक्ते रजतमेवमिदमपीत्यर्थः। अपि च स्थित्युत्पत्तिप्रलयकालेषु त्रिष्वपि कार्य्यस्य कारणादभेदमभिदधती श्रुतिरनतिशङ्कनीया, सर्वैरेव वेदवादिभिस्तत्र स्थित्युत्पत्त्योर्यः परिहारः, स प्रलयेऽपि समानः कार्य्यस्याविद्यासमारोपितत्वं नाम, तस्मान्नापीतिमात्रमनुयोज्यमित्याह *अत्यल्पं चेदमुच्यते इति*। *अस्ति चायमपरो दृष्टान्तः*। *यथा स्वप्नदृगेकः इति*। लौकिकः पुरुषः। *एवमवस्थात्रयसाक्ष्येकः इति*। अवस्थात्रयमुन्पत्तिस्थितिप्रलयाः। कल्पान्तरेणासामञ्जस्ये कल्पान्तरेण दृष्टान्तरेण दृष्टान्तभावं परिहारमाह *यत् पुरनेतदुक्तम् इति*। अविद्याशक्तेर्नियतत्वादुत्पत्तिनियम इत्यर्थः। *एतेन इति*। मिथ्याज्ञानविभागशक्तिप्रतिनियमेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः, कारणाभावे कार्य्यांभावस्य

प्रतिनियमात्, तत्त्वज्ञानेन च स्वशक्तितो मिथ्याज्ञानस्य समूलघातं निहतत्वादिति।।९।।

कार्य्यकारणयोर्वैलक्षण्यं तावत्समानमेवोभयोः पक्षयोः, प्रागुत्पत्तेरसत्कार्य्यवादप्रसङ्गोऽपीतौ तद्वत्प्रसङ्गश्च प्रधानोपादानपक्ष एव नास्मत्पक्ष इति यद्यप्युपरिष्टात्प्रतिपादयिष्यामस्तथापि गुडजिह्विकया समानत्वापादनमिदानीमिति मन्तव्यमिदमस्य पुरुषस्य सुखदुःखोपादानं क्लेशकर्माशयादीदमस्येति। सुगममन्यत्।।१०।।

केवलागमगम्येऽर्थे स्वतन्त्रर्काविषये। न सांख्यादिवत् साधर्म्यवैधर्म्यमात्रेण तर्कः प्रवर्तनीयो येन प्रधानादिसिद्धिर्भवेत्। शुष्कतर्को हि स भवत्यप्रतिष्ठानात्। तदुक्तम्–

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते।। इति।

न च महापुरुषपरिगृहीतत्वेन कस्यचित्तर्कस्य प्रतिष्ठा, महापुरुषाणामेव तार्किकाणां मिथो विप्रतिपत्तेरिति। सूत्रे शङ्कते *अन्यथानुमेयमिति चेत्*। तद्विभजते *अन्यथा वयमनुमास्यामहे इति*। नानुमानाभासव्यभिचारिणानुमानव्यभिचारः शङ्कनीयः, प्रत्प्रक्षादिष्वपि तदाभासध्यभिचारेण तत्प्रसङ्गात्। तस्मात् स्वाभाविकप्रतिबन्धवल्लिङ्गानुसरणे निपुणेनानुमात्रा भवितव्यं, ततश्चाप्रत्यूहं प्रधानं सेत्स्यतीति भावः। अपि च येन तर्केण तर्काणामप्रतिष्ठामाह स एव तर्कः प्रतिष्ठितोऽभ्युपेयस्तदप्रतिष्ठायामितराप्रतिष्ठानाभावादित्याह *नहि प्रतिष्ठितस्तर्क एव इति*। अपि च तर्काप्रतिष्ठायां सकललोकयात्रोच्छेदप्रसङ्गः। न च श्रुत्यर्थाभासनिराकरणेन तदर्थतत्त्वविनिश्चय इत्याह *सर्वतर्काप्रतिष्ठायां च इति*। अपि च विचारात्मकस्तर्कस्तर्कितपूर्वपक्षपरित्यागेन तर्कितं राद्धान्तमनुजानाति। सति चैष पूर्वपक्षविषये तर्के प्रतिष्ठारहिते प्रवर्तते, तदभावे विचाराप्रवृत्तेः। तदिदमाह *अयमेव च तर्कस्यालङ्कारः इति*। तामिमामाशङ्कां सूत्रेण परिहरति *एवमप्यविमोक्षप्रसङ्गः*। न वयमन्यत्र तर्कमप्रमाणयामः, किन्तु जगत्कारणसत्त्वे स्वाभाविकप्रतिबन्धवन्न लिङ्गमस्ति। यत्तु साधर्म्यवैधर्म्यमात्रं, तदप्रतिष्ठादोषान्न मुच्यत इति कल्पान्तरेणानिर्मोक्षपदार्थमाह *अपि च सम्यग्ज्ञानान्मोक्षः इति*। भूतार्थगोचरस्य हि सम्यग्ज्ञानस्य व्यवस्थितवस्तुगोचरतया व्यवस्थानं लोके दृष्टं, यथा प्रत्यक्षस्य। वैदिकं चेदं चेतनजगदुपादानविषयं विज्ञानं वेदोत्थतर्केतिकर्तव्यताकं वेदजनितं व्यवस्थितं वेदानपेक्षेण तु तर्केण जगत्कारणभेदमवस्थापयतां तार्किकाणामन्योन्यं विप्रतिपत्तेस्तत्त्वनिर्धारणकारणाभावाच्च न ततस्तत्त्वव्यस्थेति न ततः सम्यग्ज्ञानम्, असम्यग्ज्ञानाच्च न संसाराद्विमोक्ष इत्यर्थः।।११।।

इति भामती नविलक्षणत्वाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

पुनरपि साङ्ख्यतर्कबाध्यतां समन्वयस्याशङ्क्य परिहरति-

।।सू।। **न विलक्षणत्वादस्य तथात्वं च शब्दात्**।।४।।

यथा साङ्ख्यस्मृत्या समन्वयस्य न बाधः तथा तत्तर्केणापि बाधोऽस्ति न वा-इति संशये पूर्वपक्षः प्रवर्तते। सर्वथा तर्कबाध्योयं ब्रह्मकारणतावादः। कथम्?। ब्रह्मणः प्रपञ्चस्यास्य विलक्षणत्वात् न तत्कार्यत्वं सम्भवति। कुतो वैलक्षण्यमवगतमिति चेत्-शब्दादेव। 'विज्ञानं चाविज्ञानं च' इत्यादिशब्दो हि प्रपञ्चस्य विकारास्पदत्वाज्ञत्वाद्यपुरुषार्थरूपत्वमभिधत्ते। अतः सत्यज्ञानानन्दरूपात् ब्रह्मणोऽस्य वैलक्षण्यं सिद्धम्। कथमनयोर्गोमहिषयोरिव कार्यकारणभावः सम्भवति?

।।सू।। **अभिमानिव्यपेदेशस्तु विशेषानुगतिभ्याम्**।।५।।

यद्यचेतनत्वेन चेतनात् ब्रह्मणो विलक्षणमिदं जगत्, तत्कथमस्मिन् 'तं पृथिव्यब्रवीत्' 'आपो वा अकामयन्त' 'शृणोत ग्रावाणो विदुषः' इत्यादौ चेतनकार्यव्यपदेशः। तस्मादिदं चेतनमेव सर्वं जगत्। अतो न ब्रह्मप्रपञ्चयोश्चेतनाचेतनरूपतया न वैलक्षण्यमिति शङ्क्यम्। यतस्तथा सर्वत्र ज्ञानकार्यव्यपदेशस्तु तदभिमानिदेवताविषय एवेत्यवगम्यते, 'हन्ताहमिमास्तिस्त्रो देवताः' इति देवताशब्दविशेषात् 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इत्यादिना अचिद्वस्त्वभिमानिदेवतानुगतेश्च। तस्मादचेतनत्वादिना विलक्षणमेव जगत् ब्रह्मणः। ततोऽस्य कार्यत्वं ब्रह्मणः कारणत्वं च युक्तिबाध्यमेव।।

।।सू।। **दृश्यते तु**।।६।।

सिद्धान्त उच्यते-विलक्षणयोरपि ब्रह्मप्रपञ्चयोः कार्यकारणभावः सम्भवति, अचेतनाद्गोमयात् चेतनवृश्चिकोत्पत्तिदर्शनात्, चेतनात्पुरुषात् अचेतनकेशाद्युत्पत्तिदर्शनाच्च। अतः शुष्कतर्को न बाधकः श्रुतिसमन्वयस्येति निर्णयः।।

पुनः शङ्कित्वा परिहरति-

।।सू।। **असदिति चेन्न प्रतिषेधमात्रत्वात्**।।७।।

एवं कार्यकारणयोर्वैलक्षण्यात् कारणे कार्यमसदेव 'असद्वा इदमग्र आसीत्' इति श्रुतेरिति चेत्-नैवं वाच्यम्। सालक्षण्यनियमप्रतिषेधमात्रपरत्वाच्छ्रुतेः। अतः कार्यकारणयोः जगद्ब्रह्मणोः वस्त्वेकता न हीयत एव।। इति नविलक्षणत्वाधिकरणम्।।३।।

अथ अपीतौ तद्वत्प्रसङ्गाधिकरणम।।४।।

।।सू।। **अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्**।।८।।

सत्कार्यवादेन कार्यकारणयोः जगद्ब्रह्मणोः वस्त्वेकत्वे समन्वयस्य तर्कबाध्यत्वमस्ति न वा।

इति सन्देहेऽस्तीति पूर्वः पक्षः। कुतः? यत एव जगद्ब्रह्मणोः वस्त्वेकत्वमुक्तम्। तथा सति हि जगत इव ब्रह्मणोऽपि विकाराज्ञानाद्यनिष्टप्रसङ्गः समुन्मिषति। ततो वेदान्तवाक्यानां सामरस्यमसमञ्जसं भवति। अतः तर्केण समन्वयबाध इति।।

।।सू।। **न तु दृष्टान्तभावात्**।।९।।

नेति पूर्वपक्षं व्यावर्तयति। 'यस्यात्मा शरीरम्' 'यस्याव्यक्तं शरीरम्' इत्यादिश्रुत्या, 'विग्रहं देवदेवस्य जगदेतच्चराचरम्। एतमर्थं न जानन्ति पशवः पाशगौरवात्।।' इत्यादिपुराणोक्तया च सिद्धचिदचिच्छरीरकस्य परब्रह्मणः शिवस्य कार्यतया कारणतया चावस्थाने गुणदोषव्यवस्थायां दृष्टान्तसद्भावात् तत्र वेदान्तवाक्यसमन्वयसामरस्यमसमञ्जसं न भवति। कथम्? यथा शरीरस्य मनुष्याद्यात्मनो बालत्वयुवंत्वस्थविरत्वादिभावेऽपि बालत्वादयः शरीर एव, सुखादयस्त्ववात्मन्येव, तद्वदत्रापि शरीरभूतचिदचिद्वस्तुगताज्ञानविकाराद्यनिष्टानि शरीरभूते चिदचिद्वस्तुन्येव तिष्ठन्ति निरवद्यत्वाविकारत्वसार्वज्ञ्यसत्यसङ्कल्पत्वादय आत्मभूते परमेश्वर एव। तदेवं दृष्टान्तभावाच्छ्रुत्यसामञ्जस्यं ब्रह्मणि नास्त्येव।।

।।सू।। **स्वपक्षदोषाच्च**।।१०।।

केवलं तर्कावलम्बने स्वपक्ष एव प्रधानकारणवादिनः निर्विकारपुरुषसन्निधिवशात् प्रकृतिप्रवृत्तौ सत्यामन्योन्यधर्माध्यासा दुरुपपादा भवन्ति। अन्यत्रान्यधर्मानुसन्धानरूपोऽध्यासो निर्विकारस्य पुरुषस्य न सम्भवति। अचेतनायाः प्रकृतेश्चानुसन्धानरूपोऽध्यासो न सम्भवत्येव। अतः प्रधानकारणवाद एव तर्कबाध्यः।।

।।सू।। **तर्काप्रतिष्ठानात्**।।११।।

तर्कस्याप्रतिष्ठितत्वात् प्रधानकारणवादस्य तन्मूलत्वात् तत्र प्रतितर्कसम्भवात् तस्यैव त्याज्यत्वं न ब्रह्मकारणवादस्येति।।

।।सू०।। **अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः**।।१२।।

अन्यथा यथा प्रतितर्कपराहतिः न भवति तथा प्रकारान्तरेण प्रधानमनुमेयमिति वादोऽपि युक्तो न भवति। तत्राप्येवं प्रतितर्ककलहसम्भावनया प्रतिष्ठितत्वाभावदोषादनिर्मोक्ष एव प्रसज्यते। ततः शुष्कतर्कमूलः प्रधानकारणवाद एव त्याज्यः न तु प्रबलश्रुतिप्रमाणसिद्धो ब्रह्मकारणवाद इति युक्तम्।।

इत्यपीतौ तद्वत्प्रसंगाधिकरणम्।।४।।

इति श्रीकण्ठभाष्य नविलक्षणत्वाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

योगाधिकरणस्**यातिदेशत्वा**त्तदपहाय सांख्यस्मृत्यधिकरणेन संगतिं दशयन्नुत्तराधिकरण-मवतारयति– **पुनरपीति।** यद्यपि सांख्यस्मृतिः कर्तृगौरवाद्वेदान्तानामन्यथानयनं नापादयेत् तथापि तदुपन्यस्तब्रह्मकारणत्वासभवापपादकयुक्तिभिस्तदापादयेदेव। 'युक्तियुक्तं वचो ग्राह्यं न तु पौरुषगौरव' मिति पुरुषगौरवमनाद्रियमाणानामपि युक्तिगौरवस्यादरणीयत्वादिति शंकानिराकरणार्थमुत्तराधिकरणारंभ इत्यर्थः।।सू०।। **न विलक्षणत्वादस्य तथात्वं च शब्दात्**।।४।। यत्तु सांख्यस्मृतेः श्रुतिविलक्षणत्वेन श्रुतिमूलत्वासंभवान्मूलांतराभावाच्च तदुक्तप्रधानकारणत्वमयुक्तमिति। तन्न। सांख्यस्मृतेः श्रुतिवैलक्षण्यान्न तन्मूलत्वमिति त्वदुक्तरीत्यैव प्रपंचस्य ब्रह्मवैलक्षण्यात्तदुपादानस्याप्युपपत्तेः स्मृतेः प्रत्यक्षानुमेयश्रुतिमूलत्वाभावेऽपि तदुक्तस्य सालक्षण्यहेतुकानुमानस्य व्याप्तिपक्षधर्मतारूपदृढमूलवत्त्वेन प्रपंचसालक्षण्यवतः प्रधानस्यैव तत्कारणत्वौचित्यात् अत एव स्मृतेरनुमानमूलत्वेन मूलांतराभावासिद्धेश्च इत्येवं 'न विलक्षणत्वादस्ये' ति सूत्रांशस्यार्थमभिप्रेतय पूर्वपक्षमाह – **सर्वथेति।** 'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृत' मिति स्मृतेस्सकलप्रमाणसार्वभौमस्यागमस्य कथमप्रमाणेन तर्केण बाधनमुपपद्यत इत्याशंकानिराकरणार्थं सर्वथेति विशेषणम्। तर्केण बाधनं नाप्रामाण्यापादनं विवक्षितं किं तु तदनुसारेण ग्राह्यार्थत्वम्। तत्त्ववश्यमेवाभ्युपगंतव्यम्। 'यत्तलं दृश्यते व्योम्निखद्योते हव्यवाडिव। न तलं विद्यते व्योम्नि न खद्योते हुताशनः। तस्मात्प्रत्यक्षदृष्टेऽपि युक्तमर्थं परीक्षितुम्। परीक्ष्य ज्ञापयन्नर्थान्न धर्मात्परिहीयते' इति तर्कस्य सर्वप्रमाणानुग्राहकत्वस्मरणात् 'आर्षं धर्मोपदेशं च वेदशास्त्रानुरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः'। इति विशिष्यागमानुग्राहकत्वस्मरणात् 'धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्तव्यताभागमनुमा पूरयिष्यती' ति वार्तिकोक्तेश्च। अत एव 'त्रेधा तण्डुलान्विभजे' दित्यादिवाक्यानां स्वरसप्रतीतार्थपरत्वे मध्यमादिवाक्यसिद्धार्थानुवादित्वं स्यात् इत्यादितर्कानुसारेणास्वारसिकोऽपि देवतापनयादिरर्थोऽभ्युपगम्यते अतोऽत्रापि तर्कानुसारेण ब्रह्मकारणवादानामन्यथानयनं युक्तम्। अपि चात्र न केवलं ब्रह्मकारणतायामनिष्टापादनमेव तर्कशब्देन विवक्षितं किं तु ब्रह्मकारणत्वप्रतिक्षेपकं प्रधानकारणत्वव्यवस्थापकं च यदनुमानं तदपि विवक्षितम्।

तदपि दृढव्याप्तिपक्षधर्मतामूलम्। अत्यन्तनिरवकाशत्वात्। न हि वेदांतानामिव यथाकथंचित् स्तावकत्वादिना तस्यावकाशः कल्पयितुं शक्यते। न च, स्वतः प्रबलेनागमेन विरोधादनुमानमप्रमाणं कल्पनीयं, तन्मूलव्याप्त्यादिग्राहकप्रमाणानामपि तद्विरोधेनैवाभासीकरणसंभवात् इति वाच्यम्। 'श्रोतव्यो मंतव्य' इतिवेदान्तावगतार्थप्रतिष्ठाहेतुत्वेन श्रुत्यैवानुमोदितस्य मननापरपर्यायानुमानस्य प्रतिक्षेपासंभवने कार्यरूपेषु वेदार्थेषु अनुमानादागमस्य प्राबल्येऽपि सिद्धार्थरूपे ब्रह्मणि तस्य ततः प्राबल्याभावात् समबलत्वे च सति सावकाशनिरवकाशन्यायावकाशादिति भावः। एवं च 'सर्वथा तर्कबाध्योऽय' मित्यस्य ब्रह्मकारणतायामिष्टापादनरूपेण ब्रह्मकारणत्वप्रतिक्षेपकानुमानरूपेण प्रधानकारणत्वव्यवस्थापकानुमानरूपेण वेत्यवं सर्वप्रकारेणाऽपि तर्केण बाध्योऽयं समन्वय इत्यर्थः। ननु, कथमत्र वैलक्षण्यावलंबनमनुमानमनिष्टापादनं वा प्रवर्तते। जगद्ब्रह्मप्रकृतिकं न भवति। तद्विलक्षणत्वात्। यदि जगत् ब्रह्मप्रकृतिकं स्यात् तद्विलक्षणं न स्यादित्येवमिति चेन्न। यद्ब्रह्मप्रकृतिकं तद्ब्रह्मविलक्षणमिति विशिष्य व्याप्तिग्रहे दृष्टान्ताभावात् यद्यत्प्रकृतिकं तन्न तद्विलक्षणमिति सामान्यव्याप्तेर्यत्तद्भ्यामननुगमात् मृत्पिंडप्रकृतिकस्य घटादेर्घटत्वादिना मृत्पिंडविलक्षणत्वेन व्यभिचाराच्च। यद्ब्रह्मविलक्षणं न तत्ब्रह्मप्रकृतिकमिति व्याप्तिग्रहे नित्यवस्तुदृष्टांतसंभवेऽपि मृत्पिंडविलक्षणस्य घटादेर्मृत्पिंडप्रकृतिकत्ववत् ब्रह्मविलक्षणस्य गगनादेर्ब्रह्मप्रकृतिकत्वसंभवेनाप्रयोजकत्वात् तर्कानुमानयोरप्रयोजकसहचारमात्रावलंबनत्वे ब्रह्मनिष्ठान्योन्याभावप्रतियोगधर्माश्रयत्वरूपब्रह्मवैलक्षण्यापेक्षया लघोर्धर्माश्रयत्वादेरेव हेतूकरणसंभवे सूत्रे वैलक्षण्यादिति गुरुधर्महेतूकरणवैयर्थ्यप्रसंगात् आश्रयत्वादिहेतोर्ब्रह्मोपादानकेषु तद्गुणेषु व्यभिचारः स्यादिति चेन्न। तस्य व्यभिचारस्य सर्वेष्वेतेषु पक्षेषु तुल्यत्वात्। तस्माद्वैलक्षण्यावलंबनस्तर्कोऽत्र न प्रर्वतत इत्यभिप्रेत्याशंकते – **कथमिति**। उत्तरमाह – **ब्रह्मण इति**। अयमाशयः। गगनादिकं ब्रह्मप्रकृतिकद्रव्य न भवति। तद्विशेषगुणचैतन्यानुगतिशून्यत्वादित्यनुमानम्। यदि तत् ब्रह्मप्रकृतिकद्रव्यं तदा तद्विशेषगुणनुगतिमत् स्यादिति अनिष्टापादनं च। सामान्यव्याप्तौ मृत्प्रकृतिकत्वादिरहितो जलादिर्मृत्प्रकृतिको घटादिश्चात्र दृष्टान्तः। यत्तद्भ्यां सामान्यव्याप्तिः यो यस्य ग्रन्थस्य प्रणेता स तस्मादधिकविषयज्ञानवानित्येवमादिरूपा सिद्धांतिनोऽप्यभिमता न प्रत्याख्यातुं शक्या। प्रकृतिविकारगततद्विशेषगुणत्वावच्छेदेन निर्णीतस्य हेतुहेतुमद्भावस्य भंगप्रसंगोऽनुकूलस्तर्क इति। ननु तर्हि प्रपंचेऽपि चैतन्यमभ्युपगम्यते घटः प्रकाशते स्फुरति भातीत्यनुभवसत्त्वात्। न च वाच्यं प्रकाशत इत्याद्यनुभवः चैतन्यविषयत्वार्थकः न तु तदाश्रयत्वार्थकः अन्यथा ममेदानीं घटो न प्रकाशत इत्याद्यनुभवाभावप्रसंगादिति। नीलति श्वेतते लोहितायते इत्याद्यनुभवानां नैल्याद्याश्रयत्वविषयत्ववत् प्रकाशत इत्याद्यनुभवानामपि चैतन्याद्याश्रयत्वविषयतौचित्यात् घटादौ चैतन्यस्य परत्वापरत्ववदवधिविशेषापेक्षगुणत्वेन मम प्रकाशते मम न प्रकाशत इति

व्यवहारोपपत्तेश्च। यदि घटादिषु चैतन्यसद्भावप्रयुक्तव्यवहारादर्शनात् घटः प्रकाशते न प्रकाशत इत्यादिव्यवहारयोस्तत्तत्पुरुषगतघटादिज्ञानसामग्रीसत्त्वासत्त्वकालप्रभवत्वाच्च तत्तद्ज्ञानविषयत्वमेवार्थः यथा मह्यं रोचते मोदक इत्यनुभवस्य 'स्वतदिच्छाविषयत्वमर्थ इतीष्यते तथाऽपि घटादिषु वृक्षादिष्विवानुद्भूतं चैतन्यमस्तु, श्रुतब्रह्मप्रकृतिकत्वान्यथानुपपत्त्या तत्कल्पनसंभवात्। न च प्रपंचस्य चैतन्यवत्त्वे सिद्ध एव श्रुत्या ब्रह्मप्रकृतिकत्वमवधारणीयमित्यन्योन्याश्रय इति वाच्यम्। योग्यतासंशयेऽपि शाब्दज्ञानसंभवात्। अन्यथा ज्योतिष्टोमस्य स्वर्गसाधनत्वमपूर्वे कल्पित एवावगंतव्यमित तत्राप्यन्योन्याश्रयप्रसंगात् काष्ठज्वालात् भांडतद्गतवारिस्थतेजसो दीपात्तुषाग्नेश्च उत्पत्तिदर्शनात् तत्रानु**द्भूतरूपावय**वानतरकल्पनायां गौरवात्। न च पुरुषेष्विव घटादिष्वपि चैतन्यसत्त्वे चेनव्यवहारानुपपत्तिः। **चैत**न्योपलंभानुपलंभाभ्यां तदुपपत्तेः। घटतृणादेः कर्तुपलंभानुपलंभाभ्यां कृताकृतव्यवहारदर्शनात्। तस्मादसिद्धं प्रपंचस्य ब्रह्मवैलक्षण्यमित्याशंकोत्तरत्वेन 'तथात्वं च शब्दा' दिति सूत्रशेषमवतारयति – **कुत इति।** यं वैदिकशब्दमनुसृत्य प्रपंचस्य ब्रह्मप्रकृतिकत्वं वेदश्रद्धाजडेन त्वयेष्यते तस्मादेव वैदिकशब्दात् 'विज्ञानं चाविज्ञानं च' 'क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः' इत्येवमादिरूपात्प्रपंचस्य विकारास्पदत्वादिकमिवाचेतनत्वमप्यवगम्यत इत्येवं सोत्रं चशब्दमेवकारार्थमङ्गीकृत्य शब्दादेवेत्युक्तम्। 'क्षरं त्वविद्ये'ति विशिष्य जडवर्गस्य विकारित्वोक्तया चेतनवर्गस्य निर्विकारत्वात् जीववत् ब्रह्मणोऽपि प्रपंचप्रकृतिकत्वमनुपपन्नमिति दर्शयितुं वा विकारास्पदत्वविशेषणम्। अत'स्सत्यज्ञाने'ति सत्यशब्दोऽत्र निर्विकारपरः। सत्ताश्रयत्वादेर्घटादिसाधारण्यात्। ननु 'पृथिव्यब्रवीत्' इत्यादिश्रुतिशु पृथिव्यादीनां चैतन्यकार्यव्यवहारादिश्रवणादस्त्येव पिशाचादीनामिव तेषामस्मदाद्यनवगतं चैतन्यम् अतस्तदनुसारेण 'विज्ञानं चाविज्ञानं चे' त्यादिश्रुतिः कृताकृतव्यवहारवन्नेतव्येत्याशंक्य श्रुतयः पृथिव्याद्यभिमानिदेवताविषया इत्युपपादनार्थं सूत्रम् –

।।सू।। **अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्**।।५।।

देवताशब्दविशेषादिति। देवताशब्देन चेतनवाचिना पृथिव्यादीनां विशेषितत्वादित्यर्थः। **अनुगतेरिति।** अनुप्रवेशप्रतिपादनादित्यर्थः।।सू।। **दृश्यते तु**।।६।। तुशब्देन पूर्वपक्षो व्यावर्त्यते। न तु पूर्वसूत्र इव सिद्धांतिशंका। अतस्सिद्धांतसूत्रमिदमित्याह–**सिद्धांत इति।** –दृश्यते' इति क्रियापदम्। ब्रह्मप्रपंचयोर्वैलक्षण्येऽपि उपादानोपादेयभावसंभवे हेतुसमर्पकत्वेन योजयति–**विलक्षणयोरिति।** अनेन गोमयपुरुषगुणानुगतिरहितानां वृश्चिककेशनखादीनां गोमयपुरुषप्रकृतिकत्वं दृष्टमिति तर्कानुमानयोर्व्यभिचार उद्धाटितः। ननु, गोमयाद्वृश्चिकशरीरस्यैवोत्पत्तिर्न चेतनस्य। शरीरादेव केशनखादीनामुत्पत्तिर्न तु चेतनात्। तथात्वेऽपि गोमयपुरुषयोः वृश्चिककेशनखादिषु निमित्ततैव

नोपादानत्वमिति चेदुच्यते। गोमयात् वृश्चिकशरीरोत्पत्तौ वृश्चिकस्य ज्ञानविकासरूपावस्थान्तरापत्त्या तस्याऽपि गोमयादुत्पत्तिस्तावदस्ति। पूर्वावस्थाप्रहाणेनावस्थान्तरापत्तिरेव हि द्रव्यस्योत्पत्तिः। तत्र च गोमयस्योपादानत्वं पृथक्सिद्धकार्यावस्थाश्रयत्वरूपतल्लक्षणानुसारेण सिध्यति। गोमयाकारपरिणतगवाद्युपयुक्ततृणाद्यनुशयिजीवविशेषस्यैव वृश्चिकरूपेण प्रादुर्भावात्। तथा पुरुषस्याऽपि केशनखादिषु कारणत्वमस्ति। मृतशरीरात्तदनुत्पत्तेः। ततश्च तस्य तदुपादानत्वमपि लक्षणमुखेनायाति। केशनखादिमतश्शरीरस्य शरीर्यपृथग्भावात्। उदाहरणद्वयेऽपि अचेतनांशयोरेव प्रकृतिविकारभावांगीकारेऽपि व्यभिचारो भवत्येव। वृश्चिकशरीरे केशादिषु च गोमयशरीरगतगन्धरूपाद्यनुवृत्त्यभावात्। न च प्रपंचस्य ब्रह्मवैलक्षण्यं तद्विशेषगुणानुगतिराहित्यं न विवक्षितं किं तु तद्गतद्रव्यत्वसाक्षाद्व्याप्यजात्यनुगतिराहित्यमिति वाच्यम्। प्रकृतिविकारयोर्गुणभेदवदवान्तरजातिभेदस्याऽपि संभवेन उक्तरूपस्य वैलक्षण्यस्य हेतोरप्रयोजकत्वात्, अरणिमणिवेण्वादिभ्यः पार्थिवेभ्यो वह्नेः समुद्रजलात् पार्थिवस्य मुक्ताफलस्य चोत्पत्त्या तथा विवक्षायामपि व्यभिचारतादवस्थ्याच्च। न च तयोरुत्पत्तौ पार्थिवतैजसावान्तरसन्निधानं कल्पनीयम्। गौरवात्। समुद्रजलाद्यवयवानामेव शुक्तिगर्भानुप्रवेशनिर्मथनादिसहकारिबलात् पूर्वावस्थाप्रहाणेनावस्थान्तरापत्तिसंभवात्। न च सजातीययोरेवोपादानोपादेयभावस्य क्लृप्तत्वात् तत्कल्पनम्। उपादानोपादेयभा[illegible] साजात्यानुप्रवेशस्य वह्निमुक्ताफलादिषु सजातीयावयवांतरकल्पनासापेक्षत्वेनान्योन्याश्रयापत्तेः। तस्मादनुमानस्य व्यभिचारात् तर्कस्य मूलशैथिल्याच्च न श्रुतिबाधकतेत्युपसंहरति – **अत इति। शुष्कतर्क इति।** शुष्कविशेषणस्यायमाशयः। यत्तद्द्वयामनुगता सामान्यव्याप्तिरिह तर्कानुमानयोः स्वतंत्रत्वाभिमतयोरंगम्। यत्त श्रुत्यवगतसार्वज्ञयादिदृढीकरणार्थमीश्वरो वैदिकद्रष्टेत्याद्यनुमानं तत्तु बुद्धिसंवादेन श्रुत्यवगतसार्वज्ञ्यदृढीकरणार्थं न स्वयमेव कस्यचिदर्थस्य साधनार्थमिति बुद्धिसंवादाय तत्राननुगतापि सामान्यव्याप्तिराद्रियते। तदभावेऽपि हि 'यथा सोम्यैकेन मृत्पिंडेने' त्यादौ दृष्टांतोपन्यासमात्रेण बुद्धिसंवादो जायत इति। एवं ब्रह्मकारणताप्रतिक्षेपके वैलक्षण्यावलंबने तर्कानुमाने दूषिते प्रधानकारणतोपपादकं सालक्षण्यावलंबनमनुमानं तु द्वितीयपादे निराकरिष्यते। यद्यपि सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणं तदेव स्थूलचिदचिद्विशिष्टं कार्यमिति सिद्धांते कारणकोटावप्यस्त्यचेतनांशनुप्रवेशः कार्यकोटावपि चेतनांशानुप्रवेशः। तथाऽपि कारणकोटौ विशेष्यभूतस्य ब्रह्मणः कार्यकोटौ विशेषणेष्वचेतनेष्वप्युपादानत्वमुपपादनीयम्। अन्यथा तस्य सर्वोपादानत्वासिद्धेः। तेषु च वैलक्षण्यादुपादानत्वं न संभवतीत्येवमाक्षेपसमाधानार्थमिदमधिकरणम्। **पुनश्शंकित्वेति।** वैलक्षण्येऽप्युपादानोपादेयभावमुपपादयता तयोर्द्वयाकारत्वमभ्युपगतं स्यात्। विलक्षणयोरैक्यायोगात्। तथा च कारणात्मना सत एव कार्यस्य स्थूलरूपापत्तिरुत्पत्तिरिति सत्कार्यवादं

परित्यज्य कारणात्मना प्रागसदेव कार्यमुत्पद्यत इत्यसत्कार्यवादोऽभ्युपगतः स्यात्। 'असद्वे' त्यादिश्रुतेरपि यथाश्रुतार्थ एवांगीकृतः स्यात् इत्याशंक्य परिहियत इत्यर्थः।।सू।। **असदिति चेन्न प्रतिषेधमात्रत्वात्**।।७।। **कारणे कार्यमिति।** कारणात्मना कार्यमसदेवेत्यर्थः। नेत्यादिपरिहारांशंव्याचष्टे – **नैवं वाच्यमिति।** 'दृश्यते'त्वि ति सूत्रमुपादानोपादेययोस्सा-लक्षण्यनियमप्रतिषेधमात्रपरं न त्वेकद्रव्यत्वप्रतिषेधपरमपि। वैलक्षण्येऽप्यारंभणाधिकरणे वक्ष्यमाणन्यायेन द्रव्यैक्योपपत्तेरिति भावः। अत एवारंभणाधिकरणप्रतिपादितन्यायानुवादमात्रपरमिदं सूत्रम्। श्रुतेरित्यनेन 'दृश्यते त्वि'ति सूत्रश्रवणं विवक्षितम्। अधिकरणार्थमुपसंहरति – **अत इति।**

इति नविलक्षणत्वाधिकरणम्।।३।।

अथ अपीतौ तद्वत्प्रसंगाधिकरणम्।।४।।

सू।। **अपीतौ तद्वत्प्रसंगादसमञ्जसम्**।।८।। पूर्वसूत्रप्रसक्तकार्यकारणयोर्वस्त्वैक्यश्रुतिसमन्वय-सिद्धं ब्रह्मणो निर्दोषकल्याणगुणाकरत्वमाक्षिप्य समाधीयत इति संगतिमभिप्रेत्य संशयं दर्शयति – **सत्कार्यवादेनेति।** वस्त्वैक्यस्य ब्रह्मणि प्रपञ्चदोषापादकत्वानापादकत्वाभ्यां संशय इति भावः। तस्य तदापादकत्वमुपपादयति – **तथा सतीति।** ब्रह्मप्रपंचयोरैक्ये चेतनाचेतनगतास्सर्वेऽप्रि दोषाः प्रपञ्च इव ब्रह्मण्यपि प्रसज्येरन्। ततश्च निर्दोषकल्याणगुणाकरे समाभ्यधिकरहिते ब्रह्मणि वेदांतानां समन्वय इति यव्द्यवस्थापितं तदसमञ्जसं भवेदित्यर्थः। ननु प्रपञ्चस्थितिकाले तद्दोषैर्दुष्टत्वेऽपि तस्यं प्रलये सति निर्दोषकल्याणगुणयुक्तं ब्रह्मावतिष्ठत इति तद्विषयत्वं वेदांतवाक्यानामुपपद्यते। 'चैत्रस्सुखीजीवती' त्यादिवाक्यानामिव व्याध्यादिराहित्यकालविषयत्वमित्याशंकानिरा-करणार्थमपीताविति प्रलयस्य सूत्रे विशिष्य ग्रहणम्। प्रलयेऽपि भाविकल्पभोग्यफलहेतूनां पाप्मनां सूक्ष्मरूपापन्नेषु जीवेषु सत्त्वावश्यंभावात् तैर्दुष्टत्वं स्थितिकाल इव प्रलयकालेऽपि ब्रह्मणः प्रसज्यत इत्यपहतपाप्मत्वादिश्रुतीनामसामञ्जस्यमनुद्धार्यमिति। ननु ब्रह्मप्रपंचयोर्वस्त्वेकत्वं नाभेदः किं तु घटपटयोरिव स्वातन्त्र्याभावेनापृथक्सत्त्वरूपमनन्यत्वमित्यारंभणाधिकरणे समर्थयिष्यते। तदभिप्रायेणैव पूर्वसूत्रे सालक्षण्यप्रतिषेधमात्रं न तत्कृतं कारणैक्यमित्युक्तम्। न त्वभेदाभिप्रायेण। तस्मान्न ब्रह्मणि दोषप्रसंग इत्याह – **अत इति।** एवमान्तर्गणिकभेदांगीकारेऽपि मसूरिकादिमहारोग-परवशबहुजनसमाक्रांतस्य रोगित्वमिव दुष्टप्रपंचावृतस्य दुष्टत्वमवर्जनीयम्। दुष्टसंसर्गमात्रमपि हि दोषाय कल्पते किमु वक्तव्यं तदपृथग्भावो दोषाय कल्पत इति। अथ स्यादपृथग्भावेऽपि शरीरगतधर्मा बालत्वयुवत्वादयश्शरीरिणं न स्पृशंतीति दृष्टं, शरीरं चेदं ब्रह्मणश्चेतनाचेतनात्मकं जगदिष्यते। अन्तर्यामिब्राह्मणे तथा प्रतिपादनात्। अतस्तद्दोषैः ब्रह्मणो न दुष्टत्वं भविष्यतीति। नैतदऽपि युक्तम्। हस्तपादादिसंस्थानविशेषशून्यस्य प्राणधार्यत्वरहितस्य इंद्रियानाश्रयस्य ब्रह्म प्रति भोगायतनत्वरहितस्य जगतस्तच्छरीरत्वायोगेन तत्र तच्छरीरत्वश्रवणस्य तन्नियम्यत्वमात्रेणौपचारिकत्वात्। तस्मात्

प्रपञ्चब्रह्मणोरभेद इव सार्वदिकसंसर्गरूपापृथग्भावेऽपि प्रपंचदोषैः ब्रह्मणो दुष्टत्वमनिवार्यमिति भावः। सू। **न तु दृष्टांतभावात्**।।९।। तुशब्देन प्रपञ्चस्य ब्रह्मशरीरत्वासंभवशंकाव्यावृत्तिः। ततश्च दृष्टांतलाभादापादितमसामञ्जस्यं न भवतीत्येवं सूत्रार्थमभिप्रेत्य व्याचष्टे – **नेतीति**। प्रपञ्चस्य ब्रह्मशरीरत्वं 'सर्वत्र प्रसिद्धोपदेशा' (१.२.१.) दित्यधिकरणभाष्ये प्रतिपादितम्। तत्रैवास्माभिश्शरीरलक्षणप्रदर्शनपूर्वकं तस्य ब्रह्मशरीरत्वं प्रपंचेनोपपादितम्। तत्सर्वमेतदधिकरणन्यायसिद्धार्थानुवादरूपमित्यवधेयम्। सू।। **स्वपक्षदोषाच्च**।।१०।। चकारमेवकारार्थं कृत्वा सांख्यानां स्वपक्ष एव दोषा भवंति न त्वस्मत्पक्षे तदापादिता दोषा इति सूत्रार्थमभिप्रेत्य तत्पक्षे दोषं दर्शयति – **केवलमिति**। पुरुषसन्निधानात् प्रकृतिर्महदहंकारादिप्रपंचसृष्टौ प्रवर्तते। ततः प्रपञ्चपुरूषधर्माणामद्ध्यासरूपस्संसार इति हि सांख्यप्रक्रिया। तस्यामन्यत्रान्यधर्मानुसंधान-रूपोऽध्यासो न तावत्पुरुषस्य संभवति। तस्य निर्विकारत्वात्। नापि प्रकृतेः। तस्या अचेनत्वाभ्युपगमात्। अतः केवलतर्कावलंबने प्रधानकारणवाद एव तर्कबाध्यः स्यादिति द्वितीयपादे सांख्याधिकरणे वक्ष्यमाणो दोषस्संग्रहार्थमत्र दर्शितः।।सू।। **तर्काप्रतिष्ठानात्**।।११।। केवलतर्कावलंबनैः प्रधानकारणवादिभिरुन्नीताः स्वपक्षोपपादकास्तर्काः परमाणुकारणवादिभिस्तथा-भूतैर्दूष्यन्ते ते चान्यैरित्येवं शुष्कतर्काणामप्रतिष्ठितत्वात् तदवलंबनप्रधानकारणवादं परित्यज्य श्रुत्यनुसारिब्रह्मकारणवाद एव परिग्राह्य इत्येवं सूत्रार्थमभिप्रेत्य व्याचष्टे – **तर्कस्येति**।। सू।। **अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसंगः**।।१२।। यथेदानीं सांख्यैः प्रधानकारणत्वोपपादकतया उपन्यस्यमानानां तर्काणां नैयायिकादितर्कैः प्रतिहतिर्भवति तथा यस्मिन्प्रकारे प्रतिहतिर्न भवति तथाभूतेनान्यादृशेन प्रकारेण प्रधानमनुमास्यामह इत्येतदप्यभिमानमात्रम्। यतस्तादृशः पुरुषबुद्धिकल्पितः तर्क एव न संभवति। केन चित्कुशलेनोन्नीतस्य तर्कस्य कुशलतरान्योन्नीततर्केण प्रतिहतिसंभवात् पुरुषबुद्धिप्रभवकल्पनानाममर्यादत्वात्। अतस्तंर्कांतरोन्नयनप्रयासेऽप्यप्रतिष्ठितत्व-दोषादनिर्मोक्ष एव प्रसज्यत इत्येवं सूत्रार्थमभिप्तेत्य व्याचष्टे – **अन्यथेति**। अशुष्कतर्कावलंबनेन प्रधानकारणवादस्य व्यवस्थापनासंभवात् वेदांतसिद्धे ब्रह्मकारणवादे परोन्नीतकुतर्काप्रसराच्च स एव युक्त इत्यधिकरणार्थमुपसंहरति – **तत इति**।।

इत्यपीतौ तद्वत्प्रसंगाधिकरणम्।।४।।

इति शिवार्कमणिदीपिका नविलक्षणत्वाधिकरणम् समाप्तम्

शिष्टापरिग्रहाधिकरणम्।

शाङ्करभाष्यम्

***एतेन शिष्टापरिग्रहा अपि व्याख्याताः*॥१२॥**

वैदिकस्य दर्शनस्य प्रत्यासन्नत्वाद् गुरुतरतर्कबलोपेतत्वाद्वेदानुसारिभिश्च कैश्चिच्छिष्टैः केनचिदंशेन परिगृहीतत्वात्प्रधानकारणवादं तावद् व्यपाश्रित्य यस्तर्कनिमित्त आक्षेपो वेदान्तवाक्येषूद्भावितः, स परिहृतः। इदानीमण्वादिवादव्यपाश्रयेणापि कैश्चिन्मन्दमतिभिर्वेदान्तवाक्येषु पुनस्तर्कनिमित्त आक्षेप आशङ्क्यते, इत्यतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति। परिगृह्यन्त इति परिग्रहाः, न परिग्रहा अपरिग्रहाः, शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः। एतेन प्रकृतेन प्रधानकारणवादनिराकरणेन, शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदंशेनापरिगृहीता येऽण्वादिकारणवादाः तेऽपि प्रतिषिद्धतया व्याख्याताः निराकृता द्रष्टव्या। तुल्यत्वान्निराकरणकारणस्य नात्र पुनराशङ्कितव्यं किञ्चिदस्ति। तुल्यमत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वम्, तर्कस्याप्रतिष्ठितत्वम्, अन्यथाऽनुमानेऽप्यविमोक्षः, आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणम्॥१२॥ इति चतुर्थं शिष्टापरिग्रहाधिकरणम्॥

इति शाङ्करभाष्यम् शिष्टापरिग्रहाधिकरणम् समाप्तम्

वार्तिकम्

एतेन शिष्टापरिग्रहा अपि व्याख्याता:।।१२।। अथ किमिति प्रधानकारणाश्रिततर्कनिमित्ताक्षेपं ब्रह्मकारणतावादस्य निराकृत्य तन्निराकरणप्रकार: परमाणु-विज्ञान-शून्य-स्वभावकारणाश्रित तर्कनिमित्ताक्षेपेऽतिदिश्यते, न वैपरीत्येनैतन्निमित्तमाक्षेपं परिहृत्यैतन्निराकरणप्रकारस्तत्रातिदिश्यत इत्याशङ्कायामाह—*वैदिकस्येति*।। एतेन सूत्रोपात्तशिष्टापरिग्रहा इति विशेषणपदस्य तात्पर्यं वर्णितं भवतीति द्रष्टव्यम्। अत एव सूत्रे विशेष्यपदाभावाद् न न्यूनतादोषोऽपि; असाधारणेन विशेषणेन तदाक्षेपात्। ननु—शिष्टैरगम्यागमनादिकमपि न परिगृहीतम्, तत्कथमसाधारणं विशेषणमिति—चेत्, न; जगत्कारणाधिकारात् तदप्रसक्ते:। न च ब्रूमोऽगम्यागमनाद्यपेक्षयाऽस्यासाधारण्यम्; तस्याप्रकृतत्वात्। किं तर्हि? प्रधानकारणवादापेक्षया; जगत्कारणाधिकारात्। ब्रह्मकारणतावादविरोधितद्वादानां निराकर्तव्यतयोपस्थितौ केषामत्रातिदेशेन निराकरणं क्रियत इत्यपेक्षायां "शिष्टापरिगृहीतानाम्" इत्युक्ते: परमाण्वादिकारणवादा एव योग्यतयोपस्थिता भवन्तीत्यनवद्यम्। अविशिष्टं भाष्ये।।

अतिदेशाधिकरणमिदम्, अभ्यधिका शङ्का वाच्या? उच्यते—तत्र परमाणुकारणतावादस्तावदेवं समुत्तिष्ठति। लोके हि बहुभिरल्पपरिमाणै: कार्यत: समानगुणजातीयै: कारणद्रव्यैरेकं कार्यद्रव्यं कारणापेक्षयाऽधिकपरिमाणं समानगुणजातीयकञ्चारभ्यत इति नियमेन दृष्टम्। तद्यथा—तादृशैस्तन्त्वादिभिस्तादृशं पटादि, अंश्वादिभिश्च तन्त्वादि, इति यावच्चतुरणुक-पर्यन्तमुक्तविधैश्च त्र्यणुकपर्यन्तैरारभ्यमाणं द्रष्टं न कुत्रापि चतुरणुकपर्यन्ते जगति दर्शनं विहन्यते; सार्वजनीनाबाधितप्रत्ययत्वात्। नात्र दृष्टविपरीता ब्रह्मकारणताऽदृष्टगोचरोत्प्रेक्षितुमपि शक्यते, किं पुन: प्रमापयितुम्—इति। यत्रापि त्र्यणुके तादृशं कारणं न दृष्टम्, तत्रापि दृष्टप्रतिबन्धवशेन ततो न्यूनपरिमाणमेव समानगुणजातीयमनुमातव्यम्, न ब्रह्म दृष्टविपरीतम्। ननु—चतुरणुके कारणतया दृष्टनां त्र्यणुकानामकारणकत्वमेवास्तु, किं तत्कारणानुमानेन? इति—चेत्, न; तेषां कार्यमहत्त्वोधारत्वेन पटादिवत्कार्यत्वानुमानात् कारणानुमानोपपत्ते:। न च तन्महत्त्वस्य

जन्यत्वमसिद्धम्; अपरमत्वेन तज्जन्यत्वसिद्धेः। अस्तु तर्हि त्र्यणुकारम्भकाणां निरवयवत्वम्, न; तेषामपि महदारम्भकत्वेन सावयवत्वात्, तदवयवानाञ्च सावयवत्वकल्पने प्रमाणाभावात्। रूपादिमत्त्वेन तत्कल्पने चानवस्थानाद् मेरुसर्षपयोः समानपरिमाणत्वप्रसङ्गः। तस्मात् त्र्यणुकावयवानामवयवाः, निरवयवाः परमाणव एव, इति त एव मूलकारणं जगतः, इत्यस्ति प्रधानकारणतावाद्यपेक्षया परमाणुकारणतावादिनोऽभ्यधिका शङ्का ; ब्रह्मकारणतावादवत् प्रधानकारणतावादस्याप्युक्तविधया दृष्टविपरीतत्वात्, परमाणुकारणतावादे च तदभावात्–इति।।

विज्ञानवादस्तु–यदि चेतनं जगत्कारणमभ्युपगतम्, तर्हि क्षणिकविज्ञानरूपमेव जगदस्तु; विलक्षणत्वादिदोषपरिहारात्। न च दृष्टविरोधः ; क्षणिकविज्ञानव्यतिरेकेणार्थानुपलब्धेः, सहोपलम्भनियमात्। तदुक्तम्–"सहोपलम्भनियमादभेदो नीलतद्धियोः। भेदस्तु भ्रान्तिविज्ञाने दृश्येतेन्दाविवाद्वये।।" इति। वाह्यतयाऽर्थाध्यवसानं तु संवृतिसत्त्वनिबन्धनमेव। अत एव च ज्वालादाविवार्थप्रत्यभिज्ञानमपि तादृशमेव। तस्मात् पुङ्खानुपुङ्खवत् कार्यकारणभावेनानाद्यनेकक्षणिक-विज्ञानप्रवाहरूपमेव जगत्, न तदतिरिक्तं स्थायि कार्यं कारणं वाऽस्ति; प्रमाणाभावात्–इति।।

शून्यवादस्तु–यदि लौकिकः कार्यकारणभावव्यवहारोऽनिर्वचनीयोऽभ्युपगतो ब्रह्मवादिना, तर्हि प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वस्य तत्त्वात् कालत्रयान्वयिनोऽत्यन्ताभावस्यैवोपादानत्व-कल्पनमुचितम्, न सतः ; तस्य कार्यात् भेदाभेदाभ्यामुपादनत्वानुपपत्तेः। भेदे गोरप्यश्वोपादानत्वप्रसङ्गः, भिन्नत्वाविशेषात्, अभेदे तु कार्यकारणभावानुपपत्तेः, उपपत्तौ वा तस्याप्यत्यन्ताभावप्रतियोगित्वेन कार्यवद् अनिर्वचनीयत्वप्रसङ्गः ; भेदाभेदयोस्तु विरोधेनैकत्रासमावेशात्। अपि च पराभ्युपगतं ब्रह्म, कार्यं भवितुमर्हति, सत्त्वात्; घटादिवत्, इत्यनुमानात् तस्य मूलकारणत्वानुपपत्तेस्तदुपादानाचेतनत्वेऽभावस्यैव मूलकारणत्वसिद्धिः–इति।।

यद्वा–परानुमतं ब्रह्म, अत्यन्ताभावो भवितुमर्हति, सर्वकारणत्वात्, यद् नैवम्, तद् नैवम्; यथा घटादिः, इत्यनुमानात् तस्यात्यन्ताभावत्वसिद्धेः संज्ञान्तरकल्पनमेव ब्रह्मवादिनः नास्मदभ्युपगतपदार्थात् पदार्थान्तरत्वमावहति–इति। श्रुतिरप्येवमर्थमनुजानाति–'असदेवेदमग्र आसीदि''ति। तथा लोकदृष्टिरपि। लोके हि मृत्पिण्डादि, बीजादि वा घटाद्युपादानत्वेनाङ्कुराद्युपादानत्वेन वेष्यते। तच्चासदेव तत्तत्कार्यमारभत इति दृष्टम्। अतोऽपि शून्यमेव जगत्कारणम्–इति। निरधिष्टानो नाभावो दृष्टः, अतस्तदधिष्ठानतया सदात्मकं ब्रह्म सिद्धयतीति चेत्, न; निरधिष्ठानं सदपि न दृष्टम्, इति तदधिष्ठानतया सदन्तरमेव किमिति न सिद्धयेत्? दृष्टमाकाशादि निरधिष्ठानमिति चेत्, न; तस्यापि कार्यत्वेन त्वया साधिष्ठानत्वाभ्युपगमात्

तदसिद्धेः। यदि ब्रूयात्–अकार्यत्वात् सतो निरधिष्ठानत्वम्–इति, तुल्यमेतत् शून्येऽप्यस्तु; अन्यत्राभिनिवेशात्, तत्साधिष्ठानत्वदर्शनस्य सत्तासाधिष्ठानत्वदर्शनवद् भाक्तत्वात्–इति।।

स्वभाववादस्तु–न सतः कारणत्वमुपपद्यते; सर्वदा सर्वकार्यप्रसङ्गात्। सत्कारणकत्वेऽपि सहकारिक्रमाक्रमाभ्यां कार्यस्य तथात्वाद् नोक्तप्रसङ्ग इति चेत्, न; अद्वैतवादे सहकारिणामेव कारणव्यतिरेकेणाभावात्, द्वैतवादेऽपि सहकारिक्रमाक्रमयोरपि सत्त्वासत्त्वादिविकल्पासहत्वेन दुर्निरूप्यत्वात्। अत एव नासतः कारणत्वम्; उक्तदोषस्य तत्रापि सम्भवात्, सदसद्भ्यां विधान्तरस्यासम्भवादिना निरस्तत्वात्, अनिर्वचनीयत्वस्यानिर्वचनीयत्वादेव वादिभिरुपेक्षणीयत्वात्। तस्मात् कारणान्तरासम्भवात् स्वभावादेव कार्यमुत्पद्यते–इति।।

प्रकृतमुत्पतश्याम:–यथा वसन्ताद्यृतूनां स्वभावादगमनम्, तद्वत्। स्वभावादिति स्वत इत्यर्थः। यावदुक्तं भवति स्वत इति, तावत् स्वभावादिति। अपि च ब्रह्मवादिनाऽपि "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति कार्यकारणयोरनन्यत्वं वक्ष्यते। तथाच तेनापि स्वभाववाद एवार्थादभ्युपगतो भवति, परन्तु कारणकूटस्थतावादस्तस्याधिकः, सोऽपि कार्याभेदाभ्युपगमादेव निवर्तते। न च–कार्यस्य कारणाभिन्नत्वेऽपि कारणस्य कार्याभिन्नत्वानभ्युपगमाद् नोक्तदोष इति–वाच्यम्; कारणेन कार्याभेदाभ्युपगमे कार्येणापि कारणाभेदस्य बलादापतितत्वात् तद्भेदासिद्धेः–इति।।

अत्र समाधिरुच्यते–तत्र यत्तावत् परमाणुकारणवादिभिर्लोकदर्शनमभिहितम्–"लोके हि बहुभिरल्पपरिमाणैः कार्यतः समानजातीयैः कारणपुञ्जैरेकं कार्यपुञ्जं कारणापेक्षयाऽधिकपरिमाणं तेन समानगुणजातीयकं नियमेनारभ्यत इति दृष्टम्"–इत्यादिना, नायमेकान्तः ; विपरीतदर्शनस्यापि सत्त्वात्, एकस्मादपि कारणात् द्रव्याद् कार्यतः समानपरिमाणात् अधिकपरिमाणाद् वा समगुणजातीयकात् तद्विपरीताद् वा मृत्पिण्ड-हेम-दुग्ध-तालाम्र-वेत्रबीजादेरेकस्मात् एकस्य वा समानपरिमाणस्य न्यूनपरिमाणस्य समानगुणजातीयस्य तद्विपरीतस्य वा कार्यपुञ्जस्य घट-रुचक दध्यङ्कुरादेर्दर्शनात्। न ह्येकस्मात् मृत्पिण्डात् स्वकार्यापेक्षयाऽधिकपरिमाणात् कुलालचक्रनिहिताद् अनेके घटशरावादयो न्यूनपरिमाणा नोत्पद्यमाना दृष्टाः, तादृशाद्वा कारुहस्तनिहितात् हेमपिण्डाद् रुचक-कटक-कुण्डलादयः, तादृशात् दुग्धाद् वा दध्यादय, तालबीजाद्वा तदङ्कुरः, आम्रबीजाद् वा शुष्करूपात् आरक्तस्तदङ्कुरः, वेत्रबीजाद् वा विजातीयात् कदल्यङ्कुरः–इति। एतेन–कपालाभ्यां संयोगसचिवाभ्यां घटारम्भः–प्रत्याख्यातः ; अनुपलब्धिपराहतत्वाच्च। न हि संयोगसचिवाभ्यां कपालाभ्यां घट उत्पद्यमानो दृश्यते; प्रथितादेव मृत्पिण्डात् तदुत्पत्तेः सर्वत्र दर्शनात्।

न च तद्विरोधे कपालकारणताकल्पनोचिता। न च तत्कल्पने प्रमाणमप्यस्ति; घटनाशानन्तरं कदाचित् कपालदर्शनात् तत्कारणत्वं कल्प्यते, मृत्कारणकत्वे तु घटस्य नाशोत्तरं सैव दृश्येत, न कपालानि, इत्यस्ति तत्कारणत्वे प्रमाणमिति चेत्, न; घटनाशोत्तरं कदाचित् चूर्णशर्करादीनामपि दर्शनात् तत्कारणत्वकल्पनस्यापि घटं प्रति सम्बन्धित्वात्। यदा कपालनाशेन घटनाशः, कपालावयवनाशेन कपालनाशः, तदा तदुत्तरं चूर्णशर्करादिदर्शनमिति चेत्, मैवम्; यदा घटनाशोत्तरं चूर्णशर्करादिकार्यदर्शनम्, तदा तन्मध्ये कपालादिकार्यान्तरं घटारम्भक मासीदित्यस्मिन्नर्थे प्रमाणाभावात् तत्कल्पनाऽनुपपत्तेः। तस्मात् मृद एव परिणामो घटः। तथाच निमित्तवशात् कपाल खर्पर-चूर्ण-शर्कराद्यन्यतमविरोधिपरिणामानारम्भे तस्मादेव घटनाशः, न कपालादिनाशादिति युक्तमुत्पश्यामः ; अभावाहेतुत्वस्य दर्शितत्वात्। अत एव मुद्गरपातादिनिमित्तजन्मानन्तरं घटविरोधिकपालाद्यन्यतमानियतपरिणामान्तरदर्शनमुपपद्यते; अन्यथा मुद्गरपातादिना घटनाशस्यैव निमित्तत्वात् स एव दृश्येत, न परिणामान्तरकपालादीति; कपालादीनां घटाद्यारम्भकत्वे च तत्पूर्वमपि सत्त्वात् तद्दर्शनं मुद्गरपातादीनां नाशनिमित्तत्वपक्षेऽपि न विरुध्यत इति चेत्, न; कपालादीनां घटाद्यारम्भकत्वस्यानुपलब्धिपराहतत्वेन पूर्वमेव निरस्तत्वात्, घटादिनाशात् पूर्वं तेषां सत्वे प्रमाणाभावात्। अपि च यदि समवाय्यसमवायिकारणान्यतरनाशादेव द्रव्यनाशः, न विरोधिपरिणामान्तरादित्यभ्युपगमः, कथं तर्हि दध्यादिपरिणामान्तरेण दुग्धादेर्नाश उपपद्येत। न च-तत्रापि समवाय्यसमवाय्यन्यतरकारणनाशेनैव दुग्धनाशात् तदुत्तरकाले दधिकार्योदय इति-वाच्यम्; न तावत् समवायिकारणनाशाद् दुग्धनाशो वक्तुं शक्यते; पूर्वसंस्थानस्य दधिकालेऽपि प्रत्यभिज्ञायमानतयाऽक्षतत्वात्। न च सादृश्यात् प्रत्यभिज्ञाभ्रमः ; तदवयवानां क्रियाकारणानुपलब्धेर्विभागाभावेन पूर्वसंयोगाविनाशात् सादृश्यकल्पनाऽनुपपत्तेः, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वस्यैव सादृश्यत्वात्, अन्यथाऽन्योन्याश्रयापत्तेः-प्रत्यभिज्ञाभ्रान्तत्वेन सादृश्यकल्पनम्, सादृश्यकल्पनेन च भ्रान्तत्वम्-इति। अस्तु तर्हि समवायिकारणनाशाद् द्रव्यनाश इति चेत्, न; परमाणुपर्यन्तसंस्थानानाशे तन्नाशकसंस्थानस्यानुपलब्धेः कस्यापि तव मते तत्त्वासिद्धेः। असमवायिकारणनाश इति चेत्, पिठरपाकपक्षे ततो द्रव्यनाशानुपपत्तेः। पीलुपाकपक्षेऽपि ततः परमाणोर्नाशस्यानभ्युपगमाद् नित्यत्वविरोधात् द्व्यणुकादिक्रमेण तन्नाशानुपपत्तेः। एतेन-पाकात् परमाणोरनाशेऽपि द्व्यणुकादिक्रमेण ततो नाश इति-अपास्तम्; समवाय्यसमवाय्यन्यतरानाशे तन्मात्राद् द्व्यणुकनाशासिद्धेः। ननु-पाकेन द्व्यणुकसमवायिनोऽनाशेऽपि तदसमवायिकारणं तयोः संयोगो नाश्यते; अत उपपद्यते द्व्यणुकनाश इति-चेत्, न; पाकस्य विशेषगुणनाशेहेतुत्वेऽपि सामान्यगुणनाशाहेतुत्वात्, लोके तथाऽदर्शनात्, अप्रामाणिककल्पनायास्त्वतिप्रसङ्गेन स्वीकर्त्तुमशक्यत्वात्। ननु-पाकस्य तेजः संयोगरूपत्वात्

तेजसश्च क्रियावतः संयोगात् परमाणावभिघातः, ततः क्रिया, कियातो विभागः, विभागात् पूर्वसंयोगनाश इति क्रमेण पाकात् तन्नाश उपपद्यत इति—चेत्, सत्यं कल्पयेदेवं कदाचित् पीलुपाकपक्षे, पिठरपाकपक्षे तु नैवं कल्पयितुं शक्यते; तत्पक्षस्यैव तार्किकैरभ्युपगमात्। न च पीलुपाकपक्षेऽप्येतत् कल्पयितुं शक्यते; पूर्वसंस्थानानाशस्य सर्वानुभवसिद्धत्वादित्युक्तत्वात्। अभ्युपेत्य च पाकात् द्रव्यगुणनाशं दूषणमभिहितम्।।

वस्तुतस्तु—पाकात् गुणो वा द्रव्यं वा न नश्यति। किं तर्हि? पाकनिमित्तेन विरोधिगुणान्तरमात्रोत्पत्तौ ततस्तन्नाश इति। अपि चाम्रदिफलस्य पाकेन रस गन्धाद्यन्तरोत्पाददर्शनेऽपि न तत्र द्रव्यनाशो दृश्यते। न च—अदर्शनेऽपि तत एव तत्कल्पनमिति—वाच्यम्; 'तदेवेदं फलम्' इत्यबाधितप्रत्यभिज्ञाप्रत्यक्षविरोधेन गुणान्तरदर्शनस्य तदकल्पकत्वात्, पिठरपाकन्यायेन तस्मिन्नेव द्रव्ये तद्दर्शनस्योपपत्तेः। एतेन—सादृश्यात् प्रत्यभिज्ञानमिति—अपास्तम्; अबाधात्। बाधे हि सति प्रत्यभिज्ञानस्य सादृश्यं मूलं कल्प्यते। न च वस्तुनि तत्र सोऽस्ति; अदर्शनात्। सादृश्यात् तत्कल्पने चान्योन्याश्रयापत्तेः, सर्वत्र प्रत्यभिज्ञाबाधापत्तेश्च। तथाच वस्तुनः स्थायित्वासिद्धौ महायानिकशिष्यता तार्किकेणात्मनः संपादिता स्यात्।।

एतेन—जीवभेदस्य परिमाणभेदेन भेदः—प्रत्युक्तः। अपि च यद्यवस्थाभेदेन परिमाणभेदेन च देहः प्रतिक्षणं भिद्येत, तर्हि पितृभ्यां जनितात् देहाद् अस्य एव क्षणान्तरेऽवस्थान्तरे वा देवदत्तदेहः, इति न तस्य मातापितृसम्बन्धः स्यात्, परिणीताया भार्याया भर्तृसम्बन्धश्च। तथाच पिण्डदानादिक्रियालोपप्रसङ्गः ; व्यभिचारादिनिषिद्धक्रियाप्रसङ्गश्च। देहभेदेऽपि देवदत्तत्वादि-जातेरैक्यात् तया तद्व्यवहारोपपत्तेर्नोक्तप्रसङ्ग इति चेत्, न; जातेरमूर्तत्वाद् नित्यत्वाच्च पित्रादिसम्बन्धानुपपत्तेरुक्तप्रसङ्गस्यापरिहारात्। अपि च यदि देवदत्तत्वादिजातिमादायोक्त-सम्बन्धघटनं क्रियते, तर्ह्यविशेषाद् ब्राह्मणत्वादिजातिमादायापि तत्सङ्घटनसंभवात् तदवच्छेदेन स्त्रीपुरुषादिसम्बन्धे व्यभिचारदोषो न तव स्यात्। तस्माद् इहलोकपरलोकसम्बन्धिलौकिक-वैदिकसर्वव्यवहारसिद्धये निषेकादिश्मशानान्तमेकं स्थूलशरीरमभ्युपगन्तव्यं सर्वैरास्तिकैः। तथाच व्यक्तेरभेदाद् न देवदत्तत्वादिजातिः प्रतिशरीरवर्तिनी संभविनी; अन्यथाऽन्योन्याश्रयापत्तेः—देवदत्तत्वादिजातिसिद्धौ शरीरभेदसिद्धिः, तत्सिद्धो च जातिसिद्धिरिति।।

एतेन—अनुगतप्रतीतेस्तत्सिद्धिरिति—अपास्तम्; प्रत्यभिज्ञाविरोधेनानुगतप्रतीतेरेवासंभवात्, संभवे वा तस्या व्यक्तिविषयत्वेन जातेरसाधकत्वात्। प्रमाणसिद्धभेदेषु याऽनुगतप्रतीतिः, सा तेषु जातिं साधयति। सा च न प्रत्यभिज्ञा। प्रमाणसिद्धाभेदे वस्तुनि जायमाना न प्रत्यभिज्ञातो व्यतिरिच्यते।

एतेन–देवदत्तादेः कार्यत्वात् तत्कार्यतावच्छेदकस्यान्यस्य लघुनोऽसंभवात् देवदत्तत्वादिजातिरेव तदवच्छेदकतया कल्प्यत इति–अपास्तम्। एवं सति प्रतिघटं कार्यतावच्छेदकतया जात्यभ्युपगमप्रसङ्गः॥

अथ–तत्र घटत्व-दण्डत्वाभ्यां सामान्यतः कार्यकारणभावग्रहस्य विशेषे पर्यवसानाद् धूमत्व वह्नित्वाभ्यां सामान्यतो व्याप्तिग्रहस्येव पर्वतमहानसीयधूमे तद्विशेषे तद्ग्रहार्थं न धर्मान्तरमपेक्ष्यत इति–चेत्, एवं तर्हि प्रकृतेऽपि दीयतां दृष्टिः–पितृत्व पुत्रत्वाभ्यां सामान्यतः कार्य कारणभावग्रहस्य विशेषे पर्यवसानाद् न तद्विशेषेऽपि तद्ग्रहार्थं धर्मान्तरापेक्षा। पुत्रत्वं तु पंनामनरकत्रातृत्वम्, पितृत्वं स्वरेतः सिक्त्वम्। तथाच नावच्छेद्यावच्छेदकयोरभेदः। तस्माद् गुणक्रियाऽवस्थाविशेषभेदेऽपि न द्रव्यं भिद्यत इति युक्तम्। एवं च सति दुग्धद्रव्यमेव गुणविशेषभेदादवस्थाविशेषमापन्नं पूर्वसंज्ञां हित्वा दध्यादिसंज्ञां लभते–बाल इव देवदत्तोऽवस्थान्तरमापन्नो बालसंज्ञां हित्वा युवसंज्ञाम्, तां च हित्वा वृद्धसंज्ञाम्, फलमिवापक्वसंज्ञां हित्वा पक्वसंज्ञाम्, सुवर्णमिव रुचकसंज्ञां हित्वा स्वस्तिकसंज्ञाम्, मृदिव पिण्डसंज्ञां हित्वा घटसंज्ञाम्; न द्रव्यान्तरं दुग्धात् दध्यादि। तथाच–"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इत्यामिक्षाधिकरणमप्युपपन्नं भवति; द्रव्यभेदे हि सत्यामिक्षापदसामानाधिकरण्येन सर्वनाम्ना पयःपरामर्शानुपपत्तिः। न च–एवं विधिनिषेधशास्त्रसाङ्कर्यप्रसङ्ग इति–वाच्यम्; अवस्थाविशेषभेदेनापि तत्साङ्कर्यपरिहारोपपत्तेः। अपि च यदि तव मते द्व्यणुकपर्यन्तं दुग्धनाशे पुनस्तदारम्भकपार्थिवपरमाणुभ्य एव द्व्यणुकादिक्रमेण दध्यादिजन्म, किमर्थं तदर्थं कष्टसाध्यं दुग्धमुपाददीत? सर्वत्र सुलभत्वात् पार्थिवपरमाणूनां यतः कुतश्चित् तानादाय दध्याद्युत्पादनसंभवात्॥

न च दुग्धारम्भकपरमाणुभ्य एव दध्यादिजन्म, नान्येभ्यः, इति नियामकं किञ्चित् कारणमस्ति; परमाणुषु जातिविशेषानङ्गीकारात्। अदृष्टविशेषो नियामकोऽस्तीति चेत्, न; परमाणुष्वदृष्टसमवायानभ्युपगमात्, अदृष्टवदात्मसंयोगस्य च सर्वपरमाणुसाधारण्याद् विशेषकत्वानुपपत्तेः। कार्यविशेषात् जातिविशेषस्तेष्वङ्गीकर्तव्य इति चेत्, न; अपसिद्धान्तत्वात्, अनपसिद्धान्तत्वे वा किमिति गोरुदरे दुग्धारम्भात् पूर्वं न कदाचित् दध्यारम्भस्तैर्भवेत्, दुग्धस्य तु तव मते तदकारणत्वात्? दुग्धाकारणत्वेऽपि तद्ध्वंसस्तत्कारणमिति–चेत्, न; अभावाहेतुत्वात्। हेतुत्वेऽपि वा दुग्धादिनष्टद्रव्यावयवेभ्योऽपि दधिकार्यप्रसङ्गात्। कार्यान्तरं तत्रास्ति तत्प्रतिबन्धकमिति–चेत्, न; तन्नाशानन्तरं तर्हि कालान्तरे दधिकार्यप्रसङ्गः। कार्यान्तरवत् तद्ध्वंसोऽपि तत्प्रतिबन्धक इति चेत्, न; प्रतिबन्धकाभावस्यपि प्रतिबन्धकत्वकल्पने कार्यमात्राभावप्रसङ्गात्। अथ कार्यान्ताभावसहितो दुग्धध्वंसो भिन्नसामग्रीत्वात् कार्यान्तरं जनयति, न

दधि कार्यमिति चेत्, न; आमिक्षाभावानन्तरमपि दुग्धस्य दधिभावदर्शनात् तस्य भिन्नसामग्रीत्वासिद्धेरित्यास्ताम्। तस्मात् सावयवस्यैव दुग्धरूपैकद्रव्यस्य तदुपादानस्य वा कार्यकालान्वयिनो दधिकार्ये परिणाम एव, नारम्भ इति सिद्धम्। एतेन–बीजावयवानामनेकेषामेवाङ्कुरापेक्षया न्यूनपरिमाणानामङ्कुरारम्भ इति–प्रत्युक्तम्; मृदादिवद् दुग्धादिवच्च बीजस्य तदुपादानद्रव्यस्य वाऽङ्कुरारम्भकस्य सावयवत्वेऽप्येकत्वात् स्वकार्यापेक्षयाऽधिकपरिमाणत्वात्॥

ननु–आम्रबीजस्य पूर्वं शुक्लरूपत्वेऽपि पाकात् पाकरक्ततायां रक्ताङ्कुरारम्भ उपपद्यते। तथाच कारणसमानगुणता कार्यस्य न तत्र व्यभिचरतीति–चेत्, मैवम्; एवमपि "महद् दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामि" त्यत्र सूत्रकार एव स्वयं तद्व्यभिचारं दर्शयिष्यति। अतो नात्र पुनस्तदर्थं यतितव्यम्। चित्रपटो वाऽत्रोदाहर्तव्यः ; परमते नानारूपैस्तन्तुभिश्चित्रपटारम्भात्, अस्मन्मते तु तन्तव एवातानवितानभावमापन्नाः पट इति व्यवह्रियते, न तेभ्यः पटो नाम भिन्नं द्रव्यान्तरमुत्पद्यते, बुद्धिव्यपदेशभेदस्तु सेनादिबुद्धिव्यपदेशभेदवद् न विरुद्ध्यते। अत एवार्थक्रियाभेदोऽपि। अस्तु वा तन्तूनां कार्यं पटः, तथाऽपि "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति वक्ष्यमाणन्यायेन न तन्तुभ्यो भिन्नः पटोऽस्ति। सर्वथाऽप्यल्पपरिमाणैस्तन्तुभिरधिकपरिमाण एकः पट आरभ्यत इत्यस्मान् प्रत्यारम्भवादिभिर्दर्शयितुं न शक्यते, इत्यनिदर्शनमेतत्। एतेन–अंशवादिभिरल्पपरिमाणैस्तन्त्वादीनां ततोऽधिकपरिमाणानामारम्भदर्शनम्–प्रत्याख्यातम्। यथा च परमाणूनां द्व्यणुकादिक्रमेणा-नारम्भकत्वम्, तथा प्रदर्शयिष्यामः। तस्मादारम्भवाद्युत्प्रेक्षिततर्काणां व्यभिचारादिदोषेण प्रतिहतत्वाद् न तैः स्वतः सिद्धप्रमाणभावा ब्रह्मकारणतावादिनी श्रुतिर्विरुध्यते॥

यत्तु विज्ञानवादिनाऽभिहितम्–यदि चेतनं जगत्कारणमभिहितं ब्रह्मवादिना, तर्हि क्षणिकविज्ञानमेव जगदस्तु; विलक्षणत्वादिदोषपरिहारात्–इति, तदयुक्तम्; दृष्टविरोधात्। एतेन–सहोपलम्भनियमादर्थस्य विज्ञानाभेदसाधनम्–प्रत्युक्तम्। विरुद्धश्च; अर्थस्य विज्ञानाऽभेदे सहार्थासम्भवात्। ननु–द्विविधो हि विकल्पस्य विषयः–ग्राह्यः, अध्यवसेयश्च। तत्र ग्राह्यो विकल्पविज्ञानस्य साकार एव परमार्थसन्, अध्यवसेयोऽपि स एवारोपितबहिष्ठत्वः सन् भवति। न च विज्ञानाकारारोपितं बहिष्ठत्वं ततो भिन्नमपि सद् भवति; तस्य बन्ध्यापुत्रवद् नामजात्यादिसम्बन्धवच्च विकल्पाऽऽसज्जितरूपत्वेन तुच्छत्वात्। तथाचोभयविधो विषयोऽपि विज्ञानस्य साकार एव परमार्थसन् सम्पद्यते, नाधिकः। न च विज्ञानाकारो विज्ञानाभिन्नः, येन विषयविषयिणोर्भेदेऽध्यवसायप्रत्यक्षप्रमाणविरोधो विज्ञानमात्रसत्त्ववादिनः प्रसज्येत; तद्भेदस्यापि विकल्पाऽऽसज्जितरूपत्वेन तुच्छत्वात् तदध्यक्षस्याप्रमाणत्वात्। अत एव हेतुरपि न विरुद्धः ;

अभेदेऽपि विकल्पासज्जितभेदमादाय सहार्थोपन्यासोपपत्तेः। तदुक्तम्–"भेदस्तु भ्रान्तिविज्ञाने दृश्येतेन्दाविवाद्वये"। इति, मैवम्; असतो बाह्यस्य सति विज्ञाने सादृश्याभावाद् आरोपानुपपत्तेः। सादृश्यं हि नाम–तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। न चासतस्तुच्छस्य निर्विशेषत्वात् तत्सम्भवति। न च तदभाव आरोपः सम्भवति, सम्भवे वा सर्वत्र सर्वारोपप्रसङ्गः ; अविशेषात्। तथाच घटाकाराज्ज्ञानात् पटादावपि बाह्ये कदाचित् तदर्थिनः प्रवृत्तिः स्यात्। न चैवं दृश्यते। तस्मादसदेतत्–यद् ज्ञानाकारे बाह्यस्यालीकस्यारोपः–इति।।

एतेन–सत एव ज्ञानाकारस्य बाह्येऽलीक आरोप इति–अपास्तम्। किं च विकल्पः स्वाकारं गृहीत्वा पश्चादसद्विषयं तत्रारोपयति, तद्ग्रहसमकालं वा। तत्र नाद्यः ; क्षणिकत्वाद् विज्ञाने। नापि द्वितीयः ; अधिष्ठानज्ञानस्यारोपहेतुत्वात्। ननु–असदारोपो नाम न स्वाकारग्राहकाद् विकल्पात् तज्जन्यं ज्ञानानतरमुच्यते, येनाधिष्ठानाधिष्ठेयविकल्पयोः क्षणिकयोरेककक्ष्यानवस्थानात् तद्भावानुपपत्तिः, अवस्थाने वा क्षणिकत्वहानिरिति दोषः स्यात्, किं तर्हि? सर्वस्य विकल्पज्ञानस्य तावद् अयं स्वभावः–यत् स्वकारणाज्जायमानमसदभेदेनैव स्वाकारं गृह्णत् जायते दीप इव रूपं तत्सम्बन्धाच्च पुष्पं गृह्णन्। तथाच नोक्तदोष इति–चेत्, सत्यम्; तदिदमसत्प्रकाशनसामर्थ्यं विकल्पस्य कुतोऽध्यवसितम्? तत्कारणस्य विकल्पान्तरस्य तादृशत्वादिति चेत्, ननु तस्यापि कुतस्तदध्यवसितमिति पर्यनुयोगे यदि तादृशात् कार्यादित्युच्यते, तदाऽन्योन्याश्रयः ; अथ तादृशात् कारणादित्युच्यते, तदा तस्य तस्यापि कुत इति पर्यनुयोगे ततस्ततः कारणादित्यभिधानेऽनवस्थानाद् अन्धपरम्परैव भवता शाक्यभिक्षुणा संसारदुर्गतरणायावलम्बिता स्यात्। अपि च यद्यालयविज्ञानसन्तानस्यासत्प्रकाशनसामर्थ्यं भाविकम्, तर्हि कदापि तस्य तन्निर्मोकाभावाद् अनिर्मोक्षप्रसङ्गः ; स्वरूपेऽवस्थितस्यालयविज्ञानसन्तानस्य शाक्यमिक्षुणा मोक्षत्वाभिधानात्। अथौपाधिकं तत्, कस्तत्रोपाधिरिति वक्तव्यम्। वासनेति चेत्, ननु वासनाऽपि भवन्मते केति वक्तव्यम्। तत्सन्ताने पूर्वं कदाचिद् उत्पन्नस्तज्जातीयविकल्पप्रत्यय इति चेत्, ननु तस्यासत्प्रकाशनसामर्थ्यमासीत्, न वा। न चेत्, अतत्प्रकाशनसमर्थो विकल्पप्रत्ययो न तज्जातीयो भवेत्। अथासीत्, तत्रापि तादृशपूर्वविकल्पे किं बीजम्, एवं तत्र तत्रापीत्यनवस्था। अनादित्वाद् वासनानां तत्तद्विकल्पोपाधिता युक्तेति चेत्, एवमपि विनष्टस्तादृग् विकल्पप्रत्ययो विजातीयप्रत्ययशतान्तरितश्च कथमसत्प्रकाशनसमर्थः सजातीयविकल्पान्तरजनकः स्यात्? अदृष्टपूर्वत्वात्, कार्यकारणभावकल्पनायास्तु दृष्टानुसारित्वात्। चिरकालविनष्टादङ्कुराद् विजातीयकार्यशतव्यवहिताच्च शालिबीजात् तज्जातीयबीजान्तरोत्पत्तिर्दृष्टा, अतो नादृष्टपूर्वेयं कल्पनेति चेत्, मैवम्; तत्राप्यन्वयिनां शालिबीजावयवानामेव तद्धेतुत्वाभ्युपगमात्, निरन्वयविनष्टात्

कार्यदर्शनासिद्धेः। अपिच यदि चिरकालं निरन्वयविनष्टोऽपि विकल्पप्रत्ययो वासना, ततश्च तज्जातीयविकल्पान्तरोत्पत्तिरित्यभ्युपगमः, तर्हि मोक्षदशायामपि शुद्धालयविज्ञानसन्ताने तादृशवासनायाः सुलभत्वात् तज्जातीयविकल्पोत्पत्तिः स्यात्। तथा चानिर्मोक्षप्रसङ्गः। एतेन–तत्सन्तानवर्तिसमनन्तरप्रत्ययो वासनेत्यपि–प्रत्युक्तम्: अनिर्मोक्षप्रसङ्गात्। मोक्षदशायां प्रवृत्तिविज्ञानाभावात् तत्कालीनप्रत्ययः तत्समनन्तरपूर्वप्रत्यय एव न भवतीति चेत्, मैवम्; मोक्षदशायां तज्जन्यप्रत्ययसन्तानसत्त्वेन प्रवृत्तिविज्ञानाभावस्यैवासिद्धेः। संसारदशायां हि प्रवृत्तिविज्ञानोत्पत्ताविदमेव कारणं विज्ञानवादिभिरभ्युपगतम्–यद् आलयविज्ञानसन्ताने पूर्वं कदाचित् तज्जातीयप्रवृत्तिविज्ञानोत्पत्तिः–इति। तच्च मोक्षदशायामप्यविशिष्टम्; मोक्षदशावर्त्यालयविज्ञानसन्ताने संसारदशायां प्रवृत्तिविज्ञानस्योत्पन्नत्वात्। तथाच स्थित एव तवानिर्मोक्षप्रसङ्गः। तस्मात् संसारमोक्षावभ्युपगच्छता भवता संसारदशायां सविषयं विज्ञानम्, मोक्षदशायां तु निर्विषयमित्यभ्युपगन्तव्यम्। तच्च विज्ञानव्यतिरिक्तविषयास्तित्वे घटते; अलीकविषयकल्पनस्य संसारदशायामिव मोक्षदशायामपि सुलभत्वात्, तत्प्रकाशनोपाधेरपि वासनायास्तुल्यत्वस्य संसारमोक्षदशयोरुपपादितत्वात्, उपाध्यन्तरानिरूपणात्। अपि च विज्ञानस्य विषयाकारोऽपि न स्वाभाविको भवता वक्तुं शक्यते; मोक्षदशायामपि तत्प्रसङ्गात्, तत्काले च विज्ञानस्य निराकारत्वाभ्युपगमात्। औपाधिकत्वे तु विषय एवोपाधिर्युक्तः ; तन्नियमदर्शनात्, अन्यथा विषयनियमानुपपत्तेः, उपाध्यन्तरानिरूपणाच्च, वासनाया अपि विषयाधीनत्वात्, अन्यथाऽन्धपरम्परापत्तेरित्युक्तत्वात्। तस्मादप्यस्ति विज्ञानभिन्नो विषयः।।

ननु– विज्ञानविषययोरसाधारणसम्बन्धान्तरानिरूपणाद् अभेदसम्बन्धोऽभ्युपगम्यते। तथा हि–विज्ञाने तावद् विषयो भासते, इत्यत्र न कस्यापि विप्रतिपत्तिरस्ति। सम्बन्धः परं तयोर्विप्रतिपन्नत्वात् विचार्यते। ननु–तयोर्विषयविषयिभावसम्बन्धस्य प्रत्यक्षसिद्धत्वात् सर्वसम्प्रतिपन्नत्वाच्च किं सम्बन्धान्तरगवेषणया? इति चेत्, मैवम्; रूपरूपिणोरिव मौलिकसम्बन्धान्तरेण विषयविषयिभावनियमस्यैव कतुमशक्यत्वात् तद्गवेषणाया युक्तत्वात्। यथा ह्यविशेषेण सर्वयोग्यरूपिद्रव्यप्रकाशनसमर्थः प्रदीप उत्पन्नो न सर्वं तत्प्रकाशयति, तत् कस्य हेतोः? सर्वेण सह तस्यासंयोगात्, इति सम्बन्धविशेषेण तयोर्विषयविषयिभावो नियम्यते, एवं घटज्ञानमुत्पन्नं घटमेव प्रकाशयति, न सर्वम्, इति तयोर्विषयविषयिभावनियमनाय सम्बन्धविशेषो वाच्यः ; अन्यथा तन्नियमनानुपपत्तेः। तत्र न तावद् ज्ञानज्ञेययोर्दीपघटयोरिव संयोगः सम्भवति; द्रव्ययोरेव तत्सम्भवात्, ज्ञानस्याद्रव्यत्वात्, द्रव्यत्वेऽपि च बहिरर्थेनान्तरीणस्य ज्ञानस्य तदसम्भवात्, क्रियानिबन्धनस्य च

बहिरर्थसम्बन्धस्य स्थायिनोऽनुपपत्तेः, ज्ञानक्षणिकत्वाभ्युपगमात्। नापि समवायः ; ज्ञानस्यार्थेनार्थस्य च ज्ञानेन समवायानभ्युपगमादसम्भवात्। नापि कार्यकारणभावः ; इन्द्रियादीनामपि ज्ञानकारणानां स्वजन्यज्ञानविषयत्वप्रसङ्गात्। ज्ञानं स्वजन्यमर्थं विषयीकरोतीति चेत्, न; स्वकार्यकाले क्षणिकविज्ञानस्यासत्त्वात् तद्विषयत्वानुपपत्तेः। नापि स्वरूपसम्बन्धः ; अतिप्रसङ्गात्, तस्य सम्बन्धत्वासिद्धेश्च, भिन्नोभयाश्रितस्यैकस्य सम्बन्धत्वदर्शनात्। अतः परिशेषात् तादात्म्यमेव सम्बन्धो विषयतज्ज्ञानयोर्विषयविषयिभावनियामकोऽभ्युपगन्तव्यः ; अन्यथा तन्नियमानुपपत्तेः, इति चेत्, मैवम्—क्षणिकवादस्य सुगतमतपरीक्षायां निराकरिष्यमाणत्वात्, स्थायिना विषयेण स्थायिनोऽहङ्कर्तुरिदमशस्य क्रियानिबन्धनसम्बन्धान्तरस्य प्रतिकर्मव्यवस्थायां दर्शितत्वात्। एतेन—ज्वालादाविवार्थे तद्रूपप्रत्यभिज्ञानं सादृश्यनिबन्धनमिति—अपास्तम्। तस्मात् क्षणिकविज्ञानातिरिक्तः स्थायी बहिर्विषयः। न च तस्य स्वविषयक्षणिकविज्ञानोपादानत्वं सम्भवति। अतो युक्तं विज्ञानभावाभावसाक्षिकूटस्थनित्यचैतन्यरूपब्रह्मोपादानत्वं जगत इति॥

यदपि शून्यवादिनाऽभिहितम्—यदि लौकिककार्यकारणभावव्यहारोऽनिर्वचनायोऽभ्युपगतो ब्रह्मवादिना, तर्हि प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वस्यानिर्वचनीयशब्दार्थत्वात् कालत्रयान्वयिनोऽत्यन्ताभावस्यैव तदुपादानत्वकल्पनमुचितम्, न सतः ; तस्य कार्याद् भेदाभेदाभ्यां तदुपादानत्वानुपपत्तेः। भेदे गोरप्यश्वोपादानत्वप्रसङ्गः ; भिन्नत्वाविशेषात्, अभेदे तु कार्यकारणभावानुपपत्तेः, उपपत्तौ वा तस्याप्यत्यन्ताभावप्रतियोगित्वेन कार्यवद् अनिर्वचनीयत्वप्रसङ्गः, भेदाभेदयोस्तु विरोधेनैकत्रासमावेशात्—इति, तदपि मन्दम्; उक्तविकल्पावतारस्य कार्यकारणभावानिर्वचनीयत्वसाधकत्वात् तद्बाधकत्वानुपपत्तेः, अत्यन्ताभावस्य कालत्रयान्वयित्वेऽपि तदधिष्ठानतया प्रतिपन्नोपाधितया च तदतिरिक्तस्य भावस्य सम्प्रतिपन्नत्वात्। अभावो हि सर्व उपलभ्यमानः, स्वप्रतियोग्यधिकरणभावाधिष्ठानो नियमेन दृष्टः, कुतः? तन्निरूपणाधीननिरूपणत्वात्। न च तथा सर्वो भावः ; शब्दादेर्भावस्य निष्प्रतियोगित्वेन तदधिकरणाधिकरणत्वाभावात्, साधिकरणत्वेऽपि तन्निरूपणोधीननिरूपणत्वाभावाच्च। तथा चोभयत्रापि भावान्वयाद् भावाधिष्ठानत्वनियमदर्शनाद् अभावस्य कुत्रचिदप्यधिष्ठानत्वादर्शनाच्च धर्मिज्ञाननिरूपणत्वेन साधिष्ठानत्वनियमाच्च भावस्यैव कस्यचित् स्वाधिष्ठानतया निरधिष्ठानत्वकल्पनमुचितम्, नाभावस्य; दृष्टविरोधात्, निष्प्रमाणकत्वाच्च। एतेन—ब्रह्मणोऽपि भावत्वेन कार्यतया साधिष्ठानत्वसाधनम्—प्रत्युक्तम्; धर्मिग्राहकप्रमाणेन तस्य कार्यत्वबाधात्। उपादितञ्च ब्रह्मणो नित्यत्वमस्माभिरधस्ताद् नित्यानित्यवस्तुविवेकप्रदर्शनावसरे, तदत्रानुसन्धेयम्॥

एतेन—परानुमतं ब्रह्म, अत्यन्ताभावो भवितुमर्हति, सर्वकारणत्वात्; यन्नैवम्, तन्नैवम्; यथा घटादिः, इति व्यतिरेक्यनुमानमपि—परास्तम्; धर्मिग्राहकप्रमाणेन बाधात्, भावत्वेनैव धर्मिणः पराभिमतब्रह्मणः सिद्धेः। विरुद्धश्च; कारणत्वस्य भावत्वव्याप्यत्वात्, अभावाहेतुत्वस्य साधितत्वात्। प्रत्यक्षबाधश्च; सदुपरागेणैव भावाभावप्रपञ्चः प्रत्यक्षेण गृह्यते, नासदुपरागेण; कार्याध्यक्षस्यान्वयिकारणोपरागनियतत्वात्॥

एतेन—पराभिमतोऽभावः जगत्कारणमुच्यते येन, तस्य भावाधिष्ठानत्वनियमाद् न निरधिष्ठानत्वम्, किं तर्हि? भावाभावातिरिक्तं निर्विशेषं शून्यमिति—अपास्तम्; भावाभावव्यतिरिक्तपदार्थासम्भवाञ्च, तयोरेकप्रतिषेधस्य विधित्वात्। तद्विलक्षणं शुद्धमिति चेत्, न; तस्य वन्ध्यापुत्रवद् जगत्कारणत्वाभिधानानुपपत्तेः। तस्माद् नासतो जगत्कारणत्वम्, किं तर्हि? सत एव ब्रह्मण इति सिद्धम्। यत्तु श्रुतिवाक्यमसत्कारणवादिनोदाहृतम् "असदेवेदमग्र आसीदि" ति, तत्तु अव्याकृतनामरूपाभिप्रायमेवेत्यसकृत्प्रपञ्चितम्॥

यत्तु स्वभाववादिना कार्यभिन्नयोः सदसतोः कारणत्वं विकल्प्य दूषितम्, तद् नास्माकमनिर्वचनीयकार्यकारणभावमभ्युपगच्छतामनिष्टमावहति। तदुक्तम्—"क्व ममत्वं मुमुक्षूणामनिर्वचनवादिनाम्" इति। न च—अनिर्वचनीयत्वमेव वादिभिरुपेक्षणीयत्वमिति—वाच्यम्; लोकसिद्धपदार्थस्यैव विचारासहत्वेनानिर्वचनीयत्वस्थापनात्। तद्विरुद्धपदार्थोपादानस्यैव वादिभिरप्युक्तत्वात्, स्वभाववादस्य च लोकविरुद्धत्वात्, सिद्धसाध्ययोर्लोके कार्यकारणभावदर्शनात्, एकस्य युगपत् तदुभयत्वानुपपत्तेः। अथ—न वयं कार्यं स्वतः कार्यादेव कारणात् भवतीति स्वभाववादं ब्रूमः, येनैकस्य युगपत् सिद्धसाध्यत्वरूपविरुद्धस्वरूपद्वयप्रसङ्गो दोषः स्यात्, किं तर्हि? अकारणं कार्यं स्वयमुत्पद्यत इति, ततश्च नोक्तदोष इति—चेत्, सत्यम्; तथापि लोकविरोधस्यापरिहार्यत्वात्, लोके कार्यकारणभावव्यवहारदर्शनस्याक्षतत्वात्, तद्विरुद्धाभिधानेन चावादित्वापत्तेरित्युक्तत्वात्। अपि च यदि कार्यमकस्मात् स्वयमुत्पद्येत, हन्त तर्हि न तदर्थितया कश्चिदपि व्याप्रियेत, अभीष्टकारणं चोपाददीत। व्याप्रियते च सर्वो जनस्तदर्थितया, उपादत्ते चाभीष्टतत्कारकग्रामम्। अतोऽयमन्यो लोकविरोधः स्वभाववादिनः स्यात्। तस्माद् न कारणं कार्यमुत्पद्यत इति युक्तम्। न च स्वयमेव कार्यं कारणम्; युगपत् सिद्धसाध्यत्वविरोधादित्युक्तत्वात्, अकारणकार्योत्पत्तिपक्षोक्त दोषस्यात्रापि तुल्यत्वाच्च॥

ननु—ब्रह्मवादिनोऽपि कार्यकारणयोरभेदाभिधानाद् इदं दूषणं तुल्यम्, मैवम्; कारणात् कार्यस्याभेदाभिधानेऽपि कार्यात् कारणभेदस्याप्यभिधानात्, कार्यरूपेण भिन्नतया पूर्वसिद्धस्यैव सत्यकारणस्य पश्चाद् अनिर्वचनीयकार्यरूपेण विवर्ताभ्युपगमात्॥

एतेन–यदुक्तम्–कार्यस्य कारणभेदेऽभ्युपगतेऽर्थात् कारणस्यापि कार्याभेदसिद्धिः–इति, तत् प्रत्युक्तम्; कार्यस्य सत्यत्वे तथा स्यात्; तदेतद्देशकालविशिष्टदेवदत्तस्वरूपयोरिव, उभयप्रतियोगित्वादभेदस्य। न चैतदस्तीति वक्ष्यते। न हि मिथ्या सर्पो रज्जुकार्यस्तभिन्नः, इति रज्जुस्ततो न भिद्यते; सर्पबाधेऽपि रज्जुदर्शनात्, अन्यथा तदनुपपत्तेः। तस्माद् अस्ति ब्रह्मवादिनः कार्यकारणयोरभेदाभ्युपगमेऽपि स्वभाववादितो वैषम्यम्–इति॥१२॥ इति चतुर्थं शिष्टापरिग्रहाधिकरणम्॥

इति वार्तिकम् शिष्टापरिग्रहाधिकरणम् समाप्तम्

प्रदीपः

एतावता प्रसङ्गेन ब्रह्मणो न कारणत्वमेव, अस्ति तस्य कारणत्वं निमित्तकारणत्वाख्यम्, उपादानकारणत्वं तु नास्त्येवेति साङ्ख्ययोगदर्शनविरोधः परिहृतः, सांप्रतं तु अपरेषां पाशुपतपाञ्चरात्रवैशेषिकनेयायिकदर्शनानां विरोधोऽप्यकिञ्चित्कर इति निरूपणार्थं सूत्रम्– *एतेन शिष्टापरिग्रहा अपि व्याख्याता इति*।।१२।।

शिष्टैरपरिगृहीता अपरेऽपि तर्का व्याख्याताः=निरस्तत्वेन व्याख्याता इत्यर्थः। के च ते शिष्टापरिगृहीताः? येऽनन्तरपादे निरस्यतया मन्यन्ते–साङ्ख्ययोगातिरिक्ता वैशेषिकनैयायिक-सौगतार्हतपाशुपतपाञ्चरात्रतर्काः, तत्स्मृतयो वा। पौरुषेयाः तर्काः स्मृतयो वेति यावत्। तथाच–''साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथे'' ति वाक्यानिर्दिष्टा वैशेषिकादिवादा एव शिष्टापरिगृहीताः। अत्र यद्यपि साङ्ख्ययोगपाशुपतयाञ्चरात्राणामप्यनादरो मन्यते; तथापि तेषामंशतः प्रामाण्यस्य स्वीकाराद् न शिष्टापरिगृहीतत्वं वैशेषिकादीनामिव। तदेतदभिप्रेत्याह– *इदानीमणवादीति*।। आदिपदेन शून्यादेः परिग्रहः।। *शिर्ष्टमनुष्य सामभृतिभिरिति*।। यथाच व्यासेन सूत्रकारेण वैशेषिकादीनामपरिग्रहः, तथा साङ्ख्यं योगः पाञ्चरात्रमि'' ति वाक्यादवगम्यते। मनुरपि वैदिकेषु प्रधानः ''अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदि'' त्यादिना केवलं तर्कप्रामाण्यवादं निराकुरुत एव।।१२।। इति तुरीयं शिष्टापरिग्रहाधिकरणम्।।

इति प्रदीपः शिष्टापरिग्रहाधिकरणम् समाप्तम्

भामती

न कार्य कारणादभिन्नमभेदे कारणरूपवत् कार्य्यत्वानुपपत्तेः, करोत्यर्थानुपपत्तेश्च। अभूतप्रादुर्भावनं हि तदर्थः। न चास्य कारणात्मत्वे किञ्चिदभूतमस्ति यदर्थमयं पुरुषो यतेत। अभिव्यक्तयर्थमिति चेत्, न, तस्या अपि कारणात्मत्वेन सत्त्वात्, असत्त्वे वाऽभिव्यङ्ग्यस्यापि तद्वत् प्रसङ्गेन कारणात्मत्वव्याधातात्। नहि तदेव तदानीमेवास्ति नास्ति चेति युज्यते। किं चेदं मणिमन्त्रौषधमिन्द्रजालं कार्य्येण शिक्षितं यदिदमजातानिरुद्धातिशयमव्यवधानमविदूरस्थानं च तस्यैव तदवस्थेन्द्रियस्य पुंसः कदाचित्प्रत्यक्षं परोक्षं च येनास्य कदाचित्प्रत्यक्षमुपलम्भनं कदाचिदनुमानं कदाचिदागमः। कार्य्यान्तरव्यवधिरस्य पारोक्ष्यहेतुरिति चेत्, न, कार्य्यजातस्य सदातनत्वात्। अथापि स्यात्कार्य्यान्तराणि पिण्डकपालशर्कराचूर्णकणप्रभृतीनि कुम्भं व्यवदधते, ततः कुम्भस्य पारोक्ष्यं कदाचिदिति। तन्न, तस्य कार्य्यजातस्य कारणात्मनः सदातनत्वेन सर्वदा व्यवधानेन कुम्भस्यात्यन्तानुपलब्धिप्रसङ्गात्। कादाचित्कत्वे वा कार्य्यजातस्य न कारणात्मत्वं नित्यत्वानित्यत्वलक्षणविरुद्धधर्मससर्गस्य भेदकत्वात्। भेदाभेदयोश्च परस्परविरोधेनैकत्र सहासम्भव इत्युक्तम्। तस्मात् कारणात् कार्य्यमेकान्तत एव भिन्नम्। न च भेदे गवाश्ववत् कार्यकारणभावानुपपत्तिरिति साम्प्रतम्। अभेदेऽपि कारणरूपवत्तदनुपपत्तेरुक्तत्वात्। अत्यन्तभेदे च कुम्भकुम्भकारयोर्निमित्तनैमित्तिकभावस्य दर्शनात्। तस्मादन्यत्वाविशेषेऽपि समवायभेद एवोपादानोपादेयभावनियमहेतुः। यस्याभूत्वा भवतः समवायस्तदुपादेयं, यत्र च समवायस्तदुपादानम्। उपादानत्वं च कारणस्य कार्य्यादल्पपरिमाणस्य दृष्टं यथा तन्त्वादीनां पटाद्युपादानानां पटादिभ्यो न्यूनपरिमाणत्वम्। चिदात्मनस्तु परममहत उपादानान्नात्यन्ताल्पपरिमाणमुपादेयं भवितुमर्हति। तस्माद्यत्रेदमल्पतारतम्यं विश्राम्यति यतो न क्षोदीयः सम्भवति तज्जगतो मूलकारणं परमाणुः। क्षोदीयोऽन्तरानन्त्ये तु मेरुराजसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गोऽनन्तावयवत्वादुभयोः। तस्मात् परमहतो ब्रह्मण उपादानादभिन्नमुपादेयं जगत्कार्य्यमभिदधती श्रुतिः प्रतिष्ठितप्रामाण्यतर्कविरोधात्

सहस्त्रसंवत्सरसत्रगतसंवत्सरश्रुतिवत् कथञ्चिज्जघन्यवृत्त्या व्याख्येयेत्यधिकं शङ्कमानं प्रति सांख्यदूषणमतिदिशति *एतेन इति* सूत्रेण। अस्यार्थः—कारणात् कार्य्यस्य भेदं तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र निषेत्स्याम्। अविद्यासमारोपणेन च कार्य्यस्य न्यूनाधिकभावमन्यप्रयोजकत्वादुपेक्षिष्यामहे। तेन वैशेषिकाद्यभिमतस्य तर्कस्य शुष्कत्वेना-व्यवस्थितेः। सूत्रमिदं सांख्यदूषणमतिदिशति। यत्र कथंचिद्वेदानुसारिणो मन्वादिभिः शिष्टैः परिगृहीतस्य सांख्यतर्कस्यैषा गतिस्तत्र परमाण्वादिवादस्यात्यन्तवेदबाह्यस्य मन्वाद्युपेक्षितस्य च कैव कथेति। *केनचिदंशेन इति*। सृष्ट्यादयो हि व्युत्पाद्यास्ते च किञ्चित्सदसद्वा पूर्वपक्षन्यायोत्प्रेक्षितमप्युदाहृत्य वयुत्पाद्यन्त इति केनचिदंशेनेत्युक्तम्। सुगममन्यत्।।१२।।

इति भामती शिष्टापरिग्रहाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ शिष्टापरिग्रहाधिकरणम्।।५।।

।।सू।। एतेन शिष्टापरिग्रहा अपि व्याख्याता:।।१३।।

यथेदं सांख्यदर्शनं तर्कमूलत्वेनाप्रतिष्ठिततत्वादिना प्रत्याख्यातं तथैव तेनैव हेतुना शिष्टानामपरिग्रहा: कणभक्षाक्षपादादीनां पक्षा अपरिग्राह्या इति व्याख्याता:। एतदुक्तं भवति-कणादादिमतसिद्धपरमाणुकारणवादोऽपि निराकृत इति।।

इति शिष्टापरिग्रहाधिकरणम्।।५।।

इति श्रीकण्ठभाष्य शिष्टापरिग्रहाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सू।। **एतेन शिष्टापरिग्रहा अपि व्याख्याताः**।।१३।। एतेन तर्काप्रतिष्ठितत्वदूषणेन शिष्टानां शुष्कतर्कावलंबिषु कपिलादिष्ववशिष्टानां कणभक्षादीनां येऽपरिग्रहाः वेदपरिग्रहरहिताः पक्षास्तेऽपि व्याख्यताः वैदिकैरपरिग्राह्यत्वेन उपपादितप्राया इति सूत्रयोजनामभिप्रेत्य व्याचष्टे – **यथेति।** एतेनेत्यतिदेशाधिकरणस्याधिकशंकां दर्शयति – **एतदुक्तमिति।** आदिशब्देनाखचरण-क्षपणकसमन्तभद्रादयो गृह्यन्ते। अनेन प्रधानकारणवादापेक्षया बहुसंमतत्वमेकमधिकशंकाकारणं सूचितम्। परमाणुत्वकीर्तनेनाप्यन्यदधिकशंकाकारणं सूचितम्। अल्पाधिकपरिमाणयोर्हि तंतुपटादिषूपादानोपादेयभावो दृष्टः न तु वैपरीत्यं दृष्टम्। अतस्त्रिसरेणुप्रभृतिषु पृथिवीगोलकादिपर्यंतेषु कार्येषु परमाणूनामेव कारणत्वं युक्तं न तु कार्येभ्योऽधिकपरिमाणस्य प्रधानादेरिति। **निराकृत इति।** अप्रतिष्ठिततर्कमूलत्वाविशेषेण परमाणुकारणवादिनामेव परमाणुगतसत्यत्वासत्यत्वबाह्यत्वां-तरत्वव्यवस्थापकतर्काणां परस्परप्रतिघातेन उपादानोपादेय- योरल्पाधिकपरिमाणत्वनियमस्य प्रचितपरिमाणतूलपिंडाद्यारब्धेषु....प्रभृतिषु व्यभिचारेण च निरस्त इत्यर्थः।।

इति शिष्टापरिग्रहाधिकरणम्।।५।।

इति शिवार्कमणिदीपिका शिष्टापरिग्रहाधिकरणम् समाप्तम्

भोक्त्रापत्त्यधिकरणम्।

शाङ्करभाष्यम्

***भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्*॥१३॥**

अन्यथा पुनर्ब्रह्मकारणवादस्तर्कबलेनैवाक्षिप्यते। यद्यपि श्रुतिः प्रमाणं स्वविषये भवति; तथापि प्रमाणान्तरेण विषयापहारेऽन्यपरा भवितुमर्हति, यथा मन्त्रार्थवादौ। तर्कोऽपि स्वविषयादन्यत्राप्रतिष्ठितः स्यात्, यथा धर्माधर्मयोः। किमतः, यद्येवम्? अत इदमयुक्तम्–यत्प्रमाणान्तरप्रसिद्धार्थबाधनं श्रुतेः॥ कथं पुनः प्रमाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इति? अत्रोच्यते–प्रसिद्धो ह्ययं भोक्तृभोग्यविभागो लोके–भोक्ता चेतनः शारीरः, भोग्याः शब्दादयो विषया इति। यथा भोक्ता देवदत्तः, भोज्य ओदन इति। तस्य च विभागस्याभावः प्रसज्येत, यदि भोक्ता भोग्यभावमापद्येत, भोग्यं वा भोक्तृभावमापद्येत। तयोश्चेतरेतरभावापत्तिः परमकारणाद् ब्रह्मणोऽनन्यत्वात्प्रसज्येत। न चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तम्। यथा त्वद्यत्वे भोक्तृभोग्ययोर्विभागो दृष्टः, स्तथाऽतीतानागतयोरपि कल्पयितव्यः। तस्मात्प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसङ्गादयुक्तमिदं ब्रह्मकारणतावधारणमिति चेत्कश्चिच्चोदयेत्, तं प्रति ब्रूयात्–*स्याल्लोकवदिति*॥ उपपद्यत एवायमस्मत्पक्षेऽपि विभागः ; एवं लोके दृष्टत्वात्। तथाहि–समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनवीचीतरङ्गबुद्बुदादीनामितरेतरविभागः, इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते। न च समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनतरङ्गादीनामितरेतरभावापत्तिर्भवति। न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति, एवमिहापि न च भोक्तृभोग्ययोरितरेतरभावापत्तिः, न च परस्माद् ब्रह्मणोऽन्यत्वं भविष्यति। यद्यपि भोक्ता न ब्रह्मणो विकारः ; 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै॰ २/६) इति स्त्रष्टुरेवाविकृतस्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्, तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभाग आकाशस्येव घटाद्युपाधिनिमित्त इति। अतः परमकारणाद् ब्रह्मणोऽनन्यत्वेऽप्युपपद्यते भोक्तृभोग्यलक्षणो विभागः समुद्रतरङ्गादिन्यायेनेत्युक्तम्॥१३॥ इति पञ्चमं भोक्त्रापत्त्याधिकरणम्॥

इति शाङ्करभाष्यम् भोक्त्रापत्त्यधिकरणम् समाप्तम्

वार्तिकम्

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्।। ननु–अधिकरणाभ्यां परेषां स्मृतिनिमित्ताक्षेपो ब्रह्मकारणतावादे परिहृतः, अधिकरणाभ्यां च तर्कनिमित्त आक्षेपः इति, तत्किमपरमवशिष्यते?–यदर्थं पुनरारम्भोऽस्मिन् पादे, इति–चेत्, तत्राह– *अन्यथा पुनर्ब्रह्मकारणतावादस्तर्कबलेनैवाक्षिप्यत इति*।। तर्कबलेनैवेत्यवधारयन् स्मृतिबलेन न पुनराक्षिप्यत इति दर्शयति। पुनः शब्दः पूर्वोपात्ततर्कबलाक्षेपापेक्षया। अन्यथेति प्रकारभेदं ज्ञापयन् पौनरुक्तयं वारयति। द्विविधा हि तर्काः कथायां प्रयुज्यन्ते वादिभिः–स्वसाधनानुकूलाः, विपक्षबाधकरूपाश्च। तत्र ये येषां स्वपक्षसाधनानुकूलास्तर्काः, तद्विरोधो ब्रह्मकारणतावाद आशङ्क्य परिहृतः। ये तु विपक्षबाधकरूपाः, तद्विरोध इदानीमाशङ्क्य परिह्रियत इत्याशयः। ननु–एवमप्यतिगम्भीरे जगत्कारणे श्रुतिमात्रगम्ये तर्काप्रतिष्ठानस्योक्तत्वात् कथं पुनस्तत्र तर्कनिमित्त आक्षेपः सम्भवेत्–इति, तत्राह– *यद्यपीति*।। जगत्कारणे हि शुष्कतर्कोऽप्रतिष्ठित इत्युक्तम्। कुतः? तदविषयत्वात् तस्य, न प्रत्यक्षसिद्धभोग्यादिभेदे; तस्य लौकिकत्वेन तर्कविषयत्वात्। एवं च सति स्वविषयप्रतिष्ठिततर्कविरोधाद् मन्त्रार्थवादयोरिवाद्वैतप्रतिपादकश्रुतीनां स्वविषयात् प्रच्याव्यान्यथा नयनमुचितमिति मन्यते। अथ–स कः स्वविषयप्रतिष्ठस्तर्कः? यद्विरोधोऽद्वैतप्रतिपादकश्रुतीनाम्– इति, उच्यते; बलवत्प्रमाणान्तरविरोधप्रसङ्गाख्यः।।

अथ किं तद् बलवत् प्रमाणम्? प्रत्यक्षानुमाने। कथं तयोरपौरुषेयस्वतः प्रमाणभूतश्रुत्यपेक्षया बलवत्त्वम्? तत्स्वरूपनिष्पादकत्वादिति ब्रूमः। शब्दप्रमाणस्वरूपनिष्पादनं हि प्रत्यक्षानुमानाभ्यां क्रियते। कथम्? यद्यपि वर्णात्मकः शब्दो नित्य इत्युक्तम्, तथापि न स स्वरूपसत्प्रमाणम्। किं तर्हि? प्रत्यक्षेण गृहीतः, अनुमानेन गृहीतसङ्गतिकश्च स्वार्थमभिव्यञ्जयन् प्रमाणमित्युच्यते। तथाचानया दिशा भवतः शब्दप्रमाणस्वरूपनिष्पादके प्रत्यक्षानुमाने। ननु–असत्त्वेवं शब्दप्रमाणापेक्षया प्रत्यक्षानुमानयोर्बलवत्त्वम्; तथापि कथं प्रकृते ताभ्यामद्वैतपरसृष्टयादिश्रुतीनां विरोधः? उच्यते; प्रत्यक्षानुमानाभ्यां हि लोके भोक्तृभोग्यभोगादिव्यवहारोऽबाधितः सार्वजनीनो दृश्यते। भोक्ता हि

चेतन एव सर्वदा ताभ्यां द्रष्टा, नाचेतनः कदाचिदपि। एवं भोग्यमप्यचेतनमेव दृष्टम्, न चेतनः कदाचित्। भोगश्चैतन्यमेव, नाचैतन्यम्। एवं कर्तृकार्यादिविभागः, प्रमातृ-प्रमेयादिविभागश्च प्रदर्शनीयः। लक्षणभेदाच्च। लक्षणभेदोऽपि तेषां तत्र तत्र तत्तदभियुक्तैः प्रदर्शितो लोकव्यवहारासाङ्कर्याय, ततोऽपि तद्भेदोऽवगम्यते। तत्र यदि प्रत्यक्षाद्यनुरोधेनायं भेदव्यवहारोऽभ्युपगम्यते भवता, हन्त तर्हि ''येनाश्रुतं श्रुतं भवति'' ''यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्'' ''ऐतदात्म्यमिदं सर्वम्'' इत्यादिप्रतिज्ञादिश्रुतिव्याकोपः, सर्वाद्वैताभ्युपगमहानप्रसङ्गः॥

अथ-एतद्दोषपरिजिहीर्षया भोक्त्रादिभेदानां ब्रह्मात्मत्वेविभागोऽभ्युपगन्तव्य इति भवान्-मन्यते, तर्हि भोग्यादीनामपि भोक्तृत्वापत्तेः प्रत्यक्षादिसिद्धतद्भेदव्यवहारलोपप्रसङ्गः। तथाच प्रत्यक्षादिप्रमाणव्याकोपः स्यादिति। सूत्रे तु भोक्त्रापत्तेरि' तिभावप्रधानो निर्देशः, उपलक्षणं च कर्तृत्वादीनाम्, भोग्यादीनामिति शेषश्च। ननु-भवतु नामास्मिन् कल्पे भेदेन भोक्त्रादिव्यवहारः, अतीतानागतकल्पयोस्तु अभेद एव तद्व्यवहार उपपत्स्यते। तथाच प्रत्यक्षश्रुतिप्रमाणयोर्व्यवस्थयाऽविरोधो भविष्यतीति, नेत्याह- *यथाचाद्यत्व इति*॥ तत्राप्यनुमानविरोधस्य सत्त्वादित्याशयः। तस्माद् ब्रह्मकारणतावादे प्रत्यक्षादिप्रमाणसिद्धभोक्तृ-भोग्यादिभेदव्यवहाराभावप्रसङ्गात् प्रधानादिकारणवादे तदभावात् तदनुसारेण मन्त्रार्थवादयोरिवोपनिषदामप्यन्यथा व्याख्यानं युक्तमिति पूर्वपक्षसंक्षेपः॥

तत्र वदामः-किं ब्रह्मकारणकत्वे तदात्मना भोक्तृभोग्यादीनां तत्कार्याणामैक्यात् तद्भेदसंव्यवहारो लौकिको नोपपद्येतेत्युच्यते, किं वा पारमार्थिक इति। तत्र नाद्य इत्याह- *स्याल्लोकवदिति*॥ भोक्तृभोग्यादिभेदव्यवहार इति शेषः। तद् व्याचष्टे- *उपपद्यत एवायमस्मत्पक्षेऽपीति*॥ ननु-''तत् सृष्टवा तदेवानुप्राविशत्'' इत्यादिश्रुतेः ''नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः'' इति वक्ष्यमाणन्यायाच्च भोक्तुरेवाविकृतब्रह्मरूपत्वेन भोग्यकारणत्वात् कार्याणां लोके परस्परभेददर्शनेऽपि कारणात् तद्दर्शनस्य त्वयैवाभिहितत्वाद्, विषमोऽयमुपन्यासः-इत्याशङ्क्य मैवमित्याह- *यद्यपीत्यादिना*॥ अन्तःकरणादिकार्योपाध्यनुप्रवेशमन्तरेण ब्रह्मणो भोक्तृत्वासम्भवात् तस्य स्वतो विकारित्वाभावेऽपि तदुपाधिकविकारत्वाद् न दृष्टान्तवैषम्यमित्यभिप्रायः। तथाच प्रत्यक्षादेः सांव्यवहारिकभेदगोचरत्वेन न परमार्थाद्वतश्रुतिविरोधकत्वमिति समुदायार्थः॥१३॥ इति पञ्चमं भोक्त्रापत्त्यधिकरणम्॥

इति वार्तिकम् भोक्त्रापत्त्यधिकरणम् समाप्तम्

प्रदीपः

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्।।१३।। अनेनाधिकरणेन "कार्यात्मना तु नानात्वमभेदः कारणात्मना। हेमात्मना यथाभेदः कुण्डलाद्यात्मना भिदा" इति न्यायेन ब्रह्माभिन्नत्वेऽपि सर्वस्य जगतस्तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायेन न परस्परसाङ्कर्यम्; उक्तन्यायेन येन रूपेणाभेदः, तेनैव रूपेणाभेदस्यैव विवक्षणात्। तथाच "पीतौ तद्वत्प्रसङ्गादि" ति सूत्रेण कारणस्य कार्यभावः परिहृतः, अनेन तु कार्याणामेव परस्परात्मता निरस्यत इति विशेषः। अपरोऽयं विशेषः—यत् कार्याणां स्वरूपतोऽसत्त्वमभिप्रेत्य पूर्वा व्यवस्था, अनेन तु स्वरूपतः सत्त्वं स्वीकृत्याभेदः परिह्रियते। न चैतावता परिणामवादापत्तिः ; भिन्नसत्ताकत्वमात्रेण विवर्तत्वात्। तथाच सत्तात्रैविध्यमभिप्रेत्योक्ताशङ्कापरिहाराविति भावः। सूचयिष्यते चेदं भाष्य एवानन्तराधिकरणोपक्रमे "अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागमि" त्यादिवाक्यैः। तथाच भोक्त्रापत्त्यधिकरणं तदनन्यत्वाधिकरणं च सत्तात्रैविध्यमेकसत्तावादं चाऽऽदाय प्रत्यक्षादिविरोधेन श्रुतेरप्रामाण्यमिति शङ्कापरिहारपरमेव। तत्रानेनाधिकरणेन श्रुतेः पारमार्थिकप्रपञ्चाभावपरत्वात् प्रत्यक्षादेश्च व्यावहारिकप्रपञ्चविषयत्वान्नोभयोर्विरोध इति बोध्यते। तदनन्यत्वाधिकरणेन तु प्रत्यक्षस्य प्रपञ्चसत्त्वाविषयकत्वात् स्वरूपेण तत्सत्त्वनिषेधकश्रुत्या साकमविरोध इति प्रतिपाद्यते।।

तदिदं सिद्धम्—यत् सत्तात्रैविध्यमते प्रत्यक्षादीनामपि प्रमाणत्वम्, एकसत्तावादे तु सन्मात्रविषयकं प्रत्यक्षमेव प्रमाणम्, प्रपञ्चप्रत्यक्षादिकं तु सविकल्पकं भ्रम एवेति। तथाच श्रीभाष्याद्यनूदितसन्मात्रविषयप्रत्यक्षमात्रप्रमात्ववादोऽयं तदनन्यत्वाधिकरणमूलक एव। तत्रैव परमं तात्पर्यं मन्वाना मण्डनमिश्रतत्त्वशुद्धिकारादयस्तु तमेव पक्षमनुवदन्ति। अन्ये तु यथायथं मतद्वयमपीति मन्तव्यम्। तदिदमभिप्रेत्याह— *प्रमाणान्तरप्रसिद्धेति*।।

एतेन—अद्वैतमते प्रत्यक्षादिप्रमाणान्तरासम्भवात् कथं प्रमाणान्तरप्रसिद्धेत्यनुवाद इति शङ्काऽपि—परास्ता; पूर्वोक्तरीत्या प्रत्यक्षादिप्रमाणान्तरत्वमभिप्रेत्यैवोक्ताधिकरणप्रवृत्तेः। *प्रसिद्धो

ह्ययमिति*।। प्रमितो ह्येष इत्यर्थः। अनेन च सूच्यते—व्यवहारकालाबाधितार्थविषयकत्वमेव प्रमात्वम्, न तु कालत्रयाबाधितार्थविषयकत्वम्— इति। तदिदमाह—*न चास्येति*।। बाधनं व्यवहारकालावच्छिन्नमिति, स्वरूपत इति वेति न दोषः। तथा च पारमार्थिकत्वेन प्रपञ्चाभाव एव "नेह नानास्ती" त्यादिश्रुत्यर्थः। एतेन—सिद्धान्तलेशसंग्रहादौ प्रत्यक्षादिबाधोद्धार उत्सूत्र उद्भाष्यश्चेति शङ्का—परास्ता। *अनन्यत्वेऽपीति*।। तादात्म्येऽपीत्यर्थः। तादात्म्यं चेदं भेदसामानाधिकरण्योपलक्षिताभेद एवेति भेदमादाय विभागोपपत्तिः। भेदोऽयं सत्तात्रैविध्यमते व्यावहारिकः, सत्तैक्यवादे तु प्रातिभासिकः। न मतद्वयेऽप्यभेदविरोधी, इति न भेदाभेदमतप्रवेशः। तदिदं सूचयति—*व्यवहार उपलभ्यत इति*।। तथाच वाचारम्भणमात्रं विभाग इति भावः। तदिदं सिद्धम्—यत् कार्यात्मना सर्वेषां परस्परविभागेऽपि कारणात्मनाऽभेदात् तादात्म्यं ब्रह्मप्रपञ्चयोः, इति न भोक्तृभोग्ययोरभेदः स्वरूपतः, न वा परात्मना तेषामन्यत्वं च—इति। तदिदमाह—*न च भोक्तृभोग्ययोरिति*।। यद्यपि भोक्ता जीवो न परमात्मनोऽन्य इति भोक्तृत्वापत्तिरियमनुपपन्नैव, तथाप्यौपाधिको भेदस्तस्यापि परमात्मनो विद्यत इति न दोष इत्याह—*यद्यपीति*।। *समुद्रतरङ्गादिन्यायेनेति*।।

केचित्तु—अनेन दृष्टान्तेन परिणामवादोऽपि भूमिकारूपेणाद्वैततिनामपि सम्मत इति—वदन्ति। तेषामवलम्बः—"आरम्भवादः परिणामवादो विवर्तवादस्य तु भूमिकेयमि" ति वचनमेव। परे तु—व्यावहारिकप्रामाण्यमभिप्रेत्यैवायं दृष्टान्त इति।।१३।। इति पञ्चमं भोक्त्रापत्त्यधिकरणम्।।

इति प्रदीपः भोक्त्रापत्त्यधिकरणम् समाप्तम्

भामती

स्यादेतत्—अतिगम्भीरजगत्कारणविषयत्वं तर्कस्य नास्ति, केवलागमगम्यमेतदित्युक्तं, तत् कथं पुनस्तर्कनिमित्त आक्षेप इत्यत आह *यद्यपि श्रुतिः प्रमाणम् इति*। प्रवृत्ता हि श्रुतिरनपेक्षतया स्वतः प्रमाणत्वेन न प्रमाणान्तरमपेक्षते। प्रवर्तमाना पुनः स्फुटतरप्रतिष्ठितप्रमाण्यतर्कविरोधेन मुख्यार्थात् प्रच्याव्य जघन्यवृत्तितां नीयते, यथा मन्त्रार्थवादावित्यर्थः। अतिरोहितार्थ भाष्यम्। *यथा त्वद्यत्वे इति*। यद्यतीतानागतयोः सर्गयोरेष विभागो न भवेत् ततस्तदेवाद्यतनस्य विभागस्य बाधकं स्यात्, स्वप्नदर्शनस्येव जाग्रद्दर्शनं, न त्वेतदस्ति। अबाधिताद्यतनदर्शनेन तयोरपि तथात्वानुमानादित्यर्थः। इमां शङ्कामापाततोऽविचारितलोकसिद्धदृष्टान्तोपदर्शनमात्रेण निराकरोति सूत्रकारः *स्याल्लोक-वत्*॥१३॥

इति भामती भोक्त्रापत्त्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। **भोक्त्रापत्तेरविभागश्चेतस्याल्लोकवत्**।।१४।।

यदुक्तं पूर्वत्र चिदचित्प्रपञ्चविशिष्टात्मा शिव एवाद्वितीयः कारणं कार्यं च भवतीति विशिष्टशिवाद्वैतम्, तस्य समन्वयसिद्धस्य युक्तिबाधापत्तिरस्ति न वेति संशयः। एवं सति पूर्वपक्षः प्रवर्तते। यदि चिदचिच्छरीरकत्वमिष्यते परमेश्वरस्य तदा शरीरित्वमस्य सिद्धम्। तथा च जीववत् सशरीरत्वेन तस्यापि शरीरसम्बन्धप्रयुक्तसुखदुःखभोक्तृत्वापत्तेरस्मात् संसारिणो जीवात् तस्य परमेश्वरस्याविभागः प्राप्नोति। अतोऽयं जीवः अयमीश्वर इति विशेषानुपपत्त्या जगद्विशिष्टत्ववादे परमेश्वरस्य निर्दोषस्वरूपासिद्धिप्रसङ्ग इत्येवं पूर्वपक्षी मन्यते। नात्र विरोध इति सिद्धान्तः। स्यादेव विभागो जीवात् . परमेश्वरस्य निष्कलङ्कनिखिलमङ्गलाकारत्वेन। न खलु शरीरित्वप्रयुक्त-मनिष्टभोक्तृत्वं, किन्तु पराधीनतवप्रयुक्तमेव, यथा लोके राज्ञः सशरीरत्वेऽप्यनन्यवश्यस्य न स्वाज्ञाननुवृत्तिकृतानिष्टप्रसङ्ग इति। भोक्तृत्वं नेतरसमानम्। **'ज्ञाज्ञौ द्वावजावीशानीशौ'** इति जीवेश्वरयोः स्वातन्त्र्यमस्वातन्त्र्यं च स्वतः सिद्धमेव। अतः स्वतन्त्रस्य परमेश्वरस्य जीवादस्वतन्त्राच्छरीरसम्बन्धसामान्येन नाविभागप्राप्तिः। **नातो विशिष्टाद्वैतहानिः**।।

इति भोक्त्रापत्त्यधिकरणम्।।६।।

इति श्री कण्ठभाष्य भोक्त्रापत्त्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

।।सू।। **भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्**।।१४।। अतिदेशाधिकरणं परित्यज्य प्रधानेन तत्पूर्वाधिकरणेन संगतिं विभावयितुं तदर्थमनुवदति—**यदुक्तमिति**। तत्र सूक्ष्मचिदचिद्विशिष्टश्शिवः कारणं स्थूलचिदचिद्विशिष्टस्स एव कार्यमिति विशिष्टशिवाद्वैतमारंभणाधिकरणे समर्थयिष्यमाणं सिद्धं कृत्वा कार्यकारणावस्थयोर्विशेषणभूतस्य चिदचित्प्रपञ्चस्य तच्छरीरत्वमुपपादितं मनुष्यादिशरीरगतबालत्वयुवत्वादिन्यायेन तद्दोषाणां संस्पर्शः शिवे न भवतीति समर्थनार्थम्। ततश्च चिदचिच्छरीरके ब्रह्मणि वेदांतानां समन्वय इति पर्यवसितम्। इदं नोपपद्यते। शरीरशरीरिधर्माणामसंकरेण व्यवस्थादर्शनेऽपि शरीरिणां शरीरप्रयुक्तसुखदुःखभोक्तृत्वस्यापि दर्शनेन ब्रह्मणोऽपि शरीरित्वे तथात्वप्रसंगादित्याक्षेपिकी संगतिरिति भावः। चेदित्यंतं सूत्रं शिवस्य शरीरित्वे सुखदुःखभोक्तृत्वापत्तेर्जीवाविभागस्तदविशेष आपद्यते चेदित्यर्थमभिप्रेत्य पूर्वपक्षयति – **यदीति। जगद्विशिष्टत्ववादे** जगच्छरीरकत्ववादे। 'स्याल्लोकव' दिति सूत्रांशं सिद्धांतार्थं व्याचष्टे– **स्यादेव विभाग इत्यादिना।** अस्याधिकरणस्य गुहाधिकरणादिषु ब्रह्मणश्शरीरित्वप्रयुक्तशङ्कानिराकरणार्थैरपौनरुक्त्यं प्रथमाध्याय एवाविष्कृतं तत्र तत्र।।

इति भोक्त्रापत्त्यधिकरणम्।।६।।

इति शिवार्कमणिदीपिका भोक्त्रापत्त्यधिकरणम् समाप्तम्

आरम्भणाधिकरणम्।।

शाङ्करभाष्यम्

***तदनन्यत्वमारम्भणशब्दादिभ्यः*।।१४।।**

अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं ''स्याल्लोकवदि'' ति परिहारोऽभिहितः, न त्वयं विभागः परमार्थतोऽस्ति; यस्मात तयोः कार्यकारणयोरनन्यत्वमवगम्यते। कार्यमाकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म। तस्मात् कारणात् परमार्थतोऽनन्यत्वम्=व्यतिरेकेणाभावः कार्यस्यावगम्यते।। कुतः? *आरम्भणशब्दादिभ्यः*।। आरम्भणशब्दस्तावतैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायामुच्यते–''यथा सोम्यैकेन मृत्पिडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' (छा० ६/१/१) इति।।

एतदुक्तं भवति–एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदञ्चनादिकं मृदात्मकत्वाविशेषाद्विज्ञातं भवेत्: यतः– *वाचारम्भणं विकारो नामधेयम्*=वाचैव केवलमस्तीत्यारभ्यते विकारः–घटः शराव उदञ्चनं च–इति, न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति। नामधेयमात्रं ह्येतत=अनृतम्। *मृत्तिकेत्येव सत्यमिति*।। एष ब्रह्मणो दृष्टान्त आम्नातः। तत्र श्रुताद्वाचारम्भणशब्दाद्दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति गम्यते। पुनश्च तेजोऽबन्नानां ब्रह्मकार्यतामुक्त्वा तेजोऽबन्नकार्याणां तेजोऽबन्नव्यतिरेकेणाभावं ब्रवीति–''अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्'' (छा० ६/४/१) इत्यादिना। आरम्भणशब्दादिभ्य इत्यादिशब्दात् ''ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि'' (छा० ६/८/७), ''इदं सर्वं यदयमात्मा'' (बृ० २/४/६), ''ब्रह्मैवेदं सर्वम्'' (मु० २/२/११), ''आत्मैवेदं सर्वम्'' (छा० ७/२५/२), ''नेह नानास्ति किंचन'' (बृ० ४/४/१९) इत्येवमाद्यप्यात्मैकत्वप्रतिपादनपरं वचनजातमुदाहर्तव्यम्। न चान्यथैकविज्ञानेन सर्वविज्ञानं सम्पद्येत। तस्माद्यथा घटकरकाद्याकाशानां महाकाशानन्यत्वम्, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वम्, दृष्टनष्टस्वरूपत्वात्, स्वरूपेणानुपाख्यत्वात्, एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम्।।

ननु-अनेकात्मकं ब्रह्म, यथा वृक्षोऽनेकशाखः, एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म। अत एकत्वं नानात्वं चोभयमपि सत्यमेव। यथा वृक्ष इत्येकत्वम्, शाखा इति नानात्वम्; यथाच समुद्रात्मनैकत्वम्, फेनतरङ्गाद्यात्मना नानात्वम्। यथा च मृदात्मनैकत्वम्, घटशरावाद्यात्मना नानात्वम्। तत्रैकत्वांशेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति, नानात्त्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति। एवं च मृदादिदृष्टान्ता अनुरूपा भविष्यन्ति-इति? नैवं स्यात्; ''मृत्तिकेत्येव सत्यम्'' इति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात्, वाचारम्भणशब्देन च विकारजातस्यानृतत्वाभिधानात्, दार्ष्टान्तिकेऽपि ''ऐतदात्म्यमिदं सर्वं तत्सत्यम्'' इति च परमकारणस्यैवैकस्य सत्यत्वावधारणात्, ''स आत्मा तत्त्वमसि श्वेतकेतो'' इति च शारीरस्य ब्रह्मभावोपदेशात्। स्वयं प्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते, न यत्नान्तरप्रसाध्यम्। अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमवगम्यमान स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते, रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनाम्। बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति, यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत। दर्शयति च-''यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्'' (बृ० ४/५/१५) इत्यादिना ब्रह्मात्मत्वदर्शिन प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्याभावम्।।

न चायं व्यवहाराभावोऽवस्थाविशेषनिवद्धोऽभिधीयत इति युक्तं वक्तुम्; ''तत्त्वमसि'' इति ब्रह्मात्मभावस्यानवस्थाविशेषनिबन्धनत्वात्। तस्करदृष्टान्तेन चानृताभिसन्धस्य बन्धनम्, सत्याभिसन्धस्य च मोक्षं दर्शयन्नेकत्वमेवैकं पारमार्थिकं दर्शयति (छा० ६/१६), मिथ्याज्ञानविजृम्भितं च नातात्वम्। उभयसत्यतायां हि कथं व्यवहारगोचरोऽपि जन्तुरनृताभिसन्ध इत्युच्येत? ''मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'' (बृ० ४/४/१९) इति च भेददृष्टिमपवदन्नेवैतद्दर्शयति। न चास्मिन्दर्शने ज्ञानाद्मोक्ष इत्युपपद्यते; सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात्, उभयसत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्यते?

ननु-कत्वैकान्ताभ्युपगमे नानात्वाभावात्प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन्; निर्विषयत्वात् स्थाण्वादिष्विव पुरुषादिज्ञानानि। तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात्तदभावे व्याहन्येत, मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात्तदभावे व्याघातः स्यात्।।

कथं चानृतेन मोक्षशास्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपपद्येत-इति अत्रोच्यते-नैष दोषः; सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः, स्वप्नव्यवहारस्येव प्राक्प्रबोधात्। यावद्धि न सत्यात्मैकत्वप्रतिपत्ति, तावत्प्रमेयफललक्षणेषु विकारेष्वनृतत्वबुद्धिर्न कस्यचिदुत्पद्यते। विकारानेव त्वहं ममेत्यविद्ययाऽऽत्मात्मीयेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां

हित्वा। तस्मात् प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः। यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्न उच्चावचान् भावान् पश्यतो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति, प्राक्प्रबोधात्, न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति, तद्वत्॥

कथं त्वसत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्यते? न हि रज्जुसर्पेण दष्टो म्रियते। नापि मृगतृष्णिकाम्भसा पानावगाहनादि प्रयोजनं क्रियत इति? नैष दोषः ; शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः, स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्। तत्कार्यमप्यनृतमेवेति चेद् ब्रूयात् ? तत्र ब्रूमः-यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादि कार्यमनृतम्; तथापि तदवगतिः सत्यमेव फलम्; प्रतिबुद्धस्याप्यबाध्यमानत्वात्। नहि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादि कार्यं मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते कश्चित्। एतेन स्वप्नदृशोऽवगत्यबाधनेन देहमात्रात्मवादो दूषितो वेदितव्यः। तथाच श्रुतिः-'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने'' (छा० ५/२/९) इत्यसत्येन स्वप्नदर्शनेन सत्यायाः समृद्धेः प्रतिपत्तिं दर्शयति। तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु ''न चिरमिव जीविष्यतीति विद्यात्'' इत्युक्त्वा ''अथ स्वप्ने यः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति'' इत्यादिना तेन तेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति। प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानाम् -ईदृशेन स्वप्न दर्शनेन साध्वागमः सूच्यते, ईदृशेनासाध्वागमः-इति। तथाऽकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः॥

अपिचान्त्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकम्, नातः परं किञ्चिदाकाङ्क्ष्यमस्ति। यथा हि लोके यजेतेत्युक्ते किं केन कथमित्याकाङ्क्ष्यते, नैवं ''तत्त्वमसि'' ''अहं ब्रह्मास्मि'' इत्युक्ते किंचिदन्यदाकाङ्क्ष्यमस्ति; सर्वात्मैकत्वविषयत्वादवगतेः। सति ह्यन्यस्मिन्नवशिष्यमाणेऽर्थ आकाङ्क्षा स्यात्। न त्वात्मैकत्वव्यतिरेकेणा- वशिष्यमाणोऽन्योऽर्थोऽस्ति, य आकाङ्क्ष्येत। न चेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुम्; ''तद्धास्य विजज्ञौ'' (छा० ६/१६/३) इत्यादिश्रुतिभ्यः।, अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधानात्। न चेयमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुम्; अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च। प्राक्चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम। तस्मादन्त्येन प्रमाणेन प्रतिपादित आत्मैकत्वे समस्तस्य प्राचीनस्य भेदव्यवहारस्य बाधितत्वान्नानेकात्मकब्रह्मकल्पनावकाशोऽस्ति॥

ननु-मृदादिदृष्टान्तप्रणयनात्परिणामवद् ब्रह्म शास्त्रस्याभिमतमिति गम्यते। परिणामिनो हि मृदादयोऽर्था लोके समधिगताः-इति। नेत्युच्यते; ''स वा एष महानज आत्माऽजरोऽमरोऽभयो ब्रह्म''

(बृ० ४/४/२५) ''स एष नेति नेत्यात्मा'' (बृ० ३/९/२६), ''अस्थूलमनणु'' (बृ० ३/८/८) इत्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थत्वावगमात्। न ह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुम्।।

स्थितिगतिवत्स्यादिति चेत्, न; कूटस्थस्येति विशेषणात्। न हि कूटस्थस्य ब्रह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं सम्भवति। कूटस्थं च नित्यं ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम, न च यथा ब्रह्मण आत्मैकत्वदर्शनं मोक्षसाधनम्, एवं जगदाकारपरिणामित्वदर्शनमपि स्वतन्त्रमेव कस्मैचित्फलायाभिप्रेयते; प्रमाणाभावात्। कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रम्–''स एष नेति नेत्यात्मा'' इत्युपक्रम्य ''अभयं वै जनक प्राप्तोऽसि'' (बृ० ४/२/४) इत्येवञ्जातीयकम्। तत्रैतत्सिद्धं भवति–ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत् तत्राफलं श्रूयते–ब्रह्मणो जगदाकारपरिणामित्वादि, तद् ब्रह्मदर्शनोपायत्वेनैव विनियुज्यते; फलवत्संनिधावफलं तदङ्गमितिवत्, न तु स्वतन्त्रं फलाय कल्प्यत इति। न हि परिणामवत्त्वविज्ञानात्परिणामवत्त्वमात्मनः फलं स्यादिति वक्तुं युक्तम्; कूटस्थनित्यत्वान्मोक्षस्य।। ननु–कूटस्थब्रह्मात्मवादिन एकत्वैकान्त्यादीशित्री- शितव्याभाव ईश्वरकारणप्रतिज्ञाविरोध इति–चेत्, न; अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात सर्वज्ञत्वस्य। ''तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'' (तै० २/१) इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात्सर्वज्ञात् सर्वशक्तेरीश्वराजगज्ज-निस्थितिप्रलयाः, नाचेतनात्प्रधाना- दन्यस्माद्वेत्येषोऽर्थः प्रतिज्ञातः– ''जन्माद्यस्य यतः'' (ब्र० सू० १/१/४) इति। सा प्रतिज्ञा तदवस्थैव, न तु तद्विरुद्धोऽर्थः पुनरिहोच्यते।।

कथं नोच्यतेऽत्यन्तमात्मन एकत्वमद्वितीयत्वं च–ब्रुवता? शृणु, यथा नोच्यते। सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते। ताभ्यामन्यः सर्वज्ञ ईश्वरः; ''आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म'' (छा० ८/१४/१) इति श्रुतेः, ''नामरूपे व्याकरवाणि'' (छा० ६/३/२), ''सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते'' (तै० आ० ३/१२/७), ''एकं बीजं बहुधा यः करोति'' (श्वे० ६/१२) इत्यादिश्रुतिभ्यश्च। एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति, व्योमेव घटकरकाद्युपाध्यनुरोधि। स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान्विज्ञानात्मनः प्रतीष्टे व्यवहारविषये। तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्ययाऽपास्तसर्वोपाधिस्वरूप आत्मनीशित्रीशितव्य- सर्वज्ञत्वादिव्यवहार उपपद्यते। तथाचोक्तम्–''यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा'' (छा० ७/२४/१) इति,

"यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" (बृ० ४/५/१५) इत्यादिना च। एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ताः सर्वे। तथेश्वरगीतास्वपि—"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसयोगं स्वभावस्तु प्रवर्तते।। नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" (गी० ५/१४/१५) इति परमार्थावस्थायामीशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते। व्यवहारावस्थायां तूक्तः श्रुतावपीश्वरादिव्यवहारः—"एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय" (बृ० ४/४/२२) इति। तथा चेश्वरगीतास्वपि—"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया" (गी० १८/६१) इति। सूत्रकारोऽपि—परमर्थाभिप्रायेण तदनन्यत्वमित्याह, व्यवहाराभिप्रायेण तु "स्याल्लोकवदि" ति महासमुद्रस्थानीयतां ब्रह्मणः कथयति। अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां चाश्रयति सगुणेषूपासनेषूपयोक्ष्यते—इति।।१४।।

***भावे चोपलब्धेः*।।१५।।**

इतश्च कारणादन्यत्वं कार्यस्य, यत्कारणम्—भाव एव कारणस्य कार्यमुपलभ्यते, नाभावे। तद्यथा—सत्यां मृदि घट उपलभ्यते, सत्सु च तन्तुषु पटः। न च नियमेनान्यभावेऽन्यस्योपलब्धिर्दृष्टा। न ह्यश्वो गोरन्यः सन् गोर्भाव एवोपलभ्यते। न च कुलालभाव एव घट उपलभ्यते; सत्यपि निमित्तनैमित्तिकभावेऽन्यत्वात्।।

ननु—अन्यस्य भावेऽप्यन्यस्योपलब्धिर्नियता दृश्यते, यथाऽग्निभावे धूमस्य-इति, नेत्युच्यते; उद्वापितेऽप्यग्नौ गोपालघुटिकादिधारितस्य धूमस्य दृश्यमानत्वात्। अथ—धूमं कयाचिदवस्थया विशिंष्यात-ईदृशो धूमो नासत्यग्नौ भवतीति, नैवमपि कश्चिद्दोषः ; तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदामः। न चासावग्निधूमयोर्विद्यते।। *भावाच्चोपलब्धेरिति* वा सूत्रम्। न केवलं शब्दादेव कार्यकारणयोरनन्यत्वम्; प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमित्यर्थः। भवति हि प्रत्यक्षोपलब्धिः कार्यकारणयोरनन्यत्वे। तद्यथा—तन्तुसंस्थाने पटे तन्तुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते, केवलास्तु तन्तव आतानवितानवन्तः प्रत्यक्षमुपलभ्यन्ते, तथा तन्तुष्वंशवः, अंशुषु तदवयवाः। अनया प्रत्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि, ततो वायुमात्रमाकाशमात्रं चेत्यनुमेयम् (छा० ६/४)। ततः परं ब्रह्मैकमेवाद्वितीयम्। तत्र सर्वप्रमाणानां निष्ठामवोचाम्।।१५।।

***सत्त्वाच्चावरस्य*।।१६।।**

इतश्च कारणात्कार्यस्यानन्यत्वम्, यत्कारणं प्रागुत्पत्तेः कारणात्मनैव कारणे सत्त्वमवरकालीनस्य कार्यस्य श्रूयते; "सदेव सोम्येदमग्र आसीत्" (छा० ६/२/१), "आत्मा वा इदमेक एवाग्र आसीत्"

(ऐ० आ० २/४ १/१) इत्यादाविदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात्। यच्च यदात्मा यत्र न वर्तते, न तत् तत उत्पद्यते, यथा सिकताभ्यस्तैलम्। तस्मात्प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेव कारणात्कार्यमित्यवगम्यते। यथाच कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति। एकं च पुनः सत्त्वमतोऽप्यनन्यत्वं कारणात्कार्यस्य॥१६॥

***असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्॥१७॥**

ननु–क्वचिदसत्त्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति श्रुतिः–"असदेवेदमग्र आसीत्" (छा० ३/१९/१) इति, "असद्वा इदमग्र आसीत्" (तै० २/७/१) इति च। तस्मात् *असद्व्यपदेशात्* न प्रागुत्पत्तेः कार्यस्य सत्त्वमिति चेत्, नेति ब्रूमः–न ह्ययमत्यन्तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः। किं तर्हि? व्याकृतनामरूपादधर्मादव्याकृतनामरूपत्वं धर्मान्तरम्, तेन धर्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य॥

कथमेतदवगम्यते? वाक्यशेषात्। यदुपक्रमे संदिग्धार्थं वाक्यम्, तत्शेषान्निश्चीयते। इह च तावत् "असदेवेदमग्र आसीत्" इत्यसच्छब्देनोपक्रमे निर्दिष्टं यत्, तदेव पुनस्तच्छब्देन परामृश्य सदिति विशिनष्टि–"तत्सदासीत्" इति। असतश्च पूर्वापरकालासम्बन्धादासीच्छब्दानुपपत्तेश्च। "असद्वा इदमग्र आसीत्" इत्यत्रापि "तदात्मानं स्वयमकुरुत" इति वाक्यशेषे विशेषणान्नात्यन्तासत्त्वम्। तस्माद्धर्मान्तरेणैवायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य। नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्रसिद्धम्। अतः प्राङ् नामरूपव्याकरणादसदिवासीदित्युपचर्यते॥१७॥

***युक्तेः शब्दान्तराच्च*॥१८॥**

युक्तेश्च प्रागुत्पत्तेः कार्यस्य सत्त्वमनन्यत्वं च कारणादवगम्यते, शब्दान्तराच्च। युक्तिस्तावद्वर्ण्यते–दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यन्ते। न हि दध्यर्थिभिर्मृत्तिकोपादीयते, न घटार्थिभिः क्षीरम्, तद् असत्कार्यवादे नोपपद्येत। अविशिष्टे हि प्रागुत्पत्तेः सर्वस्य सर्वत्रासत्त्वे कस्मात्क्षीरादेव दध्युत्पद्यते–न मृत्तिकायाः, मृत्तिकाया एव च घट उत्पद्यते, न क्षीरात्? अथाविशिष्टेऽपि प्रागसत्त्वे क्षीर एव दध्नः कश्चिदतिशयः, न मृत्तिकायाम्, मृत्तिकायामेव च घटस्य कश्चिदतिशयो, न क्षीर इत्युच्येत, तर्ह्यतिशयवत्त्वात्प्रागवस्थाया असत्कार्यवादहानिः, सत्कार्यवादसिद्धिश्च॥ शक्तिश्च कारणस्य कार्यनियमार्था कल्प्यमाना नान्याऽसती वा कार्यं नियच्छेत्; असत्त्वाविशेषादन्यत्वाविशेषाच्च। तस्मात् कारणस्यात्मभूता शक्तिः, शक्तेश्चात्मभूतं कार्यम्॥ अपि च कार्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिषवद्भेदबुद्ध्यभावात्तादात्म्यमभ्युपगन्तव्यम्। समवायकल्पनायामपि समवायस्य समवायिभिः

सम्बन्धेऽभ्युपगम्यमाने तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्थाप्रसङ्गः, अनभ्युपगम्यमाने च विच्छेदप्रसङ्गः।।

अथ समवायः स्वयं सम्बन्धरूपत्वादनपेक्ष्यैवापरं सम्बन्धं सम्बध्यते? संयोगोऽपि तर्हि स्वयं सम्बन्धरूपत्वादनपेक्ष्यैव समवायं सम्बध्येत। तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पनानर्थक्यम्।।

कथं च कार्यमवयविद्रव्यं कारणेष्ववयवद्रव्येषु वर्तमानं वर्तेत– किं समस्तेष्ववयवेषु वर्तेत, उत प्रत्यवयवम्। यदि तावत्समस्तेषु वर्तेत, ततोऽवयव्यनुपलब्धिः प्रसज्येत, समस्तावयवसनिकर्षस्याशक्यत्वात्। न हि बहुत्वं समस्तेष्वाश्रयेषु वर्तमानं व्यस्ताश्रयग्रहणेन गृह्यते। अथावयवशः समस्तेषु वर्तेत, तदाप्यारम्भकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन्, यैरारम्भकेष्ववयवेष्ववयवशोऽवयवी वर्तेत, कोशावयवव्यतिरिक्तैर्ह्यवयवैरसिः कोशं व्याप्नोति। अनवस्था चैवं प्रसज्येत; तेष्ववयवेषु वर्तयितुमन्येषामवयवानां कल्पनीयत्वात्। अथ प्रत्यवयवं वर्तेत, तदैकत्र व्यापारेऽन्यत्राव्यापारः स्यात्। न हि देवदत्तः स्रुघ्ने संनिधीयमानस्तदहरेव पाटलिपुत्रेऽपि संनिधीयेत; युगपदनेकत्र वृत्तावनेकत्वप्रसङ्गः स्यात्। देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलिपुत्रनिवासिनोः।। गोत्वादिवत्प्रत्येकं परिसमाप्तेर्न दोष इति चेत्? न; तथा प्रतीत्यभावात्। यदि गोत्वादिवत् प्रत्येकं परिसमाप्तोऽवयवी स्यात्–यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते, एवमप्यवयवी प्रत्यवयवं प्रत्यक्षं गृह्येत। न चैवं नियतं गृहते। प्रत्येकं परिसमाप्तौ वाऽवयविनः कार्येणाधिकारात् तस्य चैकत्वाच्छृङ्गेणापि स्तनकार्यं कुर्यात, उरसा च पृष्ठाकार्यम्। न चैवं दृश्यते।।

प्रागुत्पत्तेश्च कार्यस्यासत्त्व उत्पत्तिरकर्तृका निरात्मिका च स्यात्। उत्पत्तिश्च नाम क्रिया, सा सकर्तृकैव भवितुमर्हति गत्यादिवत्। क्रिया च नाम स्यात्, अकर्तृका चेति विप्रतिषिध्येत। घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका, किं तर्हि? अन्यकर्तृकेति कल्प्या स्यात्। तथा कपालादीनामप्युत्पत्तिरुच्यमानाऽन्यकर्तृकैव कल्प्येत। तथाच सति घट उत्पद्यत इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्तं स्यात्। न च लोके घटोत्पत्तिरित्युक्ते कुलालादीनामप्युत्पद्यमानता प्रतीयते।।

उत्पन्नताप्रतीतेश्च। अथ स्वकारणसत्तासम्बन्ध एवोत्पत्तिरात्मलाभश्च कार्यस्येति चेत्, कथमलब्धात्मकं सम्बध्येतेति वक्तव्यम्। सतोर्हि द्वयोः सम्बन्धः सम्भवति, न सदसतोरसतोर्वा। अभावस्य च निरुपाख्यत्वात्प्रागुत्पत्तेरिति मर्यादाकरणमनुपपन्नम्। सतां हि लोके क्षेत्रगृहादीनां मर्यादा दृष्टा, नाभावस्य। न हि बन्ध्यापुत्रो राजा बभूव प्राक्पूर्णवर्मणोऽभिषेकादित्येवञ्जातीयकेन मर्यादाकरणेन निरुपाख्यो बन्ध्यापुत्रो राजा बभूव भवति, भविष्यतीति वा विशेष्यते। यदि च

वन्ध्यापुत्रोऽपि कारकव्यापारादूर्ध्वमभविष्यत्, तत इदमप्युपापत्स्यत–कार्याभावोऽपि कारकव्यापारादूर्ध्वं भविष्यतीति। वयं तु पश्यामः–वन्ध्यापुत्रस्य कार्याभावस्य चाभावत्वाविशेषाद् यथा वन्ध्यापुत्रः कारकव्यापारादूर्ध्वं न भविष्यति, एवं कार्याभावोऽपि कारक व्यापारादूर्ध्वं न भविष्यति–इति।।

ननु–एवं सति कारकव्यापारोऽनर्थकः प्रसज्येत। यथैव हि प्राक्सिद्धत्वात्कारणस्वरूपसिद्धये न कश्चिद्व्याप्रियते, एवं प्राक्सिद्धत्वात्तदनन्यत्वाच्च कार्यस्य स्वरूपसिद्धयेऽपि न कश्चिद्व्याप्रियेत, व्याप्रियते च। अतः कारकव्यापारार्थवत्त्वाय मन्यामहे–प्रागुत्पत्तेरभावः कार्यस्येति। नैष दोषः ; यतः कार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते। कार्याकारोऽपि कारणस्यात्मभूत एव; अनात्मभूतस्यानारभ्यत्वादित्यभाणि। न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति। न हि देवदत्तः सङ्कोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति; स एवेति प्रत्यभिज्ञानात्। तथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति; मम पिता, मम भ्राता, मम पुत्र इति प्रत्यभिज्ञानात्।।

जन्मोच्छेदानन्तरितत्वात्तत्र युक्तं नान्यत्रेति चेत्, न; क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात्। अदृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा। तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसंज्ञा। तत्रेदृग्जन्मोच्छेदान्तरितत्वाच्चेदसतः सत्त्वापत्तिः, तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसङ्गः। तथाच बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्गः, पित्रादिव्यवहारलोपप्रसङ्गश्च। एतेन क्षणभङ्गवादः प्रतिवदितव्यः।। यस्य पुनः प्रागुत्पत्तेरसत्कार्यम्, तस्य निर्विषयः कारकव्यापारः स्यात्; अभावस्य विषयत्वानुपपत्तेः आकाशहननप्रयोजनखड्गाद्यनेकायुधप्रयुक्तिवत्।।

समवायिकारणविषयः कारकव्यापारः स्यादिति चेत्, न; अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसङ्गात्।। समवायिकारणस्यैवात्मातिशयः कार्यमिति चेत्, न; सत्कार्यतापत्तेः। तस्मात्क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां लभन्ते, इति न कारणादन्यत्कार्यं वर्षशतेनापि शक्यं निश्चेतुम्। तथा मूलकारणमेवान्त्यात्कार्यात्तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते।। एवं युक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं च कारणादवगम्यते। शब्दान्तराच्चैतदवगम्यते। पूर्वसूत्रेऽसद्व्यपदेशिनः शब्दस्योदाहृतत्वात्ततोऽन्यः सद्व्यपदेशी शब्दः=शब्दान्तरम्–"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादि। "तद्धैक आहुरसदेवेदमग्र आसीत्" इति चासत्पक्षमुपक्षिप्य "कथमसतः सज्जायेत" इत्याक्षिप्य "सदेव

सोम्येदमग्र आसीत्'' (छा० ६/२/१) इत्यवधारयति। तत्रेदंशब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सच्छब्दावाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्त्वात्सत्त्वानन्यत्वे प्रसिद्धयतः। यदि तु प्रागुत्पत्तेरसत्कार्यं स्यात्, पश्चाच्चोत्पद्यमानं कारणे समवेयात्, तदाऽन्यत्कारणात् स्यात्। तत्र ''येनाश्रुतं श्रुतं भवति'' (छा० ६/१/३) इतीयं प्रतिज्ञा पीडयेत। सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते।।१८।।

***पटवच्च*।।१९।।**

यथा च संवेष्टितः पटो न व्यक्तं गृह्यते–किमयं पटः, किं वाऽन्यद् द्रव्यमिति। स एव प्रसारितो यत्संवेष्टितं द्रव्यम्, तत्पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते। यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते, स एव प्रसारणसमये विशिष्टायामविस्तारो गृह्यते, न संवेष्टितरूपादन्योऽयं भिन्नः पटः–इति। एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत् तुरीवेमकुविन्दादिकारकव्यापारादिभिर्व्यक्तं स्पष्टं गृह्यते। अतः संवेष्टितप्रसारितपटन्याये-नैवानन्यत्कारणात्कार्यमित्यर्थः।।१९।।

***यथा च प्राणादि*।।२०।।**

यथा च लोके प्राणापानादिषु प्राणायामेन निरुद्धेषु कारणमात्रेण रूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते, नाकुञ्चनप्रसारणादिकं कार्यान्तरम्। तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनप्रसारणादिकमपि कार्यान्तरं निर्वर्त्यते। न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वम्; समीरणस्वभावाविशेषात्; एवं कार्यस्य कारणादन्यत्वम्। अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा–''येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'' (छा० ६/१/१) इति।।२०।। इति षष्ठमारम्भणाधिकरणम्।।

इति शाङ्करभाष्यम् आरम्भणाधिकरणम् समाप्तम्

वार्तिकम्

अथ कार्यकारणयोस्तादात्म्याभ्युपगमे कार्याणामपि कारणानन्यत्वेन वस्तुगत्या परस्परमभेदसिद्धेः कारणसत्ताव्यतिरेकेण कार्यसत्तायाः पृथगनभ्युपगमाद् न तेषां पारमार्थिकाभेदव्यवहार उपपद्येत; प्रत्यक्षादेरपि प्रमाणत्वेन परमार्थविषयत्वात्। तथाचास्ति प्रत्यक्षादिना श्रुतिप्रमाणस्य विरोध इति–द्वितीयः पक्षः, तन्न; बलवच्छ्रुतिप्रमाणविरोधेन प्रत्यक्षादेः पारमार्थिकभेदविषयानुपपत्तेः, इत्याह–*तदनन्यत्वमारम्भणशब्दादिभ्यः*।।१४।।

बलवत्त्वं च श्रुतेः–अपौरुषेयत्वेन दोषाशङ्कारहितत्वात्, अनन्यथासिद्धत्वाच्च। प्रत्यक्षादेश्च शुक्तिरजतादौ व्यभिचारदर्शनाद् व्यावहारिकभेदमादायान्यथासिद्धेश्चेति दौर्बल्यम्। यथा चैतत्, तथोपपादितमस्माभिरध्यासभाष्ये, इति नात्र विस्तार्यते। भगवांस्तु भाष्यकारः सांव्यवहारिकमपि प्रपञ्चभेदमसहमानः परमार्थसत्तैकनिष्ठ आह–*अभ्युपगम्य चेमं व्यावहारिकमिति*।। ननु–यदि कारणात् परमार्थभूताद् अनन्यत्वमाकाशादेः कार्यस्य, हन्त तर्हि कार्यधर्मसंसर्गादिदोषः कारणस्य प्रसज्येत, इत्याशङ्क्य, नानन्यत्वमैक्यं ब्रूमः, येनोक्तदोषः स्यात्ः किं तर्हि? व्यतिरेकेण स्वरूपाभाव इत्याह–*व्यतिरेकेणाभावः कार्यस्यावगम्यत इति*।। न कारणात् कार्यस्य परमार्थतो भेदोऽस्ति। यस्तु प्रतीयमानः, स मिथ्याऽनिर्वचनीय इति मन्तव्यम्। कस्मादेवमवगन्तव्यम्? आरम्भणशब्दादिभ्यः।।

अत्र–आरम्भणपदेन वाचारम्भणवाक्ये श्रूयमाणमारम्भणमितिपदम्, तदुपलक्षितं तद् वाक्यं वा परिगृह्यते। यद्यप्यारम्भणशब्द आरम्भपर्यायत्वात् आद्यायां कृतौ रूढः ; तथापि कार्यापरपर्यायविकारपदसामानाधिकरण्यात् तस्यायोग्यत्वेन रूढयर्थबाधे सति योगेन तद्विषयं कर्मकारकमभिधत्ते; आरभ्यत इत्यारम्भणमिति योगसम्भवात्। तत्र यद्याद्यकृतिः चिकीर्षा, यदि वा तदनन्तरभावी प्रयत्नः, उभयथापि तद्विषयत्वं विकारस्याभिदधद् आरम्भणशब्दः स्वोपादानाभेदं ज्ञापयति। कुतः? कर्मकारकस्यैव तदुभयविषयत्वात्; सिद्धस्यैवोपादानस्य तत्त्वात्,

असिद्धस्योपादेयस्य कारकत्वानुपपत्तेः। ननु–इच्छाकृत्योरसिद्धविषयत्वात् कथमेवमुच्यत इति–चेत्, मैवम्; तदुद्देश्यत्वेनासिद्धे तद्विषयत्वोपचारात्, सिद्धस्यैव साक्षात् तद्विषयत्वात्, उपादानगोचरचिकीर्षाकृतिमतः कर्तृत्वाभिधानात्। अत एवोपादानस्यैव साक्षात् कृतिविषयत्वं पश्यद्भिस्तार्किकैरपि 'घटं करोती' त्यादिवाक्ये लक्षणाऽङ्गीकृता, अस्मन्मते तु न लक्षणादोषोऽपि; तदुपादानस्यैवावस्थाविशेषविशिष्टस्य घटशब्दवाच्यत्वाद् आरम्भणश्रुतिप्रमाण्यात्। ननु–यद्युपादानकारणमेवारभ्यते, कृतिविषयत्वात् तस्य, न विकारः ; तस्य तत्काले तद्व्यतिरेकेणासत्त्वात्, हन्त तर्हि 'मृदेवारम्भणमि' ति वाच्यम्, न विकार आरम्भणम्'–इति चेत्, तत्राह–भगवती श्रुतिर्वाचेति।। सत्यमेवम्–परमार्थतो विकारो नारभ्यते; तस्य तत्काले कारणव्यतिरेकेणासत्त्वाद् व्यापारविषयत्वायोगात्, नाप्युपादानम्; तस्य कर्तृव्यापारात् पूर्वमपि सिद्धत्वात्, अतो विवक्षितविवेकेन वाचैव केवलं विकार आरभ्यत इत्युच्यते लोकैः, न पुनस्तस्य वचनस्यार्थोऽस्ति; तस्य निर्वक्तुमशक्यत्वात्–'राहोः शिरः' इति वाक्यार्थवत्। न हि तस्य वचनस्यार्थोऽस्ति।।

किमर्थं तादृशं वचनं प्रयुज्यते? विनियुज्यतां त्वया सर्वो लोकः–किमर्थमेवं प्रयोगं करोतीति? सर्वो हि लोको मृदादिविषयव्यापारवन्तमप्यात्मानमुपलभ्य घटम्, कटम्, पट वाऽहं करोमीति परं बोधयितुं प्रयुङ्क्ते, न पुनः–'मृदम्, वीरणम्, तन्तून् वाऽन्यथा करोमी' ति, परोऽपि तथैव प्रतिपद्यान्यं प्रति प्रयुङ्क्ते–घटं कटं पटं वाऽयं करोतीति, न पुनरन्यथा। अतः सर्वलोकसाधारण्येन देहात्मभाववद् विनियोगानर्हत्वाद् भ्रान्तोऽयं सर्वो लोक इति लोकवृत्तदर्शिन्या श्रुत्या भ्रान्तिः ख्याप्यते–"वाचारम्भणं विकारः" इति निरवद्यम्। 'वाचारम्भणम्' इत्यैकपद्यपक्षेऽप्येतदेव व्याख्यातम्, परं तु सूत्रे भामाशब्देन सत्यभामाग्रहणवद् आरम्भणशब्देन तदवयवेन तद्ग्रहणमिति मन्तव्यम्। ननु–भवतु नामोत्पत्तेः पूर्वं तत्काले वा विकारस्य कारणव्यतिरेकेणासत्त्वाद् वाचारम्भणता, तदूर्ध्वं तु वर्तमानकाले तस्य प्रत्यक्षसिद्धत्वात् पृथगर्थक्रियादर्शनाच्च न तथात्वम्–इति, नेत्याह– *नामधेयमिति*।। यथाऽऽरम्भकाले वागारम्भणत्वाद् नामधेयमात्रमधिकं कारणाद् विकारः, न पुनः पृथक् ततो रूपधेयमस्तीत्युक्तम्, तथा वर्तमानकालेऽपि वागारम्भणत्वादेव नामधेयमात्रमेवैतत्; वस्तुनो द्वैरूप्यासंभवात्। न हि उष्णैकस्वभावोऽग्निः कालभेदात् कदाचिदुष्णः, कदाचिच्च शीतो भवतीति दृष्टपूर्वः, न वा नामभेदेन वस्तुभेदो भवति; एकस्यापि वस्तुनोऽनेकनामदर्शनात्। अपर्यायमनेकं नामैकस्य न दृष्टमिति चेत्, न; अपर्यायाणामप्यनेकेषां नाम्नामेकत्र दर्शनात्–पाचकः, पावकः, महाचार्यः, गौरः, बालः, युवा, वृद्धः, पिता, पुत्रः, नप्ता,

श्वशुरः, जामाता–इति। क्रियागुणावस्थानिमित्तान्यनेकान्यपर्यायाण्यपि दृष्टान्येकत्र नामानीति चेत्, मैवम्; मनुष्यः, ब्राह्मणः, सन् इति जातिनिमित्तानामप्यपर्यायाणामेकत्र दर्शनात्।।

अपि च घटत्वादिजातिरप्यस्मद्राद्धान्ते तदुपादानं सामान्यमेव, न ततो व्यतिरिच्यते; अनिरूपणात्। तस्मादपि न नामभेदे वस्तुभेदोऽस्ति। एतेन–अर्थक्रियाभेदाद् वस्तुभेद इति–अपास्तम्; स्थायिन एकस्याप्यनेकार्थक्रियादर्शनात्। अव्यवस्थितानां तथात्वमस्तु, न व्यवस्थितानाम्; तासां वस्तुभेदकत्वदर्शनात्। अस्ति च प्रकृतेऽप्यर्थक्रियाव्यवस्था। न हि घटेन या जलाहरणार्थक्रिया, सा मृदा भवति, नापि मृदा या घटाद्यरम्भार्थक्रिया, सा घटेनेति चेत्, न; संवलितप्रसारितपटयोरर्थक्रियाव्यवस्थानेऽपि भेदादर्शनात्। संवलितो हि पटो बन्धनाद्यर्थक्रियां करोति, न प्रावरणम्; असामर्थ्यात्। स एव प्रसारितश्च प्रावरणम्, न बन्धनादि; असामर्थ्यात्। तस्माद् नार्थक्रियाव्यवस्थाऽपि वस्तुव्यवस्थापिका।।

यत्तु प्रत्यक्षेण वर्तमानकाले कार्यं कारणाद्विभिन्नं सिद्धम्–इत्युक्तम्, तद् न; शुक्तिरजतादिप्रत्ययवत् तस्य मिथ्यात्वात्। ननु–न प्रत्यक्षत्वं मिथ्यात्वे प्रयोजकम्; अतिप्रसङ्गात्, किं तर्हि? बाध्यत्वम् शुक्तिरजतभेदप्रत्यक्षं तु तथा; अग्रे बाधदर्शनात्, न कार्यकारणभेदाध्यक्षम्; तस्य तददर्शनादिति–चेत्, न; देहात्मप्रत्यवदविवेकिनां व्यवहारकाले तदबाधेऽपि विवेकिनो विचारेण तद्बाधोपपत्तेस्तददर्शनासिद्धेः। यथा च भेदप्रत्ययो विचारं न सहते, तथा वक्ष्यामः।। अपि च कार्यकारणयोर्भेदाध्यक्षवदभेदाध्यक्षमपि सार्वजनीनमस्ति। तत्र भेदाभेदयोः परस्परं विरुद्धयोः शीतोष्णयोरिवैकत्रासंभवाद् उभयबाधकल्पने गौरवापत्तेर्निरधिष्ठानबाधानुपपत्तेश्चैकतरावशेष एकतरबाधे च कल्प्यमाने–किमंशोऽवशिष्यताम्, किमंशो वा बाध्यताम्–किं भेदांशमधिष्ठायाभेदांशो वा बाध्यताम्, किं वाऽभेदांशमधिष्ठाय भेदांशो वा बाध्यतामिति भवन्त एव विदाङ्कुर्वन्तु। वयं तु पश्यामः–अभेदांशमधिष्ठायैव भेदांशबाधनं युक्तम्, न वैपरीत्यमिति। कुतः? अभेदस्य स्वरूपापरपर्यायत्वेन निरपेक्षसिद्धत्वात्, तथाभूतस्यैव शुक्तयादेरधिष्टानत्वदर्शनात्, भेदस्य तु धर्मिप्रतियोगिस्वरूपसिद्ध्यधीनसिद्धिकत्वेन रजतादेरिव सापेक्षत्वात् तथाभूतस्य विरोधात्, कर्मकाण्डविरोधाच्च।।

प्रत्यक्षादिप्रमाणैस्तर्हि प्रपञ्चसय सत्यत्वमावेद्यते। न हि यत् प्रमाणसिद्धम्, तदनृतमिति स्वस्थमतिभिर्वक्तुं शक्यते। तथा सति किं नाम सत्यं भवेत्? ब्रह्मणोऽप्यसत्यत्वप्रसङ्गात्, प्रमाण–प्रमेयार्थत्वाविशेषात्।। तेन–कर्मकाण्डविरोधोऽपि–व्याख्यातः। ब्रह्मकाण्डविरोधश्च; तस्यापि प्रमाण–प्रमातृभेदसापेक्षत्वात्। अतः सर्वाव्याकुलार्थमेकानेकात्मकं पारमार्थिकं वृक्षवद्

ब्रह्माभ्युपगन्तव्यम्; यथा वृक्ष एकानेकात्मक:-वृक्षात्मनैक:, शाखा-विटपाद्यात्मना चानेक:, इत्युभयरूपोऽपि पारमार्थिक: ; प्रत्यक्षप्रमाणसिद्धत्वात्, एवं ब्रह्मापि स्वात्मनैकम्, प्रपञ्चात्मना चानेकम्, इत्युभयरूपं सत्यमेव; सर्वप्रमाणसिद्धत्वात्। अत एव वृक्षसामान्यात् श्रुतिस्मृतिवादेषु वृक्षरूपेण ब्रह्म गीयते; "उर्ध्वमूलवाक्शाखमेषोऽश्वत्थ: सनातन:" इति श्रुते:, "उर्ध्वमूलमवाक्शाखमश्वत्थं प्राहुरव्ययम्"। इति स्मृतेश्च। समुद्रवच्च-यथा वा समुद्र: स्वात्मनैक:, फेनबुद्बुदाद्यात्मना चानेक:, इत्युभयरूपोऽपि पारमार्थिक एव, तद्वत्। तथाच समुद्रनिदर्शनं ब्रह्मण: श्रुतौ यत् पठयते-"यथा सर्वासामपां समुद्र एकायनमेवति" ति। मृदादिवद्वा-यथा वा मृदादिरेकानेकात्मक:-स्वात्मनैकोऽपि सन् विकारात्मनाऽनेक:-इति। अत एव मृदादिदृष्टान्ता ब्रह्मण: श्रुतौ भवन्ति-"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादि" त्यादिरूपा:। ननु-ब्रह्मणो मृदादिवदेकानेकात्मत्वे कार्त्स्न्येनार्वाचीनैर्ज्ञातुमशक्यत्वेन तत्त्वज्ञानाभावाद् अनिर्मोक्षप्रसङ्ग इति-चेत्, मैवम्; एकत्वांशेन तत्त्वज्ञानस्यैव मोक्षार्थतया विधानात्, तस्य च कर्तं शक्यत्वाद् मोक्षोपपत्ते:। न च एवं सत्येकत्वांश एव ब्रह्मण: पारमार्थिकोऽस्तु, न नानात्वांश इति-वाच्यम्; तस्यापि लौकिकवैदिकव्यवहारालम्बनत्वेन सत्यत्वादित्युक्तत्वात्। अपि , चास्मन्मते मृदादिदृष्टान्ता ब्रह्मणोऽनुरूपा भवन्ति, न तव मते; मृदादीनां घटादिपरिणामित्वं तु बाध्यत्वनियमादिति। ननु-यदि विकार: कारणातिरिक्ततया प्रतीयमानो मिथ्या, तर्हि कथं तत्र सत्यत्वप्रथोपपद्येत? न हि मिथ्यावस्तुनि सत्यत्वप्रथा युज्यते, सत्यानृतविभागानुपपत्तेरतिप्रसङ्गादिति-चेत्, मैवमित्याह-मृत्तिकेत्येव सत्यमिति।। घटादि मृद्विकारजातं मृत्तिकैवेति कृत्वा सत्यमिति व्यवह्रियते, न पृथक्स्वरूपान्तरेणैव; तस्यासदनिर्वचनीयत्वादित्यर्थ:। ननु-घटत्वादिरूपेणैव घटादौ मृद्विकारे सत्यत्वप्रथा लोके दृश्यते, न मृत्त्वसामान्यरूपेण; तत् कथमेवं तद्विरुद्धमभिधीयते? इति-चेत्, मैवम्; तत्कारणसामान्यस्यैव स्वकार्यानुगततया घटत्वादिरूपेण प्रथमनादित्युक्तत्वात्, दुन्दुभ्यादिदृष्टान्तेन श्रुत्यैव तथोपपादानत्। घटत्वादिरूपेण सत्यत्वप्रथनं यद् घटादिविकारस्य, तत् कारणे सामान्यरूपेणैव, इति न श्रुतेर्लोक-विरुद्धाभिधानम्। एवं मृदादिष्वपि मूलकारणपर्यन्तेषु यत् सत्यत्वप्रथनम्, न तत् स्वस्वकारणरूपेणैवेति मन्तव्यम्; तेषामपि विकारत्वाविशेषात्, अमृतत्वाविशेषाच्च, "मृत्तिकेत्येव सत्यमि"-त्यवधारणस्य च स्वकार्यापेक्षयाऽऽपेक्षिक-सत्यत्वाभिप्रायत्वात्, अन्यथैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधापत्ते:। तथाच वरघाताय कन्यापरिणयनवत् पक्षविघाताय दृष्टान्तप्रणयनं साधु समर्थितं स्यात्।।

मूलकारणस्य च श्रीरघुनाथैकतत्त्वस्य परब्रह्मणो ममाविकारत्वात्, सर्वाधिष्ठानत्वाच्च स्वत: सत्यत्वम्; सर्वबाधावधित्वादिति। एतेन-"अपागादग्नेरग्नित्वम्" "वाचारम्भणं विकारो नामधेयं

त्रीणि रूपाणीत्येव सत्यम्" इत्यादिवाक्यस्थवाचारम्भणशब्दो व्याख्यातः–द्रष्टव्यः ; "त्रीणि रूपाणी" ति यानि त्रिवृत्कृतस्थूलभूतरूपकारणानि अत्रिवृत्कृतानि सूक्ष्माणि तेजोऽबन्नलक्षणानि तान्युच्यन्ते; अन्वंयिकारणस्यैव विशेषगुणरूपेण कार्येषु प्रथनात्। आदिशब्देन–"ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" इत्यादिवाक्यानि सर्वस्य मूलकारणप्रतिपादकानि गृह्यन्ते। "एतदि" ति संनिहितं सल्लक्षणं ब्रह्म परामृश्यते। तदेव आत्मा=स्वरूपं यस्य सर्वस्य भूतभौतिकलक्षणकार्यजातस्य तत्, एतदात्मा, एतदात्मैव ऐतदात्म्यमिति स्वार्थिकस्तद्धितप्रत्ययः। यद्वा–एतदेव आत्मा एतदात्मा देवता अस्य सर्वस्य ऐतदात्म्यमिति विग्रहो द्रष्टव्यः ; "सेयं देवतैक्षत हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्ये"ति श्रुतेः। तथाच आग्नेय इतिवत् निरपेक्षतद्धितश्रुतेरात्मान्तरं प्रपञ्चस्य वारितं भवति॥

ननु–स्वरूपान्तस्यापि कार्ये दर्शनाद् न तद्धितप्रत्ययेन तत्र स्वरूपान्तरवारणं युक्तम्–इति, तत्राह–तत्सत्यमिति॥ सत्यं दृश्यते कार्ये स्वरूपान्तरम्, किन्तु तद् अनृतम्; सत्स्वरूपादुपलभ्यमानाद् अन्यत्वानन्यत्वाभ्यामनिरूपणात्। ततोऽन्यत्वेऽसदेव स्यात्, अनन्यत्वे च तदेव, न ततोऽतिरिक्तं स्यात्; अन्यत्वानन्यत्वयोरेकत्र विरोधादेवासम्भवात्। अतोऽनिर्वचनीयमनृतं तत्। न च यदनृतम्, तत् वस्तुतः स्वरूपं भवितुमर्हति; बाधात्। यत्तु सद्रूपं सर्वानुगतं भासते, तत् सत्यम्; सर्वबाधाऽवाधित्वेन तस्याबाधात्। अतः स एव सर्वस्यात्मा भवितुं युज्यते॥

ननु–सत्यत्वात् स एव सर्वस्यात्मा चेत्, मम तर्हि मया चेतनेन तत्स्वरूपमनुभूयेत। न चानुभूयते। तस्मात् न स मम आत्मा भवति? अविद्याऽऽवृतत्वात्तु तत्स्वरूपं नानुभवसीत्याह–*तत्त्वमसि श्वेतकेतो इति*॥ व्याख्यातमेतद् वाक्यं विस्तरेणाधस्तात् समन्वयसूत्रे, तदत्रानुसन्धेयम्। तस्माद् उपपन्नः–"ऐतदात्म्यमिदं सर्वमि" ति निरपेक्षतद्धितप्रत्ययः, उपपन्ना च–"येनाश्रुतं श्रुतं भवती" त्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा, इति श्रुतेराशयः। तदिदं विपक्षबाधकरूपेणाऽऽह स्म भगवान् भाष्यकारः–*न चान्यथैकविज्ञानेन सर्वविज्ञानं सम्पद्येतेति*॥ निदर्शनान्तरद्वयं स्वयं दर्शयन् उपसंहरति–*तस्मादिति*॥

अत्राह कश्चित्–ननु–मृगतृष्णिकाजलादिदृष्टान्तेन न प्रपञ्चस्यानृतत्वाभिधानं युक्तम्; प्रत्यक्षादिप्रमाणस्य लोकसिद्धत्वात्। श्रुतयश्चाविशेषेण ब्रह्मण उभयरूपत्वप्रतिपादिका दृश्यन्ते –"सर्वं खल्विदं ब्रह्म तज्जलान्" "इदं सर्वं यदयमात्मा" "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" "अपाणिपादो जवनो ग्रहीता" "तत्त्वमसि" "अस्थूलमनणु" इत्येवमाद्याः। तस्माद् ब्रह्मण उभयरूपत्वस्य भाविकत्वाद् न जगद्रूपमनृतम्–इति, तत्र वदामः–किमत्रानेकान्तवादिनो

भवतोऽभिमतम्- यद् वृक्षादिदृष्टान्तेन ब्रह्मणो मम साध्यते, तत् पृष्टो व्याचष्टाम्-किं ब्रह्मण एकानेकत्वलक्षणं रूपद्वयमस्ति, इत्येतावन्मात्रं साध्यते, किं वैकत्ववद् अनेकत्वमपि पारमार्थिकम्-इति। तत्र यद्याद्य:, तर्हि इष्ट एव सोऽस्माकम्, नात्र विप्रतिपत्तिरस्ति; "अन्तस्तद्धर्मोपदेशादि" त्यत्र महता प्रबन्धेनास्माभिर्ब्रह्मणो द्वैरूप्यस्य साधितत्वात्, अन्यथा ब्रह्मोपासनाविधिशास्त्रव्याकोपापत्तेः। अथ द्वितीय: पक्षः, स किं श्रुत्यक्षरबलादभ्युपगम्यते भवता, किं वा लौकिकवैदिकव्यवहारान्यथाऽनुपपत्त्या। तत्राद्येऽपि किं दृष्टान्ते मृदादौ श्रुत्यक्षरबलात्, तथात्वमवगतम्, आहो दार्ष्टान्तिके ब्रह्मणीति। तत्र नाद्य: ; "मृत्तिकेत्येव सत्यमि" ति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात्, वाचारम्भणशब्देन च विकारजातस्यानृतत्वाभिधानात्। यथा चैतत्, तथोपादितमधस्तात्। नापि द्वितीय: ; दार्ष्टान्तिकवाक्येऽपि "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मे" ति परमकारणस्यैकस्य सत्यत्वावधारणात्। तदप्युपपादितमधस्तात्॥

लौकिकवैदिकसर्वव्यवहारानुपपत्त्या ब्रह्मणो नानात्वं पारमार्थिकमित्युच्यत इति चेत्, तत्रापि वक्तव्यम्-किं जीवस्य पारमार्थिकजीवज्ञानादूर्ध्वं तदनुपपत्तिः, उत तत्पूर्वम्-इति। तत्र नाद्य: ; कुत:? जैवे रूपे बाधिते तदाश्रयसर्वव्यवहारबाधात् तदनुपपत्तेरभावात्, "तत्त्वमसि श्वेतकेतो" इति जीवस्य ब्रह्मात्मभावोपदेशात्। यदि जैवं रूपं पारमार्थिकं भवेत्, न तस्याविकृतब्रह्मात्मभाव उपपद्येत। न च-ध्यानादियत्नान्तरसाध्यमवस्थाविशेषमादाय तदुपदेश उपपत्स्यत इति-वाच्यम्; "तत्त्वमसी" त्युपदेशस्य स्वयं प्रसिद्धरूपोपदेशत्वेनानवस्थानिबन्धनत्वादित्युपपादितत्वात्। एवं च सति पारमार्थिकब्रह्मात्मभावोपदेशजनितविज्ञानेनात्मनो जैवे रूपे बाधिते तदाश्रयः सर्वोऽपि कर्तृत्वादिसंसारव्यवहारो बाधितो भवति; स्वप्नदृष्टभोगोपकरणवत्। तत् कुतस्तदवस्थायां व्यवहारानुपपत्ति:? तेषामेव तदानीमीभावात्॥

एतेन-व्यवहाराभावस्याप्यवस्थानिबन्धनत्वम्-प्रत्युक्तम्; "तत्त्वमसी" ति ब्रह्मात्मभावस्यानवस्थानिबन्धनत्वोक्तेः, तत्प्रयुक्तव्यवहाराभावस्यापि तथात्वात्। न च-एवं प्रमातृ प्रमेयादिद्वैतव्यवहाराभावस्यानवस्थानिबन्धनत्वे ब्रह्मात्मभावबोधात् पूर्वमपि तत्प्रसङ्गः, तथाच प्रत्यक्षादिविरोध इति-वाच्यम्; अशरीरत्ववत् तस्यापि ब्रह्मरूपाभिन्नत्वेन तत्कालेऽपीष्टन्वात्। न चत्रं प्रत्यक्षादिविरोध: ; अमृतव्यवहारमादाय: तदविरोधोपपत्तेः, अमृतस्य च प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वाद् बाधात् पूर्वं स्वात्यन्ताभावेन सहवृत्तित्वाविरोधात्। तदुक्तमभियुक्तैः-"अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः। अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः॥" इति। न च-एवं प्रमाणार्थत्वाविशेषाद् नानात्वांशवद् एकत्वांशोऽप्यसत्यः स्यात्, सत्यत्वे वोभयमपि सत्यं स्यादित्युक्तमिति-वाच्यम्; तस्करदृष्टान्तेन श्रुत्या

द्वैतस्यानृतत्वावधारणपूर्वकमद्वैतस्य सत्यत्वावधारणात्। तत्र हि 'नाहं तस्करः' इति सत्यवादिनस्तस्करत्वेनारोपितस्यैव मोक्षवत् सत्यब्रह्मात्मैकत्ववेदिनो मोक्ष, नानृतवादिनः ; तस्करस्येव द्वैताभिसन्धस्य तस्य तद्वदेव संसारबन्धनस्य प्राप्तत्वात्, इत्यवधारितम्। तत्र यद्युभयं सत्यं स्यात्, कथं व्यवहारगोचरोऽपि जन्तुरनृताभिसन्ध इत्युच्यते? अपि च श्रुत्यन्तरमपि–"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती" ति भेददृष्टिमपाकुर्वत् एतदेव दर्शयति। अपि च न तव मत एकत्वदर्शनाद् मोक्षः स्यात्; तदपनोद्यमिथ्याज्ञानाभावात्, सर्वद्वैतप्रपञ्चस्य ब्रह्मणो रूपत्वेन सत्यत्वाद् एकत्वविज्ञानेन तदपनोदासम्भवात्। तस्माद् अद्वितीयब्रह्मात्मज्ञानाद् मोक्षमिच्छताऽकामेनापि द्वैतस्यानृतत्वमभ्युपगन्तव्यम्। यास्तु ब्रह्मण उभयरूपत्वे श्रुतय उदाहृताः, ताः सत्यानृतसगुणनिर्गुणरूपद्वयाभिप्रायेण नेतव्याः। नीताश्च तत्र तत्रास्माभिः।।

आह–ननु एकत्वैकान्ताभ्युपगमे प्रत्यक्षादीनां विधिप्रतिषेधशास्त्राणां च प्रामाण्यं हीयेत; विकाराभावेन निर्विषयत्वात्, निराश्रयत्वात्, स्वरूपासिद्धेश्चेत्युक्तम्, ननु–तत्त्वबोधादूर्ध्वं तदिष्टमेवास्माकमित्यापि समाहितमस्माभिः। ततः पूर्वं तत्रेष्टमिति–चेत्, सत्यम्; तदाप्यनृतविकारमादाय तत्प्रामाण्योपपत्तेरुक्तत्वात्। सत्यमुक्तम्, न च तद् युक्तम्; कथम्? इत्थम्–यो हि यथाभूतो विषयः, तं तथात्वेन गृह्णत् प्रमाणं प्रमाणत्वमश्नुते; शुक्तयध्यक्षमिव शुक्तित्वेन शुक्तिं गृह्णत्, अन्यथा तु गृह्णत् अप्रमाणमेव भवति; शुक्तिज्ञानमिव रजतत्वेन तां गृह्णत्। प्रकृते च प्रत्यक्षादिप्रमाणानि यदि विकारजातमनृतमनृतत्वेन गृह्णीरन्, हन्त तर्हि तथाभूतत्वेन ग्रहणात् प्रामाण्यमश्नुवीरन्, न चैवमस्ति; सत्यत्वेनैव तैस्तद्ग्रहणात्। 'तत्त्वमस्या' दिवाक्यं यद्यपि तथाभूतविषयम्; तथापि स्वरूपत आश्रयतश्चानृतत्वाद् न प्रामाण्यं शुक्तिरजतज्ञानवत् स्वप्नज्ञानवच्च तस्य संभवति, इत्यप्रामाण्यं व्यवहारदशायामपि प्रत्यक्षादीनां विधिप्रतिषेधमोक्षशास्त्राणां च समापतितम्–इति।।

अत्र ब्रूमः–मैवम्; प्राग् ब्रह्मात्मावबोधात् संव्यवहाराणां सत्यत्वोपपत्तेः प्रत्यक्षादीनां तथाभूतविषयतया प्रामाण्याविरोधात्।

ननु–यदनृतम्, तदनृतमेव सर्वदा, न कदाचित् सत्यं भवति, यत्तु सत्यं भवति, न कदाचिदप्यनृतम्; वस्तुनो विरुद्धरूपद्वयासंभवात्। न ह्यग्निः कदाचित् शीतः कदाचिदुष्ण इति संभवति, दृष्टपूर्वो वा। न हि सत्यं घटादि कदाचिदनृतं दृष्टम्, अनृतं वा शुक्तिरजतादि कदाचित् सत्यमिति। तथाच भगवद्गीता–"नासतो विद्यते भावो नाभावो विद्यते सतः।" इति। तत् किमिदमुच्यते–'अनृतानां व्यवहाराणां प्राग् ब्रह्मात्मावबोधात् सत्यत्वोपपत्तेः'–इति? मैवम्;

तदुक्तेरारोपितसत्यत्वाभिप्रायत्वात्, "सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इत्युक्तत्वात्* परमार्थतस्तत्र सत्यत्वाभावेऽप्यधिष्ठानसत्यत्वस्यारोपात् प्राग् ब्रह्मात्मविज्ञानात् सत्यत्वोपपत्तिर्न विरुद्ध्यते॥

अत एव ब्रह्मात्मविज्ञानात् प्रागित्युक्तम्; अन्यथा तद्विशेषणवैयर्थ्यप्रसङ्गात्, पारमार्थिकसत्यत्वस्य पूर्वापरकालावच्छेद्यत्वस्य त्वयैवाभिहितत्वात् न चैतावता प्रत्यक्षादीनां तत्कालेऽप्यप्रामाण्यम्; स्वप्नादिज्ञानानामिव बाधात् पूर्वं व्यवहारसमर्थतया तदक्षतेः, स्वतः प्रामाण्योपगमात्। तदुक्तमभियुक्तैः-"तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता। अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोद्यते॥" इति। सर्वजनीनव्यवहाराविसंवादोऽपि देहात्मभाववदुपपत्स्यते। एतच्च विस्तरेणोपक्रान्तमस्माभिरध्यासभाष्ये, इति न पुनरिहोपक्रम्यते॥

एतेन-मिथ्याभूतेन वेदान्तवाक्येन कथं सत्यात्मावगतिः कार्यं स्यादिति-अपास्तम्; मिथ्याभूतेनापि स्वप्नदर्शनेन सत्यकार्यसमृद्धिमरणादिविज्ञानदर्शनात्। तथाच श्रुतिः-"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" "पुरुषं कृष्णदन्तम्" इत्यादिः। रेखारूपानृताक्षरप्रतिपत्त्या सत्याक्षरज्ञानदर्शनाच्च। तस्माद् असदेतत्-यद् नानृतेन सत्यज्ञानम्-इति। ननु-यथा "तत्त्वमसी" ति श्रुतिप्रमाणजनितविज्ञानेन प्रमाणान्तरविषयो बाध्यते, एवमेतस्यापि विषयः प्रमाणान्तरेण केनचित् बाध्यताम्; प्रमाणत्वाविशेषात्, अबाधे वा न तेनापि बाध्यतामिति-चेत्, न; सर्वान् प्रत्यप्रमाणत्वादेतस्य प्रमाणान्तरेण विषयबाधानुपपत्तेः। अ(नन्तर)प्रवृत्तेन हि बलवता विरुद्धेन प्रमाणेन पूर्वप्रवृत्तं बाध्यत इति लौकिकानां परीक्षकाणां च बाध्यबाधकभावव्यवस्थितिः। न च "तत्त्वमसी" ति वाक्यार्थबोधाद् ऊर्ध्वं तद्विरुद्धं किञ्चित् प्रमाणान्तरं प्रवर्तमानमस्ति, येन तद्विषयापहारः स्यात्; तदनुपलब्धेः। तथाच श्रुतिः-"यत्र त्वस्य सर्वमात्मैवाऽभूत् तत् केन कं पश्येदि" त्येवमादिः। प्रत्यक्षादीनां च लौकिकानां विधिप्रतिषेधशास्त्रयोश्च तत्पूर्वप्रवृत्तत्वेन तदुत्तरकालीनात्मज्ञानेन बाधेनैव वाक्यार्थोदयस्य दर्शितत्वात्। तस्मात् सर्वान्त्यप्रमाणत्वात् अद्वैतविषयत्वेन निराकाङ्क्षविषयत्वाच्च सर्वबाधत्वेनाबाध्यमानविषयत्वाद् उपपन्नमेतस्य परमार्थसत्यविषयत्वमिति॥

एतेन-सर्वप्रमाणविरोधाद् इयं प्रतिपत्तिरेव नोत्पद्यते, उत्पद्यमानापि वा निरर्थिका भ्रान्तिर्वा स्यादिति-अपास्तम्; "तद्धास्य विजज्ञावि" ति श्वेतकेतोस्तदुत्पत्तिश्रवणात्; अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तरादर्शनाच्च। प्रत्यक्षादिलौकिकवैदिकव्यवहारस्य च ततः

पूर्वमुपपत्तेरुक्तत्वात् तदनुपपत्तेरप्यभावात्। तस्मात् सर्वान्त्यप्रमाणेन सर्वद्वैतबाधाद् न वृक्षादिवद् ब्रह्मणोऽनेकांशत्वकल्पनाया अवकाशोऽस्ति॥

ननु—न वयं व्यवहारान्यथानुपपत्त्या ब्रह्मणो नानात्वं तात्त्विकं ब्रूमः, किं तर्हि? श्रौतमेवास्य तात्त्विकत्वम्; मृदादिदृष्टान्तप्रणयनात्, मृदादेश्च परिणामित्वावधारणादिति—चेत्, न; उक्तोत्तरत्वात् उक्तमेवात्राप्युत्तरम्—"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि" ति। तत्रापि विकारस्य मिथ्यात्वाभिधानपूर्वकं मृदादेरेव कारणरूपस्य सत्यत्वावधारणात्—इति। अस्तु वा मृदादेः परिणामित्वम्, तथापि न दार्ष्टान्तिके तदुपसंहरणीयम्; अभेदांशस्यैव तत्रोपसंहरणीयत्वात्, प्रतिज्ञाऽनुरोधात्, दृष्टान्तगतसर्वधर्मोपसंहारे च दृष्टान्तदार्ष्टान्तिकभावविलोपप्रसङ्गात्। अविरोध्यंश उपसंह्रियत इति चेत्, न; "स वा एष महानज आत्माऽजरोऽमरः" "निर्गुणं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अस्थूलमनणु" इत्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यः ब्रह्मणः कूटस्थनित्यत्वावगमात् तदविरोधासिद्धेः। तस्माद् मृदादिदृष्टान्ते स्थितमपि लोकदृष्टं परिणामित्वं न कूटस्थे ब्रह्मणि दार्ष्टान्तिक उपसंहर्तुं शक्यते; विरोधात्, कूटस्थत्वस्य सर्वविक्रियाराहित्यरूपत्वात्॥

एतेन—एकस्मिन् पुरुष श्येने वा कालभेदेनावस्थितिगतिरूपविरुद्धधर्मद्वयसमावेशवद् ब्रह्मण्यपि परिणामित्वं कूटस्थत्वं च न विरुद्धं भविष्यतीति—अपास्तम्; अशरीरत्ववत् कूटस्थनित्यताया अपि ब्रह्मस्वभावत्वेन सदातनत्वात्। ब्रह्मस्वभावत्वं च तस्यास्तद्विशेषणत्वेन श्रुत्योपादानात् तल्लक्षणधर्मत्वात्। स्थितिगत्योश्च कादाचित्कत्वेन कालभेदादेकस्मिन् समावेशोपपत्तिरिति वैषम्यम्। अपि च सृष्टिवाक्यानां स्वार्थे फलाभावात् फलवदद्वितीयब्रह्मविज्ञानपरत्वेन स्वार्थपरत्वाभावस्य दर्शितत्वाद् न ततो ब्रह्मणः परिणामित्वसिद्धिः ; स्वार्थपरश्रुतिशतविरोधात्। "तदनन्यत्वामारम्भणशब्दादिभ्यः" इत्यनेनात्मनोऽत्यन्तमेकत्वं ब्रुवतः—"जन्माद्यस्य यतः" इतीश्वरकारणताप्रतिज्ञा विरुद्ध्येत; ईशितव्याभावादिति चेत्, मैवम्; अनिर्वचनीयाविद्यात्मकनामरूपबीजशक्तेरीशितव्याया अभ्युपगमात्, तत्प्रतिज्ञायास्तद्व्याकरणाभिप्रायत्वस्यासकृदावेदितत्वाद् विरोधासिद्धेः। तस्मादुपपन्नं सर्वस्य जगतः कूटस्थाद्वितीयब्रह्मानन्यत्वमिति॥१४॥

इतश्चोपादानकारणानन्यत्वं कार्यस्य। कुतः? *भावे चोपलब्धेः*॥१५॥ भवनम्=भावः, उत्पत्तिरिति यावत्। उत्पत्तौ सत्यामुपलम्भादित्यर्थः। यस्योत्पत्तौ सत्यामेवोपलम्भो दृष्टः, तत् सर्वमप्युपादानानन्यदेव दृष्टम्; यथा—शुक्तिरजत-रज्जुसर्प-मरीचिकातोयादि। विवादाध्यासितं सर्वं

कार्यं तथा, तस्मात् तथेति। तत्रोपलम्भादित्येव हेतौ क्रियमाणे मूलाविद्यायां व्यभिचारः स्यात्; तस्या उपलम्भे सत्यप्युपादानाभावात् तदनन्यत्वाभावात्, तदुक्तम्–'भावे' इति। तेन न तत्र व्यभिचार : ; मूलाविद्याया उत्पत्यभावात्। 'भावात्' इत्येतावत्युक्तेऽन्यथाख्यातिवादिप्रभृतिभिः साधनविकलता दृष्टान्तस्याशङ्क्येत। शुक्तयादौ पुरोवर्तिनि रजतादेरुत्पत्त्यनभ्युपगमात्। तदुक्तम्–'उपलब्धेरि'ति।। उत्पत्तिं विना तत्र तदुपलम्भस्यैवाभावादित्याशयः। यथा चैतत् तथोपपादितमधस्तात्। न च–विप्रतिपत्तिवारकं विशेषणं हेतौ न दीयते, तस्यासिद्धिवारकत्वात्, व्यभिचारवारकस्यैव हेतुविशेषणत्वादिति–वाच्यम्; "इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति प्रत्यक्षलक्षणसूत्रेऽक्षपादेन स्वयम्–'अव्यपदेश्यं व्यवसायात्मकम्' इति विप्रतिपत्तिनिवारकविशेषणस्य दत्तत्वात्, लक्षणस्य च व्यतिरेकिरूपत्वादिति।।

एवं वा–इतश्च मूलकारणादनन्यद् जगत्। कुतः? "भावे चोपलब्धेः–यतः सत्येव वस्तुन्युपलब्धिर्भवति, नासति; प्रत्यक्षस्य सन्मात्रगोचरत्वनियमात्। कार्ये चोपलब्धिर्दृष्टा, अत कार्यं सदेव। सच्च मूलकारणम्, इति सिद्धं कार्यस्य सत्त्वेनैवोपलब्धेर्मूलकारणादनन्यत्वम्। यत्र हि कार्ये नास्त्युपलम्भः, तत्रापि कार्यत्त्वेन लिङ्गेनोपलब्धिगोचरं कार्यं दृष्टान्तीकृत्य सदभिन्नत्वमनुमेयम्। न च–सद्वस्तु भेत्तुं शक्यते; सत्प्रतियोगिकभेदाधिकरणस्यासत्त्वापातात्।।

ननु–भवतुं नाम कार्याणां सत्त्वेन रूपेण मूलकारणादभेदः, स्वरूपेण तु घटत्वादिना ततो भेदोऽपि भविष्यतीति–चेत्, न; भेदाभेदयोरेकत्र विरुद्धत्वात् समावेशानुपपत्तेः। न च घटत्वादेरपि सतो भिन्नतया प्रतीतिरस्ति; असत्त्वप्रसङ्गात्। एवं यद्यत् कार्ये मूलकारणवैधर्म्य वादिभिरुत्प्रेक्षणीयम्, तत्तद् असत्त्वप्रसङ्गेन व्युदसनीयम्; तस्य तस्यापि सत्त्वेनैवोपलम्भश्च दर्शनीय इति। तस्मात् सत्येवोपलम्भदर्शनात् कार्यस्य चोपलम्भगोचरत्वात् "ऐतदात्म्यमिदं सर्वमि" ति श्रुतेश्च सिद्धं कार्यस्य सल्लक्षणमूलकारणानन्यत्वमिति। व्याख्यानान्तरं भाष्ये द्रष्टव्यम्।।

केचित्तु–यथाश्रुतभाष्यव्याख्यानुसारेण व्यभिचारं पश्यन्त एवं सूत्राक्षरं योजयन्ति–"विषयपदं विषयविषयिपरम्, विषयिपदमपि विषयिविषयपरम्, तेन कारणोपलम्भभावाभावयोरुपादानोपलम्भ-भावाभावादिति सूत्रार्थः संपद्यते। तथाच प्रभारूपानुविद्धबुद्धिबोध्येन चाक्षुषेण न व्यभिचारः, नापि वह्निभावाभावानुविधायिभावाभावेन धूमभेदेनेति सिद्धं भवति–इति।।

तच्च क्लिष्टव्याख्यानत्वादेवोपेक्षणीयम्; भागासिद्धेश्च; शब्दादीनां त्र्यणुकादीनां च कार्याणामुपादानोपलम्भाभावेऽप्युपलम्भदर्शनात्, इत्यास्तां तावत्।

सोऽयं भाष्यानुसारी सूत्रार्थः—यत्सत्तानियता यदुपलब्धिः, तत् ततो न भिद्यत इति दृष्टम्। तद्यथा—घटसत्तानियता घटोपलब्धिः, इति तस्माद् घटाद् न स घटो भिद्यते, इति स्वाभाविकप्रतिबन्धसिद्धिः, उपादानसत्तानियता च कार्योपलब्धिर्दृश्यते; कार्याध्यक्षकाले तत्सत्तावदुपादानसत्ताया अपि ध्रौव्यात्। अतः कार्यमप्युपादानाभिन्नमिति निश्चीयते; जातिव्यावृत्तेश्चाभेदाङ्गीकाराद् न तत्र व्यभिचारः, नित्यद्रव्यभिन्ने च विशेषे सम्बन्धिभिन्ने च समवाये प्रमाणाभावस्य वक्ष्यमाणत्वाद् न तत्रापि व्यभिचारः—इति। तदेतदाह—*यत् कारणं भाव एव कारणस्य कार्यमुएलभ्यते, नाभाव इति*।। अन्वयमुक्तवाव्यतिरेकमुखेनास्य गमकत्वमाह—*न च नियमेनान्यभाव इति*।।

निगूढाभिसन्धिरुक्तनियमस्य व्यभिचारमाशङ्कते—*नन्विति*।। परिहरति—*नेत्युच्यत इति*।। पूर्वपक्षिणोऽभिसन्धिं दूषयितुमुद्घाटयति—*अथ धूममिति*।। कयाचिदवस्थया=अनवच्छिन्नमूलत्वाभ्रंलिहत्वाद्यवस्थयेत्यर्थः। अर्धदग्धेन्धने जले तत्कालमुद्वापिते बह्नौ तादृशधूमविशेषोपलम्भदर्शनाद् न तत्रापिं तत्सत्तानियमोऽस्तीत्यभिसन्धाय परिहरति—*नैवमपि कश्चिद्दोष इति*।। यथा च न धूमो वह्निसत्तानियतः, तथोपपादितोऽस्माभिर्लक्षणभाष्ये। तत्सत्तानियममभ्युपेत्यापि भङ्ग्यन्तरेग सूत्रं व्याचक्षाणश्चोदितदोषं परिहरति—*तद्भावानुरक्तां हीति*।। पूर्वस्मिन् व्याख्याने 'भावे चेति सति सप्तमी व्याख्याता, अस्मिन् व्याख्याने च विषयसप्तमीति व्याख्यानयोः परं भेदः। तथाच यत्सत्ताविषयनियता यदुपलब्धिः, तत् ततो न भिद्यते; यथा घटसत्ताविषयिणी घटोपलब्धिः, इति घटाद् घटो न भिद्यते, एवं तद्योग्योपादानसत्ताविषयिणी नियमेन कार्योपलब्धिः, इति कार्यमपि न ततो भिद्यते। न च धूमोपलब्धेरग्निसत्ताविषयत्वनियमोऽस्ति; अतो न तत्र व्यभिचारः। न च—प्रभारूपानुविद्धचाक्षुषेण व्यभिचार इति—वाच्यम्; तदुपलब्धिमात्रस्य प्रभारूपविषयत्वानियमात्, त्वगिन्द्रियेणापि तत्रोपलब्धिजननात्। रूपोपलब्धेश्चक्षुर्मात्रजन्यत्वात् तत्र व्यभिचार इति चेत्, मैवम्; रूपरूपिणामभेदाङ्गीकाराद् धर्म्यंशेन रूपेऽपि त्वगिन्द्रियजन्योपलब्धेः सत्त्वात् तदुपलब्धिमात्रस्य प्रभारूपसत्ताविषयत्वानियमेन व्यभिचाराभावात्, उलूकादिचाक्षुषे व्यभिचाराच्च।।

''भावाच्चोपलब्धेः'' इति सूत्रपाठे 'उपलब्धेरि' ति शैषिकी षष्ठी। शेषं भाष्ये।।१५।।

न केवलं शब्दात्, उपलब्ध्यभावाच्च कारणानन्यत्वं कार्यस्य, प्रागुत्पत्तेः सत्त्वादपि तदनन्यत्वमित्याह—*सत्त्वाच्चावरस्य*।।१६।। प्रागुत्पत्तेरिति शेषः। 'तदनन्यत्वमि' त्यधिकारोऽनुवर्तते। यदुत्पत्तेः पूर्वं नियमेन सत्, अनन्यथासिद्धं च, तत्कारणरूपादनन्यत्; यथा—मृद्-दण्ड-चक्रादि

अनन्यथासिद्धं पूर्वसत्, इति मृद्-दण्ड-चक्रादि कारणरूपादनन्यत् भवति। कार्यं च तथा। अतस्तदपि कारणादनन्यदेव। एवं सामान्यतो दृष्टात् कार्यकारणानन्यत्वसिद्धेः। तत्र किंकारणादनन्यत् कार्यम्? इत्यपेक्षायाम्–अन्वयादुपादानानन्यत्वसिद्धिः–इति। न च–उत्पत्तेः पूर्वं कार्यस्य सत्त्वं न सिद्धमिति–वाच्यम्; तदुत्पत्तेरेव तत्सत्त्वगमकत्वात्। उत्पत्तिक्रिया हि जायमाना स्वाश्रयं कर्तारं पूर्वभाविनमपेक्ष्य जायते; अन्यथा तदात्मलाभासम्भवात्। न चासन्नेव तदाश्रयः, असतः क्रियाश्रयत्वानुपपत्तेः, उपपत्तौ वा बन्ध्यासुतस्यापि तत्त्वापत्तेः। ननु–उत्पत्तेः पूर्वं कार्यं न बन्ध्यापुत्रवदसदभ्युपगम्यते, येनोक्तदोषः स्यात्, किं तर्हि प्रागभावप्रतियोगीति–चेत्, सत्यम्; कस्य तत्प्रतियोगित्वम्–किं सतः, उत असतः इति। यदि सतः, काममभिधीयताम्, नैतावता कार्यस्वरूपस्य प्रागसत्त्वमायाति। पारिभाषिकं हि तदसत्त्वं विद्यमान- कार्यस्यात्यन्ताभावान्योन्याभावप्रतियोगित्ववत्; अन्यथा सर्वदाऽभावप्रतियोगित्वलक्षणासत्त्वस्य विद्यमानत्वात् सर्वदैवासत् कार्यं स्यात्। इतश्च प्रागभावप्रतियोगित्वं पारिभाषिकमेवासत्त्वम्; यतोऽभावप्रतियोगिनो भावत्वात्, भावाभावयोरन्यतरप्रतिषेधस्यान्यतरनियतत्वात्।।

एतेन–असतः प्रागभावप्रतियोगित्वमिति–अपास्तम्। असत्त्वं तत्प्रतियोगिनो यदि प्रमाणान्तरागोचरत्वम्, सद्विरोधित्वं वा, सदभावत्वं वा, वन्ध्यापुत्रवत् तुच्छत्वं वा, मयाऽभिमतानिर्वचनीयत्वं वा, सत्ताजातिराहित्यं वा; सर्वथाऽपि तद्योगिनः प्रागभावप्रतियोगित्वासम्भवात्। ननु–प्रागभावत्तासमवाययोरेकत्र युगपद् विरोधदर्शनाद् उपपन्नं तत्प्रतियोगिनस्तद्राहित्यमिति–चेत्, मैवम्; भावाभावयोः, तद्व्याप्ययोर्वा विरोधाभ्युपगमात्, सत्तासमवायस्य च नित्यत्वेन प्रागभावप्रतियोगित्वे तत्प्रतियोगिकार्यव्याप्यत्वासम्भवात्। अपि च सत्तासमवायराहित्यं किं तदत्यन्ताभावः, किं वा तत्प्रागभावो भवता विवक्षितः। यद्याद्यः, तर्हि सामान्यविशेषसमवायानामेव प्रागभावप्रतियोगित्वप्रसङ्गः ; तत्प्रतियोगितावच्छेदकस्य सत्तासमवाया-त्यन्ताभावस्य तेष्वेव सत्त्वात्, कार्यस्य च प्रागभावाप्रतियोगित्वप्रसङ्गः ; तदत्यन्ताभावस्य तत्प्रतियोगिताऽवच्छेदकस्य कार्येऽभावात्। अथ द्वितीयः, सोऽपि न; सत्तासमवायस्य नित्यत्वेन तत्प्रागभावस्य निरस्तत्वात्। कार्यप्रागभाव एवैतत् प्रागभावतयोपचर्यत इति चेत्, सत्यम्, तथाप्येकस्यैव कार्यप्रागभावस्यावच्छेद्यावच्छेदकभावानुपपत्तेस्तदुपचार- कल्पनवैयर्थ्यापत्तेः, इत्यास्तामयं प्रसङ्गः। तस्मात् प्रागसत उत्पत्त्यसम्भवाद् उत्पत्तेः प्रागपि सदेव कार्यमिति स्थितम्। तथाच हेत्वसिद्धेरभावात् सिद्धं कार्यस्यानन्यथासिद्धनियतप्राक्सत्वात् कारणानन्यत्वम्।।

एवं वा–ननु–नोपलब्धेर्भावात् कार्यस्य कारणानन्यत्वं सिध्यति; यत्कारणम्–उत्पत्तेः प्राक् तयोः सदसत्त्वाभ्यां भेददर्शनात्, "असद् वा इदमग्र आसीत्" "असदेवेदमग्र आसीत्" इत्यादिश्रुतौ पूर्वं

कार्यस्यासत्त्वावगमात्। अतो वर्तमानकाले तयोरभेददर्शनं समवायविषयतयाऽन्यथासिद्धमिति– चेत्, तत्राह– *सत्वाच्चावरस्येति*।।

चस्त्वर्थे। नैवमुत्पत्तेरुत्तरकालमुपलब्धियोग्यस्य कार्यस्य प्रागसत्त्वं वक्तुं शक्यते। यत्कारणम्–''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि'' त्यादिश्रुतेरिदंशब्दगृहीतस्य कार्यस्य प्रागुत्पत्तेः सल्लक्षणब्रह्मकारणात्मत्वावगमात्। प्रत्यक्षादिसिद्धं हि सर्वं जगद् इदमा परिगृह्य 'सदेवे' ति समानाधिकृतसावधारणश्रुतेः सदेकत्वं तस्य प्रागुत्पत्तेरवगम्यते; 'आसीदि'ति निर्देशात्। यद्यपि वर्तमानकालेऽपि कार्यस्य सत्यताऽस्ति; तथापि नेदानीं तावदेव रूपम्, किं तर्हि? कार्यरूपमप्यनिर्वचनीयमस्त्येव, सृष्टेः पूर्वं तु कारणैकरूपमेव, न कार्यरूपमस्तीत्यवधारणश्रुतिः, आसीच्छ्ब्दश्चोपपद्यते। तस्य वृक्षादिवत् स्वगतभेदं वारयति–'एकमेवे'ति; सैन्धवघनवत् एकरसत्वात्। सजातीयभेदं वारयति–'अद्वितीयमि' ति। तत्र भाष्यकारः 'सदेवे' त्यवधारणफलमाह– *यच्च यदात्मना यत्र न वर्तत इति*।।

ननु–भवतु नाम कार्यस्य प्रागुत्पत्तेः कारणात्मना सत्त्वम्, वर्तमानकाले तु तद्भेदो भविष्यति; अन्यथा कार्यकारणभेदव्यवहारानुपपत्तेः, तदभेदोपलब्धिस्तु समवायविषयतयाऽन्यथा सिद्धेत्युक्तमेव–इति, अत आह– *तस्मात् प्रागुत्पत्तेरनन्यत्वादिति*।। समानाधिकरणे पञ्चम्यौ। वस्तुन ऐकरूप्यादित्याशयः। तदैकरूप्यमेव सदृष्टान्तमुपपादयति– *यथा च कारणं ब्रह्मेति*।। एंवमपि कार्यकारणयोः पृथक् सत्वं भविष्यतीति, नेत्याह– *एकञ्च वस्तुनः सत्त्वमिति*।। यथा च सत्त्वं न भिद्यते, तथोक्तमधस्तात्। कार्यकारणभावव्यवहारस्त्वनिर्वचनीयभेदमादायाप्युपपद्यत इत्युक्तम्। यदप्यभेदप्रत्ययस्य समवायविषयत्वं भविष्यतीत्युक्तम्, तदपि समवायनिराकरणेन निराकरिष्यते। उपसंहरति– *अतोऽपीति*।। प्रागुत्पत्तेः कारणात्मना सत्त्वादपीत्यर्थः। *अनन्यत्वम्*।। वर्तमानकाल इति शेषः ; अन्यथा साध्याविशेषापत्तेः।।१६।।

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्।।१७।। अथ यदुक्तम्–''असदेवेदमग्र आसीत्'' ''असद्वा इदमग्र आसी'' दिति श्रुत्या प्रागुत्पत्तेः कार्येऽसत्त्वव्यपदेशाद् न तस्य कारणात्मना तदानीं सत्त्वम्–इति, तत्परिहर्तव्यम्। न तदाऽत्यन्तासत्त्वाभिप्रायेण तत्काले कार्यमसदिति व्यपदिश्यते, येनोक्तदोषः स्यात्। किं तर्हि? इदानीन्तनव्याकृतनामरूपलक्षण-धर्मापेक्षया धर्मान्तरेणाव्याकृतनामरूपत्वेन 'असदि' ति व्यपदिश्यत इति।।

कुत एतदवगम्यते–मुख्यार्थपरित्यागेनात्र लाक्षणिकोऽर्थः परिगृह्यते, न मुख्यार्थः–इति? वाक्यशेषात् यदुपक्रमे सन्दिग्धार्थं वाक्यम्, तत् वाक्यशेषेण निर्णीतार्थेन निर्णीयते; ''सन्दिग्धे च

वाक्यशेषात्'' इति न्यायात्। सन्देहस्तु-''सदेव सोम्येदमग्र आसी'' दित्यादिश्रुत्यन्तरवशात्। कोऽत्र वाक्यशेषः? उच्यते; ''असदेवेदमग्र आसीदि'' त्यस्य 'तत्सदासीदि' ति शेषः। स च असच्छब्देनोपक्रान्तस्य मुख्यार्थपरिग्रहो मा भूत्, इति तच्छब्देन परामृश्य सत्त्वं विदधाति। ''असद् वा इदमग्र आसीदि'' त्यस्य तु ''तदात्मानं स्वयमकुरुते''ति। न ह्यसतः कार्यरूपेणात्मन आविर्भावनं सम्भवति। तस्माद् असत्त्वोपचाराद् धर्मान्तरेणैवाऽयमसद्व्यपदेशः प्रागुत्पत्तेः। सतः कार्यस्य, नासत्त्वाभिप्रायेणेति सिद्धम्।।१७।।

युक्तेः शब्दान्तराच्च।।१८।। इतश्च प्रागुत्पत्तेः कार्यस्य सत्त्वम्, कारणान्यत्वं च। कुतः? युक्तेः, शब्दान्तराच्च। युक्तिस्तावदभिहिताऽस्माभिः पुरस्तात्। भाष्ये चाभिधास्यते। शब्दान्तरं च-''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि'' त्यादि। अन्तरशब्दः-असद्व्यपदेशकवाक्यापेक्ष्या।।

तत्र भाष्यकारो युक्तिं व्याख्यातुमुपक्रमते-*युक्तिस्तावद् वर्ण्यत इति*।। तावत्=आदौ; प्रथमोपात्तत्वात्। विशेषमाशङ्कते-*अथेति*।। सोऽयमभिप्रायः-किं कार्यस्य सूक्ष्माऽवस्थाऽभिधीयते, किं वा कार्यनियामिका कारणगता शक्तिरिति। तत्राद्ये प्रागवस्थायामुक्तातिशयसत्त्वे तद्वानपि ध्रुव एव, इत्यसत्कार्यवादहानिः, सत्कार्यवादसिद्धिश्चेति परिहरति-*अतोऽतिशयवत्त्वादिति*।। कार्यस्येति शेषः। समानाधिकरणे पञ्चम्यौ 'प्रागवस्थायाः' इति भाष्यपाठे स एवातिशयः कार्यम्, इति पुनः 'कार्यस्ये' ति नाध्याहर्तव्यम् द्वितीयेऽपि किं सा शक्तिः सती, असती वा। सत्त्वेऽपि किं कार्यकारणाभ्यां भिन्ना, अथवाऽभिन्नेति। तत्र शक्तिरसती, सत्त्वे कार्यकारणाभ्यां भिन्ना चेति पक्षद्वयं दूषयति-*शक्तिश्च कारणस्येति*।। द्वितीये त्वस्मत्पक्षसिद्धिरित्याह-*तस्मादिति*।। शक्तेरसत्त्वभिन्नत्वासम्भवादित्यर्थः।।

इतश्च कार्यकारणयोरनन्यत्वमित्याह-*अपि चेति*।। ननु-समवायसम्बन्धात् कार्यकारण-योरत्यन्तभिन्नबुद्ध्यभावः, न तादात्म्यादिति-चेत्, मैवम्; सोऽपि सम्बन्धत्वासम्बन्धत्वाभ्यां विकल्पासहत्वेनासम्भवीत्याह-*समवायकल्पनायामपीति*।। समवायस्याद्रव्यत्वेन संयोगा-सम्भवादित्यभिप्रायः।।

द्वितीयं पक्षमाशङ्क्य प्रतिबन्द्या परिहरति-*अथ समवाय इति*।। न च-संयोगस्य गुणत्वादेव समवायसम्बन्धोऽङ्गीक्रियत इति-वाच्यम्; स्वयं सम्बन्धरूपत्वेन तत्साधकत्वे गुणत्वपरिभाषायास्तदसाधकत्वात्, साधकत्वे वा स्वयं सम्बन्धरूपत्वस्य संयोगे व्यभिचाराद् न समवाये तदभावसाधकत्वम्। तथाचानवस्था स्थितैव। एतेन-संयोगस्य कार्यत्वात् समवायसिद्धिरिति-अपास्तम्; ध्वंसे व्यभिचाराच्च। भावकार्यत्वं तथेति चेत्, न; तस्यापि

समवायिकारणनाशाद् द्रव्यगुणादिनाशे विनश्यदवस्थे द्रव्यगुणादौ व्यभिचारात्। अविनश्यदवस्थभावविकारत्वं तथाऽस्त्विति चेत्, न; एवं तर्हि यत्र यत्र हेतोर्व्यभिचारश्चोदनीयः, तत्र तत्रैव विशेषणदानेन तत्परिहारेऽनैकान्तिकहेत्वाभासोच्छेदप्रसङ्गः, असमवायिकारणनाशेन कार्यनाशे तदवस्थस्यापि कारणे समवायसत्त्वात्, विशेषणवैयर्थ्याच्च, अवैयर्थ्ये वा भागासिद्धेरावश्यकत्वात् अपि च समवायो हि सम्बन्धिभ्यामत्यन्तभिन्नोऽभ्युपगम्यते। न च तेनात्यन्तभिन्नेनात्यन्तभेदबुद्ध्यभावः सम्बन्धिनोः समर्पयितुं शक्यते; अतिप्रसङ्गात्। अश्व-महिषयोरत्यन्तभिन्नेन गवात्यन्तभेदबुद्ध्यभावः स्यात्; तस्य तादात्म्यनियतत्वाच्च, तादात्म्यसमवाययोरेकत्र विरोधात्, समवायस्य भिन्नोभयाश्रितसम्बन्धत्वात्। अपि च न केवलमनवस्थादिदोषात् समवायकल्पनाया असम्भवः, तादात्म्याध्यक्षविरोधादपि तदसम्भव इत्याह- *तादात्म्यप्रतीतेश्चेति*।।

इतश्च तदसम्भव इत्याह- * कथञ्चेति*।। समवायसम्बन्धेनेति शेषः। कथम्=केन प्रकारेणेत्यर्थः। वृत्तिकारं दूषयितुं प्रकारजिज्ञासया विकल्पयति- *किं समस्तेष्ववयवेषु वर्तेतेति*।। व्यासज्य, बाहुल्यादिवदित्याशयः। *अथ प्रत्यवयवम्*।। परिसमाप्य; गोत्वादिवदित्याशयः। तत्र प्रथमं पक्षमनुभाष्य दूषयति- *यदि तावदित्यादिना*।। *समस्तेति*।। मध्यपरभागावयवानां व्यवहितत्वेन सन्निकर्षायोग्यत्वादित्याशयः। मा भूत् समस्तावयवेष्वसन्निकर्षः, अवयविनस्तु संनिकर्षसत्त्वाद् ग्रहो भविष्यतीति, नेत्याह- *न हीति*।। व्यासज्यवर्तिनः समस्ताश्रयग्रहाधीनग्रहत्वादित्याशयः। ननु- अवयवेष्ववयविनो व्यासज्यवृत्तित्वेऽपि न बहुत्वादिवत् स्वरूपेण वृत्तिस्तेषु कल्प्यते, येन तेषामेकतराश्रयाग्रहे बहुत्वादिवदवयविनोऽग्रहप्रसङ्गः स्यात्, किं तर्हि? अवयवशः कुसुमेष्विव सूत्रस्य, प्रावरेष्विवोखायाः, विष्टिष्विव वा शिबिकायाः। तथाचैकदेशकुसुमादेरनुपलम्भेऽपि यथा सूत्रादेरुपलम्भो न विरुद्ध्यते, एवं मध्यपरभागावयवाग्रहेऽप्यवयविन उपलम्भो न विरोत्स्यत इति शङ्कते- *अथावयवशः समस्तेषु वर्तेतेति*।। परिहरति- *तदाऽपीति*।।

अयमभिसन्धिः- युक्ता तावत् कुसुमादिसंयोगानामव्याप्यवृत्तित्वात् प्रतिकुसुमादिसंयोगभेदेन वृत्तिभेदाच्चावयवशस्तेषु सूत्रादेरनुवृत्तिः, अत्र तु यद्यारम्भका अवयवाः संयोगिनः स्युः, कुसुमादिषु सूत्रादिवदेवावयवः समवायिभिः स्वावयवैर्वर्तेत। न चैतदस्ति; तेषां समवायित्वात्। अतस्तैरेवावयवैर्यदि तेष्वेवावयविनो वृत्तिः परिकल्प्येत, तदाऽऽत्माश्रयादिदोषप्रसङ्गः। तथा हि- यदि देवदत्तो हस्तावयवेन पादावयवे, एवमन्यत्रापि वर्तेत, तदा हस्तादेर्हस्तादिवृत्तित्वाभ्युपगमाद् अवच्छेद्यावच्छेदकभावाभ्युपगमाद् वाऽऽत्माश्रयः। अथावयवान्तरेण हस्तावयवे, हस्तावयवेन

चावयवान्तरे वर्तेत, तथाच नात्माश्रय इति ब्रूषे, एवमप्यन्योन्याश्रयप्रसङ्गः-हस्तावयवे वृत्तिसिद्धौ तस्यावयवभावात् तेनावयवान्तरे वृत्तिसिद्धिः, तत्सिद्धौ च तेन हस्ते वृत्तिसिद्धिः-इति। अथ-अवयवान्तरे वृत्तिसिद्धिर्न हस्तावयवाधीना, किं तर्हि? अवयवान्तराधीना, तथाच नात्माश्रय इति-चेत्, एवमप्यारम्भकावयवानां परिमितत्वात् चक्रकमापद्येत। अथ तद्दोषजिहीर्षयाऽनारम्भका अवयवाः अपरिमिता आरम्भकावयवेषु वृत्तिसिद्ध्यर्थमभ्युपगम्येरन्, एवमपि ते किं संयोगिनो वा स्युः, समवायिनो वा। उभयथाप्यनवस्थादोषाद् न निस्तार इति भाष्यारूढमेव दूषणमिति। द्वितीयं पक्षमाशङ्क्य परिहरति-*अथ प्रत्यवयवं वर्तेतेति*।। परिसमाप्येति शेषः। तत्र किं क्रमेण वर्तेत, युगपद् वा। तत्र आद्ये दूषणमाह-*तदैकत्र व्यापार इति*।। तथा चैकदेशे धृत्वाऽऽकृष्टस्यावयविनः सर्वत्र व्यापारोपलब्धिविरोधप्रसङ्ग इत्यभिप्रायः, द्वितीये दूषणमाह-*युगपदनेकत्र वृत्ताविति*।। कार्त्स्न्येनेति शेषः। प्रत्येकं परिसमाप्य वृत्तावपि गोत्वादिवदेकत्वं नावयविनो विरुध्यत इत्याशङ्कते-*गोत्वादिवदिति*।। यद्यप्यस्मन्मते गोत्वादिसामान्यस्य विशेषा अनिर्वाच्या एव, न परमार्थसन्तः, तथा च कुत्रास्य प्रत्येकं परिसमाप्तिरिति ? तथाप्यभ्युपेत्य दूषणान्तरमाह-*न तथा प्रतीत्यभावादिति*।। *संग्रहवाक्यं विभजते*।। *गोत्वादिवदिति*।। एवमपि=तद्वन्नियमेऽपीत्यर्थः। ननु-पटादिनाऽऽवृतावयवे घटादौ कदाचिदेवावयवग्रहणेनापि ग्रहणं दृष्टमिति, तत्राह-*न चैवं नियतं गृह्यत इति*।। अपि च यदि प्रत्यवयवमवयविनः परिसमाप्तिगोत्वादिवत् प्रतिविशेषमभ्युपगम्यते, हन्त तर्हि यथा गोत्वादिकार्यं सर्वं कुत्रचित्...विशेषे भवति, एवमेकस्मिन्नेवावयवेऽवयविनः समग्रं कार्यं निष्पद्येत। तथाच श्रृङ्गेणापि दोहनकार्यं प्रसज्येतेत्याह-*प्रत्येकं परिसमाप्तौ वाऽवयविन इति*।। दूषणान्तरमाह-*प्रागुत्पत्तेश्चेति*।। भवत्वकर्तृका, ततः किमिति? अत आह-*निरात्मिका स्यादिति*।। कर्तुरभावे ह्यकारणा सती स्वयमेव न भवेदित्यर्थः। एतदेव व्यतिरेकमुखेन दर्शयति-*उत्पत्तिश्च ना क्रियेति*।। क्रियाविशेष इत्यर्थः। ननु-उत्पत्तिपदेन सकलकारकाणां कर्मकारकमात्रस्य वा व्यापारोऽभिधीयते; तेषां सिद्धत्वेन तत्कर्तृत्वोपपत्तेः, न घटस्य; तस्यासिद्धत्वेन तत्कर्तृत्वायोगात्। न चैवम्-घट उत्पद्यत इति प्रयोगानुपपत्तिरिति -वाच्यम्; घटपदस्य प्रकृते तत्कारकलक्षणार्थत्वादिति-चेत्, मैवम्; एकस्तावदयं लक्षणैव दोषः ; मुख्यार्थे सम्भवति लक्षणाया अन्याय्यत्वात्, सत्कार्याभ्युपगमेन मुख्यार्थस्य सम्भवात् अन्यस्तु लक्ष्यार्थाप्रतीतिरेव दोषः ; लक्ष्यार्थप्रतीत्यनुसारेण हि वाक्ये लक्षणा कल्पते। न चास्ति प्रकृते तत्प्रतीतिः। न हि लोके घट उत्पद्यत इति प्रयोगात् कुलालादीनि कपालानि वोत्पद्यन्त इति कस्यचिदपि प्रतीतिरस्ति। तत्कस्य हेतोः? तेषामुत्पन्नत्वप्रतीतेः पुनरुत्पत्त्ययोगात्।।

कोऽभिप्रायः? उत्पादना हि करोत्यर्थो भावनापरपर्यायः कारणव्यापारः, नोत्पत्तिः ; तस्याः प्रयोजककर्तृनिष्ठत्वात् प्रयोजककर्तृव्यापारत्वानुपपत्तेः। तदुक्तम्–"करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः। भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते।।" इति। एतेन–उत्पादनैव कारकव्यापारप्रयोज्यनिष्ठोत्पत्तित्वेनोपचर्यत इति–अपास्तम्; तयोः प्रयोज्यप्रयोजकव्यापारयोर्जन्य-जनकभावेन भेदसिद्धेः, उपचारस्य मुख्यार्थपूर्वकत्वात् तदभाव उपचारासिद्धेश्च। न हि दिविष्ठचन्द्राभावे मुखं चन्द्रत्वेनोपचर्यते। ननु–नोत्पत्तिर्नाम व्यापारलक्षणा क्रियाऽभिधीयते, येन तत्कर्तुः पूर्वसत्त्वप्रसङ्गः स्यात्, किं तर्हि? सिद्धस्यापि सत्तादेर्धात्वर्थत्वदर्शनात् कार्यस्य कारणसमवायः, सत्तासमवायो वोत्पत्तिरिति; उत्पूर्वेण पदिनोद्गमनवाचिना कारणसमवायलक्षणात्। कारणं भित्त्वा हि समवायेन कार्यमुद्गच्छति, रूढया च सत्तासमवायो वा; "घट उत्पद्यते" "घटो भवती" त्युत्पत्तिभवत्योः समानार्थे प्रयोगदर्शनात्। न चेयमन्यतरसमवायलक्षणोत्पत्तिः कार्यस्य प्रागात्मलाभमपेक्षते; एतस्या एव तदात्मलाभरूपत्वादिति–चेत्, मैवम्; कार्यात्मलाभं विना तस्या अप्यसिद्धेः। कुतः? असतोरिव सदसतोरपि सम्बन्धानुपपत्तेः, सतोरेव लोके सम्बन्धदर्शनात्। "भूतले घटो नास्ती" ति विशिष्टप्रतीतेः सदसतोरपि दृष्टः सम्बन्ध इति चेत्, मैवम्; संयोगसमवाययोरन्यतरसम्बन्धस्य त्वयाऽपि तत्रानभ्युपगमात्; तत्रैवास्य नियमस्य दर्शितत्वात्, तद्व्यतिरिक्तस्य सम्बन्धत्वाभावाच्च, भिन्नोभयाश्रितैकस्य सम्बन्धत्वात्, स्वरूपसम्बन्धस्य निराकरणात्, "भूतले घटो नास्ती" त्यादिभावाभावविशिष्टप्रतीतेरनिर्वचनीयत्वस्य दर्शितत्वात्। तस्माद् नास्ति कुत्रापि सदसतोः सम्बन्ध इति। अपिच प्रागुत्पत्तेरसत्त्वं कार्यस्य, इति भावेन कार्याभावस्य मर्यादाकरणमनुपपन्नम्। कुतः? अभावस्य निरुपाख्यत्वेन मर्यादाऽनाधारत्वात्, सतामेव गृहक्षेत्रादीनां मर्यादा दृष्टा, नासतां बन्ध्यापुत्रादीनाम्। न हि "बन्ध्यापुत्रो राजा बभूव प्राग्भद्रसेनाभिषेकात्" इत्येवञ्जातीयकेन मर्यादाकरणं विशेष्यते। ननु–अत्यन्ताभावलक्षणस्य बन्ध्यासुतस्य मा भूद् मर्यादा, तस्यानुपाख्येयत्वात्, घटप्रागभावस्य तु भविष्यता घटेनोपाख्येयस्यास्ति मर्यादेति–चेत्, मैवम्; बन्ध्याया इव पुत्रेण प्रागभावेन सह घटस्य सम्बन्धानिरूपणात् तेन तदुपाख्यानानुपपत्तेः। न हि स्वयं निरुपाख्योऽप्यभावोऽन्येनात्यन्तासम्बद्धेन सता सोपाख्य इति पण्डितमानिना वक्तुमुचितम्; तथा सति बन्ध्ययाऽपि बन्ध्यापुत्रः सोपाख्यः स्यात्। प्रागभाव एव सन् पश्चात् कारकव्यापाराद् घटो भवतीति चेत्, न; प्रागसतोऽपि कारकव्यापारात् सत्त्वे बन्ध्यापुत्रस्यापि प्रागसतः कारकव्यापारादूर्ध्वं सत्त्वप्रसङ्गः। बन्ध्यापुत्रस्य कारकाण्येव न सन्ति, तत्सम्बन्धायोग्यत्वात् तस्येति चेत्, तुल्यमेतत् प्रागसतो घटस्यापि; असत्त्वाविशेषण तदयोग्यत्वस्य तुल्यत्वात्। सिद्धत्वात् सत्यपि कार्ये कारकव्यापारोऽनर्थक इति चेत्, आस्ताम्; का नो हानिः? कार्यकारणव्यवहारोच्छेदप्रसङ्ग इति चेत्, न तद् अद्याप्यस्ति, इति

सदसद्भिन्नत्वाभ्यां तन्निरूपणाभिमानिनां नास्माकं काचित् क्षतिरस्ति। तदुक्तम् ''मिथिलायां प्रदीप्तायां न में किञ्चन दह्यते'' इति। तव कथं स इति चेत्, उक्तमेतदसकृदस्माभिः–कारणरूपेण सतः कार्यस्यानिर्वचनीयकार्याकारो नटस्येव च कुरूपता कारकव्यापारैर्भाव्यते–इति। भाष्ये– *कारणं व्यवस्थापयत इति*।। अत्र कारणम्=उपादानकारणमित्यर्थः। *कार्याकारोऽपि कारणस्यात्मभूत एवेति*।। अनिर्वचनीयरूपस्याधिष्ठानानतिरेकित्वादित्याशयः। गतार्थमन्यत् असत्कार्यवादिनं प्रति दूषणान्तरमाह– *यस्य पुनरिति*।। मूलकारणम्=सल्लक्षणं ब्रह्म।।

''युक्तेरि'' ति सूत्रावयवं व्याख्याय ''शब्दान्तराच्चे'' ति सूत्रावयवतात्पर्यं व्याचष्टे– *एवं युक्तेः कार्यस्येति*।।१८।।

ननु–उत्पत्तेः पूर्वं यदि कार्याकारोऽपि कारणात्मना सन्नेव, किमिति तर्हि न स तत्काले सर्वैस्तदूर्ध्वमिवोपलभ्यत इति? तत्राह– *पटवच्च*।।१९।। निगदमस्य भाष्यम्।।१९।।

ननु–सङ्कुचितपटवत् चेत् तदानीं कारणे तदात्मभूतं कार्यम्, हन्त तर्हि स्वस्वार्थक्रियां किमिति न कुर्यादिति, नेत्याह– *यथा च प्राणादि*।।२०।। यथा च प्राणादयो वायवः प्राणायामेन योगिना हृदये निरुद्धाः सन्तो देहस्य नाकुञ्चनप्रसारणादिलक्षणां स्वस्वार्थक्रियां कुर्वन्ति, न चैतावता तत्काले न ते सन्ति, जीवनेन लिङ्गेन तत्सत्त्वानुमानात्, अग्रे तदर्थक्रियादर्शनाच्च, तद्वत् कार्यमप्युत्पत्तेः पूर्वं कारणरूपेण सद् न स्वस्वार्थक्रियां करिष्यति, अग्रे च सदिति न विरुद्धं किञ्चिदस्तीत्यर्थः।।२०।। इति षष्ठं तदनन्यत्वाधिकरणम्, आरम्भणाधिकरणं वा।।

इति वार्तिकम् आरम्भणाधिकरणम् समाप्तम्

प्रदीपः

तदनन्यत्वमारम्भणशब्दादिभ्यः।।१४।। इदमधिकरणं वैशेषिकमतनिरासेन कार्यकारणयोरभेदस्यापि साधनार्थमिति भास्कररामानुजाचार्याः, यन्मत उभयोरपि समसत्ताकत्वम्। इदं च भोक्त्रापत्त्यधिकरण एव तदभेदस्यापि सिद्धवदनुवादादेतदधिकरणवैयर्थ्यापत्त्या नोपपद्यते। वल्लभाचार्या अपि भेदमात्रनिरासमत्राभिप्रयन्त्येव, इयान् विशेषः-यद् भास्कररामानुज-मतयोर्भेदनिराकरणस्य मुख्यत्वम्, कार्यमिथ्यात्वनिराकरणस्य प्रासङ्गिकत्वम्, वल्लभमते तु तद्विपरीतम्। केवलाद्वैतिनस्तु-अस्याधिकरणस्याभेदमात्रव्यवस्थापकत्वम्, कार्यमिथ्यात्व-व्यवस्थापकत्वं च मन्यन्ते। यद्यपीदं पूर्वाधिकरणेनापि सिद्धम्; तथापि पूर्वत्र सत्तात्रैविध्येन प्रत्यक्षादिप्रमाणानामविद्यावद्विषयत्वेन प्रामाण्यमूरीकृत्य मिथ्यात्वादिव्यवस्था, प्रकृते तु सत्तैक्यवादेन कार्यविषयप्रत्यक्षादीनां भ्रमत्वमेव स्वीकृत्य मिथ्यात्वादिव्यवस्थापनमिति विवेकः। तदिदमाह- *अभ्युपगम्येत्यादिना-अवगम्यत इत्यन्तेन*।।

तदयं निष्कर्षः-सौत्रमनन्यत्वपदं मतान्तरेषु द्रव्याभेदपरम्, भगवत्पादमते तु तद्व्यतिरेकेणाभावपरमिति। तदिदमाह- *अनन्यत्वं व्यतिरेकेणाभाव इति*।।

तथाच भास्करादिमते भेदानुवादेनाभेदस्यापि साधनम्, केवलाद्वैतमते त्वभेदानुवादेन भेदनिषेध इति पर्यवसन्नम्। इदमेवाभिप्रेत्योक्तं भावत्याम्-न खल्वनन्यत्वमित्यभेदं ब्रूमः, किन्तु भेदं व्यासेधाम इति। एवमङ्गीकारे निमित्तम्-एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तिः, वाचारम्भणश्रुतिश्चेति श्रुतिलिङ्गे एव। तदिदमाह- *आरम्भणशब्दादिभ्य इति*।। भेदस्यौपाधिकस्य न मुख्यत्वम्, अभेदस्यैव स्वाभाविकस्य तदित्यत्र दृष्टान्तमाह- *यथा घट-करकेति*।। घटाकाशकरकाकाशयोरभेदो भेदश्च वर्तते। तत्र भेद औपाधिकः, अभेदो मुख्य इति यथेत्यर्थः। निरुपाधिकस्याप्यधिष्ठानेनाभेदस्यैव मुख्यत्वे भेदस्य मिथ्यात्वे च दृष्टान्तमाह- *मृगतृष्णिकेति*।। तथाच मृगतृष्णिकादीनां विकाराणामिवोषराद् जगतोऽपि विकारस्य ब्रह्मणो भेदो मिथ्यैवेति स्वीकर्तव्यमिति भावः। तदिदमाह- *एवमित्यादिना*।।

अथ सूत्रस्यास्य वृत्तिकाराणां दृष्टया भेदाभेदोभयसत्यतापरतया व्याख्यानम, यदवलम्ब्य भास्करादि एवं प्रवृत्तम्, तदनूद्य दूषयति–*नन्वनेकात्मकमित्यादिना–तदभावे व्याघातः स्यादित्यन्तेन*।।

ननु–यदि स्वरूपतोऽपि मिथ्यात्वमेव प्रपञ्चस्य विवक्ष्यते, तर्हि घटादिज्ञानानां वेदान्तादिशास्त्राणां च कथं प्रामाण्यमित्याशङ्क्य; ''इदं रजतमि'' त्यादावधिष्ठानांशे प्रमात्वस्याप्रमाणजन्यत्वेऽपि स्वीकाराद् जनकज्ञानाप्रामाण्यमप्रयोजकं जन्यज्ञानस्याप्रामाण्य इति समाधत्ते–*कथं चेत्यादिना–तद्वदित्यन्तेन*।।

अथ कथं मिथ्याभूतस्यार्थक्रियाकारित्वमित्याशङ्क्य समाधत्ते–*कथं त्वित्यादिना–रेखानृताक्षरप्रतिपत्तेरित्यन्तेन*।। तदेवं भेदाभेदमतभेदसत्यत्वं निरस्य तदुभयाङ्गीकारे प्रयोजनासम्भवं तदुभयायोगं च प्रतिपाद्य च ब्रह्मपरिणामवादं तदभिमतं दूषयति–*अपि चान्त्यमित्यादिना–कूटस्थनित्यत्वान्मोक्षस्येत्यन्तेन*।।

अथ–परिणामवादनिरासफलमाशङ्कापरिहाराभ्यां दर्शयति–*ननु कूटस्थेत्यादिना–*पुनरिहोच्यत इत्यन्तेन*।।

अद्वैतमते सर्वज्ञत्वेश्वरत्वादिव्यपदेशोपपत्तिं विषयविवेकं चाशङ्कासमाधानाभ्यामाह–*कथं नोच्यत इत्यादिना–माययेतीत्यन्तेन*।।

अथ सूत्रकाराणां परिणामवादोऽपि विवर्तवादभूमिकात्वेन न विरुद्धः, तत्रैव तात्पर्यमिति कल्पनामात्रम्, न प्रामाणिकम्; अन्यथोक्ताधिकरणवैयर्थ्यापत्तेरित्याह–*सूत्रकारोऽपीत्यादिना*।।

अस्मिन्नधिकरणे विशिष्य व्यवस्थापिता अद्वैतवेदान्तपरिभाषास्त्विमा एव–(१) स्वरूपतोऽपि ब्रह्मणि प्रपञ्चनिषेधः, (२) भ्रमज्ञानस्यापि यावद्बाधज्ञानमर्थक्रियाकारित्वलक्षणं प्रामाण्यमस्ति, (३) मिथ्याभूतस्याप्यर्थक्रियाकारित्वम्, (४) परिणामवादस्य विवर्तवादभूमिकात्वेनोपयोग इति च।।१४।।

भावे चोपलब्धेः।।१५।। अत्र भावपदमुपलब्धेरुपलब्धिपदं भावस्य चोपलक्षणम्। तेन तद्भावानुविधायिभावकत्वे सति तदुपलब्धिनियतोपलब्धिकत्वं हेतुतया विवक्षितम्। तथाच प्रपञ्चः, ब्रह्माभिन्नः, उक्तहेतोरिति सूत्रार्थः। मृद्भावोपलब्धिनियतभावोपलब्धिको हि घटो मृदभिन्नो दृश्यत इति मृदादिकं दृष्टान्तः। ब्रह्मभावोपलब्धिनियतभावोपलब्धिकत्वात्तु जगतो ब्रह्माभेद इति निष्कर्षः। अत्र विशेष्यमात्रोपादाने प्रभासाक्षात्कारनियतसाक्षात्कारके प्रभाभिन्ने घटादौ व्यभिचारः। विशेषणमात्रोपादाने तु वह्निभावनियतभावके धूमे व्यभिचार इत्युभयसार्थक्यम्। ''भाव एव कारणस्य

कार्यमुपलभ्यत'' इति भाष्यं तु पूर्वोक्तकारणैरन्यथा व्याख्येयम्; भाव एवेत्यस्य भावोपलम्भयोरेवेति उपलभ्यत इत्यस्य उपलभ्यते भवतीति चार्थात्। तथाच तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतु वदाम इति भाष्यम्। सूत्रगतोपलब्धिं कार्यकारणोभयविषयां तयोः सत्तया विशेषितां हेतु वदाम इति हि तदर्थः ; अन्यथा व्यभिचारप्रसङ्गात्।।

वार्तिककारास्तु–भावपदस्योत्पत्तिपरत्वं सत्तापरत्वं वा स्वीकृत्य तदुत्पत्तिनियतोपलब्धिकत्वं तत्सत्तानियतोपलब्धिकत्वं वा हेतुः, न तूक्तोभयनियतोभयकत्वम्; क्लिष्टव्याख्यानत्वात्, शब्दादीनां त्र्यणुकादीनां च कार्याणामुपादानोपलम्भाभावेऽप्युपलम्भदर्शनेन भागासिद्धेश्चेति–वदन्ति। एतन्मते भावे चेति चशब्दवैयर्थ्यम्, ''तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरन्यत्वे हेतुं वदाम'' इति भाष्ये कार्यपदवैयर्थ्यम्, भावपदस्योत्पत्तिपरत्वे भावादित्ये वेष्टसिद्धावुपलब्धिपदवैयर्थ्यम्। यथा चान्यथाख्यातिवादायोगस्तथा बहुधा प्रपञ्चितमित्यनिर्वचनीयख्यातिसिद्धवत्कारेणैवोक्तसूत्रप्रवृत्तिरिति वक्तव्यम्; अन्यथोपलब्धिपदप्रयोगेणापि कथं वा शुक्तिरूप्यादीनां दृष्टान्तत्वं वार्तिकाभिमतम्, पूर्वोक्तव्यभिचारपरिहारश्च संभवति? घटादीनामुपादानसत्तायाः सर्वदा विद्यमानत्वेऽप्युपलम्भाभावेनोपादानसत्तानैयत्यमुपलम्भे बाधितम्। अत उपलम्भपदेन ज्ञानमात्रविवक्षणात् शब्दादौ भागासिद्धिरिति भामतीप्रस्थानानुसार्येव विवरणं समुचितम्। भास्कराचार्या वल्लभाचार्यश्च कार्यसत्यत्व इदं सूत्रं योजयन्ति। तन्मते भावपदस्य विद्यमान इत्यर्थः। तथाच कार्ये विद्यमान एवोपलम्भो भवति, नाविद्यमान इति तदुपलम्भान्यथानुपपत्त्या न मिथ्यात्वमिति सूत्रार्थः। तत्र च भावपदस्य धर्मिणि लक्षणा, मिथ्याभूतस्याप्युपलम्भस्य शुक्तिरूप्यादौ दर्शनाद् व्यभिचार इति भगवत्पादानां तदनुयायिनां वा विवरणमेव युक्तमिति ध्येयम्।।

घटादीनामुपलभ्यमानत्वं दृश्यत्वमेव कारणव्यतिरेकेणाभावसाधनम्। तथाच ब्रह्मभिन्नम्, तदभिन्नम्, दृश्यत्वात्; यन्नैवं तन्नैवम्; यथा शशशृङ्गादिकमिति सूत्रार्थः–सूत्रस्य पाठान्तरमादाय भवितुमर्हति। इदमेव सूत्रमुपष्टभ्य दृश्यत्वेन मिथ्यात्वानुमानमद्वैतिनाम्। तथाच पूर्वसूत्रेण श्रौततया व्यवस्थापितस्यैव भेदमिथ्यात्वस्य दृश्यत्वेन हेतुनापि साधनं क्रियते, श्रुत्यनुगुणतर्कप्रामाण्यस्य स्वीकारादित्यभिप्रायेणाह–*भावाच्चोपलब्धेरिति वेति*।। अनेन कारणानन्यत्वं न केवलं श्रुत्या, किन्तु प्रत्यक्षप्रमाणेनाप्यवसेयमिति बोध्यते।।

अत्रोपलब्धिर्बाधकप्रत्यक्षं विवक्ष्यते, तेन कारणव्यतिरेकेण कार्याभावः प्रत्यक्ष इति भावः। अत्र बाधकज्ञानस्याभावविषयकस्यापि प्रत्यक्षत्ववर्णनेनानुपलब्धिप्रमाणभेदेऽपि प्रत्यक्षप्रमाभेदो नास्तीति सूच्यते। तेन शाब्दापरोक्षवाद एव प्रकारान्तरेणापि समर्थितो भवति। तददिमाह–*तन्तुसंस्थाने पटे

तन्तुव्यतिरिकेण पटो नाम कार्यं नोपलभ्यत इति*।। अत्रोपलब्धिपदं प्रत्यक्षयोग्याभिप्रायेण प्रत्यक्षम्, अनुमेयाभिप्रायेण त्वनुमितिपरमित्याह– *इत्यनुमेयमिति*।। तथाच सूत्र उपलब्धिपदं ज्ञानसामान्यपरमेव। ततश्च शब्दत्र्यणुकादीनामपि कारणानन्यत्वेन न भागासिद्धिरिति सुष्टुर्भाष्यानुसारी निर्णयो भामत्यनुयायिनाम्।।१५।।

सत्त्वाच्चावरस्य।।१६।। अवरस्य=प्रागभावप्रतियोगिनः, उत्पत्तेः प्रागसतः कार्यस्य सत्त्वं सद्रूपकारणतादात्म्यं विना नोपपद्यत इति कारणानन्यत्वं कार्यस्य स्वीकर्तव्यम्; अन्यथा सत्त्वप्रतीत्यनुपपत्तेः कार्यस्य। पूर्वेण सूत्रेणान्वय्यनुमानम्, मिथ्यात्वे प्रत्यक्षं वा प्रमाणं प्रदर्शितम्, अनेन तु व्यतिरेक्यनुमानम्, अर्थापत्तिर्वा तत्र प्रदर्श्यत इति निष्कर्षः।।

ब्रह्मपरिणामवादिनस्तु श्रीवल्लभाचार्यादयः त्रैकालिकसत्त्वात् कार्यस्य ब्रह्माभिन्नत्वमिति–व्याचक्षते। एतन्मतेऽवरपदप्रयोगो न स्वरसः ; अवरपदस्य कालविशेषावच्छिन्न एव स्वारस्यात्, कालविशेषमात्रावच्छिन्नस्य त्रैकालिकत्वव्याघाताच्च। ननु–अद्वैतमतेऽपि कथं सत्त्वमवरस्येति–चेत्, सत्तादात्म्यादिति बोध्यम्। ननु–कथं त्रैकालिकं सत्त्वं न स्वत एव कार्याणां ब्रह्मसत्तातोऽन्यदङ्गीक्रियताम्, तावताऽपि सत्त्वव्यवहारो भविष्यतीत्यत आह– *एकं चेति*।। तथाचैकसत्तावादेनैवोक्ताधिकरणमिति पूर्वोक्तमुपपन्नमेवेति भावः। इदमेव भाष्यमेकसत्तावादस्य मूलम्। एतन्मते हि सत्त्वमबाध्यत्वमेकमेव, न तु व्यावहारिकादिभेदेन सत्तात्रैविध्यमिति तत्त्वम्। "असद्वा इदमग्र आसीत् ततो वै सदजायते" ति कालविशेषावच्छेदेनासत्त्वव्यपदेशेनापि ज्ञायते न स्वतः सत्त्वं कार्यस्य वर्तत इति।।१६।।

ननु–एवं तर्हि सत्त्ववदसत्त्वमपि कार्यस्य वर्तत इति सत्त्वात् कारणानन्यत्वमिवासत्त्वात् कारणभिन्नत्वमपि स्यादित्याशङ्क्य समाधत्ते सूत्रकारः– *असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्*।।१७।। "असदेवेदमि" त्यसत्त्वमप्युत्पत्तेः प्राक् श्रूयमाणं कार्याणं भेदसत्यत्वमपि गमयतीत्याशङ्क्यासत्त्वमिदं कार्यरूपेणैव, न कारणरूपेण, इति स्वरूपेण स्वाधिकरणेऽभावेऽपि कारणात्मना सत्त्वं त्रैकालिकं कार्याणां न विरुद्धमित्युक्तसूत्रार्थः। तथाच–तदनन्यत्वसूत्रे श्रौतवाचारम्भणानुसारेण भेदमिथ्यात्वस्य साधितस्य श्रौतासत्त्वव्यपदेशेनाक्षेपोऽनेन परिह्रियत इति सत्त्वासत्त्वे उभे अपि न विरुद्धे इति भावः। कथं सत्त्वासत्त्वयोरविरोध इत्यत आह– *वाक्यशेषादिति*।। वाक्यशेषे सत्त्वस्यापि बोधनमेव तत्र प्रमाणमिति भावः।।१७।।

उत्पत्तेः प्रागपि कार्यस्य कारणात्मना सत्त्वे श्रुत्यनुमाने उभे अपि प्रमाणमित्याह सूत्रकारः– *युक्तेः शब्दान्तराच्चेति*।।१८।। युक्तिस्तु–"असदकरणादुपादानग्रहणात्

सर्वसंभवाभावात्। शक्तस्य शक्यकारणात् कारणभावाच्च सत्कार्यमि''ति कारिकाप्रतिपादिता साङ्ख्याभिमतैव। इयान् विशेषः—कार्यस्य भेदमपि ते स्वीकुर्वन्ति परिणामवादस्वीकारेण, वयं तु तन्मिथ्यात्वं स्वीकुर्मः। कार्यस्योत्पत्तेः प्राक् कारणात्मत्वे तु न विवादः। तच्च सत्कारणं साङ्ख्यमते प्रधानम्, अद्वैतमते तु ब्रह्मेति त्वन्यदेतत्। अपरोऽयं विशेषः—यत् कारणरूपेण कार्यस्यापि वस्तुगत्या सत्त्वमेव साङ्ख्यमते, अद्वैतमते तु कारणव्यतिरेकेणाभाव एव कार्यस्य कारणात्मना सत्त्वं नाम—इति। तदिदं सर्वं विशदयति— *युक्तिरित्यादिना—एवं युक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं च कारणादवगम्यत इत्यन्तेन*।।

शब्दान्तरं व्याचष्टे— *शब्दान्तरादिति*।। ननु—एवमपि कार्यस्य श्रुतिद्वयानुसारेण सत्त्वमसत्त्वमुभयमेवाङ्गीकर्तव्यम्; अबाधेनोपपत्तौ बाधकल्पनस्यान्याय्यत्वादित्यत आह— *यदि त्विति*।। तथाचैकविज्ञानेन सर्वविज्ञानोपक्रमानुपपत्त्याऽन्यतरसङ्कोचेनैव श्रुत्यर्थो व्यवस्थापनीय इति भावः।।१८।।

पटवच्च।।१९।। *यथा च प्राणादि*।।२०।। अनेन सूत्रद्वयेनापि कारणात्मना विद्यमानस्य कार्यस्याभिव्यक्तिमात्रमेव कारकव्यापारादिसाध्यम्, न तूत्पत्तिः, इति न कारकव्यापारान्यथानुपपत्त्याऽपि प्रागुत्पत्तेः कार्यासत्त्वमिति भावः।।१९।।२०।। इति षष्ठं तदनन्यत्वाधिकरणम्, आरम्भणाधिकरणं वा।।

इति प्रदीपः आरम्भणाधिकरणम् समाप्तम्

भामती

परिहाररहस्यमाह—तदनन्यत्वमारम्भणशब्दादिभ्यः।

पूर्वस्मादविरोधादस्य विशेषाभिधानोपक्रमस्य विभागमाह *अभ्युपगम्य चेमम् इति*। स्यादेतत्—यदि कारणात् परमार्थभूतादनन्यत्वमाकाशादेः प्रपञ्चस्य कार्य्यस्य, कुतस्तर्हि न वैशेषिकाद्युक्तदोषप्रपञ्चावतार इत्यत आह *व्यतिरेकेणाभावः कार्य्यस्यावगम्यते इति*। न खल्वनन्यत्वमित्यभेदं ब्रूमः, किन्तु भेदं व्यासेधामः, ततश्च नाभेदाश्रयदोषप्रसङ्गः। किन्त्वभेदं व्यासेधद्भिर्वैशेषिकादिभिरस्मासु साहायकमेवाचरितं भवति। भेदनिषेधहेतुं व्याचष्टे *आरम्भणशब्दस्तावद् इति*। एवं हि ब्रह्मविज्ञानेन सर्वं जगत्तत्वतो ज्ञायेत, यदि ब्रह्मैव तत्त्वं जगतो भवेत्। यथा रज्ज्वां ज्ञातायां भुजङ्गतत्त्वं ज्ञातं भवति, सा हि तस्य तत्त्वम्। तत्त्वज्ञानं च ज्ञानमतोऽन्यन्मिथ्याज्ञानमज्ञानमेव। अत्रैव वैदिको दृष्टान्तः *यथा सौम्यैकेन मृत्पिण्डेन इति*। स्यादेतत्—मृदि ज्ञातायां कथं मृन्मयं घटादि ज्ञातं भवति, नहि तन्मृदात्मकमित्युपपादितमधस्तात्। तस्मात्ततो भिन्नं न चान्यस्मिन् विज्ञातेऽन्यद्विज्ञातं भवतीत्यत आह श्रुतिः *वाचारम्भणं विकारो नामधेयम्*। वाचया केवलमारभ्यते विकारजातं, न तु तत्त्वतोऽस्ति, यतो नामधेयमात्रमेतद्, यथा पुरुषस्य चैतन्यमिति राहोः शिर इति विकल्पमात्रम्। यथा हुर्विकल्पविदः—'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति। तथा चावस्तुतयाऽनृतं विकारजातं मृत्तिकेत्येव सत्यम्। तस्माद् घटशरावोदञ्चनादीनां तत्त्वं मृदेव, तेन मृदि ज्ञातायां तेषां सर्वेषामेव तत्त्वं ज्ञातं भवति। तदिदमुक्तं *न चान्यथैकविज्ञानेन सर्वविज्ञानं सम्पद्यते इति*। निदर्शनान्तरद्वयं दर्शयन्नुपसंहरति *तस्माद्यथा घटकरकाद्याकाशानाम् इति*। ये हि दृष्टनष्टस्वरूपा न ते वस्तुसन्तो यथा मृगतृष्णिकोदकादयः, तथा च सर्वं विकारजातं, तस्मादवस्तुसत्। तथाहि—यदस्ति तदस्त्येव, यथा चिदात्मा नह्यसौ कदाचित् क्वचित् कथञ्चिन्नास्ति, किन्तु सर्वदा सर्वत्र सर्वथास्त्येव, न नास्ति। न चैवं विकारजातं, तस्य कदाचित् कथञ्चित् कुत्रचिदवस्थानात्। तथाहि—सत्स्वभावं चेद्विकारजातं कथं कदाचिदसत्? असत्स्वभावं चेत् कथं कदाचित् सत्? सदसतोरेकत्वविरोधात्। नहि रूपं कदाचित् क्वचित् कथंचिद्वा

गन्धो भवति। अथ तस्य सदसत्त्वे धर्मो, ते च स्वकारणाधीनजन्मतया कदाचिदेव भवतः, तत्तर्हि विकारजातं दण्डायमानं सदातनमिति न विकारः कस्यचित्। अथासत्त्वसमये तन्नास्ति, कस्य तर्हि धर्मोऽसत्त्वम्? नहि धर्मिण्यप्रत्युत्पन्ने तद्धर्मोऽसत्त्वं प्रत्युत्पन्नमुपपद्यते। अथास्य न धर्मः किन्त्वर्थान्तरमसत्त्वं, किमायातं भावस्य? नहि घटे जाते पटस्य किञ्चिद्भवति। असत्त्वं भावविरोधीति चेद्, न; अकिञ्चित्करस्य तत्त्वानुपपत्तेः। किञ्चित्करत्वे वा तत्राप्यसत्त्वे तदनुयोगसम्भवात्। अथास्यासत्त्वं नाम किञ्चिन्न जायते किन्तु स एव न भवति। यथाहुः–

''न तस्य किञ्चिद्भवति न भवत्येव केवलम्।'' इति।

अथैष प्रसज्यप्रतिषेधो निरुच्यतां किं तत्स्वभावो भाव उत भावस्वभावः स इति। तत्र पूर्वस्मिन् कल्पे भावानां तत्स्वभावतया तुच्छतया जगच्छून्यं प्रसज्येत। तथा च भावानुभवाभावः। उत्तरस्मिंस्तु सर्वभावनित्यतया नाभावव्यवहारः स्यात्। कल्पनामात्रनिमित्तत्वेऽपि निषेधस्य भावनित्यतापत्तिस्तदवस्थैव। तस्माद्भिन्नमस्ति कारणाद्विकारजातं न वस्तुसत्, अतो विकारताजमनिर्वचनीयमनृतम्। तदनेन प्रमाणेन सिद्धमनृतत्वं विकारजातस्य कारणस्य निर्वाच्यतया सत्त्वं, मृत्तिकेत्येव सत्यमित्यादिना प्रबन्धेन दृष्टान्ततयाऽनुवदति श्रुतिः। ''यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं स दृष्टान्तः'' इति चाक्षपादसूत्रं प्रमाणसिद्धो दृष्टान्त इत्येतत्परं, न पुनर्लोकसिद्धत्वमत्र विवक्षितम्, अन्यथा तेषां परमाण्वादिनं दृष्टान्तः स्यात्। नहि परमाण्वादिर्नैसर्गिकवैनयिकबुद्ध्यतिशयरहितानां लौकिकानां सिद्ध इति। सम्प्रत्यनेकान्तवादिनमुत्थापयति *नन्वनेकात्मकम् इति*। अनेकाभिः शक्तिभिर्याः प्रवृत्तयो नानाकार्यसृष्टयस्तद्युक्तं ब्रह्मैकं नाना चेति। किमतो यद्येवमित्यत आह *तत्रैकत्वांशेन इति*। यदि पुनरेकत्वमेव वस्तुसद्भवेत् ततो नानात्वाभावाद्वैदिकः कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः समस्त एवोच्छिद्येत। ब्रह्मगोचराश्च श्रवणमननादयः सर्वे दत्तजलाञ्जलयः प्रसज्येरन्। एवं चानेकात्मकत्वे ब्रह्मणो मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति। तमिममनेकान्तवादं दूषयति *नैवं स्याद इति*। इदं तावदत्र वक्तव्यम्–मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वमिति वदतः कार्यकारणयोः परस्परं किमभेदोऽभिमतः, आहो भेदः, उत भेदाभेदाविति। तत्राभेद ऐकान्तिके मृदात्मनेति च घटशरावाद्यत्मनेति चोल्लेखद्वयं नियमश्च नोपपद्यते। भेदे चोल्लेखद्वयनियमावुपपन्नौ, आत्मनेति त्वसमञ्जसम्। नह्यन्यस्यान्य आत्मा भवति। न चानेकान्तवादः। भेदाभेदकल्पे तूल्लेखद्वयं भवेदपि। नियमस्त्वयुक्तो नहि धर्मिणोः कार्यकारणयोः सङ्करे तद्धर्माविकत्वनानात्वे न सङ्कीर्येते इति सम्भवति। ततश्च मृदात्मनेकत्वं यावद्भवति तावद् घटशरावाद्यात्मनापि स्यात्, एवं घटशरावाद्यात्मना नानात्वं यावद्भवति तावन्मृदात्मना नानात्वं भवेत्। सोऽयं नियमः कार्यकारणयोरैकान्तिकं भेदमुपकल्पयति,

अनिर्वचनीयतां वा कार्यस्य। पराक्रान्तं चास्माभिः प्रथमाध्याये तदास्तां तावत्। तदेतद्युक्तिनिराकृतमनुवदन्तीं श्रुतिमुदाहरति *मृत्तिकेत्येव सत्यम् इति*। स्यादेतत्–न ब्रह्मणो जीवभावः काल्पनिकः, किन्तु भाविकः, अंशो हि सः, तस्य कर्मसहितेन ज्ञानेन ब्रह्मभाव आधीयत इत्यत आह *स्वयं प्रसिद्धं हि इति*। स्वाभाविकस्यानादेरिति। यदुक्तं नानात्वांशेन तु कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः सेत्स्यतीति तत्राह *बाधिते च इति*। यावदबाधं हि सर्वोऽयं व्यवहारः स्वप्नदशायामिव तदुपदर्शितपदार्थजातव्यवहारः। स च यथा जाग्रदवस्थायां बाधकान्निवर्त्तते एवं तत्त्वमस्यादिवाक्यपरिभावनाभ्यासपरिपाकभुवा शारीरस्य ब्रह्मात्मभावसाक्षात्कारेण बाधकेन निवर्तते। स्यादेतत्–'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येद्' इत्यादिना मिथ्याज्ञानाधीनो व्यवहारः क्रियाकारकादिलक्षणः सम्यग्ज्ञानेनापनीयत इति न ब्रूते, किन्त्ववस्थाभेदाश्रयो व्यवहारोऽवस्थान्तरप्राप्त्या निवर्तते, यथा बालकस्य कामचारबादभक्षतोपनयनप्राप्तौ निवर्तते। न च तावतासौ मिथ्याज्ञाननिबन्धनो भवत्येवमत्रापीत्यत आह *न चायं व्यवहाराभावः इति*। कुतः? *तत्त्वमसीति ब्रह्मात्मभावस्य इति*। न खल्वेतद्वाक्यमवस्थाविशेषविनियतं ब्रह्मात्मभावमाह जीवस्य, अपि तु न भुजङ्गो रज्जुरियमितिवत् सदातनं तमभिवदति। अपि च सत्यानृताभिधानेनाप्येतदेव युक्तमित्याह *तस्करदृष्टान्तेन च इति*। *न चास्मिन् दर्शने इति*। नहि जातु काष्ठस्य दण्डकमण्डलुकुण्डलशालिनः कुण्डलित्वज्ञानं दण्डवत्तां कमण्डलुमत्तां वा बाधते। तत् कस्य हेतोः? तेषां कुण्डलादीनां तस्मिन् भाविकत्वात्, तद्वदिहापि भाविकगोचरेर्णकात्म्यज्ञानेन न नानात्वं भाविकमपवदनीयम्। नहि ज्ञानेन वस्त्वपनीयते, अपि तु मिथ्याज्ञानेनारोपितमित्यर्थः।

चोदयति *नन्वेकत्वैकान्ताभ्युपगमः इति*। अबाधितानधिगतासन्दिग्धविज्ञानसाधनं प्रमाणमिति प्रमाणसामान्यलक्षणोपपत्त्या प्रत्यक्षादीनि प्रमाणतामश्नुवते। एकत्वैकान्ताभ्युपगमे तु तेषां सर्वेषां भेदविषयाणां बाधितत्वादप्रामाण्यं प्रसज्येत। तथा विधिप्रतिषेधशास्त्रमपि भावनाभाव्यभावककरणेतिकर्तव्यताभेदापेक्षत्वाद्व्याहन्येत। तथा च नास्तिक्यमेकदेशाक्षेपेण च सर्ववेदाक्षेपाद्वेदान्तानामप्यप्रामाण्यमित्यभेदैकान्ताभ्युपगमहानिः। न केवलं विधिनिषेधाक्षेपेणास्य मोक्षशास्त्रस्याक्षेपः स्वरूपेणास्यापि भेदापेक्षत्वादित्याह *मोक्षशास्त्रस्यापि इति*। अपि चास्मिन् दर्शने वर्णपदवाक्यप्रकरणादीनामलीकत्वात्तत्प्रभवमद्वैतज्ञानमसमीचीनं भवेत्, न खल्वलीकाद् धूमाद् धूमकेतनज्ञानं समीचीनमित्याह *कथं चानृतेन मोक्षशास्त्रेण इति*। परिहरति *अत्रोच्यते इति*। यद्यपि प्रत्यक्षादीनां तात्त्विकमबाधितत्वं नास्ति, युक्त्यागमाभ्यां बाधनात्, तथापि व्यवहारे वाधनाभावात्सांव्यवहारिकमबाधनम्। नहि प्रत्यक्षादिभिरर्थं परिच्छिद्य प्रवर्तमानो व्यवहारे विसवाद्यते

सांसारिकः कश्चित्। तस्मादबाधनान्न प्रमाणलक्षणमतिपतन्ति प्रत्यक्षादयं इति। *सत्यत्वोपपत्तेः इति*। सत्यत्वाभिमानोपपत्तेरिति। ग्रहणकवाक्यमेतद्, विभजते *यावद्धि न सत्यात्मैकत्वप्रतिपत्तिः इति*। विकारानेव तु शरीरादीनहमित्यात्मभावेन पुत्रपश्वादीन ममेत्यात्मीयभावेनेति योजना। *वैदिकश्च इति*। कर्मकाण्डमोक्षशास्त्रव्यवहारसमर्थना। *स्वप्नव्यवहारस्येव इति विभजते *यथा सुप्तस्य प्राकृतस्य इति*। कथं चानृतेन मोक्षशास्त्रेणेति यदुक्तं तदनुभाष्य दूषयति *कथं त्वसत्येन इति*। शक्यमत्र वक्तुं श्रवणाद्युपाय आत्मसाक्षात्कारपर्यन्तो वेदान्तसमुत्थोऽपि ज्ञाननिचयोऽसत्यः, सोऽपि हि वृत्तिरूपः कार्यतया निरोधधर्मा, यस्तु ब्रह्मस्वभावासाक्षात्कारोऽसौ न कार्यस्तत्स्वभावत्वात्, तस्मादचोद्यमेतत् *कथमसत्यात्सत्योत्पादः इति*। यत् खलु सत्यं न तदुत्पद्यत इति कुतस्तस्यासत्यादुत्पादो? यच्चोत्पद्यते तत्सर्वमसत्यमेव। सांव्यवहारिकं तु सत्यत्वं वृत्तिरूपस्य ब्रह्मसाक्षात्कारस्येव श्रवणादीनामप्यभिन्नं, तस्मादभ्युपेत्य वृत्तिस्वरूपस्य ब्रह्मसाक्षात्कारस्य परमार्थसत्यतां व्यभिचारोद्भावनमिति मन्तव्यम्। यद्यपि सांव्यवहारिकस्य सत्यादेव भयात्सत्यं मरणमुत्पद्यते तथापि भयहेतुरहितस्तज्ज्ञानं वाऽसत्यं ततो भयं सत्यं जायत इत्यसत्यात्सत्यस्योत्पत्तिरुक्ता। यद्यपि चाहिज्ञानमपि स्वरूपेण सत्तथापि न तज्ज्ञानत्वेन भयहेतुरपि त्वनिर्वाच्याहिरूषितत्वेन। अन्यथा रज्जुज्ञानादपि भयप्रसङ्गाज्ज्ञानत्वेनाविशेषात्। तस्मादनिर्वाच्याहिरूषितं ज्ञानमप्यनिर्वाच्यमिति सिद्धमसत्यादपि सत्यस्योपजन इति। न च ब्रूमः सर्वस्मादसत्यात्सत्यस्योपजनो, यतः समारोपितधूमभावाया धूममहिष्या वह्निज्ञानं सत्यं स्यात्। नहि चक्षुषो रूपज्ञानं सत्यमुपजायत इति रसादिज्ञानेनापि ततः सत्येन भवितव्यम्। यतो नियमो हि स तादृशः सत्यानां यतः कुतश्चित् किञ्चिदेव जायत इत्येवमसत्यानामपि नियमो यतः कुतश्चिदसत्यात्सत्यं कुतश्चिदसत्यं यथा दीर्घत्वादेर्वर्णेषु समारोपितत्वाविशेषेऽप्यजीनमित्यतो ज्यानिविरहमवगच्छन्ति सत्यम्, अजिनमित्यतस्तु समारोपितदीर्घभावाज्ज्यानिविरहमवगच्छन्तो भवन्ति भ्रान्ताः। न चोभयत्र दीर्घसमारोपं प्रति कश्चिदस्ति भेदस्तस्मादुपपन्नमसत्यादपि सत्यस्योदय इति। निदर्शनान्तरमाह *स्वप्नदर्शनावस्थस्य इति*। यथा सांसारिको जाग्रद्भुजङ्गं दृष्ट्वा पलायते ततश्च न दंशवेदनामाप्नोति, पिपासुः सलिलमालोक्य पातुं प्रवर्त्तते ततस्तदासाद्य पायम्पायमाप्यायितः सुखमनुभवति, एव स्वप्नान्तिकेऽपि तदवस्थं सर्वमित्यसत्यात् कार्यसिद्धिः। शङ्कते *तत्कार्यमप्यनृतमेव इति*। एवमपि नासत्यात् सत्यस्य सिद्धिरुक्तेत्यर्थः। परिहरति *तत्र ब्रूमः, यद्यपि स्वप्नदर्शनावस्थस्य इति*। लौकिको हि सुप्तोत्थितोऽवगम्यं बाधितं मन्यते न तदवगतिं, तेन यद्यपि परीक्षका अनिर्वाच्यरूषितामवगतिमनिर्वाच्यां निश्चिन्वन्ति तथापि लौकिकाभिप्रायेणैतदुक्तम्। अत्रान्तरे लौकायतिकानां मतमपाकरोति *एतेन स्वप्नदृशोऽवगत्यबाधनेन इति*। यदा खल्वयञ्चैत्रस्तारक्षवीं व्यात्तविकटदंष्ट्राकरालवदनामुत्तब्धबम्भ्रमन्मस्तकावचुम्बिलाङ्गूला-

मतिरोषारुणध्वस्तविशालवृत्तलोचनां रोमाञ्चसञ्चयोत्फुल्लभीषणां स्फटिकाचलभित्तिप्रतिबिम्बितामभ्यमित्रीणां तनुमास्थाय स्वप्ने प्रतिबुद्धो मानुषीमात्मनस्तनुं पश्यति तदोभयदेहानुगतमात्मानं प्रतिसन्दधानो देहातिरिक्तमात्मानं निश्चिनोति, न तु देहमात्रम्; तन्मात्रत्वे देहवत्प्रतिसन्धानाभावप्रसङ्गात्। कथं चैतदुपपद्येत यदि स्वप्नदृशोऽवगतिरबाधिता स्यात् तद्बाधे तु प्रतिसन्धानाभाव इति। असत्याच्च सत्यप्रतीतिः श्रुतिसिद्धाऽन्वयव्यतिरेकसिद्धा चेत्याह *तथाच श्रुतिः इति*। *तथाकारादि इति*। यद्यपि रेखास्वरूपं सत्यं तथापि तद्व्ययासङ्केतमसत्यं, नहि सङ्केतयितारः सङ्केतयन्तीदृशेन रेखाभेदेनायं वर्णः प्रत्येतव्यः, अपि त्वीदृशो रेखाभेदोऽकार ईदृशश्च ककार इति, तथा चासमीचीनात् सङ्केतात्समीचीनवर्णावगतिरिति सिद्धम्। यच्चोक्तमेकत्वांशेन ज्ञानमोक्षव्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः सेत्स्यतीति तत्राह *अपि चान्त्यमिदं प्रमाणम् इति*। यदि खल्वेकत्वानेकत्वनिबन्धनौ व्यवहारावेकस्य पुंसोऽपर्यायेण सम्भवतस्ततस्तदर्थमुभयसद्भावः कल्प्येत, न त्वेदस्ति, नह्येकत्वावगतिनिबन्धनः कश्चिदस्ति व्यवहारस्तदवगतेः सर्वोत्तरत्वात्। तथाहि तत्त्वमसीत्यैकात्म्यावगतिः समस्तप्रमाणतत्फलतद्व्यवहारानपबाधमानैवोदीयते, नैतस्याः परस्तात् किञ्चिदनुकूलं प्रतिकूलं चास्ति यदपेक्षेत येन चेयं प्रतिक्षिप्येत, तत्रानुकूलप्रतिकूलनिवारणान्नातः परं किञ्चिदाकांङ्क्ष्यमिति न चेयमवगतिर्डुलिक्षीरप्रायेत्याह *न चेयम् इति*। स्यादेतत्—अन्त्या चेदियमवगतिर्निष्प्रयोजना तर्हि तथा च न प्रेक्षावद्भिरुपादीयेत, प्रयोजनवत्त्वे वा नान्त्या स्यादित्यत आह *न चेयमवगतिरनर्थिका*। कुतः? *अविद्यानिवृत्तिफलदर्शनात्*। नहीयमुत्पन्ना सती पश्चाविद्यां निवर्त्तयति येन नान्त्या स्यात्, किन्त्वविद्याविरोधिस्वभावतया तन्निवृत्त्यात्मैवोदयते। अविद्यानिवृत्तिश्च न तत्कार्यतया फलमपि त्विष्टतयेष्टलक्षणत्वात् फलस्येति। प्रतिकूलं पराचीनं निराकर्त्तुमाह *भ्रान्तिर्वा इति*। कुतः? *बाधक इति*। स्यादेतत्—मा भूदेकत्वनिबन्धनो व्यवहारोऽनेकत्वनिबन्धनस्त्वस्ति, तदेव हि सकलामुद्वहति लोकयात्राम्, अतस्तत्सिद्ध्यर्थमनेकत्वस्य कल्पनीयं तात्त्विकत्वमित्यत आह *प्राक् च इति*। व्यवहारो हि बुद्धिपूर्वकारिणां बुद्ध्योपपद्यते, न त्वस्यास्तात्त्विकत्वेन, भ्रान्त्यापि तदुपपत्तेरित्यावेदितम्। सत्यञ्च तदविसंवादादनृतञ्च विचारासहतयाऽनिर्वाच्यत्वात्। अन्त्यस्यैकात्म्यज्ञानस्यानपेक्षतया बाधकत्वमनेकत्वज्ञानस्य च प्रतियोगिग्रहापेक्षया दुर्बलत्वेन बाध्यत्वं वदन् प्रकृतमुपसंहरति *तस्मादन्त्येन प्रमाणेन इति*। स्यादेतत्—न वयमनेकत्वव्यवहारसिद्ध्यर्थमनेकत्वस्य तात्त्विकत्वं कल्पयामः, किन्तु श्रौतमेवास्य तात्त्विकत्वमिति चोदयति *ननु मृदादि इति*। परिहरति *नेत्युच्यते इति*। मृदादिदृष्टान्तेन हि कथञ्चित्परिणाम उन्नेयः, न च शक्य उन्नेतुमपि, मृत्तिकेत्येव सत्यमिति कारणमात्रसत्यत्वावधारणेन कार्यस्यानृतत्वप्रतिपादनात् साक्षात् कूटस्थनित्यत्वप्रतिपादिकास्तु सन्ति सहस्रशः श्रुतय इति न

परिणामधर्मता ब्रह्मणः। अथ कूटस्थस्यापि परिणामः कस्मान्न भवतीत्यत आह *नह्येकस्य इति*। शङ्कते *स्थितिगतिवद् इति*। यथैकवाणाश्रये गतिनिवृत्ती एवमेकस्मिन् ब्रह्मणि परिणामश्च तदभावश्च कौटस्थ्यं भविष्यत इति। निराकरोति *न, कूटस्थस्येति विशेषणाद् इति*। कूटस्थनित्यता हि सदातनी स्वभावादप्रच्युतिः, सा कथं प्रच्युत्या न विरुध्यते? न च धर्मिणो व्यतिरिच्यते धर्मो येन तदुपजननायेऽपि धर्मी कूटस्थः स्यात्। भेद ऐकान्तिके गवाश्ववद्धर्मधर्मिभावाभावात्। वाणादयस्तु परिणामिनः स्थित्या गत्या च परिणमन्त इति। अपि च स्वाध्यायाध्ययनविध्यापादितार्थवत्त्वस्य वेदराशेरेकेनापि वर्णेनानर्थकेन न भवितव्यम्, किं पुनरियता जगतो ब्रह्मयोनित्वप्रतिपादकेन वाक्यसन्दर्भेण, तत्र फलवद् ब्रह्मदर्शनसमाम्नानसन्निधावफलं जगद्योनित्वं समाम्नायमानं तदर्थं सत्तदुपायतयाऽवतिष्ठते नार्थान्तरार्थमित्याह *न च यथा ब्रह्मणः इति*। अतो न परिणामपरत्वमस्येत्यर्थः। तदनन्यत्वमित्यस्य सूत्रस्य प्रतिज्ञाविरोधं श्रुतिविरोधञ्च चोदयति *कूटस्थब्रह्मात्मवादिनः इति*। परिहरति *न, अविद्यात्मक इति*। नाम च रूपञ्च ते एव बीजं तस्य व्याकरणं कार्यप्रपञ्चस्तदपेक्षत्वादैश्वर्यस्य। एतदुक्तं भवति–न तात्त्विकमैश्वर्यं सर्वज्ञत्वञ्च ब्रह्मणः किन्त्वविद्योपाधिकमिति तदाश्रयं प्रतिज्ञासूत्रं तत्त्वाश्रयन्तु तदनन्यत्वसूत्रं, तेनाविरोधः। सुगममन्यत्॥१४॥

कारणस्य भावः सत्ता चोपलम्भश्च तस्मिन् कार्यस्योपलब्धेर्भावाच्च। एतदुक्तं भवति–विषयपदं विषयविषयिपरं, विषयिपदमपि विषयिविषयपरं, तेन कारणोपलम्भभावयोरुपादेयोपलम्भभावादिति सूत्रार्थः सम्पद्यते। तथा च प्रभरूपानुविद्धबुद्धिबोध्येन चाक्षुषेण न व्यभिचारः, नापि वह्निभावाभावानुविधायिभावाभावेन धूमभेदेनेति सिद्धं भवति। तत्र यथोक्तहेतोरेकदेशाभिधानेनोपक्रमते भाष्यकारः *इतश्च कारणादनन्यत्वं* भेदाभावः* कार्यस्य, *यत्कारणं *यस्मात् कारणात्। *भाव एव कारणस्य इति*। अस्य व्यतिरेकमुखेन गमकत्वमाह *न च नियमेन इति*। काकतालीयन्यायेनान्यभावेऽप्यन्यदुपलभ्यते, न तु नियमेनेत्यर्थः। हेतुविशेषणाय व्यभिचारं चोदयति *नन्वन्यस्य भावेऽपि इति*। एकदेशिमतेन परिहरति *नेत्युच्यते इति*। शङ्कैकदेशिपरिहारं दूषयित्वा परमार्थपरिहारमाह *अथ इति*। तदनेन हेतुविशेषणमुक्तम्। पाठान्तरेणेदमेव सूत्रं व्याचष्टे *न केवलं शब्दादेव इति*। पट इति हि प्रत्यक्षबुद्ध्या तन्तव एवातानवितानावस्था आलम्ब्यन्ते, न तु तदतिरिक्तः पटः प्रत्यक्षमुपलभ्यते। एकत्वं तु तन्तूनामेकप्रावरणलक्षणार्थक्रियावच्छेदाद्बहूनामपि। यथैकदेशकालावच्छिन्ना धवखदिरपलाशादयो बहवोऽपि वनमिति। अर्थक्रियायाश्च प्रत्येकमसमर्था अप्यनारभ्यैवार्थान्तरं किञ्चिन्मिलिताः कुर्वन्तो दृश्यन्ते, यथा ग्रावाण उखाधारणमेकम्, एवमनारभ्यैवार्थान्तरं तन्तवो मिलिताः प्रावरणमेकं

करिष्यन्ति। न च समवायाद्भिन्नयोरपि भेदानवसायः इति साम्प्रतम्, अन्योन्याश्रयत्वात्–भेदे हि सिद्धे समवायः समवायाच्च भेदः। न च भेदे साधनान्तरमस्ति, अर्थक्रियाव्यपदेशभेदयोरभेदेऽप्युपपत्तेरित्युपपादितम्। तस्माद्यत्किञ्चिदेतत्। अनया च दिशा मूलकारणं ब्रह्मैव परमार्थसदवान्तरकारणानि च तन्त्वादयः सर्वेऽनिर्वाच्या एवेत्याह *तथा तन्तुषु इति*॥१५॥

विभजते *इतश्च इति*। न केवलं श्रुतिः, उपपत्तिश्चात्र भवति *यच्च यदात्मना इति*। नहि तैलं सिकतात्मना सिकतायामस्ति, यथा घटोऽस्ति मृदि मृदात्मना। प्रत्युपन्नो हि घटो मृदात्मनोपलभ्यते, नैवं प्रत्युत्पन्नं तैलं सिकतात्मना। तेन यथा सिकतायाः तैलं न जायत एवमात्मनोऽपि जगन्न जायेत, जायते च, तस्मादात्मात्मनाऽऽसीदिति। गम्यते। उपपत्त्यन्तरमाह *यथा च कारणं ब्रह्म इति*। यथा हि घटः सर्वदा सर्वत्र घट एव न जात्वसौ क्वचित् पटो भवत्येवं सदपि सर्वत्र सर्वदा सदेव न तु क्वचित् कदाचिदसद्भवितुमर्हतीत्युपपादितमधस्तात्। तस्मात् कार्यं त्रिष्वपि कालेषु सदेव। सत्त्वं चेत् किमतो यद्येवमित्यत आह *एकञ्च पुनः इति*। सत्त्वं चैकं कार्यकारणयोः, नहि प्रतिव्यक्ति सत्त्वं भिद्यते, ततश्चाभिन्नसत्तानन्यत्वादेते अपि मिथो न भिद्येते इति। न च ताभ्यामनन्यत्वात् सत्त्वस्यैव भेद इति युक्तम्। तथा सति हि सत्त्वस्य समारोपितत्वप्रसङ्गः। तत्र भेदाभेदयोरन्यतरसमारोपकल्पनायां किं तात्त्विकाभेदोपादाना भेदकल्पनास्त्वाहो तात्त्विकभेदोपादानाभेदकल्पनेति। वयं तु पश्यामो भेदग्रहस्य प्रतियोगिग्रहापेक्षत्वाद्भेदग्रहमन्तरेण च प्रतियोगिग्रहासम्भवादन्योश्रयापत्तेः, अभेदग्रहस्य च निरपेक्षतया तदनुपपत्तेः, एकैकाश्रयत्वाच्च भेदस्यैकाभावे तदनुपपत्तेः, अभेदग्रहोपादानैव भेदकल्पनेति सर्वमवदातम्॥१६॥

व्याकृतत्वाव्याकृतत्वे च धर्मावनिर्वचनीयौ। सूत्रमेतन्निगदव्याख्यातेन भाष्येण व्याख्यातम्॥१७॥

अतिशयवत्त्वात्प्रागवस्थायाः इति। अतिशयो हि धर्मो नासत्यतिशयवति कार्ये भवितुमर्हतीति। ननु न कार्यस्यातिशयो नियमहेतुरपि तु कारणस्य शक्तिभेदः, स चासत्यपि कार्ये कारणस्य सत्त्वात्सन्नेवेत्यत आह *शक्तिश्च इति*। नान्या कार्यकारणाभ्यां, नाप्यसती कार्यात्मनेति योजना। *अपि च कार्यकारणयोः इति*। यद्यपि भावाच्चोपलब्धेरित्यत्रायमर्थ उक्तस्तथापि समवायदूषणाय पुनरवतारितः। अनभ्युपगम्यमाने च समवायस्य समवायिभ्यां सम्बन्धे विच्छेदप्रसङ्गोऽवयवावयविद्रव्यगुणादीनां मिथः। नह्यसम्बद्धः समवायिभ्यां समवायः समावयिनौ सम्बन्धयेदिति। शङ्कते *अथ समवायः स्वयम् इति*। यथा हि सत्त्वयोगाद् द्रव्यगुणकर्माणि सन्ति, सत्त्वं तु स्वभावत एव सदिति न सत्त्वान्तरयोगमपेक्षते, तथा समवायः समवायिभ्यां सम्बद्धुं न सम्बन्धान्तरयोगमपेक्षते, स्वयं सम्बन्धरूपत्वादिति, तदेतत्सिद्धान्तान्तरदिरोधापादनेन निराकरोति

संयोगोऽपि तर्हि इति। न च संयोगस्य कार्यत्वात् कार्यस्य च समवायिकारणाधीनजन्मत्वात् असमवाये च तदनुपपत्तेः समवायकल्पना संयोग इति वाच्यम्। अजसंयोगे तदभावप्रसङ्गात्। अपि च सम्बन्ध्यधीननिरूपणः समवायो यथा सम्बन्धिद्वयभेदे न भिद्यते तन्नाशे च न नश्यत्यपि तु नित्य एक एव, एवं यदि संयोगोऽपि भवेत् ततः को दोषः? अथैतत्प्रसङ्गभिया संयोगवत्समवायोऽपि प्रतिसम्बन्धिमिथुनं भिद्यते चानित्यश्चेत्यभ्युपेयते, तथा सति यथैकस्मान्निमित्तकारणादेव जायत एवं संयोगोऽपि निमित्तकारणादेव जनिष्यत इति समानम्। *तादात्म्यप्रतीतेश्च इति*। सम्बन्धावगमो हि सम्बन्धकल्पनाबीजं न तादात्म्यावगमस्तस्य नानात्वैकाश्रयसम्बन्धविरोधादिति। वृत्तिविकल्पेनावयवातिरिक्तमवर्यावनं दूषयति *कथञ्च कार्यम् इति*। *समस्त इति*। मध्यपरभागयोरर्वाग्भागव्यवहितत्वात्। अथ समस्तावयवव्यासङ्ग्यपि कतिपयावयवस्थानो ग्रहीष्यत इत्यत आह *नहि बहुत्वम् इति*। *अथावयवशः इति*। बहुत्वसंख्या हि स्वरूपेणैव व्यासज्य संख्येयेषु वर्त्तत इत्येकतमसंख्येयाग्रहणेऽपि न गृह्यते, समस्तव्यासङ्गित्वात्तद्रूपस्य। अवयवी तु न स्वरूपेणावयवान् व्याप्नोति, अपि त्ववयवशः, तेन यथा सूत्रमवयवैः कुसुमानि व्याप्नुवन्न समस्तकुसुमग्रहणमपेक्षते कतिपयकुसुमस्थानस्यापि तस्योपलब्धेः, एवमवयव्यपीति भावः। निराकरोति *तदार्थि इति*। शङ्कते *गोत्वादिवद् इति*। निराकरोति *न इति*। यद्यपि गोत्वस्य सामान्यस्य विशेषा अनिर्वाच्या न परमार्थसन्तस्तथा च क्वास्य प्रत्येकपरिसमाप्तिरिति, तथाप्यभ्युपेत्येदमुदितमिति मन्तव्यम्। अकर्तृका यतोऽतो निरात्मिका स्यात्, कारणाभावे हि कार्यमुत्पन्नं किं नाम भवेत्? अतो निरात्मकत्वमित्यर्थः। यद्युच्येत घटशब्दस्तदवयवेषु व्यापाराविष्टतया पूर्वापरीभावमापन्नेषु घटोपजननाभिमुखेषु तादर्थ्यनिमित्तादुपचारात् प्रयुज्यते, तेषाञ्च सिद्धत्वेन कर्त्तत्वमस्तीत्युपपद्यते घटो भवतीति प्रयोग इत्यत आह *घटस्य चोत्पत्तिरुच्यमानः इति*। उत्पादना हि सिद्धानां कपालकुलालादीनां व्यापारो नोत्पत्तिः। न चोत्पादनैवोत्पत्तिः, प्रयोज्यप्रयोजकव्यापारयोर्भेदादभेदे वा घटमुत्पादयतीतिवद् घटमुत्पद्यत इत्यपि प्रसङ्गात्। तस्मात् करोतिकारयत्योरिव घटगोचरयोर्भृत्यस्वामिसमवेतयोरुत्पत्त्युत्पादन- योरधिष्ठानभेदोऽभ्युपेतव्यः, तत्र कपालकुलालादीनां सिद्धानामुत्पादनाधिष्ठानानां नोत्पत्त्यधिष्ठानत्वमस्तीति पारिशेष्याद् घट एव साध्य उत्पत्तेरधिष्ठानमेषितव्यः। न चासावसन्नधिष्ठानं भवितुमर्हतीति सत्त्वमस्याभ्युपेयम्। एवञ्च घटो भवतीति घटव्यापारस्य धातूपात्तत्वात् तत्रास्य कर्तृत्वमुपपद्यते तण्डुलानामिव सतां विक्लित्तौ विक्लिद्यन्ति तण्डुला इति। शङ्कते *अथ स्वकारणसत्तासम्बन्ध एवोत्पत्तिः इति*। एतदुक्तं भवति—नोत्पत्तिर्नाम कश्चिद् व्यापारो येनासिद्धस्य कथमत्र कर्तृत्वमित्यनुयुज्येत, किन्तु स्वकारणसमवायः स्वसत्तासमवायो वा, न चासतोऽप्यविरुद्ध इति। सोऽप्यसतोऽनुपपन्न इत्याह *कथमलब्धात्मकम् इति*। अपि च प्रागुत्पत्तेरसत्त्वं कार्यस्येति कार्याभावस्य भावेन

मर्यादाकरणमनुपपन्नमित्याह *अभावस्य च इति*। स्यादेतत्–अत्यन्ताभावस्य वन्ध्यासुतस्य मा भून्मर्यादा अनुपाख्येयो हि सः, घटप्रागभावस्य तु भविष्यता घटेनोपाख्येयस्यास्ति मर्यादेत्यत आह *यदि बन्ध्यापुत्रः कारकव्यापाराद् इति*। उक्तमेतदधस्ताद्यथा न जातु घटः पटो भवत्येवमसदपि सन्न भवतीति। तस्मान्मृत्पिण्डे घटस्यासत्त्वेऽत्यन्तासत्त्वमेवेति। अत्रासत्कार्यवादी चोदयति *नन्वेवं सति इति*। प्राक् प्रसिद्धमपि कार्यं कदाचित् कारणेन योजयितुं व्यापारोऽर्थवान् भवेदित्यत आह *तदनन्यत्वाच्च इति*। परिहरति *नैष दोषः इति*। उक्तमेतद्यथा भुजङ्गतत्त्वं न रज्जोर्भिद्यते, रज्जुरेव हि तत्, काल्पनिकस्तु भेदः, एवं वस्तुतः कार्यतत्त्वं न कारणाद्भिद्यते, कारणस्वरूपमेव हि तत्, अनिर्वाच्यं तु कार्यरूपं भिन्नमिवाभिन्नमिव चावभासत इति। तदिदमुक्तं *वस्त्वन्यत्वम् इति*। वस्तुतः परमार्थतोऽन्यत्वं न विशेषदर्शनमात्राद्भवति, सांव्यावहारिके तु कथञ्चित्तत्त्वान्यत्वे भवत एवेत्यर्थः। अनयैव हि विशेष सन्दर्भो योज्यः। असत्कार्यवादिनं प्रति दूषणान्तरमाह *यस्य पुनः इति*। कार्यस्य कारणादभेदे सविषयत्वं कारकव्यापारस्य स्यान्नान्यथेत्यर्थः। *मूलकारणं* ब्रह्म। शब्दान्तराच्चेति। सूत्रावयवमवतार्य व्याचष्टे *एवं युक्तेः कार्यस्य* इति। अतिरोहितार्थम्॥१८॥

"पटवच्च", "यथा च प्राणादि" इति च सूत्रे निगदवयख्यातेन भाष्येण व्याख्याते॥१९–२०॥

इति भामती आरम्भणाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

यद्यपि स्वातन्त्र्यास्वातन्त्र्यादिविरुद्धधर्मसम्बन्धेन जीवेश्वरयोर्विभाग उच्यते। तथाऽपि तयोः कार्यकारणयोरनन्यत्वमव्यतिरिक्तत्वं च सिद्ध्यत्येवेत्याह-

।।सू।। **तदनन्यत्वमारम्भणशब्दादिभ्यः**।।१५।।

इह कार्यकारणयोः प्रपञ्चब्रह्मणोः समन्वयसिद्धमनन्यत्वं सन्दिह्यते युक्तं न वेति। सन्देहस्य चेतनाचेतनत्वपरस्परविरुद्धधर्मसम्बन्धवैलक्षण्यं कारणम्। कथमनयोरनन्यत्वमुपपद्यते? पूर्वाधिकरणे सर्वज्ञत्वादिमत्वेन परमेश्वरस्य भोक्तृत्वाज्ञत्वादिना जीवस्य चोभयोर्विभागो निर्दिष्टः। चिदचिद्वस्तुनोरत्यन्तविलक्षणत्वादनन्यत्वकथा दूरत एव। न हि कार्यकारणत्वमनन्यत्वसाधकं, गोमयवृश्चिकादौ सत्यपि तस्मिन् वैलक्षण्यदर्शनात्। घटमृत्पिण्डादिष्वप्यर्थक्रियादिव्यवहारभेदादभेदो नास्त्येव। अथवा-कार्यकारणयोरत्यन्ताभेदे प्रपञ्चब्रह्मणोरखण्डतया सर्वत्र कर्तृकर्मक्रियादिव्यवहारलोपः स्यात् इत्येवं प्राप्ते ब्रूमः-कारणात् ब्रह्मणः कार्यं जगदनन्यदेव। कथमवगम्यते? आरम्भणशब्दादिभ्यः। यथा 'वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयम् 'तदैक्षत बहु स्यां प्रजायेयेति' 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' 'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रः' इत्यादिशब्देभ्यः।।

यदुक्तं न हि कार्यकारणत्वमनन्यत्वसाधकमिति तत्राह-

।।सू।। **भावे चोपलब्धेः**।।१६।।

घटादिकार्यभावे च तदेव मृद्रव्यं घट इत्युपलभ्यते। ततः कारणादनन्यदेव कार्यम्। तथा 'वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'। इति श्रुत्याऽपि प्रतिपाद्यते। विकारो नामधेयं चवाचारम्भणं वाचायाः अभिलापार्थक्रियारूपव्यवहारस्य निष्पादकं भवति। मृद्रव्यस्यैव घटाद्यवस्था

घटादिनामधेयं चार्थक्रियाभिलापरूपव्यवहारनिष्पत्तये भवतीति यावत्। वस्तुतो घटादिकमपि मृत्तिकेत्येव सत्यं प्रामाणिकं मृद्व्यतिरेकेण घटभावादर्शनात्। अथवा-'वाचाऽऽरम्भणं विकारः' विकारो घटो वाचारम्भणं घटोऽयमितिं वागारम्भविषयमात्रम्। मृद्द्रव्य एव व्यवहारसिद्ध्यर्थं जायमानमवस्थान्तरम्, न तु मृदो द्रव्यान्तरम्। 'मृत्तिकेत्येव नामधेयं सत्यं' घटादिकं मृत्तिकेति कृत्वैव तत्र सर्वं मृत्पिण्डादिनामधेयं सत्यं सति प्रामाणिकेऽर्थे साधु, न तु द्रव्यान्तरमिति कृत्वा। यतो घटो मृदेवेति। अतः कारणादनन्यदेव कार्यम्। अर्थक्रियादिव्यवहारभेदस्तु, मृद्घटयोः वस्त्वैक्येऽप्यवस्थाभेदात् भवत्येव। ततो मृद्घटयोरिव ब्रह्मप्रपञ्चयोरपि व्याप्यव्यापकभावादनन्यत्वम्। तथा पुराणवाणी-'शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्। तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा।।' इति।। 'मृदयं घट' इत्यत्र यथा मृद्व्याप्तिर्घटे दृश्यते तथा ब्रह्मेदं जगदिति ब्रह्मव्याप्तिर्न दृश्यत इति चेत्, सन् घंटः सन् पटः इति सर्वत्र दृश्यत एव सद्रूपस्य ब्रह्मणो व्याप्तिः। सच्चिद्रूपेण शिवेन यदि न व्याप्तं जगत् तदा सत्तास्फूर्तिभ्यां विनाकृतं कथमस्ति स्फुरतीति च दृश्येत? अवस्त्वेव भवेत्। अतो मृदा घटादिकमिव कारणेन शिवेन कार्यमिदं व्याप्तं तदनन्यभूतं चेति सिद्धम्।।

।।सू।। **सत्त्वाच्चापरस्य**।।१७।।

कार्यस्य कारणे सत्त्वाच्च कारणादनन्यदेव कार्यम्। घटशरावादिकं पूर्वं मृदेवासीदिति हि घटादिकं मृदात्मनोपलभ्यते।।

।।सू।। **असव्द्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् युक्तेः शब्दान्तराच्च**।।१८।।

'इदं वा अग्रे नैव किञ्चनासीत्' इति कार्यस्य पूर्वसमव्द्यपदेशात् कारणे कार्यमसदिति चेत्-न, स्थूलत्वविरोधिसूक्ष्मत्वरूपधर्मान्तरयोगादेवायमसद्व्यपदेशो नाभावात्। कुतः? 'तदसदेव सन्मनोऽकुरुत स्याम्' इति वाक्यशेषात्। मनस्कारो हि विद्यमानस्यैव भवति। युक्तिरपि तथा धर्मान्तरयोगनिमित्ततामसद्व्यपदेशस्यावगमयति। पिण्डत्वघटत्वकपालत्वरूपैः परस्परविरोधिभिः भावरूपैः धर्मैः, घटः प्राङ्नासीत्, इदानीमस्ति, तदानीं न **भविष्यतीति** सदा विद्यमानस्यैव मृद्रव्यस्य असदादिव्यपदेशोपपत्तौ न **तद्व्यतिरिक्तः** कश्चिदभावो नाम असद्व्यपदेशालम्बनं धर्मान्तरं **कल्पनीयमिति**। तथा शब्दान्तरं च 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' इत्यादि।। अयमभिप्रायः - पूर्वं स्वाभिन्ननामरूपविभागानर्हसूक्ष्मचिदचिद्रूपपरशक्तिगर्भितो हि शिवः केवलो भवति। पुनः स्वात्मिकां तादृशीं शक्तिं पूर्वदशाविरोधिस्थूलत्वयुक्तनामरूपविभागार्हचिदचिद्रूपां बहिर्विस्तारयति। तत्र शक्तिमतः शिवस्य संकोचावस्था प्रलयः। विकासावस्था सृष्टिरिति। तथा

आप्तवचनमपि—'चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद्बहिः। योगीव निरुपादानमर्थजातं प्रकाशयेत्।।' इति। निरुपादानमिति अनपेक्षितोपादानान्तरं स्वयमुपादानं भूत्वेत्यर्थः। ततः परमकारणात् परब्रह्मणः शिवादभिन्नमेव जगत् कार्यमिति।।

निदर्शनान्तरमुच्यते—

।।सू।। **पटवच्च**।।१९।।

यथा संकुचितः सूक्ष्मरूपः पटः प्रसारितो महापटकुटीरूपेण कार्यं भवति, तथा ब्रह्मापि संकुचितरूपं कारणं प्रसारितरूपं कार्यं भवति।।

।।सू।। **यथा च प्राणादिः**।।२०।।

यथा वायुरेक एव वृत्तिविशेषेण प्राणादिभेदं भजते, तथा ब्रह्मापि शक्तिव्यापारभेदेन सदाशिवादिविश्वरूपभेदं भजते। ततो ब्रह्मणः कारणादनन्यदेव कार्यं जगदिति युक्तम्।।

इति श्री कण्ठभाष्य आरम्भणाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

संगतिप्रदर्शनपूर्वकमुत्तराधिकरणमवतारयति – **यद्यपीति**। पूर्वाधिकरणे शरीरित्वकृतं न भवति सुखदुःखभोक्तृत्वं किं तु पारतंत्र्यकृतमिति परमस्वतंत्रस्य शिवस्य शरीरित्वेऽपि तत्र प्रसज्यत इत्युक्तम्। तर्हि मा भूत् ब्रह्मणः प्रपंचशरीरत्वांशे समन्वयस्य भंगः प्रपंचानन्यत्वांशे तु स्यात् प्रपञ्चशरीरकत्वोपपादकस्य स्वातंत्र्यास्वातंत्र्यतत्कृतभोक्तृत्वाभोक्तृत्वादिविभाग- रूपवैलक्षण्य-स्यैवानन्यत्वप्रतिक्षेपकत्वादिति प्रत्युदाहरणसंगत्या पूर्वं तत्र तत्र सिद्धवत्कृत्य व्यवहृतस्य प्रपंचशिवयोः कार्यकारणभावेनान्यत्वस्य वैलक्षण्यकृतान्तर्गणिकभेदाविरोधेन निरूपणार्थमुत्तरा-धिकरणारंभ इत्यर्थः।।सू।। **तदनन्यत्वमारंभणशब्दादिभ्यः**।।१३।। वैलक्षण्यं कारणमिति। यदि तद्वैलक्षण्यमनन्यत्वविरोधि तदा तद्युक्तमित्येवमनन्यत्वविरोधित्वाविरोधित्वाभ्यां संदिह्यमानं वैलक्षण्यमुपन्यस्तसंदेहस्य कारणमित्यर्थः। भेदकस्वभावस्य वैलक्षण्यस्य अभेदविरोधित्वादनन्यत्व-मयुक्तमिति पूर्वपक्षयति–**कथमिति**। यदि किंचिद्विलक्षणेनापि चेतनवर्गेणानन्यत्वमयुक्तं तदा किमु वक्तव्यमत्यंतविलक्षणेनाचेतनवर्गेणेत्याह–**चिदचिद्वस्तुनोरिति**। नन्वभेदव्याप्तेनोपादानोपादेयभावेन ब्रह्मप्रपञ्चयोरनन्यत्वसिद्धौ घटादिषु श्यामरक्तरूपादिवैलक्षण्यवद्देशकालाद्यवच्छेदभेदेन स्वातंत्र्यपारतंत्र्यादिना वैलक्षण्यमुपपादनीयमित्याशंक्यव्यभिचारात्तस्याभेदव्याप्तिरसिद्धेत्याह–**न हीति**। वस्तुतो विरुद्धोऽयं हेतुः न तु क्वचिदेव साध्यव्यभिचारीत्याहघटमृत्पिण्डादिष्वपीति। घटेनोदकाहरणं क्रियते मृत्पिण्डेन घटशरावादिकमित्यर्थक्रियाभेदः। घटस्य मृत्पिण्डदण्डचक्रादि कारणं मृत्पिण्डस्य जलसंयोजनपूर्वकमर्दनादीति कारणभेदः। पृथुबुध्नोदराकारः पिण्डाकारश्पेत्याकार भेदः। तदुल्लेखी बुद्धिभेदः। तत्प्रवृत्तिनिमित्तकश्शब्दभेदः। इदानीं मृत्पिण्डोऽस्ति घटो नास्तीति सत्वासत्वभेदः। मृत्पिण्डो दृष्टः घटशरावादिकं न दृष्टमिति ज्ञातत्वज्ञातत्वभेदः। बहवः तंतवः एकः पटः इति संख्याभेदः। एवमर्थक्रियादिभेदात् सर्वत्राप्युपादानोपादेयभावे भेद उन्नीयत इति विरुद्धो हेतुरित्यर्थः। **अथवेति**। किंचेत्यर्थः। **अखण्डतयेति**। अत्यंतैक्यापत्त्येत्यर्थः। **कर्तृकर्मेति**। कुलालो घटं करोतीत्यादिव्यवहारेषु कर्तृकर्मक्रियाणां भेदस्य दृष्टत्वेन सर्वत्र कर्तृकर्मभावादीनां

भेदाक्षेपकत्वावगमादित्यर्थः। साध्याहारं सूत्रं योजयन् सिद्धांतमाह-**कारणादिति।** आरंभणश्रुतेः ब्रह्मप्रपंचानन्यत्वसाधकत्वमुत्तरसूत्रे भाष्यकार एव स्पष्टीकरिष्यति। आदिशब्दगृहीतश्रुतीनां तत्साधकत्वं तु सामानाधिकरण्यादिभिः स्पष्टम्। उदाहृतश्रुतिकलापानुग्राहकस्यानन्यत्व-साधकानुमानस्य दृष्टांतप्रसाधनार्थत्वेन उत्तरसूत्रमवतारयति **यदुक्तमिति**।।सू।। **भावे चोपलब्धेः**।।१६।। ननु, घटाद्युत्पत्तौ सत्यां तदेवेदं मृद्द्रव्यमिति प्रत्यभिज्ञेयमर्थक्रियादिभेदयुक्तिबाधितत्वाद्भ्रांतेत्याशंक्य द्रव्यैक्येऽप्यवस्थाभेदकृतस्तद्भेद इति श्रुत्यैव दर्शितमिति विभावयितुमारंभणश्रुतेरर्थमाह-**तथेति।** एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तदुपपादनार्थं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्या'दिति दृष्टांत उपन्यस्तः। तत्र नायं दृष्टांत उपपद्यते। मृत्पिण्डस्य तद्विकाराणां घटशरावादीनां चाभिलापार्थक्रियादिभेदेनात्यंतभिन्नतया मृत्पिण्डज्ञानेन तद्विकाराणां ज्ञातत्वायोगादित्याशंकायां तदुपपादनार्थं वाचारंभणश्रुतिः प्रववृते। तत्र प्रतिज्ञादृष्टांतौ प्रकृत्यधिकरणे व्याख्यातौ। इह हेतूकृता वाचांरभणश्रुतिर्व्याख्यायते। विकारो घटत्वपृथुबुध्नोदरत्वादिः। नामधेयं तत्प्रवृत्तिनिमित्तकं घटादिपदं चेत्येतत् वाचारंभणं वाचा वाक् घटमानयेत्याद्यभिलापः। तेन तज्जन्यार्थक्रियापि लक्ष्यते। आरभ्यते अनेनेत्यारंभणं कारणम्। वाचाया आरंभणमभिलाभार्थक्रिययोः कारणमिति यावत्। नपुंसकानपुसंकयोः नपुंसकशेषैकवद्भावश्च। अनेनैतदुक्तं भवति। मृत्पिण्डतद्विकाराणां द्रव्यैक्येऽपि पिण्डपृथुबुन्धोदराद्याकारभेदेन तत्प्रवृत्तिनिमित्तकनामधेयभेदेन चार्थक्रियाभिलापभेद इति। ननु द्रव्यभेदेनैव तद्भेदः किमिति नेष्यते इत्याशंक्योक्तं 'मृत्तिकेत्येव सत्य' मिति। ननु द्रव्यभेदेनैव तद्भेदः किमिति नेष्यते इत्याशंक्योक्तं 'मृत्तिकेत्येव सत्य' मिति। घटशरावादिकमपि मृत्तिकेत्येव सत्यं प्रामाणिकं मृदेवायं घट इत्यादिप्रत्यभिज्ञाप्रत्यक्षसिद्धं गुरुत्वद्वैगुण्याभावादियुक्तिसिद्धं च। एवं प्रमाणसिद्धैक्यनिर्वाहायार्थक्रियाभिलापभेदस्य विकारनामधेयभेदोपाधिकत्वं कल्पयितुं युक्तमिति भावः। अथवैवं वाक्ययोजना-वाचारंभणं विकारः घटशरावादिविकारः घटोऽयमित्यादिव्यवहारविशयमात्रं न तु मृदो द्रव्यांतरम्। द्रव्यांतराभावे मृदः पिण्डतादशायामप्रवृत्तं घटशरावादि नामधेयं कथ पश्चात् प्रवर्तत इत्याशंकायामुच्यते-नामधेयं मृत्तिकेत्येव सत्यम्। मृन्नामधेयमिव घटशरावादिनामधेयमपि तद्द्रव्यं मृत्तिकेति कृत्वैव सति प्रामाणिकेऽर्थे साधु न तु द्रव्यांतरमिति कृत्वा। प्रत्यभिज्ञाविरोधादिना द्रव्यांतरस्याप्रामाणिकत्वादिति। अस्मिन्पक्षे 'सत्ये साधौ च सच्छब्दः' इति स्मृतेः प्रामाणिकार्थवाचिसत्यशब्दपर्यायात् सच्छब्दा' त्तत्र साधु 'रित्यर्थे यत्प्रत्ययः। आरंभणशब्दो विषयभावेन निष्पादकं वदन्विषयत्वपर्यवसायी। तस्य पुल्लिंगविशेषणत्वेऽपि लिंगसामान्यविवक्षया नपुंसकलिंगनिर्देशः। द्विगुरेकवचनमितिवदिति विशेषः। भाष्ये द्वितीयव्याख्याने 'यतो घटो मृदेवे'ति वाक्येन मृद्घटयोर्द्रव्यैक्यै प्रत्यभिज्ञारूपं प्रमाणं दर्शितम्। प्रथमव्याख्याने

'मृद्व्यतिरेकेण घटभावादर्शना' दिति वाक्येन मृद्व्यतिरेकेण घटे गुरुत्वादिधर्माणामदर्शनरूपा तत्र युक्तिर्दर्शिता। एवं च यद्यपि मृत्पिंडघटशरावादीनामभिलापार्थक्रियादिभेदश्चैत्रमैत्रादीनामिव द्रव्यांतरत्वेनाप्युपपद्यते बालयुवस्थविराणामिवावस्थाभेदेनाऽपि। अथाप्यत्राभेदेनैव तदुपपादनं कार्यम्। कार्यकारणानन्यत्वस्य युक्तयनुभवानुग्रहश्रुतिसिद्धत्वादित्युपसंहरति-**अत इति।** अर्थक्रियादीत्यादि-शब्देन प्राङ्निर्दिष्टा बुद्ध्यभिलापादयस्सर्वेऽपि गृह्यंते। ननु कार्यस्य घटत्वाद्यवस्थाविशेषविशिष्टत्वेन बुद्ध्यभिलापविशेषविषयत्वाज्ञातत्वासत्त्वादिकमुपपद्यताम् एकत्वानेकत्वरूपसंख्याभेदः कथमुपपद्यते। कोऽत्र विशेषः। मृदः पिण्डत्वावस्थाप्रहाणेन कुड्यत्वावस्थाप्राप्तिवदनेकत्वावस्थाप्रहाणेन एकत्वावस्थापत्तिः। पुनश्च कुड्यत्वावस्थाप्रहाणेन पिण्डत्वावस्थाप्तिवदेकत्वावस्थाप्रहाणेनानेक-त्वावस्थाप्तिश्चेत्यापद्यत एव। ननु, विरलतंत्वारब्धपटादिषु कारणगतानेकत्वसंख्या न प्रहीयते। तत्र कथं द्रव्यैक्ये तद्विरुद्धानेकत्वसंख्यापत्तिः। पटत्वरूपावस्थाभेदेनेति चेन्न। द्रव्यैक्ये घटकुड्यादिशु मृत्त्ववत् पटे तंतुत्वस्यानुवृत्तेरवश्यंभावेन तस्य पटव्यावृत्तधर्मवृत्त्यवच्छेदकत्वायोगात् कार्यगतपटत्व-विरोधित्वात्तन्नानुवर्तते घटत्वविरोधित्वात् पिण्डत्वमिवेति चेत्तर्हि तद्वदेव प्रहीणं भवेत्। न तंतुष्वप्यनुवर्तेत। कार्यकारणयोरैक्ये प्रहीणकार्यानुवृत्तोभयविधावस्थाव्यतिरेकेण तदुभयव्यवस्थितावस्थांतरस्थितनुपपत्तेरिति चेन्मैवम्। तंतुष्वेव कुविंदकारितसंयोगविशेषावच्छेदेन पटत्वस्य तदुपाधिकैकत्वस्य तंतुत्वाभावस्य च वृत्त्युपपत्तेः कार्यकारणभेदवादेऽप्येकस्मिन्नेव घटे कालरूपावच्छेदभेदेन श्यामरक्तरूपयोः देशभेदेनैकस्मिन्नेव वृक्षे स्थूलतरतनुतरादिपरिमाणानामेक-स्मिन्नेव कदलीदले श्यामलधवलरूपयोः कठिनसुकुमारस्पर्शयोश्च स्वस्वविरुद्धधर्माभावसाहित्येन वृत्तिदर्शनात्। तेषु विरुद्धधर्मावच्छेदककालदेशानां परस्परासंकीर्णत्वमस्ति। नात्र कुविंदकृतसंयोगास्तंतुत्वासंकीर्णा इति चेन्न। बह्वावार्द्रेधनप्रभववह्नित्वावच्छेदेन व्याप्तिमत्त्वस्य तदसंकीर्णवह्नित्वावच्छेदेन व्याप्त्यभावस्य च आर्द्रेधनप्रभववह्नित्वावच्छेदेन व्याप्यतावच्छेदक-वद्वह्निके अविशेषितवह्निसत्त्वावच्छेदेन व्याप्यतावच्छेदकत्वाभावस्य च वृत्त्यभ्युपगमात्। एवं कार्यकारणानन्यत्ववादेऽप्येकस्मिन्नेव द्रव्ये तन्तुत्वं स्वप्रापकांशुसंयोगविशेषावच्छेदेन तदवच्छेदेनानेकत्वं च पटत्वावस्थाप्रापकतंतुसंयोगविशेषावच्छेदेन पटत्वं तदवच्छेदेनैकत्वं चेति पटत्वतंतुत्वयोरेकत्वानेकत्वयोश्च समावेशोपपत्तेर्न कश्चिद्विरोधः। एवमुपादानोपादेययोस्तृणच्छ-दिषोरिष्टकाप्राकारयोश्चानन्यत्वेऽपि तृणत्वच्छदिष्ट्वादिसमावेशाविरोध उन्नेयः। इयांस्तु विशेषः। छदिःषु तृणानां दीर्घतनुत्वाद्याकारस्य प्राकारे इष्टकानां चतुरश्रत्वाद्याकारस्य चाविरलतंत्वारब्धपटे तंतुत्वस्येवानुपलंभः विरलतंत्वारब्धपटे तंतुत्वतदाकृतिविशेषतदनेकत्वानामुपलंभ इति। तस्मादर्थक्रियादिभेदहेतोरवस्थाभेदस्याभ्युपगमान्न कश्चिद्विरोध इति भावः।

इदं तु चिंत्यते। कार्यकारणानन्यत्ववादिना कथमवस्थाभेद आगंतुकोऽभ्युपैतव्यः। आगंतुकस्य प्राक् सता कारणेनानन्यत्वायोगात् असत्कार्यवादपादप्रसारिकापत्तेश्च। न चावस्थाभेदोऽपि नित्यः। तथा सति मृत्पिण्डदशायामपि घटार्थक्रियादिप्रसंगात्, दण्डचक्रादिघटकारणकलापवैयर्थ्यप्रसङ्गाच्च। ननु, मृदः पिण्डतादशायामनभिव्यक्ता घटावस्था। अभिव्यक्तैव सार्थक्रियाद्युपयोगिनी। तदभिव्यक्त्यर्थश्च दंडचक्रादिः कारणकलापः। न च तथा सति मृत्पिण्डगतघटावस्थाभिव्यक्त्यर्थेन दण्डचक्रादिव्यापारेण तद्गतकरककपालमणिमल्लिकाद्यवस्थानामपवरकगतघटाभिव्यक्त्यर्थारोपितेन दीपेन तद्गतकरकादीनामिवाभिव्यक्तिप्रसगंः, मृत्पिंडिकादशायां प्रदीपारोपणेन घटाद्यभिव्यक्तिप्रसंगश्चेति वाच्यम्। उच्चारणविशेषेण वर्णविशेषाभिव्यक्तिः उच्चरित-वर्णविशेषाभिव्यंजकेन श्रोत्रमनस्संयोजनानुकूलपवनादिनोच्चारणं विना न वर्णाभिव्यक्तिरिति व्यवस्थादर्शनेन तद्वदिहाप्युपपत्तेः। वर्णानित्यत्वपक्षेऽपि रविकिरणैर्युगपदभिव्यंग्ययोर्नैल्योत्पलत्वयोः प्रदीपप्रभयोत्पलत्वस्यैवाभिव्यक्तिः कूपजलस्य वियति विक्षेपे रविकिरणैः तत्र शौक्लयजलत्वयोस्सहाभिव्यक्तावपि तस्य कूपान्तरवस्थितिसमये (तैलत्वस्ये) जलत्वस्थैवाभिव्यक्तिरित्यादिव्यवस्थादर्शनेन तद्वदिहापि यथादर्शनमभिव्यंग्याभिव्यंजक-भाववैचित्र्याभ्युपगमोपपत्तिश्चेति चेन्मैवमवस्थावत्तदभिव्यक्तावपि नित्यत्वानित्यत्वविकल्पे पूर्वोक्तदोषानतिपातात्। किंच केयमभिव्यक्तिः। ज्ञानं चेत्तदा दण्डचक्रादिमेलनस्य घटज्ञानकारणत्वापत्त्या तदपनयनानंतरं घटज्ञानोदयो न स्यात्। आवरणापनयश्चेत् घटसामग्र्या किमावरणमपनीयते। ननु मृदि पूर्वस्थिता पिण्डावस्था तस्यां नित्यमेव स्थिताया अपि घटावस्थाया आवरणम्। तदावृतत्वात्सा तदानीं न प्रतीयते। घटसामग्र्या पिण्डावस्थोपमर्दे सति तिलपीडनेनन तैलमिवावघातेन तण्डुल इव दोहनेन पय इव खननेन कूपजलमिव क्षालनेन पटशौक्लयमिव प्रतीयते। न च तथा सति मुद्गरपातानंतरमपि घटावस्थाप्रतीतिप्रसंगः तदावरणभूतायाः पिण्डावस्थायास्तिरोधानादिति वाच्यम् तदा मुद्गरपाताभिव्यंग्यकपालत्वाद्यवस्थायास्तदावरणत्वात् कारणे अभिव्यक्तायाः कस्याश्चित् कार्यावस्थायास्तद्गतसकलकार्यावस्थांतरावरणत्वाभ्युपगमात्। न च तथा सति कपालेषु कारणमेलने घटावस्थाभिव्यक्तिप्रसंगः। इष्टापत्तेः। कपालानि चूर्णीकृत्य जलमृदंतरसंयोजनमर्दनव्यापारैः मार्दवं प्रापय्य दण्डचक्रादिमेलने घटाभिव्यक्तिदर्शनात्। न च पटकारणानां पुनः पटभावो न दृश्यते इति शंकनीयम्। तद्भस्मनां क्षितितलपतितानां तत्क्षितिप्ररूढकार्पासतरुफलपरिणतौ क्रमेण तेषां पटभावोपपत्तेः। न च तंतुषु तंत्ववस्थायाः पटावस्थावरणत्वस्य वक्तव्यत्वात् विरलतंत्वारब्धपटे तत्तिरोधानशंकानास्पदे पटावस्थाभिव्यक्तिर्न स्यादिति वाच्यम्। फलबलेन कुविंदकृतसंयोगविशेषरहिततंत्ववस्थायाः तदावरकत्वकल्पनात् तस्मादविशेषिता वा पूर्वकार्यावस्थैव घटपटाद्यवस्थानामावरणमिति चेत् नैतद्युक्तम्। तथातथा

परिणाहशालिनी पटावस्था कुविन्दव्यापारात् प्रागपि यथादृष्टेन स्थूलेनैव रूपेण सती तंतुत्वेनानुभूयते उत कूर्मांगवत् संकुचितेन रूपेण सती। नाद्यः। यथादृष्टरूपायाः पटावस्थायाः तंतुषु कुविंदव्यापारात् प्राक्व्यस्तेषु समस्तेषु वा विप्रकीर्णेषु संहतेषु वा पर्याप्तवृत्त्यसंभवात्। न द्वितीयः। यथादृष्टपटावस्थायाः आगंतुकत्वापरिहारात्। न च वाच्यमनादिरेव सा पटावस्था अद्यतनेषु तंतुषु न वर्तते किंतु मूलकारण इति। तथा सति यत्रेदानीं भविष्यत्पटप्रागभावदेशे तन्तवो न संति तत्रावरणाभावेंन तदभिव्यक्तिप्रसंगात्। न च तत्र या काचन कार्यावस्थास्ति सैवावरणं स्यादिति वाच्यम्। तस्याः कुविंदव्यापारानंतरमपि सर्वत्रावर्जनीयत्वेन सर्वदा पटानभिव्यक्तिप्रसंगात्। कार्यावस्थास्सांदय एवाभ्युपैतव्या इति कथं कार्यकारणानन्यत्वसमर्थनं असत्कार्यवादापत्तिपरिहारश्चेति।

अत्रेदमुत्तरं विवक्षितम्। अत्रागंतुका एवावस्थाभेदाः। असतो द्रव्यानुत्पत्तिः सत्कार्यवादः। न त्ववस्थानामप्यनागंतुकत्वम्। सत एव द्रव्यस्योत्तरोत्तरावस्थाप्राप्तिरुत्पत्तिः। पूर्वपूर्वावस्थाहानं विनाशः। एवमागमापायिनानावस्थाशालि द्रव्यमेकमिति। अतो न काचिदत्रानुपपत्तिः। नन्वेवं मृदेव घटमणिककपालचूर्णाद्यवस्थाशालिनीति मृद्धटाद्यैक्यसमर्थनस्य प्रकृते का संगतिः। न हि तद्दृष्टांतेन ब्रह्मैव भोक्तृत्वविकारित्वजडत्वाद्यवस्थाशालीति ब्रह्मप्रपञ्चैक्यं साधयितुं शक्यम्। पूर्वाधिकरणविरोधापत्तेः। न च स्थूलसूक्ष्मप्रपञ्चविशिष्टब्रह्मरूपकार्यकारणैक्यं साधनीयम्। विशेष्यांशस्य विशेष्यांशेन ऐक्यसाधने सिद्धसाधनात् विशेषणविशेष्ययोः कार्यकारणभावे सत्यप्यैक्याभावेन व्यभिचाराच्च। न च विशेष्यांशस्यैव विशेष्यांश उपादानं विशेषणांशस्य तु विशेषणांश इति शंकनीयम्। ब्रह्मणस्सर्वोपादानत्वाभावप्रसंगात्। न च विशेषणांशयोरैक्यं साध्यमिति वाच्यम्। सत्यप्युपादानोपादेयभावे ब्रह्मप्रपञ्चयोरैक्याभावेन तत्र व्यभिचारात् पूर्वपक्षोद्भावितगोमयवृश्चिकादिव्यभिचारातादवस्थ्याच्च। स्थूलसूक्ष्मप्रपञ्चैवयसाधनस्य एतदधिकरणकृत्यब्रह्मप्रपञ्चानन्यत्वविषयश्रुतिसमन्वयसमर्थनानुपयोगित्वाच्च। न च ब्रह्मप्रपञ्चयोरपृथग्भावरूपानन्यत्वे श्रुतिसमन्वयो न त्वैक्यरूपानन्यत्व इति वाच्यम्। तत्र मृद्धटदृष्टांतेन स्थूलप्रपञ्चस्य तदुपादानब्रह्मापृथग्भूतपरापरशक्तिरूपसूक्ष्मप्रपञ्चैक्यसाधनमुपयोगीति वाच्यम्। तयोरैक्याभावेऽपि मृद्धटभेदवादिनैयायिकरीत्या केवलं पृथग्भावेनैव ब्रह्मापृथग्भावस्याऽपि लाभादित्याशंक्याह-**ततो मृद्धटयोरिवेति**। अत्रायमाशयः। यथैक एव मृत्पिण्डो घटशरावादिव्यापकः। तदनुस्यूतिमंतो घटशरावादयः परस्परव्यावृत्तरूपाः तद्व्याप्याः। एवं ब्रह्मैकमेव वियदादिसर्वविकारानुस्यूतं तेषां व्यापकं तदनुस्यूतिमंतो वियदादयस्सर्वे विकारास्तस्य व्याप्याः इत्येवं व्याप्यव्यापकभावेनापृथग्भावरूपं 'तेनैकेन तु तद्व्याप्तं मृदा कुंभादिकं यथे' त्यादिपुराणसिद्धं

'अन्यस्सन्व्याप्तितोऽनन्य' इत्याद्यागमप्रसिद्धं 'सर्वं समाप्नोषि ततोऽसि सर्वः' इति भगवद्गीतासु च प्रतिपादितमनन्यत्वं मृद्धटदृष्टांतेनोपपादनीयम्। तत्र नायं दृष्टांतउपपद्यते। कौलालमृत्कूटात् घटशरावादिनिर्माणसमयेषु विभक्तानां परस्परव्यावृत्तरूपाणां तस्माद्भिन्नानां सूक्ष्ममृत्पिण्डानां घटशरावादिभावापत्त्या तेष्वेकस्या मृद्व्यक्तेरनुस्यूत्यसिद्धेरिति शंकायामित्थमुपपादनीयम्। महतः कुलालमृत्कूटाद्विभज्यविभज्य गृहीताः सूक्ष्ममृत्पिण्डास्ततो न भिद्यंते स एव मृत्कूटः एतावत्सूक्ष्ममृत्पिण्डात्मतां प्राप्त इत्यभेदप्रत्यभिज्ञानादिति वाचारंमणवाक्योपपादनीये 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मंय विज्ञातं स्या' दिति दृष्टांतेऽप्युक्तशङ्कावतारे सत्येवमेवोपपादनीयम्। तेन दृष्टांतेनोपपादनीयायां 'येनाश्रुत' मित्यादिप्रतिज्ञायां मृद्धटादिदृष्टांतेषु वाचारंभणश्रुत्युपपादितप्रकारेण द्रव्यैक्यान्मृदादिज्ञाने तदभिन्नस्य घटादेर्विषयत्वेऽपि ब्रह्मप्रपञ्चयोरैक्यानंगीकारात् ब्रह्मज्ञाने प्रपञ्चस्य विषयत्वं न संभवतीत्येवं दृष्टांतवैषम्यशंकायामित्थमुपपादनीयम्। न केवलब्रह्मज्ञानेन प्रपञ्चस्य ज्ञातत्वमिह प्रतिज्ञायते। किं तु सूक्ष्मप्रपञ्चविशिष्टज्ञानेन। 'सदेव सोम्येद' मित्युपक्रमे ब्रह्मणि प्रयुक्तस्य सच्छब्दस्य सकलप्रपञ्चोपादानशक्तिविशिष्टब्रह्मपरताया ईक्षत्यधिकरणे वर्णितत्वात्। उपादानोपादेयभूतौ च शक्तिप्रपञ्चौ न परस्परभिन्नौ। मृद्धटवत्। अत्र सामान्येनोपादानोपादेयभावमात्रं न हेतुः। ब्रह्मप्रपञ्चयोर्गोमयवृश्चिकादिषु च व्यभिचारात्। तथापि परिणामिपरिणामभावरूपस्तद्विशेषो हेतुः। एवं च सच्छब्दोक्तशक्तिविशिष्टब्रह्मज्ञाने प्रपञ्चस्य विषयत्वं संभवति परापरशक्तयुपादानकस्य तस्य मृद्धटन्यायेन तदभिन्नत्वादिति। एतदर्थं य एको मृत्कूटः स्थितस्स एवैतावद्धटशरावाद्यात्मतां प्राप्त इत्यभेदप्रत्यभिज्ञानेनानुमानदृष्टांतभूतमृद्धटाद्यैक्यमुपपादनीयम्। अतोऽस्मिन्सूत्रे श्रुतितदनुग्राहकानुमानापेक्षितं मृदादितद्विकारैक्यसमर्थनं संगतमेवेति। एवमस्य सूत्रस्यारंभणश्रुत्यनुग्राहकानुमानोपयोगित्ववदारम्भणवाक्यार्थवर्णनोपयोगित्वमस्तीत्याशयेनैव पूर्वसूत्रोदाहरणभूतसयाप्यारम्भणवाक्यस्य भाष्यकारैरेतत्सूत्रव्याख्यानावसरेऽर्थप्रतिपादनं कृतम्। भाष्ये परिणामिपरिणामभावलिंगेन शक्तिप्रपञ्चैक्यसाधकमेवानुमानम्। शक्तिशक्तिमतोरभेदोपचारात्। प्रपञ्चब्रह्मणोरुक्तरूपमनन्यत्वं न तेन हेतुना सिद्ध्यति। असिद्धेः। नाप्युपादानोपादेयभावसामान्येन। निर्विकारे ब्रह्मणि उपादानत्वस्य विकारवदुपादानापृथग्भूताधिष्ठानत्वस्य वक्तव्यतया तस्यैवात्र साद्ध्यत्वपर्यवसानादित्याशङ्कायां तद्धर्मानुस्यूतिमत्तया ब्रह्मप्रपञ्चानन्यत्वसाधकानुमानमिति व्यवहृतम्। न केवलमिदं भाष्यमेव तदेभेदोपचारात्प्रवृत्तम्। 'नविलक्षणत्वा (२-१-४) धिकरणमपि तथैव प्रवृत्तम्। तथैव कृत्स्नप्रसक्तय (ब्र० २-१-२६.) धिकरणमपि प्रवर्तयिष्यते। परिणामपरिणामिभावरूपे ह्युपादानोपादेयभावे वैलक्षण्यानुपपत्तिः कृत्स्नप्रसक्तयादिदोषश्चापादयितुं शक्यते। न तु स्वयं निर्विकारस्य सतः परिणाम्युपादानापृथग्भूताधिष्ठानभावमात्रालंबनोपादानोपादेयभावे। तदापादकस्यैक्यस्य परिणामपरिणामिभाव इव

तत्राभावात्। ननु, ब्रह्मशक्तेः प्रपञ्चस्य च परिणामिपरिणामभावहेतुकैक्यसिद्धिरस्तु प्रपञ्चब्रह्मणोरुक्तरूपमनन्यत्वं न तेन हेतुना सिध्यति। असिद्धेः। नाप्युपादानोपादेयभावसामान्येन। निर्विकारे ब्रह्मण्युपादानत्वस्य विकारवदुपादानापृथग्भूताधिष्ठानत्वरूपस्य वक्तव्यतया तस्यैवात्र साध्यत्वपर्यवसानादित्याशंकायां तद्धर्मानुस्यूतिमत्तया प्रमीयमाणत्वं तत्र सामान्यव्याप्त्यपेक्षो हेतुरित्यभिप्रेत्य तदसिद्धिमाशंकते-**यथा मृद्व्याप्तिरिति।** 'सन् घटस्सन्पट' इत्यादिप्रमासु सत्तया तावदपृथग्भावसंबंधः प्रतीयते। सा च ब्रह्मशक्तिरूपा। 'सदेव सोम्येद' मित्यादिश्रुतिषु ब्रह्मणि सच्छब्दस्य प्रवृत्तौ निमित्तभूता ब्रह्मसत्तैव। 'मायां तु प्रकृतिं विद्या' दिति जगत्प्रकृतित्वेनावधारितायास्तस्या एव तथाभूतप्रमाविषयत्वोपपत्तौ तदतिरिक्तजातिरूपसत्ताकल्पने प्रमाणाभावात्। तां कल्पयतांमपि जात्यादिषु तदभावेन तेष्वनुगतसद्व्यवहारस्य तया निर्वोढुमशक्यत्वात् सत्तैकार्थसमवायादिसंबंधातरेण तन्निर्वाहे अननुगमात् रूपादिरहिताया अपि जातिसत्ताया इव ब्रह्मशक्तिरूपसत्तायाश्चाक्षुषत्वाद्युपपत्तेश्च। न च नीरूपद्रव्यत्ववत् ब्रह्मशक्तेश्चाक्षुषत्वाद्यनुपपत्तिः। अप्रयोजकत्वात् तस्याः स्वाभिन्नघटादिरूपेण रूपवत्त्वाञ्च। न च नीरूपस्य रूपवत्त्वासंभवः। दशाभेदेनाविरोधात्। कार्यकारणभेदवादिभिरपि प्रथमक्षणे नीरूपस्य घटादेरनंतरं रूपवत्त्वस्याभ्युपगमाच्च इत्याशयेन परिहरति-**सन्घट इति।** न केवलं प्रपञ्चे सत्तारूपेणैव ब्रह्मशक्तयनुस्यूतिः अपि तु स्फूर्तिरूपेणापीत्याह-**सच्चिद्रूपेणेति।** 'सन्घट' इत्याद्यनुभवे सत्ताविशिष्टंतयेव 'स्फुरति घट' इत्यांद्यनुभवे स्फुरणविशिष्टतया प्रपञ्चो विषय इति तावत्सर्वानुभवसिद्धम्। तच्च स्फुरणमुपादानभूतब्रह्मशक्तिरूपमेव पर्यवस्यति। जडे स्फुरणांतरांसभवात्। न च 'स्फुरती'त्यस्य स्फुरणविषयत्वमर्थः। 'सविता स्फुरति भाति प्रकाशत' इत्यादिप्रयोगे स्फुरणवत्वार्थकस्य तस्य 'स्फुरती'त्यादिप्रयोगेऽर्थांतरकल्पनायोगात्। न च 'ममस्फुरति' 'मम न स्फुरती' ति व्यवहारदर्शनात् तथार्थकल्पनम्। विषयसम्पर्कजनितवृत्तिविशेषाभिव्यक्तस्य ब्रह्मानंदस्येव चाक्षुषज्ञानाद्यभिव्यक्तस्य ब्रह्मस्फुरणस्यापि प्रतिनियतव्यवहारविषयत्वोपपत्तेः 'तस्य भासा सर्वमिदं विभाती'ति श्रुत्यनुसार्यर्थविषयतवकल्पनसंभवे 'स्फुरति भाति प्रकाशत' इत्याद्यनुभवानां विषयांतरकल्पनस्यायुक्तत्वाच्चेति भावः। **अवस्त्वेव भवेदिति।** यस्य न सत्त्वं न वा स्फुरणं न तद्वस्त्विति भावः।।सू।। **सत्वाच्चापरस्य**।।१७।। **कारणे सत्त्वादिति।** कारणे तादात्म्येन सत्त्वादित्यर्थः। पूर्वसूत्रे मृदः पाश्चात्यघटशरावादिरूपतापत्तिविषया प्रतिज्ञोदाहृता इह घटशरावादीना प्राचीनमृद्रूपतापत्तिविषयेति भावः।।सू।। **असव्द्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषाद्युक्तेश्शब्दांतराच्च**।।१८।। 'असदेवेदमग्र आसी' दित्यादेर्वैदिकस्यासव्द्यपदेशस्योदाहरणं 'य एते घटशरावादय इदानीमुत्पन्नाः प्रागिह नास'न्निति लौकिकस्याप्यसव्द्यपदेशस्योपलक्षणम्। सव्द्यवहारार्हस्थूलत्वविरोधि सूक्ष्मत्वं धर्मांतरमस्ति। तत एवासव्द्यवहारः। नतूत्पत्तेः प्रागभावादिति

परिहरति-**नेति।** ननु 'वायोरूपं नास्ति' इत्यादेरिवास्याप्यसव्द्यपदेशस्याभावविषयत्वं युक्तं न तु सूक्ष्मावस्थाविषयत्वम्। क्लृप्तविषयं विहाय विषयांतरकल्पने मानाभावादित्याशंकते-**कुत इति।** वैदिकस्य लौकिकस्य चासव्द्यपदेशस्य विषयांतरकल्पने क्रमेण 'वाक्यशेषाद्युक्तेश्चे'ति सूत्रशेषोक्तं हेतुद्वयं दर्शयन् परिहरति-**तदिति।** तत् असदेव। सत्स्यामिति मनोऽकुरुतेत्यन्वयः। मनस्कारो मानसः सङ्कल्पः। **अभावो नामेति।** अभावाभावस्येव भावाभावस्याऽपि तद्विरोधिभावधर्मरूपतोपपत्तेः क्वचिदप्यभावो नाम धर्मांतरं न कल्पनीयमित्यर्थः। शब्दांतरादिति सौत्रहेतुरुभयत्र साधारणः। लोकेऽपि ह्यस्ति शब्दांतरं घटशरावादिकं पूर्वं मृदेवासीदिति। तत्तु पूर्वसूत्रे प्रत्यभिज्ञोदाहरणेनैव उदाहृतप्रायमिति नेहोदाहृतम्। ननु, ब्रह्मकारणवादे ब्रह्मणः प्रलये किमव्याकृतत्वं किं च सृष्टौ व्याकृतत्वम्? न हि निर्विकारस्य मृद्धटन्यायेना- वस्थाभेदस्संभवतीत्याशंक्य स्थूलसूक्ष्मप्रपञ्चविशिष्टस्य ब्रह्मणः कार्यकारणभावांगीकाराद्विशेषणगत- स्थूलसूक्ष्मावस्थाभ्यां विशिष्टे व्याकृतत्वाव्याकृतत्वव्यपदेशभेद इत्याद-**अयमभिप्राय इति।** उत्तरसूत्रद्वयमवतारयति-**निदर्शनांतरमिति।** स्थूलसूक्ष्मावस्थाभ्यामेकस्यैव द्रव्यस्य कार्यकारणभावे मृद्घटादिदृष्टांतः प्राक्प्रसाधितः। इदानीमेकद्रव्यत्वे कार्यकारणभेदवादिनामपि लोकसम्प्रतिपन्नः पटकुटिकादृष्टान्तः 'पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि'इति श्रुतेस्सम्प्रतिपन्नः प्राणवायुः दृष्टांततयोदाहियत इत्यर्थः।।सू।। **पटवच्च**।।१९।।सू।। **यथा च प्राणादिः**।।२०।।

इति शिवार्कमणिदीपिका आरम्भणाधिकरणम् समाप्तम्

इतरव्यपदेशाधिकरणम्।

शाङ्करभाष्यम्

***इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः*॥२१॥**

अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते। चेतनाद्धि जगत्प्रक्रियायामाश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यन्ते। कुतः? इतरव्यपदेशात्॥ इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः ; "स आत्मा तत्त्वमसि श्वेतकेतो" (छा० ६/७/८) इति प्रतिबोधनात्। यद्वा–इतरस्य च ब्रह्मणः शारीरात्मत्वं व्यपदिशति; "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै० २/६) इति स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात्। "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" (छा० ६/३/२) इति च परा देवता जीवमात्मशब्देन व्यपदिशन्ती न ब्रह्मणो भिन्नः शारीर इति दर्शयति। तस्माद् यद् ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेति। अतः स स्वतन्त्रः कर्ता सन् हितमेवात्मनः सौमनस्यकरं कुर्यात्, नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालम्। न हि कश्चिदपरतन्त्रो बन्धनागारमात्मनः कृत्वाऽनुप्रविशति। न च स्वयमत्यन्तनिर्मलः सन्नत्यन्तमलिनं देहमात्मत्वेनोपेयात्। कृतमपि कथञ्चिद्यद् दुःखकरं तदिच्छया जह्यात्; सुखकरं चोपाददीत। स्मरेच्च मयेदं जगद्बिम्बं विचित्रं विरचितमिति। सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति मयेदं कृतमिति। यथा च मायावी स्वयं प्रसारितां मायामिच्छयाऽनायासेनैवोपसंहरति, एवं शारीरोऽपीमां सृष्टिमुपसंहरेत्। स्वमपि तावच्छरीरं शारीरो न शन्कोत्यनायासेनोपसंहर्तुम्। एंव हिंतक्रियाद्यदर्शनादन्याय्या चेतनाद् जगत्प्रक्रियेति गम्यते॥२१॥

***अधिकं तु भेदनिर्देशात्*॥२२॥**

तुशब्दः पक्षं व्यावर्तयतिं। यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्, तद् वयं जगतः स्रष्ट्ट ब्रूमः। न तस्मिन् हिताकरणादयो दोषाः प्रसज्यन्ते। न हिं तस्य हितं किञ्चित्कर्तव्यमस्ति, अहितं वा परिहर्तव्यम्; नित्यमुक्तस्वभावत्वात्। न च तस्य ज्ञानप्रतिबन्धः शक्तिप्रतिबन्धो वा क्वचिदप्यस्ति; सर्वज्ञत्वात्, सर्वशक्तित्वाच्च। शारीरस्त्वनेवंविधः, तस्मिन्प्रसज्यन्ते हिताकरणादयो दोषाः, न तु तं स्वयं जगतः स्रष्टारं ब्रूमः॥

कुत एतत्? भेदनिर्देशात्। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ० २/४/५), "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छा० ८/७/१), "सता सोम्य तदा सम्पन्नो भवति" (छा० ६/८/१), "शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढः" (बृ० ४/३/३५) इत्येवञ्जतीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं दर्शयति।।

ननु-अभेदनिर्देशोऽपि दर्शितः-"तत्त्वमसि" इत्येवञ्जतीयकः। कथं भेदाभेदौ विरुद्धो सम्भवेयाताम्? नैष दोषः ;, आकाशघटाकाशन्यायेनोभयसम्भवस्य तत्र तत्र प्रतिष्ठापितत्वात्। अपिच यदा तत्त्वमसीत्येवञ्जातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वम्, ब्रह्मणश्च स्रष्टृत्वम्; समस्तस्य मिथ्याऽज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात्। तत्र कुत एव सृष्टिः? कुतो वा हिताकरणादयो दोषाः? अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातोपाध्यविवेककृता हि भ्रान्तिर्हिताकरणादिलक्षणः संसारः, न तु परमार्थतोऽस्तीत्यसकृदवोचाम; जन्ममरणच्छेदनाद्यभिमानवत्। अबाधिते तु भेदव्यवहारे "सोऽन्वेष्टंव्यः स विजिज्ञासितव्यः" इत्येवञ्जातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणादिदोषप्रसक्तिं निरुणद्धि।।२२।।

***अश्मादिवच्च तदनुपपत्तिः।।२३।।**

यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महार्हा मणयो वज्रवैडूर्यादयः, अन्ये मध्यमवीर्याः सूर्यकान्तादयः, अन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते, यथा चैकपृथिवीव्यपाश्रयाणामपि बीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं चन्दनकिंपाकादिषूपलक्ष्यते, यथा चैकस्याप्यन्नरसस्य लोहितादीनि केशलोमादीनि च विचित्राणि कार्याणि भवन्ति; एवमेकस्यापि ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं चोपपद्यते, इत्यतस्तदनुपपत्तिः= परपरिकल्पितदोषानुपपत्तिरित्यर्थः। श्रुतेश्च प्रामाण्यात विकारस्य च वाचारम्भणमात्रत्वात्, स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः।।२३।। इति सप्तममितरव्यपदेशाधिकरणम्।।

इति शाङ्करभाष्यम् इतरव्यपदेशाधिकरणम् समाप्तम्

वार्तिकम्

*इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२१।। पूर्वं प्रतिज्ञासिद्धये कार्यकारणयोरनन्यत्वं सत्त्वञ्च दर्शयता जीवब्रह्मणोरप्यैक्यं दर्शितम्। तस्येह हितकरणादिदोषप्रसङ्गेनाक्षेपाद् भवति पूर्वोत्तराधिकरणयोराक्षेपिकी सङ्गतिः। लोके तावद् इयं व्याप्तिर्दृष्टा-बुद्धिपूर्वकारी स्वानिष्टं न सृजति–इति। तथाच जीवाभिन्नं ब्रह्म जगत्कारणं वदन् समन्वयो विरुद्धयते, न वेति विचार्यते।।

किं प्राप्तम्? विरुद्धयते तावदित्याह–यतः कारकाद्यनेकविधानि ह सृजतः सर्वज्ञस्य ब्रह्मण आत्मनोऽहितकरणं प्रसक्तम्। न च–जीवस्य तदनिष्टम्, जीवस्तु ब्रह्मणोऽभिन्नः, अतो न स्वानिष्टकरणप्रसक्तिरिति–वाच्यम्; इतरव्यपदेशात्=''तत्सृष्टवा तदेवानुप्राविशत्'' ''स इह प्रविष्टः'' ''अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'' ति ब्रह्मण एव कार्यप्रवेशेन जीवत्वव्यपदेशात्। तस्मादिष्टसाधनताज्ञानस्य प्रवर्तकत्वात् सर्वज्ञस्य च ब्रह्मणो भ्रान्त्यसम्भवाद् न स्वानिष्टसर्गे तस्य प्रवृत्तिरुचिता, अचेतनप्रधानादेर्भोक्तृभिन्नस्य तत्स्त्रष्टृत्वे नायं दोष इति प्राप्तम्।।२१।।

एवं प्राप्तेऽभिधीयते–*अधिकं तु भेदनिर्देशात्*।।२२।। तुशब्दः पक्षं व्यावर्तयति, नायमस्ति दोषः–ब्रह्म स्वानिष्टं सृजति–इति, यत इष्टानिष्टविभागदर्शिनोऽविद्योपाधिप्रतिविम्बभूतात् तद्धर्मानेवात्मधर्मत्वेनाभिमन्यमानाद् जीवाद् अधिकं सर्वज्ञत्वादिगुणेन बिम्बभूतं ब्रह्म। कुतः?

भेदनिर्देशात्। जीवब्रह्मणोर्हि नियन्तृनियम्यभावेन द्रष्टृद्रष्टव्यभावेन च संसारदशायां भेदनिर्देशो भवति–''तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती''ति चेष्टानिष्टरूपकर्म्मफलभोक्तृत्वेन तद्द्रष्टृत्वमात्रेण च भेदनिर्देशो दृश्यते। न हि दर्पणोपाधौ स्वमुखप्रतिबिम्बे बिम्बाद् भिन्ने तदुपाधि कृतं मालिन्यं पश्यन्नपि विवेकी कश्चित् स्वभावावदाते स्वमुखेऽध्यवस्यतीत्यसकृदावेदितम्। एतच्च सर्वम्, न्यूनाधिकभावः, भेदनिर्देशश्च संसारदशायाम्, परमार्थदशायां तु नैव तयोर्भेदोऽस्ति, न वा न्यूनाधिक्यपदमित्याह–*अपि च यदेति*।।२२।।

अश्मादिवच्च तदनुपपत्तिः।।२३।। इति सूत्रं निगदव्याख्यातेन भाष्येण व्याख्यातम्।। इति सप्तममितरव्यपदेशाधिकरणम्।।२३।।

इति वार्तिकम् इतरव्यपदेशाधिकरणम् समाप्तम्

प्रदीपः

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२१।। ''तदनन्यत्वमि'' ति सूत्रेण कार्याणामेव कारणाभिन्नत्वमुक्तम्। जीवास्तु ब्रह्मणोऽकार्यत्वात् तदभेदं नार्हन्तीति कथमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न विरुध्यते? यदि पूर्वोक्तरीत्योपहितानामपि जीवानां ब्रह्मणैक्यम्, तर्हि तदैक्यं तद्व्यतिरेकेणाभावरूपं वा, वस्तुत ऐक्यं वा। आद्येऽसम्भवः ; प्रत्यक्स्वरूपस्यैव ब्रह्मत्वेन ब्रह्मणोऽप्यभावप्रसङ्गेन शून्यवादापत्तेः। यदि तु वस्तुत ऐक्यम्, अत एव सूत्रे जीवकार्यप्रपञ्चोभयसाधारणार्थमनन्यत्वपदम्, अन्यथा त्वभावमात्रमैक्यमात्रं वा सूत्र्येतेति मन्यते, तर्हि ब्रह्मणो जगत्कारणत्वानुपपत्तिः ; स्वस्यैव हिताकरणादिदोषाणां प्रसङ्गादित्याक्षेपोऽस्य सूत्रस्याभिप्रेतः। इतरव्यपदेशाद् ब्रह्मण इतरत्वेन जीवत्वेन श्रुतिस्मृतिषु व्यपदेशाद् हिताकरणादिप्रसङ्ग इति सूत्रार्थः। पूर्वाधिकरणेनाक्षेपिकी सङ्गतिः ; प्रकारान्तरेण पुनरपि चेतनकारणवादाक्षेपात्। चेतनकारणवादे दूषणानि स्पष्टयति– *अतः स इत्यादिना– *गम्यत इत्यन्तेन*।।

अनेन–जीवब्रह्मणोरभेदस्वीकारमन्तरेण नोक्ताशङ्काया अवसर इति द्योत्यते। यत्र हि जीवातिरिक्तस्य ब्रह्मण एव कारणत्वम्, तन्मते कथमियमाशङ्कोदेति? श्रीभाष्यमते तु–''भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदि''ति न्यायेन ब्रह्मणो जीवात् शारीराद् भेदस्य व्यवस्थापितत्वात् कथमभेदमादायोक्तशङ्काप्रसरः? द्वैतिमते तु ईश्वरस्यैवासत्त्वमाशङ्क्य जीवस्यैव कर्तृत्वाशङ्कानिरासपरमुक्तं सूत्रं मन्यते। अत्रापीदं ''जन्माद्यस्य यत'' इत्यनेनैव सिद्धमिति वितथमेव। एतेन–भास्करवल्लभमते अपि–व्याख्याते; भेदाभेदस्वीकारात्। अद्वैतमते तु ब्रह्मव्यतिरेकेण जगतोऽभाव इव जीवस्याप्यभाव एव मन्यत इति सम्भवति तन्मतरीत्याशङ्का। श्रीभाष्यकारा अपि–''जीवाद् ब्रह्मणो भेदवादिन्यः श्रुतयो जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ता'' इति वदन्तोऽद्वैतमतरीत्यैवेयमाशङ्केति–विशदयन्ति। तथाचानन्यत्वं तद्व्यतिरेकेणाभाव इति गृहीत्वैवोक्ता शङ्केति सिद्धे कथमद्वैतं विहाय मतान्तरमारम्भणाधिकरणार्थ इति वक्तुं शक्यते? यद्यप्यद्वैतमतेऽपि भोक्त्रापत्त्यधिकरणेनैवोक्ता शङ्का वारिता; तथापि तदधिकरणं सत्तात्रैविध्यवादेन,

आरम्भणाधिकरणं तु सत्तैक्यवादेनेति सिद्धान्तात् सत्तैक्यवादे जीवब्रह्मणोर्भेद एवाविद्यकः, न तु जीवोऽपि जगदन्तरमिवेति व्यवस्थापनार्थमिदमधिकरणम्। तत्र जीवस्यानाविद्यकत्वे ब्रह्मस्वरूपत्वे च तदभेदवार्तैव संभवतीति कृत्वा शङ्का, भेदमात्रस्याविद्यकत्वमादाय समाधानमिति विवेकः।।

यत्तु श्रीभाष्यकारैः-भेदस्याविद्यकत्वनिरसनं चैतन्यस्याज्ञानविरोधित्वं स्वीकृत्य विरचितम्, तदिदमद्वैतमते वृत्त्यवच्छिन्नचैतन्यस्य वृत्तेरेव वाऽज्ञानविरोधित्वादनुक्तोपालम्भनमेव। तथाचाद्वैतमतस्यासौत्रत्वे मतान्तरस्य सौत्रत्वे वोक्तमधिकरणं वितथमेव स्यादिति फलति।।२१।।

अधिकन्तु भेदनिर्देशात्।।२२।। भेदोऽयमाविद्यक एवेत्याह-*नैष दोष इत्यादिना*।। आकाशघटाकाशन्यायेनेति*।। प्रतियोगिसत्यत्वेऽपि भेदमात्रस्य कल्पितत्वस्वीकारेणेत्यर्थः। तथा च तदनन्यत्वं जीवविषये स्वरूपैक्यम्, कार्यप्रपञ्चविषये तद्व्यतिरेकेणाभाव इति भावः। अत एवैक्यमिति वाऽभाव इति न सूत्रितमिति प्रागेवोक्तम्।।

अयमत्राद्वैतिनां प्रक्रियाविशेषः-यद् एकसत्तावादे जीवस्यकार्यत्वम्, स्वरूपैक्यं च। औपाधिक एव जीवभेद इति। तथाच "तत्त्वमसी" त्यादौ सत्तात्रैविध्यवादे बाधायां सामानाधिकरण्यम्, एकसत्तावादे त्वभेदे सामानाधिकरणमिति विशेषोऽप्यर्थसिद्धो भवति।।२२।।

स्वरूपाभेदेऽप्यौपाधिको भेद उपाधेः पृथगग्रहणेऽपि कल्पितो दृश्यत इत्यत्र दृष्टान्तार्थं सूत्रम्-*अश्मादिवच्च तदनुपपत्तिरिति*।।२३।। इति सप्तममितरव्यपदेशाधिकरणम्।।

इति प्रदीपः इतरव्यपदेशाधिकरणम् समाप्तम्

भामती

यद्यपि शारीरात् परमात्मनो भेदमाहुः श्रुतयस्तथाप्यभेदमपि दर्शयन्ति श्रुतयो बह्व्यः। न च भेदाभेदावेकत्र समवेतौ, विरोधात्। न च भेदस्तात्त्विक इत्युक्तम्। तस्मात् परमात्मनः सर्वज्ञान्न शारीरस्तत्त्वतो भिद्यते। स एव त्वविद्योपधानभेदाद् घटकरकाद्याकाशवद्भेदेन प्रथते। उपहितं चास्य रूपं शारीरस्तेन मा नाम जीवाः परमात्मतामात्मनोऽनुभूवन्, परमात्मा तु तानात्मनोऽभिन्नाननुभवत्यननुभवे सार्वज्ञ्यव्याघातः। तथा चायं जीवान् बध्नन्नात्मानमेव बध्नीयात्। तत्रेदमुक्तं *नहि कश्चिदपरतन्त्रो बन्धनागारमात्मनः कृत्वानुप्रविशति इत्यादि*। तस्मान्न चेतनकारणं जगदिति पूर्वः पक्षः।।२१।।

सत्यमयं परमात्मा सर्वज्ञत्वाद्यथा जीवान् वस्तुत आत्मनोऽभिन्नान् पश्यति, पश्यत्येवं न भावत एषां सुखदुःखादिवेदनासङ्गोऽस्ति, अविद्यावशात्त्वेषां तद्वदभिमान इति। तथा च तेषां सुखदुःखादिवेदनायामप्यहमुदासीन इति न तेषां बन्धनागारनिवेशेऽप्यस्ति क्षतिः काचिन्ममेति न हिताकरणादिदोषापत्तिरिति राद्धान्तस्तदिदमुक्तम् *अपि च यदा तत् त्वमसि इति*। अपि चेति चः पूर्वोपपत्तिसाहित्यं द्योतयति नोपपत्त्यन्तरताम्।।२२।।

स्यादेतत्–यदि ब्रह्मविवर्त्तो जगत्, हन्त सर्वस्यैव जीववच्चैतन्यप्रसङ्ग इत्यत आह *अश्मादिवच्च तदनुपपत्तिः*। अतिरोहितार्थेन भाष्येण व्याख्यातम्।।२३।।

इति भामती इतरव्यपदेशाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

उक्तमर्थमाक्षिप्य समाधत्ते-

॥सू॥ **इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः**॥२१॥

'तत्त्वमसि' 'अयमात्मा ब्रह्म' इत्यादिना कार्यभूतस्य जीवस्य कारणभूतब्रह्मत्वव्यपदेशात् अनन्यत्वमुपपादितम्। एवं सति सर्वज्ञस्य परमेश्वरस्य सर्वगतस्य जगदकरणं स्वस्य हितरूपं, तत्करणमहितरूपं च प्रसज्यते। ततश्च सर्वज्ञः सत्यसंकल्प ईश्वरः स्वस्मादनन्यस्य जीवस्य तापः स्वस्येति जानन् कथं संसारनिमित्तमहितं जगत्करणमनुवर्तते, हितं जगदकरणं च नानुवर्तते। ततश्च जीवादनन्यत्वे सिद्धे परमेश्वरस्य सर्वज्ञस्यापि स्वहिताकरणे स्वाहितकरणे च विवेकशून्यत्वादिदोषप्रसक्तिः॥

अतः कार्यकारणयोः जीवेश्वरयोरनन्यत्वमयुक्तमितिः चेद्युक्तमित्युच्यते-

॥सू॥ **अधिकं तु भेदनिर्देशात्**॥२२॥

कार्यकारणयोरनन्यत्वेऽपि कार्यभूताच्चिदचित्प्रपञ्चात् कारणमत्राधिकमेव श्रूयते 'विश्वाधिको रुद्रो महर्षिः' इति। तथा भेदनिर्देशात्-तथाहि-जीवेश्वरयोर्भेदो निर्दिश्यते 'विद्याविद्ये ईशते यस्तु सोऽन्यः' 'क्षरात्मानावीशते देव एकः' 'पृथगात्मानं प्रेरितारं च मत्वा' 'द्वा सुपर्णा सयुजा सखाया' 'द्वे ब्रह्मणी वेदितव्ये परं चापरं च' 'ज्ञाज्ञौ द्वावजावीशानीशौ' 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'अन्तः प्रविष्टश्शास्ता जनानाम्' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, 'अस्मा न्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः' 'जुष्टं यदा पश्यत्यन्यमीशम्' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'येषामीशे पशुपतिः पशूनाम्' इत्यादिभिरनन्तश्रुतिभिः। अतो विश्वस्मादधिकमेव शिवापरनामधेयं ब्रह्म॥ ननु 'तदनन्यत्वम्' इत्यभेदप्रतिपादनात् 'अधिकं तु' इति भेदप्रतिपादनात् प्रपञ्चब्रह्मणोः भेदाभेदः साधितो भवतीति चेत्-न, भेदाभेदकल्पनं विशिष्टाद्वैतं साधयामः। न वयं ब्रह्मप्रपञ्चयोरत्यन्तमेव भेदवादिनः घटपटयोरिव। तदनन्यत्वपरश्रुतिविरोधात्। न वाऽत्यन्ताभेदवादिनः

शुक्तिरजतयोरिव। एकतरमिथ्यात्वेन तत्स्वाभाविकगुणभेदपरश्रुतिविरोधात्। न च भेदाभेदवादिनः, वस्तुविरोधात्। किं तु शरीरशरीररिणोरिव गुणगुणिनोरिव च विशिष्टाद्वैतवादिनः। प्रपञ्चब्रह्मणोरनन्यत्वं नाम मृद्घटयोरिव गुणगुणिनोरिव च कार्यकारणत्वेन विशेषणविशेष्यत्वेन च विनाभावरहितत्वम्। न हि मृदं विन्ना घटो दृश्यते, नीलिमानं विना चोत्पलम्। तथा ब्रह्म विना न प्रपञ्चशक्तिस्थितिः शक्तिव्यतिरेकेण न कदाचिदपि ब्रह्म विज्ञायते, वह्निरिवौष्ण्यं विना। येन विना यन्न ज्ञायते तत् तेन विशिष्टमेव। तत्त्वं च तस्य स्वभाव एव। अतः सर्वथा प्रपञ्चाविनाभूतं ब्रह्म तस्मादनन्यदित्युच्यते। भेदश्च स्वाभाविकः। ततश्च विश्वस्मादधिकमेव परं ब्रह्म। कारणत्वकार्यत्वव्यवस्था 'न तु दृष्टान्तभावात्' (ब्र० २-१-९-सू) इत्यत्र निरूपितैव। तस्माद्भेदाभेदश्रुतीनामविरुद्ध एवायं मार्गः।।

।।सू।। **अश्मादिवच्च तदनुपपत्तिः**।।२३।।

सर्वथा जीवश्वरयोरभेद एव अभेदश्रुतिभिरिति चेत्-न। अनुपपत्तेः। अश्मकाष्ठतृणादेरचेतनस्येव जीवस्याप्यज्ञत्वादिना सर्वज्ञत्वादियुक्तादिश्वरात् अत्यन्तविजातीय- त्वश्रवणात् तयोरेकभावानुपपत्तेः। तस्मादीश्वरो जीवादर्थान्तरभूत एव। एवं चेतनस्याप्यधिकगुणवैषम्यादीश्वरभावानुपपत्तिः, किमुताचेतनस्य स्वरूपविलक्षणस्येति तात्पर्यम्। सर्वथा श्रुतिस्मृतिन्यायैः कार्यत्वेन स्वानन्यभूतादपि चेतनाचेतनप्रपञ्चात् विश्वस्मादधिक एव सर्वज्ञः सर्वशक्तिः परमेश्वरः।।

इत्यारंभणाधिकरणम्।।७।।

इति श्री कण्ठभाष्य इतरव्यपदेशाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

'सदाशिवादी', त्यादिशब्देन महेश्वरशुद्धविद्यादिपृथिव्यंतत्रयस्त्रिंशत्तत्वजातं तत्प्रभवं तनुभुवनभोगस्थानभोगोपकरणनिकुरुंबं च गृह्यते। षट्त्रिंशत्तत्वमध्ये सदाशिवादिभूम्यंतचतुस्त्रिंशत्तत्वजातमेव सृज्यं शिवशक्तितत्वे तु तत्स्त्रष्टारौ परब्रह्मभूतौ शिवाविति मतमनुसृत्येदं भाष्यम्। वस्तुतश्शिवशक्तितत्वे अपि शिवाभ्यां सृज्ये जडे तत्वांतरे। 'शिवशक्तयादि भूम्यंतं शरीरादि घटादि च। व्याप्याधितिष्ठति शिवस्तस्माद्विष्णुरुदाहृत' इति शिवपुराणवचनात् 'शिवाहन्ता शिवमयी विद्यानन्दशरीरिणी। षट्त्रिंशत्तत्वरूपत्वमवाप्य बहुरूपिणी' त्याश्वलायनस्मरणाच्च। इदं च मतं भाष्य एव प्रदेशांतरे तत्रतत्राविष्कृतम्। ननूत्तरसूत्रेण जीवब्रह्माभेदे दोष आंशक्यते तदनुपपन्नम्। अनन्यत्वं व्याप्यव्यापकभावेनापृथग्भावरूपं न त्वभेदरूपमिति प्राग्दर्शितत्वेन शंकानवकाशादित्याशङ्क्यावतारयति-**उक्तमर्थमिति।** अधिकं त्वित्युत्तरसूत्रकर्त्तव्येन एतच्छङ्कासमाधानेन स्थास्यन्तमर्थमालोच्य मृद्घटादिदृष्टांतोक्तिसङ्गतिसमर्थनसमये तदुपयोगितया भाष्ये परं व्याप्यव्यापकभावेनानन्यदित्युक्तम्। सूत्रकारस्त्वेतच्छंकासमाधानसमय एव तमर्थमाविष्करिष्यति इत्यस्ति शङ्कावकाश इति भावः।।सू।। **इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२१।। उपपादितमिति।** आरंभणसूत्र इति शेषः। ननु, ब्रह्मणः स्वाभिन्नजीवसंसारहेतुप्रपञ्चसर्गाकरणं हितं तत्करणमहितं च भवतु नाम। तथापि प्रपञ्चं सृजतु दृश्यंते हि लोके स्वहितमकुर्वाणा स्वाहितं कुर्वाणाश्च तद्वद्ब्रह्मापि स्यादित्याशंक्याह-**ततश्चेति।** स्वस्य हिताहितमजानन्वा जानन्नपि पारतंत्र्यात् स्वसंकल्पानुसारेण कर्तुमशक्तो वा स्वस्य हितं न कुर्यादहितं च कुर्यात्, ब्रह्म तु न तथा सर्वज्ञत्वात्सत्यसंकल्पत्वाच्चेत्याशयः। ननु सर्वज्ञं सत्यसंकल्पमपि ब्रह्म स्वस्य हितं मा करोतु अहितं च करोतु को दोषः न हि तेन तस्य सर्वज्ञत्वं सत्यसंकल्पत्वं च हीयते येन स दोषः स्यादित्याशंक्याह-**ततश्चेति।** यथा स्त्रीपुत्रदारादिषु क्रोधेन स्वयं मर्त्तुं विषं भक्षयतः क्रोधान्धस्येव तस्य विवेकशून्यत्वापत्त्या सार्वज्ञमेव हीयेतेति भावः। एवं चारंभणसूत्रांदनन्यत्वमिति असव्यपदेशसूत्राञ्चेदिति चानुवर्त्य एवं सूत्रार्थो वर्णनीयः। 'अयमात्मा ब्रह्मे'त्यादिषु जीवात्मनि ब्रह्मभावव्यपदेशादनन्यत्वं चेत् हिताकरणादिना यो दोषः विवेकशून्यत्वं तस्य

प्रसक्तिरिति। जीवब्रह्मणोरनन्यत्वे संगतिभाष्योदाहृतस्वातंत्र्यास्वातंत्र्यादिव्यवस्थासिद्धस्य पूर्वपक्षभाष्योदाहृतसत्रष्टृसृज्यभावादिरूपकर्तृकर्मभावादिव्यवस्थासिद्धस्य च भेदस्य भङ्गप्रसंग इति दोषांतर सौत्रेणेतरपदेनाविष्कृतम्। उक्तव्यवस्थाभिः वस्तुतो जीवादितरदेव ब्रह्मेति तयोरनन्यत्वमयुक्तमिति भावः।।

सत्यं जीवादितरद्ब्रह्म ततोऽधिकं च। ईशित्रीशितव्यादिभेदविषयानेकश्रुत्यनुरोधात्। अतस्तदविरोध्येवानन्यत्वमभेदश्रुत्यर्थो न मुख्याभेद इति न कश्चिद्विरोध इति प्रदर्शनार्थं सूत्रम्।।सू।। **अधिकं तु भेदनिर्देशात्**।।२२।। नन्वभेदश्रुत्यनुसारेण' तदनन्यत्व 'मितिभेदश्रुत्यनुसोरणा ' धिकंत्वि 'ति सूत्रितवतस्सूत्रकारस्य कोऽभिप्राय इत्याकांक्षायां भेदाभेदपक्षस्य पृथग्भावरूपात्यन्तभेदपक्षस्य मुख्याभेदरूपात्यंताभेदपक्षस्यान्यतरानिर्धार्यत्वपक्षस्य च प्रमाणविरुद्धत्वाल्लौकिकवैदिकसकल-प्रमाणप्रसिद्धांतर्गणिकभेदाप्रतिक्षेपकमपृथग्भावेनानन्यत्वरूपं विशिष्टाद्वैतमभेदश्रुतीनामर्थ इत्येव सूत्रकारस्याभिप्राय इति प्रश्नोत्तराभ्यां प्रपञ्चयति-**नन्वित्यादिना**। एवमारंभणसूत्रप्रतिपादितानन्यत्व-स्वरूपविशेषनिर्धारणार्थतया इद' मितरव्यपदेशा 'दित्यादिसूत्रद्वयं व्याख्यातम्। एवं किमर्थम्। तन्निर्धारणमेतत्सूत्रद्वयमनपेक्ष्यारंभणसूत्रसामर्थ्येनैव सिद्ध्यति। इदं तु सूत्रद्वयं ब्रह्मणस्सदोषजीव-संसर्गप्रयुक्तदुष्टत्वशंकानिराकरणार्थमधिकरणांतरं व्याख्यायता- मित्याशंक्याह-**कारणत्वेति**। 'अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्' (ब्र० २-१-८) न तु दृष्टांतभावा (ब्र० २-१-९) दिति पूर्वोत्तरपक्षसूत्राभ्यां ब्रह्मणो जडजीवसंसर्गप्रयुक्तदुष्टत्वनिराकरणं स्पष्टमेव कृतं प्रागित्यतिस्पष्टं तादर्थ्यमस्य सूत्रद्वयस्य न युक्तं किं त्वारभणसूत्रस्य भेदसाधकसूत्रासाहित्येन भेदाविरोध्यनन्यत्वपर्यसवायित्वं न स्पष्टमिति तद्विषयत्वेनारंभणाधिकरणशेषत्वमेवास्य युक्तमिति भावः।।सू।। **अश्मादिवच्च तदनुपपत्तिः**।।२३।। सूत्रव्यावर्त्यां शंकामाह-**सर्वथेति**। 'तदनन्यत्वं 'मित्यत्यंताभेद इत्येव युक्तमभेदश्रुतिबाहुल्याद्भेदश्रुतीनामौपाधिकभेदविषयत्वोपपत्तेरिति शंकार्थः। **अनुपपत्तेरिति**। अभेदश्रुतिरुपपत्तिविरुद्धेत्युपपत्तिसहकृता भेदश्रुतिः प्रबलेत्यर्थः। ननु' अश्मादिव 'दिति सिद्धवद्दृष्टांतीकरणमयुक्तम्। 'सर्वं खल्विदं ब्रह्म' 'इदं सर्वं यदयमात्मा' इत्यादिश्रुत्यनुसारेण ब्रह्मण्यचेतनाभेदस्यापि शंकितुं शक्यत्वात् चेतनाचेतनत्ववैलक्षण्येऽप्यभेदस्य शक्तिप्रपञ्चाभेदवादिनां सिद्धांतिनामवश्यमंगीकर्तव्यत्वात् इत्याशंक्य सूत्रतात्पर्यमाह-**एवं चेतनस्यापीति**। कैमुतिकन्यायेनाचेतनवर्गस्य भेदश्रुतितदनुग्राहकोपपत्तिभ्यां भेदं सिद्धं हृदि कृत्वा समुच्चयोपमयाश्मादिवदिति सूत्रितमिति भावः। अवांतरार्थोपसंहारमुखेनाधिकरणार्थमुपसंहरति-**सर्वथेति**।

इत्यारंभणाधिकरणम्।

इति शिवार्कमणिदीपिका इतरव्यपदेशाधिकरणम् समाप्तम्

शाङ्करभाष्यम्

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥२४॥

चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तम्, तन्नोपपद्यते। कस्मात्? उपसंहारदर्शनात्॥ इह हि लोके कुलालादयो घटपटादीनां कर्तारो मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण सङ्गृहीतसाधनाः सन्तस्तत्तत्कार्यं कुर्वाणा दृश्यन्ते। ब्रह्म चासहायं तवाभिप्रेतम्, तस्य साधनान्तरानुपसङ्ग्रहे सति कथं स्त्रष्टृत्वमुपपद्येत? तस्मान्न ब्रह्म जगत्कारणमिति चेत्, नैष दोषः ; यतः क्षीरवद् द्रव्यस्वभावविशेषादुपपद्यते। यथा लोके क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमतेऽनपेक्ष्य बाह्यं साधनम्, तथेहापि भविष्यति॥

ननु–क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बाह्यं साधनमौष्ण्यादिकम्, कथमुच्यते क्षीरवद्धीति, नैष दोषः ; स्वयमपि हि क्षीरं यां च यावतीं च परिणाममात्रामनुभवति, तावत्येव त्वर्यते त्वौष्ण्यादिना दधिभावाय। यदि च स्वयं दधिभावशीलता न स्यात्, नैवोष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्यते। साधनसामग्र्या च तस्य पूर्णता सम्पाद्यते। परिपूर्णशक्तिकं तु ब्रह्म। न तस्यान्येन केनचित्पूर्णता सम्पादयितव्या। श्रुतिश्च भवति–''न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥'' (श्वे० ६/२) इति। तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात्क्षीरादिवद्विचित्रपरिणाम उपपद्यते॥२४॥

देवादिवदपि लोके॥२५॥

स्यादेतत्–उपपद्यते क्षीरादीनामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः ; द्रष्टत्वात्, चेतनाः पुनः कुलालादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना दृश्यन्ते। कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति? देवादिवदिति ब्रूमः। यथा लोके देवाः पितर ऋषय इत्येवमादयो महाप्रभावाः, चेतना अपि सन्तोऽनपेक्ष्यैव किञ्चिद् बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि

नानासंस्थानानि शरीराणि प्रासादादीनि च रथादीनि च निर्मिमाणा उपलभ्यन्ते; मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। तन्तुनाभश्च स्वत एव तन्तून्सृजति, बलाका चान्तरेणैव शुक्रं गर्भं धत्ते, पद्मिनी चानपेक्ष्य किञ्चित्प्रस्थानसाधनं सरोऽन्तरात्सरोऽन्तरं प्रतिष्ठते, एवं चेतनमपि ब्रह्मानपेक्ष्य ब्राह्यं साधनं स्वत एव जगत्स्रक्ष्यति।।

स यदि ब्रूयाद् य एते देवादयो ब्रह्मणो दृष्टान्ता उपात्ताः, ते दार्ष्टान्तिकेन ब्रह्मणा न समाना भवन्ति। शरीरमेव ह्यचेतनं देवादीनां शरीरान्तरादिविभूत्युत्पादन उपादानम्, न तु चेतन आत्मा। तन्तुनाभस्य च क्षुद्रतरजन्तुभरणाल्लाला कठिनतामापद्यमाना तन्तुर्भवति। बलाका च स्तनयित्नुरवश्रवणाद्गर्भं धत्ते। पद्मिनी च चेतनयुक्ता सत्यचेतनेनैव शरीरेण सरोऽन्तरात् सरोऽन्तरमुपसर्पति वल्लीव वृक्षम्, न तु स्वयमेवाचेतनस्सरोऽन्तरोपसर्पणे व्याप्रियते। तस्मान्नैते ब्रह्मणो दृष्टान्ताः–इति तं प्रति ब्रूयात्–नायं दोषः ; कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वात्–इति। यथा हि कुलालादीनां देवादीनां च समाने चेतनत्वे, कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते, न देवादयः, तथा ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यत इत्येतावद्वयं देवाद्युदाहरणेन विवक्षामः। तस्माद्यथैकस्य सामर्थ्यं दृष्टम्, तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्त इत्यभिप्रायः।।२५।। इत्यष्टममुपसंहारदर्शनाधिकरणम्।।

इति शाङ्करभाष्यम् उपसंहारदर्शनाधिकरणम् समाप्तम्

वार्तिकम्

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।।२४।। अत्र ब्रह्म, नोपादानम्, असहायत्वात्, सम्मतवदितिन्यायेन समन्वयो विरुद्ध्यते, न वेति चिन्त्यते। पूर्वत्रौपाधिकजीवब्रह्मभेदमादाय हिताकरणादिदोषः परिहृतः, इह तु नोपाधितोऽपि विभक्तमधिष्ठात्राद्यस्तीति पूर्वपक्षकरणाद् अधिकरणयोः सङ्गतिः। किं प्राप्तम्?

निर्गुणं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अद्वितीयं परब्रह्म नोपादानं कथञ्चन।।

जगतोऽनेकरूपस्य नैकस्मात् कार्यसम्भवः।
कथमच्छायतोऽदृष्टं सामग्र्यं कार्यसाधकम्।।

विचित्रकारकग्रामाद् विचित्रं कार्यमीयते।
एकरूपं परं ब्रह्म कथं स्याच्चित्रकार्यकम्।।

एवं प्राप्ते पूर्वपक्षे समाधिस्तत्र गीयते।
मायाशबलितं ब्रह्म जगत्कारणमिष्यते।।

न शुद्धमद्वयं तद्धि निर्गुणं स्यान्निरञ्जनम्।
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।।

साऽश्लीला भवति ज्ञेया मूलप्रकृतिसंज्ञिता।
श्रीरामसांनिध्यवशाद् जगदाकाररूपिणी।।

इति श्रुतेरिहाप्यस्ति सामग्र्यं कार्यसाधकम्।
यथा हि क्षीरं नीरं वा चिरकालोषितं खलु॥
अन्तरेणोष्मणा युक्तं हिमदध्यादिकार्यकृत्।
न बाह्यसाधनं तत्र किञ्चिदन्यदपेक्षते॥
आतञ्चनादि दृष्टं चेत् त्वरार्थे केवलं हि तत्।
शैघ्र्यलाभाय दध्यादेरातञ्चनमपेक्ष्यते॥
क्षीरं चिरोषितं दृष्टं तद् विनाऽपि स्वयं दधि।
मायाशक्तिवशादेवं भगवान् परमेश्वरः॥
बहिः साधनहीनोऽपि जगत्कार्यं करिष्यति।
मायाशक्तेर्विचित्रत्वात् तत्कार्यस्य विचित्रता॥
तदधिष्ठानताहेतोर्ब्रह्मोपादानमिष्यते।
वेदान्ते, रजतादेस्तु शुक्तिकाशकलं यथा॥
तस्मान्मायासहायत्वाद् नासहायो जगत्यपि।
इति॥२४॥

अथ–न वयमसहायत्वमात्रं ब्रह्मणोऽकर्तृत्वे हेतुं ब्रूमः, येन ब्रह्मणोऽपि स्वाध्यस्तविचित्रशक्तिकमायाशक्तिसहायत्वादसिद्धो हेतुः स्यात्। किं तर्हि? उपसंहृतबहिःकारकग्रामासहायत्वम्। कुत एतत्? ब्रह्मणश्चेतनत्वात्। यो हि लोके चेतनः सन् करोति, स सर्वोऽपि बाह्यं कारकग्राममुपसंहृत्यैव करोतीति दृष्टः। तद्यथा–कुलालादिश्चेतनो घटादिकं कुर्वन् बाह्यं दण्डचक्रादिकारकग्राममुपसंहृत्यैव करोति; ब्रह्म च चेतनम्, अतः कार्यं कुर्वत् बाह्यं कारकग्राममुपसंहृत्यैव कुर्यात्। न च तस्माद् बाह्यं किञ्चनास्ति, यदुपसंहरेत्; ''तस्मान्न बाह्यं किञ्चनासे'' ति श्रुतेः। अतो बाह्योपसंहाराभावाद् न करोतीति निश्चीयते; व्यापकाऽनुपलब्ध्या व्याप्यस्य चेतनकर्तृकत्वाभावस्य निश्चयादिति–चेत्, मैवम्; कुतः? व्यभिचारादित्याह–*देवादिवदपि लोके*॥२५॥ अयमपि नियमो देवादिषु चेतनेषु व्यभिचरति; तेषां बाह्यसाधनमनुपसंहृत्यैव गमनाधारनानाविधशरीरप्रासादरथादीनां कर्तृत्वदर्शनात्,

मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। लोके=लोकनिमित्तम्, भोगार्थमिति यावत्। भूरादिभोगभूमाविति वाऽर्थः। शेषं भाष्ये।।

पद्मिनी च चेतनप्रयुक्तेति।। नागा एव पातालसर्गेण पद्मिनीं सरोऽन्तरात् सरोऽन्तरं प्रापयन्तीति लोकप्रसिद्धम्। लोकप्रसिद्धिमेव युक्त्या द्रढयति— *न तु स्वयमेवाचेतन इति*।। पद्मषण्ड इति बोध्यम्। यद्यपि प्रकृतेऽपि मायाशक्तिलक्षणोऽचेतनाशं एव ब्रह्मण १ उपादानमिष्यते; तथापि 'तुष्यतु दुर्जन' इति न्यायेन विवक्षितांशमादाय परिहारमाह— *नायं दोष इति*।। वैलक्षण्यप्रदर्शनं तु व्यभिचारोद्भावनायेति द्रष्टव्यम्।।२५।। इत्यष्टमुपसंहारदर्शनाधिकरणम्।।

इति वार्तिकम् उपसंहारदर्शनाधिकरणम् समाप्तम्

प्रदीपः

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।।२४।। एतावता प्रपञ्चेनोपादानत्वं ब्रह्मणस्तर्कविरोधपरिहारेण व्यवस्थापितम्, अनेन तु ब्रह्मणोऽद्वितीयस्यैव स्वभावतः, विचित्रशक्तियोगाद्वा निमित्तकारणत्वं बाह्यसाधननिरपेक्षस्य व्यवस्थाप्यते। अत्रोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वस्यैव कर्तृत्वाद् उपादानगोचरापरोक्षज्ञानमपि नास्ति, उपादानान्तराभावादित्यभिप्रायेण–''लोके कुलालादयो घटपटादीनां कर्तारो मृद्दण्डचक्रसूत्राद्यनेककारकसाधने'' ति वाक्ये मृदादीनामपि ग्रहणम्। अत्र ब्रह्मणो मायाज्ञानमपि नास्तीत्यनेन विवक्षितं प्रतिभाति। तत्तु मायाया अपि ब्रह्मण्यनध्यासेन वा मायिकमायावृत्तेरनङ्गीकारणे वा मायाया अप्युपादानत्वानङ्गीकारेण वा वक्तव्यम्। तत्रान्तिम एव पक्षः साधुरिति भामत्यनुयायिनो मन्यन्ते; मायाया अपि दण्डादिवद् निमित्तकारणत्वस्यैव स्वीकारात्। स्वगोचरज्ञानवत्त्वं तु स्वस्य कथमपि न संभवतीति न ब्रह्मकर्तृत्वनिर्वाह इति शङ्काहृदयम्। येषां तु मते मायैवोपादानम्, तन्मते तद्गोचरापरोक्षज्ञानवत्त्वस्याबाधात् कथमनुपसंहाराशङ्का संभवदुक्तिका? अतो मायानिमित्तकारणत्वं मायाब्रह्मोभयोपादानत्वं वाऽऽदायैवोक्तशङ्काप्रवृत्तिः। तच्चाद्वैतमत एव वर्तते, न मतान्तर इत्युक्ताधिकरणप्रवृत्त्यन्यथाऽनुपपत्त्याप्यद्वैतमेव सौत्रमिति वक्तव्यम्।।

अत्रोपसंहारदर्शनं कर्तरि केवले दृष्टम्, न त्वभिन्ननिमित्तोपादाने; कुलालादीनां निमित्तकारणत्वमात्रत्वात्।। तत्रोपादानस्यैव सतः कर्तुः क्षीरोपसंहारो बाह्यसाधनानपेक्षो वर्तते, इत्युक्त्वा केवलस्य निमित्तकारणस्य चेतनस्य बाह्यसाधनानपेक्षत्वाद् व्यभिचारं प्रदर्शयितुम्– *देवादिवदपि लोके*।।२५।। इति सूत्रान्तरम्। देवादिदृष्टान्तोऽयं कुलालादिवैलक्षण्यमात्राभिप्रायेण, न तु देवादीनामप्यभिन्ननिमित्तोपादानत्वाभिप्रायेणेत्याशङ्का-समाधानाभ्यां विवेचयति– *स यदि ब्रूयादित्यादिना–विवक्षाम इत्यन्तेन*।। तथाच ब्रह्म, न कर्तृ, कारककलापानुपसंहर्तृत्वात्, व्यतिरेके कुलालादिवदित्यनुमानस्य पूर्वपक्ष्यभिमतस्य क्षीरे देवादौ च व्यभिचार इति निष्कर्षः। क्षीरस्याचेतनस्यापि कर्तृत्वमभिप्रेत्य– *क्षीरवद्धीति*।।२५।। इत्यष्टममुपसंहारदर्शनाधिकरणम्।।

इति प्रदीपः उपसंहारदर्शनाधिकरणम् समाप्तम्

भामती

ब्रह्म खल्वेकमद्वितीयतया परानपेक्षं क्रमेणोत्पद्यमानस्य जगतो विविधविचित्ररूपस्योपादानमुपेयते, तदनुपपन्नम्। नह्येकरूपात्कारणात् कार्यभेदो भवितुमर्हति तस्याकस्मिकत्वप्रसङ्गात्। कारणभेदो हि कार्यभेदहेतुः। क्षीरबीजादिभेदाद्दध्यङ्कुरादि-कार्यभेददर्शनात्। न चाक्रमात् कारणात्कार्यक्रमो युज्यते। समर्थस्य क्षेपायोगाद् द्वितीयतया च क्रमवत्तत्सहकारिसमवधानानुपपत्तेः। तदिदमुक्तम् *इह हि लोके इति*। एकैकं मृदादि कारकं, तेषां तु सामग्र्यं साधनम्, ततो हि कार्यं साधयत्येव, तस्मान्नाद्वितीयं ब्रह्म जगदुपादानमिति प्राप्ते, उच्यते-''क्षीरवद्धि''। इदं तावद्भवान् पृष्टो व्याचष्टां, किं तात्त्विकमस्य रूपमपेक्ष्येदमुच्यते उतानादिनामरूपबीजसहितं काल्पनिकं सार्वज्ञ्यं सर्वशक्तित्वम्? तत्र पूर्वस्मिन् तथा च श्रुतिः-''ग तस्य कार्यं करणञ्च विद्यते'' इति। उत्तरस्मिंस्तु कल्पे यदि कुलालादिवदत्यन्तव्यतिरिक्तसहकारिकारणाभावादनुपादानत्वं साध्यते, ततः क्षीरादिभिर्व्यभिचारः, तेऽपि हि बाह्यचेतनादिकारणानपेक्षा एव कालपरिवासवशेन स्वत एव परिणामान्तरमासादयन्ति। अथान्तरकारणानपेक्षत्वं हेतूक्रियते, तदसिद्धमनिर्वाच्यनामरूपबीजसहायत्वात्। तथा चै श्रुतिः-''मायान्तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम्'' इति। कार्यक्रमेण तत्परिपाकोऽपि क्रमवानुन्नेयः। एकस्मादपि च विचित्रशक्तेः कारणादनेककार्योत्पादो दृश्यते। यथैकस्माद्वह्लेदहिपाकावेकस्माद्वा कर्मणः संयोगविभागसंस्काराः।।२४।।

यदि तु चेतनत्वे सतीति विशेषणान्न क्षीरादिभिर्व्यभिचारः, दृष्टा हि कुलालादयो बाह्यमृदाद्यपेक्षाश्चेतनञ्च ब्रह्मेति, तत्रेदमृपतिष्ठते *देवादिवद् इति* लोक्यतेऽनेनेति लोकः शब्द एव तस्मिन्।।२५।।

इति भामती उपसंहारदर्शनाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ उपसंहारदर्शनाधिकरणम्।।८।।

।।सू।। **उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि**।।२४।।

'एकमेवाद्वितीयम्'· 'द्यावापृथिवी जनयन् देव एकः' इत्यादिषु परेश्वर एक एव जगतः कारणमवगम्यते। तस्यास्यैकस्य विचित्रजगत्कारणत्वं युक्तं न वा।

इति संशये न युक्तमिति वदामः। तदसम्भवात्। कार्यमेतदाकाशवाय्वग्निसलिलादिरूपं विचित्रम्। कथमेतत् कारणवैचित्र्यमन्तरेण सम्भवति। दृश्यते हि रथादिकार्येषु बहुकारकोपसंहारः। तस्मादेककारणत्वं न सम्भवतीति चेत्–

नैतद्युक्तम्–एकस्यापि कार्यरूपेण परिणामः सम्भवति, यथा क्षीरस्यैकस्यैव दधिभावेन। तस्माद्ब्रह्मैककारणकं जगत्कार्यम्।।

यदुक्तं कार्यवैचित्र्यं कारणवैचित्र्यापेक्षमिति, तदसत्, चेतनादेकस्मात् पुरुषात् केशनखादिविचित्रकार्यनिष्पत्तिदर्शनात्। अतो विचित्रजगत्कार्यनिर्वाहे ब्रह्म न कारणान्तरापेक्षमिति।।

शक्तिमतां सर्वं सम्भाव्यत एवेत्याह–

।।सू।। **देवादिवदपि लोके**।।२५।।

देवादेः शास्त्रावगतशक्तेर्यथा स्वापेक्षितनानारूपादिभावः, एवं शास्त्रावगतशक्तेः परमेश्वरस्य सर्वमुपपद्यते। 'य इमान् लोकानीशत ईशनीभिः जननीभिः परमशक्तिभिः' इति परमेश्वरस्य अनन्तशक्तिमत्त्वं श्रूयते। तस्य किमसाध्यम्।। इत्युपसंहारदर्शनाधिकरणम्।।८।।

इति श्री कण्ठभाष्य उपसंहारदर्शनाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ उपसंहारदर्शनाधिकरणम्॥८॥

सू॥उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥२४॥

देवादिवदपि लोके॥२५॥ इह ब्रह्मणो जगदुपादानत्वाधिष्ठातृत्ववादिनः समन्वयस्योपादानत्वाधिष्ठातृत्वयोस्सहकार्यन्तरापेक्षानियमसद्भावासद्भावाभ्यां युक्तिबाध्यत्वाबाध्यत्व-संशये ब्रह्मप्रपञ्चयोर्मुख्याभेदाभावेऽपि शरीरशरीरिभावेनापृथक्सिद्धप्रकारप्रकारिभावेन वा सामानाधि- करण्यनिर्देशस्येव उपादानत्वश्रवणस्याधिष्ठातृत्वश्रवणस्य च सहकार्यन्तराभावे कर्तुं न शक्यं प्रकारांतरेणोपपादनम्। मृत्पिण्डकुलालादिषु तयोस्सहकार्यपेक्षानियमदर्शनात् विचित्रकार्यजनने विचित्रसहकार्यपेक्षावश्यंभावाच्चेति पूर्वः पक्षः। क्षीरपुरुषदेवादीनां दधिकेशनखसंकल्प-सृज्यकार्येषूपादानत्वाधिष्ठातृत्वयोस्सहकार्यंतरानपेक्षत्वदर्शनेन व्यभिचारात् नास्त्येव तन्नियम इति सिद्धांतः। अत्र चिंत्यते। प्रपञ्चसृष्टौ ब्रह्मणस्सहकारीणि सन्त्येव सिद्धांतसंमतानि। न हि लोकसिद्धानि मृत्पिण्डदण्डचक्रादीनि श्रुतिसिद्धानि मायाकालकर्मादीनि च कारणान्तराणि सिद्धांते त्यज्यंते। प्रत्युतारंभणसूत्रादिपर्यालोचनया तत्रैव तान्यभ्युपगतान्यवगम्यंते। जगद्वैचित्र्यं कर्मवैचित्र्यमूलमिति च 'वैषम्यनैर्घृण्ये न सापेक्षत्वा' दिति (ब्र० २-१-३४) दर्शयिष्यते। एकमेवेत्यादि व्यक्तनामरूपस्थूलप्रपञ्चभावाभिप्रायमिति तत्रतत्रोक्तमेव। कथं च क्षीरदृष्टांतेन सिद्धान्तोपपादनं कृतम्? 'पर्योऽबुवञ्चे' दिति (ब्र० २-१-२) सूत्रे हि क्षीरस्य दधिभावापत्त्यादिषु परमेश्वराधिष्ठानं कारणान्तरमस्तीति वक्ष्यते। कथं च 'देवादिवदपि लोके' (ब्र० २-१-२५) इति सिद्धान्ते दृष्टान्तान्तरमुक्तम्। न हि परब्रह्मणोऽपि सहकार्यंतरं विना स्त्रष्टृत्वमनुपपन्नमिति विवदमानः पूर्वपक्षी देवादीनां तदनुमन्येत। किं च। भूतवशिनां तेषां स्त्रष्टृत्वमपि तत्सङ्कल्पानीतपार्थिवद्रव्यादीसहकार्यपेक्षमिति तत्राऽपि न सहकारिविरहसम्प्रतिपत्तिरिति। अत्रेदमुत्तरम्। मृत्पिण्डादीनामुपादानभावे तव्द्यतिरिक्तकुलालाद्यधिष्ठानापेक्षा दृष्टा। कुलालादीनां निमित्तभावे स्वसङ्कल्पमात्रानधीनसमवधानसहकार्यपेक्षा दृष्टा। तदभावाद्ब्रह्मणो नोपादानत्वं न वा

निमित्तत्वं संभवतीति मन्यमानस्य पूर्वपक्षः। स्मृतयः कर्तृगौरवमात्रेणानादरणीयत्वेऽपि तदुपन्यस्तयुक्तिगौरवेणादरणीया इति कपिलादिस्मृत्युक्तब्रह्मवादनिराकरणार्थयुक्तयवलम्बन-पूर्वपक्षनिराकरणार्थानि खल्विह पादे 'नविलक्षणत्वा' धिकरणमारभ्याधिकरणानि। तत्र कपिलस्मृत्यनुसारिणां निरीश्वरवादिनां पयोऽम्बुन्यायेन स्वत एव प्रकृतेः प्रपञ्चसृष्टौ प्रवृत्तिमवगच्छतां नैवं युक्तिरुपपद्यत इति क्षीरवदित्यनेनोक्तम्। उक्तार्थे अन्येषामपि नोप...... आत्मरूपोपादानाभिन्नकर्तृकेषु यागोपासनादिषु व्यभिचारस्य स्पष्टत्वादिति हिशब्देन द्योतितम्। कर्तुः स्वसङ्कल्पमात्रानधीनसमवधानसहकार्यपेक्षानियमव्यभिचारो 'देवादिव' दिति सूत्रेणोद्घाटित इति। भाष्ये 'चेतनादेकस्मात्पुरुषा' दिति पुरुषातिरिक्तपरिदृश्यमानकेशनखादिकारणाभावाभिप्रायः।।

इत्युपसंहारदर्शनाधिकरणम्।।८।।

इति शिवार्कमणिदीपिका उपसंहारदर्शनाधिकरणम् समाप्तम्

कृत्स्नप्रसक्त्यधिकरणम्।

शाङ्करभाष्यम्

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥२६॥

चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद् देवादिवञ्चानपेक्ष्य बाह्यसाधनं स्वयं परिणममानं जगतः कारणमिति स्थितम्। शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति।। कृत्स्नप्रसक्तिः=कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः, प्राप्नोति; निरवयवत्वात्। यदि ब्रह्म पृथिव्यादिवत्सावयवमभविष्यत्, ततोऽस्यैकदेशः पर्यणंस्यत्, एकदेशश्चावास्थास्यत्। निरवयं तु ब्रह्म श्रुतिभ्योऽवगम्यते–"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" (श्वे० ६/१९), "दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः" (मु० २/१/२), "इदं महद्भूतमनन्तमपारं विज्ञानघन एव" (बृ० २/४/१२), "स एष नेति नेत्यात्मा" (बृ० ३/९/२६), "अस्थूलमनणु" (बृ० ३/८/८) इत्याद्याभ्यः सर्वविशेषप्रतिषेधिनीभ्यः। ततश्चैकदेशपरिणामासम्भवात्कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत। द्रष्टव्यतोपदेशानर्थक्यं चापद्येत; अयत्नदृष्टत्वात्कार्यस्य, तद्व्यतिरिक्तस्य च ब्रह्मणोऽसम्भवात् अजत्वादिशब्दकोपश्च। अथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत, तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दा उदाहृतास्ते, प्रकुप्येयुः। सावयवत्वे चानित्यत्वप्रसङ्ग इति। सर्वथाऽयं पक्षो न घटयिंतु शक्यत इत्याक्षिपति॥२६॥

श्रुतेस्तु शब्दमूलत्वात्॥२७॥

तुशब्देनाक्षेपं परिहरति। न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति।। न तावत्कृत्स्नप्रसक्तिरस्ति। कुतः? श्रुतेः। यथैव हि ब्रह्मणो जगदुत्पत्तिः श्रूयते, एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते; प्रकृतिविकारयोर्भेदेन व्यपदेशात्–"सेयं देवतैक्षत हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" (छा० ६/३/२) इति, "तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" (छा० ३/१२/६) इति चैवञ्जातीयकात्, तथा हृदयायतनत्ववचनात्, सत्सम्पत्तिवचनाच्च। यदि च कृत्स्नं ब्रह्म

कार्यभावेनोपयुक्तं स्यात्, ''सता सोम्य तदा सम्पन्नो भवति'' (छा० ६/८/१) इति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात्; विकृतेन ब्रह्मणा नित्यसम्पन्नत्वात् अविकृतस्य च ब्रह्मणोऽभावात्, तथेन्द्रियगोचरत्वप्रतिषेधात्, ब्रह्मणो विकारस्य चेन्द्रियगोचरत्वोपपत्तेः। तस्मादस्त्यविकृतं ब्रह्म।।

न च निरवयवत्वशब्दकोपोऽस्ति; श्रूयमाणत्वादेव निरवयवत्वस्याप्यभ्युपगम्यमानत्वात्। शब्दमूलं च ब्रह्म शब्दप्रमाणकम्, नेन्द्रियादिप्रमाणकम्। तद्यथा शब्दमभ्युपगन्तव्यम्। शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयति—अकृत्स्नप्रसक्तिम्, निरवयवत्वं च। लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यन्ते। ता अपि तावन्नोपदशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते—अस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तयः—इति, किमुताचिन्त्यस्वभावस्य ब्रह्मणो रूपं विना शब्देन निरूप्येत। तथायाहुः पौराणिकाः—अचिन्त्या खलु ये भावा तांस्तर्केण योजयेत्। प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्।।'' इति। तस्माच्छब्दमूल एवातीन्द्रियार्थयाथात्म्याधिगमः।।

ननु—शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुम्—निरवयवं च ब्रह्म, परिणमते न च कृत्स्नमिति। यदि निरवयवं ब्रह्म स्यात, नैव, कृत्स्नमेव वा परिणमेत। अथ केनचिद्रूपेण परिणमेत, केनचिच्चावतिष्ठेतेति, रूपभेदकल्पनात्सावयवमेव प्रसज्येत। क्रियाविषये हि ''अतिरात्रे षोडशिनं गृह्णाति'' ''नातिरात्रे षोडशिनं गृह्णाति'' इत्येवञ्जतीयकायां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति; पुरुषतन्त्रत्वाच्चानुष्ठानस्य, इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः सम्भवति; अपुरुषतन्त्रत्वाद्वस्तुनः। तस्माद् दुर्घटमेतत्—इति, नैष दोषः; अविद्याकल्पितरूपभेदाभ्युपगमात्। न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते। न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति। अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते, पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते; वाचारम्भणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्यति न निरवयवत्वं ब्रह्मणः कुप्यति।। न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था, तत्प्रतिपत्तौ फलानवगमात्, सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा; तत्प्रतिपत्तौ फलानवगमात्। ''स एष नेति नेत्यात्मा'' इत्युपक्रम्याह—''अभयं वै जनक प्राप्तोऽसि'' (बृ० ४/२/४) इति। तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसङ्गोऽस्ति।।२७।।

आत्मनि चैवं विचित्राश्च हि।।२८।।

अपिच नैवात्र विवदितव्यम्—कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्दैनैवानेकाकारा सृष्टिः

स्यात्-इति; यत आत्मन्यप्येकस्मिन् स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठयते-"न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते" (बृ० ४/३/१०) इत्यादिना। लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते, तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति।।२८।।

***स्वपक्षदोषाच्च*।।२९।।**

परेषामप्येष समानः स्वपक्षे दोषः। प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षः। तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात्प्रधानस्य प्राप्नोति, निरवयवत्वाभ्युपगमकोपो वा। ननु-नैव तैर्निरवयवं प्रधानमभ्युपगम्यते, सत्त्वरजस्तमांसि त्रयो गुणा नित्याः, तेषां साम्यावस्था प्रधानम्, तैरेवावयवैस्तत्सावयवम्-इति, नैवञ्जातीयकेन सावयवत्वेन प्रकृतो दोषः परिहर्तुं पार्यते; यतः सत्त्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वम्। एकैकमेव चेतरद्वयानुगृहीतं सजातीयस्य प्रपञ्चस्योपादानमिति समानत्वात्स्वपक्षदोषप्रसङ्गस्य।। तर्काप्रतिष्ठानात्सावयवत्वमेवेति चेत्, एवमप्यनित्यत्वादिदोषप्रसङ्गः। अथ शक्तय एव कार्यवैचित्र्यसूचिता अवयवा इत्यभिप्रायः, तास्तु ब्रह्मवादिनोऽप्यविशिष्टाः।। तथाऽणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्येन संयुज्येत, ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसङ्गः।। अथैकदेशेन संयुज्येत, तथापि निरवयवत्वाभ्युपगमकोपः, इति स्वपक्षेऽपि समान एष दोषः, समानत्वाच्च नान्यतरस्मिन्नेव पक्ष उपक्षेप्तव्यो भवति। परिहृतश्च ब्रह्मवादिना स्वपक्षे दोषः।।२९।। इति नवमं कृत्स्नप्रसक्त्यधिकरणम्।।

इति शाङ्करभाष्यम् कृत्स्नप्रसक्त्यधिकरणम् समाप्तम्

वार्तिकम्

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥२६॥ ननु–"तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यनेन शुक्तिरजतवत् सर्वस्य कार्यजातस्य मिथ्यात्वमवधारितम्, तत् कुतः परिणामवादमाश्रित्य पुनरियमाशङ्केति? तत्राह–*चेतनमेकमद्वितीयमिति*॥ "क्षीरवद्धी" ति ब्रह्मणो दृष्टान्तमुपश्रुत्य तद्वदेव ब्रह्मणः पुनः परिणामित्वमङ्गीकृतमिति भ्रान्तस्य प्रतीत्येयमाशङ्कोत्पद्यत इत्यभिप्रायः। भ्रान्तिनिवृत्तिरेवास्याधिकरणस्य प्रयोजनम्। यदि क्षीरवत् परिणामि सद् ब्रह्म जगदुपादानम्, हन्त तर्हि तद्वदेव सावयवमपि स्यात्; सावयवस्यैव परिणामदर्शनात्। अस्त्वेवमिति चेत्, न; तन्निरवययत्वबोधकशब्दकोपापत्तेः। "निष्कलं निष्क्रियमि" त्यादिर्हि तद्बोधकः शब्दो भवति। अथ–एतद्दोषभिया निरवयवमपि परिणमते–इत्यभ्युपगन्तव्यम्, तदपि न; न्यायविरोधापत्तेः, परिणामित्वस्य सावयवत्वव्याप्तत्वात्। *कृत्स्नप्रसक्तिश्च*॥ तथा चाविकृतब्रह्मणोऽभावात् कस्य ज्ञानेन मोक्षः स्यात्, इत्यनिर्मोक्षप्रसङ्गः, तदनित्यत्वप्रसङ्गश्चेति॥२६॥

भ्रान्तिनिराकरणेन समाधत्ते–*श्रुतेस्तु शब्दमूलत्वात्*॥२७॥ तुशब्द उक्ताक्षेपनिवृत्त्यर्थः। न तावदस्मत्पक्षे ब्रह्मणः कृत्स्नप्रसक्तिरस्ति। कुतः? विकारव्यतिरेकेण ब्रह्मावशेषश्रुतेः। "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवी" त्येवमादिश्च श्रुतिः। न च निरवयवत्वशब्दव्याकोपः ; निरवयवत्वस्यापि शब्दमूलत्वादेवोपपत्तेः। ननु–विरुद्धयोः श्रुत्योरेकस्मिन् वस्तुनि समवाये कथं न व्याकोपः? वस्तुनि विकल्पायोगादिति–चेत्, मैवम्; कल्पिताकल्पितरूपभेदमादायाविरोधोपपत्तेरसकृदावेदितत्वात्। अविद्याकल्पितरूपभेदमादाय ब्रह्मणो जगदाकारपरिणामित्वश्रुतयः। प्रवर्तन्ते, तन्निरवयवत्वादिश्रुतयस्तु तन्निषेधमुखेन स्वस्वरूपमादायेति निरवद्यम्॥२७॥

आत्मनि चैवं विचित्राश्च हि॥२८॥ यथा जीवात्मन्येकस्मिन् स्वप्नदृशि विविधाः स्वाप्निकाः पदार्थास्तत्कर्तृकाः परिपठयन्ते–"न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते स हि कर्त्ता" इत्येवमादिना। न च तैस्तस्योपमर्दो दृश्यते; अनन्वागतत्वात्,

एवं ब्रह्मकर्तृकैर्जागरितपदार्थैर्ब्रह्मणोऽनन्वागतत्वाद् न तैस्तस्योपमर्दः ; उभयोरप्यविद्याकल्पितत्वा-विशेषादिति। अनेन मायावादः स्पष्टीकृतः सूत्रकारेणेति[२] द्रष्टव्यम्॥२८॥

अपि च यो दोषः परैरस्मन्मत आसज्जितः—कृत्स्नप्रसक्त्यादिलक्षणः, सर्वोऽपि तेषामेव मते प्रसज्येत; परमार्थसृष्टयभ्युपगमादित्याह– *स्वपक्षदोषाच्च*॥२९॥ चोऽवधारणे। यद्वा– इतश्चैवञ्जातीयकं दूषणं परैर्नास्मत्पक्षे चोदनीयम्, तत्पक्षेऽप्येतस्य समानत्वात्, इत्याह– *स्वपक्षदोषाच्चेति*॥ भावप्रधानो निर्देशः। स्वपक्षदोषत्वात्। एतस्येति शेषः। शेषं भाष्ये॥

शङ्कते– *नन्विति*। यद्यपि समावस्थापन्नगुणत्रयातिरिक्तं प्रधानं नामावयवी किञ्चित् तेषां राद्धान्ते नास्ति; तेषां च परस्परावयवावयविभावे स्वातन्त्र्यहानात् प्रधानत्वव्याहतेः, तथापि स्थितेऽप्यस्मिन् दूषणे सौकर्याद् दूषणान्तरमाह– *नैवञ्जातीयकेनेति*॥ अयं च दोषः परपक्ष एव नास्मत्पक्ष इत्याह– *परिहृतस्त्विति*॥२९॥ इति नवमं कृत्स्नप्रसक्त्यधिकरणम्॥

इति वार्तिकम् कृत्स्नप्रसक्त्यधिकरणम् समाप्तम्

प्रदीपः

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।।२६।। इदमधिकरणं ब्रह्मणः केवलस्य परिणामित्वमाक्षिप्य समाधत्त इति श्रीवल्लभभास्करयोर्मतम्। तन्मते निरवयवस्यापि परिणामित्वं श्रुतिप्रामाण्यात्स्वीक्रियते। माध्वमते तु "इतरव्यपदेशादि" त्यारभ्य जीवकारणत्वनिरासार्थमिति मन्यते। श्रीभाष्यकारास्तु–यद्यपि सूक्ष्मचिदचिच्छरीरं ब्रह्म; तथापि निरस्तचिदचिद्विभागतया निरवयवं शरीर्यंशेनापि परिणमत इति स्वीकारात् तस्य निरवयवस्य बहुभवनं नोपपद्यते, कार्यत्वानुपयुक्तांशस्थितिश्च नोपपद्यते। तस्मादसमञ्जसं ब्रह्मकारणत्वमिति–व्याचक्षते।।

तत्र भास्करादिमते मायाशक्तिकत्वस्य ब्रह्मणि स्वीकाराद् अन्तिमे मायाशरीरित्वस्य स्वीकाराच्च न निरवयवत्वं वस्तुगत्या। अवयवाविभागापेक्षया निरवयवत्वं तु गौणमेव। अतो निरवयवत्वशब्दकोपो वेति न तन्मते सङ्गतम्। जीवकारणत्वनिरासार्थं तु नैतावतां सूत्राणामपेक्षेति पूर्वमेव सूचितमिति न मध्यमपक्षस्याप्यत्रावसरः, इति भगवत्पादानां विवरणमेवात्र समुचितम्।।

इदमेतेषां विवरणम्–यद्येकमद्वितीयं ब्रह्म विवर्तोपादानं मन्यते, तर्हीदमनुपपन्नम्। विवर्तोपादानत्वं हि किञ्चद्रूपेण ज्ञानं किञ्चिद्रूपेणाज्ञानं चापेक्ष्य भवति। न च निरवयवे निरंशे वा ब्रह्मणि तत् संभवति। सत्त्वचित्त्वानन्दत्वादिकं तु ब्रह्मणि कल्पित एवांश इति स्वरूपतो भेदाभावाद् विवर्तमानं ब्रह्मैकमेवाद्वितीयमिति सर्वात्मना विवर्तत इत्यवश्यमूरीकर्तव्यम्। सति चैवमधिष्ठानारोप्योभयविषयीकरणेन सत्यानृतमिथुनीकरणं न संभवति, किन्तु केवलारोप्यविषयकमेव ज्ञानं सर्वत्र भवेत्। तथाच कार्यज्ञानादेव मोक्ष इति स्यात्। तच्च न युक्तम्, इति प्रधानकारणवाद एव युक्त इत्याशङ्कायां ब्रह्मणो वस्तुगत्या निरवयवत्वेऽपि सत्त्वचित्त्वादीनां कल्पनया धर्मभावो मन्यतेऽस्माभिः। इदमेवाभिप्रेत्य मन्यते–"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्त" इति। ततश्च ज्ञातांशस्यैव विवर्तमानत्वाद् अज्ञातांशेन स्वरूपतोऽवस्थानाद् न कृत्स्नप्रसक्तिरद्वैतमते; ब्रह्मनिरवयवत्व-तत्कारणत्वश्रुत्योरुभयोरन्यथा परस्परविरोधेनाप्रामाण्यापत्तेः। विवर्तमानत्वं च ब्रह्मणः

कार्यविषमसत्ताकत्वेनैव मन्यते, इति न सत्यानृतमिथुनीकरणासम्भवः। तथाचैतदप्यधिकरणमद्वैतमतस्यैव सौत्रत्वं गमयति। न हि कुत्राप्यन्यत्र मते वस्तुगत्या ब्रह्मणो निरवयवत्वम्।।

परिणामपदं चात्रत्यं भाष्ये विवर्तपरमेव। तदुक्तं भाष्ये-"न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था; तत्प्रतिपत्तौ फलानवगमात्। सर्वव्यवहारातीतब्रह्मात्मभावप्रतिपादनार्था ह्येषे" ति।। इदं च भाष्यं परिणामपदस्य सूत्रेषु भाष्ये च विकारमात्रे विवर्तसाधारणे प्रवृत्तिः, न तु मतान्तराभिमते कारणसमसत्ताके विकार इति विशदयति। तथाच तदनन्यत्वमिति प्रतिपादितमनन्यत्वं कारणव्यतिरेकेण कार्याभावमभिप्रेत्यैव, न तु कार्यव्यतिरेकेण कारणाभावमभिप्रेत्येत्यनेन निष्कृष्यते। तेन च परस्पराध्यासोऽपि अधिष्ठानस्य संसर्गमात्राध्यासेनैव, न स्वरूपतोऽध्यासेनेति फलति।।

केचित्तु-परिणामवादं गृहीत्वोक्ताधिकरणमिति-मन्यन्ते, तन्मते तु "नैष दोषः ; अविद्याकल्पितरूपभेदाभ्युपगमात्" "अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपाद्यत" इति भाष्यं न स्वरसं भवति।।

अत्र ब्रह्मन्यूनसत्ताकेनानिर्वचनीयेन ब्रह्मणः परिणामित्वव्यवहारो विवर्तकारणत्वव्यवहार एवेत्यवश्यमेव स्वीकर्तव्यम्। सत्त्वचित्त्वानन्दत्वानामपि ब्रह्मणोऽशत्वेन कल्पनायां प्रमाणं तु भाष्योदाहृता-"पादोऽस्य सर्वा भूतानि। त्रिपादस्यामृतं दिवी" ति श्रुतिरेव। अत्र नामरूपात्मकार्यजातस्यैकपादत्वम्, कारणांशस्य तु पादत्रयवत्त्वं प्रतिपाद्यभानं सत्त्वचित्त्वादीनामपि रूपभेदत्वकल्पना श्रौतीति सूचयति। तदिदं सर्वं सूचयन्नाक्षेपांशमनुवदति- *चेतनमेकमद्वितीयमित्यादिना*।। अद्वितीयमनंशमनवयवमिति यावत्। "सदेव सोम्येदमग्र आसीदेकभेवाद्वितीयमि" त्युपक्रमसिद्धं चेतनस्वरूपमित्यर्थः। तथाच कल्पितं प्रपञ्चतादात्म्यमादायैव "सदेवे" ति वाक्यप्रवृत्त्या न वस्तुतो निरंशत्वमद्वितीयत्वं वा विरुद्धमिति भावः। *कार्यरूपेण परिणाम इति*।। विवर्त इत्यर्थः। तथाच कार्यव्यतिरेकेण ब्रह्माभावः प्रसज्येतेति भावः। *निष्फलमिति*।। सत्त्वचित्त्वादिधर्माणामपि निषेधादिति भावः। तदिदं विशदयति- *सर्वविशेषप्रतिषेधिनीभ्य इति*।। विशेषांशाज्ञाने खलु विवर्तवादः। न च निर्विशेषं ब्रह्म विवर्तितुमर्हतीति भावः। अत्र प्रकरणे सर्वाणि परिणामपदा नि कारणाभिन्नकार्यपराणि सन्ति विवर्तपर्यवसायीनिमन्तव्यानि; परिणामिविवर्तकारणसाधारणस्य स्वाभिन्नकार्यजनकत्वस्यैवात्र परिणामपदार्थत्वात्।। शेषं निगदव्याख्यातम्।।२६।।

श्रुतेस्तु शब्दमूलत्वात्।।२७।। तुशब्देन कृत्स्नप्रसक्तिर्निवार्यते। ब्रह्मणो न कृत्स्नस्य कार्यभावप्रसङ्गः ; श्रुतेः=जगदुत्पत्तिब्रह्मावस्थानयोरुभयोरपि श्रवणात्। ननु–श्रुतिरपि परस्परविरुद्धा कथं प्रमाणतामर्हतीति–चेत्, तत्राह– *शब्दमूलत्वादिति*।। शब्दप्रमाणकत्वाद् ब्रह्मणः कारणत्वस्य यथाशास्त्रमुभयं सति सम्भवे स्वीकर्तव्यम्। सम्भवति च पूर्वोक्तप्रकारेण कृत्स्नाप्रसक्तिर्निर्विशेषब्रह्मकारणता च; कल्पितं रूपभेदमाश्रित्यैव ब्रह्मकारणत्वस्य स्वीकारात्। तदिदमाशङ्कासमाधानाभ्यामाह– *ननु शब्देनापीत्यादिना–न दोषप्रसङ्गोऽस्तीत्यन्तेन*।। यथा चास्य सन्दर्भस्य विवर्तवाद एव सवारस्यम्, तथा पूर्वमेव निरूपितम्।।२७।।

आत्मनि चैवं विचित्राश्च हि।।२८।। न केवलं ब्रह्मणि, किन्तु जीवेऽपि विचित्ररथरथयोगादिस्रष्टृत्वमकृत्स्नप्रसक्तिश्च वर्तत इत्यस्य सूत्रस्यार्थः। अनेन जीवोपादानता स्वाप्निकेषु, व्यावहारिकेषु ब्रह्मोपादानतेति वा, आन्तरपदार्थेषु जीवोपादानता, बाह्येषु ब्रह्मोपादानता वेति पक्षभेदोऽपि सिद्धान्तलेशसंगृहीतः सूच्यते। व्यक्तं चेतत्–''वैधर्म्याच्च न स्वप्नादिवत्'' ''मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्'' इत्यादौ। मायापदं ह्यत्रत्यं तूलाविद्यापरत्वात् स्वाश्रयजीवोपादानतापक्षं विवरणप्रस्थाने भामतीप्रस्थाने चोभयत्र स्वाप्निकेषु जीवोपादानतापक्षं समर्थयति।।२८।।

स्वपक्षदोषाच्च।।२९।। सर्वे चेमे दोषाः प्रधानकारणवादिनामपि पक्षे समाना इति सूत्रार्थः। कृत्वाचिन्तयैवायं दोषसमानत्वोपक्षेपः। वस्तुतस्तु परमत एवायं दोषः, नाद्वैतमत इति मन्तव्यम्। तदिदमाह– *परिहृतश्चेति*।।२९।। इति नवमं कृत्स्नप्रसक्त्यधिकरणम्।।

इति प्रदीपः कृत्स्नप्रसक्त्यधिकरणम् समाप्तम्

भामती

ननु न ब्रह्मणस्तत्त्वतः परिणामो येन कात्स्न्यर्भागविकल्पेनाक्षिप्येत, अविद्याकल्पितेन तु नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वान्यत्वाभ्यायनिर्वचनीयेन परिणामादिव्यवहारास्पदत्वं ब्रह्म प्रतिपद्यते। न च कल्पितं रूपं वस्तु स्पृशति, न हि चन्द्रमसि तैमिरिकस्य द्वित्वकल्पना चन्द्रमसो द्वित्वमावहति, तदनुपपत्त्या वा चन्द्रमसोऽनुपपत्तिः, तस्मादवास्तवी परिणामकल्पनानुपपद्यमानापि न परमार्थसतो ब्रह्मणोऽनुपपत्तिमावहति, तस्मात्पूर्वपक्षाभावादनारभ्यमिदमधिकरणमिन्यत आह *चेतनमेकम्*। यद्यपि श्रुतिशतादैकान्तिकाद्वैतप्रतिपादनपरात् परिणामो वस्तुतो निषिद्धस्तथापि क्षीरादिदेवतादृष्टान्तेन पुनस्तद्वास्तवत्वप्रसङ्गं पूर्वक्षोपपत्त्या सर्वथाऽयं पक्षो न घटयितुं शक्यत इत्यपवाध्य "श्रुतेस्तु शब्दमूलत्वात्", "आत्मनि चैवं विचित्राश्च हि" इति सूत्राभ्यां विवर्त्तदृढीकरणेनैकान्तिकाद्वयलक्षणः श्रुत्यर्थः परिशोध्यत इत्यर्थः। *तस्मादस्त्दविकृतं ब्रह्म* तत्त्वतः। *ननु शब्देनायि* इति चोद्यमविद्याकल्पितत्वोद्घाटनाय। नहि निरवयवत्वसावयवत्वाभ्यां विधान्तरमस्त्येकनिषेधस्येतरविधाननान्तरीयकत्वात्। तेन प्रकारान्तराभावान्निर- वयवत्वसावयवत्व-योश्च प्रकारयोरनुपपत्तेर्ग्रावप्लवनाद्यर्थवादवदप्रमाणं शब्दः स्यादिति चोद्यार्थः। परिहारः सुगमः॥२६-२७॥

अनेन स्फुटितो मायावादः। स्वप्नदृगात्मा हि मनसैव स्वरूपानुपमर्देन रथादीन् सृजति॥२८॥

चोदयति *ननु नैव इति*। परिहरति *नैवञ्जातीयकेन इति*। यद्यपि समुदायः सावयवस्तथापि प्रत्येकं सत्त्वादयो निरवयवाः। नह्यस्ति सम्भवः सत्त्वमात्रं परिणमते न रजस्तबसी इति। सर्वेषां सम्भूयपरिणामाभ्युपगमात्। प्रत्येकं चानवयवानां कृत्स्नपरिणामे मूलोच्छेदप्रसङ्गः, एकदेशपरिणामे वा सावयवत्वमनिष्टं प्रसज्येत। *तथाणुवादिनोऽपि इति*। वैशेषिकाणां ह्यणुभ्यां संयुज्य द्व्यणुकमेकमारभ्यते, तैस्त्रिभिर्द्व्यणुकैस्त्र्यणुकमेकमारभ्यत इति प्रक्रिया। तत्र द्वयोरण्वोरनवयवयोः

संयोगस्तावणू व्याप्नुयादव्याप्नुवन्वा तत्र त वर्त्तेत। नह्यस्ति सम्भवः स एव तदानीं तत्र वर्त्तते न वर्त्तते चेति। तथा चोपर्यधः पार्श्वस्थाः षडपि परमाणवः समानदेशा इति प्रथिमानुपपत्तेरणुमात्रः पिण्डः प्रसज्येत। अव्यापने वा षडवयवः परमाणुः स्यादित्यनवयवत्वव्याकोपः। अशक्यञ्च सावयवत्वमुपेतुं, तथा सत्यनन्तावयवत्वेन सुमेरुराजसर्षपयोः समानपरिणामत्वप्रसङ्गः, तस्मात् समानो दोषः। आपातमात्रेण साम्यमुक्तं परमार्थतस्तु भाविकं परिणामं वा कार्यकारणभावं वेच्छतामेष दुर्वारो दोषो न पुनरस्माकं मायावादिनामित्याह *परिहृतस्तु इति*।।२९।।

इति भामती कृत्स्नप्रसक्त्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ कृत्स्नप्रसक्तयधिकरणम्।।९।।

।।सू।। **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा**।।२६।।

अत्र ब्रह्मणो जगदाकारेण परिणामः पूर्वोक्तो युज्यते न वेति संदेहः।

कथं युज्यते! एकस्यैव जगदाकारेण परिणाम इत्युक्तम्। तस्य क्षीरस्येव दधिरूपेण सर्वात्मना जगदाकारेण परिणामे कृत्स्नस्यापि कार्यत्वप्रसक्तिः, ब्रह्म नावशिष्येत। केन चिदंशेन चेत्तस्य निरवयवत्वश्रुतिकोपो वा भवति। तस्माद्ब्रह्मणः परिणामो न युक्तः।। इति प्राप्ते ब्रूमः

।।सू।। **श्रुतेस्तु शब्दमूलत्वात्**।।२७।।

ब्रह्मणो जगत्परिणामो युक्त एव, तच्छ्रुतेः। श्रुतिरेवात्र प्रमाणम्, न प्रमाणान्तरम्। शब्दमूलत्वादेव तस्य सकलेतरप्रमाणावगतवस्तुविजातीयत्वेन तत्रादृष्टशक्तियोगेन विरोधाभावात्। अतः परिपूर्णस्य तस्यैव कार्यत्वं कारणत्वं च सम्भवति। यथा जातिवादिनां जातेः खण्डमुण्डाद्यत्यन्तविलाक्षणेष्वनन्तेषु प्रत्येकमेकस्या एव परिसमाप्य वृत्तिः न तत्रेतरवस्तुदृष्टान्तेन शङ्का चोद्या। तस्मात् ब्रह्मणः स्वरूपनिरूपणे शब्द एव मूलमिति न कश्चिद्विरोधः।।

।।सू।। **आत्मनि चैवं विचित्राश्च हि**।।२८।।

जीवात्मनि च अचिद्धर्मविरोधिचिद्धर्मयोगोऽपि विजातीयत्वादेव भवति। अग्निजलादयोऽप्यचिद्विशेषा अन्योन्यविलक्षणशक्तयो दृश्यन्ते विचित्रा एव। ततो ब्रह्मापि शब्दैकप्रमाणकं विचित्रानन्तशक्तिकमिति ततः सर्वाविरोधः।।

।।सू।। **स्वपक्षदोषाच्च**।।२९।।

कृत्स्नप्रसक्त्यादिदोषा निरवयवेऽचित्सजातीये प्रधानादौ, न ब्रह्मणि शास्त्रप्रमाणके।।

इति श्री कण्ठभाष्य कृत्स्नप्रसक्त्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सू०।। कृत्स्नप्रसक्तिर्निरवयत्वशब्दकोपो वा।।२६।। कृत्स्नप्रसक्त्यादिदोषप्रसंगाप्रसंगाभ्यां संशयं दर्शयति-**अत्रेति।** पूर्वत्राधिकरणे क्षीरस्येव दधिभावेन ब्रह्मणः प्रपञ्चभावेन परिणाम उक्तः। तर्हि तद्वदेव सर्वात्मना परिणामे ब्रह्मानवशेषप्रसंग इति प्रदर्शनपूर्वकं सूत्रोदितं पूर्वपक्षं दर्शयति-**कथमिति। नावशिष्येतेति।** तथा च प्रपञ्चातीतस्य ब्रह्मणस्सार्वदिकसत्ताबोधकानां तत्साक्षात्कारोपयुक्तविद्याविधायकानां च वाक्यानां वैयर्थ्यप्रसङ्ग इति भावः। तत्र फलादीनामंशेन पक्वतावदंशेन ब्रह्मणः परिणामः स्यादित्याशंक्याह-**केनचिदिति।** ब्रह्मणः परिणामाभावेऽपि चिच्छक्तेः परिणामोऽस्तीति तद्दृष्टया पूर्वपक्षः।।सू०।। **श्रुतेस्तु शब्दमूलत्वात्**।।२७।। नैवं शङ्कावकाशोऽस्ति। यतो निरवयवमेव ब्रह्म जगदाकारेण परिणमते च स्वयं च यथापूर्वं परिपूर्णमवतिष्ठते। तथा श्रुतेः। श्रुतिमूलेऽस्मिन्नर्थे न कश्चित्कुतर्कापादितो विरोधः प्रभवति। 'नैषा तर्केण मतिरापनीये'ति श्रुतेः। तर्कागोचरे ब्रह्मणि तर्कस्य रूपे श्रोत्रस्येव साधकत्ववद्बाधकत्वस्याप्यसंभवादिति सूत्रोदितं सिद्धातं दर्शयति-**ब्रह्मण इति।** श्रुतिमात्रेणाप्यपरितुष्टं तार्किकंमन्यं प्रत्याह-**यथेति।** जातिर्व्यक्तिषु नांशेन वर्तते निरवयवत्वव्याकोपादिति परिसमाप्य वर्तत इति वक्तव्यम्। तथा चैकत्र व्यक्तौ परिसमाप्य स्थिता जातिर्न परिशिष्येतेति व्यक्त्यंतरे तदनुपलम्भप्रसंगः। अतस्तत्र यथादर्शनं व्यक्तिषु परिसमाप्य स्थिताऽपि जातिः परिशिष्यते तेन व्यक्त्यंतरेष्वपि तदुपलंभः इत्युपपादनीयम्। एवं ब्रह्म यथाश्रुति जगदाकारेण परिणमते यथापूर्वं परिपूर्णमवतिष्ठते च, न च तत्र काचिदनुपपत्तिरुपपद्यत इत्यर्थः।।सू।। **आत्मनि चैवं विचित्राश्च हि**।।२८।। आत्मनि चैवमित्यंशं व्याचष्टे-**जीवात्मनीति।** यथा ब्रह्मणि परिणामित्वेऽपि

परिपूर्णत्वलक्षणश्चिदचित्प्रपञ्चधर्मविलक्षणो धर्म एवं जीवात्मन्यपि अचित्प्रपञ्चधर्मविलक्षण: कर्तृत्वभोक्तृत्वादिलक्षणो धर्म:। न तस्याचित्प्रपञ्चदृष्टांतेनापह्नव: कर्तुं शक्यत इति भाव:। 'विचित्राश्च ही' ति सूत्रशेषं व्याचष्टे-**अग्निजलादयोऽपीति। विचित्रा एवेति।** न तु परस्परदृष्टान्तेन परस्परविलक्षणधर्ममूला इत्यर्थ:। हिशब्दोऽवधारणार्थ इतिभाव:।।सू।।

स्वपक्षदोषाच्च।।२९।।

इति शिवार्कमणिदीपिका कृत्स्नप्रसक्त्यधिकरणम् समाप्तम्

सर्वोपेताधिकरणम्।

शाङ्करभाष्यम्

सर्वोपेता च तद्दर्शनात्॥३०॥

एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपञ्च इत्युक्तम्। तत्पुनः कथमवगम्यते–विचित्रशक्तियुक्तं परं ब्रह्मेति? तदुच्यते–*सर्वोपेता च तद्दर्शनात्*॥ सर्वशक्तियुक्ता च परा देवतेत्यभ्युपगन्तव्यम्॥ कुतः? तद्दर्शनात्। तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः–"सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः" (छा० ३/१४/४), "सत्यकामः सत्यसङ्कल्पः" (छा० ८/७/१), "यः सर्वज्ञः सर्ववित्" (मुण्ड० १/१/९) "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ० ३/८/९) इत्येवञ्जातीयका॥३०॥

विकरणत्वान्नेति चेत् तदुक्तम्॥३१॥

स्यादेतत्–विकरणां परां देवतां शास्ति शास्त्रम्–"अचक्षुष्कमश्रोत्रमवागमनाः" (बृ० ३/८/८) इत्येवञ्जातीयकम्। कथं सा सर्वशक्तियुक्ताऽपि सती कार्याय प्रभवेत्? देवादयो हि चेतनाः सर्वशक्तियुक्ता अपि सन्त आध्यात्मिककार्यकरणसंपन्ना एव तस्मै तस्मै कार्याय प्रभवन्तो विज्ञायन्ते॥

कथं च "नेति" नेति (बृ० ३/९/२६) इति प्रतिषिद्धसर्वविशेषायाः देवतायाः सर्वशक्तियोगः संभवेदिति चेत्, यदत्र वक्तव्यम्, तत्पुरस्तादेवोक्तम्–श्रुत्यवगाह्यमेवेदमतिगम्भीरं ब्रह्म, न तर्कावगाह्यम्। नच यथैकस्य सामर्थ्यं दृष्टम्, तथाऽन्यस्यापि सामर्थ्येन भवितव्यमिति नियमोऽस्ति-इति। प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः संभवतीत्येदप्यविद्याकल्पित-रूपभेदोपन्यासेनोक्तमेय। तथा च शास्त्रम्–"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः", (श्वे० ३/१९) इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति॥३१॥ इति दशमं सर्वोपेताधिकरणम्॥

इति शाङ्करभाष्यम् सर्वोपेताधिकरणम् समाप्तम्

वार्तिकम्

अथ–ब्रह्मण: सर्वशक्तित्वे किं प्रामाणम्, यत: सर्वशक्तियोगात् सर्वकर्तृत्वं स्यादिति? तत्राह– *सर्वोपेता च तद्दर्शनात्*।।३०।। सूत्राक्षरव्याख्यानं भाष्ये। हेतुं व्याचष्टे– *तथा हि दर्शयति श्रुति: सर्वशक्तियोगं परस्या देवताया इति*।। शक्यप्रदर्शनद्वारेति शेष:।।३०।।

विकरणत्वान्नेति चेत् तदुक्तम्।।३१।। अस्तु नामैवं ब्रह्मण: सर्वशक्तियोग: ; तथापि न तस्य कार्यकर्तृत्वमुपपद्यते। कुत:? विकरणत्वात्। विकरणा हि परा देवता श्रूयते; ''अचक्षुष्कमश्रोत्रमवागमन:'' इत्यादिश्रुते:। ननु–देवादिवद् विकरणमपि ब्रह्म सर्वशक्तियोगात् करिष्यतीत्युक्तम्, मैवम्; वैषम्यात्। न हि देवादय: शक्तियोगमात्रेण सर्वथा करणहीना एव सन्त: स्वकार्यं कुर्वन्ति; तेषां बाह्यकरणहीनत्वेऽप्याध्यात्मिककरणसम्पन्नत्वात्, ब्रह्मणस्तु बाह्यकरणवद् आध्यात्मिककरणस्याप्यभावादिति चेत् भवान् मन्यते, तत्रोत्तरं पुरस्तादेवोक्तम्– ''तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्ग:'' इत्यत्र। न ह्यतिगभीरं जगत्कारणं श्रुतिमात्रावगाह्यं तर्कावगाह्यं भवति। न च यथैकस्य सामर्थ्यं दृष्टम्, तथैवान्यस्यापि सामर्थ्यं कल्पनीयमिति नियमोऽस्ति; सामर्थ्यवैचित्र्यस्यापि दर्शनात्, प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणो मायोपाधिवशात् सर्वशक्तियोग इत्यप्युक्तमधस्तात्। एतेन–अकरणस्य सर्वशक्तियोग एव न सम्भवतीति–अपास्तम्; ''अपाणिपादो जवनो ग्रहीते'' ति श्रुतेरकरणस्यापि ब्रह्मण: सर्वसामर्थ्यदर्शनात्।।३२।। इति दशमं सर्वोपेताधिकरणम्।।

इति वार्तिकम् सर्वोपेताधिकरणम् समाप्तम्

प्रदीपः

सर्वोपेता च तद्दर्शनात्।।३०।। अनेन निर्विशेषस्यापि ब्रह्मणो विचित्रशक्तियोगोऽकरणस्यापि सम्भवतीति प्रतिपाद्यते। इदं च सर्वेषु भास्करादिमतेषु बहुधा पूर्वं प्रतिपादितमिति पुनरुक्तं भवति। अद्वैतमते तु निर्विशेषस्यापि कल्पितं सर्वशक्तित्वमादायैव जगत्कारणत्वादिकमिति निरूपयितुमिदमधिकरणमाक्षेपपरिहारमुखेनापेक्ष्यते।।३०।।

विकरणत्वान्नेति चेत् तदुक्तम्।।३१।। तत्=विकरणत्वेऽपि सर्वज्ञत्वादिकम्। उक्तम्="श्रुतेस्तु शब्दमूलत्वादि" त्यत्रेत्यर्थः।।३१।। इति दशंम सर्वोपेताधिकरणम्।।

इति प्रदीपः सर्वोपेताधिकरणम् समाप्तम्

भामती

विचित्रशक्तित्वमुक्तं ब्रह्मणस्तत्र श्रुत्युपन्यासपरं सूत्रम्-"सर्वोपेता च तद्दर्शनात्"।।३०।।

एतदाक्षेपसमाधानपरं सूत्रम्-"विकरणत्वान्नेति चेत्तदुक्तम्"।

कुलालादिभ्यस्तावद् बाह्यकरणापेक्षेभ्यो देवादीनां बाह्यानपेक्षाणामान्तरकरणापेक्षसृष्टीनां प्रमाणेन दृष्टो यथा विशेषो नापह्नोतुं शक्यः। यथा तु जाग्रत्सृष्टेर्बाह्यकरणापेक्षायास्तदनपेक्षान्तरमरणमात्रसाध्या दृष्टा स्वप्ने रथादिसृष्टिरशक्यापह्नोतुमेवं सर्वशक्तेः परस्या देवताया आन्तरकरणानपेक्षाया जगत्सर्जनं श्रूयमाणं न सामान्यतोदृष्टमात्रेणापह्नवमर्हतीति।।३१।।

इति भामती सर्वोपेताधिकरणम् समाप्तम्

श्री कण्ठभाष्य

सर्वशक्तिमत्त्वेन सर्वोपपत्तिमाह-

।।सू।। **सर्वोपेता च तद्दर्शनात्**।।३०।।

'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्।।' इत्यादिदर्शनात् सर्वाऽपि शक्तिर्ब्रह्माश्रितेति विज्ञायते। अतः सर्वशक्तिमतः तस्य किं न संभवति।।

।।सू।। **विकरणत्वान्नेति चेत्तदुक्तम्**।।३१।।

'न तस्य कार्यं करणं च विद्यते' इति ब्रह्मणो विकरणत्वमुच्यते ततोऽस्य न कारणत्वमिति चेत-न, तस्योत्तरं 'शब्दमूलत्वा' दिति पूर्वमुक्तमेव। विचित्रानन्तशक्तिशबलमायापरमशक्तिविशिष्टः परमेश्वरः स्वशक्तिशकलेन प्रपञ्चाकारः स्वतः प्रपञ्चातीतश्च भवतीत्यत्र 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्।।' इति श्रुतिरेव भगवती प्रमाणम्। अत्र विषये पुराणं च–

'विश्वोत्तरोत्तरविचित्रमनोरथस्य यस्यैकशक्तिशकले सकलः समाप्तः। अध्वानमध्वपतिमध्वविदो वदन्ति तस्मै नमः सकललोकविलक्षणाय।।' इति। एवं सकलदोषकलङ्करहितशब्दप्रमाणैकसिद्धसर्वशक्तिसंपद्विलासे परमेश्वरे शिवे परब्रह्मणि सम्भावनाऽसम्भावनाविचारः सर्वोऽपि निरवकाश एव।।

इति कृत्स्नप्रसक्तयधिकरणम्।।९।।

इति श्री कण्ठभाष्य सर्वोपेताधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

निरवयवे इति। न च प्रधानस्य सत्वरजस्तमांस्येवावयवास्संतीति वाच्यम्। प्रत्येकमपि सत्वादीनां सांख्यैरुपादानतयाङ्गीकृतत्वात्। **अचित्सजातीये इति।** मृत्पिण्डादिजडदृष्टांतेन कल्प्ये तत्सजातीय एवं तत्साधर्म्यापादनमवकाशं लभत इति भावः। 'प्रधानादावि' त्यादिशब्देन परमाणूनां ग्रहणम्। तार्किकैर्हि परमाणवः निष्प्रदेशाः संयोगप्रदेशवर्त्तिनश्चाभ्युपगम्यंते। ततश्च परमाण्वोस्संयोगस्य कृत्स्नपरमाणुत्वव्यापित्वं वा निष्प्रदेशयोस्तयोः प्रदेशवत्त्वं वा तयोस्संयोगाभावेऽपि व्द्यणुकजननं वा दृष्टविरुद्धं तैरभ्युपगंतव्यमापद्यते। न हि शास्त्रप्रमाणके ब्रह्मणि शुष्कतर्काणां शास्त्रविरोधेनेव शुष्कतर्कप्रमाणके प्रधानादौ केनचिदुपायेन तेषां कुतर्कत्वमुपपादयितुं शक्यम्। प्रधानादिकल्पकतर्काणां तत्प्रतिक्षेपकतर्काणां च दृष्टसाधर्म्यमूलत्वस्याप्रयोजकत्वस्य च तुल्यत्वात् प्रत्युत तर्कप्रतिक्षेपकतर्काणामेव प्रयोजकत्वाच्चेति भावः। उत्तरसूत्रमवतारयति-**सर्वशक्तिमत्त्वेनेति।** श्रुतिबलेन प्राक्परिणामित्वेऽपि परिपूर्णत्वमुपपादितमिदानीं श्रुत्यवगतसर्वशक्तिमत्त्वेन तदुपपद्यत इति भावः॥सू॥ सर्वोपेता च तद्दर्शनात्॥३०॥ अतः **सर्वशक्तिमत इति।** अल्पशक्तिमतामपि हि प्रपञ्चान्तर्गतचिदचिद्वस्तूनामतर्कणीया बहुविधवैचित्री दृश्यते, किमुत सर्वशक्तिमत इति भावः। शक्तिमतामपि चेतनानां करणकलेबरवत्त्वएव शक्त्युन्मेषो दृष्टः। अतस्तद्रहितस्य सदपि सर्वशक्तिमत्त्वमध्ययनादिरहितस्य धीशक्तिमत्त्वमिवाप्रयोजकमित्याशङ्कानिराकरणार्थं सूत्रम्-**विकरणत्वान्नेति चेत्तदुक्तम्**॥३१॥ करणग्रहणं कलेबरस्याप्युपलक्षणम्। तदुक्तं तस्य चोद्यस्य 'श्रुतेस्त्वि'ति सूत्रेणोत्तरमुक्तमित्यर्थः। कल्प्येश्वरवाद एवायं दोषो भवेत् न तु श्रौतेश्वरवाद इति भावः। **स्वशक्तिशकलेनेति।** शक्तयवस्थारूपस्य पुरुषस्य शकलशब्देन ग्रहणं पुरुषावस्थापरिणामेऽपि शक्तेरवैकल्यद्योतनार्थम्। **विश्वोत्तरेति।** मनोरथः सङ्कल्पः। सकलः पड्विधोऽप्यध्वा। समाप्तः विश्रांतः। **अध्वविदः** वैदिकं सन्मार्गं जानानाः त्रयीविद्याविदः। **वदन्ति** 'अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीये' त्यादिष्वामनंति। अधिकरणार्थमुपसंहरति-**एवमिति।** इति कृत्स्नप्रसक्तयधिकरणम्॥९॥

इति शिवार्कमणिदीपिका सर्वोपेताधिकरणम् समाप्तम्

नप्रयोजनवत्त्वाधिकरणम्।

शाङ्करभाष्यम्

न प्रयोजनवत्त्वात्॥३२॥

अन्यथा पुनश्चेतनकर्तृत्वं जगत आक्षिपति न खलु चेतनः परमात्मेदं जगद्बिम्बं विरचयितुमर्हति। कुतः? प्रयोजनवत्त्वात्प्रवृत्तीनाम्। चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्तमानः, न मन्दोपक्रमामपि तावत्प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः, किमुत गुरुतरसंरम्भाम्। भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः—"न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति" (बृ० २/४/५) इति। गुरुतरसंरम्भा चेयं प्रवृत्तिः, यदुञ्चावचप्रपञ्चं जगद्बिम्बं विरचयितव्यम्। यदीयमपि प्रवृत्तिश्चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत, परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत। प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात्। अथ चेतनोऽपि सन्नुन्मत्तो बुद्ध्यपराधादन्तरेणैवात्मप्रयोजनं प्रवर्तमानो दृष्ट, तथा परमात्माऽपि प्रवर्तिष्यत इत्युच्येत, तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत। तस्मादश्लिष्टा चेतनात् सृष्टिः—इति॥३२॥

*लोकवत्तु लीलाकैवल्यम्॥३३॥

तुशब्देनाक्षेपं परिहरति। यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्त किञ्चित्प्रयोजनमनभिसन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति, यथा चोच्छ्वासप्रश्वासादयोऽनभिसन्धाय बाह्यं किञ्चित्प्रयोजनं स्वभावादेव सम्भवन्ति, एवमीश्वरस्याप्यनपेक्ष्य किञ्चित्प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति। न हीश्वरस्य प्रयोजनान्तरं निरूप्यमाणं न्यायतः श्रुतितो वा सम्भवति। न च स्वभावः पर्यनुयोक्तुं शक्यते॥

यद्यप्यस्माकमियं जगद्बिम्बविरचना गुरुतरसंरम्भेवाऽऽभाति; तथापि परमेश्वरस्य लीलैव केवलेयम्; अपरिमितशक्तित्वात्। यदि नाम लोके लीलास्वपि किञ्चित्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत, तथापि नैवात्र किञ्चित्प्रयोजनमुत्प्रेक्षितुं शक्यते; आप्तकामश्रुतेः। नाप्यप्रवृत्तिरुन्मत्तप्रवृत्तिर्वा; सृष्टिश्रुतेः, सर्वज्ञश्रुतेश्च। न चेयं परमार्थविषया सृष्टिश्रुतिः ; अविद्याकल्पितनामरूपव्यवहार-गोचरत्वात्, ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि नैव विस्मर्तव्यम्॥३३॥ इत्येकादशं नप्रयोजनवत्त्वाधिकरणम्॥

इति शाङ्करभाष्यम् नप्रयोजनवत्त्वाधिकरणम् समाप्तम्

वार्तिकम्

न प्रयोजनवत्त्वात्।।३२।। सम्प्रति ब्रह्म, विना प्रयोजनं न जगत्सृजति, प्रेक्षापूर्वकारित्वात्, सम्मतवद् इति न्यायेन नित्यतृप्ताद् ब्रह्मणो जगत्सर्गवादिसमन्वयो विरुध्यते, न वेति विचार्यते। तत्र विरुध्यते तावदित्याह। कथं विरुध्यते? उच्यते; ब्रह्मण: सर्वशक्तित्वेऽपि न जगत्कर्तृत्वमुपपद्यते। कुत:? नित्यतृप्तत्वेन प्रयोजनानाकाङ्क्षणात्, ''आप्तकाम:'' ''आत्मकाम:'' इति श्रुते:, प्रेक्षावत्प्रवृत्तेस्तु प्रयोजनवत्त्वनियमात्। न हि प्रेक्षावद्भिस्तत्पूर्वकमल्पमपि कार्यं निष्प्रयोजनमारभ्यमाणं दृष्टम्। जंगच्च गुरुतरारम्भं कथं सर्वज्ञेन ब्रह्मणा निष्प्रयोजनमारभ्यताम्? इति। ननु–स्वप्रयोजनाभावेऽपि स्वप्रतिबिम्बभूतानां जीवानां प्रयोजनमारप्स्यत इति–चेत्, मैवम्; ''न वा अरे पत्यु: कामाय पति: प्रियो भवत्यात्मनस्तु कामाय पति: प्रियो भवती'' त्यादिश्रुते: परप्रयोजनस्याप्यात्मप्रयोजनप्रयुक्तत्वात्। तस्मान्न युक्ता सर्वज्ञाद् जगत: सृष्टिरिति।।३२।।

एवं प्राप्तेऽभिधीयते– *लोकवत्तु लीलाकैवल्यम्*।।३३।। तु–शब्देन पक्षो विपरिवर्तते। किं या या प्रेक्षावतां प्रवृत्ति:, सा सर्वाऽपि प्रयोजनेन व्याप्तेत्युच्यते, किं वा गुरुतरा या प्रवृत्ति:, सा सर्वेति। तत्र नाद्य: ; लोके प्रयोजनमनुद्दिश्यापि प्रेक्षावतां स्वभावादेव श्वासप्रश्वासहस्तपादाद्यङ्गचालनादि-लक्षणप्रवृत्तिदर्शनात्, तद्वद् ब्रह्मणोऽपि कैवल्यशक्ते:=केवलस्यात्मनो भाव: कैवल्यम्, स्वभाव इति यावत् स च मायाशक्तिरेव, तत एव जगत्कार्यं प्रयोजनशून्यं भविष्यतीत्यविरोध:। यद्वा–केवलमिति प्रयोजनशून्यं ब्रह्मोच्यते, तस्य भावो जगत् कार्यं कैवल्यम्, लोकवत् स्वभावाद् भविष्यतीत्यर्थ:। अथ द्वितीयपक्ष:, सोऽपि न; यतोऽन्यैर्गुरुतरमिव विभाव्यमानमपि जगत्कार्यं ब्रह्मणो लीलैव भवति; सङ्कल्पमात्रप्रभवत्वेनेषत्करत्वात्। तस्माद् उक्तन्यायस्य व्यभिचाराद् असिद्धेर्वा ब्रह्मण: स्वप्रयोजनाभावेऽपि सर्वशक्तियोगाद् जगत्कर्तृत्वमुपपन्नमिति।।३३।। इत्येकादशं नप्रयोजनवत्त्वाधिकरणम्।।

इति वार्तिकम् नप्रयोजनवत्त्वाधिकरणम् समाप्तम्

प्रदीपः

नप्रयोजनवत्त्वाधिकरणं वैषम्यनैर्घृण्याधिकरणं च ब्रह्मणः कर्तृत्वस्याक्षेपपरिहाराभ्यामुपपादनार्थम्। लीलाकैवल्यम्=लीलामात्रम्। सापि न स्वेच्छाधीना, किन्तु तत्तज्जीवकर्माधीनैवेति तदर्थनिष्कर्षः॥३२॥३३॥३४॥३५॥३६॥

इति प्रदीपः नप्रयोजनवत्त्वाधिकरणम् समाप्तम्

भामती

न तावदुन्मत्तवदस्य मतिविभ्रमाज्जगत्प्रक्रिया, भ्रान्तस्य सर्वज्ञत्वानुपपत्तेः। तस्मात् प्रेक्षावतानेन जगत् कर्तव्यम्। प्रेक्षावतश्च प्रवृत्तिः स्वपरहिताहितप्राप्तिपरिहारप्रयोजना सती नाप्रयोजनाल्पायासापि सम्भवति, किं पुनरपरिमेयानेकविधोच्चावचप्रपञ्चजगद्विभ्रमविरचना महाप्रयासा। अत एव लोलापि परास्ता। अल्पायाससाध्या हि सा न चेयमप्यप्रयोजना, तस्या अपि सुखप्रयोजनवत्त्वात्तादर्थ्येन वा प्रवृत्तौ तदभावे कृतार्थत्वानुपपत्तेः परेषां चोपकार्याणामभावेन तदुपकाराया अपि प्रवृत्तेरयोगात्। तस्मात् प्रेक्षावत्प्रवृत्तिः प्रयोजनवत्तया व्याप्ता तदभावेऽनुपपन्ना ब्रह्मोपादानतां जगतः प्रतिक्षिपतीति प्राप्तम्।।३२।।

एवं प्राप्तेऽभिधीयते—लोकवत्तु लीलाकैवल्यम्।

भवेदेतदेवं यदि प्रेक्षाबत्प्रवृत्तिः प्रयोजनवत्तया व्याप्ता भवेत्ततस्तन्निवृत्तौ निवर्तेत, शिंशपात्वमिव वृक्षतानिवृत्तौ, न त्वेतदस्ति प्रेक्षावतामननुसंहितप्रयोजनानामपि यादृच्छिकीषु क्रियासु प्रवृत्तिदर्शनात्। अन्यथा 'न कुर्वीत वृथा चेष्टाम्' इति धर्मसूत्रकृतां प्रतिषेधो निर्विषयः प्रसज्येत। न चोन्मत्तान् प्रत्येतत् सूत्रमर्थवत्तेषां तदर्थबोधतदनुष्ठानानुपपत्तेः। अपि चादृष्टहेतुकौत्पत्तिकी श्वासप्रश्वासलक्षणा प्रेक्षावतां क्रिया प्रयोजनानुसन्धानमन्तरेण दृष्टा न चास्यां चेतनस्यापि चैतन्यमनुपयोगि, सम्प्रसादेऽपि भावादिति युक्तं प्राज्ञस्यापि चैतन्याप्रच्युतेरन्यथा मृतशरीरेऽपि श्वासप्रश्वासप्रवृत्तिप्रसङ्गात्। यथा च स्वार्थपरार्थसम्पदासादितसमस्तकामानां कृतकृत्यतयाऽनाकुलमनसामकामानामेव लीलामात्रात्सत्यप्यनुनिष्पादिनि प्रयोजने नैव तदुद्देशेन प्रवृत्तिरेवं ब्रह्मणोऽपि जगत्सर्जने प्रवृत्तिर्नानुपपन्ना। दृष्टञ्च यदल्पबलवीर्यबुद्धीनामशक्यमतिदुष्करं वा तदन्येषामनल्पबलवीर्यबुद्धीनां सुशकमीषत्करं वा न हि वानरैर्मारुतिप्रभृतिभिर्नगैर्न बद्धो नीरनिधिरगाधो महासत्त्वानाम्। न चैष पार्थेन शिलीमुखैर्न बद्धो न चायं न पीतः संक्षिप्य चुलुकेन हेलयेव कलशयोनिना महामुनिना। न चाद्यापि न दृश्यन्ते लीलामात्रविनिर्मितानि महाप्रासादप्रमदवनानि श्रीमन्नृगनरेन्द्राणामन्येषां मनसापि दुष्कराणि नरेश्वराणाम्। तस्मादुपपन्नं यदृच्छया वा स्वभावाद्वा लीलया वा जगत्सर्जनं भगवतो महेश्वरस्येति।

अपि च नेयं पारमार्थिकी सृष्टिर्येनानुयुज्येत प्रवोजनम्, अपि त्वनाद्यविद्यानिबन्धना, अविद्या च स्वभावत एव कार्योन्मुखी न प्रयोजनमपेक्षते, नहि द्विचन्द्रालातचक्रगन्धर्वनगरादिविभ्रमाः समुद्दिष्टप्रयोजना भवन्ति। न च तत्कार्या विस्मयभयकम्पादयः स्वोत्पत्तौ प्रयोजनमपेक्षन्ते। सा च चैतन्यविच्छुरिता जगदुत्पादहेतुरिति चेतनो जगद्योनिराख्यायत इत्याह *न चेयं परमार्थविषया इति*। अपि च न ब्रह्म जगत्कारणमपि तत्तया विवक्षन्त्यागमा अपि तु जगति ब्रह्मात्मभावं, तथा च सृष्टेरविवक्षायां तदाश्रयो दोषो निर्विषय एवेत्याशयेनाह *ब्रह्मात्मभाव इति*।।३३।।

इति भामती नप्रयोजनवत्त्वाधिकरणम् समाप्तम्

अथ लीलाकैवल्याधिकरणम्।।१०।।

पुनरन्यथाऽऽक्षिप्य समाधत्ते–

।।सू।। **न प्रयोजनवत्त्वात्**।।३२।।

शास्त्रावगतसर्वशक्तेः ब्रह्मणः सर्वेषु कार्येषु कारणसामर्थ्यमस्तीति निर्णीतम्। तथाऽपि सर्वप्रवृत्तेः प्रयोजनवत्त्वात् अवाप्तसकलकामस्य परमेश्वरस्य जगत्सृष्टयापिव्यापारः सम्भवति न वेति सन्दिह्यते।।

अत्र कथं सम्भवति? 'आनन्दो ब्रह्म' 'विभुं चिदानन्दमरूपमद्भुतम्'। 'उमासहायम्' इत्यादिभिः निरतिशयानन्दस्वरूपो नित्यतृप्तो हि शिवः श्रूयते। कथमसौ सृष्ट्यादिव्यापारेषु प्रयोजननिरपेक्षः प्रवर्तेत। यदि सप्रयोजनास्य प्रवृत्तिः नित्यतृप्तताहानिः स्यात्। अन्यथा जडादिवदनुचितकारिता स्यात्।।

इति प्राप्ते ब्रूमः–

।।सू।। **लोकवत्तु लीलाकैवल्यम्**।।३३।।

यदुक्तं नित्यतृप्तस्य प्रयोजनाभावादप्रयोजना जगत्सृष्ट्यादिप्रवृत्तिर्न सम्भवतीति। तन्न। सम्भवत्येव निष्प्रयोजनाऽपि प्रवृत्तिः केवललीलामात्रेण परमेश्वरस्य। यथा लोके प्रयोजनमन्तरेणापि केवलं लीलया कन्दुकताडनादिषु प्रवृत्तिः, तथा परमेश्वरस्य अवाप्तसकलकामस्यापि लीलया सृष्ट्यादिप्रवृत्तेरविरोध एव।।

इति लीलाकैवल्याधिकरणम्।।१०।।

इति श्री कण्ठभाष्य नप्रयोजनवत्त्वाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ लीलाकैवल्याधिकरणम्॥१०॥

ननूत्तराधिकरणेनावाप्तसमस्तकामस्य प्रेक्षावतः परमेश्वरस्य निष्प्रयोजने जगत्सृष्टयादिव्यापारे प्रवृत्तिर्नोपपद्यत इत्याक्षिप्य समाधीयते नायमाक्षेपोऽवकाशं लभते परमेश्वरस्यावाप्तसमस्तकामत्ववत् सर्वज्ञत्ववत् जगत्सृष्टयादिप्रवृत्तेरपि श्रुतिसिद्धतया 'श्रुतेस्तु शब्दमूलत्वा'दिति सूत्रेण तदर्थस्मरणार्थेन पूर्वसूत्रेण च दत्तोत्तरतवादित्याशंक्यावतारयति-**पुनरन्यथेति।** अयमाशयः। अलौकिकेषु वेदैकगम्येष्वर्थेषु तद्विरोधिशुष्कतर्को न प्रवर्तत इति वैदिकमर्यादायामित्थमाक्षेपानवकाशेऽपि तदश्रद्दधानानां शुष्कतार्किकाणामाक्षेपाकांक्षा न तावता शाम्यति। अत एव 'श्रुतेस्त्वि'ति सूत्रे भाष्यदर्शिता जातिप्रतिबन्द्यऽपि शुष्कतार्किकशङ्काव्यावृत्त्यर्थैव न तु शब्देन विवक्षिता। पूर्वसूत्रे 'तदुक्त' मित्यनेन परमेश्वरस्य स्थूलसूक्ष्मप्रपञ्चरूपशरीरवत्त्वमंतर्याम्यधिकरणादिषूक्तं, ज्ञानकर्मेंद्रियवत्त्वं तु नित्यसिद्धसार्वज्ञ्यस्य देवान्सङ्कल्पमात्रेण स्त्रष्टुं शक्तस्य तस्य नापेक्षितमिति शास्त्रयोनित्वाधिकरणादिषूक्तप्रायमित्येदपि विवक्षितम्। इह तु तदाक्षेपाकांक्षाशांतिकारणं प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्त्वनियमस्य व्यभिचारदर्शनं प्राङ्न कृतमतस्तदर्थमधिकरणांतरारंभ इति।।सू।। **न प्रयोजनवत्त्वात्**।।३२।। संगतिपूर्वकं संशयं दर्शयति-**शास्त्रावगतेति।** सर्वशक्तिमत्त्वहेतुना कृत्स्नप्रसक्तयादिदोषनिराकरणेऽपि प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्त्वनियमनिराकरणं न संभवतीति प्रत्युदाहरणलक्षणा सगंतिः निरुक्तनियमसद्भावासद्भावाभ्यां संशयश्चेत्यभिप्रायः। परमेश्वरस्य स्त्रष्टृत्वं न संभवति प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्त्वनियमादिति सूत्रोक्तपूर्वपक्षं दर्शयति-**कथमिति। अन्यथेति।** निष्प्रयोजना चेदित्यर्थः। न च प्रेक्षावतामपि निष्प्रयोजना कंदुकक्रीडादिप्रवृत्तिर्दृष्टेति शंकनीयम्। ततोऽपि क्रीडापराणां तात्कालिकानंदादिप्रयोजनस्यानुभवसिद्धत्वात्। न च परमेश्वरस्य जगत्सृष्टावपि तादृशं प्रयोजनं कल्प्यम्। अवाप्तसमस्तकामत्वश्रवणविरोधात्। ननु न क्रीडानंदार्था प्रवृत्तिराप्तकामत्वविरोधिनी, अवाप्तसमस्तकामानामपि राज्ञां कन्दुकक्रीडादिप्रवृत्तिदर्शनादिति चेन्न। अवाप्तभोगांतरप्रयुक्तसकलानंदानामपि राज्ञामनवाप्तक्रीडानंदनामेव तत्र प्रवृत्तेः। न चैवं परमेश्वरे वक्तुं शक्यं, तस्य सर्वात्मनावाप्तसर्वकामत्वादिति भावः।।सू।। **लोकवत्तु लीलाकैवल्यम्**।।३३।।

स्वार्थिकतद्धितांतः कैवल्यशब्दः। 'संभोगप्राप्तिरिति चेन्न वैशेष्यात्'। (ब्र० १-२-८) इत्यादौ वैशेष्यशब्दवत्। तथा च जगत्सृष्टिः केवलं लीलेत्यन्वयः। सुखितस्य सुखानुभवप्रयुक्तश्चेष्टादिर्लीला। सा द्विविधा तात्कालिकानन्दाद्यर्था प्रयोजनलीला तदप्यनुद्दिश्य प्रवृत्ता केवललीला च। न द्वितीयायामसम्प्रतिपत्तिः। दुःखोद्रेके रोदनवत्सुखोद्रेके हासगानादेः प्रयोजनरहितस्य सर्वानुभवसिद्धत्वात्। अत एव हसितरुदितादिषु कारणमेव पृच्छंति न तु प्रयोजनम्। एवं लोके दृष्टत्वात्तद्वदेव पारमेश्वरी जगत्सृष्टिर्नित्यनिरतिशयानंदानुभवप्रयुक्ता केवललीलेति सूत्रार्थः। अत एवात्र लीलाशब्दः क्रियावाची न तु विलासरूपक्रियाविशेषवाची। 'लीला क्रिया विलासश्चे' त्युभयत्राऽपि तस्य शक्तिस्मरणात्। कैवल्यशब्दः पूर्ववत्प्रयोजनोद्देश्यव्यवच्छेदेन स्वाभाविकत्वलाभार्थः। तथा च यथा लोके प्राणिनां निमेषादिव्यापाराः स्वाभाविकाः यथा च केषांचिद्गानव्याख्यानादिषु शिरोऽङ्गुलिचालनादयः स्वाभाविकाः न तु प्रयोजनार्थाः, तथैव परमेश्वरस्य सृष्टयादिव्यापारा अपि स्वाभाविका एव। 'स्वाभाविकी ज्ञानबलक्रियाचे' ति ज्ञानबलयोरिव सृष्टयादिक्रियाया अपि स्वाभाविकत्वश्रवणात्। 'क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमिति चापरे। देवस्यैष स्वभावोऽयमाप्तकामस्त का स्पृहे' ति श्रवणाच्चेति तात्पर्यम्। 'स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः। देवस्यैवैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्र' मिति श्वेताश्वतरमंत्रे संसाररूपः प्रपञ्चः स्वकीयादेव स्वभावात्प्रवर्तते इति पक्षांतरस्य निरासः न तु पारमेश्वरात्स्वभावादिति पक्षस्येति न विरोधः। 'क्रीडार्थं सृष्टि' रिति माण्डूक्यश्लोके क्रीडार्थमित्यनेन तात्कालिकानन्दप्रयोजनत्वं निरसितुमनूदितं न तु हासगानादिवल्लीलारूपत्वमिति न तत्राऽपि विरोधः। यद्वा। लीलाशब्दोऽत्रानायासकर्मपरः। लीलामात्रमेतस्य भारत्रयधान्यवहनमिति तत्राऽपि प्रयोगदर्शनात्। कैवल्यशब्दः कियतोऽप्यायासस्यानपेक्षाद्योतनार्थः। तथा च यथांगुलिचालनादयः अनायाससाध्याः क्रिया न प्रयोजनापेक्षाः। अत एव तत्र न प्रयोजनप्रश्नः। तत्प्रश्नेऽपि तूष्णीमित्येवोत्तरम्। अत एव च 'वृथा चेष्टां न कुर्वीते' ति निषेधस्यार्थवत्वम्। एवं परमेश्वरस्याऽपि अनायाससाध्याः निस्वासितादिकल्पतया श्रुताः सृष्टयादिक्रिया न प्रयोजनापेक्षा इति तात्पर्यम्। एवमर्थं मनसि निधाय सिद्धांतमाह-**यदुक्तमित्यादिना**। 'लीलामात्रेणे' त्युपलक्षणतृतीया। लीलामात्ररूपेत्यर्थः। लीलाशब्दः प्रदर्शितेऽर्थत्रयेऽपि योजनीयः। 'कदुंकताडनादिषु' इत्यत्रादिशब्दश्चानन्दानुभवप्रयुक्तानां स्वाभाविकानामनायाससाध्यानाञ्च त्रिविधानामप्यनुद्दिष्ट-प्रयोजनानां व्यापाराणां संग्राहको द्रष्टव्यः। 'लीलामात्रेणे' तिशब्दः उक्तव्यापारत्रयहेत्वा-नंदानुभवादिपरतया हेतुतृतीयांतो वा योजनीयः॥

इति लीलाकैवल्याधिकरणम्॥१०॥

इति शिवार्कमणिदीपिका नप्रयोजनवत्त्वाधिकरणम् समाप्तम्

वैषम्यनैर्घृण्याधिकरणम्।

शाङ्करभाष्यम्

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति॥३४॥

पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणानिखननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणाय। नेश्वरो जगतः कारणमुपपद्यते। कुतः? वैषम्यनैर्घृण्यप्रसङ्गात्–कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः पश्वादीन्, कांश्चिन्मध्यमभोगभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्ते। श्रुतिस्मृत्यवधारित-स्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत। तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्सर्वप्रजोपसंहाराच्च प्रसज्येत। तस्माद्वैषम्यनैर्घृण्यप्रसङ्गान्नेश्वरः कारणम् इति॥ एवं प्राप्ते ब्रूमः– वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते। कस्मात्? सापेक्षत्वात्। यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते, स्यातामेतौ दोषौ वैषम्यम्, नैर्घृण्यं च, न तु निरपेक्षस्य निर्मातृत्वमस्ति। सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते॥ किमपेक्षत इति चेत्, धर्माधर्मावपेक्षत इति वदामः। अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिः, इति नायमीश्वरस्यापराधः। ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः। यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति, व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति; एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति, देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति। एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति॥

कथं पुनरावगम्यते सापेक्ष ईश्वरो नीचमध्यमोत्तमं संसारं निर्मिमीत इति? तथा हि दर्शयति श्रुतिः–'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते (कौ० ब्रा० ३/८) इति, 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन' (बृ० ३/२/१३) इति च। स्मृतिरपि प्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वं निग्रहीतृत्वं च दर्शयति–'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' (भ० गी० ४/११) इत्येवञ्जातीयका॥३४॥

न कर्माविभागादिति चेन्नानादित्वात्।।३५।।

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" (छा० ६/२/१) इति प्राक्सृष्टेरविभागावधारणान्नास्ति कर्म, यदपेक्ष्य विषमा सृष्टिः स्यात्। सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म, कर्मापेक्षश्च शरीरादिविभाग इतीतरेतराश्रयत्वं प्रसज्येत। अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां नाम, प्राग्विभागाद्वैचित्र्यनिमित्तस्य कर्मणोऽभावात्तु नैवाद्या सृष्टिः प्राप्नोतीति चेत्, नैष दोषः ; अनादित्वात्संसारस्य। भवेदेष दोषो यद्यादिमान्संसारः स्यात्। अनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते।।३५।। कथं पुनरवगम्यतेऽनादिरेष संसार इति? अत उत्तरं पठति-उपपद्यते चाप्युपलभ्यते च।।३६।। उपपद्यते च संसारस्यानादित्वम्। आदिमत्त्वे हि संसारस्याकस्मादुद्भूतेर्मुक्तानामपि पुनः संसारोद्भूतिप्रसङ्गः, अकृताभ्यागमप्रसङ्गश्च; सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्युक्तम्। न चाविद्या केवला वैषम्यस्य कारणम्; एकरूपत्वात्। रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात।।

न च कर्मान्तरेण शरीरं संभवति, न च शरीरमन्तरेण कर्म संभवति, इतीतरेतराश्रयत्वप्रसङ्गः। अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद्दोषो भवति।।

उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतौ तावत् "अनेन जीवेनात्मना" (छा० ६/३/२) इति सर्गप्रमुखे शारीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति। आदिमत्त्वे तु प्रागनवधारितप्राणः सन् कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्येत? न च धारयिष्यतीत्यतोऽभिलप्येत; अनागताद्धि संबन्धादतीतः संबन्धो बलवान् भवति; अभिनिष्पन्नत्वात्। "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" (ऋ० सं० १०/१९०/३) इति च मन्त्रवर्णः पूर्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं संसारस्योपलभ्यते-"नरूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा" (गी० १५/३) इति। पुराणे चातीतानागतानां च कल्पानां न परिमाणमस्तीति स्थापितम्।।३६।। इति द्वादशं वैषम्यनैर्घृण्याधिकरणम्।।

इति शाङ्करभाष्यम् वैषम्यनैर्घृण्याधिकरणम् समाप्तम्

वार्तिकम्

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति।।३४।। यो विषमकारी, स सर्वोऽपि सावद्यो लोके दृष्टः, ब्रह्म च स्वर्गनरकादिसम्पातलक्षणं विषमं सृजतीति न्यायेन समन्वयस्य विरोधोऽस्ति, न वेत्यत्र विचार्यते। पूर्वाधिकरणेनास्याक्षेपिकी सङ्गतिः। पूर्वत्र ब्रह्मणो लीलैव जगत्सृष्टिरित्युक्तम्। साऽपि न सम्भवति। यदि सा जीवकृतधर्माधर्मावपेक्ष्य, तदा सापेक्षत्वाद् अनीश्वरत्वप्रसङ्गः, अथानपेक्ष्य, तथाऽपि विषमकारित्वेन निर्दयालुत्वेन च रागद्वेषादिमत्त्वात् सावद्यत्वप्रसङ्ग इत्याक्षेपः। सङ्गतिप्रदर्शकेन ग्रन्थेनैव पूर्वपक्षोऽभिहितः।।

तत्र समाधिः सूत्रेणाभिधीयते। न परमेश्वरस्य वैषम्यनैर्घृण्ये प्रसज्येते। कुतः? *सापेक्षत्वात्*।। जीवकृतधर्माधर्मावपेक्ष्यैव हि परमेश्वरः स्वर्गनरकादिसम्पातलक्षणां विषमसृष्टिं करोति। किमतः, यद्येवम्? एतदतो भवति–यदि हि परमेश्वरः स्वयं केवलो लौकिकपुरुषवद् विषमां सृष्टिं रचयेत्, तदा तस्योक्तदोषप्रसङ्गो भवेदपि। यदा तु स्वयं सर्वत्र पर्जन्यवत् साधारणं कारणम्, तद्गतधर्माधर्मविशेषैस्तु तद्वैषम्यम्, तदा न कोऽपि दोषः। यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणम्, व्रीहियवादिवैषम्ये तद्गतरसादिवैषम्ये च तदबीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति, न पर्जन्यस्तद्वैषम्यकारीत्युच्यते, तद्वत्। कुत एतदवगम्यते–नेश्वरकृतं देवतिर्यङ्मनुष्यादिसृष्टिवैषम्यम्, किन्तु तद्गतधर्माधर्मविशेषकृतम्–इति? हि=यस्मात् श्रुतिरेव स्वयं तथा=धर्माधर्मकृतमेव वैषम्यम्, नेश्वरकृतमिति दर्शयति=बोधयतीत्यर्थः। ''एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते'' इति च श्रुतिः, ''पुण्यो वै पुण्येन कर्मणा भवति पापः पापेने'' ति च। ''ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्'' इत्येवञ्जातीयका स्मृतिरपीममर्थं दर्शयति–

दिनकरकरसम्पाते नैव विशेषोऽस्ति कमलकुमुदिनीनाम्।
ता एव तु वैषम्यं गच्छन्ति निजगुणदोषाभ्याम्।।

इति निश्चितोऽर्थः।।३४।।

न कर्माविभागादिति चेन्नानादित्वात्।।३५।। आह—नैवञ्जातीयकश्रुतिस्मृतिभ्यां वैषम्यनैर्घृण्यपरिहारः परमेश्वरस्य भवति। किं तर्हि? वैषम्यनैर्घृण्ये एव ताभ्यां तस्य प्रतिपादिते भवतः। कुतः? प्रदर्शिततदूर्ध्वाधोनिनीषापूर्वकेष्टानिष्टहेतुकर्मकारयितृत्वस्य स्वसेवाऽनुरूप-फलकर्तृत्वस्य च परमेश्वरे ताभ्यां प्रदर्शितत्वात्। उर्ध्वाधोनिनीषयोरपि तत्पूर्वकर्मापेक्षत्वाद् अयमदोष इति चेत्, सत्यम्; एवमप्यादिसर्गे न कर्म; "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि" त्यविभागश्रुतेः, कर्मोत्पत्तेस्तु शरीराद्यधीनत्वात्, शरीरादेश्चाकाशादिमहाभूतसर्गापेक्षत्वात्, अन्यथेतरेतराश्रयापत्तेः— कर्मसिद्धावाकाशादिक्रमेण सर्गसिद्धिः, तत्सिद्धौ च कर्मसिद्धिः—इति चेत्, नैवम्; अनादित्वात्। कर्मसर्गयोरिदम्प्रथमत्वे ह्ययं दोषः स्यात्। न चैवमस्ति। किं तर्हि? पूर्वकर्मापेक्षयाऽयं सर्गो भवति, पूर्वकर्मणश्च तत्पूर्वसर्गापेक्षया, तस्य च तत्पूर्वकर्मापेक्षयेत्यनादिता। न चैवं सति सृष्टे पूर्वमविभागश्रवणविरोधः ; तस्य स्वाप इव व्याकृतनामरूपाभावाभिप्रायत्वात्, "तद्धेदं तर्ह्यव्याकृतमासीत्" इति श्रुत्यन्तरदर्शनात्।।३५।।

अनादित्वमसिद्धमित्याशङ्क्य सूत्रकारस्तदुपपादयति— *उपपद्यते चाप्युपलभ्यते च*।।३६।। सृष्टिकर्मणोर्बीजाङ्कुरन्यायेनानादित्वे सत्येव जगद्वैचित्र्यमुपपद्यते, अन्यथा=अकस्मादेव तद्वैचित्र्येऽकृताभ्यागमकृतप्रणाशौ स्याताम्—अकृते कर्मणि पुण्ये पापे वा तत्फलं भोक्तारमधिगच्छेत्। एवं च सति प्रवृत्तिनिवृत्त्योरभावाद् विधिनिषेधशास्त्रमनर्थकं भवेत्, मुक्तानां पुनरुत्पत्तिप्रसङ्गाद् मोक्षशास्त्रानर्थक्यं च। एतेन—कृतविनाशः—व्याख्यातः ; अकृतस्य फललाभे कृतवैयर्थ्यापत्तेश्च। अनाद्यविद्याया एव विचित्रशक्तित्वाद् अन्तरेणापि कर्म तद्वैचित्र्यहेतुत्वमुपपत्स्यत इति—चेत्, न; तस्या अपि विक्षेपसंस्कारमन्तरेण भ्रान्तिपरिणामादर्शनात्, क्रियाज्ञानयोश्च विक्षेपरूपत्वात्, "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" "धिया धिया जनपते कर्मभिश्च" "तौ ह यदूचतुः कर्म हैव तदूचतुः" इत्यादिश्रुतिविरोधापत्तेश्च। "एकरूपत्वादि" ति भाष्यमावरणशक्तयभि[१]प्रायम्। विक्षेपसंस्काराणामनन्तत्वेनैवानन्तशक्तित्वमविद्यायाः। न हि कार्यसंस्कारान् विहायान्याः शक्तयो नामाविद्यायाः सन्ति; तदतिरिक्तशक्तिकल्पने प्रमाणाभावात्। तदेतदभिप्रेत्याह— *रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकारिणी स्यादिति*।।

मिथ्याज्ञानहेतुकाः खलु रागद्वेषाभिनिवेशलक्षणा दोषाः। त एव च लब्धवृत्तिकत्वेनोदाराः सन्तः पुरुषं क्लिश्यन्तीति क्लेशा इत्युच्यन्ते, अलब्धवृत्तितया च प्रसुप्ताश्च वासना इति। तदुक्तम्—"अविद्या क्षेत्रमितरेषां प्रसुप्ततनुविच्छिन्नोदाराणामि" ति। अविद्या=अत्र विक्षेपशक्तिः

कार्यलक्षणमिथ्याज्ञानापरपर्याया अभिधीयते, नाविद्या=आवरणशक्तिलक्षणा। कुत:? ''अमित्याशुचिदु:खानात्मसु नित्यशुचिसुखात्मख्यातिरविद्ये'' ति तत्रैव तल्लक्षणाभिधानात्। सा चाविद्या क्षेत्रम्=निमित्तम्, इतरेषाम्=अस्मितारागद्वेषाभिनिवेशानाम्, किम्भूतानाम्? प्रसुप्ततनुविच्छिन्नोदाराणाम्। प्रसुप्ता:=वासनारूपा:। ताश्च स्थिता: स्वापप्रलयादौ, तनव: ; ... ... विवेकवैराग्याभ्यां तनूकृतत्वात्, विच्छिन्नपरस्पराभिभवात्, उदारा: ; स्वविषये वृत्तिलाभात्। एतैश्चोक्तलक्षणैर्दोषै: प्रचोदित: पुमांन् धर्माधर्माख्यं कर्म सञ्चिनोति, तन्निबन्धनं तु विश्वस्य जगतो मूलाविद्याया एकरूपाया अपि जन्म; सुषुप्तिप्रलयादौ सत्यामपि तस्यां तदभावे कार्यादर्शनात्। तादृशं च कर्म पूर्वशरीरादिकमपेक्ष्य भवति, तच्च तत्पूर्वककर्मापेक्षया, इत्यनादित्वे सत्येतदुपपद्यते बीजाङ्कुरन्यायेन।।

अपि च उपलभ्यते खलु संसारस्यानादित्वं श्रुतौ स्मृतौ च। श्रुतिस्तावद् मन्त्रब्राह्मणरूपा। ''सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्व:'' इति मन्त्र:। ''अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'' ति ब्राह्मणम्। तेन हि सर्गप्रमुखे शारीरमात्मानं प्राणधारणनिमित्तेन जीवशब्देनाभिलपता पूर्वसर्गसद्भाव: सूच्यते; अन्यथा प्राणधारणनिमित्तेन जीवशब्देनाभिलापानुपपत्ते:। ननु–''पुरोडाशकपालेन तुषानुपवपती'' तिवद् ''गृहस्थ: सदृशीं भार्यामुद्वहेते'' तिवच्च भविष्यताऽपि प्राणधारणनिमित्तेन तद्वयपदेशो न विरुध्यत इति–चेत्, मैवम्; अनागतसम्बन्धाद् अतीतसम्बन्धस्याभिनिष्पन्नत्वेन बलवत्त्वाद् बाधकाभावे–तन्निबन्धनत्वस्यैव युक्ततरत्वात्, पुरोडाशश्रपणकालीनपुरोडाशसम्बन्धस्य, उद्वाहोत्तरकालीनमपि सम्बन्धस्य च तन्निमित्तस्य तुषोपवापाद्युत्तरकालीनत्वात्, अतीतसम्बन्धस्य तत्र बाधात्। स्मृतिश्च ''न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठे'' ति। अस्य=संसारस्येत्यर्थ:। पुराणेषु चातीतानागतकल्पानां नान्तोऽस्तीति स्थापितम्।।३६।। इति द्वादशं वैषम्यनैर्घृण्याधिकरणम्।।

इति वार्तिकम् वैषम्यनैर्घृण्याधिकरणम् समाप्तम्

भामती

अतिरोहितोऽत्र पूर्वः पक्षः, उत्तरस्तूच्यते। उच्चावचमध्यमसुखदुःखभेदवत्प्राणभृत्प्रपञ्चं च सुखदुःखकारणं सुधाविषादि चानेकविधं विरचयतः प्राणभृद्भेदोपात्तपापपुण्यकर्मातिशयसहायस्यात्र भवतः परमेश्वरस्य न वैषम्यनैर्घृण्ये प्रसज्येते। न हि सभ्यः सभायां नियुक्तो युक्तवादिनं युक्तवाद्यसीति चायुक्तवादिनमयुक्तवाद्यसीति ब्रुवाणः सभापतिर्वा युक्तवादिनमनुगृह्णन्नयुक्तवादिनञ्च निगृह्णन्ननुरक्तो द्विष्टो वा भवत्यपि तु मध्यस्थ इति वीतरागद्वेष इति चाख्यायते. तद्वदीश्वरः पुण्यकर्माणमनुगृह्णन्नपुण्यकर्माणञ्च निगृह्णन्मध्यस्थ एव नामध्यस्थः। एवं ह्यसावमध्यस्थः स्याद्यद्यकल्याणकारिणमनुगृह्णीयात्कल्याणकारिणञ्च निगृह्णीयान्न त्वेतदस्ति। तस्मान्न वैषम्यदोषोऽत एव न नैर्घृण्यमपि संहरतः समस्तान् प्राणभृतः। स हि प्राणभृत्कर्माशयानां वृत्तिनिरोधसमयस्तमतिलङ्घयन्नयमयुक्तकारी स्यात्। न च कर्मापेक्षायामीश्वरस्य ऐश्वरर्यव्याघातः। न हि सेवादिकर्मभेदापेक्षः फलभेदप्रदः प्रभुरप्रभुर्भवति न च "एष ह्येव साधु कर्म कारयति यमेभ्यो लोकेभ्य उन्निनीषते एष एवासाधु कर्म कारयति तं यमधो निनीषते" इति श्रुतेरीश्वर एव द्वेषपक्षपाताभ्यां साध्वसाधुनी कर्मणी कारयित्वा स्वर्गं नरकं वा लोकं नयति। तस्माद्वैषम्यदोषप्रसङ्गान्नेश्वरः कारणमिति वाच्यम्; विरोधात्। यस्मात् कर्म कारयित्वेश्वरः प्राणिनः सुखदुःखिनःसृजति इति श्रुतेरवगम्यते। तस्मान्न सृजतीति विरुद्धमभिधीयते। न च वैषम्यमात्रमत्र ब्रूमो न त्वीश्वरकारणत्वं व्यासेधाम इति वक्तव्यं किमतो यद्येवं, तस्मादीश्वरस्य सवासनक्लेशापरामर्शमभिवदन्तीनां भूयसीनां श्रुतीनामनुग्रहायोन्निनीषतेऽघो निनीषत इत्येदपि तज्जातीयपूर्वकर्माभ्यासवशात् प्राणिन इत्येवं नेयम्, यथाहुः–

जन्मजन्मयदभ्यस्तं दानमध्ययनं तपः।

तेनैवाभ्यासयोगेन तच्चैवाभ्यसते नरः॥

इत्यभ्युपेत्य च सृष्टेस्तात्त्विकत्वमिदमुक्तमनिर्वाच्या तु सृष्टिरिति न प्रस्मर्तव्यमत्रापि तथा च मायाकारस्येवाङ्गसाकख्यवैकल्यभेदेन विचित्रान् प्राणिनो दर्शयतो न वैषम्यदोषः, सहसा संहरतो वा न नैर्घृण्यमेवमस्यापि भगवतो विविधविचित्रप्रपञ्चमनिर्वाच्यं विश्वं दर्शयतः संहरतश्च स्वभावाद्वा लीलया वा न कश्चित् दोषः।।३४।।

इति स्थिते शङ्कापरिहारपरं सूत्रम्–न कर्माविभागादिति चेन्नानादित्वात् शङ्कोत्तरे अतिरोहितार्थेन भाष्यग्रन्थेन व्याख्याते।।३५।।

अनादित्वादिति सिद्धवदुक्तं तत्साधनार्थं सूत्रम्–''उपपद्यते चाप्युपलभ्यते च''।।३६।।

इति भामती वैषम्यनैर्घृण्याधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ वैषम्यनैर्घृण्याधिकरणम्॥११॥

॥सू॥ **वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति॥३४॥**

प्रयोजनाभावेऽपि लीलया परमेश्वरस्य जगत्सृष्टयादिषु प्रवृत्तिरिति निरूपितम्। तत्र पुनः संदिह्यते सैषा सम्भवति न वेति।

लीलयाऽपि परमेश्वरस्य सृष्टिर्न सम्भवति, परिपूर्णतया रागद्वेषादिहीनत्वात्। सकलसाम्येन मध्यस्थ एव हि परमेश्वरः। तस्य केषांचित् सुखमयं देवादिशरीरं केषांचिद्दुःखोत्तरं मनुष्यादिशरीरं सृजते वैषम्यं दुर्वारम्। किञ्च-सृष्टेः संहारपूर्वकत्वात् सकलं युगपत् संहरतः परमेश्वरस्य नैर्घृण्यं च भवेत्। तदेवमपुरुषार्थसम्बन्धापादिन्या जगत्सृष्ट्या किं परमेश्वरस्य?॥

इति प्राप्ते ब्रूमः –सर्वथा जगत्सृजतः परमेश्वरस्य वैषम्यनैर्घण्ये न भवतः। कर्मसापेक्षत्वात् सृष्टिवैषम्यस्य। (तथा हि दर्शयति श्रुतिः –'रमणीयचरणारमणीयां योनिमापद्यन्ते कपूयचरणाः कपूयाम्' इति॥

॥सू॥ **न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च॥३५॥**

सृष्टेः प्राक् कर्म नास्ति क्षेत्रज्ञाभावात्। तदभावश्च 'सदेव सोम्येदम्' इत्यवधारणावगतादविभागात् इति चेत्-न,) 'ज्ञाज्ञौ द्वावजावीशानीशौ' इत्यादिश्रुतेः। यथा जीवानामनादित्वं तथा तत्कर्मणामप्यनादित्वं दृश्यते हि। यतः कर्मप्रवाहसिद्धोऽयं संसारः। परमेश्वरो हि जीवानां विचित्रं कर्म सर्वज्ञतयावलोक्य स्वशक्त्या तत्तदनुगुणमेव भोगायतनं देवादिशरीरं सृजति। ततः कर्ममूलमेव सृष्टिवैषम्यम्। संहारश्च जीवानां संसारव्यापारखिन्नानां सुषुप्तिवद्विश्रान्तिहेतुतया परमेश्वरस्य न नैर्घृण्यापादकः॥

ननु जीवानां सुखदुःखादौ कर्मण एव प्रयोजकत्वात् किमप्रयोजकेन परमेश्वरेणेति चेत्-न,

कर्मणोऽपि तदधीनत्वात् तस्य न स्वातन्त्र्यहानिः। पुनरपि घट्टकुटीप्रभातन्यायेन कर्मणः स्वातन्त्र्याभावे परमेश्वरस्य वैषम्यादिदोषापत्तिरिति न वाच्यम्। कर्मशक्तीनामनन्तानां मायागतानां संस्थापकमात्रत्वात् परमेश्वरस्य। कर्मणामेव स्वशक्तिवशात् सृष्टिवैषम्यहेतुत्वे तद्व्यवस्थापकमात्रस्य तस्य न वैषम्यम्।।

ननु जीवानां शरीरसृष्टौ अचेतनस्य कर्मणश्चेतनानधिष्ठितस्यासामर्थ्याच्चेतनत्वेन परमेश्वर एव प्रयोजक इति वक्तव्यम्। कथमसौ सृष्टेः प्राक् संहृत भोगसाधनतया संसारक्लेशरहितान् सुखिनो जीवान् पुनरपि संसारहेतुना शरीरेण योजयति परमकारुणिकोऽपि सन्निति चेत्-

उच्यते-सर्वानुग्राहकः परमेश्वरो जीवानां कर्मपाकमन्तरेण ज्ञानानुदयात् ज्ञानमन्तरेण निरतिशयानन्दमोक्षाभावात्, कर्मपाकस्य च भोगमन्तरेणानुपपत्तेः, तत्कर्मफलभोगाय पुनरपि तेषां शरीरादिकं कल्पयति। एवं क्रमात् भोगेन पक्के स्वकर्मणि शुद्धान्तःकरणानां जीवानां स्वविषयं ज्ञानमुत्पाद्य निरतिशयानन्दरूपां मोक्षलक्ष्मीं प्रकाशयति।

एवंशक्तिमान् परमेश्वरः परमकारुणिकः कथं वा युगपदेव सर्वजीवानां कर्म पाचयित्वा सममेव मोक्षानन्दं न प्रकाशयतीति चेत्-सत्यम्, परमेश्वरेण सममेव सर्वेषामनुग्रहे क्रियमाणेऽपि ये पक्कमलास्ते मुच्यन्ते, अपक्कमलाः कालक्रमादेव। यथा सवितृकिरणसन्दोहे सममेव सन्ततेऽपि पक्कान्येव पद्मानि विकसन्ति, नापक्कानि। ततः पूर्णोऽपि परमेश्वरः परार्थामेव सर्वां प्रवृत्तिं करोति। तथा पौराणिकी भणितिः परमेश्वरस्य सर्वानुग्राहकत्वप्रतिपादनमुखेनोक्तं सकलमर्थं स्पष्टयति-

'आदित्येन यथा हीनं तमोभूतमिदं जगत्। शिवेनापि विना तद्वत् तमोभूतमिदं जगत्।। वैद्यं विना निरानन्दाः क्लिश्यन्ते रोगिणो यथा। शिवं विना निरानंद क्लिश्यते हि जगत्तथा।। व्याधीनां भेषजं यद्वत् प्रतिपक्षं स्वभावतः। शिवस्संसारदोषाणां प्रतिपक्षः स्वभावतः।। यथाऽनादिः प्रवृत्तोऽयं घोरः संसारमण्डलः। तथाऽनादिः प्रवृत्तोऽयं शिवस्संसारमोचकः।' इत्यादिका। अतः परमेश्वरस्य सर्वानुग्रहप्रवृत्तेः जगत्सृष्ट्यादिव्यापारः सम्भवत्येव।।

इति श्री कण्ठभाष्य वैषम्यनैर्घृण्याधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ वैषम्यनैर्घृण्याधिकरणम्॥११॥

सू॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति॥३४॥

पूर्वाधिकरणार्थानुवादेनाक्षेपिकीं संगतिं दर्शयति-**प्रयोजनाभावेऽपीति।** सृष्टिसंहारयोर्वैषम्यनैर्घृण्याषादकत्वानापादकत्वाभ्यां संशयं दर्शयति-**तत्र पुनरिति।** युज्येत लीलारूपः परमेश्वरस्य जगत्सृष्टयादिव्यापार इति यदि स तस्य सर्वानुग्राहकस्य वैषम्यनैर्घृण्यदोषापादको न स्यात्। तदापादकस्त्वयम्। तस्मादसमञ्जलीलासदृशोऽयं व्यापारः परमेश्वरस्य न युक्तः। न च वाच्यं 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेने' ति श्रुतेः कर्मविशेषमूलं जगद्वैषम्यमीश्वरस्तदुत्पत्तौ साधारणकारणं यथा सस्योत्पत्तौ पर्जन्यः साधारणकारणम्। तद्धयोऽल्पत्वव्रीहियत्वादिवैषम्यं क्षेत्रबीजादिवैषम्यकृतम्। एवञ्च नेष्वरस्य निरवद्यत्वहानिरिति। 'सदेव सोम्येदमग्र आसी' दिति सृष्टेः प्रागेकत्वावधारणेन कर्मणामभावावगत्या सर्गादिकाले कर्मानपेक्षयैव प्राथमिकदेवमनुष्यादिविषमसृष्टिं कुर्वतस्तस्य वैषम्यदोषापत्त्यपरिहारात्, कथंचिदऽपि नैर्घृण्यादिदोषापरिहाराच्च, क्रमिकविषमसृष्टिहेतुभिन्नकालभूयोऽल्पपुण्यपापरूपकर्मवैषम्यवतां प्राणिनां युगपदविषयमसंसारहेतुकर्मसाम्यासम्भवेन तत्र कर्मापेक्षाया वक्तुमशक्यत्वाच्च कर्मसापेक्षत्वे तस्यानीश्वरत्वप्रसङ्गाच्च 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते स एवासाधु कर्म कारयति तं यमधो निनीषत' इत्यादिश्रुत्यनुसारेण कर्मणामपि तत्कारितत्वांगीकारे वैषम्यादिदोषतादवस्थ्याच्चेति पूर्वपक्षं दिङमात्रेण प्रदर्शयति-**लीलयेत्यादिना।** 'सापेक्षत्वा' दित्यंतसूत्रांशोक्तं वैषम्यनैर्घृण्यापत्तिदोषपरिहारं दर्शयन् सिद्धान्तयति-**सर्वथेति।** प्रथमसृष्टौ कर्मासंभवशंकापरिहारं 'तथा हि दर्शयती'ति सूत्रांशोक्तं दर्शयति-**ज्ञाज्ञाविति।** 'ज्ञाज्ञौ द्वावजावीशानीशा' विति श्रुतिः यथा जीवानामनादित्वं दर्शयति तथा तत्कर्मणामप्यनादित्वं दर्शयति 'सूर्याचंद्रमसौ धाता यथापूर्वमकल्पय' दित्यादिश्रुतिरिति 'तथाहि दर्शयती' ति सूत्रांशस्यार्थः। उदाहृतश्रुतिः कर्मणामनादित्वं न प्रतिपादयतीति आंशकापरिहारार्थो हिशब्दः। यस्मादियं

श्रुतिरिदानीन्तनकलपतद्विषमसृष्टियुक्तपूर्वकल्पसद्भावं दर्शयति तत एवेदानींतनसृष्टिवैषम्यस्य पूर्वकल्पकृतकर्मवैषम्याधीनत्वं गमयति। अन्यथा तस्याकस्मिकत्वप्रसंगात् कृतहानाकृताभ्यागमप्रसंगाच्चेति हिशब्दस्यार्थः। एवं च 'सदेकमेवे' त्यवधारणं व्यक्तनामरूपाभावाभिप्रायमिति भावः। एवं सूत्रार्थं प्रदर्श्य कर्मसापेक्षत्वादिति हेतुना लब्धं वैषम्यपरिहारं दर्शयति-**परमेश्वरो हीति। कर्ममूलमेवेति।** एवं च यथा नरपतिः प्रजानां व्यवहारदर्शने तदीययुक्तायुक्तवचनानुसारेणानुग्रहनिग्रहविशेषं कुर्वन्पक्षपातित्वलक्षणं वैषम्यं न प्रतिपद्यते एवमीश्वरोऽपि तदीयकर्मविशेषानुसारेण विषमसृष्टिं कुर्वन् न तत्प्रतिपद्यते प्रत्युत विषमकर्मणामेकरूपसृष्टावेव युक्तायुक्तवादिनामेकरूपानुग्रहे व्यहारद्रष्टुरिव परमेश्वरस्य वैषम्यमापद्येतेति भावः। एवं कर्मापेक्षया वैषम्यपरिहारेणैव नैर्घृण्यपरिहारोऽपि लब्धः। यद्यपि सृष्टिक्रमवैषम्यकारणं कर्मक्रमवैषम्यमिव संहारयौगपद्यसाम्यकारणं कर्मयौगपद्यसाम्यं न संभवति, तथापि प्राणिनां निशास्विव भोगविशेषप्रापणार्थं तत्तच्छरीरस्थापकानां कर्मणां कालविशेषे युगपत्स्वापस्संभवत्येव। कर्मणां स्वापो नाम प्राणिनां प्रवृत्त्यनाभिमुख्यमिव कार्यानाभिमुख्यम् तत्सर्वसम्प्रतिपन्नम्। अनादिभवसञ्चितानामनंतानां कर्मणां युगपत्कार्यारंभकत्वादर्शनात्। तत्र च कर्मणां स्वापे फलानामपाक इव कालविशेषः कारणमिति ऋतुविशेषे जंबूफलादिपाकयौगपद्यवत्कालविशेषे कर्मणां स्वापयौगपद्यं नानुपपन्नम्। अतो विशेषकर्मोद्बोधापेक्षया सृष्टिवैषम्येऽपि परमेश्वरस्य वैषम्यमिव सर्वकर्मस्वापापेक्षया संहारसाम्येऽपि तस्य नैर्घृण्यं न प्रसज्यते। अयं परिहारस्सापेक्षत्वादेव वैषम्यनैर्घृण्ये प्रतिक्षिपता सूत्रकारेण दर्शितः प्राक्संक्षिप्योपन्यस्तः 'परमेश्वरस्य वैषम्यनैर्घृण्ये न भवतः कर्मसापेक्षत्वा'दिति। स्वयं परिहारान्तरमाह-**संहारश्चेति।** न कर्मापेक्षायामीश्वरस्यानीश्वरत्वापत्तिर्दोषः। भंग्यंतरेणाशंकते-**नन्विति।** यदि कर्मवैचित्र्यमूलं जगद्वैचित्र्यं तदा कर्माधीन एवेश्वरो विचित्रं जगन्निर्मातीति तस्य कर्मपारतंत्र्येण व्यवहर्तृगतयुक्तायुक्तवचनपारतंत्र्यस्य व्यवहारद्रष्टुरिव नास्ति निरतिशयस्वातंत्र्यलक्षणमीश्वरत्वमिति प्राप्तम्। तथा सति किं तेन ईश्वर इति नाममात्रं बिभ्राणेन वस्तुतोऽनीश्वरेण। जगद्वैचित्र्यस्य कर्मवैचित्र्येणैव सिद्धतया तस्यानुपयुक्तत्वात्। न च तथापि श्रुतिसिद्धत्वादभ्युपगंतव्यः। निरतिशयस्वातंत्र्यविशिष्टो हि स श्रुतिसिद्धः। तत्र निरतिशयस्वातंत्र्यरूपधर्मांशे श्रुतेरर्थत्यागे को विशेषो धर्म्यंशस्य। येन तदंशे श्रुतिरत्यक्तव्यार्था स्यादिति शंकार्थः। कर्मपेक्षामात्रेण स्वातंत्र्यहानौ खल्वेवमाशंक्येत। तत्तु नास्ति 'एष ह्येवे' त्यादिश्रुत्या कर्मणां तदधीनत्वावगमादिति परिहरति-**नेति।** तर्हि तदेव वैषम्यमापतेत्कांश्चित्साधु कर्म कांश्चिदसाधु कर्म कारयतः परमेश्वरस्येति शंकामुद्भाव्य भंग्यन्तरेण समाधत्ते-**पुनरपीति।**

अयमाशय:। परमेश्वरो न स्वयं साध्वसाधूनि कर्माणि कारयति, तैस्सुखदु:खादीनि च नोत्पादयति, येन तस्य वैषम्यमापतेत्। किंतु प्राणिन एव तथाभूतानि कर्माणि यानि स्वस्वरुच्यनुसारेण पूर्वसर्गेषु कुर्वंति तानयेव पुनस्सर्गेषु विषमसृष्टिहेतवो भवंति। परमेश्वरस्तु पूर्वसर्गकृतानां तत्तदंत:करणधर्मरूपाणां साध्वसाधुकर्मणां प्रलये सर्वांत:करणानां विलीनतया मायायामेव वासनारूपतया लग्नानां केवलमसंकरणे फलव्यवस्थापक:। अन्यथा मायायां संकीर्णेषु कर्मफलमन्यो गृह्णीयात्। अन्यदीयकृषिकर्मफलानि अन्यो हरतीति लोके दृष्टत्वेन कर्मणां कर्तृगतफलजनकत्वनियमाभावात्। वैदिककर्मसु आत्मनेपदबलात्तथा नियमोऽवगम्यत इति चेत्सत्यम्। श्रुतनियमान्यथानुपपत्त्यैव श्रुतयागस्वर्गकार्यकारणभावान्यथानुपपत्त्या पूर्ववद्व्यवस्थापक: कल्पयितव्य:। ननु, षट्त्रिंशत्तत्वमध्ये नियत्याख्यं तत्वं कर्मफलानामसंकरव्यवस्थापकमागमेषु प्रसिद्धम्। 'काल: स्वभावो नियतिर्यदृच्छे'ति श्वेताश्वतरमन्त्रेऽपि तत्परामृष्टम्। अतो न व्यवस्थापकान्तरापेक्षेति चेन्मैवम्। लोके कृष्यादिफलासंकरस्य राज्ञो व्यवस्थापकत्वदर्शने नियतितत्वस्याऽपि साध्वसाधुकर्मफलासङ्करव्यवस्थापकपरमेश्वराज्ञारूपत्वेनैवाभ्युपगमात्। एवंच 'एष ह्येव साधु कर्म कारयति' त्यादिश्रुतिरपि तत्कर्मफलासंकरव्यवस्थापकत्वमात्रविषया व्याख्येया। 'एष सेतुर्विधरण एषां लोकानामसंभेदाये'ति श्रुत्यंतरप्रसिद्ध्यनुसारात् परमेश्वरस्य वैषम्यनैर्घृण्यादिसकलदोषराहित्य-श्रुत्यंतरानुसाराच्च। न चैवं सति तस्य राजादिसमानयोगक्षेमत्वान्निरतिशयैश्वर्यभंगप्रसंग:। राजादीनां कतिपयविषयसङ्करापादनमैश्वर्यं परमेश्वरस्य तु असंकुचितसर्वविषयमित्येव तदैश्वर्यस्य निरतिशयत्वविशेषाभ्युपगमादिति। एवं मतमनुपपन्नमित्याशंकते-**नन्विति।** जीवानां देवमनुष्यशरीरादिविषमसृष्टौ परमेश्वराधिष्ठानं विना केवलं कर्म न प्रभवति। अचेतनस्य चेतनाधिष्ठानभावे कार्याक्षमत्वस्य 'रचनानुपपत्ते' रित्यनंतराधिकरणे वक्ष्यमाणत्वात्। अत: प्रसुप्तानि कर्माणि परमेश्वर: स्वयमेवोद्बोध्य तदुत्पादितैश्शरीरै: प्रलयविश्रांतान् जीवान् संयोज्य पुनरपि तारतम्येन क्लेशयतीत्यंगीकर्तव्यत्वात्कथं वैषम्यनैर्घृण्ये न स्याताम्। न च कर्माणि कर्तृभिरवश्यं भोक्तव्यानीति तदनुसारेण तान्यधिष्ठाय तदुत्पादितैश्शरीरै: सुखदु:खे भोजयतो न ते प्रसज्येयातां, वैवस्वतस्येव तस्य समवृत्तित्वं च न हीयत इति वाच्यम्। 'परात्तु तच्छ्रुते' रि (ब्र० २-३-४०) त्यधिकरणे कर्मणामशीश्वरेण कार्यमाणत्वस्य वक्ष्यमाणतया कैश्चित्पुण्यकर्माणि कैश्चिदपुण्यकर्माणि च कारयितुर्वैषम्यादिप्रसङ्गतादवस्थ्यात्। न च पूर्वपूर्वानादिकर्मप्रवाहापेक्ष: कारयति, 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य' (ब्र० २-३-४१) इति 'परात्तु तच्छ्रुते' रि (ब्र० २-३-४०) त्यधिकरणे तथा प्रतिपादयिष्यमाणत्वात् अतो न तत्प्रसंग इति वाच्यम्। पूर्वपूर्वकर्मणामीश्वरकारितत्वे तत्प्रसङ्गापरिहारात् तदकारितत्वे 'परात्तु तच्छ्रुते'

रित्यधिकरणविरोधात्। ननु, तर्ह्युभयाविरोधेन परमेश्वरः कल्पादौ करणकलेवराणि दत्वा स्वयमुदास्ते। तदा जीवः स्वेच्छया साधु वासाधु वा यत्कर्म करोति तदनुसारेण तदनंतरं कर्मांतराणि कारयतीति कल्प्यते। तथा च स्वेच्छाकृतकर्ममूलत्वादुत्तरोत्तरकर्मप्रवाहस्य न नैर्घृण्यवैषम्यदोषप्रसंगः, 'परात्तु तच्छ्रुते'रित्यधिकरणार्थश्च द्वितीयादिषु प्रवृत्तिषु चरितार्थ इति चेन्मैवम्। तथा कल्पनायामपि अयमसाधु कर्म कारयतीति जानतः परमेश्वरस्य कूपे बालकः पतिष्यतीति जानत इवौदासीन्ये नैर्घृण्यानिवारणात् स्वेच्छया कश्चित्साधु कर्म प्रथमं करोति कश्चिदसाध्विति वैषम्यस्य पूर्वकल्पकृतकर्मविशेषाधीनत्वस्यावश्यवक्तव्यत्वेन तत्कारयितुः परमेश्वरस्य वैषम्यादिप्रसंगापरिहाराच्च। नन्वेवं वैषम्यनैर्घृण्यमपरिहार्यं चेत्परमेश्वरस्य तन्न दोष इत्यस्तु। न हि विधिनिषेधपथातीतस्य तस्य प्रत्यवायकारणं तत्। नापि सर्वनियंतुः कुतश्चिदनिष्टकारणम्। किमर्थं तर्हि 'वैषम्यनैर्घृण्ये न सापेक्षत्वा'दिति सूत्रकारेण तत्परिहृतम्। द्विविधं वैषम्यनैर्घृण्यम्। एकं कर्मादिकमनपेक्ष्य स्वयमेव विषमसृष्टियुक्तमपरं तत्सापेक्षत्वेऽपि पूर्वपूर्वकर्मप्रवाहस्यापि परमेश्वराधीनत्वप्रयुक्तम्। तत्राद्यं पुण्यपापयोः सुखदुःखसाधकत्वावेदकस्य वेदस्याप्रामाण्यावहमिति तत्प्रामाण्यसंरक्षणार्थं परिहृतं न तु द्वितीयमिति चेत्कृतमिदं सामान्येन वैषम्यनैर्घृण्यमात्रदोष एवेति तत्परिहारार्थं प्रयत्य परिहारानिर्वाहे पुनस्तददोषत्ववचनम- कौशलमेवाविष्कुर्यात्। परमकारुणिकत्वविरोधि च वैषम्यनैर्घृण्यं सर्वथा परिहरणीयमेव। तदेव च सूत्राञ्चस्यमपि लभ्यते। तस्माद्यथा परमकारुणिकं परमेश्वरं वैषम्यनैर्घृण्यं कलयापि न स्पृशेत् यथा च सूत्राञ्जस्यं भवेत् तथा परिहारो वर्णनीय इति शंकाभिप्रायः। उच्यत इत्यादेः परिहारग्रंथस्यायमर्थः। परमकारुणिकः परमेश्वरः सकलचेतनानुग्राहक इति 'व्याधीनां भेषजं यद्व' दित्यादिपौराणिकभणितिप्रसिद्धः। अनुग्रहः बन्धनिवर्तनेन स्वसाम्यप्रापणरूपः। बन्धश्च मुख्यः पुंसां दृक्क्रियाच्छादकः स्वयमेकोऽपि विचित्रानंतशक्तिकः ताम्राश्रितकालिकावत्सहजसिद्धावरणरूपः। मलाख्यः परिणामिद्रव्यविशेषस्तु व्रणवत् पक्वो निवर्तनीयः। पाकश्च तस्य व्रणस्यौषधेनेव नित्यनैमित्तिककर्मानुष्ठानेन सांसारिकक्लेशानुभवेन च संपादनीयः। 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इति नित्यनैमित्तिककर्माचरणेन तस्मिन्पक्वे सत्येव वैराग्यशिवभक्तिशिवजिज्ञासा- दिप्रणाडिकया मोचकज्ञानोत्पत्तिस्मरणात् भोगेन तत्पाकस्यागमप्रसिद्धत्वाच्च। कर्मभोगश्च तनुकरणभुवनभोगसाधनद्रव्यदेवतादिकं विना न संभवति। तत्र च प्राणिनां विचित्राणि कर्माणि कारणमिति तदर्थं परमेश्वरः कर्माणि कारयित्वा कर्मवैचित्र्यानुसारेण विचित्राणि तनुकरणादीनि सृष्ट्वा क्लेशयुक्तानि कर्माण्यनुष्ठाय सुखदुःखानि च भोजयतीति सर्वमेतत्करुणयोपपद्यते। अतो न वैषम्यनैर्घृण्यप्रसक्तिः। न हि व्रणिनां व्रणपाकार्थं तत्तद्व्रणगुणानुसारेण क्षारं निवेश्य तारतम्येन क्षारनिवेशप्रयुक्तं क्लेशमनुभावयतः कारुणिकस्य वैद्यस्य वैषम्यनैर्घृण्यं प्रसज्यते। परमेश्वरस्य सर्वत्र

करुणासाम्येऽपि विचित्रस्वभावानां तदावरणमलशक्तीनां व्रणानामिव पाकस्यानियतकालत्वात् सर्वेषां मुक्तेरयौगपद्यं चोपपद्यते इति। एवं च सूत्रे 'सापेक्षत्वा' दित्यस्य मलपाकसापेक्षत्वादिति वा तत्पाकोपयोगिस्वकारितकर्मसापेक्षत्वादिति वार्थो द्रष्टव्यः। भाष्ये 'कर्मपाकमन्तरेणे' त्यादिवाक्येषु कर्मशब्दः क्रियतेऽनेन संसार इति करणव्युत्पत्त्या वा परमेश्वरेण पक्वः क्रियत इति कर्मव्युत्पत्त्या वा मलावरणपरो द्रष्टव्यः। अत एवाग्रे भाष्ये 'ये पक्वमलास्ते मुच्यंते अपक्वमलाः कालक्रमादेवे' ति वक्ष्यते। 'कर्मपाकस्य च भोगमंतरेणानुपपत्ते' रित्येतत्कर्मानुष्ठानमंतरेणानुपपत्तेरित्यस्याप्युपलक्षणम्। 'कर्मफलभोगायेत्ये' तत् कर्मानुष्ठानायेत्यस्याप्युपलक्षणम्। **परार्थमेवेति।** परानुग्रहार्थमेव सकलमपि सृष्टयादिव्यापारं करोतीत्यर्थः। ननु संहारो नानुग्रहार्थः प्रलये पाककारणयोः कर्मभोगयोस्तदुपयोगिनो वा कस्यचिव्द्यापारस्याभावात्, पूर्वं भाष्ये संहारस्य विश्रांतिमात्रप्रयोजनत्वेनोक्तत्वाच्च। 'संसारखिन्नानामखिलानां प्राणिनां प्रभुः क्रियया कुरुते महार्थसंहृतिं तेषामेव विश्रांत्या' इति तस्य तन्मात्रप्रयोजनवत्त्वेनागमविद्भिरप्युक्तत्वाच्च। मैवम्। प्रलयेऽग्रिमसृष्टयुपयोगिनो मायाकर्मादिपाकव्यापारस्य सत्त्वात्। उक्तं हि मृगेन्द्रसंहितायाम्-'स्वापेऽप्यास्ते बोधयन्बोधयोग्यान् रोध्यान्रुंधन्पाचयन्कर्मिकर्म। मायाशक्तीर्व्यक्तियोग्याः प्रकुर्वन् पश्यन्सर्वं यद्यथावस्तुजात' मिति। अधिकरणार्थमुपसंहरति-**अतः परमेश्वरस्येति।**

इति शिवार्कमणिदीपिका वैषम्यनैर्घृण्याधिकरणम् समाप्तम्

सर्वधर्मोपपत्त्यधिकरणम्।

शाङ्करभाष्यम्

***सर्वधर्मोपपत्तेश्च*।।३७।।**

चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परैरुपक्षिप्तान् विलक्षणत्वादीन्-दोषान् पर्यहार्षीदाचार्यः। इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणं प्रारिप्समाणः स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरति। यस्मादस्मिन् ब्रह्माणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपापद्यन्ते–सर्वज्ञम्, सर्वशक्ति, महामायं च ब्रह्म–इति, तस्मादनतिशङ्कनीयमिदमौपनिषदं दर्शनमिति।।३७।। इति त्रयोदशं सर्वधर्मोपपत्त्यधिकरणम्।।

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यशंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य प्रथमः पादः समाप्तः।।

इति शाङ्करभाष्यम् सर्वधर्मोपपत्त्यधिकरणम् समाप्तम्

वार्तिकम्

सर्वधर्मोपपत्तेश्च।।३७।। स्वपक्षस्थापनप्रधानप्रकरणोपसंहारपरमिदं सूत्रम्। तदेतद् भाष्यकारो दर्शयति स्म– *चेतनं ब्रह्म जगतः कारणमिति*।। सर्वज्ञं सर्वशक्तीति विशेषणद्वयेन सर्वधर्माणामुपपत्तिरुक्ता। महामायमित्यनेन च सर्वानुपपत्तिपरिहारः।।३७।। इति त्रयोदशं सर्वधर्मोपपत्त्याधिकरणम्।।

इति श्रीमत्परमहंस परिव्राजकाचार्य गोविन्दानन्दसरस्वती पूज्यपादशिष्य नारायणसरस्वतीकृतौ श्रीमच्छारीरकभगवत्पादीयभाष्यवार्तिके द्वितीयाध्यायस्य प्रथमः पादः समाप्तः।।

इति वार्तिकम् सर्वधर्मोपपत्त्यधिकरणम् समाप्तम्

प्रदीपः

सर्वधर्मोपपत्तेश्च।।३७।। द्वितीयाध्यायप्रथमपादार्थः परोक्ताक्षेपपरिहारपूर्वकस्वमतसमर्थनमेव। परमतदूषणं त्वानुषङ्गिकमेव। तेन–स्वपक्षदोषाच्चेति न विरुद्धम्। इदं च–सर्वधर्मोपपत्तेरिति तात्पर्यग्राहकलिङ्गेनोपसंहारादवगम्यते। इयं च सर्वधर्मोपपत्तिर्मतान्तरेषु सर्वेषु न साधनीया; स्वतः सिद्धत्वात्, अद्वैतमते तु निर्विशेषत्वाद् ब्रह्मणः साधनीयेति सौत्रं दर्शनमद्वैतानुसार्येवेत्याह– *तस्मादनाशङ्कनीयमिति*।। *औपनिषदमिति*।।

वेदानन्तवाक्यस्वारस्यमद्वैतमत एवेति सर्वसंप्रतिपन्नम्। सूत्राणामेव केषाञ्चन भेदसत्यतायामेव स्वारस्यमिति केचन मन्यन्ते, इदं तु न युक्तम्; उपनिषत्सूत्रयोरेकार्थत्वस्यैव वर्णनीयत्वात्, अन्यथा भिन्नवाक्यत्वापत्तेः। तथाच सौत्रस्य दर्शनस्यापाततः प्रतीयमानस्यापि परित्यागेनौपनिषदे दर्शन एव सूत्राणामपि पर्यवसानं स्वीकर्तव्यमित्यद्वैतदर्शनमेव सौत्रमपीति भावः।।३७।। इति त्रयोदशं सर्वधर्मोपपत्त्यधिकरणम्।।

इति प्रदीपे द्वितीयाध्यायस्य प्रथमः पादः।।

इति प्रदीपः सर्वधर्मोपपत्त्यधिकरणम् समाप्तम्

भामती

अकृते कर्मणि पुण्ये पापे वा तत्फलं भोक्तारमध्यागच्छेत् तथा च विधिनिषेधशास्त्रमनर्थकं भवेत् प्रवृत्तिनिवृत्त्यभावादिति मोक्षशास्त्रस्य चोक्तमानर्थक्यम्। न चाविद्या केवलेति लयाभिप्रायम्। विक्षेपलक्षणाविद्यार्सस्कारस्तु कार्यत्वात् स्वोत्पत्तौ पूर्वं विक्षेपमपेक्षते, विक्षेपश्च मिथ्याप्रत्ययो मोहापरनामा पुण्यापुण्यप्रवृत्तिहेतुभूतरागद्वेषनिदानं, स च रागादिभिः सहितः त्त्वकार्यैनं शरीरं सुखदुःखभोगायतनमन्तरेण सम्भवति। न च रागद्वेषावन्तरेण कर्म, त च भोगसहितं मोहमन्तरेण रागद्वेषौ, न च पूर्वशरीरमन्तरेण मोहादिरिति पूर्वपूर्वशरीरापेक्षो मोहादिरेवं पूर्वपूर्वमोहाद्यपेक्षं पूर्वपूर्वशरीरमित्यनादितैवात्र भगवती चित्तमनाकुलयन्ति। तदेतदाह *रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्याद् इति*। रागद्वेषमोहा रागादयस्त एव हि पुरुषं संसारदुःखमनुभाव्य क्लेशयन्तीति क्लेशास्तेषां वासनाः कर्मप्रवृत्त्यनुगुणास्ताभिराक्षिप्तानि प्रवर्त्तितानि कर्माणि तदपेक्षा लयलक्षणाऽविद्या। स्यादेतत्–भविष्यताऽपि व्यपदेशो दृष्टो यथा पुरोडाशकपालेन तुषानुपवपतीत्यत आह *न च धारयिष्यतीत्यतः इति*। तदेवमनादित्वे सिद्धे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्राक् सृष्टेरविभागावधारणं समुदाचरद्रूपरागादिनिषेधपरं न पुनरेतान् प्रसुप्तानप्यपाकरोतीति सर्वमवदातम॥३६॥

अत्र *सर्वज्ञमिति* दृश्यते सर्वस्य चेतनाधिष्ठितस्यैव लोके प्रवृत्तिरिति लोकानुसारो दर्शितः। *सर्वशक्ति इति* सर्वस्य जगत उपादानकारणं निमित्तकारणं चेत्युपपादितम्। *महामायम् इति* सर्वानुपपत्तिशङ्का परास्ता। तस्माज्जगत्कारणं ब्रह्मेति सिद्धम्॥३७॥

इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभाष्यविभागे भामत्यां द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः॥

इति भामती सर्वधर्मोपपत्त्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। **सर्वधर्मोपपत्तेश्च।।३६।।**

किं बहुना? **प्रधानपरमाणुकर्मकालादीनां** ये धर्मा अनुपपन्नास्ते सर्वे ब्रह्मण्युपपद्यन्ते। अतो ब्रह्मैव सर्वातिशायि जगत्सृष्ट्यादिकारणमिति समञ्जसम्।।

इति वैषम्यनैर्घृण्याधिकरणम्।।११।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये
द्वितीयस्याध्यायस्य प्रथमः पादः।।

इति श्री कण्ठभाष्य सर्वधर्मोपपत्त्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

।।सू।। **सर्वधर्मोपपत्तेश्च**।।३६।। प्रधानपरमाण्वादीनां स्वातंत्र्येण जगत्कारणतायां तदुपयोगिनो ये धर्माः पूर्वं तत्रातत्रानुपपन्नत्वेन सूत्रिताः अग्रिमपादे च प्रपञ्चयिष्यते, ते सर्वे ब्रह्मण्युपपद्यंत इति पादोपसंहारार्थमिदं सूत्रम्। तथैव पादार्थमुपसंहरति-**अत इति**। 'सर्वातिशायी' त्येतदपि ईक्षत्यधिकरणाद्युपपादितनिर्दोषत्वादिसंग्रहार्थम्। 'जगत्सृष्ट्यादिकारण' मित्येतन्नविलक्षणत्वाधि-करणाद्युपपादितोपादानत्वनिमित्तत्वसंग्रहणार्थम्।। **इति वैषम्यनैर्घृण्याधिकरणम्**।।११।।

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरंधरसकलदेवभूदेवप्रतिष्ठापक
श्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य
श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिरंगराजाध्वरिवर-
सूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचित-
ब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणि-
दीपिकाख्यायां **द्वितीयस्याध्यायस्य**
प्रथमः पादः।।१।।

इति शिवार्कमणिदीपिका सर्वधर्मोपपत्त्यधिकरणम् समाप्तम्

रचनानुपपत्त्यधिकरणम्।

शाङ्करभाष्यम्

***रचनाऽनुपपत्तेश्च नानुमानम्*॥१॥**

यद्यपीदं वेदान्तवाक्यानामैदम्पर्यं निरूपयितुं शास्त्रं प्रवृत्तम्, न तर्कशास्त्रवत्केवलाभिर्युक्तिभिः कंचित्सिद्धान्तं साधयितुम्, दूषयितुं वा प्रवृत्तम्; तथापि वेदान्तवाक्यानि व्याचक्षाणैः सम्यग्दर्शनप्रतिपक्षभूतानि साङ्ख्यादिदर्शनानि निराकरणीयानि, इति तदर्थं परः पादः प्रवर्तते। वेदान्तार्थनिर्णयस्य च सम्यग्दर्शनार्थत्वात्तन्निर्णयेन स्वपक्षस्थापनं प्रथमं कृतम्, तद्धयभ्यर्हितं परपक्षप्रत्याख्यानादिति॥

ननु–मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तम्, किं परपक्षनिराकरणेन परद्वेषकरेण? बाढमेवम्; तथापि महाजनपरिगृहीतानि महान्ति साङ्ख्यादितन्त्राणि सम्यग्दर्शनापदेशेन प्रवृत्तान्युपलभ्य भवेत्केषाञ्चिन्मन्दमतीनामेतान्यपि सम्यग्दर्शनायोपादेयानीत्यपेक्षा, तथा युक्तिगाढत्वसंभवेन सर्वज्ञभाषितत्वाच्च श्रद्धा च तेषु, इत्यतस्तदसारतोपपादनाय प्रयत्यते॥

ननु–"ईक्षतेर्नाशब्दम्" (ब्र० सू० १/१/५), "कामाच्च नानुमानापेक्षा" (ब्र० सू० १/१/१८) "एतेन सर्वे व्याख्याता व्याख्याताः" (ब्र० सू० १/४/२८) इति च पूर्वत्रापि साङ्ख्यादिपक्षप्रतिक्षेपः कृतः, किं पुनः कृतकरणेन-इति, तदुच्यते–साङ्ख्यादयः स्वपक्षस्थापनाय वेदान्तवाक्यान्यप्युदाहृत्य स्वपक्षानुगुण्येनैव योजयन्तो व्याचक्षते, तेषां यद्व्याख्यानम्, तद्व्याख्यानाभासम्, न सम्यग्व्याख्यानमित्येतावत्पूर्वं कृतम्, इह तु वाक्यनिरपेक्षः स्वतन्त्रस्तद्युक्तिप्रतिक्षेपः क्रियत इत्येष विशेषः॥

तत्र साङ्ख्या मन्यन्ते–यथा घटशरावादयो भेदा मृदात्मनाऽन्वीयमाना मृदात्मकसामान्यपूर्वका लोके दृष्टाः, तथा सर्व एव बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मतयाऽन्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हन्ति। यत्तत्सुखदुःखमोहात्मकं सामान्यम्, तत्त्रिगुणं प्रधानं मृद्वदचेतनं चेतनस्य पुरुषार्थं साधयितुं स्वभावेनैव विचित्रेण विकारात्मना विवर्तते–इति, तथा

परिमाणादिभिरपि लिङ्गैस्तदेव प्रधानमनुमिमते।। तत्र वदामः–यदि दृष्टान्तबलेनैवं तन्निरूप्यते– नाचेतनं लोके चेतनानधिष्ठितं स्वतन्त्रं किंचिद्विशिष्टपुरुषार्थनिर्वर्तनसमर्थान्विकारान्विरचयद् दृष्टम्। गेहप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्ति-परिहारयोग्या रचिता दृश्यन्ते, तथेदं जगदखिलं पृथिव्यादि नानाकर्मफलोपभोगयोग्यं बाह्यम्, आध्यात्मिकं च शरीरादि नानाजात्यन्वितं प्रतिनियतावयवविन्यासमनेककर्मफलानुभवाधिष्ठानं दृश्यमानं प्रज्ञावद्भिः संभाविततमैः शिल्पिभिर्मनसाऽप्यालोचयितुमशक्यं सत् कथमचेतनं प्रधानं रचयेत्? लोष्टपाषाणादिष्वदृष्टत्वात्। मृदादिष्वपि कुम्भकाराद्यधिष्ठितेषु विशिष्टाकारा रचना दृश्यते, तद्वत्प्रधानस्यापि चेतनान्तराधिष्ठितत्वप्रसङ्गः। न च मृदाद्युपादानस्वरूपव्यपाश्रयेणैव धर्मेण मूलकारणमवधारणीयम्, न बाह्यकुम्भकारादिव्यपाश्रयेणेति किञ्चिन्नियामकमस्ति।।

न चैवं सति किञ्चिद्विरुध्यते, प्रत्युत श्रुतिरनुगृह्यते; चेतनकारणसमर्पणात्। अतो रचनानुपपत्तेश्च हेतोर्नाचेतनं जगत्कारणमनुमातव्यं भवति। अन्वयाद्यनुपपत्तेश्चेति चशब्देन हेतोरसिद्धिं समुच्चिनोति। न हि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते; सुखादीनां चान्तरत्वप्रतीतेः, शब्दादीनां चातद्रूपत्वप्रतीतेः, तन्निमित्तत्वप्रतीतेश्च, शब्दाद्यविशेषेऽपि च भावनाविशेषात्सुखादि-विशेषोपलब्धेः। तथा परिमितानां भेदानां मूलाङ्कुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमितत्वात्संसर्गपूर्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसङ्गः ; परिमितत्वाविशेषात्। कार्यकारणभावस्तु प्रेक्षापूर्वकनिर्मितानां शयनासनादीनां दृष्टः, इति न कार्यकारणभावाद् बाह्याध्यात्मिकानां भेदानामचेतनपूर्वकत्व शक्यं कल्पयितुम्।।१।।

***प्रवृत्तेश्च *।।२।।**

आस्तां तावदियं रचना। तत्सिद्ध्यर्था या प्रवृत्तिः साम्यावस्थानात्प्रच्युतिः, सत्त्वरजस्तमसामङ्गाङ्गिभावरूपापत्तिः, विशिष्टकार्याभिमुखप्रवृत्तिता, साऽपि नाचेतनस्य प्रधानस्य स्वतन्त्रस्योपपद्यते; मृदादिष्वदर्शनान्, रथादिषु च। न हि मृदादयो रथादयो वा स्वयमचेतनाः सन्तश्चेतनैः कुलालादिभिरश्वादिभिर्वाऽनधिष्ठिता विशिष्टकार्याभिमुखप्रवृत्तयो दृश्यन्ते। दृष्टाच्चादृष्टसिद्धिः। अतः प्रवृत्त्यनुपपत्तेरपि हेतोर्नाचेतनं जगत्कारणमनुमातव्यं भवति।। ननु–चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा, सत्यमेतत्; तथापि चेतनसंयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टा,।।

न त्वचेतनसंयुक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा, किं पुनरत्र युक्तम्? यस्मिन् प्रवृत्तिर्दृष्टा, तस्य सा, उत यत्संप्रयुक्तस्य दृष्टा, तस्य सा--इति।।

ननु–यस्मिन् दृश्यते प्रवृत्ति, तस्यैव सेति युक्तम्, उभयोः प्रत्यक्षत्वात्, न तु प्रवृत्त्याश्रयत्वेन केवलश्चेतनो रथादिवत्प्रत्यक्षः। प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धिः ; केवलाचेतनरथादिवैलक्षण्यं जीवद्देहस्य दृष्टमिति। अत एव च प्रत्यक्षे देहे सति दर्शनादसति चादर्शनाद् देहस्यैव चैतन्यमपीति लोकायतिकाः प्रतिपन्नाः। तस्मादचेतनस्यैव प्रवृत्तिः–इति।।

तदभिधीयते–न ब्रूमो यस्मिन्नचेतने प्रवृत्तिर्दृश्यते, न तस्य सेति। भवतु तस्यैव सा। सा तु चेतनाद्भवतीति ब्रूमः ; तद्भावे भावात्,तदभावे चाभावात्। यथा काष्ठादिव्यपाश्रयाऽपि दाहप्रकाशलक्षणा विक्रियाऽनुपलभ्यमानाऽपि च केवले ज्वलने ज्वलनादेव भवति; तत्संयोगे दर्शनात् तद्वियोगे चादर्शनात्, तद्वत्। लोकायतिकानामपि चेतन एव देहोऽचेतनानां रथादीनां प्रवर्तको दृष्टः, इत्यविप्रतिषिद्धं चेतनस्य प्रवर्तकत्वम्।। ननु–तव देहादिसंयुक्तस्याप्यात्मनो विज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेरनुपपन्नं प्रवर्तकत्वमिति–चेत्, न; अयस्कान्तवत् रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्तकत्वोपपत्तेः– यथाऽयस्कान्तो मणिः स्वयं प्रवृत्तिरहितोऽप्ययसः प्रवर्तको भवति, यथा वा रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्तका भवन्ति, एवं प्रवृत्तिरहितोऽपीश्वरः सर्वगतः सर्वात्मा सर्वज्ञः सर्वशक्तिश्च सन् सर्वं प्रवर्तयेदित्युपपन्नम्।।

एकत्वात्प्रवर्त्याभावे प्रवर्तकत्वानुपपत्तिरिति चेत्, न; अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रत्युक्तत्वात्। तस्मात् सम्भवति प्रवृत्तिः सर्वज्ञकारणत्वे, न त्वचेतनकारणत्वे।।२।।

***पयोऽम्बुवच्चेत्तत्रापि*।।३।।**

स्यादेतत्–यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्ध्यर्थं प्रवर्तते, यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते, एवं प्रधानमचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्तिष्यते–इति, नैतत्साधूच्यते। यतस्तत्रापि पयोऽम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे; उभयवादिप्रसिद्धे रथादावचेतने केवले प्रवृत्त्यदर्शनात्। शास्त्रं च "योऽप्सु तिष्ठन् योऽपोऽन्तरो यमयति" (बृ० ३/७/४), "एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते" (बृ० ३/८/९) इत्येवञ्जातीयकं समस्तस्य लोकपरिस्पन्दितस्येश्वराधिष्ठिततां श्रावयति। तस्मात् साध्यपक्षनिक्षिप्तत्वात्पयोऽम्बुवदित्यनुपन्यासः ; चेतनायाश्च धेन्वाः स्नेहेच्छया पयसः प्रवर्तकत्वोपपत्तेः, वत्सचोषणेन च पयस आकृष्यमाणत्वात्। न चाम्बुनोऽप्यत्यन्तमनपेक्षा; निम्नभूम्याद्यपेक्षत्वात्स्यन्दस्य, चेतनापेक्षत्वं तु सर्वत्रोपदर्शितम्। "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" (ब्र० सू० २/१/२४) इत्यत्र तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या निदर्शितम्, शास्त्रदृष्ट्या तु पुनः सर्वत्रैवेश्वरापेक्षत्वमापद्यमानं न पराणुद्यते।।३।।

***व्यतिरेकानवस्थितेश्चानपेक्षत्वात् *॥४॥**

साङ्ख्यानां त्रयो गुणाः साम्येनावतिष्ठमानाः प्रधानम्, न तु तद्व्यतिरेकेण प्रधानस्य प्रवर्तकं निवर्तकं वा किञ्चिद् बाह्यमपेक्ष्यमवस्थितमस्ति। पुरुषस्तूदासीनो न प्रवर्तकः न निवर्तकः, इत्यतोऽनपेक्षं प्रधानम्। अनपेक्षत्वाच्च कदाचित्प्रधानं महदाद्याकारेण परिणमते, कदाचिन्न परिणमत इत्येतदयुक्तम्, ईश्वरस्य तु सर्वज्ञत्वात्सर्वशक्ति त्वात्महामायत्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते।।४।।

***अन्यत्राभावाच्च न तृणादिवत् *॥५॥**

स्यादेतत्—यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव क्षीराद्याकारेण परिणमते, एवं प्रधानमपि महदाद्याकारेण परिणंस्यत इति। कथं च निमित्तान्तरनिरपेक्षं तृणादीति गम्यते? निमित्तान्तरानुपलम्भात्। यदि हि किञ्चिन्निमित्तमुपलभेमहि, ततो यथाकामं तेन तृणाद्युपादाय क्षीरं सम्पादयेमहि, न तु सम्पादयामहे। तस्मात्स्वाभाविकस्तृणादेः परिणामः, तथा प्रधानस्यापि स्यात्—इति।। अत्रोच्यते—भवेत्तृणादिवत्स्वाभाविकः प्रधानस्यापि परिणामः, यदि तृणादेरपि स्वाभाविकः, परिणामोऽभ्युपगम्येत, न त्वभ्युपगम्यते; निमित्तान्तरोपलब्धेः।।

कथं निमित्तान्तरोपलब्धिः? अन्यत्राभावात्। धेन्वैव ह्युपयुक्तं तृणादि क्षीरीभवति, न प्रहीणम्, अनडुहाद्युपभुक्तं वा। यदि हि निर्निमित्तमेतत्स्यात्, धेनुशरीरसम्बन्धादन्यत्रापि तृणादि क्षीरीभवेत्। न च यथाकामं मानुषैर्न शक्यं सम्पादयितुमित्येतावता निर्निमित्तं भवति। भवति हि किञ्चित्कार्यं मानुषसम्पाद्यम्, किञ्चिद्दैवसम्पाद्यम्। मनुष्या अपि शक्नुवन्त्येवोचितेनोपायेन तृणाद्युपादाय क्षीरं सम्पादयितुम्। प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारयन्ति, ततश्च प्रभूतं क्षीरं लभन्ते। तस्मान्न तृणादिवत्स्वाभाविकः प्रधानस्य परिणामः।।५।।

***अभ्युपगमेऽप्यर्थाभावात् *॥६॥**

स्वाभाविकी प्रधानप्रवृत्तिन भवतीति स्थापितम्। अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम, तथापि दोषोऽनुषज्येतैव। कुतः? अर्थाभावात्। यदि तावत्स्वाभाविकी प्रधानस्य प्रवृत्तिः, न किञ्चिदन्यदिहापेक्षत इत्युच्येत, ततो यथैव सहकारि किञ्चिन्नापेक्षते, एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यते—इति। अतः प्रधानं पुरुषार्थं साधयितुं प्रवर्तत इतीयं प्रतिज्ञा हीयेत। स यदि ब्रूयात्सहकार्येव केवलं नापेक्षते, न प्रयोजनमपीति, तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यम्—भोगो वा स्यात्, अपवर्गो वा, उभयं वेति। भोगश्चेत्, कीदृशोऽनाधेयातिशयस्य पुरुषस्य भोगो भवेत्? अनिर्मोक्षप्रसङ्गश्च। *अपवर्गश्चेत्, प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात्प्रवृत्तिरनर्थिका स्यात्। शब्दाद्यनुपलब्धिप्रसङ्गश्च। उभयार्थताभ्युपगमेऽपि

भोक्तव्यानां प्रधानामात्राणामानन्त्यादनिर्मोक्षप्रसङ्ग एव। न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः। न हि प्रधानस्याचेतनस्यौत्सुक्यं सम्भवति। न च पुरुषस्य निर्मलस्य निष्कलस्यौत्सुक्यम्। दृक्शक्तिसर्ग-शक्तिवैयर्थ्यभयाच्चेत्प्रवृत्तिः, तर्हि दृक्शक्तयनुच्छेदवत्सर्गशक्त्यनुच्छेदात्संसारानुच्छेदादनिर्मोक्षप्रसङ्ग एव। तस्मात्प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तम्।।६।।

***पुरुषाश्मवदिति चेत्तथापि*।।७।।**

स्यादेतत्—यथा कश्चित्पुरुषो दृक्शक्तिसम्पन्नः प्रवृत्तिशक्तिविहीनः पङ्गुरपरं पुरुषं प्रवृत्तिशक्तिसम्पन्नं दृक्शक्तिविहीनमन्धमधिष्ठाय प्रवर्तयति, यथा वाऽयस्कान्तोऽश्मा स्वयमप्रवर्तमानोऽप्ययः प्रवर्तयति, एवं पुरुषः प्रधानं प्रवर्तयिष्यतीति दृष्टान्तप्रत्ययेन पुनः प्रत्यवस्थानम्?

अत्रोच्यते—तथापि नैव दोषान्निर्मोक्षोऽस्ति। अभ्युपेतहानं तावद्दोष आपतति; प्रधानस्य स्वतन्त्रस्य प्रवृत्त्यभ्युपगमात्, पुरुषस्य च प्रवर्तकत्वाभ्युपगमात्। कथं चोदासीनः प्रधानं प्रवर्तयेत? पङ्गुरपि ह्यन्धं वागादिभिः पुरुषं प्रवर्तयति, नैव पुरुषस्य कश्चिदपि प्रवर्तनव्यापारोऽस्ति; निष्क्रियत्वात्, निर्गुणत्वाच्च। नाप्ययस्कान्तवत्संनिधिमात्रेण प्रवर्तयेत्; संनिधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसङ्गात्। अयस्कान्तस्य त्वनित्यसंनिधेरस्ति स्वव्यापारः संनिधिः, परिमार्जनाद्यपेक्षा चास्यास्तीत्यनुपन्यासः पुरुषाश्मवदिति। तथा प्रधानस्याचैतन्यात्पुरुषस्य चौदासीन्यात्तृतीयस्य च तयोः सम्बन्धयितुरभावात्सम्बन्धानुपपत्तिः। योग्यतानिमित्ते च सम्बन्धे योग्यतानुच्छेदादनिर्मोक्षप्रसङ्गः। पूर्ववच्चेहाप्यर्थाभावो विकल्पयितव्यः। परमात्मनस्तु स्वरूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयं च प्रवर्तकत्वमित्यस्त्यतिशयः।।७।।

***अङ्गित्वानुपपत्तेश्च*।।८।।**

इतश्च न प्रधानस्य प्रवृत्तिरवकल्पते। यद्धि सत्त्वरजस्तमसामन्योन्यगुणप्रधानभावमुत्सृज्य साम्येन स्वरूपमात्रेणावस्थानम्, सा प्रधानावस्था। तस्यामवस्थायामनपेक्षस्वरूपाणां स्वरूपप्रणाशभयात्परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेः, बाह्यस्य च कस्यचित्क्षोभयितुरभावाद्गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यात्।।८।।

***अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात्*।।९।।**

अथापि स्यादन्यथा वयमनुमिमीमहे, यथा नायमनन्तरो दोषः प्रसज्येत। न ह्यनपेक्षस्वभावाः कूटस्थाश्चास्माभिर्गुणा अभ्युपगम्यन्ते; प्रमाणाभावात्, कार्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते।

यथा यथा कार्योत्पाद उपपद्यते, तथा तथैषां स्वभावोऽभ्युपगम्यते। चलं गुणवृत्तमिति चास्त्यभ्युपगमः। तस्मात् साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठन्ते—इति।।

एवमपि प्रधानस्य ज्ञशक्तिवियोगाद् रचनानुपपत्त्यादयः पूर्वोक्ता दोषास्तदवस्था एव। ज्ञशक्तिमपि त्वनुमिमानः प्रतिवादित्वान्निवर्तेत। चेतनमेकमनेकप्रपञ्चस्य जगत उपादानमिति ब्रह्मवादप्रसङ्गात्। वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्ताभावान्नैव वैषम्यं भजेरन्, भजमाना वा निमित्ताभावाविशेषात्सर्वदैव वैषम्यं भजेरन्निति प्रसज्यत एवायनन्तरोऽपि दोषः।।९।।

***विप्रतिषेधाच्चासमञ्जसम्*।।१०।।**

परस्परविरुद्धश्चायं साङ्ख्यानामभ्युपगमः। क्वचित् सप्तेन्द्रियाण्यनुक्रामन्ति, क्वचिदेकादश। तथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशन्ति, क्वचिदहङ्कारात्। तथा क्वचित्त्रीण्यन्तः करणानि वर्णयन्ति, क्वचिदेकमिति। प्रसिद्ध एव तु श्रुत्येश्वरकारणवादिन्या विरोधः, तदनुवर्तिन्या स्मृत्या च। तस्मादप्यसमञ्जसं साङ्ख्यानां दर्शनमिति।।

अत्राह—ननु-औपनिषदानामप्यसमञ्जसमेव दर्शनम्; तप्यतापकयोर्जात्यन्तरभावानभ्युपगमात्। एकं हि ब्रह्म सर्वात्मकं सर्वस्य प्रपञ्चस्य कारणमभ्युपगच्छतामेकस्यैवात्मनो विशेषौ तप्यतापकौ, न जात्यन्तरभूतावित्यभ्युपगन्तव्यं स्यात्। यदि चैतौ तप्यतापकावेकस्यात्मनो विशेषौ स्याताम्, स ताभ्यां तप्यतापकाभ्यां न निर्मुच्येत, इति तापोपशान्तये सम्यग्दर्शनमुपदिशच्छास्त्रमनर्थकं स्यात्। न ह्यौष्ण्यप्रकाशधर्मकस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्यते। योऽपि जलतरङ्गवीचीफेनाद्युपन्यासः, तत्रापि जलात्मन एकस्य वीच्यादयो विशेषा आविर्भावतिरोभावरूपेण नित्या एव, इति समानो जलात्मनो वीच्यादिभिरनिर्मोक्षः। प्रसिद्धश्चायं तप्यतापकयोर्जात्यन्तरभावो लोके। तथाहि—अर्थी चार्थश्चान्योन्यभिन्नौ लक्ष्येते। यद्यर्थिनः स्वतोऽन्योऽर्थो न स्यात्, यस्यार्थिनो यद्विषयमर्थित्वं स तस्यार्थो नित्यसिद्ध एव, इति न तस्य तद्विषयमर्थित्वं स्यात्, यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वं भवति। अप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति। तथाऽर्थस्याप्यर्थत्वं न स्यात्। यदि स्यात् स्वार्थत्वमेव स्यात्। न चैतदस्ति; सम्बन्धिशब्दौ ह्येतावर्थी चार्थश्चेति। द्वयोश्च सम्बन्धिनोः सम्बन्धः स्यान्नैकस्यैव। तस्माद् भिन्नावेतावर्थार्थिनौ। तथाऽनर्थानर्थिनावपि। अर्थिनोऽनुकूलोर्थः, प्रतिकूलोऽनर्थः, ताभ्यामेकः पर्यायेणोभाभ्यां सम्बध्यते। तत्रार्थस्याल्पीयस्त्वाद् भूयस्त्वाच्चानर्थस्योभावप्यर्थानर्थावनर्थ एवेति तापकः स उच्यते। तप्यस्तु पुरुषः, य एकः पर्यायेणोभाभ्यां सम्बध्यते, इति तयोस्तप्यतापकयोरेकात्मतायां मोक्षानुपपत्तिः, जात्यन्तरभावे तु तत्संयोगहेतुपरिहारात् स्यादपि कदाचिन्मोक्षोपपत्तिरिति।।

अत्रोच्यते–न; एकत्वादेव तप्यतापकभावानुपपत्तेः। भवेदेष दोषः, यद्येकात्मतायां तप्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयाताम्, न त्वेतदस्ति; एकत्वादेव। नह्यग्निरेकः सन् स्वमात्मानं दहति, प्रकाशयति वा सत्यप्यौष्ण्यप्रकाशादिधर्मभेदे परिणामित्वे च। किं कूटस्थे ब्रह्मण्येकस्मिंस्तप्यतापकभावः सम्भवेत्? क्व पुनरयं तप्यतापकभावः स्यादिति? उच्यते–किं न पश्यसि कर्मभूतो जीवद्देहः तप्यः, तापकः सवितेति? ननु–तप्तिर्नाम दुःखम्, सा चेतयितुः, नाचेतनस्य देहस्य। यदि हि देहस्यैव तप्तिः स्यात्, सा देहनाशे स्वयमेव नश्यतीति तन्नाशाय साधनं नैषितव्यं स्यात्–इति, उच्यते–देहाभावेऽपि केवलस्य चेतनस्य तप्तिर्न दृष्टा। न च त्वयाऽपि तप्तिर्नाम विक्रिया चेतयितुः केवलस्येष्यते। नापि देह-चेतनयोः संहतत्वम्; अशुद्ध्यादिदोषप्रसङ्गात्। न च तप्तेरेवं तप्तिमभ्युपगच्छसि॥

कथं तवापि तप्यतापकभावः? सत्त्वं तप्यम्, तापकं रज इति चेत्, न; ताभ्यां चेतनस्य संहतत्वानुपपत्तेः। सत्त्वानुरोधित्वाच्चेतनोऽपि तप्यत इवेति चेत्, परमार्थतस्तर्हि नैव तप्यत इत्यापतति; इवशब्दप्रयोगात्। न चेत तं्प्यते, नैव दोषाय। न हि डुण्डुभः सर्प इवेत्येतावता सविषो भवति, सर्पो वा डुण्डुभ इवेत्येतावता निर्विषो भवति। अतश्चाविद्याकृतोऽयं तप्यतापकभावः, न पारमार्थिक इत्यभ्युपगन्तव्यमिति, नैवं सति ममापि किञ्चिद् दुष्यति। अथ पारमार्थिकमेव चेतनस्य तप्यत्वमभ्युपगच्छसि, तवैव सुतरामनिर्मोक्षः प्रसज्येत; नित्यत्वाभ्युपगमाच्च तापकस्य॥

तप्यतापकशक्त्योर्नित्यत्वेऽपि सनिमित्तसंयोगापेक्षत्वात्तप्तेः संयोगनिमित्तादर्शननिवृत्तावात्यन्तिकः संयोगोपरमः, ततश्चात्यन्तिको मोक्ष उपपन्न इति चेत्, न; अदर्शनस्य तमसो नित्यत्वाभ्युपगमात्। गुणानां चोद्भवाभिभवयोरनियतत्वादनियतः संयोगनिमित्तोपरम इति वियोगस्याप्यनियतत्वात् साङ्ख्यस्यैवानिर्मोक्षोऽपरिहार्यः स्यात्। औपनिषदस्य त्वात्मैकत्वाभ्युपगमादेकस्य च विषयविषयिभावानुपपत्तेर्विकारभेदस्य च वाचारम्भणमात्रत्वश्रवणादनिर्मोक्षशङ्का स्वप्नेऽपि नोपजायते, व्यवहारे तु यत्र यथा दृष्टस्तप्यतापकभावः, तत्र तथैव सः, इति न चोदयितव्यः परिहर्तव्यो वा भवति॥१०॥ इति प्रथमं रचनानुपपत्त्यधिकरणम्॥

इति शाङ्करभाष्यम् रचनानुपपत्त्यधिकरणम् समाप्तम्

वार्तिकम्

रचनाऽनुपपत्तेश्च नानुमानम्।। परपक्षनिराकरणप्रधानमिदं प्रकरणम् आ पादसमाप्तेरारभ्यते। तस्य च प्रयोजनमतीतपादादावभिहितमस्माभिः, इति नात्र पुनर्वक्तव्यम्। भाष्यकारस्तु वेदान्ततात्पर्यनिर्णयपरे शास्त्रे परपक्षनिराकरणप्रधानप्रकरणस्य कोऽवसरः? इत्याशङ्क्य तत्प्रयोजनमाह- *यद्यपीत्यादिना*।। ऐदम्पर्यम्=तात्पर्यमित्यर्थः ; तात्पर्यनिर्णयस्यैतच्छास्त्रफलस्य स्वतः प्रयोजनशून्यत्वेन सम्यग्दर्शनार्थत्वात्, साङ्ख्यादिदर्शनानान्तु सम्यग्ज्ञानप्रतिपक्षत्वात् तन्निराकरणमन्तरेण तस्योदयासम्भवात्। अतस्तन्निराकरणमस्मिन् शास्त्रे युक्तमित्यभिप्रायः। एवं तर्हि तदेव शास्त्रादौ क्रियताम्, न तात्पर्यनिर्णय इति चेत्, तत्राह- *वेदान्तार्थनिर्णयस्य चेति*।। वेदान्तानां स्वार्थपरत्वनिर्णयस्येत्यर्थः। तेन न हेतुहेतुमतोरैक्यप्रसङ्गः। प्राथम्ये हेतुः- *तद्धीति*।। परपक्ष प्रत्याख्यानस्य तदर्थत्वादित्यभिप्रायः। स्वाशयं स्पष्टीकर्तुमाशङ्कामुत्थापयति- *नन्विति*।। किं परपक्षे श्रद्धाहीनस्य मुख्याधिकारिण एतदयुक्तमित्युच्यते, किं वा तत्र श्रद्धालवशालिनोर्मन्दमध्यमाधिकारिणोरिति। तत्राद्यस्त्विष्ट एव; तं प्रति तस्य वैयर्थ्यात्, वाढमेवमिति। द्वितीयस्तु पक्षो न सञ्जाघटीति, तच्छ्रद्धायाः सम्यगदर्शनप्रतिकूलत्वात् इत्याह- *तथापीति*।। एवमपि पूर्वेण गतार्थत्वम्, इत्याशङ्क्य परिहरति- *नन्वित्यादिना*।। *तत्र साङ्ख्या मन्यन्त इति*।। सर्वेषु तार्किकेषु मध्ये श्रेष्ठतमत्वात् साङ्ख्यानाम्, प्रथमं तन्मतोपन्यासः। श्रेष्ठतमत्वे च महाजनपरिग्रहो हेतुरित्युक्तम्।।

ते ह्यन्वयादिभिर्हेतुभिः स्वतन्त्रं प्रधानं जगदुपादानमिति वर्णयन्ति। तथा हि सुखदुःखमोहान्वयस्तावत् सर्वेषु भोग्येषु दृश्यते। तद् यथा-मैत्रदारेषु पद्मावत्यां मैत्रस्य सुखम्, तत्सपत्नीनां च दुःखम्, तामविन्दतश्चैत्रस्य च कामुकस्य मोहः-इति। पद्मावत्या सर्वे भावाः व्याख्याताः।।

ननु-सुखदुःखमोहा मैत्रादिभिरान्तरीणाः स्वस्वसत्त्वनिष्ठा उपलभ्यमाना दृश्यन्ते, न पद्मावतीनिष्ठाः, तत् कथं तस्याः सुखदुःखमोहान्वयः स्यादिति-चेत्, मैवम्; पद्मावत्या

एवेन्द्रियादिद्वारेण तत्तत्सत्त्वादिरूपायास्तत्तद्धर्माधर्मादिसहकारेण सुखदु:खमोहरूपेण परिणामाभ्युपगमात्। तदुक्तम्–"बुद्धिस्थमर्थं पुरुषश्चेतयते" इति। न च–सुखादिनिमित्तत्वमेव विषयस्य, न तत्परिणामित्वम्, तथाच न तदात्मकतेति–वाच्यम्; विषयस्य निमित्तत्वे सुखाद्यकारणतापत्तेः। न हि साङ्ख्यराद्धान्ते निमित्तं कार्यस्य कारणं भवति; तस्य प्रतिबन्धापगमहेतुत्वेनान्यथासिद्धत्वात्। तदुक्तम्–"निमित्तमप्रयोजकम्, प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्" इति। विषयस्य च सुखादिकारणत्वं सर्वसिद्धम्, अतस्तदुपादानत्वमेव युक्तम्। अपि च त्वयाऽपि बुद्धेरेव दर्शनविषयायाः सुखदु:खमोहरूपपरिणामभेदो वाच्यः, न त्वात्मनः; चितिशक्तेरपरिणामित्वस्योभयवादिसिद्धत्वात्। एवं च सति चिद्विषयत्वाविशेषाद् बहिर्विषयस्यापि सुखदु:खभेदात्मकत्वं कुतोऽवसीयते? परिणामित्वजडत्वयोरविशेषाच्च। तस्मात् सिद्धः सर्वस्य बाह्यान्तरीणविषयस्य सुखदु:खमोहान्वय इति। सुखं च सत्त्वकार्यम्, लघुत्वात्, दुखं रजःकार्यम्; घोरत्वात्, मोहस्तमःकार्यम्; आवरणात्मकत्वात्, इति सुखदु:खमोहान्वितत्वाद् भवति त्रिगुणान्वितं विश्वम्। यच्च यदन्वितमेव लोक उपलभ्यते, तत् तदुपादानं दृष्टम्; यथा–मृदन्वितं घटाद्युपलब्धम्, इति मृदुपादानकं तत्–इति। घटत्वादिसामान्ये व्यभिचार इति चेत्, न; अवान्तरोपादानसामान्यस्यैव घटत्वादिसामान्यरूपेण व्यवहारात् तदतिरिक्तजातिकल्पने प्रमाणाभावात्। त्रिगुणान्वितमेव च जगदुपलब्धम्, इति जगतोऽपि त्रिगुणात्मकं स्वतन्त्रं प्रधानं मृद्वदचेतनं कार्यानुरूपमुपादानम्, नात्मा; तस्यात्रिगुणात्मकत्वात्, चेतनत्वाच्च। अचेतनस्य निरभिसन्धित्वात् प्रवत्तिरनुपपन्नेति चेत्, न; करणवत् स्वभावादेव पुरुषार्थसाधनायाचेतनस्यापि प्रधानस्य प्रेरयितारं विना प्रवृत्त्युपपत्तेः। यथा हि चक्षुरादीनां करणानामचेतनानामपि स्वभावादेव प्रवृत्तावनागतावस्थो भोगापवर्गलक्षणः पुरुषार्थ एव हेतुः, न तेषां प्रेरयिता कश्चित् चेतनोऽस्ति; चेतनस्य भोक्तुः कूटस्थत्वेन तत्प्रेरकत्वानुपपत्तेः। तदुक्तम्–"पुरुषार्थ एव हेतुः, न केनचित् कार्यते कारणमि" ति, तद्वत् प्रधानस्यापि स्वभावादेव 'प्रवृत्तावनागतावस्थः पुरुषार्थ एव हेतुः, न तत्र चेतनः प्रेरयिताऽपेक्ष्यत इति। तस्मादुपपन्नम्–अन्वयात् प्रधानोपादानकं जगदिति॥

इतश्च प्रधानोपादानकं जगत्; परिमाणात्। यद्धि लोके परिमितं दृष्टम्, तत् कारणानां परस्परसंयोगपूर्वकमेव दृष्टम्; यथा–घटादि परिमितमुपलभ्यमानं मृद्दण्डचक्रादिकारणानां परस्परसंयोगपूर्वकमेवोपलभ्यते। परिमितं च महदादि जगत्, इति तदपि तथैव भवितुमर्हति। न चैतद् ब्रह्मकारणतापक्षे युज्यते; तस्याखण्डाद्वितीयत्वेन संसर्गाभावात्, प्रधानकारणत्वे तु सत्त्वरजस्तमसामनेकत्वेन परस्परसंसर्गसम्भवाद् भावानां संसर्गपूर्वकत्वं सिद्धयति॥

कार्यकारणभावादप्यचेतनमेव प्रधानं जगदुपादानम्; अचेतनानामेव मृद्घटादीनां

कार्यकारणभावदर्शनात्। तस्माद् अन्वयादिभ्यो हेतुभ्यः सिद्धं जगतः प्राधानिकत्वमिति।।

एवं प्राप्ते ब्रूमः-*रचनाऽनुपपत्तेश्च नानुमानमिति*।। किमत्र भावानां समन्वयादिभिर्हेतुभिः, मृदादिदृष्टान्तैश्च साध्यत इति वक्तव्यम्-किं गुणत्रयात्मकस्य जगदुपादानत्वमात्रम्, किं वा तस्य जगद्रचनायां चेतनाधिष्ठाननिरपेक्षत्वम्-इति। नोभयथाऽपि प्रधानकारणतावादः सिद्ध्यति। आद्ये तावत् त्रिगुणात्मिकां ब्रह्मणो मायाशक्तिमादाय सिद्धसाधनम्, अर्थान्तरं वा; "मायां तु प्रकृतिं विद्याद् मायिनं तु महेश्वरम्" "देवात्मशक्तिं स्वगुणैर्निगूढामि" त्यादिश्रुतेः, "दैवी ह्येषा गुणमयी मम माया दुरत्यये" ति स्मृतेश्च त्रिगुणात्मिकाया मायाशक्तेर्ब्रह्मण्यध्यस्ताया जगदुपादानत्वाभ्युपगमात्। द्वितीये तु विरुद्धम्; दृष्टान्तधर्मिणि मृद्धेमदार्वादौ घट-रुचक रथादिरचनायां चेतनाधिष्ठानसापेक्षत्वव्याप्तेर्दर्शनात्। न हि मृद्धेमदार्वादयः कुम्भकार-हेमकार रथकाराद्यधिष्ठान निरपेक्षा एव सन्तो घट-रुचक-रथादिरचनाः कदाचिदपि कुर्वन्तो दृश्यन्ते।।

एतेन-दृष्टान्तधर्मिण्यचेतनं तावदुपादानं दृष्टम्, तत्र यद्यपि तत् चेतनप्रयुक्तमपि दृश्यते, तथापि तत्प्रयुक्तत्वं हेतोरप्रयोजकम्; बहिरङ्गत्वात्, अन्तरङ्गत्वात्त्वचैतन्यमात्रमुपादानगतं हेतोः प्रयोजकम्, यथाहुः-"व्याप्तेस्तु दृश्यमानायाः कश्चित् धर्मः प्रयोजकः" इति-अपास्तम्; प्रयोज्य-प्रयोजकभावस्य व्याप्तिमूलत्वात्, चेतनप्रयुक्तत्वव्याप्तेस्तत्वन्वय-व्यतिरेकाभ्यां शङ्कितारोपितो-पाध्यभावनिश्चयेन दृष्टान्ते धर्मिणि हेतावुपादानगताचैतन्यव्याप्त्यपेक्षयाऽतिस्फुटेत्वस्य प्रदर्शितत्वात्, अन्तरङ्गत्व-बहिरङ्गत्वयोस्तद्भावाभावाप्रयोजकत्वात्। तदिदमुक्तम्-*न च मृदाद्युपादान-स्वरूपाश्रयेणैव धर्मेण मूलकारणमवधारणीयम्, न बाह्यकुम्भकारादिव्यपाश्रयेणेति किञ्चित् नियामकमस्तीति*।। व्याप्तेरुभयधर्माप्रयुक्तत्वे सतीति शेषः। अपि च व्याप्तिसत्त्वेऽपि चेतनप्रयुक्तत्वमुपादानस्य नाभ्युपगम्येत, यदि प्रमाणान्तरात् तद्बाधः स्यात्, न चैवमस्ति, प्रत्युत श्रुतिप्रमाणमनुकूलतर्कतयाऽनुगृह्यते; श्रुतिसिद्धचेतनकारणतावधारणात्। तस्मात् स्वतन्त्रादचेतनाद् रचनानुपपत्तेश्च हेतोर्नोक्तहेतुभिरनुमानमचेतनस्य जगत्कारणस्य युक्तमिति।।

'रचनानुपपत्तेरि'त्यनेन परोक्तहेतुषु विरुद्धत्वमुद्भावितम्, चेतने तेषामसिद्धत्वमनैकान्तिकत्वं च यथायोगं समुच्चिनोति। कथम्? इत्थम्-यस्तावत् अन्वयादिति हेतुः, स सर्वेषु बाह्याध्यात्मिकभेदेष्वसिद्धः ; सुखादीनामान्तरत्वप्रतीतेः। आत्मनिष्ठं हि सुखादिकमनुभूयते, न विषयनिष्ठम्; इन्द्रियालोचनादिप्रणालिकयाऽऽत्मनि विषयोपसर्पणात् तथाऽनुभव इति चेत्, मैवम्; तादृशप्रणालिकाकल्पने प्रमाणाभावात्, विषयान्वयव्यतिरेकाभ्यां सुखाद्यन्वयव्यतिरेकदर्शनात्। अनन्यथासिद्धान्वयव्यतिरेकावेव तत्र प्रमाणमिति चेत्, न; सुखादिनिमित्त-त्वेनान्वयव्यतिरेकयोरन्यथासिद्धेः।।

एतेन–निमित्तमनन्वयित्वादकारणमिति अपास्तम्; अनन्वयिनोऽपि घटं प्रति दण्डादेर्निमित्तस्य कारणलक्षणसत्त्वेन कारणत्वोपगमात्, अन्वयिनोऽपि कपालरूपादेः कारणलक्षणाभावेन तदनभ्युपगमात्। न च–निमित्तस्य प्रतिबन्धापगमहेतुत्वेनान्यथासिद्धेर्न तल्लक्षणमस्तीति–वाच्यम्; सामग्र्यां सत्यामपि प्रतिबन्धात् कार्यानुत्पाददर्शनात् तस्य तदपगमहेतुत्वासिद्धेः। उपादानस्य कार्यविरोधिपरिणामान्तरापसारणं निमित्तेन क्रियत इति चेत्, न; सामग्र्याः स्वकार्यजनने तद्विरोधिपरिणामान्तरस्य तत एव विनाशोपपत्तेः, अन्यथा निमित्तवद् उपादानस्यापि पूर्वपरिणामापनयहेतुत्वेनान्यथासिद्धेर्वक्तुं शक्यत्वाद् अकारणकसर्वकार्योत्पत्तिः स्यात्। प्रमाणविरोधस्तूभयत्र तुल्यः। अपि च यदि निमित्तकारणमेव प्रतिबन्धापगमस्यापि कारणम्, तर्हि कथं स्यात्? तस्य तन्निमित्तजन्यत्वाभ्युपगमे किमपराद्धं भावकार्येण? एतेन–निमित्तस्य प्रतिबन्धापगमरूपत्वम्–प्रत्युक्तम्; भावस्याभावत्वानुपपत्तेश्च। तस्माद् बाह्याध्यात्मिकानां विषयाणां सुखादिनिमित्तत्वमेव, नोपादानत्वम्॥

ननु–एवं तर्हि बुद्धेरपि सुखादिपरिणामो न स्यात्, मैवम्; तत्रोपलभ्यमानत्वेन सुखादेस्तत्परिणामत्वोपपत्तेः। न ह्येकत्रोपलब्धो यः परिणामभेदः, सोऽन्यत्रापि तदयोग्ये विषयत्वाविशेषेणानुमातव्यो भवति; योग्यानुपलब्धिविरोधात्, सर्वत्र सर्वकार्यप्रसङ्गाच्च। एतेन–त्रिगुणात्मकत्वेन सर्वभावानां सुखादिरूपत्वमपि–प्रत्युक्तम्; योग्यानुपलब्धिविरोधात्, सर्वेषां सर्वदा सुखादिरूपेण सर्वविषयानुभवप्रसङ्गाच्च। यदि विषयः सुखं स्यात्, तर्हि सर्वैः सर्वदा सुखतयैवानुभूयेत। न चैवमस्ति; हेमन्तादौ तस्य तथात्वाननुभवात्। तस्माद् दृष्टान्तस्य साधनविकलत्वाद् असिद्धोऽयं सुखदुःखमोहान्वयलक्षणो हेतुः। 'भावनाविशेषादि' त्युपलक्षणम्–देशकालजात्यदृष्टविशेषाणामिति द्रष्टव्यम्॥

यस्तु परिमितत्वं भावानां संसर्गपूर्वकत्वे हेतुरुक्तः, सोऽपि यदि योजनानिमित्तत्वमुच्यते, तद् न नभआदौ वर्तते, इति भागासिद्धो हेतुः स्यात्। अथ–स्वसत्तामतिक्रम्य वर्तमानेन वस्तुना, सह वर्तनं तत्, नभआदीनां च स्वसत्तामतिक्रम्य वाय्वादिकार्यापत्तेरपि वर्तनेन शब्दतन्मात्रादिना कारणेन सह वर्तनाद् नाव्यापको हेतुः–इति, एवमप्यनैकान्तिकत्वं हेतोः; सत्त्वरजस्तमःसु संसर्गपूर्वकत्वाभावेऽपि हेतुसत्त्वात्, तेषां परस्परसत्तामतिक्रम्य स्वस्वकार्यसाम्यावस्थयाविवर्तमानानां परस्परं सहवर्तनस्य सत्त्वात्। येन हि य आविष्टः, स तत्सत्तां नातिक्रामति। कारणेन तु कार्यमाविष्टम्, इति कार्यं कारणसत्तां नातिक्रामति, कारणं तु न कार्येणाविष्टम्, इति कार्यसत्तामतिक्रम्य कार्यान्तरे स्वरूपेणावतिष्ठते। गुणानां तु परस्परकार्यकारणभावाभावाद् न परस्परमावेशोऽस्ति। तदभावाच्च परस्परसत्तामतिक्रम्य स्वकीयकार्ये स्वरूपे वा साम्यावस्थायां वर्तमानत्वम्, अथ च परस्परं

सहवृत्तिरप्यस्ति। अतस्तत्रापि परिमितत्वसत्त्वाद् व्यभिचारः। अव्यभिचारे वा तेषामपि संसर्गपूर्वकत्वप्रसङ्गः। अथ स्वासंसृष्टवस्तुमत्त्वं परिमितत्वं ब्रूमः, गुणानां च परस्परकार्यकारणभावाभावेऽपि परस्परसंसर्गित्वाद्वा न स्वासंसृष्टवस्तुमत्त्वमस्ति। कार्या हि पुरुषाः गुणैस्तत्कार्यैश्चा....येणां (?) च कारणसंसर्गित्वेऽपि परस्परसंसर्गाभावादस्ति तदिति चेत्, एवमप्यनैकान्तिकत्वाद् न निस्तारोऽस्ति। चितिशक्तयो हि पुरुषा गुणैस्तत्कार्यैश्चारंसृष्टाः, गुणाश्च ताभिरिति शक्तीनां गुणानां च स्वासंसृष्टवस्तुमत्त्वेन परिमितत्वप्रसङ्गः। गुणानां तदभावाद् व्यभिचारतादवस्थ्यात्। कदाचिदासीदिति चेत्, एवं सति कार्याणामपि कदाचित् परस्परमविवेककृतसंसर्गसंभवाद् अपरिमितत्वप्रसङ्गः। तस्मात् यत्किञ्चिदेतत्॥

योऽप्यचेतनानामेव मृदादीनां घटादीनां च कार्यकारणभावो दृष्टः, इति कार्यकारणभावः प्रधानकारणतायां हेतुरुक्तः, सोऽपि समन्वयवद् विरुद्धो द्रष्टव्यः ; प्रेक्षापूर्वकनिर्मितेषु शयनासनादिषु कार्यकारणभावदर्शनादिति॥१॥

प्रवृत्तेश्च॥२॥ चकारादनुपपत्तेरिति पूर्वसूत्रादनुषज्यते। न केवलं चेतनानधिष्ठिताद् अचेतनात् कार्यानुपपत्तिरेव, किं तर्हि? महदादिकार्यसिद्ध्ये या गुणानामाद्या प्रवृत्तिः सामयावस्थां हित्वा गुणप्रधानभावापत्तिः, तस्या अप्यनुपपत्तिः। न हि सत्त्वरजस्तमसामचेतनत्वेन स्वतोऽसमीक्ष्यकारिणामपि चेतनावताऽनधिष्ठितानां स्वस्वकार्यारम्भायोद्भवाभिभवाभ्यामङ्गप्रधानभावलक्षणा प्रवृत्तिर्विशिष्टकालनियता वोपपद्यते; विशिष्टकार्याय तददर्शनात्, वैपरीत्येन तद्दर्शनात्। न च–चक्षुरादिकरणवद् अचेतनस्य स्वतः प्रवृत्तिर्न विरुद्ध्यत इति–वाच्यम्; चक्षुरादीनां प्रवृत्तौ प्रमात्रधिष्ठानस्य प्रतिकर्मव्यवस्थायामुपपादितत्वात्। तस्मात् चेतनाधिष्ठानं विना रचनानुपपत्तिवद् अचेतनानां तदर्थं प्रवृत्त्यनुपपत्तेरपि दर्शनात् ''शक्तितः प्रवृत्तेः'' इति (यः) साङ्ख्यानां प्रधानसाधकहेतुः, सोऽन्वयादिहेतुवद् विरुद्ध्यत इत्यभिप्रायः॥

''ननु–चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टे''ति भाष्यम्॥ तस्य कोऽभिप्रायः? त्वया किलौपनिषदेनास्मद्धेतून् दूषयित्वा केवलचैतन्यस्यैवान्यनिरपेक्षस्य जगदुपादानत्वं निमित्तत्वं च समर्थनीयम्। न चैतदुपपद्यते। केवलस्य कार्यकरणसङ्घातायुक्तस्य चेतनस्य प्रवृत्तेर्दृष्टान्तधर्मिण्यनुपलब्धेरित्यभिप्राय इति चेत्, मैवम्; न ह्यौपनिषदेन ब्रह्मकारणत्वं साङ्ख्यवद् दृष्टान्तानुसारेण समर्थ्यते, येन तत्र तदनुपलब्धिर्दोषः स्यात्, औपनिषदत्वव्याघातादिति चेत्, न व्याघातः ; उपनिषदर्थसंभावनार्थं सामान्यतोदृष्टानुमानस्यापेक्षणादित्यसकृदावेदितत्वात्, ''श्रोतव्यो मन्तव्यः'' इति श्रुतेः। तदादाय वर्णिताभिप्रायकचोद्योपपत्तेरिति॥

सिद्धान्ती पुनर्नास्माभिः केवलस्य चिदेकरसस्य ब्रह्मणः प्रवृत्तिरभ्युपगम्यते; तस्य निष्क्रियत्वात्। किं तर्हि? कार्यकरणसङ्घातवत् तत्संयुक्ताया अविद्याप्रत्युपस्थापितनामरूपबीज़भूतमायाशक्तेरेव तदधिष्ठिततया प्रवर्तकत्वाद् ब्रह्मणो जगद्रचनायां प्रवृत्तिः श्रुतिस्मृतिवादेषु व्यपदिश्यते। तद्यथा–लोके 'रथी रथेन गच्छती' त्यत्र रथनिष्ठा गमनक्रिया स्वतो गमनहीना, इति रथिनि व्यपदिष्यते, यथा वा 'राजा योधैर्युध्यती' त्यत्र योधनिष्ठा युधिक्रिया राजनि। तत् कस्य हेतोः? तदधिष्ठातृत्वेन तत्प्रवर्तकत्वात् तयोः, तद्वत्। अतोऽस्मान् प्रति निरनुयोज्यानुयोगमात्रं भवत इत्यभिसन्धिराह–*सत्यमेतत्; तथापीति*॥

चोदकस्तु स्वतः प्रवृत्तिहीनस्य प्रवर्तकत्वमनुपपन्नमित्यभिप्रेत्य नैतावता चेतनस्य प्रवृत्तिर्दृष्टा भवतीति पुनश्चोदयति–*न त्विति*॥ तुशब्दोऽवधारणे, नेत्यर्थः। सिद्धान्ती स्पष्टीकर्तुं स्वाभिप्रायं प्रश्नपूर्वकं विमृशति–*किं पुनरत्र युक्तमिति*॥ *उत यत्संप्रयुक्तस्येति*॥ यदधिष्ठितस्येत्यर्थः। चोदकस्तु पुनः स्वाभिप्रायेण पूर्वपक्षं गृह्णाति–*ननु यस्मिन् दृश्यत इति*॥ उभयोः=रथतत्प्रवृत्त्योरित्यर्थः। चेतनस्याप्रत्यक्षत्वमेव श्रावयति–*प्रवृत्त्याश्रयदेहादीति*॥ न सद्भावमात्रेण तथा प्रवृत्तिहेतुत्वसिद्धिः, आकाशस्य सर्वत्र सद्भावेन सर्वनिमित्तत्वप्रसङ्गादित्यभिप्रायः। अत एव=चेतने रथादिवैलक्षण्यदर्शनादित्यर्थः। देहादिव्यतिरिक्तचेतनस्य प्रवृत्त्याश्रयत्वादर्शनादिदिति वार्थः॥

सिद्धान्ती तु स्वाभिप्रायं विवृण्वन् परिहरति–*तदभिधीयत इति*॥ तत्=तत्र पूर्वपक्षविषये समाधानम्–*अभिधीयते*॥ अस्माभिरिति शेषः॥

न तावद् देहादिव्यतिरिक्तः प्रत्यक्षानुमानागमसिद्धः शारीरो वा परमात्मा वाऽस्माभिरिदानीं साधनीयः, केवलमस्य प्रवृत्तिं प्रति हेतुत्वं प्रदर्शनीयम्। तत्र मृतशरीरे रथादौ वा चेतनेनानधिष्ठिते प्रवृत्तेरदर्शनात् तद्विपर्यये च दर्शनाद् अन्वयव्यतिरेकाभ्यां चेतनस्य प्रवृतिहेतुत्वं निश्चीयते, न तु सद्भावमात्रेण, येनाकाशादेरपि सर्वत्रान्वयमात्रेण हेतुत्वप्रसङ्गः स्यात्। अपि च लोकायतिकोऽपि चेतनतन्त्रामेवाचेतनप्रवृत्तिं मन्यते, साङ्ख्यस्तु ततोऽप्यविवेकीत्याह–*लोकायतिकानामपीति*॥

एवं तावद रथादिवद् मूलकारणस्याप्यचेतनस्य चेतनाधीनप्रवृत्तिकत्वं साधितम्, तत्र दृष्टान्तासिद्धिमाशङ्कते–*ननु तव देहादिसंयुक्तस्यापीति*॥ स्वयं प्रवृत्त्याश्रय एव देहो रथादिप्रवर्तको दृष्टः, स तु न साक्षात् चेतनः यस्तु तद्व्यतिरिक्तः साक्षात् चेतनः, स तु तव मतेऽसङ्गतया प्रवृत्तिहीनः, इति कथं प्रवर्तकः स्यात्? इति बोध्यार्थः। न देहमात्रमचेतनं रथादिप्रवर्तकम्; मृतशरीरे तददर्शनात्। किं तर्हि? अनवंयव्यतिरेकाभ्यां प्रवृत्तिहीनमपि देहसंयुक्तं चैतन्यमेव

रथादिप्रवर्तकमित्यभिप्रेत्य पराभिमतं नियमं पराभिमतेन दृष्टान्तेन व्यभिचारयति- *न; अयस्कान्तवत्, रूपादिवच्चेति*।। 'अयस्कान्तवदि' ति तार्किकादिसाधारणो दृष्टान्तः, 'रूपादिवदि' ति साङ्ख्यानामेव। तेषां हि स्वदेशस्था रूपादय इन्द्रियं विकुर्वन्ति। विकुर्वच्च तदिन्द्रियमर्थं प्राप्तं सदर्थालोचनाकारेण परिणमत इति स्थितिः, अस्माकं तु चेतनाधिष्ठानं विना न कुत्रापि प्रवृत्तिरस्तति नियमात् तत्रापि चेतनस्यैव सर्वान्तर्यामिणः प्रवर्तकत्वं द्रष्टव्यम्।।

एवमपि प्रवर्त्याभावाद् न ब्रह्मणः सर्गाद्यकाले प्रवर्तकत्वं संभवतीति पूर्वपक्षी स्वाभिसन्धिं प्रकटीकरोति- *एकत्वात्प्रवर्त्याभाव इति*।। सिद्धान्ती परमाभिसन्धिमाविष्कुर्वन् परिहरति- *नेति*।। स्वमतोपपादनेन परमते दोषमुपसंहरति- *तस्मादिति*।।२।।

पयोऽम्बुवच्चेत् तत्रापि।।३।। यदुक्तम्-चेतनाधिष्ठानं विना प्रवृत्त्यनुपपत्तेः "शक्तितः प्रवृत्तेः" इति प्रधानसाधको हेतुर्विरुद्धः-इति, तदयुक्तम्; यतः=विरुद्धव्याप्तेः पयोऽम्बुनोर्व्यभिचारात्, पयसोऽचेतनस्य वत्सविवृद्ध्यर्थम्, अम्बुनश्च लोकानुग्रहार्थं स्वभावत एव चेतनमनपेक्ष्य प्रवृत्तिदर्शनात् तद्वत् प्रधानस्यापि पुरुषार्थसिद्धये स्वभावतः प्रवृत्तिरविरुद्धेति चेद् भवान् मन्यते, नैवं मन्तव्यं भवता; यतः=तत्रापि पयसि अम्बुनि च रथादिदृष्टान्तेनास्माभिश्चेतनाधिष्ठानस्य साध्यमानत्वात्, "योऽप्सु तिष्ठन्" इत्यादिशास्त्रेण तत्रापि सर्वत्र चेतनाधिष्ठानस्य सिद्धत्वाच्च, पयसि च चेतनधेन्वादिप्रयुक्तेः प्रत्यक्षसिद्धत्वाच्च। न हि साध्ये साध्यसमे वा सपक्षे वा व्यभिचारो हेतोरुद्भाव्यते; तथा सति सर्वानुमानोच्छेदप्रसङ्गः। "तस्मात् साध्यपक्षनिक्षिप्तत्वादि"ति भाष्यमुपलक्षणपरं सपक्षपक्षनिक्षिप्तत्वादित्यपि द्रष्टव्यम्।।

ननु-"उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धी" त्यत्रान्यनिरपेक्षं दध्यादिपरिणामहेतुत्वं क्षीरस्य दर्शितम्, इह च तद्विरुद्धं चेतनसापेक्षत्वम्, इति पूर्वोत्तरवाक्यव्याहतिः सूत्रकर्तरीति-चेत्, नैष दोषः; बाह्यसहकारिकारणनिरपेक्षत्वमात्रस्य क्षीरस्य दध्यादिपरिणामे तत्र दर्शितत्वात्, न त्वान्तरचेतनकारणादिनिरपेक्षत्वमपि तत्र दर्शितमिति निरवद्यम्। तस्मादस्ति साङ्ख्यीयहेतौ विरोध इति।।३।।

व्यतिरेकानवस्थितेश्चानपेक्षत्वात्।।४।। सुगममस्य भाष्यम्। व्यतिरेकानवस्थितेरित्यनुपपन्नम्; विचित्रकर्मवासनायाः प्रधानव्यतिरिक्तायाः सर्गाद्यकाले साङ्ख्यैः सत्त्वाभ्युपगमात्। अत एवानपेक्षत्वादित्यनुपपन्नम्; तदपेक्षयैव प्रधानस्य विचित्रपरिणामाभ्युपगमादिति-चेत्, तत्र केचित् समाधानं ब्रुवते-सत्यं सन्ति विचित्राः कर्मवासनाः ; तथापि न ताः सर्गस्येशते। कुतः? तासां सर्गं प्रति निमित्तत्वाभ्युपगमात्। तथा हि-प्रधानमेव सर्गकार्ये प्रवर्तमानमधर्मप्रतिबद्धं सद् न सुखमयीं

सृष्टिं कर्तुमुत्सहते, इति धर्मेणाधर्मप्रतिबन्धोऽपनीयते, एवमधर्मेण धर्मप्रतिबन्धोऽपनीयते। दुःखमय्यां सृष्टौ स्वयमेव प्रधानमनपेक्षं सत् तत्सृष्टौ प्रवर्तते। तदुक्तं पतञ्जलिना—"निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्।" इति। निमित्तम्=धर्मादि। प्रकृतीनाम्=मूलप्रकृतेः प्रधानस्य, महदादीनां च प्रकृतिविकृतीनाम्। अप्रयोजकम्=स्वकार्ये सर्गे। अप्रयोजकम्=न सहकारि स्वकार्ये सर्गे। किं तर्हि? वरणस्य=प्रतिबन्धकस्य। भेदः=भङ्गः। ततः=निमित्ताद् भवति। क्षेत्रिकवत्=यथा हि क्षेत्रकारी केदारादपां पूर्णात् केदारान्तरं समं निम्नं वा पिप्लावयिषुरपो न पाणिनाऽपकर्षति, किन्तु वरणं तासां भिनत्ति। भिन्ने तस्मिन् स्वयमेवापः केदारं प्लावयन्ति, तद्वदित्यर्थः—इति, तदयुक्तम्; निमित्तस्यातन्त्रस्य जननकारणत्वाभावेऽपि प्रतिबन्धापगमसिद्धये तदपेक्षत्वावश्यकत्वात्, प्रतिबन्धे सति प्रकृतीनां परिणामानुदयात्, निमित्तस्योपादानव्यतिरेकित्वाच्च "व्यतिरेकानवस्थितेरि"त्यस्यानुपपत्तेरपरिहार्यत्वाच्च॥

अत्र ब्रूमः—यदि कर्मवासनाः प्रलयकाले सर्गकाल इव मूलप्रकृतेर्विविच्यन्ते, तर्हि वैषम्यसत्त्वाद् न प्रधानावस्था भवेत्। अतः साम्यावस्थासिद्ध्यर्थं महदादिकार्यवत् तासामप्यविवेकः प्रधानेऽवश्यमभ्युपगन्तव्यस्तैः। तत्रेदमवतिष्ठते—"व्यतिरेकानवस्थितेश्चानपेक्षत्वादि"ति॥४॥

यथा धेन्वोपयुक्तं तृणपल्लवादि स्वभावादेव निमित्तान्तरमनपेक्ष्य क्षीरीभवति, एवं प्रधानमपि चेतनमचेतनं वा निमित्तान्तरमनपेक्ष्य स्वभावादेव महदादिरूपमनुभविष्यति। अतो न साम्यावस्थाविरोधः, नापि कारणतापत्तिः—इति यदि साङ्ख्यो ब्रूयात्, तत्रोत्तरम्—इदं सूत्रम्—*अन्यत्राभावाच्च न, तृणादिवत्*॥५॥ न तृणादिवदपि प्रधानस्य निमित्तमनपेक्ष्य स्वभावादेव परिणामो युक्तः ; यतः=तृणादेरपि क्षीरीभवनाय धेन्वाद्युपभोगलक्षणनिमित्तापेक्षितया दृष्टान्तस्य साध्यविकलत्वात्। कुत एतदवगम्यते—चेतनधेन्वोपभोगलक्षणनिमित्तापेक्षित्वं क्षीरपरिणामे तृणादेः—इति? यतः=अन्यत्राभावात्=धेनूदरादन्यत्र=अनडुहाद्युदरे गृहक्षेत्रादौ वा विद्यमानस्य तृणादेः क्षीरपरिणामाभावात्। तस्मादसदेतत्—यत् तृणादिवद् निर्निमित्तः प्रधानस्य स्वत एव परिणामः इति॥५॥

अभ्युपगमेऽप्यर्थाभावात्॥६॥ अभ्युपेत्यापि स्वभावात् प्रधानस्य प्रवृत्तिमेवं ब्रूमः—अस्तु वा प्रधानस्य निर्निमित्ता प्रवृत्तिः ; तथापि प्रयोजनाभावाद् निष्फलैव सा स्यात्। सफलत्वे चाभ्युपगम्यमाने तद्वत् सनिमित्तत्वमपि स्यात्; अपेक्षाया उभयत्र तुल्यत्वात्। सापेक्षत्वे च स्वाभाविकत्वं व्याहतम्। निरपेक्षा हि प्रवृत्तिः स्वाभाविकीत्युच्यते। सा चेत् प्रयोजनवत्यभ्युपगता, हन्त तत्सापेक्षत्वात् स्वाभाविकत्वं प्रवृत्तेर्व्याहतं भवेत्। अथ—सहकारिनिरपेक्षत्वमात्रं प्रवृत्तेः

स्वाभाविकत्वमुच्यते, न प्रयोजननिरपेक्षत्वमपि; प्रवृत्तेः सप्रयोजनत्वनियमादिति–चेत्, एवमपि कस्य वा प्रयोजनं प्रधानं प्रवृत्त्या साधयतीति वक्तव्यम्–स्वस्येति चेत्, तस्य जडत्वेन प्रयोजनानभिसम्बन्धात्। पुरुषस्येति चेत्, सत्यम्; किं तत् प्रयोजनम्? किं भोगः, किं वाऽपवर्गः, आहोस्विदुभयम्–इति। आद्येऽपि किं तात्त्विको भोगः, उतातात्त्विक इति। न तावदाद्यः ; अनाधेयातिशयस्य पुरुषस्य तात्त्विकभोगानुपपत्तेर्विरोधात्।।

ननु–विषयाकारपरिणतायां बुद्धावात्मचैतन्यस्य प्रतिबिम्बो भोग इत्युच्यते, स चात्मस्वयपादपृथक्त्वाद् नागन्तुकातिशयः, अतो विरोधाभावाद् अनाधेयातिशयस्यापि तदुपपत्तिरिति–चेत्, मैवम्; भोक्तृचैतन्याद् भोगस्यापृथक्त्वे भोक्तृ-भोगविभागव्यवहारानुपपत्तेः। अपृथक्त्वेऽप्युपाधितस्तद्व्यवहारोपपत्तिरिति–चेत्, एवं सति काल्पनिक एव स स्यात्, न तात्त्विकः बुद्धिवृत्त्युपाधेः पारमार्थिकत्वात् पारमार्थिकः स इति चेत्, न; दर्पणोपाधेः सत्यत्वेऽपि मुखद्वित्वस्य मिथ्यात्वात् अविवेकात् द्वित्वव्यवहारः परम्, न मिथ्याद्वित्वं तत्रोत्पद्यत इति चेत्, न; अख्यातिनिराकरणेनानिर्वचनीयख्यातेस्तत्र प्रदर्शितत्वात्। अपि च भोग्यबुद्धिवृत्त्यविवेकाद् भोग्यमेव तच्चैतन्यं स्यात्, न भोग इति। एतेन–तयोरविवेक एव भोग इति–अपास्तम्; विवेकज्ञानप्रागभावलक्षणस्याविवेकस्यानादित्वेन सर्वदा भोगप्रसङ्गात्। तथा च स्वापाद्यभावप्रसङ्गः। अस्तु तर्हि अतात्त्विक एवात्मनो भोग इति चेत्, न; अनिर्वचनीयख्यात्यनभ्युपगमात्, अभ्युपगमे वाऽस्मन्मतप्रवेशापत्तेः। अपि च भोगस्य काल्पनिकत्वे भोक्तृत्वमपि तदधीनमात्मनः कल्पितं स्यात्। तथाचापसिद्धान्तः। अपि चास्तु वा पुरुषस्य प्रधानकृतो भोगो यथा तथा; एवमप्यनिर्मोक्षप्रसङ्गो दुर्वार एव। येन हि प्रयोजनेन प्रधानं प्रवर्तितम्, तदनेन कर्तव्यम्, भोगेनैव तत् प्रवर्तितम्, इति तमेव कुर्यात्, न मोक्षम्; तेनाप्रवर्तितत्वात्। अथापवर्गः प्रधानप्रवृत्तेः प्रयोजनमिति द्वितीयः पक्षः, सोऽपि किं पुरुषस्य स्वरूपावस्थितिलक्षणो वा स्यात्, तत्साधनभूतविवेकख्यातिलक्षणो वा। नाद्यः ; तत्प्रवृत्तेः पूर्वमपि तस्य स्वतः सिद्धत्वात् तदर्थं प्रधानप्रवृत्तेरनर्थकत्वात्। न हि छिन्नमेव वृक्षं पुनश्छेत्तुमर्हति कश्चित्; तद्व्यापारात् प्रागेव तस्य छिन्नत्वात्, तद्वत्। एतेन–तत्साधनभूतविवेकख्यातिलक्षणोऽ-पवर्गस्तत्प्रयोजनमिति–अपास्तम्; तस्य स्वतोऽपुरुषार्थत्वात्, तत्साध्यस्य च प्रधानप्रवृत्तेः प्रागेव सिद्धत्वादित्युक्तत्वात्।।

एतेन–उभयार्थताऽपि–प्रत्युक्ता। अपि च किं प्रधानप्रवृत्तेः पुरुषस्य भोगापवर्गौ युगपत् स्याताम्, क्रमेण वा। नाद्यः ; विरोधात्। द्वितीयेऽपि किं यत्किञ्चिद् विषयभोगं जनयित्वा भोगं साधयति, कृत्स्नविषयभोगं वा। न तावदाद्यः ; सकृत् शब्दादिविषयोपलक्षणभोगानन्तरमेवानायासेन

सर्वमोक्षप्रसङ्गात्। नापि द्वितीयः ; भोक्तव्यानां प्रधानकार्याणामनन्तत्वेन भोगासमाप्तेरनिर्मोक्ष प्रसङ्गात्।।

ननु–यद्यपि सकृत् शब्दादिविषयोपलम्भाद् भोगः समाप्तः ; तथापि प्रधानस्य भोगार्थं न पुनरप्रवृत्तिः ; तत्त्वज्ञानमन्तरेण मोक्षासिद्धेः, अर्वाग् मोक्षाद् भोगस्यावश्यकत्वादिति–चेत्, मैवम्; सकृत् शब्दाद्युपलम्भं जनयित्वा निवृत्ते प्रधाने स्वत एव मोक्षसिद्धेस्तदर्थं विवेकख्यात्यपेक्षाया अयुक्तत्वात्। एतेन–औत्सुक्यनिवृत्त्यर्थं प्रधानस्य प्रवृत्तिरिति–अपास्तम्; तस्य चेतनधर्मत्वेन प्रधानेऽसंभवात्।।

पुरुषस्य तदिति चेत्, तस्यापि त्वव मते निर्धर्मत्वेन तदसंभवात्। दृक्शक्ति-सर्गशक्तिवैयर्थ्यात् प्रवृत्तिरिति चेत्=अथैवं मन्यसे–पुरुषो हि दृक्शक्तिरूपोऽभ्युपगम्यते। तदुक्तम्–"चितिशक्तिरपरिणामिनी पुरुषः" इति। सा च दृश्यमन्तरेणानर्थिका स्यात्। न च स्वात्मनैवार्थः स्यात्; स्वात्मनि वृत्तिविरोधात्। प्रधानं च सर्गशक्तिः। तदुक्तम्–"दृश्यं च गुणवृत्तमि"ति। सा च सर्जनीयमन्तरेणानर्थिका स्यादिति। यत् प्रधानेन शब्दादि सृज्यते, तदेव दृक्शक्तेर्दृश्यं भवति, इति तदुभयार्थवत्त्वाय सर्गार्थं प्रधानप्रवृत्तिरिति, तन्न; एवं सति दृक्शक्त्यनुच्छेदवत् सर्गशक्त्यनुच्छेदादनिर्मोक्षप्रसङ्गः। यथा हि दृक्शक्तेरपरिणामित्वाद् नित्यत्वाच्चानुच्छेदः, तथा सर्गशक्तेरपि परिणामिनित्यत्वाभ्युपगमाद् अनुच्छेदात् अनिर्मोक्ष एव स्यात्; अन्यथोभयशक्तिवैयर्थ्यापत्तेः। सर्गशक्तेः पुरुषान्तरमादायावैयर्थ्येऽपि मुक्तदृक्शक्तेर्वैयर्थ्या-वश्यकत्वात्। न च–तत्कालेऽस्तु तद्वैयर्थ्यमिति–वाच्यम्; दृक्शक्ति-तद्विषययोः सत्त्वे तत्सम्बन्धावश्यकत्वात्, अन्यथा तच्छक्त्युच्छेद एव भवेत्। तथाचात्मनो मोक्षः साधु समर्थितः स्यात्।।६।।

पुरुषाश्मवदिति चेत्तथापि।।७।। नैव दोषाद् निर्मोक्षोऽस्तीति सूत्रशेषः। मा भूत् पुरुषार्थस्य, दृक्शक्ति-सर्गशक्त्यर्थवत्त्वस्य वा प्रवर्तकत्वम्, पुरुष एव तु दृक्शक्तिसंपन्नः पङ्गुवत् प्रवृत्तिशक्तिसंपन्नं प्रधानम्, अन्धमिव प्रवर्तयिष्यति। न च पुरुषस्योदासीनत्वाभ्युपगमात् कथं प्रधानप्रवर्तकत्वं स्यात्? पङ्गोस्तु वागादिभिरन्धप्रवर्तकत्वेन तत्रानुदासीनत्वसिद्धेरिति–वाच्यम्; उदासीनस्याप्ययस्कान्तमणेः संनिधिमात्रेणायःप्रवर्तकत्वदर्शनात्, तद्वद् उदासीनस्यापि पुरुषस्य संनिधिमात्रेण प्रधानप्रवर्तकत्वोपपत्तेरिति चेद् भवान् मन्यते, तथापि नैव दोषाद् निर्मोक्षोऽस्ति। को दोषः? एकस्तावत्–अभ्युपेतहानं साङ्ख्यस्य दोषः। प्रवृत्तौ तावत् प्रधानस्य स्वातन्त्र्यं साङ्ख्यैरभ्युपगतम्, तस्याः पुरुषाधीनत्वे तत्र स्वातन्त्र्यं प्रधानस्य हीयेत। पुरुषस्य

चाप्रवर्तकत्वमभ्युपगतम्, तदपीदानीं तत्प्रवर्तकत्वेऽभ्युपगम्यमाने हीयेत, अन्यथा चेत् पुरुषस्योदासीनस्याप्रवर्तकत्वानुपपत्तिः। पङ्गुस्तु वागादिभिरन्धं प्रवर्तयतीत्यदृष्टान्तः। अयस्कान्तमणिवद् उदासीनस्यापि संनिधिमात्रेण प्रवर्तकत्वे तु संनिधिनित्यत्वात् प्रवृत्तिसातत्यप्रसङ्गः, अयस्कान्तस्य चानित्यसंनिधित्वात् स एवास्ति तस्य स्वव्यापारः, इति सोऽप्यदृष्टान्तः॥७॥

अङ्गित्वानुपपत्तेश्च॥८॥ ननु—मा भूत् पुरुषस्योदासीनस्य विरोधात् स्वतन्त्रप्रधानप्रवर्तकत्वम्, गुणानां तु परस्परमङ्गाङ्गिभावेन प्रवर्त्य-प्रवर्तकभावः पुरुषाश्मवद् भविष्यति; अविरोधात्। तथा हि—सत्त्वं लघुत्वात् तूलपिण्डवत् प्रवर्त्यम्, रजस्तु क्रियात्मकत्वाद् वायुवत् प्रवर्तकम्। न चैवम्—तयोर्नित्यसम्बन्धात् सर्वदा प्रवृत्तिप्रसङ्ग इति—वाच्यम्; तमसो गुरुत्वेन तत्प्रतिबन्धकत्वात्, तदनभिभवदशायामेव प्रवृत्त्युपपत्तौ तत्सातत्याभावादिति—चेत्, तत्रोत्तरं सूत्रम्— *अङ्गित्वानुपपत्तेश्चेति*॥ भवेदेवं कल्पना, यद्यङ्गाङ्गिभावो गुणानामुपपद्येत; न चैवमस्ति; प्रधानत्वक्षतेः। साम्यावस्थापरिणामो हि गुणानां प्रधानमिति व्यपदिश्यते; स्वरूपाकारपरिणामे तेषां परस्परनिरपेक्षत्वेन स्वतन्त्रत्वात्। ते चेद् महदादिपरिणामसिद्धये गुणप्रधानभावमुपगच्छेयुः, तर्हि स्वस्वरूपमेव परिजह्युः। अतः स्वरूपनाशप्रसङ्गाद् न तेषां परस्परमङ्गाङ्गिभाव उपपद्यते। वैषम्यावस्थायां प्रधानावस्थानाशेऽप्यवस्थावतां गुणानामनाशाद् न स्वरूपनाशप्रसङ्गः ; तेषां परिणामिनित्यत्वाभ्युपगमादिति—चेत्, एवमपि बाह्यस्य क्षोभयितुरभावाद् गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यात्। न हि गुणानां क्षोभयिता कश्चिद् बाह्यः साङ्ख्यैरभ्युपगम्यते। तदभावे स्वत एव वैषम्यमुपगच्छन्ति गुणा इति चेत्, न; स्वत एव तेषां वैषम्ये कदाऽपि न ते साम्यं भजेरन्। तथा च प्रलयाभावप्रसङ्गः। प्राचीन वैषम्यपरिणामसंस्कारा एव पुनस्तद्वैषम्यकारणमिति चेत्, न; एवं सति प्रलयसमये सुचिरं साम्याकारेण गुणानां परिणतत्वात् तत्संस्कारप्राचुर्यात् पुनरपि साम्याकारेण परिणामप्रसङ्गात्, द्वयोः संस्कारयोस्तुल्यत्वेऽपि प्राचीनवैषम्यसंस्कारस्याभिनवसाम्यसंस्कारेण व्यवधानात् साम्यपरिणामस्यैव युक्ततरत्वात् प्राचीनवैषम्यसंस्कारस्य दीवयस्त्वेन साम्याकारपरिणाम एवोदियात्; तदुद्भवानुद्भवयोः कारणस्य चातिरिक्तस्यानभ्युपगमात्, अदृष्टस्यापि संस्काररूपत्वेन तत्सापेक्षत्वात्, कालस्य तदुद्बोधकत्वकल्पने तस्य स्वतो निर्विशेषत्वात् सर्वदा तत्प्रसङ्गतादवस्थ्यादिति॥८॥

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात्॥९॥ यथाकार्यं हि कारणस्वभावोऽनुमीयते। कार्यं च व्यवस्थितं दृष्टम्—कदाचिद् वैषम्यपरिणामो महदादिसर्गो नियतकाल, कदाचिच्च साम्यपरिणामः

प्रलयाख्यः, सोऽपि नियतकालः, इति नियतकालेन साम्यवैषम्यकार्येण गुणानां नियतकालीनसाम्यवैषम्यस्वभावानुमितौ नायमनन्तरोक्तदोषः प्रभवतीति चेत्, एवमपि प्रधानस्य ज्ञशक्तिवियोगाद् रचनानुपपत्त्यादयो दोषाः सन्त्येव। रचनाकार्येण ज्ञशक्तिमपि प्रधानस्यानुमिमानः प्रतिवादित्वाद् निवर्तते; नामान्तरेण ब्रह्मकारणवादाभ्युपगमात्, निमित्तमन्तरेण नियतस्वभावाङ्गीकारे स्वभाववादप्रसङ्गात्। साङ्ख्यानां च प्रधानसाम्यावस्थाकाले निमित्तान्तराभावाद् अङ्गित्वानुपपत्ति-दोषोऽप्यपरिहार्य एवेति।।९।।

विप्रतिषेधाच्चासमञ्जसम्।।१०।। इतश्च साङ्ख्यदर्शनमसमञ्जसम्; परस्पर-विरुद्धार्थाभिधानत्वात्। तथा हि–*क्वचित् सप्तेन्द्रियाण्यनुक्रामन्ति="त्वङ्मात्रमेव बुद्धीन्द्रियमनेकरूपादिग्रहणसमर्थम्, कर्मेन्द्रियाणि पञ्च, सप्तमं च मनः" इति*।। क्वचिदेकादशेन्द्रियाणि–घ्राणादीनि पञ्च ज्ञानेन्द्रियाणि, वागादीनि पञ्च कर्मेन्द्रियाणि, (इति) मिलित्वा दश, मनश्चैकादशम्, इत्येकादशेन्द्रियाणि। क्वचिद् महतस्तन्मात्रसर्गम्, इन्द्रियसर्गं चोपदिशन्ति, क्वचिदहङ्कारात्। क्वचिद् बुद्धिरहङ्कारो मन इति त्रीण्यन्तःकरणानि वर्णयन्ति। क्वचिदेकं मन इति। एवं परस्परप्रतिषिद्धं तेषां तन्त्रम्, श्रुतिस्मृतिभ्यां च विप्रतिषिद्धमिति पूर्वमेव दर्शितम्।।

अत्राह=साङ्ख्यः–"नन्वौपनिषदानामप्यसमञ्जसमेव दर्शनं भवति। कुतः? सर्वस्य ब्रह्मात्मकत्वेन तप्यतापकयोर्जात्यन्तरवत्त्वानभ्युपगमात्, तयोश्च जात्यन्तरभावनियमस्य लोकसिद्धत्वात्। भिन्नजातीयो ह्यग्न्यादिस्तप्यात् पुरुषात् तापको लोके दृष्टः, नैकस्मिन् तदुभयभावौ; पचिक्रियाया इव तपिक्रियायाः सकर्मकत्वेन कर्तृकर्मभावविरोधात्। न हि वह्निरेव वह्निं दहति, पचति वेति लोके दृष्टम्; परसमवेतक्रियाशालित्वस्य कर्मत्वव्याप्यत्वात् प्रकृते चार्थानर्थौ तापकौ, पुरुषश्च ताप्यः। तत्रानर्थः स्वतस्तापकः, अर्थस्तु तदनुशङ्गादित्यन्यत्। न हि स्वयमेव पुरुषः स्वस्यार्थोऽनर्थश्चेत्युपपद्यते; तथा सति ताभ्यामनिर्मोक्षापत्तेः, तद्विषयेच्छा जिहासयोरनुपपत्तेश्च, निर्मोक्षे वा स्वभावहानापत्तेः, इत्यसमञ्जसमौपनिषदं दर्शनम्, तयोर्जात्यन्तरभावे तु संयोगवियोगाभ्यामिच्छाजिहासोपपत्तेर्मोक्षोपपत्तेश्चेति समञ्जसम्।।

अत्र ब्रूमः–मैवम्; अविद्याकृतभेदमादाय कार्य-कारणभाववत् तप्य तापकभावोपपत्तेः, ज्ञानेन तद्विलये मोक्षोपपत्तेश्च, अपारमार्थिकतप्यतापकभावोपपत्तेः, ज्ञानेन तद्विलये मोक्षोपपत्तेश्च, पारमार्थिकतप्यतापकभावस्यैकत्वादेवानभ्युपगमात्। तदिदमुक्तम्–*नैकत्वादेव तप्यतापक-भावानुपपत्तेरिति*।। प्रश्नपूर्वकमविद्याकृतं तप्यतापकभावं दर्शयति–*क्व पुनरयमिति*।।

आशयमविद्वानाशङ्कते– *ननु तप्तिर्नामेति*।। तथा च पारमार्थिक एव तप्यतापकभाव इति चोदयितुराशयः। सिद्धान्ती स्वाशयमुद्घाटय दर्शयति– *उच्यते; देहाभावेऽपीति*।। तथा चाध्यासिकश्चेतनस्य तत्सम्बन्ध इति भावः। अपि च तवापि मते पुरुषस्य निर्विकारत्वाभ्युपगमात् तप्तिसम्बन्धो बलादाविद्यक एवायातीत्याह– *न च त्वयाऽपीत्यादिना*।। *ताभ्यामिति*।। सत्त्वरजोभ्यां तप्यतापकाभ्यामित्यर्थः ; चेतनस्य त्वया निरतिशयत्वाभ्युपगमादित्यभिप्रायः।। *सत्त्वानुरोधित्वादिति*।। सत्त्वानुरोधो नाम चेतनस्य तस्मिन्नतिस्वच्छे प्रतिबिम्ब एव, नान्यः ; निरतिशयत्वविरोधात्। अपि वा– इतश्च तव मतेऽनिर्मोक्षप्रसङ्ग इत्याह– *नित्यत्वाभ्युपगमाच्च तापकस्येति*।। तापकनित्यत्वाभ्युपगमेऽपि नानिर्मोक्षप्रसङ्ग इत्याशङ्कते– *तप्यतापकशक्त्योरिति*।। निमित्तेनादर्शनेन सह वर्तते, इति सनिमित्तः संयोगः, तदपेक्षत्वादिति। संयोगस्तु बुद्धिरूपेण परिणते सत्त्वे छायापत्तिरेव, नान्य इति द्रष्टव्यम्। परिहरति– *अदर्शनस्य तमसो नित्यत्वाभ्युपगमादिति*।। अदर्शनस्यापीत्यपिरध्याहर्तव्यः। हेतत्वन्तरमाह– *गुणानां चेति*।। अस्मन्मते तु न काप्यनुपपत्तिरित्याह– *औपनिषदस्य त्विति*।।१०।। इति प्रथमं रचनानुपपत्त्यधिकरणम्।।

इति वार्तिकम् रचनानुपपत्त्यधिकरणम् समाप्तम्

प्रदीपः

पूर्वस्मिन् पादे परपक्षनिरसनेन स्वपक्षस्थापनं कृतम्, अनेन तु पादेन परपक्षनिराकरणं क्रियते। आनुषङ्गिकं तु स्वमतस्थापनमपि न विरुद्धम्। एतेन–''महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामि'' त्यनेन स्वमतस्थापनमप्यानुषङ्गिकं न दोषाय।।

अत्राष्टाधिकरणानि वर्तन्ते–(१) रचनानुपपत्त्यधिकरणम् (साङ्ख्यमतनिराकरणार्थम्) (२) महद्दीर्वाधिकरणम् (वैशेषिकप्रक्रियानिराकरणार्थम्) (३) उभयथापि न कर्माधिकरणम् (परमाणुकारणतानिराकरणार्थम्) (४) समुदायाधिकरणम् (वैभाषिकसौत्रान्तिकमतनिराकरणार्थम्) (५) नाभावाधिकरणम् (योगाचारमतनिराकरणार्थम्) (६) एकस्मिन्नसम्भवाधिकरणम् (आर्हतमतनिराकरणार्थम्) (७) पत्यधिकरणम् (पाशुपतमतनिराकरणार्थम्), (८) उत्पत्त्यसंभवाधिकरणम् (पाञ्चरात्रप्रामाण्यनिराकरणार्थम्; द्वैतमतरीत्या शाक्तमतनिराकरणार्थम्, श्रीभाष्यमतरीत्या पाञ्चरात्रप्रामाण्यस्थापनार्थं वा)।।

अत्र द्वितीयतृतीयाधिकरणे तार्किकमतनिराकरणार्थे। तुरीयपञ्चमाधिकरणे सौगतमतनिराकरणार्थे, इति पञ्च दर्शनानि विरुद्धानि साङ्ख्य-तार्किक-सौगत-पाशुपत-पाञ्चरात्राख्यानि निरस्तानि। षष्ठं तु वैदिकं दर्शनं समर्थितं पूर्वस्मिन् पादे, इति षडास्तिकदर्शनानि। शिष्टापरिगृहीतस्यापि वैशेषिकदर्शनस्य वेदपौरुषेयत्वेऽपीश्वराङ्गीकारमात्रेणास्तिकत्वं मन्यत इति ''साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा'' इति श्लोकेऽनिर्दिष्टस्यापि वैशेषिकादिदर्शनस्य षट्त्वसङ्ख्यापूरकत्वं न विरुद्धम्।।

श्रीभाष्यकारा अन्ये केचनोत्पत्त्यसंभवाधिकरणं पाञ्चरात्रप्रामाण्यसमर्थनपरं मन्यन्ते। तन्मते–''विप्रतिषेधाच्चे'' त्यन्तिमसूत्रे क्लिष्टकल्पना, पादासङ्गतिश्चेति मन्तव्यम्। अधिकमग्रे व्यक्तिभविष्यति। अत्र प्रथमे सूत्रेऽनुपपत्तेरिति, अन्तिमसूत्रे विप्रतिषेधादिति चासामञ्जस्यलिङ्गे उपक्रमोपसंहारगते एतत्पादार्थत्वं मतान्तरासामञ्जस्यैवेति गमयत इति स्वमतसमर्थनं

सूत्रतात्पर्यविरुद्धमपि। इयान् विशेषः—यत् शिष्टपरिग्रहात् साङ्ख्य-योगपाशुपत-पाञ्चरात्राणामंशतः प्रामाण्यम्, शिष्टापरिग्रहात्तु वैशेषिक सौगतार्हतानामत्यन्तानपेक्षेति।।

तत्रादिमं सूत्रम्— *रचनानुपपत्तेश्च नानुमानम्*।।१।। अनुमानम्=प्रधानम्। न=न जगत्कारणम्। रचनानुपपत्तेः=रचयितृत्वानुपपत्तेरिति सूत्रार्थः।। ब्रह्मणि सर्वधर्मोपपत्त्या जगत्कारणत्वे समर्थिते कस्यापि रचयितृधर्मस्याभावात् प्रधानं न जगत्कारणमिति सिद्धान्तेनोपक्रमात् प्रत्युदाहरणसङ्गतिः। इदं च पूर्वस्मिन् सूत्र उपपत्तिपदेनात्रानुपपत्तिपदेन च सूच्यते। अत्र रचनानुपपत्तिः, प्रवृत्त्यनुपपत्तिः, अङ्गित्वानुपपत्तिरित्यनुपपत्तित्रयं विप्रतिषेधश्च प्रधानकारणवादनिरासे प्रधाना युक्तयः। इमाश्च प्रथम द्वितीयाष्टम-दशमसूत्रैः संगृह्यन्ते। तृतीय-तुरीय-पञ्चम-षष्ठ-सप्तमानि सूत्राणि प्रवृत्त्यनुपपत्ति-साधनानि। नवमं सूत्रं त्वङ्गित्वानुपपत्तिसाधकमिति विभागः।।

तथाच नप्रयोजनवत्त्वाधिकरण-वैषम्यनैर्घृण्याधिकरणार्थप्रत्युदाहरणता प्रवृत्त्यनुपपत्त्या प्रदर्श्यते। तत्र प्रसङ्गत उपसंहारदर्शनाधिकरणवैलक्षण्यं भोक्त्रापत्त्यधिकरणवैलक्षण्यं च प्रदर्श्यते तप्यतापकभावस्याविद्यकत्वादिविवेचनद्वारेण। तर्काप्रतिष्ठानसूत्रगतान्यथानुमानं साङ्ख्यापादित-मनुमानान्तरविरुद्धमिति सूचनार्थम्—''अन्यथानुमितौ च ज्ञशक्तिवियोगादि''ति सूत्रम्। अङ्गित्वानुपपत्तिसूत्रं तु ''सर्वोपेताधिकरण'' वैलक्षण्यसूचनार्थम्। ''अश्मादिवच्च तदनुपपत्तेरि'' तिसूत्रसाधिताश्मसालक्षण्यं ब्रह्मगतं प्रधाने न संभवतीति निरूपणार्थं ''पुरुषाश्मवदि'' ति सूत्रम्। तदेवं ब्रह्मकारणवादनिरासार्थानां युक्तीनां साङ्ख्याभिमतानां सर्वासामपि प्रधानकारणवादनिरास एवोपयोग इति रचनानुपपत्त्यधिकरणे प्रतिपाद्यते। तथाच साङ्ख्याभिमता ब्रह्मकारणताविरोधिन्यो युक्तयः साङ्ख्याभिमतप्रधानकारणवादस्यैव विरोधिन्य इति बोधनद्वारा न साङ्ख्यवादे विद्वेषमूलिकेयं तन्निराकरणार्था प्रवृत्तिः, किन्तु तत्त्वनिर्णयेच्छयैवेति सिद्धम्। तदिदमाशङ्कासमाधानाभ्यामाह— *यद्यपीत्यादिना—इत्येष विशेष इत्यन्तेन*।।

तद्युक्तिप्रतिषेधः इति।। साङ्ख्याभिमतयुक्तिप्रतिक्षेप इत्यर्थः। सौत्रेणानुमानपदेन सूचितप्रधानप्रक्रियामनुवदति— *तत्र साङ्ख्या इति*।। *प्रधानमनुमिमत इति च*।। तथा चेदमधिकरणं साङ्ख्यमतनिरासार्थमिति सौत्रमनुमानपदमेव सूचयति। *विकारात्मना विवर्तत इति*।। परिणमत इत्यर्थः। अमुमेव प्रयोगं मनसि निधाय विवर्तपरिणामपदयोर्विनिमयेन कारणाभेदमात्राभिप्रायेण भाष्ये सूत्रे च प्रयोग इति तदनन्यत्वाधिकरणादौ विवेचितम्; विकारात्मनाऽवस्थानस्यैव परिणाम-विवर्तपदाभ्यां विवक्षणात्। स च विकारः कारणसमसत्ताकः, तद्विषमसत्ताको वेत्यन्यदेतत्।।

अयमत्र निष्कर्ष:–साङ्ख्यानां प्रधानकारणवादो हि प्रधानानुमानाधीन:। तत्रेमानि सूत्राणि–''कार्यात् कारणानुमानं तत्साहित्यात्। उभयान्यत्वात् कार्यत्वं महदादेर्घटादिवत्। परिमाणात्, समन्वयात्, शक्तितश्चेति। तद्धाने प्रकृति: पुरुषो वे''ति। एतैर्हि सूत्रैर्महदादिकम्, सकारणम्, प्रकृतिपुरुषान्यत्वात्, परिमितत्वात्, कारणनुणान्वयित्वात्, कारणशक्त्यधीनप्रवृत्तिकत्वाद्वेति प्रधानानुमानं पुरुषप्रकृत्योर्व्यतिरेकदृष्टान्ततताविवक्षणेन साध्यते; पुरुषस्यासङ्गत्त्वेनाशक्तत्वात् कार्ये तत्समन्वयाभावाच्च न कारणत्वमित्यर्थात् प्रधानसिद्धिरिति। तत्र कार्यात् कारणानुमानं तत्साहित्यादिति सूत्रार्थं संगृह्णाति–*यथा घटेत्यादिना*।। परिमाणादित्यादिसूत्रार्थं संगृह्णाति–*तथेति*।। ''परिमाणादिभि'' रिति*।। परिमितत्वादिभिरित्यर्थ:। ''शक्तितश्चे''ति सूत्रार्थस्तु ''प्रवृत्तेश्चे''ति सूत्रव्याख्यानावसर उपयोक्ष्यते। अत्र साङ्ख्यानामनुमाने विरुद्धसिद्धसाधनादिदूषणान्याह–*यदीत्यादिना*।। महदादि, चेतनाधिष्ठितकारणकम्, परिमितत्वाद् इति विरोध:, यदि चेतनानधिष्ठितकारणकत्वं साध्यते। तदेतद्विश दयति–*गेहेत्यादिना–नियामकमस्तीत्यन्तेन*।। ननु–साङ्ख्यानुमानविरोधेन वेदान्तिनामनुमानमेव विरुद्धमप्रमाणं भवत्वित्याशङ्क्य समाधत्ते–*न चैवं सतीति*।। चेतनानधिष्ठितकारणकत्वस्य कुत्राप्यदर्शनादिति भाव:। ननु–अनेनैवानुमानेन चेतनानधिष्ठितकारणकत्वं साध्यत इत्यत आह–*प्रत्युतेति*।। तथाचाप्रयोजकं साङ्ख्यानामनुमानम्, वेदान्तिनां तु श्रुतिबाधापत्ति: प्रतिकूलतर्कोऽस्तीति तदीयानुमानमेव प्रबलमिति भाव:।।

रचनानुपपत्तेश्चेति चशब्देन हेत्वसिद्धि: सूच्यत इत्याह–*अन्वयादीति*।। प्रधानरूपानन्वयादित्यर्थ:। तदेवाह–*न हीत्यादिना*।। ननु–एवं सति शब्दादिभ्य: सुखदु:खादिप्रतीति: कथमित्यत आह–*तन्निमित्तत्वेति*।। परिमितत्वहेतुश्च गुणेषु व्यभिचरतीत्याह–*तथेति*।। अथ साङ्ख्यकारिकासंगृहीत कार्यकारणभावहेतोरपि पूर्वोक्तरीत्या विरुद्धत्वादिकमाह–*कार्यकारणभावस्त्वति*।। महदादि कार्यम्, प्रधानं कारणमिति विभागसिद्धं महदादिनिष्ठं कार्यत्वमित्यर्थ:। तथाच केवलाचेतनप्रधानाख्यकारणानुमानमेव न सम्भवतीति तस्याप्रामाणिकत्वमिति भाव:। ईक्षत्यधिकरणादिभिरशब्दत्वं साधितम्, अनेन त्वानुमानिकत्वं निरस्यत इति विशेष:।।१।।

तदेवं कार्याणां परिमाणाद् न प्रधानानुमानमिति विवेचितम्। साम्प्रतं शक्तित: प्रवृत्तेर्न प्रधानानुमानमित्याह सूत्रकार:–*प्रवृत्तेश्चेति*।। अनुपपत्तेरित्यनुषङ्ग:। प्रधानस्य प्रवृत्त्यनुपपत्त्याऽपि न प्रधानसिद्धिरितिं भाव:। कथं प्रवृत्त्यनुपपत्तिरित्येतदुपपादयति–*तत्सिद्ध्यर्थेत्यादिना–अनुमातव्यं भवतीत्यन्तेन*।। अनेन च सन्दर्भेण शक्तित: प्रवृत्तिश्चेतनाधिष्ठानस्यैव साधिका, न प्रधानस्याचेतनस्येति साध्यते, इति शक्तित: प्रवृत्तिर्विरुद्धेति सूच्यते। प्रवृत्तेश्चेतनाश्रितत्वेऽपि

नाचेतनप्रयुक्तत्वम्, किन्तु चेतनप्रयुक्तत्वमेवेति प्रवृत्तिप्रयोजकत्वस्य न प्रधानसाधकत्वम्, किन्तु चेतनसाधकत्वमेवेत्याशङ्कासमाधानाभ्यां निरूपयति- *ननु चेतनस्यापीत्यादिना-चेतनस्य प्रवर्तकत्वमित्यन्तेन*।।

अद्वैतमतेऽपि चेतनस्य प्रवर्तकत्वमनुपपन्नमित्याह- *नन्वित्यादिना-उपपन्नमित्यन्तेन*।। उपसंहरति- *तस्मादिति*।।

परमतनिराकरणप्राधान्येऽपि स्वतस्थापनमप्यानुषङ्गिकमित्यभिप्रायेणाह- *सम्भवति प्रवृत्तिरिति*।। एतेन-शक्तितः प्रवृत्तेर्विरुद्धत्वेऽपि चेतनसाधकत्वमेव; अनुकूलतर्कादिसत्त्वात्, न प्रधानसाधकत्वमिति-सूच्यते।।२।।

शक्तितः प्रवर्तकत्वमचेतने कुत्रापि न दृष्टम्, पयोऽम्बुनोरपि चेतनस्यैव प्रवर्तकत्वमिति न व्यभिचार इत्याह सूत्रकारः- *पयोऽम्बुवच्चेत्तत्रापीति*।।३।। एतेन-''कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदायच्च। परिणामः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषादि''ति-प्रत्युक्तम्। अस्य सूत्रस्य ''उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धी'' त्यनेनाविरोधमाह- *उपसंहारेति*।। *बाह्येति*।। चेतनेतरेत्यर्थः। सर्वत्र चेतनापेक्षायां प्रमाणमाह- *शास्त्रदृष्टेयति*।। एतेनानुमानादागमस्य प्राबल्यं सूच्यते।।

तथाचानुमानापेक्षयाऽऽगमप्राबल्यकथाऽप्यद्वैतिनामेतत्सूत्रनिबन्धनैवेति सूच्यते, इत्यद्वैतसिद्ध्यादावनुमानबाधोद्धारादिप्रकरणमपि भाष्यमूलकमेव।।३।।

प्रधानस्य स्वतन्त्रस्य प्रवर्तकत्वे प्रलयाभावप्रसङ्गोऽपि दूषणमित्याह- *व्यतिरेकानवस्थितेश्चानपेक्षत्वादिति*।।४।। प्रवृत्तेरित्यनुषज्यते। प्रवृत्तेर्व्यतिरेको निवृत्तिः, प्रलय इति यावत्। तदनवस्थानापत्तेरपि न तदधीनाप्रवृत्तिरिति भावः। चेतनप्रवर्तकायां तु तस्य धर्माधर्मादिसापेक्षत्वात् प्रवर्तकवादौ नोक्तदोष इत्याह- *ईश्वरस्य त्विति*।। *प्रवृत्त्यप्रवृत्ती इति*।। कर्मपरिपाकापेक्षे इति शेषः। एतेन-वैषम्यनैर्घृण्याधिकरणप्रत्युदाहरणत्वमत्र सूच्यते।।४।।

तृणादीनां तु सर्वज्ञेश्वरातिरिक्तापेक्षत्वमपि वर्तत इति न निरपेक्षप्रवृत्तौ तेषां दृष्टान्तता सम्भवदुक्तिकाऽपीत्यभ्युच्चयार्थं सूत्रम्- *अन्यत्राभावाच्च न तृणादिवदिति*।।५।। ''पयोऽम्बुवच्चेत्तत्रापी'' त्यस्यैवायं प्रपञ्चः।।

ननु-प्रधानस्य न निरपेक्षत्वं साङ्ख्यैर्मन्यते, भोक्त्रपेक्षत्वात् तस्य। तदिदमभिप्रेत्योक्तम्-''युक्ताऽस्य भोक्त्रपेक्षे''ति।। तदुक्तं साङ्ख्यकारिकायाम्-''पुरुषस्य दर्शनार्थं

कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।'' इति। तथा च चेतनापेक्षत्वेऽपि प्रधानस्य भोक्त्रैव चेतनेनासङ्गेन संनिहितमात्रेण प्रवृत्तिसिद्धेर्न सर्वज्ञेश्वरसिद्धिरित्याशङ्कानिराकरणार्थं सूत्रद्वयम्– *अभ्युपगमेऽप्यर्थाभावात्।।६।। पुरुषाश्मवदिति चेत्तथापीति *।।७।। -अत्राशमवदिति दृष्टान्तः–''तत्संनिधानादधिष्ठातृत्वं मणिवदि''ति साङ्ख्यसूत्रमभिप्रेत्य। पुरुषवदिति तु–पङ्ग्वन्धवदिति कारिकामभिप्रेत्य। सत्यं भोक्त्रंपक्षत्वे प्रधानस्य प्रवृत्तिरुपपद्येत, भोक्तृत्वमेव तु साङ्ख्यमतरीत्या चेतनस्य न संभवतीत्याह– *भोगश्चेदित्यादिना *।।६।।

पङ्ग्वन्धदृष्टान्ताद्यसम्भवमुपपादयति– *कथं चेत्यादिना–पुरुषाश्मवदित्यन्तेन *।। तथा च संनिधानमात्रेणाधिष्ठानमनुपपन्नमिति भावः। स्वपक्षे तु नाधिष्ठानानुपपत्तिरित्याह– *परमात्मनस्त्विति *।।७।।

अभ्युपेत्यापि संनिधानमात्रेण पुरुषस्याधिष्ठातृत्वं प्रधानस्य प्रवृत्त्यनुपपत्तिं साधयितुं सूत्रम्– *अङ्गित्वानुपपत्तेश्चेति *।।८।। प्रधानत्वानुपपत्तेरित्यर्थः। तदेतदाह– *इतश्चेत्यादिना *।।८।।

साम्यावस्थायामपि वैषम्योपगमयोग्यत्वे गुणानामङ्गीक्रियमाणे तु वैषम्यनिमित्तं किञ्चिद्यद्यङ्गीक्रियते, तर्हि प्रधानस्वतन्त्रताहानिः, यदि तन्नाङ्गीक्रियते, तर्ह्यनिर्मोक्षप्रसङ्ग इत्याह– *अन्यथाऽनुमितौ च ज्ञशक्तिवियोगादिति *।। ज्ञशक्तिवियोगेन तु निमित्ताभावः सूच्यते।।९।।

*विप्रतिषेधाच्चासमञ्जसम् *।।१०।। निगदव्याख्यातमस्य भाष्यम्। अधिकं वार्तिकतोऽवगन्तव्यम्।।१०।। इति प्रथमं रचनानुपपत्त्यधिकरणम्।।

इति प्रदीपः रचनानुपपत्त्यधिकरणम् समाप्तम्

भामती

'रचनानुपतेश्च नानुमानम्'

स्यादेतद्–इह हि पादे स्वतन्त्रा वेदनिरपेक्षाः प्रधानादिसिद्धिविषयाः सांख्यादियुक्तयो निराकरिष्यन्ते, तदयुक्तम अशास्त्राङ्गत्वात्। न हीदं शास्त्रमुच्छृङ्खलतर्कशास्त्रवत्प्रवृत्तमपि तु वेदान्तवाक्यानि ब्रह्मपराणीति पूर्वपक्षोत्तरपक्षाभ्यां विनिश्चेतुं। तत्र कः प्रसङ्गः शुष्कतर्कवत्स्वतन्त्रयुक्तिनिराकरणस्येत्यत आह ***यद्यपीदं वेदान्तवाक्यानामिति***। न हि वेदांन्तवाक्यानि निणेतव्यानीति निर्णीयन्ते, किन्तु मोक्षमाणानां तत्त्वज्ञानोत्पादनाय। यथा च वेदान्तवाक्येभ्यो जगदुपादानं ब्रह्मावगम्यते, एवं साख्याद्यनुमानेभ्यः प्रधानाद्यचेतनं जगदुपादानमवगम्यते। न चैतदेव चेतनोपादानमचेतनोपादानं चेति समुच्चेतुं शक्यं, विरोधात्। न च व्यवस्थिते वस्तुनि विकल्पो युज्यते। न च आगमबाधितविषयतयानुमानमेव नोदीयत इति साम्प्रतम्। सर्वज्ञप्रणीततया सांख्याद्यागमस्य वेदागमतुल्यत्वात् तद्बाधितस्यानुमानस्य प्रतिकृतिसिंहतुल्यतयाऽबाध्यत्वात्। तस्मात्तद्विरोधान्न ब्रह्मणि समन्वयो वेदान्तानां सिध्यतीति न ततस्तत्त्वज्ञानं सेद्धुमर्हति। न च तत्त्वज्ञानादृते मोक्ष इति स्वतन्त्राणामप्यनुमानानामाभासीकरणमिह शास्त्रे सङ्गतमेवेति। यद्येवं ततः परकीयानुमाननिरास एव कस्मात्प्रथमं न कुत इत्यत आह ***वेदान्तार्थनिर्णयस्य चेति***। ननु वीतरागकथायां तत्त्वनिर्णयमात्रमुपयुज्यते न पुनः परपक्षाविक्षेपः, स हि सरागतामावहतीति चोदयति ***ननु मुमुक्षूणामिति***। परिहरति *वाढमेवं तथापि इति*। तत्त्वनिर्णयावसाना वीतरागकथा। न च परपक्षदूषणमन्तरेण तत्त्वनिर्णयः शक्यः कर्तुमिति तत्त्वनिर्णयाय वीतरागेणापि परपक्षो दूष्यते, न तु परपक्षतयेति न वीतरागकथात्वव्याहतिरित्यर्थः। पुनरुक्ततां परिचोद्य समाधत्ते ***नन्वीक्षतेरिति***। ***तत्र सांख्या इति***। यानि हि येन रूपेणास्थोल्यादा च सौक्ष्म्यात्समन्वीयन्ते तानि तत्करणानि दृष्टानि, यथा घटादयो रुचकादयश्चास्थौल्यादाच सौक्ष्म्यान्मृत्सुवर्णान्वितास्तत्कारणा तथा चेदं बाह्यमाध्यात्मिकं च भावजातं सुखदुःखमोहात्मनान्वितमुपलभ्यते, तस्मात्तदपि सुखदुःखमोहात्मसामान्यकारणकं

भवितुमर्हति। तत्र जगत्कारणस्य येयं सुखात्मता तत्सत्त्वं, या दु:खात्मता तद्रज:, या च मोहात्मता तत्तम इति त्रैगुण्यकारणसिद्धि: तथाहि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते। यथा मैत्रदारेषु पद्मावत्यां मैत्रस्य सुखं। तत् कस्य हेतो:? तंप्रति सत्त्वगुणसमुद्भवात्। तत्सपत्नीनाञ्च दु:खं तत्कस्य हेतो:? ता: प्रत्यस्या रजोगुणसमुद्भवात्, चैत्रस्य तु स्त्रैणस्य तामविन्दतो मोहो विषाद: तत् कस्य हेतो?तं प्रत्यस्यास्तमोगुणसमुद्भवात्। पद्मावत्या च सर्वे भावा व्याख्याता:। तस्मात्पर्वं सुखदु:खमोहान्वितं जगत्तत्कारणं गम्यते। तच्च त्रिगुणं प्रधानं प्रधीयते क्रियतेऽनेन जगदिति प्रधीयते निधीयतेऽस्मिन् प्रलयसमये जगदिति वा प्रधानम्। तच्च मृत्सुवर्णवदचेतनं चेतनस्य पुरुषस्य भोगापवर्गलक्षणमर्थं साधयितुं स्वभावत एव प्रवर्तते, न तु केनचित्प्रवर्त्यते। **तथा ह्याहु**:–''पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्'' इति। पारिमाणादिभिरित्यादिग्रहणेन ''शक्तित: प्रवृत्तेश्च। कार्यकारणविभागादविभागाद्वैश्वरूप्यस्य''-इत्यव्यक्तसिद्धिहेतवो गृह्यन्ते। एतांश्चोचोपरिष्टाद्व्याख्याय निराकरिष्यन्त इति। तदेतत्प्रधानानुमानं दूषयति ***तत्र वदाम: इति***। यदि तावदचेतनं प्रधानमनधिष्ठितं चेतनेन प्रवर्त्तते स्वभावत एवेति साध्यते, तदयुक्तं, समन्वयादेर्हेतोश्चेतनानधिष्ठितत्व- विरुद्धचेतनाधिष्ठितत्वेन मृत्सुवर्णादौ दृष्टान्तधर्मिणि व्याप्तेरुपलब्धेर्विरुद्धत्वात्। न हि मृत्सुवर्णदार्वादय: कुलालहेमकाररथकारादिभिरनधिष्ठिता: कुम्भरुचकरथाद्युपाददते। तस्मात् कृतकत्वमिव नित्यत्वसाधनाय प्रयुक्तं साध्यविरुद्धेन व्याप्तं विरुद्धम् एवं समन्वयादि चेतनानधिष्ठितत्वे साध्य इति रचनानुपपत्तेरिति दर्शितम्। यद्युच्येत दृष्टान्तधर्मिण्यचेतनं तावदुपादानं दृष्टं तत्र यद्यपि तच्चेतनप्रयुक्तमपि दृश्यते तथापि तत्प्रयुक्तत्वं हेतोरप्रयोजकं बहिरङ्गत्वात् अन्तरङ्गं त्वचैतन्यमात्रमुपादानानुगतं हेतो: प्रयोजकम्। यथाहु:–'व्याप्तेश्च दृश्यमानाया: कश्चिद्धर्म: प्रयोजक:' इति। तत्राह ***न च मृदादिति***। स्वभावप्रतिबद्धं हि व्याप्यं व्यापकमवगमयति। स च स्वभावप्रतिबन्ध: शङ्कितसमारोपितोपाधिनिरासे सति निश्चीयते। तन्निश्चयश्चान्वयव्यतिरे- कयोरायतते। तौ चान्वयव्यतिरेकौ न तथोपादानाचैतन्ये यथा चेतनप्रयुक्तत्वेऽतिपरिस्फुटौ। तदलमत्रान्तरङ्गत्वेनेति भाव:। एवमपि चेतनप्रयुक्तत्वं नाभ्युपेयेत यदि प्रमाणान्तरविरोधो भवेत्, प्रत्युत श्रुतिरनुगुणतरांत्रेत्याह ***नचैवं सतीति***। चकारेण सुखदु:खादिसमन्वयलक्षणस्य हेतोरसिद्धत्वं समुच्चिनोतीत्याह ***अन्वयाद्यनुपपत्तेश्चेति***। आन्तरा: खल्वमी सुखदु:ख- मोहविषाद: बाह्येभ्यश्चन्दनादिभ्योऽतिविच्छिन्नप्रत्ययप्रवेदनीयेभ्यो व्यतिरिक्ता अध्यक्षमीक्ष्यन्ते। यदि पुनरेत एव सुखदु:खादिस्वभावा भवेयुस्ततस्तत्स्वरूपत्वाद्धेमन्तेऽपि चन्दन: सुख: स्यात्। न हि चन्दन: कदाचिदचन्दन: तथा निदाघेष्वपि कुङ्कुमपङ्क: सुखो भवेत्। न ह्यसौ कदाचिदकुङ्कुमपङ्क इति। एवं कण्टक: क्रमेलकस्य सुख इति मनुष्यादीनामपि प्राणभृतां सुख:

स्यात्। न ह्यसौ कांश्चित्प्रत्येव कण्टक इति। तस्मादसुखादिस्वभावा अपि चन्दनकुङ्कुमादयो जातिकालावस्थाद्यपेक्षया सुखदु:खादिहेतवो न तु स्वयं सुखादिस्वभावा इति रमणीयम्। तस्मात्-सुखादिरूपसमन्वयो भावानामसिद्ध इति नानेन तद्रूपं कारणमव्यक्तमुन्नीयत इति। तदिदमुक्तं ***शब्दाद्यविशेषेऽपि** च भावनाविशेषाददिति*। भावना वासना संस्कारस्तद्विशेषात्। करभजन्मसंवर्तकं हि कर्म करभोचितामेव भावनामभिव्यनक्ति, ययाऽस्मै कण्टका एव रोचन्ते। एवमन्यत्रापि द्रष्टव्यम्। परिमाणादिति सांख्यीयं हेतुमुपन्यस्यति ***तथा परिमितानां भेदानाम् इति***। संसर्गपूर्वकत्वे हि संसर्गस्यैकस्मिन्नद्वयेऽसम्भवान्नानात्वैकार्थसमवेतस्य नानाकारणानि संसृष्टानि कल्पनीयानि, तानि च सत्त्वरजस्तमांस्येवेति भाव:। तदेतत्परिमितत्वं सांख्यीयराद्धान्तालोचनेनानैकान्तिकमिति दूषयति ***सत्त्वरजस्तमसामिति***। यदि तावत्परिमितत्वमियत्ता, सा नभसोऽपि नास्तीत्यव्यापको हेतु: परिमाणादिति। अथ न योजनादिमितत्वं परिमाणमियत्तां नभसो ब्रूम:, किं त्वव्यापिताम व्यापि च नभस्तन्मात्रादे:। न हि कार्यं कारणव्यापि, किन्तु कारणं कार्यव्यापीति परिमितं नभस्तन्मात्राद्यव्यापित्वात्। हन्त सत्त्वरजस्तमांस्यपि न परस्परं व्याप्नुवन्ति, न च तत्त्वान्तरपूर्वकत्वमेतेषामिति व्यभिचार:। न हि यथा तै: कार्यजातमाविष्टमेवं तानि परस्परं विशन्ति, मिथ: कार्यकारणभावाभावात्। परस्परसंसर्गस्त्वावेशश्चितिशक्तौ नास्ति। न हि चितिशक्ति: कूटस्थनित्या तै: संसृज्यते, ततश्च तदव्यापका गुणा इति ते परिमिता:। एवं चितिशक्तिरपि गुणैरसंसृष्टेति सापि परिमितेत्यनैकान्तिकत्वं परिमितत्वस्य हेतोरिति। तथा कार्यकारणविभागोऽपि समन्वयमविरुद्ध इत्याह *कार्यकारणभावस्त्विति*।।१।। न केवलं रचनाभेदा न चेतनाधिष्ठानमन्तरेण भवन्त्यपि तु साम्यावस्थाया: प्रच्युतिर्वैषम्यं, तथा च यदुद्भूतं बलीयस्तस्दङ्गन्यभिभूत च तदनुगुणतया स्थितमङ्गम, एवं हि गुणप्रधानभावे सत्यस्य महदादौ कार्ये प्रवृत्ति:, सापि चेतनाधिष्ठानमेव गमयति। न हि चेतनाधिष्ठानमन्तरेण मृत्पिण्डे प्रधानेऽङ्गभावेन चक्रदण्डसलिलसूत्रादयोऽवतिष्ठन्ते। तस्मात्प्रवृत्तेरपि चेतनाधिष्ठानसिद्धिरिति शङ्कित: प्रवृत्तेश्च इत्ययमपि हेतु: सांख्यीयो विरुद्ध एवेत्युक्तं वक्रोक्त्या। अत्र सांख्यश्चोदयति ***ननु चेतनस्यापि प्रवृत्तिरिति***। **अयमभिप्राय:–** त्वया किलौपनिषदेनास्मद्धेतून् दूषयित्वा केवलस्य चेतनस्यैवान्यनिरपेक्षस्य जगदुपादानत्वं निमित्तत्वंच समर्थनीयम्। तदयुक्तम्, केवलस्य चेतनस्य प्रवृत्तेर्दृष्टान्तधर्मिण्यनुपलब्धेरिति। ओपनिषदस्तु चेतनहेतुकां तावदेष सांख्य: प्रवृत्तिमभ्युपगच्छतु पश्चात् स्वपक्षमत एव समाधास्यामीत्यभिसन्धिमानाह ***सत्यमेतत्।** न केवलस्य चेतनस्य प्रवृत्तिदृष्टेति इति*। सांख्य आह ***न त्वचेतनसंयुक्तस्येति***। तुशब्द औपनिषदपक्षं व्यावर्त्तयति। अचेतनाश्रयैव सर्वा प्रवृत्तिर्दृश्यते न तु चेतनाश्रया काचिदपि। तस्मान्न चेतनस्य जगत्सर्जने

प्रवृत्तिरित्यर्थः। अत्रौपनिषदो गूढाभिसन्धिः प्रश्नपूर्वकं विमृशति ***किं पुनरत्रेति***। अत्रान्तरे साङ्ख्यो ब्रूते- ***ननु यस्मिन्निति***। न तावच्चेतनः प्रवृत्त्याश्रयतया तत्प्रयोजकतया वा प्रत्यक्षमीक्ष्यते, केवलं प्रवृत्तिस्तदाश्रयश्चाचेतनो देहरथादिः प्रत्यक्षेण प्रतीयते, तत्राचेनतस्य प्रवृत्तिस्तन्निमित्तैव नतु चेतननिमित्ता। सद्भावमात्रं तु तत्र चेतनस्य गम्यते रथादिवैलक्षण्याज्जीवद्देहस्य। न च सद्भावमात्रेण कारणत्वसिद्धिः। मा भूदाकाश उत्पत्तिमतां घटादीनां निमित्तकारणमस्ति हि सर्वत्रेति। तदनेन देहातिरिक्ते सत्यपि चेतने तस्य न प्रवृत्तिं प्रति निमित्तभावोऽस्तीत्युक्तम्। यतश्चास्य न प्रवृत्तिहेतुभावोऽस्ति अत एव प्रत्यक्षे देहे सति प्रवृत्तिदर्शनादसति चादर्शनादेदेहस्यैव चैतन्यमिति लौकायतिकाः प्रतिपन्नाः, तथा च न चिदात्मनिमित्ता प्रवृत्तिरिति सिद्धम्। तस्मान्न रचनायाः प्रवृत्तेर्वा चिदात्मकारणत्वसिद्धिर्जगत इति। औपनिषदः परिहरति ***तदभिधीयते। न ब्रूम इति***। न तावत् प्रत्यक्षानुमानागमसिद्धः शारीरो वा परमात्मा वास्माभिरिदानीं साधनीयः; केवलस्य प्रवृतिं प्रति कारणत्वं वक्तव्यम्। तत्र मृतशरीरे वा रथादौ वानधिष्ठिते चेतनेन प्रवृत्तेरदर्शनात् तद्विपर्यये च प्रवृत्तिदर्शनादन्वयव्यतिरेकाभ्यां चेतनहेतुकत्वं प्रवृत्तेर्निश्चीयते, नतु चेतभसद्भावमात्रेण, येनातिप्रसङ्गो भवेत्। भूतचैतनिकानामपि चेतनाधिष्ठानादचेतनानां प्रवृत्तिरित्यत्राविवाद इत्याह ***लौकायतिकानामपीति***। **स्यादेतत्**-देहः स्वयं चेतनः करचरणादिमान् स्वव्यापारेण प्रवर्त्तयतीति युक्तं, न तु तदतिरिक्तः कूटस्थनित्यश्चेतनो व्यापाररहितो ज्ञानैकस्वभावः प्रवृत्त्यभावात् प्रवर्तको युक्त इति चोदयति। ***ननु तवेति***। परिहरीत ***न अयस्कान्तवद्रूपादिवच्चयेति***। ***यथा च रूपादय इति***। सांख्यानां हि स्वदेशस्था रूपादय इन्द्रियं विकुर्वते, तेन तदिन्द्रियमर्थ प्राप्तमर्थाकारेण परिणमत इति स्थितिः। सम्प्रति चोदकः स्वाभिप्रायमादिष्करोति ***एकत्वादिति***। येषामचेतनं चेतनं चास्ति तेषामेतद्युज्यते वक्तुम् चेतनाधिष्ठितमचेतनं प्रवर्तत इति। यथा योगिनागीश्वरवादिनाम्। येषां तु चेतनातिरिक्तं नास्त्यद्वैतवादिनां, तेषां प्रवर्त्याभावे कं प्रति प्रवर्तकत्वं चेतनस्येत्यर्थः। परिहरति ***न अविद्येति***। कारणभूतया लयलक्षणयाऽविद्यया प्राक्सर्गोपचितेन च विक्षेपसंस्कारेण यत् प्रत्युवस्थापितं नाम रूपं तदेव माया, तदावेशेनास्य चोद्यस्यासकृत्प्रत्युक्तत्वात्। **एतदुक्तं भवति**-नेयं सृष्टिर्वस्तुसती येनाद्वैतिनो वस्तुसतो द्वितीयस्याभावादनुयुज्येत? काल्पनिक्यां तु सृष्टावस्ति काल्पनिकं द्वितीयं सहायं मायामयम्। **यथाहुः**-'सहायास्तादृशा एव यादृशी भवितव्यता'। इति। न चैवं ब्रह्मोपादानत्वव्याघातः, ब्रह्मण एव मायावेशेनोपादानत्वात्तदधिष्ठानत्वाज्जगद्विभ्रमस्य रजतबिभ्रमस्येव शुक्तिकाधिष्ठानस्य शुक्तिकोपादानत्वमिति निरवद्यम्।।२।। यथा पयोऽम्बुनोश्चेतनानधिष्ठितयोः स्बत एव प्रवृत्तिरेवं प्रधानस्यापीति शङ्कार्थः। तत्रापि चेतनाधिष्ठितत्वं साध्यं, न च साध्येनैव व्यभिचारः, तथा सत्यनुमानमात्रोच्छेदप्रसङ्गात्, सर्वत्रास्य सुलभत्वात्।

नचासाध्यम्, अत्रापि चेतनाधिष्ठानस्यागमसिद्धत्वात्। न च सपक्षेण व्यभिचार इति शङ्कानिराकरणस्यार्थः। **साध्यपक्षे**त्युपलक्षणं सपक्षनिक्षिपतत्वादित्यपि द्रष्टव्यम्। ननु उपसंहारदर्शनात इत्यत्रानपेक्षस्य प्रवृत्तिर्दर्शिता, इह तु सर्वस्य चेतनापेक्षा प्रवृत्तिः प्रतिपाद्यत इति कुतो न विरोध इत्यत आह ***उपसंहारदर्शनादिति***। स्थूलदर्शिलोकाभिप्रायानुरोधेन तदुक्तं न तु परमार्थत इत्यर्थः।।३।। यद्यपि सांख्यानामपि विचित्रकर्मवासनावासितं प्रधानं साम्यावस्थायामपि तथापि न कर्मवासना सर्गस्येशते, किन्तु प्रधानमेव स्वकार्ये प्रवर्त्तमानमधर्मप्रतिबद्धं सन्न सुखमयीं सृष्टिं कर्तुमुत्सहत इति धर्मेणाधर्मप्रतिबन्धोऽपनीयते। एवमधर्मेण धर्मप्रतिबन्धोऽपनीयते दुःखमय्यां सृष्टौ। स्वयमेव च प्रधानमनपेक्ष्य सृष्टौ प्रवर्त्तते। यथाहुः-'निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्' इति। ततश्च प्रतिबन्धकापनयनसाधने धर्माधर्मवासने अपि सन्निहिते इत्यागन्तोरपेक्षणीयस्याभावात् सदैव साम्येन परिणमेत वैषम्येण वा, न त्वयं कादाचित्कः परिणामभेद उपपद्येत। ईश्वरस्य तु महामायस्य चेतनस्य लीलया वा यदृच्छया वा स्वभाववैचित्र्याद्वा कर्मपरिपाकापेक्षस्य प्रवृत्तिनिवृत्ती उपपद्येते एवेति।।४।। धेनूपयुक्तं हि तृणपल्लवादि यथा स्वभावत एव चेतनानपेक्षं क्षीरभावेन परिणमते नतु तत्र धेनुचेतन्यमपेक्ष्यते, उपयोगमात्रे तदपेक्षत्वात्। एवं प्रधामपि स्वभावत एव परिणंस्यते कृतमत्र चेतनेनेति शङ्कार्थः। धेनूपयुक्तस्य तृणादेः क्षीरभावे किं निमित्तान्तरमात्रं निषिध्यते, उत चेतनम्-न तावन्निमित्तान्तरम् धेनुदेहस्थस्यौदर्यस्य वह्न्यादिभेदस्य निमित्तान्तरस्य सम्भवातत् बुद्धिपूर्वकारी तु तत्रापिश्वर एव सर्वज्ञः सम्भवतीति शङ्कानिराकरणस्यार्थः। तदिदमुक्तं ***किंञ्चिद्दैवसम्पाद्यम्* मिति***।।५।। पुरुषार्थापेक्षाभावप्रसङ्गात्। तदिदमुक्तम् ***एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यत इति***। **अथवा** पुरुषार्थाभावादिति योज्यम्। तदिदमुक्तं ***तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यमिति***। न केवलं तात्त्विको भोगोऽनाधेयातिशयस्य कूटस्थनित्यस्य पुरुषस्य न सम्भवति, अनिर्मोक्षप्रसङ्गश्च। येन हि प्रयोजनेन प्रधानं प्रवर्त्तितं तदनेन कर्त्तव्यं, भोगेन चैतत्प्रवर्त्तितमिति तमेव कुर्यान्न मोक्षं, तेनाप्रवर्त्तितत्वादित्यर्थः। ***अपवर्गश्चेत् प्रागपिति***। चितेः सदा विशुद्धत्वान्नैतस्यां जातु कर्मानुभववासनाः सन्ति, प्रधानंतु तासामनादीनामाधा रतथा च प्रधानप्रवृत्तेः प्राक् चितिर्मुक्तैवेति नापवर्गार्थमपि तत्प्रवृत्तिरिति। **शब्दाद्यनुपलब्धिप्रसङ्गश्च**। तदर्थमप्रवृत्तत्वात्प्रधानस्य। ***उभयार्थताभ्युपगमेऽपिति***। न तावदपवर्गः साध्यः तस्य प्रधानाप्रवृत्तिमात्रेण सिद्धत्वात्। भोगार्थ तु प्रवर्त्तेत। भोगस्य च सकृच्छब्दाद्युपलब्धिमात्रादेव समाप्तत्वान्न तदर्थं पुनः प्रधानं प्रवर्तेतेत्ययत्नसाध्यो मोक्षः स्यात्। निःशेषशब्दाद्युपभोगस्य चानत्येन समाप्तेरनुपपत्तेरनिर्मोक्षप्रसङ्गः। कृतभोगमपि प्रधानमासत्त्वपुरुषान्यताख्यातेः क्रियासमभिहारेण भोजयतीति चेत्, अथ पुरुषार्थाय प्रवृत्तं किमर्थ

सत्त्वपुरुषान्यताख्यातिं करोति। अपवर्गार्थमिति चेत्, हन्तायं सकृच्छब्दाद्युपभोगेन कृतप्रयोजनस्य प्रधानस्य निवृत्तिमात्रादेव सिध्यतीति कृतं सत्त्वान्यताख्यातिप्रतीक्षणेन। नचास्याः स्वरूपतः पुरुषार्थत्वम्। तस्मादुभयार्थमपि न प्रधानस्य प्रवृत्तिरुपपद्यत इति सिद्धोऽर्थाभावः। सुगममितरत्। शङ्कते ***दृक्शक्तीति***। पुरुषो हि दृक्शक्तिः। सा च दृश्यमन्तरेणानर्थिका स्यात्। नच स्वात्मन्यर्थवती, स्वात्मनि वृत्तिविरोधात्। प्रधानस्य सर्गशक्तिः। सा च सर्जनीयमन्तरेणानर्थिका स्यादिति यत्प्रधानेन शब्दादि सृज्यते, तदेव दृक्शक्तेर्दृश्यं भवतीति तदुभयार्थवत्त्वाय सर्जनमिति शङ्कार्थः। निराकरोति *सर्गशक्त्यनुच्छेदवदिति*। यथा हि प्रधानस्य सर्गशक्तिरेकं पुरुषं प्रति चरितार्थापि पुरुषान्तरं प्रति प्रवर्त्ततेऽनुच्छेदात्, एवं दृक्शक्तिरपि तं पुरुषं, प्रत्यर्थवत्त्वायानुच्छेदात्सर्वदा प्रवर्त्तेतेत्यनिर्मोक्षप्रसङ्गः। सकृदृश्यदर्शनेन वा चरितार्थत्वे न भूयः प्रवर्त्तेतेति सर्वेषामेकपदे निर्मोक्षः प्रसज्येतेति सहसा संसारः समुच्छिद्येतेति।।६।। ''**पुरुषाश्मवदितिचेत्तथापि**''। नैव दोषात् प्रच्युतिरिति शेषः। मा भूत्पुरुषार्थस्य शक्त्यर्थवत्त्वंस्य वा प्रवर्त्तकत्वं पुरुष एव दृक्शक्तिसम्पन्नः पङ्गुरिव प्रवृत्तिशक्तिसम्पन्नं प्रधानमन्धमिव प्रवर्त्तयिष्यतीति शङ्कादोषादनिर्मोक्षमाह ***अभ्युपेतहानं तावदिति***। न केवलमभ्युपेतहानम्, अयुक्तं चैतद्भवद्दर्शनालोचनेनेत्याह ***कथं चोदासीन इति***। निष्क्रियत्वे साधनं ***निर्गुणत्वाद्दिति***। शेषमतिरोहितार्थम्।।७।। यदि प्रधानावस्था कूटस्थनित्या, ततो न तस्याः प्रच्युतिर अनित्यत्वप्रसङ्गात्। यथाहुः– 'नित्यं तमाहुर्विद्वांसो यः स्वभावो न नश्यति' इति। तदिदमुक्तं ***स्वरूपप्रणाशभयादिति** इति*। अथ परिणामिनित्या, **यथाहुः**–'यस्मिन् विक्रियमाणेऽपि यत्तत्त्वं न विहन्यते तदपि नित्यम्' इति तत्राह ***बाह्यस्य चेति***। यत्साम्यावस्थया सुचिरं पर्यणमत्कथं तदेवासति विलक्षणप्रत्ययोपनिपाते वैषम्यमुपैति? अनपेक्षस्य स्वतो वापि वैषम्ये न कदाचित्साम्यं भवेदित्यर्थः।।८।। ***एवमपि प्रधानस्येति***। अङ्गित्वानुपपत्तिलक्षणो दोषस्तावन्न भवद्भिः शक्यः परिहर्त्तुमिति वक्ष्यामः। अभ्युपगम्याप्यस्यादोषत्वमुच्यत इत्यर्थः। सम्प्रत्यङ्गित्वानुपपत्तिमुपपादयति ***वैषम्योपगमयोग्या अपीति***।।९।।

क्वचित्सप्तेन्द्रियाणीति। त्वङ्मात्रमेव हि बुद्धीन्द्रियमनेकरुपादिग्रहणसमर्थमेकम्, कर्मेन्द्रियाणि पञ्च, सप्तमं च मन इति सप्तेन्द्रियाणि। ***क्वचित् त्राण्यन्तःकरणानि***। बुद्धिरहङ्कारो मन इति। ***क्वचिदेकं*** बुद्धिरिति। शेषमतिरोहितार्थम्। अत्राह सांख्यः ***नन्वौपनिषदानामपीति***। तप्यतापकभावस्तावदेकस्मिन्नोपपद्यते। नहि तपिरस्तिरिव कर्त्तृस्थभावकः, किन्तु पचिरिव कर्मस्थभावकः। परसमवेतक्रियाफलशालि च कर्म। तथाच तप्येन कर्मणा तापकसमवेतक्रियाफलशालिना तापकादन्येन भवितव्यम्, अनन्यत्वे चैत्रस्येव गन्तुः

स्वसमवेतगमनक्रियाफलनगरप्राप्तिशालिनोऽप्यकर्मत्वप्रसङ्गात्। अन्यत्वे तु तप्यस्य तापकाच्चैत्रसमवेतगमनक्रियाफलभाजो गम्यस्येव नगरस्य तप्यत्वोपपत्तेः। तस्मादभेदे तप्यतापकभावो नोपपद्यत इति। दूषणान्तरमाह ***यदि चेति*।** नहि स्वभावाद्भावो वियोजितुं शक्य इति भावः। जलधेश्च वीचितरङ्गफेनादयः स्वभावाः सन्त आविर्भावतिरोभावधर्माणो नतु तैर्जलधिः कदाचिदपि भुच्यते। न केवलं कर्मभावात्तप्यस्य तापकादन्यत्वमपि त्वनुभवसिद्धमेवेत्याह ***प्रसिद्धश्चायमिति*।** तथाहि-अर्थोऽप्युपार्जनरक्षणक्षयरागवृद्धिहिंसादोषदर्शनादनर्थः सन्नर्थिनं दुनोति, तदर्थी तप्यस्तापकश्चार्थः, तौ चेमौ लोके प्रतीतभेदौ। अभेदे च दूषणान्युक्तानि। तत्कथमेकस्मिन्नद्वये भवितुमर्हत इत्यर्थः। तदेवमौपनिषदं मतमसमञ्जसमुक्त्वा सांख्यः स्वपक्षे तप्यतापकयोर्भेदे मोक्षमुपपादयति ***जात्यन्तरभावेत्विति*।** दृग्दर्शनशक्त्योः किल संयोगस्तापनिदानं, तस्य हेतुरविवेकदर्शनसंस्कारोऽविद्या, सा च विवेकख्यात्या विद्यया विरोधित्वाद्विनिवर्त्यते, तन्निवृत्तौ तद्धेतुकः संयोगो निवर्त्तते, तन्निवृत्तौ च तत्कार्यस्तापो निवर्त्तते। **तदुक्तं पञ्चशिखाचार्येण**-''तत्संयोगहेतुविवर्जनात्स्यादवमात्यन्तिको दुःखप्रतीकारः'' इति। अत्र च न साक्षात्पुरुषस्यापरिणामिनो बन्धमोक्षौ, किन्तु बुद्धिसत्त्वस्यैव चितिच्छायापत्त्या लब्धचैतन्यस्य। तथाहि इष्टानिष्टगुणस्वरूपावधारणमविभागापन्नमस्य भोगः, भोक्तृस्वरूपावधारणमपवर्गः तेन हि बुद्धिसत्त्वमेवापवृज्यते, तथापि यथा जयः पराजयो वा श्रोद्धषु वर्त्तमानः प्राधान्यात्स्वामिन्यपदिश्यते, एवं बन्धमोक्षौ बुद्धिसत्त्वे वर्तमानो कथञ्चित्पुरुषेऽपदिश्येते, स ह्यविभागापत्त्या तत्फलस्य भोक्तेति। तदेतदभिसन्धायाह ***स्यादपि कदाचिन्मोक्षोपपत्तिरिति*।** अत्रोच्यते ***न एकत्वादेव तपयतापकभावानुपपत्तेरिति*।** यत एकत्वे तप्यतापकभावो नोपपद्यते एकत्वादेव. तस्मात्सांव्यवहारिकभेदाश्रयस्तप्यतापकभावोऽस्माभिरभ्युपेयः। तापो हि सांव्यावहारिक एव न पारमार्थिक इत्यसकृदावेदितम्। **भवेदेष दोषो यद्येकात्मतायां तप्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातामित्य**स्मदभ्युपगम इति शेषः। सांख्योऽपि हि भेदाश्रयं तप्यतापकभावं ब्रुवाणो न पुरुषस्य तपिकर्मतामाख्यातुमर्हति, तस्यापरिणामितया तपिक्रियाजनितफलशालित्वानुपपत्तेः केवलमनेन सत्त्वं तप्यमभ्युपेयं तापकं च रजः। दर्शितविषयत्वात्तु बुद्धिसत्त्वे तप्ये तदविभागापत्त्या पुरुषोऽप्यनुतप्यत इव, नतु तप्यतेऽपरिणामित्वादित्युक्तं, तदविभागापत्तिश्चाविद्या, तथा चाविद्याकृतस्तप्यतापकभाव-स्त्वयाऽभ्युपेतः, सोऽयमस्माभिरुच्यमानः किमिति भवतः परुष इवाभाति। **अपिच** नित्यत्वाभ्युपगमाच्च तापकस्यानिर्मोक्षप्रसङ्गः। शङ्कते ***तप्यतापकशक्त्योर्नित्यत्वेऽपिति*।** सहादर्शनेन निमित्तेन वर्तत इति सनिमित्तः संयोगस्तदपेक्षत्वादिति। निराकरोति ***न अदर्शनस्य तमसः इति*।** न तावत्पुरुषस्य तप्तिरित्युक्तम्। केवलमियं बुद्धिसत्त्वस्य तापकरजोजनिता, तस्य च

बुद्धिसत्त्वस्य तामसविपर्य्यासादात्मनः पुरुषाद्भेदमपश्यतः पुरुषस्तप्य इत्यभिमानः, नतु पुरुषो विपर्यासतुषेणापि युज्यते। तस्य तु बुद्धिसत्त्वस्य सात्त्विक्या विवेकख्यात्या तामसीयमविवेकख्यातिर्निवर्त्तनीया। नच सति तमसि मूले शक्यात्यन्तमुच्छेत्तुम्। तथा चोच्छिन्नापि छिन्नवदरीवत् पुनस्तमसोद्भूतेन सत्त्वमभिभूय विवेकख्यातिमपोद्य शतिशखराऽविद्याविर्भाव्येतेति वतेयमपवर्गकथा तपस्विनी दत्तजलाञ्जलिः प्रसज्येत। अस्मत्पक्षे त्वदोष इत्याह ***औपनिषदस्य त्विति***। यथा हि मुखमवदातमपि मलिनादर्शतलोपाधिकल्पितप्रतिबिम्बभेदं मलिनतामुपैति, नच तद्वस्तुतो मलिनं, नच बिम्बात्प्रतिबिम्बं वस्तुतो भिद्यते, अथ तस्मिन् प्रतिबिम्बे मलिनादर्शोपधानान्मलिनता पदं लभते। तथा चात्मनो मलिनं मुखं पश्यन् देवदत्तस्तप्यते। यदा तूपाध्ययनयाद् बिम्बमेव कल्पनावशात् प्रतिबिम्बं तच्चावदातमिति तत्त्वमवगच्छति, तदास्य तापः प्रशाम्यति-न च मलिनं मे मुखमिति। एवमविद्योपधानकल्पितावच्छेदो जीवः परमात्मप्रतिबिम्बकल्पः कल्पितैरेव शब्दादिभिः सम्पर्कात्तप्यते, नतु तत्त्वतः परमात्मनोऽस्ति तापः। यदा तु तत्त्वमसीति वाक्यश्रवणमननध्यानाभ्यासपरिपाकप्रकर्षपर्यन्तजोऽस्य साक्षात्कार उपजायते, तदा जीवः परमात्मशुद्धबुद्धतत्त्वस्वभावमात्मनोऽनुभवन् निर्मृष्टनिखिलसवासनक्लेशजालः केवलः स्वस्थो भवति, न चास्य पुनः संसारभयमस्ति तद्धेतोरवास्तवत्वेन समूलकाषं कषितत्वात्। सांख्यस्य तु सतस्तमसोऽशक्यसमुच्छेदत्वादिति। तदिदमुक्तम् ***विकारभेदस्य च वाचारम्भणमात्रत्वरवणादिति ***

इति भामती रचनानुपपत्त्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। **रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च**।।१।।

पूर्वपादे साङ्ख्यादितर्कविरोधमाशङ्क्य स्वपक्षसाधनं कृतम्। पुनरिह तर्कावलम्बेन सांख्यादिपरपक्षदूषणं क्रियते। प्रथमं सांख्यानां प्रधानकारणवादो युक्तो न वेति सन्देहः। सेन्दहबीजं सर्वत्र प्रसिद्धमूहनीयम्।

प्रधानकारणवाद एव युक्त इत्यवगम्यते। प्रधानं हि रजस्सत्त्वतमोरूपम्। तदेव जगतः कारणं भवितुमर्हति, सर्वत्र तत्कार्यसुखदुःखमोहान्वयदर्शनात्। पटादयो ह्युपलब्धाः प्रावरणादिहेतुतया सुखात्मका भवन्ति। अन्यापहृता दुःखात्मका भवन्ति। कार्याभावादुपेक्षिता मोहात्मकाः। तदेवं सुखाद्यन्वयात् त्रिगुणमेव प्रधानं जगत्कारणम्।।

इति प्राप्तेऽभिधीयते-न प्रधानं जगत्कारणम्, अचेतनत्वात्।

तथा हि - दार्वादेरचेतनस्य रथप्रासादादिषु तज्ज्ञानधिष्ठितस्य रचनानुपपत्तिर्दृश्यते। तज्ज्ञाधिष्ठितस्य रचनाप्रवृत्तिश्च दृश्यते। अतश्चेतनानधिष्ठितं प्रधानं जगत्कारणं भवितुं नार्हति। यदुक्तं सुखाद्यन्वयादिति, तदसत्। सुखादीनामान्तरत्वात्, पटादीनां बाह्यत्वात्। अतः प्रधानकारणवादो न युक्तः।।

आशङ्क्य परिहरति-

।।सू।। **पयोऽम्बुवच्चेत्तत्रापि**।।२।।

यथा पयोऽम्बु दध्यादिकरकादिभावेऽधिष्ठानानपेक्षं, तद्वत्प्रधानमपीति चेत्न। तत्राप्युक्त एव हेतुः। तस्याप्यचेतनत्वेन पक्षीकृतत्वात्।।

किञ्च-।।सू।। **व्यतिरेकानवसिथतेश्चानपेक्षत्वात्**।।३।।

यदि प्राज्ञाधिष्ठानानपेक्षत्वमचेतनस्य प्रवृत्तौ तदा सर्वदा सृष्टिप्रसङ्गेन तद्व्यतिरेकस्य प्रलयस्यानवस्थितिः प्रसज्येत। ततो नाचेतनं जगत्कारणम्।।

।।सू।। **अन्यत्राभावाच्च न तृणादिवत्**।।४।।

क्षीरायमाणधेनूपयुक्ततृणादिवदचेतनमपि प्रधानं कारणमिति वक्तुं न युक्तम्। अनडुदाद्युपयुक्ते केनाप्यनुपयुक्ते च तृणादौ क्षीरपरिणामाभावात् तदपि प्राज्ञाधिष्ठितमेव।।

।।सू।। **पुरुषाश्मवदिति चेत्तथापि**।।५।।

अचेतनमपि प्रधानं पुरुषसन्निधानात् प्रवर्तयति, यथा पङ्गुरन्धं यथा वायस्कान्तमणिरयः, ततो न **प्राज्ञापेक्षेति चेत्**-तथापि न प्रधानस्य प्रवृत्तिः संभवति। पुरुषस्याविकृतत्वात्। पंग्वश्मादेर्मार्गोपदेशायस्सन्निहितदेशान्तरप्रात्यादिः कश्चिदद्विकारो भवत्येव। तस्मादविकृत-पुरुषसन्निधिः प्रधानप्रवृत्तौ न हेतुः।।

।।सू।। **अङ्गित्वानुपपत्तेश्च**।।६।।

गुणानामुत्कर्षापकर्षभावोऽङ्गाङ्गिःभावः। ततो जगत्प्रवृत्तिरुच्यते सांख्यैः। प्रतिसर्गावस्थायां साम्यावस्थानां गुणानां वैषम्याश्रावात् तत्कृताङ्गाङ्गिभवानुपपत्तिः। अतश्च जगदारम्भो न युज्यते प्रधानकारणवादे।।

।।सू।। **अन्यथानुमितौ च ज्ञशक्तिवियोगात्**।।७।।

उक्तप्रकारादन्यप्रकारेण प्रधानेऽनुमीयमानेऽपि ज्ञातृत्वशक्तिवियोगाद्रचनानुपपत्तिस्तदवस्थैव।।

।।सू।। **अभ्युपगमेऽप्यर्थाभावात्**।।८।।

प्रधानस्याभ्युपगमे यदि प्रयोजनं, तदा यथाकथंचिदभ्युपगच्छामः। न किमपि प्रयोजनमस्ति। यतः पुरुषस्य निर्विकारत्वात् प्रधानदर्शनादिरूपविकारासंभवः। अत एव प्रकृतिधर्माध्यासनिमित्तो भोगः तद्विवेकानुसन्धानकृतं कैवल्यं च न संभवति। अतः प्रयोजनाभावात्प्रधानं न स्वीकार्यम्।।

।।सू।। **विप्रतिषेधाच्चासमञ्जसम्**।।९।।

पुरुषस्य द्रष्टृत्वभोक्तृत्वनिर्विकारत्वादिविरुद्धधर्मसहस्राभ्युपगमश्च दृश्यते। **अतोऽप्यसमञ्ज-समेव कापिलं मतम्।। इति रचनानुपपत्त्यधिकरणम्।।१।।**

इति श्री कण्ठभाष्य रचनानुपपत्त्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

॥सू॥ **रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च॥१॥**

वृत्तवर्तिष्यमाणयोः पादयोरर्थभेदोपन्यासेन पादभेदं सङ्गतिं च दर्शयन्पादान्तरारंभं **प्रतिजानीते-पूर्वपाद इति।** जगदभिन्ननिमित्तोपादाने **तदनन्ये** निरस्तनिखिलावद्ये ब्रह्मणि वेदान्तानां समन्वयः प्रथमाध्यायेन प्रतिपादितः। तस्मिन् प्रधानपरमाणुकारणवादिभिस्सांख्यवैशेषिकादिभिः केवलतर्कमवष्टभ्यापादितानि दूषणानि अस्मिन्नध्याये प्रथमपादेन निराकृतानि। तत्रापि प्रणेतृगौरवेण तेषां तर्काणामुपादेयत्वशङ्का स्मृत्यधिकरणयोगाधिकरणाभ्यां निराकृता। तत्तत्तर्कस्वरूपपर्यालोचनया तेषामुपादेयत्वशङ्का नविलक्षणत्वाधिकरण (ब्र० २-१-४)मारभ्य निराकृता। एवमाद्याधिकरणयोस्तृतीयादीनां नवानामधिकरणानां चावांतरार्थभेदेऽपि ब्रह्मवादप्रतिक्षेपकतर्क-निराकरणार्थत्वेनैकार्थ्यम्। अस्मिन्पादे तु शुष्कतर्कावलम्बना- स्सांख्यादिपरपक्षास्तथाभूतैरेव तर्कैर्दूष्यन्ते। अन्यथा षरपक्षाणामप्रतिष्ठिततर्काभासमूलतामजानतां मन्दधियां तेषु प्रामाणिकत्वशङ्कया ब्रह्मकारणवादश्रद्धाशिथिलीभावप्रसङ्गात्। एवं स्वपक्षस्थापनार्थः प्रथमपादः परंपक्षप्रतिक्षेपार्थोऽयं पाद इति पादभेदः। स्वपक्षस्थापनभ्यर्हितत्वात् प्रथमं कृतमिति तदानंतर्यमस्येति भावः। यद्यपि तृतीयचतुर्थयोरपि कार्यगोचरश्रुतिविरोधरूपपरापादितदूषणपरिहारेण स्वपक्षस्थापनं क्रियते। तथापि कारणविषयंत्वेन प्रथमद्वितीयपादयोस्सङ्गतिरिति भावः। प्रथमाध्यायगतैरीक्षतयधिकरणादिभिः पौनरुक्तयशंका 'तर्कावलम्बनेने'ति विशेषणेन निरस्ता। सांख्यादयः स्वतन्त्रतर्कैः प्रधानादिकं प्रसाध्य तत्र बहुभवनसङ्कल्पादिवाक्यविरोधो मा भूदिति तानि वाक्यानि स्वपक्षानुगुण्येन व्याचक्षते 'ईक्षितृत्वं प्रधानस्य चिद्योगादुपपद्यते। अंतः करणवत्तस्य करणत्वाददोषते' त्यादिप्रकारेण। तेषां तव्द्यख्यानन्यायानुसारिणा सम्यग्व्याख्यानेन पूर्वं निरस्तमिह तु ये स्वतन्त्रतर्कैः प्रधानादिकं कल्पयन्ति ते तथाभूतैरेव तर्कांतरैर्निरस्यन्त इति न पौनरुक्तयमिति भावः। ब्रह्मपारतंत्र्येण प्रधानस्य कारणत्वं वेदान्तानुमतमिति वैदिकपक्षनेदिष्ठस्सांख्यानामानुमानिक- स्वतंत्रप्रधानकारणवादः प्रथमाधिकरणेन निराकर्तव्य इति तत्प्राथम्यहेतुं सूचयन् संशय दर्शयति-**प्रथममिति।** संशयबीजं तु क्वचिदपि विशिष्य

नोपन्यसनीयम्। यदेव तत्र पूर्वपक्षसिद्धान्तयोर्युक्तिजातं प्रसेद्धुं प्रक्रान्तं तदेव बलाबलानवधारणदशायां तद्बीजमिति क्वचिदपि तद्विशेषयत्नो न कार्य इत्याह-**सन्देहबीजमिति।** नन्वनुमानेन मूलकारणकल्पनायां परमाणुकारणवादमपहाय प्रधानकारणवादाश्रयणे कः पक्षपातहेतुरित्याशङ्क्य प्रपञ्चस्य प्रधानैककारणमूलत्वकल्पनायां लाघवं परिच्छिन्नस्य परमाणोरेकस्य सर्वकारणत्वायोगेन तद्बहुत्वकल्पनावश्यंभावात् गौरवं परिच्छिन्नस्य कार्यत्वनियमेन परमाणोरपि परिच्छिन्नत्वेन कार्यत्वापत्त्या परिच्छिन्नतत्कारणपरम्पराकल्पनादनवस्था चेत्येवंरूपं प्रधानकारणवादे पक्षपातहेतुं 'परिच्छिन्नत्वान्न सर्वोपादान' मित्यादिकापिलसूत्रोक्तं सूचयन्पूर्वपक्षयति-**प्रधानेति।** ननु सैद्धांतिके ब्रह्मकारणवादेऽपि कारणैक्यलाघवादिकमविशिष्टमित्याशंक्य निर्गुणस्य ब्रह्मणः कार्यानुगुण्यं नास्तीति सूचयन्प्रणनस्यैव प्रपञ्चकारणत्वेन कल्पनं युक्तमित्याह-**प्रधानं हीति।** प्रधानस्य कार्यानुगुण्यमुपपादयति-पटादयो हीति। पटो येन प्राप्यते तं प्रति सत्त्वगुणोद्भवात्पटस्सुखात्मको भवति यदीयस्सोऽन्येनापह्रियते तं प्रति रजोगुणोद्भवान्मोहात्मको भवति, यस्य तस्मिन्नपेक्षया निरीक्षण भावादर्शनमेव नोदेति तं प्रति तमोगुणोद्भवान्मोहात्मको भवति 'मुह वैचित्य' इति धात्वर्थानुगमात्। पटेनान्येऽपि तावद्भावा व्याख्याताः। एवं सुखदुःखमोहात्मकस्य प्रपञ्चस्य तथाभूतमेव कारणं कल्पयितुं युक्तम्। कार्यकारणयोर्द्रव्ययोरभेदेन कारणस्यातथात्वे कार्यस्य तथात्वायोगात्। अतस्त्रिगुणात्मकं प्रधानं तत्कारणं कल्पयितुं युक्तम्। सत्त्वरजस्तमोगुणरूपास्त्रयो गुणा हि सुखदुःखमोहात्मकाः। यथाहुः-'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः। अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।। सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तमः प्रदीपवञ्चार्थतो वृत्तिः।।' इति। अयमर्थः-गुणाः सत्वरजस्तमांसि प्रीत्यप्रीतिविषादात्मकाः क्रमात्सुखदुःखमोहात्मानः क्रमादेव प्रकाशप्रवृत्तिनियमप्रयोजनाः। पुंसश्च सत्वं प्रकाशयति। प्रकाशनकार्ये सत्त्वं प्रवर्त्तयति रजोगुणः। लघोः सत्वगुणस्य रजसा सर्वत्र प्रवर्त्तने प्रसक्ते गुरुतमोगुणो नियच्छति। ततश्च तमोनिरुद्धं रजः सकृदेव प्रवर्तत इति तेन क्वचिदेव प्रयर्त्तितं सत्वं किंचिदेव प्रकाशयति। अतो न सर्वं सर्वदा सर्वस्य प्रकाशत इति व्यवस्था। एवं गुणानां स्वरूपं प्रयोजनञ्चोक्तम्। तेषां व्यापार उच्यते-'अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च'। वृत्तिर्व्यापारः प्रत्येकमभिभवादिभिस्सम्बध्यते। 'अन्योन्याभिभववृत्तयश्च गुणाः' एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते। तथा हि-सत्त्वं रजस्तमसी अभिभूय शान्तमात्मनो वृत्तिं प्रतिलभते। एवं रजः सत्वतमसी अभिभूय घोरां स्वप्रवृत्तिं तथा तमः सत्वरजसी अभिभूय मूढां स्वप्रवृत्तिमिति। 'अन्योन्याश्रयवृत्तयश्च गुणाः'। यदपेक्षया यस्य व्यापारो भवति स तस्याश्रयो विवक्षितः। 'अन्योन्यजननवृत्तयश्च गुणाः'। अन्यतमेनान्यतमो जन्यते। जननमत्र परिणामविशेषः। 'अन्योन्यमिथुनवृत्तयश्च अन्योन्यसहचराः अविनाभूता इत्यर्थः। 'अन्योन्यमिथुनास्सर्वे सर्वे सर्वत्र गामिनः। नैषामादिस्सम्प्रयोगो वियोगो

वोपलभ्यत' इति हि तदागमः। सत्वं लघु प्रकाशकमिष्टं सांख्याचार्याणाम्। तत्रानलपवनादीनामूर्ध्वज्वलनतिर्यक्पवनादिहेतुर्धर्मो लाघवम्। सत्त्वतमसी रजसा स्वकार्योन्मुखे कार्येते इत्येतद्रजस उपष्टम्भकत्वं तदुपपादकं च चलमिति। रजः सक्रियमक्रिययोः सत्त्वतमसोः कार्योन्मुखावस्थापादकमिति चलविशेषणेन दर्शितम्। तमस्तु गुरु। अत एव स्वयं चञ्चलतया लघुसत्वमपि चालयद्रजो गुरुणा तमसा तत्रतत्र प्रवृत्तिप्रतिबंधकेन क्वचिदेव प्रवृत्तिमत्क्रियत इति वरणकं नियामकं च तमः। परस्परविरोधिनामप्येषामेककार्यकरणत्वमुच्यते। 'प्रदीपवञ्चार्थतो वृत्तिः' यथा वर्त्तितैले पावकविरुद्धे अपि मिलिते सह पावकेन रूपप्रकाशनकार्यं कुरुतः एवं सत्वरजस्तमांसि परस्परविरुद्धान्यप्यर्थवशात् सह कार्यं कुर्वन्ति। 'पुरुषार्थ एव हेतुः न केनचित्कार्यते करण' मिति पुरुषार्थवशादेव प्रकृतिप्रवृत्तेरभ्युपगमादिति। एवं जगतस्त्रैगुण्योपपादनेनानुमानतस्त्रिगुणात्मकप्रधानसिद्धिं सूचयन्पूर्वपक्षमुपसंहरति-**तदेवमिति।** इदमिहानुमानमभिसंहितम्। कार्यं सुखदुःखमोहात्मकवसतुप्रकृतिकं तत्समन्वितत्वात्, सामान्यव्याप्तौ मृद्व्यसमन्वितघटशरावादिवदिति। यद्वा। सर्वं कार्य समप्रकृतिकं कार्यत्वात् विशेषव्याप्तौ घटवत् इति। लाघवादेकप्रकृतिकत्वं सिध्यतीति न परमाणुव्द्यणुकादिप्रकृतिकत्वेनार्थांतरं नापि सिद्धांत्यभिमतब्रह्मप्रकृतिकत्वेनार्थांतरम्। जडं सुखदुःखमोहात्मकं कार्यं प्रत्यतथाभूतस्य प्रकृतित्वेन सिद्ध्यनवकाशात्। न चाचेतनस्य चेतनाधिष्ठानाभावे कार्यजनने स्वयमेव प्रवृत्त्यनुपपत्तेर्लाघवात् सर्वजगत्कर्तृत्वेन परमेश्वरसिद्ध्यवश्यंभावे तस्यैव सर्वशक्तिमत्त्वेन विलक्षणं प्रपञ्चं प्रत्युपादानत्वस्याप्युपपत्तेर्न तव्द्यतिरिक्तं प्रधानं तत्प्रकृतित्वेन सिद्ध्यतीति शंकनीयम्। अचेतनस्यापि चेतनानां भोगापवर्गहेतोर्विनाऽपि चेतनाधिष्ठानं स्वयमेव प्रवृत्त्युपपत्तेः। वत्सविवृद्धिहेतोः क्षीरस्य स्वयमेव प्रस्त्रवणदर्शनात् जलदमुक्तस्य जलस्य सस्यविवृद्धिहेतोः स्वयं निस्सरणदर्शनाञ्च, क्षीरजलयोर्दधिमौक्तिककरणकादिभावेन स्वयमेव परिणतिदर्शनाञ्च, बन्धमोक्षवतः पुरुषस्यैव चेतनस्य निर्व्यापारस्याऽपि सन्निधानमात्रेणांचेतनप्रधानप्रवर्तकत्वोपपत्तेश्च, स्वयं प्रवृत्तिशक्तिरहितस्य दृक्शक्तिमतः पङ्गोः प्रवृत्तिशक्तिमंतं दृक्शक्तिरहितमन्धं प्रति प्रवर्तकत्वदर्शनात्, अयस्कान्तमणेः सन्निधानमात्रेणायः प्रवर्तकत्वदर्शनाञ्च, इत्येवं पूर्वपक्षे प्राप्ते सौत्रमनुमानपदं कर्मणिव्युत्पत्तौ प्रधानरूपपक्षनिर्देशकं नेति पदं निषेध्याध्याहारेण साध्यनिर्देशंकं च परिगृह्य हेत्वध्याहारेण स्वतन्त्रप्रधानकारणत्वसाधकानुमानस्य बाधकमनुमानं सूत्राभिप्रेतं दर्शयन् **सिद्धांतयति-न प्रधानमिति।** 'प्रधानक्षेत्रज्ञपतिर्गुणेश' इति श्रुतिसिद्धस्य प्रधानस्य सिद्धांते अंगीकृतत्वान्नाश्रयासिद्धिः। न च तथाप्यानुमानिकं स्वतंत्रप्रधानं सिद्धांते नाभ्युपगतमिति सौत्रानुमानपदनिर्दिष्टपक्षासिद्धिश्शंकनीया। सांख्यानामनुमानं साधकं चेदपि प्रधानमात्रं साधयितुं क्षमते न तद्गतं स्वातंत्र्यमपि साध्यानुप्रवेशाभावादित्याशयेन पक्षस्यानुमानपदेन निर्देशात्। 'न जगत्कारण'मिति

साध्यस्य चेतनाधिष्ठानमनपेक्ष्य स्वातंत्र्येण जगत्कारणं न भवतीत्यर्थः। तथैवाग्रिमग्रंथप्रवृत्तेः। 'रचनानुपपत्ते'रिति सूत्रपदगृहीतां व्याप्तिं सदृष्टांतं दर्शयति-**तथा हीति। 'प्रवृत्ते' रिति** सूत्रपदगृहीतं तदनुग्राहकं तर्कं दर्शयति-**तज्ज्ञाधिष्ठितस्येति।** अचेतनकारणत्वावच्छेदेन चेतनाधिष्ठानापेक्षा दृष्टेति कार्यकारणभावग्रहमूलानुकूलतर्कसहकृतत्वादिदमनुमानं प्रबलमिति भावः। चकारेण प्रधानानुमानस्य तत्स्वातंत्र्यपर्यंतसाधनेऽनुकूलतर्काभावस्समुच्चीयते। आद्यचकारेण समुच्चितां हेत्वसिद्धिमुपपादयितुं सांख्योक्तं हेतुसिद्धिप्रकारमनुवदति-**यदुक्तमिति। सुखादीनामांतरत्वादिति।** पटप्राप्तिहरणाभ्यां तत्स्वामिनस्सुखदुः-खे जायेते। तदुपेक्षकस्य तदज्ञानमनुवर्तते। इत्येतावदनुभवसिद्धम्। न तु तद्विषयस्य सुखाद्यात्मत्वम्। पटस्सुखमित्यनुभवाभावात् 'अहं सुखी' त्यादिरूपस्यैवानुभवस्योदयाच्च। न च विषयस्य सुखादिरूपत्वाभावे तज्ज्ञानादान्तरसुखोदयो न स्यादिति वाच्यम्। विषयस्येच्छादिरूपत्वाभावेऽपि तज्ज्ञानादिच्छाद्वेष-प्रयत्नोदयवत्तदुदयस्याप्युपपत्तेः सुखज्ञानादि- कार्यवशात् सुखदुःखमोहात्मत्ववल्लाघवादि-कार्यवशादन्यात्मत्वस्यापि कल्पनाप्रसङ्गेन त्रैगुण्यव्यवस्थाभंगप्रसंगाच्च। न च सुखलाघवप्रकाशानां दुःखोपष्टंभप्रवर्त्तनानां मोहगौरवावरणानां च एकैकगुणसंबधित्वकल्पनायां प्रमाणमस्ति। येन त्रैगुण्यव्यवस्थाभंगो न स्यात्। तथा सति सुखदुःखमोहानामप्येकगुणसंबंधित्वकल्पनोपपत्तेः विरोधस्य च प्रतियोगिभेदेन कालभेदेन च सुपरिहरत्वत् परेणापि सुखादिरूपोद्भवे तद्भेदस्यैव शरणीकरणीयत्वाच्चेति भावः। एवं प्रबलानुमानबाधितस्य प्रधानानुमानस्यानुत्थानात् सांख्यपक्षो न युक्त इत्याह-**अत इति। आशंक्येति।** पयोऽबुनोर्व्यभिचारमांशक्येत्यर्थः।।सू०।। **पर्योऽबुवचेत्तत्रापि**।।२।। **पक्षीकृतत्वादिति।** अचेतनत्व- हेतुना तत्रापि प्रधान इव चेतनाधिष्ठानसिद्धिसंभवेन पक्षसमत्वात् पक्षे पक्षतुल्ये वा व्यभिचाराभावादिति भावः।।सू०।। **व्यतिरेकानवस्थितेश्चानपेक्षत्वात्**।।३।। 'प्रवृत्ते'रिति प्रथमसूत्रांशेन स्वतंत्रप्रधानानुमान बाधकानुमानस्य व्याप्तिग्राहकस्तर्कः प्रदर्शितः। विषयपरिशोधकस्तर्कस्तु अनेन प्रदर्श्यते। यदि परमेश्वराधिष्ठानानपेक्षं स्वतत्रं प्रधानं स्वतंत्रमेव जगत्सृष्टौ प्रवर्तेत तदानीमपेक्षणीयान्तराभावात् सर्वदा सृष्टिप्रसंगेन तद्व्यतिरेकस्य सृष्टिविरामस्य प्रलयस्यानवस्थितिरसत्त्वं प्रसज्येतेत्यतो हेतोर्न स्वतन्त्रं प्रधानं कारणमिति।। ननु, परमेश्वराधिष्ठानापेक्षत्वपक्षेऽपि तुल्योऽयं दोषः। तदधिष्ठानस्यापि सदासत्त्वात्। धर्माधर्मसापेक्षं परमेश्वरस्य सृष्ट्यादिकर्तृत्वं तदभावादयं-दोषो न भविष्यतीति चेत् तर्हि सांख्यपक्षेऽपि तदभावादेव प्रलये न सृष्टिरिति तुल्यः परिहारः। न तुल्यः। सांख्यपक्षे प्रधानमेव सृष्ट्यादिकारणं, धर्माधर्मौ केवलं परस्परप्रतिबंधापनयार्थौ। 'निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षैत्रिकव' दिति पातञ्जलसूत्रोक्तस्य तेषामप्यभिमतत्वात्। निमित्तं धर्माधर्मरूपं प्रकृतीनां मूलप्रकृतेर्महदाद्यवांतरप्रकृतीनां चाप्रयोजकं स्वस्वकार्यजनने सहकारि न भवति किंतु वरणस्य

प्रतिबंधकस्य भेदो भङ्गस्ततो निमित्ताद्भवति क्षैत्रिकवत्। यथा हि क्षेत्रकारी केदारादपां पूर्णात्केदारांतरं समं निम्नं वा पिप्लावयिषुः केवलं वरणं तासां भिनत्ति भिन्ने तस्मिन्नापः स्वयंमेव केदारांतरं प्लावयंतीति पातञ्जलसूत्रेणोक्तमिति चेत्, किं ततः। धर्माधर्मयोस्सहकारित्वं प्रतिबन्धकनिरासार्थत्वं वास्तु। तदपेक्षा पक्षद्वयेऽपि तुल्यैव। सांख्यपक्षे प्रलयेऽपि धर्माधर्मौ वर्तेते इति चेत्, किं सिद्धांतपक्षे तौ न वर्तेते? तथा सति ह्यग्रे तत्सापेक्षा पारमेश्वरी सृष्टिर्न प्रवर्तेत। तथाऽपि पारमेश्वरस्य सृष्टिसङ्कल्पस्य कादाचित्कत्वेन तद्विरामो भविष्यतीति चेन्न। तत्सङ्कल्पस्य सृष्टिहेतुधर्माधर्मानुसारित्वे सतोस्तयोस्तदभावायोगात् तदननुसारेणैव कदाचित्सङ्कल्पः कदाचिन्नेत्यंगीकारे धर्माधर्मयोः सृष्टयौन्मुख्यदशायामपि कदाचित्तदसङ्कल्पः तदनौन्मुख्यदशायामपि तत्सङ्कल्प इति तत्सापेक्षत्वभंगप्रसंगात् केवललीलया सङ्कल्पस्यानियतकालत्वेन सृष्टिप्रलययोः कालव्यवस्थाभङ्गप्रसङ्गाञ्च। एतेन यादृच्छिकतृणच्छेदादिप्रवृत्तिवन्निमित्तनपेक्षा तस्य सृष्टयादिप्रवृत्तिरित्यपि निरस्तम्। स्वभावविशेषात् कालव्यवस्था परमेश्वरस्सृजति संहरति चेति चेत्तथैव प्रधानमपीत्यस्तु। यद्युच्येत निरंतरमनंतरमनंतशरीरादिजननेनापचितशक्तिकं प्रधानं काकवन्ध्यान्यायेन कदाचित्प्रसोतुमपक्षममास्ते यथा निरंतरलेखनकुण्ठितलेखनसामर्थ्या लेखिनी कदाचिल्लिखितुमप्रभवन्त्यवतिष्ठते पुनः पाकाख्यं परिणतिविशेषं प्राप्तं तद्यथापूर्वं प्रसूते। धर्माधर्मयोरप्येषैव रीतिः। अवश्यं च धर्माधर्मयोरवस्थाविशेषः पाकाख्योऽभ्युपगन्तव्यः। यागहिंसादिभिर्धर्माधर्मोत्पत्त्यनन्तरमेव स्वर्गनरकानुभवादर्शनात्। न चानंतानां कर्मणां विरुद्धफलानां युगपत्स्वस्वफलानुभावकत्वासंभवेन यथादर्शनं परस्परप्रतिबद्ध्यप्रतिबन्धकभावः कल्पनीय इति कस्माञ्चित्प्रतिबन्धादेव तयोः कञ्चित्कालं फलजनकत्वाभावः न तु पाकाख्यपरिणतिविशेषाभावादिति वाच्यम्। धर्माधर्मयोरुत्पत्तिप्रभृति फलजननसामर्थ्याभिव्यक्तिसद्भावे स्वस्वफलभोगोचितानेकशरीरसंपादनेन स्वस्वफलभोजयितृत्वस्याविरुद्धतया प्रतिबद्ध्यप्रतिबन्धकभावस्याकल्पनीयत्वादभिव्यक्तसामर्थ्ययोर्धर्माधर्मयोः स्वर्गनरकादिसुखदुःखवत्तदुचितशरीरविषयादावपि जनकत्वस्य सर्वसम्प्रतिपन्नत्वादिति। शक्यं वक्तुमिदं स्वतंत्रप्रधानपक्षेऽपि। न च पाकाख्यः परिणतिविशेषः चेतनाधिष्ठानं विना न संभवतीति शंक्यम्। धेनूपयुक्तस्य तृणादेस्तज्जाठराग्निसंपर्काधीने पाके चेतनाधिष्ठानाभावात्। न हि धेनुः क्षीरतापत्तिसङ्कल्पपूर्वकं भक्षितं तृणादिकं जाठराग्निना संयोज्य पाचयति। अतः स्वयमेव जाठराग्निकृततृणादिपाकवत्कालविशेषकृतः प्रधानस्य कर्मणां च पाको भविष्यति। तस्मादीश्वराधिष्ठितप्रधानपक्षे स्वतन्त्रप्रधानपक्षे च तुल्योऽस्य दोषस्य परिहार इत्याशंकानिराकरणार्थं सूत्रम्-**अन्यत्राभावाच्च न तृणादिवत्**।।४।। अचेतनमपि **प्रधानं कारणमिति।** चेतनाधिष्ठानरहितमपि प्रधानं कालविशेषमासाद्य स्वयमेव पक्वं भवतीत्यर्थः। तृणादिदृष्टांतं नानुमन्यामहे यतस्तत्रापि प्राज्ञाधिष्ठानमंगीकुर्महे। त्वयापि न तृणादिमात्रस्य

क्षीरतापत्तिहेतुपाकविशेषकारणत्वमभ्युपगन्तुं शक्यते। केनाप्यनुपयुक्ते तृणे तदभावात्। नापि जाठसग्निसंयुक्तस्य तदभ्युपगंतुं शक्यते। अनडुदाद्युपयुक्ते तदभावात्। न च धेनूनां जाठराग्नौ पाकविशेषहेतुः कश्चिद्विशेषोऽस्ति। कार्यानुसारेण कल्प्यते चेत् स विशेषश्चेतनाधिष्ठानरूप एव कल्पयितुं युक्तः, व्यंजनादिषु पाकवैचित्र्यस्य तदधीनत्वेनैव दृष्टत्वादित्यभिप्रेत्याह-**अनडुदादीति**॥ ननु, तथापि कर्मप्रधानयोः पाके वा जगज्जनने वा परमेश्वराधिष्ठानं नापेक्ष्यते निर्व्यापारस्यापि जीवरूपस्य पुरुषस्यैव सन्निधानमात्रेण तत्प्रवर्तकत्वसंभवादिति सदृष्टांताशंकां दृष्टांतासम्प्रतिपत्त्या निराकर्त्तुं सूत्रम्-**पुरुषाश्मवदिति चेत्तथापि**॥५॥ तथापीत्यस्य शेषमध्याहरति-**न प्रधानस्येति**॥ व्यतिरेकानवस्थितिसूत्रेण स्वतंत्रप्रधानकारणवादे प्रलयानुपपत्तिदोष उक्तः। तदुपपादकत्वेन तदनंतरसूत्रद्वयं प्रवृत्तम्। तत्रेदमाशंक्यते। साख्यमते सत्वरजस्तमसामन्योन्यगुणप्रधानभावमुत्सृज्य साम्येन यदवस्थानं स प्रलयस्सैव प्रधानावस्था। तेषामुत्कर्षापकर्षात्मकवैषम्यरूपेणांगांगिभावेन यदवस्थानं सा सृष्टिस्सैव विकारावस्था। एवञ्च सति जगत्कारणत्वेन सृष्टिपूर्ववर्तितयानुमीयमानं त्रिगुणं गुणसाम्यावस्थात्मकप्रधानरूपेणानुमेयमिति धर्मिग्राहकमानसिद्धसाम्यावस्थारूपः प्रलयो न निरसितुं शक्यत इति तन्निराकरणार्थं सूत्रम्-**अंगित्वानुपपत्तेश्च**॥६॥ तथा सति गुणसाम्यावस्थं प्रधानं क्षोभकचेतनव्यापाराभावात् स्वयमेव गुणवैषम्यावस्थां प्राप्तुं न क्षमते अतः सृष्टयनुपपत्तिरिति दूषणार्थः॥ यदि सुखदुःखमोहात्मकवैषम्यावस्थं जगदृष्ट्वा तदवस्थापन्नमेव त्रिगुणमनुमीयते तदा धर्मिग्राहकमानसिद्धवैषम्यावस्थाया एव सदानुवृत्तिः। पूर्वोक्तदूषणावर्तनार्थश्चकारः। स्यादेतत्। त्रिगुणं न साम्यावस्थमनुमीयते। नापि वैषम्यावस्थम्। किंत्वनादिसृष्टिप्रलयप्रवाहमूलद्विविध-संस्कारानुवृत्तिसद्भावात्तत्तत्संस्कारोद्बोधानुसारतः पर्यायेण साम्यवैषम्यभागुभयस्वभावमनुमीयते। न चाव्यवहितसंस्कारस्यैव प्रबलस्य कार्यकरत्वात् साम्यवैषम्ययोः पर्यायभवनानुपपत्तिः। मनुष्यजन्मतस्तिर्यग्जन्मप्राप्तौ व्यवहितसंस्कारस्यैव कार्यकरत्वदर्शनात्, अतो न सृष्टेर्नापि प्रलयस्यानुपपत्तिरित्याशंकानिराकरणार्थं सूत्रम्-**अन्यथानुमितौ च ज्ञशक्तिवियोगात्**॥७॥ **रचनानुपपत्तिरिति।** सौत्रेण चकारेण ज्ञातृत्वशक्तिराहित्यात्प्रधानस्य जगद्रचयितृत्व इवादृष्टसंस्कारयोस्तत्साम्यवैषम्यापादकत्वेऽप्यनुपपत्तिस्तदवस्थेति समुञ्चीयते॥ एवं सांख्याभिमतस्वतन्त्रप्रधाने प्रमाणं निरस्तमथ तदभिमतं तत्प्रयोजनं निरसितुं सूत्रम्-**अभ्युपगमेऽप्यर्थाभावात्**॥८॥ पुरुषस्य भोगापवर्गौ प्रधानस्य प्रयोजनमिति सांख्याः। यदाहुः-'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पंग्वन्धवदुभयोरपि संयोगस्तत्कृतससर्गः॥' इति। प्रधानकर्मकं सविकारप्रधानविषयं पुरुषस्य यद्दर्शनं भोगरूपं तदर्थं पुरुषस्य कैवल्यार्थञ्च परस्परापेक्षयोः प्रधानपुरुषयोः पंग्वधवत्संयोगः तत्कृतो महदादिप्रपञ्चसर्ग इत्यर्थः। अपवर्गः प्रधानस्य प्रयोजनमित्येतत्प्रपंचेन वर्णयन्ति-'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।

पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य। औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः। पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम्। नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः। गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकञ्चरति'।। इति। इदं द्विविधमपि प्रयोजनं नोपपद्यते इत्याह-**यतः पुरुषस्येति।** इदमत्र सांख्यानां दर्शनम्-पुरुषः चैतन्यमात्रवपुः कूटस्थो निर्विकारो नित्यमुक्तः। अतः सांसारिकसुखदुःखनुभवरूपभोगो न तस्य धर्मः। किं तु परिणामिन्या बुद्धेर्धर्मः। पुरुषस्य तु बुद्धिच्छायापत्त्या तदैक्यमिवापन्नस्य तद्दर्शनं भोगः। तेन तस्य विवेकाग्रहादाध्यासिकं भोर्कृत्वं विवेकख्यात्या भोक्तृत्वाध्यासमात्रनिवृत्तिर्मोक्षः। वस्तुतः पुरुषो न व बद्धो नापि मोक्ष्यते। मोक्षोपायविधयोऽपि न स्वाभाविकबन्धनिवृत्त्यर्थाः इति। तदेतत् 'न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगः' 'तद्योगादृते न स्वभावतो बद्धस्य मोक्षसाधनोपदेशः' 'स्वभावनाशात् स्वरूपनाशप्रसंगात्' इत्यादिकापिलसूत्रैः 'वस्तुस्थितया न बन्धोऽस्ति तदभावान्न मुक्तता। विकल्पघटितावेतावुभावपि न किञ्चन। आत्मनो न हि बन्धोऽस्ति वस्तुतो निर्गुणत्वतः। अविवेकाद्बन्ध इव तन्नाशः शास्त्रतो भवेत्'।। 'तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृति' रित्यादिभिस्तदागमवृद्धवचनैश्च प्रतिपन्नम्। तदेतन्नोपपद्यते। भोगाश्रयबुद्ध्यैक्यदर्शनरूपस्य भोगस्य तद्विवेकानुसंधानरूपस्य मोक्षजनकज्ञानस्य च पुरुषे निर्विकारचैतन्यात्मन्युदयासंभवात्। न च तदप्युभयं बुद्धिधर्म एवेति वाच्यम्। तावता तस्याध्यासिकस्यापि भोकृत्वस्यानिर्वाहात् मोक्षोपायत्वानिर्वाहाञ्च। तस्मात्प्रयोजनाभावादपि स्वतंत्रं प्रधानं न स्वीकरणीयमिति भावः।। स्यादेतत्। पुरुषस्य भोक्तृत्वं मोक्षोपायविवेकख्यात्यर्थश्रवणादिप्रवृत्तिमत्त्वञ्च सांख्यैरेव भोक्तृत्वमोक्षार्थप्रवृत्तिभ्यामचेतनेषु बुद्ध्यादिष्वसंभाविताभ्यां तदतिरिक्तं पुरुषं साधयद्भिरभ्युपगतम्। यदाहुः 'संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थप्रवृतेश्चेति। अतो न प्रयोजनं प्रधानाभ्युपगम इत्याशकानिराकरणार्थं सूत्रम्—**विप्रतिषेधाञ्चासमञ्जसम्।** पुरूषस्येति। इत्थं पुरूषस्य द्रष्टत्वभोक्तृत्वा दिकमभ्युपगच्छंत एव तस्य निर्विकारत्वनित्यमुक्तत्वादिकमप्यभ्युपगच्छंतीति परस्परविरुद्धाभ्युपगमादसमञ्जसमेव सांख्यमतम्। न ह्यद्वैतवादिभिरिव तैराविद्यकं द्रष्ट्त्वादिकं तात्विकनिर्विकारत्वाद्यविरोधीति समर्थयितुं शक्यमिति भावः।। **इति रचनानुपपत्त्यधिकरणम्**।।१।।

इति शिवार्कमणिदीपिका रचनानुपपत्त्यधिकरणम् समाप्तम्

महद्दीर्घाधिकरणम्।

शाङ्करभाष्यम्

प्रधानकारणवादो निराकृतः। परमाणुकारणवाद इदानीं निराकर्तव्यः। तत्रादौ तावद्योऽणुवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते, स प्रतिसमाधीयते।। तत्रायं वैशेषिकाणामभ्युपगमः– कारणद्रव्यसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते; शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्,तद्विपर्ययादर्शनाच्च। तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात्, तददर्शनात्तु न चेतनं ब्रह्म जगत्कारणं भवितुमर्हती इति।। इममभ्यु तदीययैव प्रक्रियया व्यभिचारयति– *महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्*।।११।। एषा तेषां प्रक्रिया–परमाणवः किल कञ्चित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणाश्च तिष्ठन्ति। ते च पश्चाददृष्टादिपुरः सराः संयोगसचिवाश्च सन्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते, कारणगुणाश्च कार्ये गुणान्तरम्। यदा द्वौ परमाणू द्वयगुणकमारभेते, तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनपरानारभन्ते, परमाणुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारिमाण्डल्यमपरमारभते; द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्तिनी परिमाणे वर्णयन्ति।। यदाऽपि द्वे द्व्यणुके चतुरणुकमारभेते, तदाऽपि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम्। अणुत्वह्रस्वत्वे तु द्व्यणुकसमवायिनी अपि नैवारभेतेः चतुरणुकस्य महत्त्वदीर्घत्वपरिमाण-योगाभ्युपगमात्।।

यदाऽपि बहवः परमाणवः, बहूनि वा द्व्यणुकानि, द्व्यणुकसहितो वा परमाणुः कार्यमारभते, तदाऽपि समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात्सतोऽणु ह्रस्वं च द्व्यणुकं जायते, महद्दीर्घं च त्र्यणुकादि न परिमण्डलम्, यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घं च त्र्यणुकं जायते, नाणु, नो ह्रस्वम्, एवं चेतनाद् ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे किं तव छिन्नम्? **अथ मन्यसे विरोधिना** परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादि, इत्यतो नारम्भकाणि कारणगतानि पारिमाण्डल्यादीनीत्यभ्युपगच्छामि, न तु चेतनाविरोधिना गुणान्तरेण जगत

आक्रान्तत्वमस्ति, येन कारणगता चेतना कार्यं चेतनान्तरं नारभेत। न ह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणोऽस्ति; चेतनाप्रतिषेधमात्रत्वात्। तस्मात्पारिमाण्डल्यादिवैषम्यात्प्राप्नोति चेतनाया आरम्भकत्वम्–इति, मैवं मंस्थाः ; यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारम्भकत्वम्, एवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारम्भकत्वे कारणम्; प्राक्परिमाणान्तरारम्भात्पारिमाण्डल्यादीनामारम्भकत्वोपपत्तेः, आरब्धमपि कार्यद्रव्यं प्राग्गुणारम्भात्क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भव्यग्राणि पारिमाण्डल्यादीनि, इत्यतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते: परिमाणान्तरस्यान्यहेतुत्वाभ्युपगमात्। "कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्च महत्" (वै० सू० ७/१/९) "तद्विपरीतमणु" (७/१/१०) "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" (७/१/१/१७) इति हि काणभुजानि सूत्राणि। न च संनिधानविशेषात्कुतश्चित्कारणबहुत्वादीन्येवारभन्ते, न पारिमाण्डल्यादीनीत्युच्येत; द्रव्यान्तरे गुणान्तरे वाऽऽरभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्। तस्मात्स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वम्, तथा चेतनाया अपीति द्रष्टव्यम्। संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात्समानजातीयोत्पत्तिव्यभिचारः।।

द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेत्, न; दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्तव्यम्, गुणस्य वा गुण एवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस्य गुणमुदाजहार–"प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात् संयेगस्य पञ्चात्मकं न विद्यते" (वै० सू० ४/२/२) इति। यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयन् संयोगोऽप्रत्यक्षः, एवं प्रत्यक्षाप्रत्यक्षेषु पञ्चसु भूतेषु समवयच्छरीरमप्रत्यक्षं स्यात्, प्रत्यक्षं हि शरीरम्। तस्मान्न पाञ्चभौतिकमिति। एतदुक्तं भवति–गुणश्च संयोगः, द्रव्यं शरीरम्। "दृश्यते तु" (ब्र० सू० २/१/६) इति चात्रापि विलक्षणोत्पत्तिः प्रपञ्चिता।।

ननु-एवं सति तेनैवेतद्गतम्, नेति ब्रूमः ; तत्साङ्ख्यं प्रत्युक्तम्, एतत्तु वैशेषिकं प्रति। ननु-अतिदेशोऽपि समानन्यायतया कृतः–"एतेन शिष्टापरिग्रहा अपि व्याख्याताः" (ब्र० सू० २/१/१२) इति। सत्यमेतत्। तस्यैव त्वयं वैशेषिकप्रक्रियारम्भे तत्प्रक्रियानुगतेन निदर्शनेन प्रपञ्चः कृतः।।११।। इति द्वितीयं महद्दीर्घाधिकरणम्।।

इति शाङ्करभाष्यम् महद्दीर्घाधिकरणम् समाप्तम्

वार्तिकम्

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्।।११।। यथैव ब्रह्मकारणतावादविरोधी, इति प्रधानकारणतावादो निराकृतः, तथाऽणुकारणतावादोऽपि तद्विरोधी, इति स इदानीं निराक्रियते।।

तत्रादौ तावद् योऽणुवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते, स प्रतिसमाधीयत इति भाष्यम्। तदनुपपन्नम्; "एतेन शिष्टपरिग्रहा अपि व्याख्याताः" इत्यनेन तत्प्रतिसमाधानस्य कृतत्वात् तेनास्य पौनरुक्त्यात्।।

तत्र केचिद् वदन्ति–"एतेन शिष्टापरिग्रहा" इत्यस्य प्रपञ्च आरभ्यते–इति, तदपि न साधु; परपक्षनिराकरणप्रधाने प्रकरणे तस्य कर्तुमशक्यत्वात्, तत्रैव स्वपक्षसाधनप्रकरणे तस्य कर्तुमुचितत्वात्। न हि स्वातन्त्र्येण स्वपक्षस्थापनार्थमधिकरणरचना युक्ता; भिन्नप्रकरणत्वात्। न च तत्प्रपञ्चोऽप्यत्रास्ति; भिन्नविषयत्वात्, "एतेने" त्यत्र कारणं कार्याद् न्यूनपरिमाणमेवेति नियमभङ्गस्य कृतत्वात्, इह च कारणाविरोधिगुणैनैव कार्यविशेषगुणारम्भ इति नियमभङ्गस्य दर्शितत्वात्। तस्माद् नायं समाधिः–इति।।

अत्रोच्यते; परप्रक्रियायामसिद्धिव्यभिचाराभ्यां दूषितायामर्थात् स्वप्रक्रियामादायास्मन्मते यद् दूषणमभिहितम्, तत्समाहितं भवति, इत्यार्थिकार्थमादाय "तत्रादौ तावदि" त्यादिभाष्यप्रवर्तनाद् नोक्तविरोधः। तत्र "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामि" ति सूत्रेण परप्रक्रियायां व्यभिचारस्योद्भावनं क्रियते, "उभयथाऽपि न कर्मातस्तदभावः" इत्यादिभिश्चासिद्धेः–इति। एतेन–अधिकरणभेदोऽपि–निरस्तः ; परमाणुकारणवादनिराकरणप्रकरणस्यैकत्वात्।।

तत्रैषा तावत् कणभुजामक्षपादीयानां च प्रक्रिया–समानजातीयैरेव कारणद्रव्यैः स्वसमानजातीयं कार्यद्रव्यमारभ्यते, तद्गतैश्च स्वसमानजातीयैर्गुणैः कार्यगतं गुणान्तरम्–इति; लोके तथा नियमदर्शनात्। तद्यथा पार्थिवैः शुक्लैस्तन्तुभिरारब्धः पटः पार्थिवः शुक्लश्च भवति, न जात्वसावपार्थिवः कृष्णो वा, इत्यतोऽचेतनं जगद् गम्यमानमचेतनैरेव कारणैरारब्धमिति निश्चीयते,

न चेतनेन; चेतनारब्धत्वे जगतोऽपि चेतनत्वप्रसङ्गात्। ते चाचेतनाः समानजातिगुणकाश्चतुर्विधाः परमाणवः इति तैरेवारब्धं जगत्–इति।।

अथ कः परमाणुरुच्यते? यत्र द्रव्यपरिमाणं निकर्षकाष्ठापन्नं भवति, तत् निरवयवं द्रव्यं परमाणुरित्युच्यते। कथमेतदवगम्यते? उच्यते; सूक्ष्मात् स्वतुल्यस्थलस्योत्पत्तिर्दृश्यते। यथा–तन्तुभ्यः पटस्य, एवमंशुभ्यस्तन्तूनाम्। एवमपकर्षपर्यन्तं कारणद्रव्यमतिसूक्ष्ममनवयवमवतिष्ठते। तच्च परमाणुरिति निश्चीयते। न च–तत् सावयवमेवास्तित्वति–वाच्यम्; तस्य सावयवत्वेऽभ्युपगम्यमानेऽनन्तावयवत्वेन मेरुसर्षपयोः समानपरिमाणत्वप्रसङ्गात्।।

अथ–केन क्रमेण परमाणुभिर्जगदारम्भः? कथं वा महाप्रलये प्रयत्नाभिघाताद्यभावात् तेषु न कर्मेति? उच्यते; प्रथमं तावददृष्टवदात्मसंयोगात् परमाणौ कर्म। ततोऽसौ परमाण्वन्तरेण संयुज्य द्वयणुकमारभेते। ननु–किं द्वयणुकारम्भव्यवधिना? बहुभिरेव परमाणुभिः परस्य संयुज्य स्थूलद्रव्यमारभ्यतामिति–चेत्, मैवम्; बहवस्तु परमाणवः संयुक्ताः द्वयणुकमनारभ्य न स्थूलद्रव्यमारभन्ते; परमाणुत्वे सति बहुत्वात्, घटोपगृहीतपरमाणुवत्। अत्र बहुत्वादित्युक्ते तन्त्वादिषु व्यभिचारः स्यात्, तद्वारणाय–''अणुत्वे सती'' त्युक्तम्। तावत्युक्ते द्वयणुकेषु व्यभिचारः, तद्वारणाय–''परमे'' ति। ''परमाणुत्वादि'' त्येतावत्युक्ते स्वापेक्षया स्थूलद्वयणुकारम्भके परमाणुद्वये व्यभिचारः स्यात्, तद्वारणाय ''बहुत्वादि'' त्युक्तम्। न च साध्यवैकल्यम्, घटोपगृहीतपरमाणुभिर्घटारम्भादिति–वाच्यम्; विकल्पासहत्वात्। तथाहि–किं परमाणवोऽनारभ्य द्वयणुकादीन् घटमारभन्ते, उतारभ्य। नाद्यम्; घटे प्रविभज्यमाने कपालशर्करादि नोपलभ्येत; तेषामनारब्धत्वात्, नापि द्वितीयः ; यदि हि परमाणव एव खण्डावयविनमारभ्य महावयविनमारभेरन्, तथा सति सर्व एव ते परमाणुषु समवेयुः। न चैतत् उपपद्यते; मूर्तानामवयवावयविभावविरहिणां समानदेशत्वाभावनियमात्।।

ननु–अवान्तरकार्यैः सहैव परमाणुभिरन्त्यावयव्यारभ्यते। तथा चावयवावयविभावसत्त्वाद् न तेषां सादेश्यविरोध इति चेत्, न; तथा सति घटादेः प्रत्यक्षाप्रत्यक्षवृत्तित्वेन वायुवनस्पतिसंयोगवद् अप्रत्यक्षत्वप्रसङ्गः। तस्माद् न बहूनां परमाणूनां द्रव्यं प्रति समवायिकारणत्वम्। किं तर्हि? द्वावेव परमाणू द्वयणुकमारभेते। तस्य चाणुत्वं परिमाणं परमाणुपरिमाणात् पारिमाण्डल्यादन्यद् ईश्वरापेक्षाबुद्ध्युत्पन्ना द्वित्वसङ्ख्याऽऽरभते। न च द्वयणुकाभ्यां द्रव्यस्यारम्भः। परिमाणस्य स्वजातीयपरिमाणान्तरारम्भकत्वनियमेन तस्यापि द्वयणुकत्वाद् वैयर्थ्यप्रसङ्गात् तत्कारणेन द्वयणुकेन तत्कार्यासिद्धेः। न च–तद् महद्भविष्यति, अतो न वैयर्थ्यमिति–वाच्यम्; कारणबहुत्व

महत्त्वप्रचयविशेषेभ्यो हि महत्त्वोत्पत्तेः प्रकृते च तदभावात् तदनुपपत्तेः। तथाहि—न द्वयणुकयोर्महत्त्वमस्ति, यतस्ताभ्यामारब्धं महद्भवेत्। नापि बहुत्वम्; द्वित्वात्, न वा प्रचयः ; भेदात्, तूलपिण्डानामिव तदवयवानां परमाणूनामवयवत्वेन प्रशिथिलावयवसंयोगविरहात्। तस्मादारम्भार्थवत्त्वाय बहुभिरेव द्वयणुकैः त्रिचतुरणुकं पञ्चाणुकं वा द्रव्यं महद् दीर्घमारब्धव्यम्। अस्ति हि तत्र तत्रोपभोगभेदः, अस्ति च बहुत्वसङ्ख्येश्वरबुद्धिमपेक्ष्योत्पन्ना महत्त्वपरिमाणारम्भिका। द्वयणुकादिभिरारब्धं तु कार्यद्वयं कारणबहुत्वात् कारणमहत्त्वाद्वा महद् भवतीत्येका तेषां प्रक्रिया।।

अन्या तावत् आरम्भप्रक्रिया—परमाणुभिरेव द्वयणुकमारभ्यान्त्यावयविपर्यन्तं तेस्तैरवान्तरकार्येस्सह तत्तत्कार्यमारभ्यते—इति। तद्यथा—प्रथमं तावद् द्वयणुकमसहायाभ्यामारभ्यते; परमाणुद्वयणुकयोरन्तराले तत्कार्यान्तराभावात्, त्र्यणुके तु परमाणुभिरारब्धव्ये त्रिभिर्द्वयणुकैस्सह तदारभ्यते, चतुरणुके चारब्धव्ये द्वाभ्यां द्वयणुकाभ्यां चतुर्भिर्वा त्र्यणुकैः सह, एवं पञ्चाणुकाद्यारम्भेऽपि द्रष्टव्यम्। न च—द्वाभ्यां द्वयणुकाभ्यां चतुरणुकारम्भो विफलः ; द्वयणुकविशिष्टत्वेन तत्कार्यस्य द्वयणुकादेवोत्पत्तेः, कार्यविशेषाभावादिति—वाच्यम्; द्वाभ्यां द्वयणुकाभ्यां तदारम्भकैश्चतुर्भिः परमाणुभिश्च तदारम्भेण कारणबहुत्वाद् महत्त्वोत्पत्तेर्द्वयणुकादिविशिष्टत्वासिद्धेः। न चैवमेकेन द्वयणुकेन तदारम्भकपरमाणुभ्यां वा त्र्यणुकारम्भप्रसङ्गः ; सजातीयारम्भनियमाद् द्वयणुकैकत्वे तदनुपपत्तेः। एतेन—*यदापि द्वे द्वयणुके चतुरणुकमारभेते, तदापि समानं द्वयणुकसमवायिनां शुक्लादीनामारम्भकत्वमिति भाष्यम्—व्याख्यातं द्रष्टव्यम्; आरभ्यारम्भवादाभिप्रायेण द्वयणुकयोश्चतुरणुकारम्भकत्वोक्तेः। अत एव य इदं भाष्यं प्रमादपाठं वदन्ति, स च प्रमादस्तेषामेव; व्याख्याभिप्रायापरिज्ञानात्।।

यदपि प्रकारान्तरेणेदं भाष्यं योजितम्—अथवा द्वे इति द्वित्वम्, यथा—"द्वेयकयोर्द्विवचनैकवचने" इति। अत्र द्वित्वैकत्वयोरित्यर्थः ; अन्यथा "द्वेयकेष्वि' ति स्यात्, सङ्ख्येयानां बहुत्वात्। तदेवं योजनीयम्—द्वयणुकाधिकरणे ये द्वित्वे, ते यदा चतुरणुकमारभेते; सङ्ख्येयानां चतुर्णां द्वयणुकानामारम्भकत्वात्; तद्गते द्वित्वसङ्ख्ये अप्यारम्भिके इत्यर्थः—इति, तदप्यतिक्लिष्टत्वादुपेक्षणीयम्; उक्तप्रकारेण यथाश्रुतभाष्योपपत्तेः ; अगतेरभावात्। ननु—द्वणुकादीनां त्र्यणुकाद्यारम्भकत्वे तैरेव परमाण्वादीनां कारणकारणत्वेनान्यथासिद्धेर्न त्र्यणुकाद्यारम्भकत्वम्, अनन्यथासिद्धौ वा घटादीनां प्रत्यक्षाप्रत्यक्षवृत्तित्वेन वायुवनस्पतिसंयोगवद् अप्रत्यक्षत्वप्रसङ्गः, अतो नारभ्यारम्भवादः साधुरिति—चेत्, मैवम्; कारणकारणत्वेनान्यथासिद्ध्युपगमे सर्वत्र यागादीनां व्यापारवतामकारणत्वप्रसङ्गः। स्वाङ्गमव्यवधायकमिति न्यायाद् व्यापारस्याव्यवधायकत्वमिति चेत्,

एवं तर्हि द्व्यणुकादीनामपि तद्व्यापारत्वेनाव्यवधायकत्वाद् अविरोधः। न च—एवं सर्वं परमाणुभिरेव द्व्यणुकवत् कार्यद्रव्यमारभ्यताम्, किमन्तर्गडुना द्रव्यान्तरारम्भेण व्यापारभूतेन प्रयोजनमिति—वाच्यम्; परमाणुभिरेवावान्तरकार्यद्रव्यनिरपेक्षैः सर्वद्रव्यारम्भे मुद्गरपातादिना घटादिनाशे कपाल—खर्पराद्यवान्तरकार्यानुपलम्भप्रसङ्गस्योक्तत्वात्। यदपि—वायुवनस्पतिसंयोगवद् घटादीनां प्रत्यक्षाप्रत्यक्षवृत्तित्वेनाप्रत्यक्षत्वप्रसङ्गः—इत्युक्तम्, तदपि मन्दम्; न प्रत्यक्षाप्रत्यक्षवृत्तित्वादप्रत्यक्षः। किं तर्हि? व्यासज्यवृत्तित्वे बहुत्वादिवद् यावदाश्रयग्रहैकग्रहत्वाद् एकाश्रयाप्रत्यक्षे तदभावादप्रत्यक्षः। न च घटादिव्यक्तिस्तथा; तस्या गोत्वादिवत् प्रत्याश्रयं परिसमाप्यवृत्तित्वाद् यावदाश्रयग्रहैकग्रहत्वानियमात्, अन्यथा घटादीनां मध्यपरभागाप्रत्यक्षत्वात् अप्रत्यक्षत्वापत्तेः। तस्मात् परमाण्वादीनां तदाश्रयाणामप्रत्यक्षत्वेऽपि कपाल—खर्परादीनां प्रत्यक्षत्वात् तद्ग्रहेणैव ग्रहोपपत्तेर्न घटादीनामप्रत्यक्षत्वप्रसङ्गः॥

आर्हतस्य खलु तृतीया प्रक्रिया—परमाणुभिरेव केवलैर्द्व्यणुकादि जगदारभ्यते। न च घटादेरतीन्द्रियनिष्ठत्वेनाप्रत्यक्षत्वप्रसङ्गः ; द्व्यणुकादिवत् तत्त्वेऽपि प्रत्यक्षत्वाविरोधात्। नापि मुद्गरादिपातेन घटध्वंसे खर्पराद्यवान्तरकार्यानुपलम्भप्रसङ्गः ; घटप्रतिबन्धापाये तैरेव परमाणुभिस्तदारम्भादुपलम्भोपपत्तेः। तदेतत्पक्षत्रयेऽपि व्यभिचारमाह सूत्रकारः— *महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्*॥ वाशब्द उक्तानुक्तसमुच्चयार्थः ; अव्ययानामनेकार्थत्वेन चार्थे प्रयोगात्। महद्दीर्घवदिति भावप्रधानो निर्देशः। तथाचैवं सूत्रार्थः—ह्रस्वत्व—पारिमाण्डल्यपरिमाणयोगाभ्यां द्व्यणुकपरमाणुजातिभ्यामारम्भवादे तद्विजातीयविरुद्धपरिमाणयोगि महद् दीर्घवच्च त्र्यणुकं चतुरणुकं पञ्चाणुकं वाऽऽरब्धम्। तद्गतया च बहुत्वसङ्ख्यया त्र्यणुकादिगतं महत्त्वपरिमाणमीश्वरबुद्धिमपेक्ष्य दीर्घत्वमित्यभ्युपगमः, आरम्भवादे चायं विशेषः—परिमण्डलाभ्यां ह्रस्वम्, ह्रस्वाच्च महद्दीर्घं च त्र्यणुकादीति। उभयपक्षेऽपि विजातीयैर्द्रव्यैर्विजातीयं द्रव्यमारब्धम्, विजातीयगुणैश्च विजातीया गुणाः, इति समानजातीयारम्भो विरुद्धः, सव्यभिचारश्च, पार्थिवत्वादिना च कार्यकारणद्रव्ययोः साजात्यविवक्षायामस्माकमप्यस्ति सत्त्वादिना साजात्यम्, गुणारम्भे व्यभिचारश्च दुष्परिहर एव। एव परमाणुभिरेव केवलैः समस्तं जगदारभ्यत इति प्रक्रियायामपि व्यभिचारो द्रष्टव्यः। व्याख्यानान्तरं भाष्ये सूत्राक्षरानुसारेण॥

आरम्भप्रक्रियायां व्यभिचारमुद्भाव्य सम्प्रति प्रक्रियात्रयेऽप्यविशेषेण व्यभिचारमुद्भावयति— *यदाऽपि बहवः परमाणव इति*॥ कार्यमारभते=द्व्यणुकादि कार्यमारभत इत्यर्थः। उक्तमर्थं सूत्राक्षरारूढं करोति— *तदेवमिति*॥ तस्मादुक्तप्रकारेणार्थः—परिमण्डलात् महद् दीर्घं च त्र्यणुकादि

जायत इति केवलपरमाणुकारणतावाद आरभ्यारम्भवादे वा स्थित्वोक्तम्। आरभ्यारम्भवादे, आरम्भवादे वा स्थित्वाऽऽह– *यथा व द्वयणुकादिति*।।

वैषम्यं चोदयति– *अथ मन्यस इति*।। तथापि व्यभिचारो न परिहृत इत्याह सिद्धान्ती– *मैवं मंस्था इति*।। अपि च द्रव्योत्पत्तेर्द्वितीयक्षणे ह्यणुत्वादि परिमाणमुत्पद्यत इति तव मतम्। तथा च परिमाणान्तरोत्पत्तेः प्राक् पारिमाण्डल्येन सजातीयपरिमाणारम्भसंभवाद् न तेनासता तदवरोधोऽपि संभवतीत्याह– *न च परिमाणान्तराक्रान्तत्वमिति*।। ननु–तत्काले परिमाणान्तरासत्त्वेऽपि तत्कारणे सदाऽस्ति, अतस्तेनाक्रमणं भविष्यतीति–चेत्, मैवम्; एवं सति विरुद्धपरिमाणद्वयकारणाक्रान्तत्वेन न तत्रैकमपि परिमाणं जायेत। ननु–पारिमाण्डल्यादीनां ह्रस्वत्वादिपरिमाणान्तरारम्भव्यग्रत्वाद् न समानजातीयपरिमाणान्तरारम्भकत्वमिति, नेत्याह– *न च परिमाणान्तरारम्भेति*।। उत्सूत्रं व्यभिचारान्तरमाह– *संयोगाच्चेति*।। ''द्रव्यादीनामि'' त्यादिशब्देन गुणकर्मणोर्ग्रहणम्। तद्यथा–आत्ममनः संयोगाद् ज्ञानादिगुणस्तद्विलक्षण उत्पद्यते, अदृष्टवदात्मसंयोगाच्च परमाणौ क्रियेति। ''संयोगादि'' त्युपलक्षणम्; द्रव्यगुणकर्मभ्यो हि क्रियागुणकर्माणि विलक्षणानि जायन्त इति दृष्टम्। समानजातीयैरेव द्रव्यैः स्वसमानजातीयं द्रव्यमारभ्यत इति नियमे कृते गुणे व्यभिचारप्रदर्शनमयुक्तमित्याशङ्कते– *द्रव्ये प्रकृत इति*।। अयं च नियमो विरुद्ध इत्युक्तमस्माभिः। ननु–चेतनाद् ब्रह्मणस्तद्विलक्षणमचेतनमाकाशादि द्रव्यमुत्पद्यत इति द्रव्यं प्रकृतम्। तत्र विलक्षणाद् अणुह्रस्वादिगुणात् तद्विलक्षणमहत्त्वादिगुणोत्पत्तिः परेषां दृष्टेति गुणोदाहरणमयुक्तम्; पक्षसजातीयस्यैव दृष्टान्तत्वदिति शङ्कते– *द्रव्ये प्रकृत इति*।। साध्यवत्त्वेनैव हि दृष्टान्तस्य पक्षसजातीयत्वम्, न पुनः पक्षतावच्छेदकधर्मेण; तथा सति तस्यापि पक्षत्वापत्तेर्दृष्टान्तत्वासिद्धेः प्रकृते च विलक्षणारम्भः साध्यधर्मः। स च गुणेऽप्यस्ति, इत्युपपन्नं तस्य दृष्टान्तत्वमिति परिहरति– *न; दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वादिति*।। सूत्रकारः=कणादः। सूत्रं व्याकरोति– *यथेति*।। तथाप्यस्मिन् सूत्रे को वा गुणः किं द्रव्यं प्रत्युदाहृतः? अत आह– *एतदुक्तं भवतीति*।।

यदि द्रव्यस्य द्रव्यमेवोदाहर्तव्यमित्याग्रहः, तर्हि तदप्युदाहृतमेवास्माभिरधस्तनपाद इत्याह– *दृश्यते त्विति चात्रापीति*।। ननु–परपक्षनिराकरणप्रधानप्रकरणे तत्प्रपञ्चो न युक्त इत्युक्तमिति, तत्राह– *वैशेषिकपरीक्षारम्भ इति*।। तथा च तच्छेषतया तत्प्रपञ्चो न दोषायेति भावः।।११।। इति द्वितीयं महद्दीर्घाधिकरणम्।।

इति वार्तिकम् महद्दीर्घाधिकरणम् समाप्तम्

प्रदीपः

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्॥११॥ इदमधिकरणं ब्रह्मकारणवाददूषण-परिहारपरमित्याह– *तत्रादौ तावदिति*॥

अत्र कल्पतरुः–यद्यप्यस्य स्वपक्षदोषपरिहारस्य स्मृतिपाद एव सङ्गतिः ; तथापि यदि प्रधानगुणानन्वयाद् जगद् न तत्प्रकृतिकम्, तर्हि ब्रह्मविशेषगुणानन्वयाद् न तदुपादानकमित्यवान्तरसङ्गतिलोभादिह लिखितः–इति। वार्तिककारास्तु ब्रह्मकारणतासमर्थन-स्यानुषङ्गिकत्वमेव, मुख्यं तु वैशेषिकमतनिरसनमेवेति मन्यन्ते। श्रीभाष्यकारास्तु ह्रस्वपरिमण्डलाभ्यां महद्दीर्घवद् अन्यदप्यसमञ्जसमिति वैशेषिकमतनिरसनमेवात्र विवक्षितमिति मन्यन्ते। भास्करादयस्तु प्रायेणेदमेवानुवर्तन्ते। तेषां तु मते ''उभयथाऽपी'' त्यादिकमपि महद्दीर्घवदधिकरणगुणसूत्रमेव, नाद्वैतमत इव पृथगधिकरणम्॥

तत्र श्रीभाष्यादिमते ''महद्दीर्घवदि''ति दृष्टान्ततया सिद्धवदनुवादायोगः, वापदे सत्यसमञ्जसानुषङ्गायोगः, अन्यत्पदाध्याहारः, पाञ्चरात्राधिकरण इव स्वमतसमर्थनासम्भवश्चेत्यादि विस्तृतमन्यत्र। यथाचाद्वैतमते स्वमतसमर्थनमप्यानुषङ्गिकमत्र, तथा पूर्वाधिकरणभाष्य एव व्यक्तम्। तथाच प्रथमे पादे वादः, द्वितीये जल्प इत्येव पादार्थ इति न विरोधः। तथा चाभ्युपगम्य परमाणुकारणवादप्रक्रियां तद्दृष्टान्तेन ब्रह्मकारणतावादसमर्थनं प्रथमतः कृत्वा वस्तुस्थितिमनुसृत्य परमाणुकारणवादासम्भवोऽत्र पतिपाद्यते। तथाच खण्डनीयमतोपक्षेपार्थमपि महद्दीर्घवद्वेति सूत्रम्। ''उभयथाऽपी'' त्यादीनामपि ''महद्दीर्घवद्वे'' त्यधिकरणगुणसूत्रत्वेऽपि न हानिरिति तु वार्तिककारा मन्यन्ते। मम तु प्रतिभाति–महद्दीर्घवद्वेति पूर्वपक्षनिरासार्थ वाशब्दप्रयोगादवान्तरसङ्गतिविशेष-लोभेनात्रापि स्वमतसमर्थनस्याविरोधाद् उभयथाऽपीत्यत्रैव तदभाव इति पदप्रयोगेण मतान्तरनिरासस्यावगमाच्च भामत्यादिसम्मत एव मार्गो रमणीयः। मतान्तरनिरासपरेष्वधिकरणसूत्रेषु–''नानुमानम्'', ''समुदाय उभय हेतुकेऽपि ''तदप्राप्तिः'' ''नाभाव उपलब्धेः'',

''नैकस्मिन्नसंभवात्'' ''पत्युरसामञ्जस्यात्'' ''उत्पत्त्यसम्भवात्'' इत्येषु निषेधशब्दस्य प्रयोगेण तद्रहिते ''महद्दीर्घवद्वे''ति सूत्रे मतान्तरनिरासविवक्षाया अयोगात्।।

तदत्र वैशेषिकप्रक्रियां प्रकृतोपयोगिनीं संगृह्णाति–*तत्रायमित्यादिना*।। अत्रानुसन्धेयानि वैशेषिकाणां सप्तमाह्निकगतानि–एकद्रव्यत्वात्।।७।। (पाकजानामिति शेषः) कारणबहुत्वाच्च।।८।। अतो विपरीतमणु।।१०।। कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः।।१७।। एतेन दीर्घत्व-ह्रस्वत्वे व्याख्याते।।१८।। नित्यं परिमण्डलम्।।२०।। इति सप्तम-नवम-दशम-सप्तदशाष्टादश-विंशसूत्राणि।।

तत्रै ''कद्रव्यत्वात्'' ''कर्मभिः कर्माणि गुणैश्च गुणा'' इति सूत्रार्थं मनसि निधायाह–*कारणद्रव्यसमवायिन इत्यादिना–विपर्ययादर्शनाच्चेत्यन्तेन*।। एतत्सूत्रद्वयविरोधमेव ब्रह्मकारणवादेऽतिदिशति–*तस्मादित्यादिना–अर्हतीत्यन्तेन*।।

अयमभ्युपगमो वैशषिकाणां न सर्वत्र कार्यकारणभावस्थानेषु नियतः ; कार्यगुणो परिमाणे व्यभिचारादिति निरूपयितुं ''अतो विपरीतमणु'' ''नित्यं परिमण्डलम्'' इति सूत्रसिद्धं परमाणुपरिमाणमनुवदति–*परमाणव इत्यादिना*।। परमाणुकार्ये द्वयणुकादौ पारिमाण्डल्यगुणाननुवृत्तेर्व्यभिचार इति प्रतिपादयति–*ते चेत्यादिना–वर्णयन्तीत्यन्तेन*।।

अणुत्वह्रस्वत्वे तु द्वयणुकवर्तिनी इति।। पारिमाण्डल्यविलक्षणपरिमाणविशेषौ द्वयणुकगतौ, इति द्वयणुकपरिमाणे व्यभिचारः इति भावः। न केवलं तत्रैव, किन्तु त्र्यणुकादिगतमहत्त्वदीर्घत्वे आदायापि व्यभिचार इत्याह–*यदाऽपीत्यादिना*।।

उक्तं व्यभिचारमुपसंहरन् ब्रह्मकारणताऽप्येवमविरुद्धेति प्रतिपादयति–*तदेवमित्यादिना–छिन्नमित्यन्तेन*।। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशङ्क्य समाधत्ते–*अथेत्यादिना–समानत्वादित्यन्तेन*।। पारिमाण्डल्यानारम्भकत्वे निमित्तान्तरमाशङ्क्य निरस्यति–*न च परिमाणान्तराक्रान्तत्वमित्यादिना–द्रष्टव्यमित्यन्तेन*।। न केवलं परिमाणमादाय व्यभिचारः, किन्तु संयोगमादायापीत्याह–*संयोगाच्चेत्यादिना*।। नविलक्षणत्वाधिकरणेन शिष्टापरिग्रहाधिकरणेन वा गतार्थत्वमाशङ्क्य निरस्यति–*दृश्यते त्वित्यादिना*।। अधिकं वार्तिके व्यक्तम्। निगदमितरत्।।

यथा महद्दीर्घं च त्र्यणुकादि द्वयणुकाद् ह्रस्वाद् जायते, परिमण्डलाच्च ह्रस्वमणु च द्वयणुकादि, तथा चेतनादपि ब्रह्मणोऽचेतनं जगदुत्पद्यत इति सूत्रार्थः। अत्र वाशब्दस्य

चार्थत्वमङ्गीकृत्व द्व्यणुकस्यापि जन्यस्य परामर्शाद् न विरोधः। यथाश्रुते तु परिमण्डलात् महद्दीर्घस्योत्पत्त्यनभ्युपगमाद् न सङ्गतिः। भास्करादयस्तु ह्रस्वाणुवद्वेत्यध्याहारेण योजनमभिप्रयन्ति। तथाच कारणबहुत्वस्य कार्यबहुत्वप्रयोजकत्वं मन्वानानां वैशेषिकाणां द्व्यणुकत्र्यणुकगते ह्रस्वत्वदीर्घत्वे अकारणगुण इत्यङ्गीकारे ब्रह्मकारणतावादो न विरुद्ध इति वैशेषिकैरपि स्वीकर्तुं शक्यत इति भावः।।

नविलक्षणत्वाधिकरणे साङ्ख्यानां प्रक्रिययैव विरोधो न परिहृतः, अत्र तु वैशेषिकप्रक्रिययैव विरोधः परिह्रियत इति तु विशेषः। तदेतदाह– *तत्प्रक्रियानुगतेन निदर्शनेनेति*।। *प्रपञ्च इति*।। न केवलं ''दृश्यते त्वि'' तिन्यायेन, किन्तु तत्प्रक्रियाविरोधेनापीत्यधिकांशविवक्षणादिति भावः। तथाच ''विप्रतिषेधाच्चासमञ्जसमि'' ति न्यायस्यैवायमपि प्रपञ्चः।।११।। इति द्वितीयं महद्दीर्घाधिकरणम्।।

इति प्रदीपः महद्दीर्घाधिकरणम् समाप्तम्

भामती

***प्रधान्कारणवाद इति*।** यथैव प्रधानकारणवादो ब्रह्मकारणवादविरोध्येवं परमाणुकारणवादोऽपि अतः सोऽपि निराकर्त्तव्यः। एतेन शिष्टापरिग्रहा अपि व्याख्याताः इत्यस्य प्रपञ्च आरभ्यते। तत्र वैशेषिका ब्रह्मकारणत्वं दूषयाम्बभूबुः। चेतनं चेदाकाशादीनामुपादानं तदारब्धमाकाशादि चेतनं स्यात्। कारणगुणक्रमेण हि कार्ये गुणारम्भो दृष्टः, यथा शुक्लैस्तन्तुभिरारब्धः पटः शुक्लः, न जात्वसौ कृष्णो भवति। एवं चतेनेनारब्धमाकाशादि चेतनं भवेन्न त्वचेतनम्। तस्मादचेतनोपादानमेव जगत्तत च्चाचेतनं परमाणवः। सूक्ष्मात् खलु स्थूलस्योत्पत्तिर्दृश्यते, यथा तन्तुभिः पटस्यैवमंशुभ्यस्तन्तूनामेवमपकर्षपर्यन्तं कारणद्रव्यमतिसूक्ष्ममनवयवमवतिष्ठते, तच्च परमाणु तस्य तु सावयवत्वेऽभ्युपगम्यमानेऽनन्तावयवत्वेन सुमेरुराजसर्षपयोः समानपरिमाणत्वप्रसङ्ग इत्युक्तम्। तत्र च प्रथमं तावददृष्टवत्क्षेत्रज्ञसंयोगात्परमाणौ कर्म, ततोऽसौ परमाण्वन्तरेण संयुज्य द्वयणुकमारभते। वहवस्तु परमाणवः संयुक्ता न सहसा स्थूलमारभन्ते, परमाणुत्वे सति बहुत्वात्, घटोपगृहीतपरमाणुवत्। यदि हि घटोपगृहीताः परमाणवो घटमारमेरन्, न घटे प्रविभज्यमाने कपालशर्कराद्युपलभ्येत, तेषामनारब्धत्वात्, घटस्यैव तु तैरारब्धत्वात्। तथा सति मुद्गरप्रहाराद् घटविनाशे न किंचिदुपलभ्येत, तेषामनारब्धत्वात्। तदवयवानां परमाणूनामतीन्द्रियत्वात्। तस्मान्न बहूनां परमाणूनां द्रव्यं प्रति समवायिकारणत्वम्, अपि तु द्वावेव परमाणू द्वयणुकमारभेते। तस्य चाणुत्वं परिमाणं परमाणुपरिमाणात् पारिमाण्डल्यादन्यदीश्वरबुद्धिमपेक्ष्योत्पन्ना द्वित्वसंख्याऽऽरभते। न च द्वयणुकाभ्यां द्रव्यस्यारम्भः, वैयर्थ्यप्रसङ्गात्। वैयर्व्यप्रसङ्गात्। तदपि हि द्वयणुकमेव भवेन्न तु महत्। कारणबहुत्वमहत्त्वप्रचयविशेषेभ्यो हि महत्त्वस्योत्पत्तिः। नच द्वयणुकयोर्महत्त्वमस्ति, यतस्ताभ्यामारब्धमहद्भवेत्। नापि तयोर्बहुत्वं द्वित्वादेव।

नच प्रचयभेदस्तूलपिण्डानामिव, तदवयवानामनवयवत्वेन प्रशिथिलावयवसंयोगभेदविरहात्। तस्मात्तेनापि तत्कारणद्व्यणुकवदणुनैव भवितव्यं, तथा पुरुषोपभोगातिशयाभावाददृष्टानिमित्तत्वाच्च विश्वनिर्माणस्य भोगार्थत्वात्तत्कारणेन च द्व्यणुकेन तन्निष्पत्तेः कृतं द्व्यणुकान्तरेणेत्यारम्भवैयर्थ्यात्। आरम्भर्थवत्त्वाय बहुभिरेव द्व्यणुकैस्त्र्यणुकं चतुरणुकं पञ्चाणुकं वा द्रव्यं महद्दीर्घमारब्धव्यम्। अस्ति हि तत्र तत्र भोगभेदः अस्ति च बहुत्वसंख्येश्वरबुद्धिमपेक्ष्योत्पन्ना महत्त्वपरिमाणयोनिः। त्र्यणुकादिभिरारब्धं तु कार्यद्रव्यं कारणबहुत्वाद्वा कारणमहत्त्वाद्वा कारणप्रचयभेदाद्वा कारणमहत्वाद्वा महद्भवतीति प्रक्रिया। तदेतयैव प्रक्रियया कारणसमवायिनो गुणाः कार्यद्रव्ये समानजातीयमेव गुणान्तरमारभन्त इति दूषणमदूषणीक्रियते, व्यभिचारादित्याहयथा महद् द्रव्यं त्र्यणुकादि ह्रस्वाद् द्व्यणुकाज्जायते, न तु महत्त्वगुणोपजनने द्व्यणुकगतं महत्त्वमपेक्षते, तस्य ह्रस्वत्वात्। यथा वा तदेव त्र्यणुकादि दीर्घं ह्रस्वाद् द्व्यणुकाज्जायते, न तु तद्गतं दीर्घत्वमपेक्षते, तदभावात्। वाशब्दश्चार्थेऽनुक्तसमुच्चयार्थः। यथा द्व्यणुकमणु ह्रस्वपरिमाणं परिमण्डलात् परमाणोपरिमण्डलं जायत एव चेतनाद्ब्रह्मणोऽचेतनं जगन्निष्पद्यत इति सूत्रयोजना। भाष्ये ***परमाणुगुणविशेषत्विति*।** पारिमाण्डल्यग्रहणमुपलक्षणं। न द्व्यणुकेऽणुत्वमपि परमाणुवर्त्ति पारिमाण्डल्यमारभते, तस्य हि द्वित्वसंख्यायोनित्वादित्यपि द्रष्टव्यम्। ह्रस्वपरिमण्डलाभ्यामिति सूत्रं गुणिपरं न गुणपरम्। ''**यदापि द्वे द्वे द्व्यणुके**'' इति पठितव्ये प्रमादादेकं द्वेपदं न पठितम्। एवं चतुरणुकमित्याद्युपपद्यते। इतरथा हि द्व्यणुकमेव तदपि स्यात्, तु महदित्युक्तम्। अथवा द्वे इति द्वित्वे यथा द्व्येकयोर्द्विवचनैकवचने इति। अत्र हि द्वित्वैकत्वयोरित्यर्थः। अन्यथा द्व्येकेष्विति स्यात्संख्येयानां बहुत्वात्। **तदेवं योजनीयम्**-द्व्यणुकाधिकरणे ये द्वित्वे ते यदा चतुरणुकमारमेते संख्येयानां चतुर्णा व्यणुकानामारम्भकत्वात्तत्तद्गते द्वित्वसंख्ये अपि आरम्भिके इत्यर्थः। एवं व्यवस्थितायां वैशेषिकप्रक्रियायां तद्दूषणस्य व्यभिचार उक्तः। अथाव्यवस्थिता, तथापि तदवस्थो व्यभिचार इत्याह ***यदापि वहवः परमाणवः इति*।** नाणु जायते नो ह्रस्वं जायते इति योजना। चोदयतिं ***अथ मन्यसे विरोधिना परिमाणान्तरेण*** स्वकारणद्वारेणाक्रान्तत्वादिति। परिहरति ***मैवं मंस्थां वति*।** कारणगता गुणा न कार्ये समानजातीयं गुणान्तरमारभन्त इत्येतावतैवेष्टसिद्धौ न तद्धेत्वनुसरणे खेदनीयं मन इत्यर्थः। **अपि च** सत्परिमाणान्तरमाक्रामति नासदु त्पत्तेश्च प्राक् परिमरणान्तरमसदिति कथमाक्रमेत। न च तत्कारणमाक्रामति। पारिमाण्डल्यल्यापि समानजातीयस्य कारणस्याक्रमण-हेतोर्भावेन समानबलतयोभयकार्यानुत्पादप्रसङ्गादित्याशयवानाह ***न च परिमाणान्तराक्रान्तत्व**

मिति *। न च विजातीयपरिमाणान्तरारम्भे व्यापृतता पारिमाण्डल्यादीनाम्। **न च** कारणबहुत्वादीनां सन्निधानमसन्निधानं च पारिमाण्डल्यस्येत्याह ***न च परिमाणान्तरारम्भे इति***। व्यभिचारान्तरमाह *संयोगाच्चे*। शङ्कते। ***द्रव्ये प्रकृत इति***। निराकरोति *न दृष्टान्तेनेति*। न चास्माकमयमनियमः भवतामपीत्याह ***सूत्रकारोऽपीति***। सूत्रं व्याचष्टे *यथा प्रत्यक्षाप्रत्यक्षयोः इति*। शेषमतिरोहितार्थम्॥११॥

इति भामती महद्दीर्घाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ वैशेषिकाधिकरणम्।।२।।

एवं प्रधानकारणवादो निष्प्रमाणक इति निरूपितम्। अतः परं परमाणुकारणवादनिरसनायाधिकरणमारभ्यते-

।।सू।। **महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्**।।१०।।

अत्र वैशेषिकमतसिद्धः परमाणुकारणवादो युक्तो न वेति सन्देहः।

प्रधानमते अधिष्ठातृपरमेश्वरानङ्गीकारात् तत्कारणवादे विरुद्धेऽपि परमाणुकारणवादो युज्यते। **तथा** हि-प्रलीने जगति परमेश्वरस्य सिसृक्षायां सत्यां प्राणिकर्मवशान्निश्चलेषु परमाणुषु आद्यं कर्मोत्पद्यते। तस्मात् कर्मणः एकः परमाणुः परमाण्वन्तरेण संयुज्यते। तस्माच्च संयोगाद्द्व्यणुकमारभ्यते। तेभ्यस्त्रिभ्यो द्व्यणुकेभ्यस्त्र्यणुकम्, इत्यादिक्रमेण सर्वं जगदुत्पद्यते। अतः परमाणुकारणवादे न विरोधः।।

इति पूर्वपक्षे सिद्धान्त उच्यते-ह्रस्वपरिमण्डलाभ्यां महत्त्वदीर्घत्वयुक्तत्र्यणुकाणुत्वह्रस्वत्वयुक्तद्व्यणुकोत्पत्तिरुच्यते काणादमते। **कथमेतत् संभवति?।** तथा हि-परमाणवः पारिमाण्डल्यपरिमाणयुक्ताः, न त्वणुपरिमाणयुक्ताः। द्वाभ्यां परमाणुभ्यां अणुपरिमाणरहिताभ्यामणुपरिमाणोपेतं द्व्यणुकमुत्पद्यत इत्यभ्युपगम्यते। तथा-ह्रस्वपरिमाणोपेताद्दीर्घपरिमाणरहितं द्व्यणुकम्। तादृशेभ्यस्त्रिभ्यो द्व्यणुकेभ्यो दीर्घपरिमाणोपेतमणुपरिमाणरहितं त्र्यणुकमुत्पद्यत इत्यभ्युपगम्यते। इदं सर्वमसमञ्जसमेव। तदभ्युपगतकारणगुणप्रक्रियाविरोधात्। अवयवाश्च स्वीयैः षड्भिः पार्श्वैः संयुज्यमानाः पृथुतरमवयविनमारभन्ते। परमाणूनां पार्श्वाभावात् पृथुतरद्रव्यारम्भकास्ते न भवेयुः। अतः परमाणुकारणवादो न युक्तः।।

इति श्री कण्ठभाष्य महद्दीर्घाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ वैशेषिकाधिकरणम्॥२॥

प्रधानवादवत्परमाणुवादोऽपि विप्रतिषेधादसमंजस इति दृष्टातंसगतिमभिप्रेत्यावतारयति- **एवमिति**।।सू।। **महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्**।।१०।। संशयं प्रदर्श्य प्रत्युदाहरणरूपसङ्गत्यंतरमपि वर्णयन् पूर्वपक्षयति-**अत्रेत्यादिना**।। ननु, परमेश्वराङ्गीकाराद्यद्यपि रचनानुपपत्तिर्दूषणं न भवति। तथापि व्यतिरेकानवस्थितिदूषणं भवेदेव। प्रलयेऽपि सतां परमाणूनां सक्रियाणां क्रियाभिः परस्परसंयोगस्यावर्जनीयत्वेन व्द्यणुकोत्पत्तेर्व्द्यणुकादिभिस्त्र्यणुकाद्युत्पत्तेश्चा-निवारणात्‌ न च तदानीं परमेश्वरस्य सिसृक्षाभावात्क्रियासंयोगव्द्यणुकाद्यनुत्पत्तिः। तदीयनित्य-सर्वविषयेच्छायाः सर्वदा सिसृक्षारूपत्वादित्याशंक्य पूर्वपक्षमुपपादयति-**तथा हीति॥** 'प्राणिकर्मवशा' दित्येतत् काकाक्षिन्यायेनोभयत्रापि संबध्यते। ततश्च परमेश्वरेच्छायास्सिसृक्षात्वमपि सृष्टयुन्मुखप्राण्यदृष्टोपहितत्वरूपमिति लभ्यते। एवं साख्यमतापादितदूषणास्पर्शनात् परमाणु-कारणवादो युक्त इति पूर्वपक्षमुपसंहरति-**अत इति॥** सूत्रे पूर्वसूत्रादसमञ्जसमित्यनुवर्तते। वाकारश्चार्थे वर्तमानोऽणुह्रस्वव्द्यणुकवदिति दृष्टांतांतरसमुञ्चयार्थः। एवं च ह्रस्वात्व्द्यणुकान्महतो दीर्घस्य त्र्यणुकस्योत्पत्तिवादवत् परिमण्डलात्परमाणोरणोर्ह्रस्वस्य व्द्यणुकस्योत्पत्तिवादवञ्चान्यदपि वैशेषिकमतप्रक्रियासिद्धं सर्वमसमञ्जसमिति सूत्रार्थः। तत्र समुञ्चयोपमया दृष्टान्तीकृतपरमाणु-व्द्यणुकप्रक्रिययोरसामंजस्यमप्यत्रैवोपपादनीयं विवक्षितमित्यभिप्रेत्य तदुपपादयन्सिद्धान्तयतिह्रस्व-**परिमण्डलाभ्यामिति॥ महत्त्वदीर्घत्वयुक्तेति।** नन्वेवं सति महद्दीर्घशब्दयोस्सामानाधिकरण्या 'दान्महतस्समानाधिकरणजातीययो' रिति (पा० ६.३.४६) सूत्रेण महादेव इत्यत्रेवात्वं स्यात्। न च वाच्यं महद्दीर्घशब्दौ 'व्द्येकयो' रितिवत् भावप्रधानौ, तथैव ह्रस्वपरिमण्डलशब्दावपि तथा च ह्रस्वत्वगुणान्महत्वदीर्घत्ववत् पारिमण्डल्यादणुत्वह्रस्वत्ववञ्चेति महद्दीर्घवद्वेत्यस्यार्थो विवक्षितः। अतोऽत्र द्वन्द्वसमास इति सामानाधिकरण्याभावान्नात्वप्रसङ्ग इति। ह्रस्वत्पारिमाण्डल्याभ्यां महत्त्वाणुत्वोत्पत्तेर्वैशेषिकैरनंगीकृतत्वात् 'कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाञ्च मह' दिति

कणादसूत्रे महत्वकारणानां परिगणितत्वात् समपरिमाणदृढसंयोगवत्तंत्वारब्धयोः पटयोर्मध्ये यदन्यतरस्मिन्महत्त्वमुत्कृष्टं तस्य कारणबहुत्वादुत्पत्तिः, समसंख्यदृढसंयोगवत्तन्त्वारब्धयोस्तु कारणमहत्त्वात्समपरिमाणसमसंख्यतन्त्वारब्धयोः प्रशिथिलावयवसंयोगरूपात्प्रचयादिति तैर्विभक्तत्वाच्च पारिमाण्डल्यस्य नित्यपरिमाणमात्रस्य चानारंभकताया मनःपरिमाणे गगनादिपरिमाणेषु च संप्रतिपन्नत्वेनं क्वचित्पटादिपरिमाणे तंत्वादिसंख्याजन्यत्वस्य क्लृप्तत्वेन च व्द्यणुकपरिमाणे परमाणुद्वित्वं जनकं न तु पारिमाण्डल्यमिति तैर्व्यवस्थापितत्वाच्च। एवं तर्हि महत्वदीर्घत्वाधिकरणस्य त्र्यणुकस्यैकत्वेऽपि पदार्थतावच्छेदकभेदात् द्वन्द्वोऽस्त्विति चेन्न। पदार्थभेदं विनां पदार्थतावच्छेदकमात्रभेदेन द्वंद्वस्य भाष्यकृता निराकृतत्वात्। 'चार्थे द्वन्द्वः'इति (पा०२.२.२९) सूत्रे हि भाष्यकृता 'याज्ञिकश्चायं वैयाकरण्श्चे'त्यादिषु पदार्थतावच्छेदकभेदात् द्वंद्वमाशंक्य 'शेषो बहुव्रीहि'रिति (पा० २.२.२३) सूत्रतः शेष इत्यस्यानुवृत्तेः तस्य समानाधिकरणसमासविषयत्वेन शेषत्वाभावात्तदप्राप्तिरुपपादितेति चेदुच्यते। कानि चित् त्र्यणुकानि महांति कानिचिद्दीर्घाणीति त्र्यणुकव्यक्तिभेदविवक्षयेह द्वंद्वसमास आश्रीयते। यद्यपि सर्वाणि त्र्यणुकानि महान्ति दीर्घाणि च। महत्त्वदीर्घत्वयोः समनियतत्वात्। तथापि कानिचित्त्र्यणुकानि परितो व्द्यणुकसंयोगैरुत्पद्यन्ते कानिचित्तिर्यक्द्व्यणुकसंयोगैस्तत्राद्यानि द्वितीयापेक्षयामहान्ति द्वितीयान्याद्यापेक्षया दीर्घाणीति च प्रत्यययोग्यानि भवतीति तथाभूतत्र्यणुकव्यक्तिद्वैविध्यापेक्षया द्वन्द्व उपपद्यते। यद्वा। महद्दीर्घशब्दौ महत्त्वदीर्घत्वाधिकरणं त्रयणुकमुच्यते। वाशब्देन चार्थेनाणुत्वह्रस्वत्वाधिकरणं व्द्यणुकमुच्यते। ततश्च ह्रस्वात्व्द्यणुकात् महद्दीर्घं त्र्यणुकमुत्पद्यते। परिमण्डलात्परमाणोः अणु ह्रस्वं व्द्यणुकमुत्पद्यत इत्येतदसमंजसमित्येतावदुच्यते न तु तदृष्टांतेन वैशेषिकमतसिद्धस्य कस्यचिदन्यस्यासामंजस्यम्। भाष्यमप्यस्मिन्नेवार्थे स्वारस्यवदृश्यते। 'अवयवाश्चे' त्यादिभाष्येण परमाणोर्व्द्यणुकोत्पत्तौ सूत्रकृता विवक्षितमसामंजस्यांतरमुच्यते न तु पूर्वप्रतिपादितस्यासामंजस्यस्य दार्ष्टान्तिकमसामंजस्यमुच्यत इति तत्रत्येन किंचेत्यर्थेन चकारेणैव स्पष्टम्। **तदभ्युपगतेति।** ननु, 'कारणगुणाः कार्ये गुणानारभन्त' इति वैशेषिकमर्यादा विशेषगुणविषयेति चेन्न। विशेषगुणत्वानिर्वचनात्। स्वाश्रयसमानाधिकरणद्रव्य-विभाजकधर्मात्यंताभवसमानाधिकरणगुणावृत्तिगुणत्वव्याप्यजातिमत्त्वं तदिति चेत्। न। रूपरसस्पर्शाव्याप्तेः। तेषां नीलरूपत्वादिना विशेषगुणत्वमिति चेन्न। पृथिव्यादित्रयसाधारणस्य धवलरूपस्य विशेषगुणत्वाभावप्रसंगात्। तस्य च पाकजापाकजभास्वराभास्वरत्वेन पृथिव्यादिविशेष-गुणत्वमिति चेन्न। किंचिद्धवले धवलतरे च पार्थिवद्रव्ये संयोज्य पेषणेनोत्पादितस्यातिधवलरूपस्य पृथिवीविशेषगुणत्वाभावप्रसंगात्तस्यापाकंजाभास्वरस्य जलसाधारणत्वात्। न च किंचिद्धवलं धवलतरं च रूपद्वयमेव स्वाश्रयसंवलनदोषात्तदुभयविजातीयतया प्रतीयते न तु तत्र रूपांतरमुत्पद्यत इति वाच्यम्। अबाधितरूपांतरप्रतीत्यनुसारेण हरिद्राचूर्णयोरिव जलभूतलयोरिव च तयोरपि संयोजनेन

रूपांतरोत्पत्तेरभ्युपगंतव्यत्वात्। न च तत्पाकजमिति वक्तुं शक्यम्। हिमजलेन पेषणे विरूपान्तरोत्पत्तिदर्शनात् उद्भूतोष्णस्पर्शतेजस्साध्यत्वात्पाकस्य। एवं दृढतरावर्त्तितमृदुतरस्पर्शतंतुसूत्रगतकठिनस्पर्शे च विशेषगुणत्वाभावप्रसंगो दृष्टव्य:। तत्र पृथिवीविशेषगुणत्वप्रयोजकस्य पाकप्रयोज्यजातिविशेषवत्त्वस्याभावात्। न च बहिरिंद्रियव्यवस्थापकगुणत्वं विशेषगुणत्वमिह विवक्षितं तञ्च चक्षुस्तैजसं गंधाव्यंजकत्वे सति रूपव्यंजकत्वात् सौरालोकवदित्यादिप्रकारेण यद्गुणव्यंजकतया बहिरिन्द्रियाणां भूतप्रकृतिकत्वमनुमेयं तत्त्वमिति वाच्यम्। अनुमानानामप्रयोजकत्वेन तैजसत्वाद्यसाधकत्वात्। न च सौरालोकादिषु रूपगुणमात्रव्यंजकत्वं तेजस्त्वावच्छेदेन गृहीतमिति कार्यकारणभावमूलस्तर्कोऽऽस्तीति वाच्यम्। सौरालोके तस्य उद्भूतरूपतेजस्त्वावच्छेदेन गृहीततया चक्षुषोऽप्युद्भूतरूपत्वसिद्धिप्रसंगात्। तस्माल्लोकसिद्धस्य विशेषगुणत्वस्याभावात् पारिभाषिकस्याप्यनुगतस्य निर्वक्तुमशक्यत्वात् कारणगुणप्रक्रिया गुणमात्रघटितेति भाव:। **षड्भि: पार्श्वैरिति।** यथा दशदिक्संबंधिदशप्रदेशवन्र्तोऽगुल्यादय: परस्परं संश्लेष्यमाणा: एकया महादिशा विदिक्द्वयेन चावच्छिन्नै: प्रत्येकं त्रिभिस्त्रिभि: प्रदेशै: संयुज्यन्ते एवं तन्तवोऽपि संश्लेष्यमाणा: प्रत्येकं संयुक्तसप्तपार्श्वयुक्ता: स्वाधिकपरिमाणं पटादि कार्यमारभंते। तथा निरवयवेषु परमाणुषु संयुज्यमानेष्वसंयुक्तप्रदेशासंभवात्तेषां स्वाधिकपरिमाणकार्यारंभकत्वं न स्यादित्यर्थ:। ननु परमाणुभिर्व्द्यणुकानामारंभ इष्यते। तेष्विष्ट एव महत्त्वरूपस्य पृथुत्वस्याभाव:। त्र्यणुकप्रभृतिषु तदुपपद्यत एव। तदारंभकेषु व्द्यणुकादिष्वव्याप्यवृत्तिसंयोगसंभवादिति चेन्न। तथापि द्व्यणुकपरमाण्वोरेवाणुत्वपारिमण्डल्यरूपपरिमाणविशेषाभावप्रसंगात् द्व्यणुकस्यापि परमाणुवदेव परिमण्डलत्वप्रसंगात् त्रिभि: परिमाणुभिरारब्धे त्र्यणुके महत्त्वाभावप्रसंगाञ्च। न च द्व्यणुकैरेव त्र्यणुकमारभ्यते न परमाणुभिरिति नियन्तुं शक्यते। परमाणुषु द्वयोरिव त्रयाणामपि संयोगस्य संभवात्। नायं संभवति। तथा सत्येकैकस्मिन्परमाणावेकस्मिन्परमाणौ वा परमाणुद्वयसंयोगस्यांगीकर्त्तव्यत्वापत्ति:। निरंशपरमाणुसंयोगानां व्याप्यवृत्तितया मूर्त्तानां समानदेशताविरोधेन तदंगीकारायोगादिति चेन्न। व्द्यणुकत्रयेण त्र्यणुकोत्पत्त्यर्थमप्येकैकव्द्यणुकारंभकपरमाणुसंयोगवत्येव तदारंभकरपरमाण्वंतरे तदनारंभकव्द्यणुकांतरातर्गतपरमाण्वंतरसंयोगस्यांगीकर्त्तव्यत्वात् कारणाकारणसंयोगात् कार्याकार्यसंयोग इति त्वन्मते यदवयवावच्छेदेनावयविद्वयसंयोगस्तयोरवयवयोरपि संयोगावश्यंभावात्। ननु, त्रयाणां परमाणूनां संयोगसंभवेऽपि तेषां पुञ्जांतर्गततंतूनामिव संयोगमात्रं भवेत् न कार्यारंभक्षमसंयोग:। स तु तन्तूनां कुविंदव्यापारादिव परमेश्वरेच्छावशाद्वयोरेव भवति न त्रयाणामिति चेन्न। परमेश्वरेच्छा द्वयोर्भवति न त्रिष्वित्यत्र नियामकाभावात्। सन्तु तर्हि परमाण्वारब्धानि त्र्यणुकान्यणून्येवेति चेत्तथा सति कारणबहुत्वात्कार्ये महत्त्वमिति स्वाभ्युपगतप्रक्रियाविरोधापत्ते:। तर्हि परमाणुसंयोगानां व्याप्यवृत्तित्वेऽपि कारणबहुत्वादेव महत्त्वं

स्यादिति चेन्न। कारणानां बहुत्वे समानेऽप्यसंयुक्तकारणप्रदेशपरिमाणतारतम्येन कार्येषु परिमाणतारतम्यस्य दृश्यमानतया तस्याप्यपेक्षितत्वात्। परस्परासंयुक्तकारणप्रदेशाभावे कार्ये कारणाधिकपरिमाणवत्त्वस्य दृष्टविरुद्धत्वात्। तस्मात् परमाणुजन्येषु त्र्यणुकेषु महत्त्वदीर्घत्वरूपः प्रथिमा नोपपद्यत इति दूषणं युक्तमेव। एवमेव व्द्यणुकजन्येष्वपि त्र्यणुकेषु प्रथिमा नोपपद्यते। व्द्यणुकानां परस्परसंयोगे तदवयवानामपि तदवश्यंभावेन षण्णामपि परमाणूनामेकपरमाणुमात्रत्वापत्तेः। तदाहुः-षट्केन युगपद्योगात्परमाणोष्षडंशता। षण्णां समानदेशत्वे पिण्डस्स्यादणुमात्रकः।।' इति। परमाणुः प्रागाद्यूर्ध्वाधरदेशवर्त्तिभिः षड्भिः परमाणुभिस्संबध्यमानष्षडंशः प्राप्नोति। भिन्नदेशत्वात्संबंधानाम्। अथ समानदेशास्सर्वे संबंधाः, षण्णां परमाणूनां पिण्डः परमाणुमात्रः प्राप्नोतीत्यर्थः। समानमिदं दूषणं व्द्यंणुकेभ्यः परमाणुभ्यश्च त्र्यणुकोत्पत्तौ। ननु, नानादिग्वर्तिनः परमाणवः मध्यगतेनैकेन परमाणुना कथं व्याप्यवृत्तिसंबंध लभेरन्। न हि पूर्वापरपरमाण्वोस्तेन तदपरपूर्वभागावच्छेदेन संबधः संभवतीति चेत् त्यज तर्हि परमाणोर्निरंशत्वाभिमानम्। सांशत्वमेवाभ्युपगम्य तत्संयोगस्याव्याप्यवृत्तित्वमुपपादय। तस्य सांशतायां तत्तदंशानामप्यारंभकत्वसिद्धये सांशत्वमित्यनवस्था प्रसज्येत। अतस्सांशत्वमपि तेषां स्वीकर्तुं न शक्यत इति चेत्तर्हि सांशत्वनिरंशत्वपक्षद्वयेऽपि समापतद्दोषं परमाणुकारणव्यसनमेव त्यक्त्वा सुखी भव। ननु। किमर्थं तत्त्यक्तव्यम् एकस्मिन्परमाणौ नानादिग्वर्तिपरमाणुसंयोगास्तत्तद्दिगवच्छेदेन उपपाद्यंत इति चेन्न। दिक्संयोगानामपि परमाणौ व्याप्यवृत्तित्वेन दिशां मूलाग्रवदव्याप्यवृत्तिसंयोगावच्छेदकत्वायोगात्। न च यथाकथंचिदवच्छेदकभेदसत्त्वमात्रेणाव्याप्यवृत्तित्वम्। तथा सति पृथिव्यां गन्धाधारत्वं पृथिवीत्वेनावच्छिद्यते स्पर्शाधारत्वमाकाशेतरभूतत्वेनेत्यवच्छेदकभेदसत्त्वेन गन्धादीनामप्यव्याप्यवृत्तितया संयोगाविशेषप्रसंगात्। ननु, तत्तत्परमाणुसंयोगावच्छेदेन दिक्संयोगा वर्त्तिष्यंत इति चेन्न। अन्योन्याश्रयापत्तेः। ननु, त्र्यणुकरूपकार्यलिंगेन व्द्यणुकपरमाण्वनुमानस्य प्रतिक्षेप्तुमशक्यतया त्र्यणुककारणत्वेन परमाणुव्द्यणुकेष्वव्याप्यवृत्तिषु तत्संयोगेषु चावश्यस्वीकर्त्तव्येषु कथंचिद्दिक्परमाणुसंयोगानामन्योन्यावच्छेदेनैव वृत्तिरभ्युपेयते इति चेत् यद्येवं किमित्यन्योन्याश्रयादबिभ्यदनवस्थाभयात् सांशत्वमत्याक्षीः। सांशत्वे हि वृक्षपक्षिसंयोगवदव्याप्यवृत्तित्वं दृष्टप्रकारेणैव सूपपादम्। निरंशत्वे त्वसंयुक्तप्रदेशावशेषसहिष्णवव्याप्यवृत्तित्वं कथंचिदप्युपपादयितुमशक्यमिति प्रथिमानुपपत्तिदूषणं तदवस्थमेव स्यात्। ननु, सांशत्वेऽपयपर्यवसितानन्तावयवपरंपरया मेरुसिद्धार्थयोरनंतावयवारब्धत्वाविशेषात् समानपरिमाणत्वप्रसंग इति दूषणमस्तीति चेदुक्तमेवोत्तरम्। अत्र पक्षद्वयेऽपि दूषणसद्भावे परमाणुकारणवाद एव त्यक्तव्य इति। अपि च। सांशत्वे समापतद्दूषणमेवं परिहर्तुं शक्यम्। मेरुसिद्धार्थयोरनंतावयवारब्धत्वेऽप्यानंत्यविशेषात् परिमाणविशेष उपपद्यत इति। न हि पाद्मकल्पात्पूर्वं वाराहकल्पात्पूर्वं च कालानंत्ययोः पातालादूर्ध्वं ब्रह्मांडादूर्ध्वं च

देशानंत्ययोश्च न तारतम्यम्। आनंत्ये विशेषसद्भावादेव चानंतक्षणघटितयोरवांतरकल्पमहाकल्पयोरनंतरपरमाणुघटितयोरिक्षुक्षीरसमुद्रयोश्च तारतम्यम्। यदि तु परमाणोस्सावयवतायामनित्यत्वापत्त्या स्वाभ्युपगतमूलकारणत्वासिद्धिप्रसंगात् सांशत्वं नेष्यते तदा प्रथिमानुपपत्तिदूषणं वज्रलेपायत एवेति। अस्मिन्दूषणे सूत्रं चार्थेन वाकारेण कर्त्तव्यं ह्रस्वत्वाणुत्वव्द्यणुकसमुच्चयं नापेक्षते। किं तु ह्रस्वात् व्द्यणुकात् परिमण्डलात् परमाणोश्च व्द्यणुकपरमाण्वंतरासंयुक्तप्रदेशरहितान्महत्त्वेन दीर्घत्वेन च तदपेक्षयाधिकपरिमाणवत्त्र्युणुकमुत्पद्यत इत्येतद्यथैवासमञ्जसं तथान्यदपि वैशेषिककल्पितं सर्वमसमंजसमिति सूत्रार्थ इति तदर्थं वाकारः इवकारार्थो योजनीयः। किमन्यदसमञ्जसमित्याकांक्षायां तत्प्रपंचयितुमुत्तरसूत्राणि। **पुनरनुपपत्तिमिति।** दृष्टातीकरणव्याजोद्धाटितानुपपत्तिव्यतिरेकेण दार्ष्टोतिकत्वेनापेक्षितामनुपपत्तिमाहेत्यर्थः।।सू।। **उभयथापि न कर्मातस्तदभावः**।।११।।

इति शिवार्कमणिदीपिका महद्दीर्घाधिकरणम् समाप्तम्

परमाणुजगदकारणत्वाधिकरणम्।

शाङ्करभाष्यम्

***उभयथाऽपि न कर्मातस्तदभावः*॥१२॥**

इदानीं परमाणुकारणवादं निराकरोति। स च वाद इत्थं समुत्तिष्ठते—पटादीनि हि लोके सावयवानि द्रव्याणि स्वानुगतैरेव संयोग सचिवैस्तैस्तैर्द्रव्यैरारब्धमिति गम्यते। स चायमवयवावयविविभागो यतो निवर्तते, सोऽपकर्षपर्यन्तगतः परमाणुः। सर्वं चेदं जगद्-गिरिसमुद्रादिकम्, सावयवम्, सावयवत्वाच्चाद्यन्तवत्। न चाकारणेन कार्येण भवितव्यम्—इति। अतः परमाणवो जगतः कारणमिति कणभुगभिप्रायः॥ तानीमानि चत्वारि भूतानि भूम्युदकतेजः पवनाख्यानि सावयवान्युपलभ्य चतुर्विधाः परमाणवः परिकल्प्यन्ते। तेषां चापकर्षपर्यन्तगतत्वेन परतो विभागासंभवाद्विनश्यतां पृथिव्यादीनां परमाणुपर्यन्तो विभागो भवति। स प्रलयकालः॥

ततः सर्गकाले च वायवीयेष्वणुष्वदृष्टापेक्षं कर्मोत्पद्यते। तत्कर्म स्वाश्रयमणुमण्वन्तरेण संयुनक्ति। ततो द्व्यणुकादिक्रमेण वायुरुत्पद्यते। एवमग्नि, एवमापः, एवं पृथिवी, एवमेव शरीरं सेन्द्रियम्, इत्येवं सर्वमिदं जगदणुभ्यः संभवति। अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादीनि संभवन्ति तन्तुपटन्यायेनेति काणादा मन्यन्ते॥

तत्रेदमभिधीयते—विभागावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽभ्युपगन्तव्यः ; कर्मवतां तन्त्वादीनां संयोगदर्शनात्। कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यम्। अनभ्युपगमे निमित्ताभावान्नाणुष्वाद्यं कर्म स्यात्। अभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा यथादृष्टं किमपि कर्मणो निमित्तमभ्युपगम्येत, तस्यासंभवान्नैवाणुष्वाद्यं कर्म स्यात्। न हि तस्यामवस्थायामात्मगुणः प्रयत्नः संभवति; शरीराभावात्। शरीरप्रतिष्ठे हि मनस्यात्मनः संयोगे सत्यात्मगुणः प्रयत्नो जायते। एतेनाभिघाताद्यपि दृष्टं निमित्तं प्रत्याख्यातव्यम्। सर्गोत्तरकालं हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं संभवति। अथ अदृष्टमाद्यस्य कर्मणो निमित्तमित्युच्येत, तत्पुनरात्मसमवायि वा स्यात्, अणुसमवायि वा। उभयथाऽपि नादृष्टनिमित्तमणुषु कर्मावकल्पेत; अदृष्टस्याचेतनत्वात्। न ह्यचेतनं

चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्तते, प्रवर्तयति वेति साङ्ख्यपक्रियायामभिहितम्। आत्मनश्चानुत्पन्न-चैतन्यस्य तस्यामवस्थायामचेतनत्वात्। आत्मसमवायित्वाभ्युपगमाच्च नादृष्टमणुषु कर्मणो निमित्तं स्यात्; सम्बन्धात्।।

अदृष्टवता पुरुषेणास्त्यणूनां संबन्ध इति चेत्, संबन्धसातत्यात्प्रवृत्तिसातत्यप्रसङ्गः; नियामकान्तराभावात्। तदेवं नियतस्य कस्यचित्कर्मनिमित्तस्याभावान्नाणुष्वाद्यं कर्म स्यात्। कर्माभावात्तन्निबन्धनः संयोमो न स्यात्। संयोगाभावाच्च तन्निबन्धनं द्व्यणुकादि कार्यजातं न स्यात्।। संयोगश्चाणोरण्वन्तरेण सर्वात्मना वा स्यादेकदेशेन वा। सर्वात्मना चेत्, पचयानुपपत्तेरणुमात्रत्वप्रसङ्गः, दृष्टविपर्ययप्रसङ्गश्च; प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात्। एकदेशेन चेत्, सावयवत्वप्रसङ्गः।। परमाणूनां कल्पिताः प्रदेशाः स्युरिति चेत्, कल्पितानामवस्तुत्वादवस्त्वेव संयोगः, इति वस्तुनः कार्यस्यासमवायिकारणं न स्यात्। असति चासमवायिकारणे द्व्यणुकादिकार्यद्रव्यं नोत्पद्येत।। यथा चादिसर्गे निमित्ताभावात्संयोगोत्पत्त्यर्थं कर्म नाणूनां संभवति, एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां संभवेत्। न हि तत्रापि किञ्चिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्ध्यर्थम्, न प्रलयप्रसिद्ध्यर्थम्, इत्यतो निमित्ताभावान्न स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं वा कर्म। अतश्च संयोगविभागाभावात्तदायत्तयोः सर्गप्रलययोरभावः प्रसज्येत। तस्मादनुपपन्नोऽयं परमाणुकारणवादः।।१२।।

***समवायाभ्युपगमाच्च साम्यादनवस्थितेः*।।१३।।**

समवायाभ्युपगमाच्च तदभाव इति प्रकृतेनाणुवादनिराकरणेन संबध्यते। द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामण्वोः समवैतीत्यभ्युपगम्यते भवता। न चैवमभ्युपगच्छता शक्यतेऽणुकारणता समर्थयितुम्।। कुतः? साम्यादनवस्थितेः। यथैव ह्यणुभ्यामत्यन्तभिन्नं सद् द्व्यणुकं समवायलक्षणेन सम्बन्धेन ताभ्यां सम्बध्यते, एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येनैव सम्बन्धेन समवायिभिः सम्बध्येत; अत्यन्तभेदसाम्यात्। ततश्च तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्यः, इत्यनवस्थैव प्रसज्येत।।

ननु–इहप्रत्ययग्राह्यः समवायो नित्यसंबद्ध एव समवायिभिर्गृह्यते, नासंबद्धः, सम्बन्धान्तरापेक्षो वा। ततश्च न तस्यान्यः कल्पयितव्यति येनानवस्था प्रसज्येत–इति, नेत्युच्यते; संयोगोऽप्येवं सति संयोगिभिर्नित्यसम्बद्ध एव, इति समवायवन्नान्यं सम्बन्धमपेक्षेत। अथार्थान्तरत्वात्संयोगः सम्बन्धान्तरमपेक्षेत, समवायोऽपि तर्ह्यर्थान्तरत्वात् सम्बन्धान्तरमपेक्षेत। न च–गुणत्वात्संयोगः

सम्बन्धान्तरमपेक्षते, न समवायः, अगुणत्वादिति युज्येत–वक्तुम्; अपेक्षाकारणस्य तुल्यत्वात्, गुणपरिभाषायाश्चातन्त्रत्वात्। तस्मादर्थान्तरं समवायमभ्युपगच्छतः प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्वयणुकं नैवोत्पद्येत। तस्मादप्यनुपपन्नः परमाणुकारणवादः।।१३।।

***नित्यमेव च भावात्*।।१४।।**

अपि चाणवः प्रवृत्तिस्वभावा वा, निवृत्तिस्वभावा वा, उभयस्वभावा वा, अनुभयस्वभावा वाऽभ्युपगम्यन्ते; गत्यन्तराभावात्। चतुर्धाऽपि नोपपद्यते। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात्प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वेऽपि नित्यमेव निवृत्तेर्भावात्सर्गाभावप्रसङ्गः। उभयस्वभावत्वं च विरोधादसमञ्जसम्। अनुभयस्वभावत्वे तु निमित्तवशात्प्रवृत्तिनिवृत्त्योरभ्यु-पगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसंनिधानान्नित्यप्रवृत्तिप्रसङ्गात्, अतन्त्रत्वेऽप्यदृष्टादेर्नित्या-प्रवृत्तिप्रसङ्गात्। तस्मादप्यनुपपन्नः परमाणुकारणवादः।।१४।।

***रूपादिमत्त्वाच्च विपर्ययो दर्शनात्।।१५।।**

सावयवानां द्रव्याणामवयवशो विभज्यमानानां यतः परो विभागो न सम्भवति, ते चतुर्विधा रूपादिमन्तः परमाणवश्चतुर्विधस्ये रूपादिमतो भूतभौतिकस्यारम्भका नित्याश्चेति यद्वैशेषिका अभ्युपगच्छन्ति, स तेषामभ्युपगमो निरालम्बन एव। यतो रूपादिमत्त्वात्परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येत। परमकारणापेक्षया स्थूलत्वमनित्यत्वं च तेषामभिप्रेतविपरीतमापद्येतेत्यर्थः।। कुतः? एवं लोके दृष्टत्वात्। यद्धि लोके रूपादिमद्वस्तु, तत्स्वकारणापेक्षया स्थूलमनित्यं च दृष्टम्। तद्यथा पटस्तन्तूनपेक्ष्य स्थूलोऽनित्यश्च भवति, तन्तवश्चांशूनपेक्ष्य स्थूला अनित्याश्च भवन्ति। तथा चामी परमाणवो रूपादिमन्तस्तैरभ्युपगम्यन्ते। तस्मात्तेऽपि कारणवतः, तदपेक्षया स्थूला अनित्याश्च प्राप्नुवन्ति।। यच्च नित्यत्वे कारणं तैरुक्तम्–''सदकारणवन्नित्यम्'' (वै० सू० वृ १/१) –इति, तदप्येवं सत्यणुषु न सम्भवति; उक्तेन प्रकारेणाणूनामपि कारणवत्त्वोपपत्तेः।।

यदपि नित्यत्वे द्वितीयं कारणमुक्तम्–''अनित्यमिति च विशेषतः प्रतिषेधभावः'' (वै० ४/१/४)–इति। तदपि नावश्यं परमाणूनां नित्यत्वं साधयति। असति हि यस्मिन् कस्मिंश्चिन्नित्ये वस्तुनि नित्यशब्देन नञः समासो नोपपद्यते। न पुनः परमाणुनित्यत्वमेवापेक्ष्यते। तच्चास्त्येव नित्यं परमकारणं ब्रह्म। न च शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य प्रसिद्धिर्भवति; प्रमाणान्तरसिद्धयोः शब्दार्थयोर्व्यवहारावतारात्। यदपि नित्यत्वे तृतीयं कारणमुक्तम्–''अविद्या च'' (वै० ४/१/५) इति,

तद् यद्येवं विव्रियेत—सतां परिदृश्यमानकार्याणां कारणानां प्रत्यक्षेणाग्रहणमविद्या—इति, ततो द्वयणुकनित्यताऽऽपद्येत। अथाद्रव्यत्वे सतीति विशेष्येत, तथाप्यकारणवत्त्वमेव नित्यतानिमित्त-मापद्येत। तस्य च प्रागेवोक्तत्वात् "अविद्या च" इति पुनरुक्तं स्यात्। अथापि कारणविभागात्कारणविनाशाच्चान्यस्य तृतीयस्य विनाशहेतोरसम्भवोऽविद्या, सा परमाणूनां नित्यत्वं ख्यापयतीति व्याख्यायेत, नावश्यं विनश्यद्वस्तु द्वाभ्यामेव हेतुभ्यां विनष्टुमर्हतीति नियमोऽस्ति। संयोगसचिवे ह्यनेकस्मिंश्च द्रव्ये द्रव्यान्तरस्यारम्भकेऽभ्युपगम्यमान एतदेवं स्यात्, यदा त्वपास्तविशेषं सामान्यात्मकं कारणं विशेषवदवस्थान्तरमापद्यमानमारम्भकमभ्युपगम्यते, तदा घृतकाठिन्यविलय-नवन्मूर्त्यवस्थाविलयनेनापि विनाश उपपद्यते। तस्माद्रूपादिमत्त्वात्स्याद- भिप्रेतविपर्ययः परमाणूनाम्। तस्मादप्यनुपपन्नः परमाणुकारणवादः।।१५।।

***उभयथा च दोषात्*।।१६।।**

गन्धरसरूपस्पर्शगुणा स्थूला पृथिवी, रूपरसस्पर्शगुणाः सूक्ष्मा आपः, रूपस्पर्शगुणं सूक्ष्मतरं तेजः, स्पर्शगुणः सूक्ष्मतमो वायुरित्येवमेतानि चत्वारि भूतान्युपचितापचितगुणानि स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमतारतम्योपेतानि च लोके लक्ष्यन्ते, तद्वत्परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन्, न वा। उभयथा च दोषानुपङ्गोऽपरिहार्य एव स्यात्। कल्प्यमाने तावदुपचितापचितगुणत्व उपचितगुणानां मूर्त्युपचयादपरमाणुत्वप्रसङ्गः। न चान्तरेणापि मूर्त्युपचयं गुणोपचयो भवतीत्युच्यते; कार्येषु भूतेषु गुणोपचये मूर्त्युपचयदर्शनात्। अकल्प्यमाने तूपचितापचितगुणत्वे परमाणुत्वसाम्यप्रसिद्धये यदि तावत्सर्व एकैकगुणा एव कल्प्येरन्, ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यात्, अप्सु रूपस्पर्शयोः, पृथिव्यां च रसरूपस्पर्शानाम्; कारणगुणपूर्वकत्वात्कार्यगुणानाम्। अथ सर्वे चतुर्गुणा एव कल्प्येरन्, ततोऽप्स्वपि गन्धस्योपलब्धिः स्यात्, तेजसि गन्धरसयोः, वायौ गन्धरूपरसानाम्। न चैवं दृश्यते। तस्मादप्यनुपपन्नः परमाणुकारणवादः।।१६।।

***अपरिग्रहाच्चात्यन्तमनपेक्षा*।।१७।।**

प्रधानकारणवादो वेदविद्भिरपि कैश्चिन्मन्वादिभिः सत्कार्यत्वाद्यंशोपजीवनाभिप्रायेणोपनिबद्धः, अयं तु परमाणुकारणवादो न कैश्चिदपि शिष्टैः केनचिदप्यंशेन परिगृहीत इत्यत्यन्तमेवानादरणीयो वेदवादिभिः।

अपि च वैशेषिकास्तन्त्रार्थभूतान् षट्पदार्थान् द्रव्यगुणकर्मसामान्यविशेषसमवायाख्या-नत्यन्तभिन्नान्भिन्नलक्षणानभ्युपगच्छन्ति—यथा मनुष्यः, अश्वः, शशः—इति। तथात्वं चाभ्युपगम्य

तद्विरुद्धं द्रव्याधीनत्वं शेषाणामभ्युपगच्छन्ति, तन्नोपपद्यते, कथम्? यथा हि लोके शश कुश-पलाशप्रभृतीनामत्यन्तभिन्नानां सतां नेतरेतराधीनत्वं भवति, एवं द्रव्यादीनामत्यन्तभिन्नत्वान्नैव द्रव्याधीनत्वं गुणादीनां भवितुमर्हति। अथ भवति द्रव्याधीनत्वं गुणादीनाम्, ततो द्रव्यभावे भवाद्-द्रव्याभावेऽभावाद् द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभाग्भवति। यथा देवदत्त एक एव सन्नवस्थान्तरयोगादनेकशब्दप्रत्ययभाग्भवति, तद्वत्। तथा सति साङ्ख्यसिद्धान्तप्रसङ्गः, स्वसिद्धान्तविरोधश्चापद्येयाताम्।।

ननु–अग्नेरन्यस्यापि सतो धूमस्याग्न्यधीनत्वं दृश्यते, सत्यं दृश्येत; भेदप्रतीतेस्तु तत्राग्निधूमयोरन्यत्वं निश्चीयते। इह तु शुक्लः कम्बलः, रोहिणी धेनुः, नीलमुत्पलमिति द्रव्यस्यैव तस्य तस्य तेन तेन विशेषणेन प्रतीयमानत्वान्नैव द्रव्यगुणयोरग्निधूमयोरिव भेदप्रतीतिरस्ति। तस्माद् द्रव्यात्मकता गुणस्य। एतेन–कर्मसामान्यविशेषसमवायानां द्रव्यात्मक्ता–व्याख्याता।। गुणानां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यद्युच्येत, तत्पुनरयुतसिद्धत्वमपृथग्देशत्वं वा स्यात्,अपृथक्कालत्वं वा, अपृथक्स्वभावत्वं वा; सर्वथाऽपि नोपपद्यते। अपृथग्देशत्वे तावत्स्वाभ्युपगमो विरुध्येत।।

कथम्? तन्त्वारब्धो हि पटस्तन्तुदेशोऽभ्युपगम्यते, न पटदेशः। पटस्य तु गुणाः शुक्लत्वादयः पटदेशा अभ्युपगम्यन्ते, न तन्तुदेशाः। तथा चाहुः–''द्रव्याणि द्रव्यान्तरमारभन्ते, गुणाश्च गुणान्तरम्'' (वै० १/१/१०) इति। तन्तवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभन्ते। तन्तुगताश्च गुणाः शुक्लादयः कार्यद्रव्ये पटे शुक्लादिगुणान्तरमारभन्त इति हि तेऽभ्युपगच्छन्ति। सोऽभ्युपगमो द्रव्यगुणयोरपृथग्देशत्वेऽभ्युपगम्यमाने बाध्येत। अथापृथक्कालत्वमयुतसिद्धत्वमुच्येत, सव्यदक्षिण-योरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत। तथाऽपृथक्स्वभावत्वे त्वयुतसिद्धत्वे न द्रव्यगुणयोरात्मभेदः सम्भवति; तस्य तादात्म्येनैव प्रतीयमानत्वात्। युतसिद्धयोः सम्बन्धः संयोगो, अयुतसिद्धयोस्तु समवाय इत्ययमभ्युपगमो मृषैव तेषाम्; प्राक्सिद्धस्य कार्यात्कारणस्यायुतसिद्धत्वानुपपत्तेः।।

अथान्यतरापेक्ष एवायमभ्युपगमः स्यात् अयुतसिद्धस्य कार्यस्य कारणेन सम्बन्धः समवायः–इति, एवमपि प्रागसिद्धस्यालब्धात्मकस्य कार्यस्य कारणेन सम्बन्धो नोपपद्यते; द्वयायत्तत्वा-त्सम्बन्धस्य। सिद्धं भूत्वा सम्बध्यत इति चेत्, प्राक्कारणसम्बन्धात्कार्यस्य सिद्धावभ्युपगम्य-मानायामयुतसिद्ध्यभावात्कार्यकारणयोः संयोगविभागौ न विद्येते इतीदं दुरुक्तं स्यात्। यथा चोत्पन्नमात्रस्याक्रियस्य कार्यद्रव्यस्य विभुभिराकाशादिभिर्द्रव्यान्तरैः सम्बन्धः संयोग एवाभ्युपगम्यते, न समवायः, एवं कारणद्रव्येणापि सम्बन्धः संयोग एव स्यात्, न समवायः।।

नापि संयोगस्य समवायस्य वा सम्बन्धस्य सम्बन्धिव्यतिरेकेणास्तित्वे किञ्चित्प्रमाणमस्ति। सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेत्, न; एकत्वेऽपि स्वरूपबाह्यरूपापेक्षयाऽनेकशब्दप्रत्ययदर्शनात्–यथैकोऽपि सन् देवदत्तो लोके स्वरूपं सम्बन्धिरूपं चापेक्ष्यानेकशब्दप्रत्ययभाग्भवति–मनुष्यः, ब्राह्मणः, श्रोत्रियः, वदान्यः, बालः, युवा, स्थविरः; पिता, पुत्रः, पौत्रः, भ्राता, जामाता–इति। यथा चैकाऽपि सती रेखा स्थानान्यत्वेन निविशमानैक-दश शत सहस्त्रादिशब्दप्रत्ययभेदमनुभवति, तथा सम्बन्धिनोरेव सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेन, इत्युपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वन्तरस्य। नापि सम्बन्धिविषयत्वे सम्बन्धशब्दप्रत्यययोः सन्ततभावप्रसङ्गः; स्वरूपबाह्यरूपापेक्षयेत्युक्तोत्तरत्वात्॥

तथाऽण्वात्ममनसामप्रदेशत्वान्न संयोगः सम्भवति; प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगदर्शनात्। कल्पिताः प्रदेशा अण्वात्ममनसां भविष्यन्तीति चेत्, न; अविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसङ्गात्, इयानेवाविद्यमानो विरुद्धोऽविरुद्धो वाऽर्थः कल्पनीयः, नातोऽधिक इति नियमहेत्वभावात्, कल्पनायाश्च स्वायत्तत्वात्, प्रभूतत्वसम्भवाच्च। न च वैशेषिकैः कल्पितेभ्यः षड्भ्यः पदार्थेभ्योऽन्येऽधिकाः शतं सहस्रं चार्था न कल्पयितव्या इति निवारको हेतुरस्ति। तस्माद्यस्मै यस्मै यद्यद्रोचते, तत्तत्सिध्येत्। कश्चित्कृपालुः प्राणिनां दुःखबहुलः संसार एव मा भूदिति कल्पयेत्, अन्यो वा व्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पयेत्, कस्तयोर्निवारकः स्यात्? किञ्चान्यत्। द्वाभ्यां परमाणुभ्यां निरवयवाभ्यां सावयवस्य द्वयणुकस्याकाशेनेव संश्लेषानुपपत्तिः। न ह्याकाशस्य पृथिव्यादीनां च जतुकाष्ठवत्संश्लेषोऽस्ति। कार्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्यथा नोपपद्यत इत्यवश्यं कल्प्यः समवाय इति चेत्, न; इतरेतराश्रयत्वात्–कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रय-भावसिद्धिः,आश्रिताश्रयभावसिद्धौ च तयोर्भेदसिद्धिः, कुण्डबदरवत्–इतीतरेतराश्रयता स्यात्। न हि कार्यकारणयोर्भेदः, आश्रिताश्रयभावो वा वेदान्तवादिभिरभ्युपगम्यते; कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमात्॥ किञ्चान्यत्। परमाणूनां परिच्छिन्नत्वाद्यावत्यो दिशः षडष्टौ, दश वा, तावद्भिरवयवैः सावयवास्ते स्युः, सावयवत्वादनित्याश्च, इति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत। यांस्त्वं दिग्भेदभेदिनोऽवयवान् कल्पयसि, त एव परमाणव इति चेत्, न; स्थूलसूक्ष्मतारतम्यक्रमेणाऽऽपरमकारणाद्विनाशोपपत्तेः। यथा पृथिवी द्वयणुकाद्यपेक्षया स्थूलतमा वस्तुभूताऽपि विनश्यति, ततः सूक्ष्मं सूक्ष्मतरं च पृथिव्येकजातीयकं विनश्यति, ततो द्वयणुकम्, तथा परमाणवोऽपि पृथिव्येकजातीयकत्वाद्विनश्येयुः। विनश्यन्तोऽप्यवयवविभागेनैव विनश्यन्तीति चेत्,

नायं दोषः ; यतो घृतकाठिन्यविलयनवदपि विनाशोपपत्तिमवोचाम्। यथा हि घृतसुवर्णादीनामविभज्यमानावयवानामप्यग्निसंयोगाद् द्रवभावापत्त्या काठिन्यविनाशो भवति, एवं परमाणूनामपि परमकारणभावापत्त्या मूर्त्यादिविनाशो भविष्यति, तथा कार्यारम्भोऽपि नावयवसंयोगेनैव केवलेन भवति; क्षीरजलादीनामन्तरेणाप्यवयवसंयोगान्तरं दधिहिमादिकार्यारम्भदर्शनात्।। तदेवमसारतरतर्कसंदृब्धत्वादीश्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रवणैश्च शिष्टैर्मन्वादिभिरपरि गृहीतत्वादत्यन्तमेवानपेक्षाऽस्मिन्परमाणुकारणवादे कार्या श्रेयोऽर्थिभिरिति वाक्यशेषः।।१७।। इति तृतीयं परमाणुजगदकारणत्वाधिकरणम्।।

इति शाङ्करभाष्यम् परमाणुजगदकारणत्वाधिकरणम् समाप्तम्

वार्तिकम्

उभयथाऽपि न कर्मातस्तदभावः।। *इदानीमिति*।। असंभवदोषेणेति शेषः। निराकार्यस्वरूपमाह- *स च वाद इति*।। संयोगसचिवैर्हि परमाणुभिर्द्वयणुकादिक्रमेण जगदारभ्यते। संयोगश्च कर्मजन्यः। उभयथा हि कर्म भवति- प्रयत्नवदात्मसंयोगात्, नोदनाभिघातसंस्कारगुरुत्व द्रवत्वेभ्यश्च। अध्यात्मवायुशरीरादेः कर्म प्रयत्नवदात्मसंयोगाद् भवति, इषु-वनस्पत्युदकादीनां च नोदनाभिघातसंस्कारगुरुत्वद्रवत्वेभ्यः। नोभयथापि परमाणावाद्यं कर्म संभवति। अतः कर्माभावाद् द्वयणुकादिक्रमेण सर्गाभावः। कथमुभयथाऽपि परमाणावाद्यकर्मासंभव इति चेत्, उच्यते; सर्गाद्यकाले न तावदात्मनि प्रयत्नोऽस्ति; तस्य शरीरादिजन्यत्वेन तत्सापेक्षत्वात्, शरीरादेस्तु तदानीमसंभवात्, संभवे वा प्रयत्नासिद्धेः, प्रयत्नाभावाच्च न तद्वदात्मसंयोगः। एतेन-नोदनाद्यभावोऽपि-व्याख्यातः ; प्रलयकाले परमाणौ यद्यपि क्रियाकारणगुरुत्व-द्रवत्वे स्तः; तथापि न तयोस्तदानीं क्रियाकारणत्वम्, तत्सातत्येन क्रियासातत्यात्, प्रलयाभावप्रसङ्गात्। अपि च प्रयत्नवदात्मसंयोगादयोऽपि कारणान्तरासंभवात् कर्मजन्या एव वाच्याः, तथाचान्योन्याश्रयः-प्रयत्नवदात्मसंयोगादौ च सिद्धे परमाणौ कर्म, तस्मिंश्च प्रयत्नवदात्मसंयोगादिः-इति। एतेन-नित्यप्रयत्नवानीश्वरात्माऽस्ति, तत्संयोगात् परमाणुषु कर्मेति-अपास्तम्; तादृशेश्वरात्मनोऽग्रे निराकरिष्यमाणत्वाच्च-"पत्युरसामञ्जस्यादि"ति।।

ननु-अदृष्टवशादेव परमाणौ प्रथमं कर्म भविष्यति। तथाच नान्योन्याश्रयः। दृष्टं चादृष्टस्यापि क्रियाहेतुत्वम्, यथा-अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यग्गमनमिति-चेत्, मैवम्; विकल्पासहत्वात्। तथा हि-किं तददृष्टमार्हत-चार्वाकादिवत् परमाणुसमवेतं कल्प्यते, किं वा मीमांसकादि-वदात्मसमवेतम्। नोभयथाऽप्यदृष्टनिमित्तं परमाणौ कर्म संभवति। कथमिति चेत्, इत्थम्; यदि परमाणुसमवेतमदृष्टं स्वाश्रयान् परमाणून् प्रवर्तयेत्, हन्त प्रवर्तनस्वभावत्वात् सर्वदैवैतत् प्रवर्तयेत्। तथा च प्रलयकालेऽपि प्रवर्तनात् प्रलयाभावप्रसङ्गः, सर्गाभावप्रसङ्गश्च; तदाश्रयाणां सर्वदा क्रियावत्त्वेन संयोगाव्यवधानेन विभागसंभवात्।।

ननु–अदृष्टं न स्वसत्ताकाले सर्वदा स्वाश्रये क्रियामारभत इत्युच्यते, किं तर्हि? कस्मिंश्चित् कालविशेषे, अतो नोक्तदोष इति–चेत्, न; विकल्पासहत्वात्। तत् किं सहकारिविशेषाभावात् पूर्वानारब्धमदृष्टेन कर्मेदानीं तत्सत्त्वादारभ्यत इत्युच्यते, किं वाऽदृष्टस्य समीक्ष्यकारित्वादेव कदाचित् तदारम्भ इति। नाद्यः ; सर्गाद्यकाल आगन्तुकसहकारिविशेषस्य निर्वक्तुमशक्यत्वात्। एतेन–कालविशेषः स इति–अपास्तम्; कालस्य स्वतो निर्विशेषत्वात्, आगन्तुकोपाधिविशेषस्य तत्कालेऽभावात्। नापि द्वितीयः ; अदृष्टस्याचेतनत्वात् तदनुपपत्तेः। न ह्यचेतनं चेतनानधिष्ठितं प्रवर्तते, प्रवर्तयति वा किञ्चिदित्युक्तं साङ्ख्यपरीक्षायाम्; ज्ञानानधिष्ठानात्। न च चेतनाधिष्ठानमदृष्टस्य संभवति; तटस्थेश्वरस्य निराकरिष्यमाणत्वात्। क्षेत्रज्ञस्य च तत्कालेऽनुत्पन्नचैतन्यत्वेनाचेतनत्वात्। संयुक्तसमयवायोऽस्ति तेन तस्य सम्बन्ध इति चेत्, न परमाणावात्मनः कश्चिदपि सम्बन्धोऽस्ति, येन तदधिष्ठानं स्यात्। संयुक्तसमवायोऽस्तीति चेत्, न; संयोगस्यापि क्रियासिद्ध्युत्तरकालीनत्वादन्योन्याश्रयापत्तेः–आत्मना च संयुक्तसमवायसम्बन्धेन परमाणुसमवेतादृष्टाधिष्ठाने तेन परमाणौ क्रिया, तत्क्रियायां चात्मना परमाणुसंयोगात् संयुक्तसमवायेनादृष्टाधिष्ठानम्–इति। अपसिद्धान्तश्च। न हि तार्किकेण वैशेषिकेण वा परमाणुनिष्ठमदृष्टमभ्युपगम्यते; क्षेत्रज्ञसमवेतत्वाभ्युपगमाददृष्टस्य। अस्तु तर्हि आत्मसमवेतमदृष्टं परमाणौ कर्मकारणमिति चेत्, न; तेन परमाणुनाऽसम्बन्धात् तदनुपपत्तेः,। अदृष्टवता पुरुषेण परमाणुनां संयोगादस्ति तैः सहादृष्टस्य संयुक्तसमवायसम्बन्ध इति चेत्, मैवम्; अदृष्टवता पुरुषेणाणुसंयोग स्यागन्तुकत्वे तस्य कर्मनिमित्तत्वादुक्तान्योन्याश्रयापत्तेः, सातत्ये च सम्बन्धसातत्येन प्रवृत्तिसातत्यात् प्रलयाभावपसङ्गः ; तत्काले नियामकस्यागन्तुकस्य वक्तुमशक्यत्वेनाभावात्। तस्माद नियतम्य कर्मनिमित्तय्य कस्यचिदभावाद् माणुष्वाद्यं कर्म, तदभावाच्च न तेषां परस्परसंयोगाभावाद् द्वयणुकादिक्रमेण परमाणुभिर्जगदारम्भः, इत्यसिद्धा वैशेषिकप्रक्रिया।।

अपि चास्तु वा परमाणुष्वाद्यं कर्म, तथापि न तेषां परस्परसंयोग उपपद्यते। तथाहि–किं परमाणोः परमाण्वन्तरेण संयोगः सर्वात्मना, उतैकदेशेन। नाद्यः ; उपचयानुपपत्तेः। एकदेशेन हि संयोगे यावण्वोरेकदेशौ निरन्तरौ, ताभ्यामन्ये तादृशाः संयोगेनाव्याप्ता इति प्रक्रियोपपद्यते, सर्वात्मना तु नैरन्तर्ये परमाणावेकस्मिन् परमाण्वन्तराण्यपि न संमान्ति, इति कुतः कार्यस्य प्रथिमा भवेत्? तथा च कार्यात् कारणस्य न्यूनपरिमाणोक्तिर्बाध्येत; संयोगस्याव्यावृत्तित्वोक्तिबाधश्च, दृष्टविरोधश्च। दृष्टो हि प्रदेशवतोर्द्रव्ययोरेकदेशेन संयोगः। अथ–एतद्दोषजिहीर्षयैकदेशेनैवाणुरण्वन्तरेण संयुज्यत इत्युच्यते, तन्न; परमाणूनां निरवयवत्वाभ्युपगमेनैकदेशाभावात्, अन्यथा सावयवत्वप्रसङ्ग इति। कल्पितप्रदेशत्वाभ्युपगमात् परमाणूनां संयोगोपपत्तिः अन्यथाऽसमवायिकारणाभावप्रसङ्गादिति चेत्,

मैवम्; कल्पितानामवस्तुत्वेनावस्तुप्रदेशाश्रितसंयोगस्याप्यवस्तुत्वापत्तेर्वस्तुनः कार्यस्यासमवायिकारणतानुपपत्तेः। तथाचासमवायिकारणाभावाद् न द्व्यणुकादिकार्यारम्भ उपपद्यते। आकाशे च संयोगाभावो दर्शितोऽस्माभिरध्यासभाष्ये। न केवलं समवायिकरणाभावात् सर्गाभावः, अपि तु तत एव कारणात् प्रलयाभावोऽपि। ननु—अभिघातनोदनाप्रलयारम्भसमये विभागारम्भककर्मकारणाभावात् सर्वकार्यलयाभाव इति—चेत्, मैवम्; युगपत् सर्वेषु परमाणुषु नियमेनाभिघाताद्यनुपपत्तेः, तेषां कादाचित्कधर्मत्वदर्शनात्, अदृष्टस्य च भोगार्थत्वेन प्रलयनिमित्तत्वानुपपत्तेः। अदृष्टस्य तदनिमित्तत्वेऽपि तदुपरमस्यास्ति तन्निमित्तत्वमिति चेत्, न; सर्गकालेऽपि तत्सत्त्वेन प्रलयप्रसङ्गात्। सर्वादृष्टोपरमस्तद्धेतुरिति चेत्, न; सर्वादृष्टोपरमस्य युगपदसम्भवात् तन्निमित्तत्वानुपलब्धेः, उपलब्धौ वाऽदृष्टाभावात् पुनः सर्गाभावप्रसङ्गः। तथा च श्रुतिस्मृतिव्याकोपः। तस्मात् कार्याभावेन सर्गप्रलयासम्भवाद् अनुपपन्नोऽयं परमाणुकारणवादः॥१२॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥१३॥ इतश्च द्व्यणुकादिक्रमेण परमाणुभिरारम्भाभावः। कुतः? अनवस्थितेः=समवायानवस्थाप्रसङ्गात्। तत् कुतः? साम्यात्=कार्येण समानत्वात् समवायस्य। एतदपि कुतः? समवायाभ्युपगमात् सम्बन्धिभ्यामत्यन्तभिन्नतया समवायस्याभ्युपगमात्॥

तथाहि—कार्यं कारणादत्यन्तभिन्नमभ्युपगम्यते, तथा तेन तत्समवायोऽपि। ताभ्यामत्यन्तभिन्नयोरसम्बद्धयोः कार्यकारणभावानुपपत्तेस्तत्सिद्ध्यर्थं समवायोऽभ्युपगम्यते, एवं समवायस्यात्यन्तभिन्नस्यासम्बद्धत्वेन सम्बन्धत्वानुपपत्तेः, अन्यथा संयोगस्यापि तत्सम्बन्धत्वापत्तेः, असम्बद्धत्वाविशेषात्, अतस्तत्सम्बन्धत्वसिद्ध्यर्थं समवायोऽभ्युपगन्तव्यः, कार्येण समानयोगक्षेमत्वात्, पुनस्तस्यापि समवायस्य समवायान्तरम्, पुनस्तस्यापीत्यनवस्था। सा च मूलक्षयकारी प्राग्लोपादिदोषप्रसरात्। तदुक्तम्—

"प्राग्लोपाविनिगम्यत्वं प्रमाणापगमाद भवेत्।
अनवस्थितिमास्थातुरचिकित्स्या त्रिदोषता"॥

इति। ननु—समवायः सम्बन्धिभ्यामत्यन्तभिन्नोऽपि सम्बन्धान्तरं नापेक्षते; नित्यसम्बन्धनरूपत्वात्, तद्रूपत्वन्तु तदधीननिरूपणत्वात्। न हि समवायः सम्बन्धिना निरूप्यते, न वा तस्मिन् सति सम्बन्धिनौ भवतः। अतः स्वसम्बन्धत्वरूपत्वेन सम्बन्धत्वाय न सम्बन्धान्तरापेक्षा समवायस्य। तथा च नानवस्थितिरिति—चेत्, मैवम्; सम्बन्धाभावे सम्बन्धितन्त्रत्वस्यैवासिद्धेः। न हि येन यस्य नास्ति सम्बन्धः, तत् तत्तन्त्रं भवतीति कुत्रचिद् दृष्टम्, सम्भवति वा; विरोधात्,

अतिप्रसङ्गाच्च। अपिच यदि सम्बन्धान्तरेण सम्बन्धिभ्यां समवायस्तौ सम्बन्धयेत्, तर्हि संयोगेनैवासम्बन्धेन कार्यकारणादसम्बन्धनोपपत्तौ व्यर्थं समवायकल्पनं भवतः स्यात्; क्लृप्तेनैव संयोगसम्बन्धेन सर्वनिर्वाहात्। ततश्च पञ्चसु युगलेषु समवायस्थाने संयोग एव अभिषिच्येत भवता; उभयोः सम्बन्धान्तरेण तेष्वसम्बद्धत्वाविशेषात्। सम्बन्धिसम्बन्धनरूपत्वाविशेषेऽपि संयोगस्य कार्यत्वाद् अस्ति सम्बन्धान्तरेण तेष्वसम्बद्धत्वाद् इतरापेक्षेति चेत्, न; कार्यत्वस्य ध्वंसे व्यभिचारात्। भावकार्यं तथेति चेत्, न; हेतत्वन्तरत्वात्, अप्रयोजकत्वाच्च। प्रयोजकत्वे वा नित्य एवैकतया सर्वनिर्वाहकः समवायवत् संयोगः कल्प्यताम्। तदुत्पत्तिविनाशप्रत्ययौ च सम्बन्धिन्युत्पत्तिविनाशाभ्यामुपपत्स्येते। गुणत्वात् संयोगे नैवं कल्प्यते, तत एव सम्बन्धान्तरेण सम्बन्धश्च, समवायश्च न गुणः, अतोऽस्यैवम्भूतत्वं सम्बन्धान्तरेण सम्बन्धत्वं च कल्प्यत इति चेत्, मैवम्; सम्बन्धान्तरापेक्षायास्तुल्यत्वस्य प्रदर्शितत्वात्। न च संयोगस्यापि गुणत्वे किञ्चित् प्रमाणमस्ति; वैशेषिकतन्त्रपरिभाषायाश्च मीमांसक–वैयाकरणगुणपरिभाषावद् गुणत्वासाधकत्वात्। तस्मात् समवायस्यार्थान्तरसयभ्युपगमे पूर्वोक्तरीत्याऽनवस्थाध्रौव्यात् कार्योत्पत्त्यसम्भवाद् अनुपपन्नोऽयं पर कारणवाद इति॥१३॥

ननु–परमाणुषु स्वत एव कर्म भविष्यति; प्रवृत्तिस्वभावत्वात् तेषाम्, तथा च न निमित्तभावेन कर्माभावात् सर्गाभाव इति चेत्, तत्राह सूत्रकारः– *नित्यमेव च भावा॥१४॥ चस्त्वर्थतयोक्तशङ्कानिवृत्त्यर्थः। मैवमाशङ्कितव्यम् तथा सति नित्यमेव सर्गस्य भावात् प्रलयाभावप्रसङ्ग इत्यर्थः। अवशिष्ट भाष्ये॥१४॥

रूपादिमत्वाच्च विपर्ययो दर्शनात्॥१५॥ इतश्च परमाणुकारणतावादोऽसङ्गतः। यत्कारणं रूपादिमत्त्वात् विपर्ययः=परमाणुत्वविपर्ययः, स्थूलत्वम्, नित्यत्वविपर्ययश्च अनित्यत्वं भवदभिमतपरमाणुषु प्रसज्यते। कुतः? दर्शनात्। यद्धि लोके रूपादिमत्, तत्सर्वं स्वकारणापेक्षया स्थूलमनित्यं च दृष्टम्। अतो रूपादिमत्त्वं परमाणुष्वभ्युपगम्यमानं स्वाभ्युपगतविपरीतान्येव स्थूलत्वाकारणत्वानित्यत्वानि प्रसञ्जयति। तस्मादपि न परमाणुकारणवादः। तदेतत् सर्वमाह– *सावयवानामिति*॥

तथा चान्ये परमाणव इति॥ एतेन–यत्परमाणूनां नित्यत्वे कारणमभिहितं वैशेषिकैः, तदपि निराकृतं भवतीत्याह– *यच्च नित्यत्वे कारणमिति*॥ ''सदि'' ति प्रागभावाद् व्यवच्छिनत्ति। 'अकारणवदि'ति घटादेः॥*यदपीति*॥ ''लब्धरूपं हि क्वचित् किञ्चिदन्यत्र प्रतिषिध्यते'' इति न्यायात् 'अनित्यमि'ति घटादौ नित्यत्वप्रतिषेधेन लौकिकेनान्यत्र नित्यत्वं कल्प्यते; अन्यथा

विशेषतस्तत्प्रतिषेधानुपपत्तेः। एतदप्युभयवादिसिद्धमात्मनो नित्यत्वमादायाऽन्यथासिद्धं न परमाणुनित्यत्वं साधयतित्याह– *तदपि नावश्यमिति*।। अपि च निषेधो हि प्रतियोगिप्रसिद्धिमात्रमपेक्षते, न तत्प्रमाम्; आरोपमात्रशरीरस्यापि देहात्मभावादेः प्रतिषेधदर्शनात्। अतो नैतावताऽनित्यत्वासिद्धिरित्यभिप्रेत्याह– *न च शब्दार्थव्यवहारमात्रेणेति*।। *यदपि नित्यत्वे तृतीयमिति*।। किं तावदविद्यापदेनाभिधीयते, यत्परमाणूनां नित्यावसाधकमिति– किं परिदृश्यमानकार्याणां प्रत्यक्षेणानुपलम्भोऽविद्येत्युच्यते, किं वा प्रत्यक्षेण तत्कारणानुपलम्भः, अथवा अद्रव्यत्वे सति तेषां प्रत्यक्षेणाग्रहणम्, आहोस्वित् समवाय्यसमवायिकारणविनाशा-भ्यामन्यद्विनाशकारणाग्रहणम्–इति? तत्र प्रथमद्वितीयपक्षावनूद्य व्यभिचारयति– *यद्येवं विव्रियेतेति*।। अविद्यापदं व्याख्यायेतेत्यर्थः। तृतीयपक्षमनूद्य तस्य "सदकारणवत्" इत्यनेन पौनरुक्त्यमित्याह– *अथाद्रव्यत्वे सतीति विशिष्येतेति*।। चतुर्थपक्षमनुभाष्य दूषयति– *अथापीति*।। कारणविभागेन स्वजन्यस्तत्संयोगध्वंसो लक्ष्यते। *तृतीयस्येति*।। अत्र साधारणस्येति शेषः ; अन्यथा मुद्गरपातादेः प्रतियोगिनश्च तृतीयस्य विनाशहेतोः सम्भवाद् असिद्धो हेतुः स्यात्। एतदपि द्रव्यस्येति ध्येयम्, तेन सुखादिभिर्न व्यभिचारः ; द्रव्यस्यैवान्यतरकारणनाशाधीननाशत्वनियमात्, परमाणोश्च तदन्यतरविनाशहेतोरकारणकत्वेनासम्भवाद् न विनाशः, इति नित्यत्वसिद्धिः। मैवम्; रूपादिमत्त्वेन परमाणोरपि सकारणकत्वे निरुक्तान्यतरकारणविनाशसम्भवात् तन्नित्यत्वासिद्धेः।। एवं स्थितेऽपि परिहारे स्वाभिमतं विवर्तवादमभिप्रेत्य परिहारान्तरमुक्तम्– *नावश्यं विनश्यद्वस्त्विति*।। वसत्यस्मिन् गुणादिरिति वस्तु=द्रव्यमुच्यते। 'अपास्तसमस्तविशेषमि' त्यनेन कार्यात्यन्ताभावः कारणे दर्शितः। प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वेन कार्यस्य मिथ्यात्वमित्युक्तं भवति। *घृतकाठिन्य-विलयनवदिति*।। ननु–स्थितेऽपि घृते काठिन्यनाशे द्रव्यनाश उदाह्रियते, उत तस्यापि नाशे। तत्र नाद्यः; द्रव्यलयस्योदाहरणात्। अन्ये त्ववयवविभागपूर्वकत्वात् तत्रापि घृतनाशस्य साध्यसमत्वेनानुदाहरणत्वमिति–चेत्, मैवम्; काठिन्यं तावद् घृतस्यावस्था। न च दार्ष्टान्तिकेनासङ्गतिः; पटादीनामपि तन्त्वाद्यवस्थाविशेषत्वेन तन्त्वाद्यन्तरत्वाभावादित्या-रम्भणाधिकरणे प्रतिपादितत्वात् तत्सङ्गत्युपपत्तेः, अवस्थावतो घृतसामान्यस्य काठिन्यद्रवावस्थयोरनुगतत्वेन प्रत्यभिज्ञानात्, अवस्थानाशेऽपि तदनाशात्। ननु–द्रवावस्थाया अवयवविभागजन्यत्वात् तस्मिन् सति घृतनाशस्यावश्यकत्वात् कथं तदनाश इति–चेत्, मैवम्; परमाणोर्द्रवावस्थायां व्यभिचारात्, तस्या अवयवविभागजन्यत्वासिद्धेः। अपि च अवयवविभागजन्यो हि तद्विभागोऽवयवक्रियावद् द्रवत्वजन्य इति कथं द्रवत्वात् पराचीनेनावयवविभागेन द्रवत्वं जन्यते? अन्योन्याश्रयापत्तेः। तस्माद् यत् किञ्चिदेतत्। प्रकृतमुपसंहति– *तस्माद्रपादिमत्त्वात् स्यादिति*।।१५।।

उभयथा च दोषात्।। कार्यभूतेषु पृथिव्यप्तेसोवायुपूत्तरोत्तरापेक्षया पूर्वपूर्वेषु मूर्त्यपचयो दृष्टः। मूर्तिर्नामारम्भकावयवानां परस्परसंयोगविशेषः, आरम्भकावयवा एव वा कथ्यते। उभयथाऽपि तत्र निमित्तं तार्किकैर्वक्तव्यम्—किमिति वाय्वाद्यपेक्षया तेजआदौ मूर्त्यपचयो दृश्यते, न तेजआद्यपेक्षया वाय्वादाविति। यदि ब्रूयुः—गुणोपचयाभ्युपगमात् तन्निबन्धनोऽयं मूर्त्यपचयः—स्पर्शमात्रगुणो वायुः, स्पर्शरूपगुणं तेजः, स्पर्शरूपरसगुणा आपः, स्पर्शरूपरसगन्धगुणा पृथिवी; अतो गुणोपचयाभ्युपगमाद् उपपन्नस्तेषां वाय्वाद्यपेक्षया मूर्त्युपचयः—इति, सत्यम्; ते किं गुणा द्रव्यतो भिन्ना अभ्युपगम्यन्ते, अभिन्ना वा; भिन्नाभिन्नपक्षस्य विरुद्धत्वेन तार्किकैरनङ्गीकारात्। उभयथाऽपि परमाणुकारणवादे दोषप्रसङ्गोऽपरिहार्य एव। कथम्? यदि तावत् ते गुणा द्रव्यतो भिन्नाः, तथापि तदुपयचस्य मूर्त्युपचयव्याप्तत्वात् तेजआदिपरमाणुष्वपि मूर्त्युपचयात् अपरमाणुत्वप्रसङ्गः। अभेदपक्षे तु गुणोपचयस्यैव द्रव्योपचयरूपत्वात् सुतरामस्ति तत्प्रसङ्गः। न च—परमाणुषु गुणोपचय एव तर्हि नाङ्गीकर्तव्य इति—वाच्यम्; तत्र तदनङ्गीकारे तत्कार्येष्वपि तु गुणोपचयाभावप्रसङ्गात्, कारणगुणक्रमेण तेषामारम्भाभ्युपगमात्। न च—एवं कार्येऽपि तदभावोऽस्त्विति—वाच्यम्; प्रत्यक्षविरोधात्।।

''उभयथा चे'' त्यस्य व्याख्यानान्तरं भाष्ये। गुणगुणिनोर्भेदपक्षं गृहीत्वा परमाणुषु मूर्त्युपचयं विनैव गुणोपचयो भविष्यतीत्याशङ्क्य व्याप्तिविरोधाद् नेत्याह—*न चान्तरेणेति*।। माऽस्तु तर्हि गुणोपचयोऽपि परमाणुष्विति द्वितीयपक्षमाशङ्क्य, तत्रापि विकल्प्य दूषणमाह—*अकल्प्यमाने त्विति*।। गुणगुणिनोरभेदपक्षस्त्वत्रैवान्तर्भावनीयः।।१६।।

इतश्च परमाणुवादो वेदवादिभिरत्यन्तमनादरणीय इत्याह सूत्रकारः—*अपरिग्रहाच्चात्यन्तमनपेक्षा*।।१७।। सूत्रं व्याचष्टे—*प्रधानकारणवाद इति*।। सम्प्रत्युत्सूत्रं भाष्यकारो वैशेषिकतन्त्रं दूषयति—*अपि च वैशेषिका इति*।। यद् यतोऽत्यन्तं भिन्नं भवति, न तत् तत्तन्त्रं दृष्टम्, यथा—गोरश्वः। द्रव्यतन्त्रं च गुणादि प्रथते, अतो न द्रव्यतोऽत्यन्तं भिन्नम्। किं तर्हि? द्रव्यमेव तत्तत्संस्थानभेदेनानेकगुणादिशब्दप्रत्ययभाग् भवति, देवदत्तवत्। यथा—एक एव सन् देवदत्तो बालः, युवा, वृद्धः, पिता, पुत्रः, नप्ता, भ्राता, इत्याद्यनेकशब्दप्रत्ययभाक् तत्तदवस्थानयोगाद् भवति, तद्वत्।।

अग्नेरत्यन्तभिन्नस्यापि धूमस्य तत्तन्त्रत्वदर्शनाद् नेयं व्याप्तिः साध्वीति चेत्, न; अभिप्रायापरिज्ञानात्। न वयं तदधीनोत्पत्तिकत्वं तत्तन्त्रत्वं ब्रूमः, येनाग्न्यधीनोत्पत्तिके धूमे व्यभिचारश्चोद्येत। किं तर्हि? तदाकारेण प्रथनं तत्तन्त्रत्वं ब्रूमः। अस्ति च द्रव्याकारेण गुणादेः प्रथनम्,

तद् यथा–शुक्लः कम्बलः, रोहिणी धेनुः, नीलमुत्पलम्–इति। अत्र शुक्लः, रोहिणी, नीलमिति च गुणस्य द्रव्यात्मकता प्रतीयते। कम्बल इति उत्पलमिति च समान्यतत्समवाययोः, धनुरिति क्रियायाः, रोहिणीति च विशेषस्यः शोणशब्दस्येवाश्वे लोहितगुणपुरस्कारेण सामान्याभिधानस्यापि रोहिणीशब्दस्य कञ्चिद् विशेषं पुरस्कृत्य धेन्वामेव रूढत्वात्। न ह्यग्निधूमयोरिव द्रव्यगुणयोः, द्रव्यक्रिययोः, द्रव्यतत्सामान्ययोः, द्रव्यतत्समवाययोः, द्रव्यतद्विशेषयोर्वा भेदप्रतीतिरस्तिः अभेदस्यैवादभूयमानत्वात्। ये च नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः परैरभ्युपगम्यन्ते, ते च निष्प्रमाणकत्वाद् असन्त एव।।

ननु–केवलस्य शौक्ल्यमित्यादिप्रतीतेस्तद्भेदोऽप्यनुभूयत इति–चेत्, सत्यम्; तस्योपजीव्याभेदवत्ययविरोधेन मिथ्यात्वात्। एकप्रत्ययमुपजीव्य ह्यनेकप्रत्ययो भवति; धर्मिप्रतियोगिनिरूपणाधीननिरूपणत्वादनेकप्रत्ययस्य। न चैवमेकप्रत्ययोऽनेकप्रत्ययमपेक्षते; तस्य निरपेक्षोत्पत्तिकत्वात्। अत उपजीव्यविरोधाद् भेदप्रत्यय एव वाध्यत इति युक्तम्। तस्माद् द्रव्याकारेण गुणादेः प्रथनात् तदभेद एव, न भेदः। तथा च साङ्ख्यनये प्रवेशो भवतः।।

ननु–यद् यदाकारेण प्रथते, तत् तदभिन्नमिति न नियमोऽस्ति; विषयादत्यन्तभिन्नेस्यापि ज्ञानस्य तदाकारेण प्रथनदर्शनादिति–चेत्, मैवम्; ज्ञानसामान्ये विषयविशेषाणामध्यस्तत्वाभ्युपगमेन तयोरत्यन्तभेदासिद्धेः।।

ननु–गुणादीनां द्रव्याकारेण प्रथनमयुतसिद्धत्वादेव, न तदभेदादिति–चेत्, न; विकल्पासहत्वात्। तथा हि–युतसिद्धत्वं नाम पृथक्सिद्धत्वमुच्यते; अमिश्रणार्थस्य युधातोर्युतमिति निष्पत्तेः, तद्विरुद्धमयुतसिद्धत्वम्, अपृथक्सिद्धत्वमिति यावत। सिद्धिस्तूत्पत्तिः, ज्ञप्तिर्वेत्यन्यत्। तस्याश्चापृथक्त्वं भवद् देशैक्यात्, कालैक्यात्, स्वरूपैक्याद्वा भवेत्; प्रकारान्तरासंभवात्। तदिदमभिप्रेत्योक्तम्– *तत्पुनरयुतसिद्धत्वम्–अपृथग्देशत्वं वा, अपृथक्कालत्वं वा, अपृथक्स्वभावत्वं वेति*।।

तत्र न तावत् गुण-गुणिनोरेकदेशत्वमस्ति; अनभ्युंपगमात्। पटस्य तन्तुदेशत्वम्, पटरूपस्य च पटदेशत्वमभ्युपगतं भवता।। तन्तुरूपमेव पटरूपम्, न पृथक् तत्र रूपान्तरमस्ति, तथा चोपपन्नं तयोः सादेश्यमिति चेत्, न; तन्तुभिः पटारम्भवत् तन्तुरूपैः पटगतरूपान्तरारम्भाभ्युपगमात् तद्विरोधापत्तेः। स्वरूपैक्येनापृथक्सिद्धत्वं यद्युच्येत, तदा साङ्ख्यमतप्रवेशाद् गुणगुणिनोर्भेदोऽयुतसिद्धत्वेन साधु समर्थितो भवता स्यात्। *तस्य तादात्म्येनैव प्रतीयमानत्वादिति*।। द्रव्यगुणयोरात्मभेदाभावस्येत्यर्थः।

अपि च–अयुतसिद्धिशब्दोऽपृथगुत्पत्तौ मुख्यः। सा च भवन्मते कार्यकारणभूतयोर्द्रव्यगुणयोरात्मभेदाद् न संभवति। अतो मृषावादोऽयं भवताम्–युतसिद्धयोः सम्बन्धः संयोगः, अयुतसिद्धयोस्तु समवाय इत्याह– *युतसिद्धयोः सम्बन्ध इति*।।

ननु–न वयं कार्यकारणयोरुभयोरप्यपृथक्सिद्धत्वमभ्युपेत्य तयोरयुतसिद्धत्वं ब्रूमः, येनैवमनुयुज्येमहि। किं तर्हि? ''ऋतं पिबन्तावि'' त्यत्र पातृत्ववदन्यतरस्यापृथक्सिद्धत्वमभ्युपगम्य, कार्यस्य कारणादपृथक्सिद्धत्वात्। तदुक्तम्–''तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ, ययोर्द्वयोरनश्यदेकमपराश्रितमेवावतिष्ठते'' इति। तथा च कार्यस्यायुतसिद्धस्य कारणेन सम्बन्धः समवायो भविष्यतीति शङ्कते– *अन्यतरापेक्ष एवायमभ्युपगम इति*।। एतदपि न; कूपेन सह कूपोदकस्यायुतसिद्धत्वप्रसङ्गात्, कूपमाश्रित्यैव कूपोदकस्य सत्त्वात्, तदुद्धृतजलस्य संस्थानान्तरभेदेन खण्डपटवद् जलान्तरत्वात्, कूपोदकारम्भकावयवैरेव तस्यारब्धतया तत्र कूपोदकत्वव्यवहारात्, मातापितृशरीरारम्भकावयवैरारब्धस्थाविरादिशरीरान्तरे मातापितृजत्वव्यवहारवत्।।

ननु–अवस्थाभेदेऽपि नावस्थावान् भिद्यत इति–चेत्, सत्यम्; अयमस्माकं सिद्धान्तः, भवद्भिस्तु स्व-तन्त्रे तत्र तत्रावस्थाभेदेन तद्भेदो महता प्रयत्नेन साधितः। अतस्तदनङ्गीकारेऽपसिद्धान्त एवेदानीमापतेत्। अपि च प्रलयकाले घटत्वादिसामान्यानि व्यक्तिमनाश्रित्यैवावतिष्ठन्ते; तत्काले व्यक्तीनां सर्वासां नाशात्। अतस्तेषामयुतसिद्धत्वाभावप्रसङ्गः। न हि तानि व्यक्तिमाश्रित्यैवावतिष्ठन्ते; प्रलयकाले व्यभिचारात्। न च–व्यक्तीनामेव सामान्येनायुतसिद्धत्वमस्त्विति–वाच्यम्; अनभ्युपगमात्। न हि भवद्भिः सामान्ये व्यक्तीनां समवायोऽभ्युपगम्यते। किं तर्हि? सामान्यस्य व्यक्तिषु समवाय इति। वैपरीत्याभ्युपगमे च ब्रह्मकारणतावादप्रसङ्गः।।

अपि च कारणसम्बन्धात् प्राक् कार्यं सिद्धम्, असिद्धं वा। असिद्धमिति चेत्, न; सदसतोः सम्बन्धानुपपत्तेः, सम्बन्धस्य सम्बन्धिद्वयसत्त्वाधीनत्वदर्शनात्। अथ–कार्यं प्राक् सिद्धं सत् पश्चात् कारणेन सम्बध्य इति–चेत्, न; अयुतसिद्धत्वहानात् कार्यकारणयोः संयोग एव स्यात्। तथा च यदुक्तं वैशेषिकैः–युतसिद्धयभावात् कार्यकारणयोः संयोगविभागौ न विद्येते–इति, तदिदं दुरुक्तमेव तेषामापद्येत; युतसिद्धयभावस्यैवाभावात्, कारणात् कार्यस्य प्रथमक्षणे पृथक्सिद्धत्वात्।।

ननु–अन्यतरकर्मजस्य, उभयकर्मजस्य वा संयोगस्याभ्युपगमात् प्रथमक्षणे च पटादौ कार्ये क्रियाया अभावात् कथं तन्त्वादिभिः कारणैः संयोगः स्यात्? अतो नित्य एव

समवायसम्बन्धस्तवोचित इति–चेत्, न; समवायनित्यत्वस्य पूर्वमेव निराकृतत्वात्। न हि सम्बन्धिनोरनित्यत्वे संबन्धस्य नित्यत्वं घटते; संयोगस्यापि तथात्वप्रसङ्गादित्युक्तमेवाधस्तात्। न च संयोगस्यापि कर्मजत्वनियमोऽस्ति; संयोगजसंयोगस्याप्यभ्युपगमात्। तथा च यथोत्पन्नमात्रस्य कार्यद्रव्यस्य विभुभिर्द्रव्यान्तरैः कारणाकारणसंयोगजः संयोग एवाकार्यकारणसम्बन्ध-रूपोऽभ्युपगम्यते, न समवायः, तद्वत् कारणद्रव्येणापि संयोग एव सम्बन्धः स्यात्, न समवायः॥

ननु–कारणाकारणसंयोगाद् अकार्यकारणसंयोगस्यैवोत्पत्तिनियमात् हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगादौ तथात्वदर्शनात् कथं तत्संयोगात् कार्याकारणसंयोगः स्यादिति–चेत्, मैवं युक्तम्; आपादयतः प्रत्युक्तनियमस्यैवासिद्धेः, सिद्धौ वा समवायिकारणत्वेनाभ्युपगतादेव कारणसंयोगात् कार्यकारणसंयोग उत्पत्स्यत इति न काचिदनुपपत्तिः। अपि च तत्काले कारणद्रव्ये क्रियासमवायद्रव्यान्यतरजननेऽपि कार्यकारणसंयोगो न संभवति; कारणक्रियायां तेषां परस्परविभागेन समवायिकारणनाशात् कार्यद्रव्यनाशोत्पत्तेः। कस्य कारणेन संयोगः स्यादिति चेत्, न; द्रव्यारम्भकसंयोगाविनाशकविभागजनकक्रियाया अपि कमलदलादौ दर्शनात्। अतः सर्वत्र कारणद्रव्ये तदविरोधिविभागजनकक्रियातः कार्यसंयोगः संभवेदेव॥

अस्तु तर्हि कार्यकारणद्रव्ययोः संयोग एव सम्बन्धः, तावताऽपि सिद्धोऽस्माकं कार्यकारणयोर्भेद इति–चेत्, न; समवायवत् संयोगस्यापि सम्बन्धिव्यतिरेकेणास्तित्वे प्रमाणाभावात्। यथा हि समवायस्यानवस्थादिदोषप्रसङ्गेन सम्बन्धिव्यतिरेकेण नास्तित्वमवधारितमधस्तात्, एवं संयोगस्यापि तेन तुल्यदोषत्वात् सम्बन्धिव्यतिरेकेणास्तित्वे प्रामाणाभावाच्च नास्तित्वमेवावधार्यत इति। भाष्ये "समवायस्य वे" ति वाशब्द इवार्थे, समवायस्येवेत्यर्थः॥

सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात् तयोरस्तित्वमिति–चेत्, अथैवं ब्रषे–"घटपटौ" "तन्तुपटौ" इति च केवलसम्बन्धिशब्दप्रत्ययौ भवतः, ताभ्यामन्यौ च संयोगसमवायविषयौ शब्दप्रत्ययौ दृश्येते–"घटपटौ संयुक्तौ", "घटपटयोः संयोगः", "तन्तुषु पटः समवेतः", "तन्तुषु पटसमवायः" इति च, अतो भ्रमत्वासंभवात् सम्बन्धिव्यतिरेकेण संयोगसमवाययोरस्तित्वसिद्धिः–इति, तन्न; सम्बन्धिमात्रेऽपि तादृशप्रत्ययदर्शनेन तयोः सम्बन्धिव्यतिरेकेण सम्बन्धसाधकत्वानुपपत्तेः। तथा हि–लोके तावत् "इदं कर्मानेन संयुक्तम्" "देवदत्तेनास्ति यज्ञदत्तसमवायः" इति च सम्बन्धिमात्रे संयोगसमवायशब्दप्रत्ययौ दृश्येते। तन्त्रेऽपि–"द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः" "श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान

समाख्यानां समवाये'' इति च। न ह्यस्ति द्रव्यकर्मणोः संयोगः, देवदत्तयज्ञदत्तयोः श्रुति-लिङ्गादीनां च परस्परं समवाय इति। भवतश्च तत्र तत्र संयोगसमवायशब्दप्रत्ययौ। अतस्तत्र संयोगसमवाययोरभावेऽपि सम्बन्धिमात्रे यथा संयोगसमवायप्रत्ययौ भवतः, तद्वत् ''घटपटयोः संयोगः'' ''तन्तुपटयोः समवायः'' इत्यत्रापि तावन्तरेण सम्बन्धिमात्रे तौ भविष्यतः, इति न कश्चिदस्ति विरोधः। न च–द्रव्यकर्मणोः समवाये देवदत्तयज्ञदत्तयोश्च संयोगे सम्बन्धत्वसामान्यात् संयोगसमवायशब्दप्रत्यययावौपचारिकौ, न सम्बन्धिमात्र इति–वाच्यम्; देवदत्तयज्ञदत्तसंयोगा-भावकालेऽपि तत्प्रयोगप्रत्यययोर्दर्शनात् तत्र तदुपचारासिद्धेः। संयोगाभावकालेऽपि तद्योग्यताऽस्तीति चेत्, न; संयोगयोग्यतामादाय समवायोपचारे हिमवद्विन्ध्ययोरपि तदुपचारप्रसङ्गः। अपि च श्रुति-लिङ्ग वाक्यादीनां न परस्परसंयोगयोग्यताऽस्ति, नापि समवाययोग्यता। भवतश्च तत्र संयोगसमवायशब्दप्रत्ययौ–''संयोगपृथक्त्वादि''ति, ''समवाये'' इति च॥

ननु–''संयोगपृथक्त्वादि'' त्यत्र शब्दार्थयोर्बोध्यबोधकभावलक्षणस्वरूपसम्बन्धमभिप्रेत्य संयोगशब्दः प्रयुज्यते; ''श्रुत्यादीनां समवाये'' इत्यत्र च समुदायमभिप्रेत्य समवायशब्दः समवायेऽपि वर्तते; तत्प्रयोगप्रत्यययोर्दर्शनात्। अतस्तत्र तत्र संयोगसमवाययोग्यताया अभावेऽपि तत्प्रयोगप्रत्ययोपपत्तिरिति चेत्, एवं तर्हि घट–संयोग–समवायशब्दप्रत्ययैः स्वरूप समुदायविषयत्वोपपत्तिः ; अतिरिक्तसमवायसम्बन्धकल्पने प्रमाणाभावात्। ननु–स्वरूपसमुदाययोः सम्बन्धिसमुदायिभ्योऽनतिरेकात् कथं तत्र ''घटपटौ संयुक्तौ'' ''तन्तुषु पटः समवेतः'' इति विलक्षणानेकशब्दप्रत्ययौ सम्भवेतामिति–चेत्, मैवम्; स्वरूपैक्येऽपि स्वरूपास्वरूपापेक्षयाऽनेकशब्दप्रत्ययदर्शनात्। यथा–एकोऽपि सन् देवदत्तः स्वरूपं बाह्यं च सम्बन्धिस्वरूपमपेक्ष्याऽनेकशब्दप्रत्ययभाग भवति–मनुष्यः, ब्राह्मणः, श्रोत्रियः, अवदातः, बालः, युवा, स्थविरः ; पिता, पुत्रः, पौत्रः, भ्राता, जामाता–इति। तत्र स्थविर इत्यन्तौ शब्दप्रत्ययौ शब्दप्रत्ययौ स्वरूपापेक्षया, पितेत्यादिशब्दप्रत्ययौ तु तस्य पुत्रादिरूपापेक्षया। तथा चैकाऽपि सती रेखा स्थानान्यत्वेन निविशमाना भवत्यनेकशब्दप्रत्ययभागिनी–एका, दश, शतम्, सहस्त्रम्, अयुतम्, लक्षम्–इति। तद्वत् सम्बन्धिनोरेव स्वरूपापेक्षया घट-पटादिशब्दप्रत्ययभाक्त्वम्, परस्परापेक्षया तु तदतिरिक्तसंयोगसमवायशब्दप्रत्ययार्हत्वम्, इति नैतौ विलक्षणशब्दप्रत्ययौ सम्बन्धिव्यतिरेकेण सम्बन्धास्तित्वे प्रमाणमिति। अपिच यथा निमित्तनैमित्तिकयोः स्वरूपसम्बन्ध एवाभ्युपगम्यते, न संयोगसमवायौ; असम्भवात्, एवमुपादानोपादेययोरपि कार्यकारणभावाविशेषत्वात् स्वरूपमेव सम्बन्धः कल्प्यताम्, किमन्तर्गडुना समवायकल्पनेन प्रयोजनम्? इति॥

उपादानोपादेययोः समवायः सम्भवति, न निमित्तनैमित्तिकयोः, अतः कार्यकारणभावाविशेषेऽप्येकत्र तत्कल्पनम, नान्यत्रेति चेत्, मैवम्; उपादानोपादेययोरप्यभेदाद् अनवस्थानाच्च समवायासंभवस्योक्तत्वात्। उपादानोपादेययोरभेदे कथं विशिष्टप्रतीतिरिति चेत्, मैवम्; तदभेदेऽपि 'सत्ता सती' तिवद् विशिष्टप्रतीत्युपपत्तेः। विलक्षणप्रतीत्युपपत्तिस्तु दर्शितैव।।

एतेन–संयोगोऽपि–प्रत्याख्यातः–द्रष्टव्यः ; ज्ञानज्ञेययोर्भावाभावयोश्चैव स्वरूप-सम्बन्धेनैवोपर्यधोभावेन व्यवस्थितयोः कुण्ड-वदरयोः, निरन्तरयोरिवाङ्गल्योः संयोगं विना विशिष्टव्यवहारोपपत्तेः। एतेन–सम्बन्धशब्दप्रत्यययोः सम्बन्धिविषयत्वे सम्बन्धिदर्शनकाले सम्बन्धाभावप्रसङ्ग इति–अपास्तम्; स्वरूप-बाह्यरूपापेक्षयैकस्मिन्नप्यपेक्षाभेदस्य प्रतीतिभेदे कारणस्य दर्शितत्वात् तयोः सततभावानुपपत्तः। यदा हि स्वरूपमात्रं बाह्यस्वरूपानपेक्षं विषयीकृत्य शब्दप्रत्ययौ भवतः, तदा 'घटः' 'पटः' इत्येव तौ जायेते। यदा तु स्वरूपं बाह्यस्वरूपापेक्षमेव विषयीकृत्य, तदा सम्बद्ध इति; अतो न सम्बन्धशब्द प्रत्यययोः संततभाव इति।।

ननु–न वयं देशमात्रवृत्तिसंयोगमभ्युपगच्छामः, येन पर्यनुयुज्येमहि। किं तर्हि? विभुविशेषगुणस्यैवासमवायिकारणदेशावच्छेदेनोत्पन्नस्य व्याप्यवृत्तित्वोपपत्तेरिति–चेत्, मैवम्; तदवच्छेदेन वर्तनेऽप्यवयविसंयोगस्य व्याप्यवृत्तित्वप्रसङ्गध्रौव्यात्, प्रत्याश्रयं गोत्वादिवत् प्रत्यवयवमवयविनः परिसमाप्यवृत्तित्वाङ्गीकारात्, दृष्टान्तासिद्धेश्च। न हि विभुगुणा असमवायिकारणदेशावच्छेदेनैव जायन्त इति नियमोऽस्ति; धर्माधर्मयोर्व्यभिचारात्। तदतिरिक्तविभुगुणष्वयं नियम इति चेत्, तन्न; यत्र यत्र व्यभिचारश्चोद्यते, तत्र तत्र तद्व्यतिरिक्तेतिविशेषणमादाय व्यभिचारं परिहरतो भवतो लज्जैव दूरं गता। एवं सति कुत्र नाम व्यभिचारस्यावसरो भवेत्? तथा च व्यभिचारस्तपस्वी दत्तजलाञ्जलिरेव स्यात्। न च–विभुगुणानामसमवायिकारणदेशोऽपि संभवति; येन तदवच्छेदेनोत्पत्तिः स्यादिति–वाच्यम्; एकदेशिन्यपि संयोगजसंयोगाभ्युपगमात्। अपि च संयोगो भवन् एकदेशे वर्तते, कात्स्न्येन वा। कृत्स्नवृत्तिरिति चेत्, नः संयोगस्याव्याप्यवृत्तित्वाभ्युपगमात्। अथैकदेशे वर्तते, स किं संयोगदेशः, समवायिदेशो वा। आद्येऽपि किं तेनैव संयोगेन सदेशो वा, संयोगान्तरेण वा। तत्रं नाद्यः ; आत्माश्रयापत्तेः, नापि द्वितीयः ; अन्योन्याश्रयापत्तेः। समवायिदेशः स भवतीति चेत्, सत्यम्; स किं समवायिदेशः संयोगिदेशतो भिन्नः, अभिन्नो वा। अभिन्नत्वेऽपसिद्धान्तः ; संयोगस्य कृत्स्नवृत्तिताप्रसङ्गश्च। भिन्न इति चेत्, भिन्ने देशे विद्यमानः संयोगोनावयविनि स्यात्। न हि गवि विद्यमानः संयोगोऽश्वे भवति।।

अथ–भूतलेन संप्रयुज्यमानः कपालसंयोगं विना न संप्रयुज्यते, अत एकदेशे भवन् देशिन्यपि स्यादिति–चेत्, न; प्रतियोगिभेदेन संयोगस्याभ्युपगमात्, अन्यथा समवायवत् संयोगैक्यप्रसङ्गात्। अपि चास्तु वा सवयवद्रव्याणां प्रदेशवतां तत्संयोगः ; तथाप्यात्ममनसामप्रदेशवतां संयोगो न संभवेदेव; निरवयवत्वेनाप्रदेशत्वात्, प्रदेशवत एव द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दर्शनात्। तत् कस्य हेतोः? संयोगस्याव्याप्यवृत्तित्वनियमादेव। यदपि–कपालसंयोगं विना भूतलेन घटो न संप्रयुज्यते–इत्युक्तम्, तत् तथैव; नेतावता घटकपालयोर्भूतलेनैकः संयोगो भवति; कपालभूतलसंयोगस्य घटभूतलसंयोगासमवायिकारणत्वात्, कारणाकारणसंयोगात् कार्याकार्यसंयोगोत्पत्त्यभ्युपगमात्, अन्यथाऽपसिद्धान्तापत्तेः, संयोगजसंयोगोच्छेदापत्तेश्च। एवं च सति आत्ममनःसंयोगादात्मन्यदृष्टोत्पत्तिः, अदृष्टवदात्मसंयोगाच्च परमाणुष्वाद्यं कर्म। ततश्च तेषां परस्परसंयोगाद् द्वयणुकादिक्रमेण जगदुत्पत्तिः, इति मनोरथमात्रं तार्किकाणाम्, नास्यां कल्पनायां किञ्चिद् मूलमस्ति॥

अपि च–देशेऽपि संयोगो भवन् तदेकदेशे वा, कृत्स्ने वा। कृत्स्ने चेत्, मैवम्; तथा सति संयोगस्याव्याप्यवृत्तित्वहानिप्रसङ्गः। अथ–एतद्दोषजिहीर्षया तदेकदेशवृत्तिरभ्युपगम्यते, तदपि न; एवं सति देशपरम्परया परमाणावेव गत्वा संयोगोऽवतिष्टेत। तथा च सर्वाप्रत्यक्षत्वप्रसङ्गः। कल्पिताः प्रदेशा अण्वात्ममनसां भविष्यन्तीति चेत्–अथैवं मन्यसे–निरवयवानामण्वात्ममनसां प्रदेशा वस्तुतो न सन्त्येव, तथापि तेषां संयोगसिद्धये प्रदेशाः कल्प्यन्ते चेत्, मैवम्; अविद्यमानार्थकल्पनया वस्तुसिद्धौ सर्वेषां सर्वदाऽनायासेन सर्वार्थसिद्धिप्रसङ्गात्। को हि नाम प्रत्यब्दं प्रतिमासं प्रतिदिनं प्रतिक्षणं च नाभिनवं विचित्रं जगद् रचयेत्? कल्पनायाः सर्वेषां स्वायत्तत्वात्, बहुत्वाच्च। तथा च वैशेषिकाणां षट्पदार्थप्रक्रिया तपस्विनी भिन्नालवाला सत्यन्येषां तद्विरुद्धप्रभूतकल्पनार्णवे निमज्जितैव स्यात्। तस्मादसदेतत्–यद् निरवयवानां संयोगसिद्धये प्रदेशकल्पनम्–इति। एतेन–आकाशादिभिर्निरवयवैः सावयवानामपि घटादीनां संयोगः–प्रत्युक्तो द्रष्टव्यः॥

अपि च निरवयवाभ्यां परमाणुभ्यां सावयवस्यापि द्वयणकस्य न समवाया घटते। कुतः? ताभ्यां तस्य संश्लेषानुपपत्तेः। संग्रहरूपसंश्लेषेण ह्यवयवावयविभावावधारणात् समवायः कल्प्यते। तद्यथा–हस्ताकर्षेण कायाकर्षात्, शाखाकर्षेण वृक्षाकर्षात्। तयोस्ताभ्यामवयवावयविभावव्यवस्थितौ समवायः कल्पितो भवति; संयोगिनामेकाकर्षेणान्याकर्षादर्शनात्। न च निरवयवाकाशेन पृथिव्यादीनां जतुकाष्ठवत् संग्रहो दृश्यते, येन परमाणुभ्यामपि द्वयणुकस्य स कल्पनीयः स्यात्। तस्मात्

संग्रहाभावाद् न तत्र तस्य समवाय इति। ननु—मा भूद् निरवयवाभ्यां परमाणुभ्यां द्वयणुकस्य संग्रहः, तथाप्यवयवावयविभावान्यथानुपपत्त्यैव तत्र तत्समवायः सेत्स्यतीति—चेत्, मैवम्; संग्रहाभावेऽवयवावयविभावस्यैवासिद्धेः। संग्रहकारणेनैव संयोगसचिवेभ्योऽवयवेभ्यो व्यतिरिक्तोऽवयवी साधितो नयाये द्वितीयाध्याये; अन्यथा राशीभूतानां माषाणामिव तदनुपपत्तेः। स चेत् परमाणुश्च द्वयणुकस्य न संभवति, कथं तदवयवावयविभावः? व्यापकनि वृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात्। ततश्च कुतस्तदन्यथानुपपत्त्या समवायसिद्धिरिति? एतेन—कार्यकारणयोराश्रयाश्रयिभावान्यथानुपपत्त्या समवायसिद्धिरिति—अपास्तम्; कार्यकारण-योराश्रयाश्रयिभावसिद्धौ तयोर्भावेन समवायसिद्धिः, समवायसिद्धौ चाश्रयाश्रयिभावसिद्धि-रित्यन्योन्याश्रयात्। अभेदे कथं कार्यकारणभाव इति—चेत्, न; भेदेऽपि गवाश्वयोरिव तदनुपपत्तेः, अभेदे च तदुपपत्तेर्बहुधा दर्शितत्वात्, कारणस्यैव संस्थानविशेषमात्रं कार्यमिति वेदान्तिभिरभ्युपगमात् तान् प्रति कार्यकारणभावेन तद्भेदस्य दर्शयितुमशक्यत्वाच्च॥

किञ्चान्यत्। ये हि लोके परिच्छिन्नपरिमाणयोगिनः पटादयः, ते सर्वे दिग्देशभेदवन्त एव दृष्टाः। परमाणवश्च परिच्छिन्नपरिमाणयोगिनस्त्वयाऽभ्युपगम्यन्ते; अन्यथा परमाणुत्वव्याघातापत्तेः। अतस्तेऽपि दिग्देशभेदयोगिनः ; दिग्भेदस्य देशभेदोपाधित्वात्, स्वतो दिग्भेदानभ्युपगमात्। तथा च यावतीभिर्दिग्भिः परमाणवः सम्बध्यन्ते—षड्भिः, अष्टभिर्दशभिर्वा, तावद्भिरेवावयवैः सदेशाः सन्तः सावयवाः आपद्येरन्, सावयवत्वाच्चानित्याः। तत एव परमाणूनां नित्यत्वनिरवयवत्वाभ्युपगमो भवतां बाध्येत। त एव अवयवाः परमाणव इति चेत्, अथ मतम्—यान् दिग्भेदभेदिनोऽवयवान् परमाणोः कल्पयति भवान्, त एव निरवयवा अस्माकं परमाणवो भविष्यन्ति—इति, तन्न; तेषामपि पटावयवानामिवोक्तव्याप्त्या सावयवत्वेन विनाशावश्यम्भावात्। अथ कस्यांचित् कक्षायां गत्वा मूलकारणस्य नित्यत्वनिरवयवत्वसिद्धयर्थमपरिच्छिन्नत्वमभ्युपगम्यते, तर्हि तदेव मूलकारणमस्माकं परं ब्रह्म, तत्पर्यन्तं सर्वस्य जनिमतः स्थूलसूक्ष्मतारतम्यक्रमेण विनाशसिद्धेः, न परमाणुनित्यत्वम्, नापि तस्य मूलकारणत्वम्; परिच्छिन्नत्वात्। तदिदमभिप्रेत्योक्तम्—*स्थूलसूक्ष्मतारतम्यक्रमेणाऽऽपरमकारणात् विनाशोपपत्तेरिति*॥ *वस्तुभूताऽपीति*॥ परमत इति शेषः। शङ्कते—*विनश्यन्त इति*॥ तथा च परमाणूनां निरवयवत्वेनावयवविभागाभावाद् न विनाश इत्याशयः। यद्यपि परमाणोरपि परिच्छिन्नत्वेन सावयवत्वमादर्शितम्; तथापि 'तुष्यतु दुर्जनः' इति न्यायेन तस्य निरवयवत्वमभ्युपेत्योक्तनियमव्यभिचारेण परिहारमाह— *घृतकाठिन्यविल-

यनवदपीति*।। एतदेव विभजते- *यथा हि घृतसुवर्णादिनामिति*।। एतच्च व्याख्यातमधस्तात्। अपि च निरवयवस्यापि गुणादेर्विनाशो दृष्टः, तद्वत् परमाणोरपि निरवयवस्य विनाशोपपत्तिः। निरवयवं द्रव्यं न विनश्यतीति चेत्, न; द्रव्यगुणादिपरिभाषाया अतन्त्रत्वात्, भूतसूक्ष्माणामेव तन्त्रान्तरे गुणत्वेन परिभाषणात्। तस्माद् यत्किञ्चिदेतत्।।

उपसंहारव्याजेन विचारप्रयोजनमाह- *तदेवमिति*।। इति। द्वितीयं परमाणुजगदकारणत्वाधिकरणम्।।

इति वार्तिकम् परमाणुजगदकारणत्वाधिकरणम् समाप्तम्

प्रदीपः

उभयथाऽपि न कर्मातस्तदभावः।।१२।। परमाणुकारणवादनिरासार्थमिदमधिकरणम्। यद्यपि पारिमाण्डल्यकारणत्वानङ्गीकारेणैव कर्मभिः कर्माणि गुणैश्च गुणा इति नियमायोगसूचनेनैव परमाणुकारणतावादो निरस्तप्रायः ; तथापि तेषां द्वयणुकादिकारणत्वासम्भवोऽपि प्रतिपादनीय इतीदमधिकरणम्। अत्र पट् सूत्राणि (१) उभयथाऽपि न कर्मातस्तदभावः, (२) समवायाभ्युपगमाच्च साम्यादनवस्थितेः, (३) नित्यमेव च भावात्, (४) रूपादिमत्त्वाच्च विपर्ययो दर्शनात्, (५) उभयथा च दोषात् (६) अपरिग्रहाच्चात्यन्तमनपेक्षेति।।

अत्रानुसन्धेयानि काणादचतुर्थाध्यायप्रथमद्वितीयाह्निकसूत्राणीमानि–सदकारणवन्नित्यम्।।१।। तस्य कार्यं लिङ्गम्।।२।। कारणभावात् कार्यभावः।।३।। अनित्य इति विशेषतः प्रतिषेधाभावः।।४।। अविद्या।।५।। तत् पुनः पृथिव्यादि कार्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम्।।१।। अणुसंयोगस्त्वप्रतिषिद्धः।।५।। धर्मविशेषाच्च।।७।। सप्तमाध्यायद्वितीयाह्निकगतानि तु–युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते।।१३।। इहेदमिति यतः कार्यकारणयोः स समवायः।।२६।। तत्त्वं भावेन।।२८।। इति।।

तत्र ''तस्य कार्यं लिङ्गमि''ति सूत्रेण परमाण्वनुमानं यद्विवक्षितम्, यच्च ''कारणभावात् कार्यभाव'' इति तेषां रूपादिमत्त्वं साधितम्, तदुभयमनुवदति–*स च वाद इत्यादिना–कणभुगभिप्राय इत्यन्तेन*।। विभागजविभागस्तु कारणाभावात् कार्याभाव इत्यवयवनाशेऽवयविनो नाश इति तदीयप्रक्रियां मनसि निधायाह–*तानीमानीत्यादिना*।। ततः ''धर्मविशेषाच्चे''ति सूत्रसिद्धेनादृष्टवदात्मसंयोगेन वायवीयेष्वणुषु प्रथमं कर्म भवति, येन सर्गारम्भ इति तदीयप्रक्रिया ''मणुसंयोगस्त्वप्रतिषिद्ध'' इति सूत्रानुसारिणीमाश्रित्याह–*ततस्सर्गकाल इत्यादिना*।। अथ–''कर्मभिः कर्माणि गुणैश्च गुणा'' इति पूर्वसूत्रोदाहृतप्रक्रियां पुनरप्यनुवदति सर्गोपयोगेन–*अणुगतेभ्यश्चेत्यादिना*।। अणुरूपसत्त्वे प्रमाणं तु ''कारणभावात् कार्यभाव'' इति सूत्रमिति प्रागेव सूचितम्।।

तत्र यतो विभागसम्भवः, स परमाणुरिति तदीयप्रक्रिया तु परमाणुनित्यत्वसाधकानि पूर्वोक्तानि सूत्राण्यभिप्रेत्य, येषां निरसनं भाष्य एवोत्तरत्र विशदं भविष्यति। तदेवं वैशेषिकप्रक्रियामनूद्य वायवीयेष्वाद्यं कर्म न दृष्टनिमित्ताधीन सम्भवतीति वैशेषिकाभ्युपगतप्रक्रियामेवानुवदति– *विभागावस्थानामित्यादिना*।। *नाद्यस्य कर्मणो निमित्तं भवतीति*।। अथ ''धर्मविशेषाच्चे''ति सूत्राभिमतमदृष्टवदात्मसंयोगं निमित्तं निरसितुमाशङ्कासमाधानाभ्यां धर्मविशेषशब्दार्थमदृष्टवदात्मसंयोगमवतारयति– *अथेत्यादिना–सम्बन्ध इति चेदित्यन्तेन*।। उक्तं निमित्तं निरस्यति *सम्बन्धसातत्त्यादिति*।। अदृष्टवदात्मसंयोगस्य सार्वदिकत्वात् प्रलयाभावप्रसङ्ग इत्यर्थः। *नियामकान्तराभावात्*।। कारणविभागमतिरिच्य प्रलयकारणस्य वैशेषिकैरनुक्तत्वात् सर्वदाऽऽदृष्टवदात्मसंयोगेन कारणसंयोगसत्त्वे कारणविभागस्यैवायोगेन प्रलयाभावप्रसङ्ग इति भावः। तथा च परमाणुष्वाद्यकर्मारम्भासम्भव इत्युपसंहरति– *तदेवमित्यादिना–कार्यजातं न स्यादित्यन्तेन*।।

न केवलमाद्यकर्मासंभवेन, किन्तु निरवयवत्वेन परमाणुद्वयसंयोगाभावेनापि न कार्योत्पत्तिरिति ''अणुसंयोगस्त्वप्रतिषिद्ध'' इति सौत्रसिद्धान्तनिरासेनाह– *संयोगश्चेत्यादिना–नोत्पद्येतेत्यन्तेन*।।

तदेवम्–उभयथापि=दृष्टनिमित्तत्वेऽदृष्टनिमिनत्ये वा, न कर्म=आद्यकर्मसंभवः, अतः=तस्माद्धेतोः, तदभावः सर्गाभाव इति व्याख्याय तदभाव इत्यस्य प्रलयाभाव इत्येवंपरतयाऽपि व्याख्यानार्थं तदनुगुणं कर्मपदादिकं व्याचष्टे– *यथाचेत्यादिना–वा कर्मेत्यन्तेन*।। सर्गप्रलयाभावप्रसङ्गमुपसंहरति– *अतश्चेत्यादिना*।। *परमाणुकारणवाद इति*।। परमाणुसमवायकारणवाद इत्यर्थः। आरम्भवाद इति यावत्।।१२।।

अथ ''युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते।'' ''इहेदमिति यतः कार्यकारणयोः, स समवायः'' इति सूत्रसिद्धसमवायसम्बन्धाभावादपि न परमाणुकारणवाद इत्याह सूत्रकारः– *समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति*।।१३।। कार्यकारणयोरिव कार्यकारणसमवायस्यापि समवायान्तरमङ्गीकर्तव्यम्; भिन्नत्वसाम्यात्, तथा चानवस्थाप्रसङ्ग इति सूत्रार्थः। समवायस्य संयोगावैलक्षण्येन सम्बन्धान्तरमवश्यमङ्गीकर्तव्यमिति साधयत्याशङ्कासमाधानाभ्याम्– *नन्वित्यादिना–अनवस्थेत्यन्तेन*।।१३।।

परमाणूनां प्रवृत्त्याद्यसम्भवादपि न कारणत्वमित्याह– *नित्यमेव च भावादिति*।।१४।। भावात्=भावापत्तेरित्यर्थः। तदेतदुपपादयति– *अपि चेत्यादिना*।। सूत्रत्रयेण– ''रचनानुपपत्तेः'' ''प्रवृत्तेश्चे''ति सूत्रद्वयार्थः संकल्यते। पूर्वं परिणामवादः खण्डितः, अनेन त्वारम्भवादः खण्डयते।

सति चैवं विवर्तवाद एव सौत्र इति फलति। एतेन–साङ्ख्यमतनिराकरणेन सिद्धस्यापि परमाणुकारणवादस्य पुनर्निरासे प्रयोजनं सूच्यते। न हि परमाणुकारणवादनिरासमन्तरा सद्विवर्तवादपर्यवसानं सेत्स्यति॥१४॥

अथ "कारणभावात् कार्यभावः" इति सूत्रसिद्धं परमाणुरूपवत्त्वमपि निराकरोति येन "कर्मभिः कर्माणि गुणैश्च गुणाः" इति सिद्धान्तोऽपि निराकृतः स्यादनन्तरेण सूत्रेण– *रूपादिमत्त्वाच्च विपर्ययो दर्शनादिति*॥१५॥ अनेन च रूपवत्त्वं नित्यत्वं च परमाणूनां परस्परविरुद्धमिति सूच्यते। तथा च न केवलं समवायिकारणाभावः, अपि त्वसमवायिकारणाभावोऽपि परमाणुकारणवाद इति ज्ञाप्यते॥

अथ प्रसङ्गात् परमाणुनित्यतापराणि सूत्राणि प्रत्येकमादाय निरस्यति भाष्यकारः– *यच्च नित्यत्व इत्यादिना*॥ स्वाभिप्रेतविपर्ययः नित्यत्वविपर्यय इत्यर्थः। तथा च मूलकारणतायाः परमाणौ न विश्रान्तिरिति कार्येण लिङ्गेन साधितमकारणं नित्यं चान्यदेव किञ्चित् स्वीकर्तव्यं वैशेषिकैरपीति गत्यन्तराभावाद् ब्रह्मवाद एव पर्यवसानमित्यर्थान्तरमेव स्यादिति भावः॥१५॥

रूपादिमत्त्वेनानित्यत्वं विनश्वरत्वापरपर्यायं प्रसाव्य तेनैव मूर्तिमत्त्वं सावयवत्वाख्यं कार्यत्वमपि साधयति सूत्रकारः– *उभयथा च दोषादिति*॥१६॥ तदेवोपपादयति– *गन्धेत्यादिना*॥१६॥

परमाणुकारणवादस्य वैदिकानामत्यन्तानादरणीयत्वमाह– *अपरिग्रहाच्चात्यन्तमनपेक्षेति*॥१७॥ शिष्टापरिग्रहादित्यर्थः। "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" इत्यत्र संगृहीतस्यात्र प्रपञ्चः क्रियते। वैशेषिकप्रक्रियायां शिष्टापरिगृहीतत्वं तदीयप्रक्रियाविशेषाणामनुसन्धानेन विशदयति– *अपि चेत्यादिना*॥ तत्र वैशेषिकाभ्युपगतः कार्यकारणयोरत्यन्तभेदवादः तदभेदावगाहिश्रुतिविरुद्ध इति प्रथममाह– *भिन्नानिति*॥ अत्र च मृद् घट इत्याद्यभेदप्रतीतिविरोधो विशद एव॥

ननु–समवायसम्बन्धमादाय सामानाधिकरण्यप्रतीतिनिर्वाहो भविष्यतीत्याशयेन शङ्कते– *गुणादीनामिति*॥ *अयुतसिद्धत्वादिति*॥ समवायादित्यर्थः। अयुतसिद्धत्वं कार्यकारणयोर्विकल्प्य निरस्यति– *तत्पुनरित्यादिना– *न समवाय इत्यन्तेन*॥ तथा च कार्यकारणयोर्भेदवादे वैशेषिकाभिमत एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधोऽपरिहरणीय इत्यत्यन्तमेवानपेक्षणीयः परमाणुकारणवाद इति भावः। शिष्टं निगदव्याख्यातम्॥१७॥ इति तृतीयं परमाणुजगदकारणत्वाधिकरणम्॥

इति प्रदीपः परमाणुजगदकारणत्वाधिकरणम् समाप्तम्

भामती

परमाणूनामाद्यस्य कर्मणः कारणाभ्युपगमेऽनभ्युपगमे वा न कर्मातस्तद्रभावस्तस्य द्व्यणुकादिक्रमेण सर्गस्याभावः। अथवा यद्यणुसमवाय्यदृष्टमथवा क्षेत्रज्ञसमवायि, उभयथापि तस्याचेनस्य चेतनानधिष्ठितस्याप्रवृत्तेः कर्माभावोऽतस्तदभावः सर्गाभावः। निमित्तकारणतामात्रेण त्वीश्वरस्याधिष्ठातृत्वमुपरिष्टान्निराकरिष्यते। **अथवा** संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थमुभथापि न कर्मातः सर्गहेतोः संयोगस्याभावात् प्रलयहेतोश्च विभागस्याभावात्तदभावः, तयोः सर्गप्रलययोरभाव इत्यर्थः। तदेतत्सूत्रं तात्पर्य्यतो व्याचष्टे ***इदानीं परमाणुकारणवादमिति*।** निराकार्यस्वरूपमुपपत्तिसहितमाह ***स च वाद इति*।** *स्वानुगतैः* स्वसम्बद्धैः। सम्बन्धश्चाधार्य्याधारभाव इह प्रत्ययहेतुः समवायः। पञ्चमभूतस्यानवयवत्वात् **तानीमानि चत्वारि भूतानीति।** *तत्र* परमाणुकारणवादे *इदमभिधीयते* सूत्रम्। तत्र प्रथमां व्याख्यामाह *कर्मवतामिति*। अभिघातादीत्यादिग्रहणेन नोदनसंस्कारगुरुत्वद्रवत्वादि गृह्यन्ते। नोदनसंस्कारा-वभिघातेन समानयोगक्षेमौ गुरुत्वद्रवत्वे च परमाणुगते सदातन इति कर्मसातत्यप्रसङ्गः। द्वितीयं व्याख्यानमाशङ्कापूर्वमाह *अथादृष्टं* धर्माधर्मौ। ***आद्यस्य कर्मणः इति*।** *आत्मनश्च* क्षेत्रज्ञस्य *अनुत्पन्नचैतन्यस्य इति*। ***अदृष्टवता पुरुषेणति*।** संयुक्तसमवायसम्बन्धं इत्यर्थः। *सम्बन्धस्य सातत्यादिति*। यद्यपि परमाणुक्षेत्रज्ञयोः संयोगः परमाणुकर्मजस्तथापि तत्प्रवाहस्य सातत्यमिति भावः। सर्वात्मना चेदुपचयाभावः। एकदेशेन हि संयोगे यावण्वोरेकदेशौ निरन्तरौ ताभ्यामन्ये एकदेशाः संयोगेनाव्याप्ता इति प्रथिमोपपद्यते। सर्वात्मना तु नैरन्तर्ये परमाणावेकस्मिन् परमाण्वन्तराण्यपि सम्मान्तीति न प्रथिमा स्यादित्यर्थः। शङ्कते यद्यपि निष्प्रदेशाः परमाणवः तथापि संयोगस्तयोरव्याप्यवृत्तिरेवंस्वभावत्वात्। कैषा वाचोयुक्तिर्निष्प्रदेशं संयोगो न व्याप्नोतीति। एषैषा वाचोयुक्तिर्यद्यथा प्रतीयते तत्तथाभ्युपेयत इति। तामिमां शङ्कां सेद्धारामाह ***परमाणूनां कल्पिता। इति*।** न ह्यस्ति सम्भवो निरवयव एकस्तदेव तेनैव संयुक्तश्चासंयुक्तश्चेति, भावाभावयोरेकस्मिन्नद्वये विरोधात्। अविरोधे वा न क्वचिदपि

विरोधोऽवकाशमासादयेत्। प्रतीतिस्तु प्रदेशकल्पनयापि कल्प्यते। तदिदमुक्तं *कल्पिताः **प्रदेशाः इति***। तथा च सूद्धारेयमिति तामुद्धरति ***कल्पितानामवस्तुत्वादिति***। तृतीयां व्याख्यामाह ***यथा चादिसर्ग इति***। नन्वभिघातादयः प्रलयारम्भसमये कस्माद्विभागारम्भककर्महेतवो न सम्भवन्तायत आह *न हि तत्रापि किञ्चिन्नियतमिति*। सम्भवन्त्यभिघातादयः कदाचित् क्वचितत्वपर्य्यायेण सर्वस्मिन्नि्यमहेतोरभावादित्यर्थः। ***न प्रलयप्रसिद्ध्यर्थम्** मिति*। यद्यपि शरीरादीप्रलयारम्भेऽस्ति दुःखच्छेदोभोगनाः, पृथिव्यादिप्रलये नास्वीत्यभिप्रेत्येदमुदितमिति मन्तव्यम्।।१२।। व्याचष्टे ***समवायाभ्युपगमाच्चेति***। न तावत् स्वतन्त्रः समवायोऽत्यन्तं भिन्नः समवायिभ्यां समवायिनौ घटयितुमर्हत्यतिप्रसङ्गात्। तस्मादनेन समवायिसम्बन्धिना सता समवायिनौ घटनीयौ। तथा च समवायस्य सम्बन्धान्तरेण समवायिसम्बन्धेऽभ्युपगम्यमानेऽनवस्था। अथासौ सम्बन्धिभ्यां सम्बन्धे न सम्बन्धान्तरमपेक्षते सम्बन्धिसम्बन्धनपरमार्थत्वात्। तथाहि-नासौ भिन्नौऽपि सम्बन्धिनिरपेक्षो निरूप्यते। न च तस्मिन् सति सम्बन्धिनावसम्बन्धिनौ भवतः स्तस्मात् स्वभावादेव समवायः समवायिनीर्न सम्बन्धान्तरेणेति नानवस्थेति चोदयति *नन्विहप्रत्ययग्राह्यः इति*। परिहरति *नेत्युच्यते, संयोगोऽप्येवमिति*। तथाहि संयोगोऽपि सम्बन्धिसम्बन्धपरमार्थः, न च भिन्नोऽपि संयोगिभ्यां बिना निरूप्यते। न च तस्मिन् सति संयोगिनावसंयोगिनौ भवत इति तुल्यचर्चः। यद्युच्येत गुणः संयोग न च द्रव्यासमवेतो गुणो भवति, न चास्य समवायं विना समवेतत्वं, तस्मात्संयोगस्यास्ति समवाय इति शङ्कामपाकरोति ***न च गुणत्वादिति***। यद्यसमवायेऽस्यागुणत्वं भवति कामं भवतु न नः काचित्क्षतिः। तदिदमुक्तं ***गुणपरिभाषायाश्चेति***। परमार्थतस्तु द्रव्याश्रयीत्युक्तम् तच्च विनापि समवायं स्वरूपतः संयोगस्योपद्यते एव। न च कार्य्यत्वात्समवाय्यसमवायिकारणापेक्षितया संयोगः समवायीति युक्तम्, अजसंयोगस्यातथात्वप्रसङ्गात्। अपि च समवायस्यापि सम्बन्ध्यधीनसद्भावस्य संबन्धिनश्चैकस्य द्वयोर्वा विनाशित्वेन विनाशित्वात्कार्यत्वम्। न ह्यस्ति सम्भवो गुणो वा गुणगुणिनौ वाऽवयवो वावयवावयविनौ वा न स्तोऽप्यस्ति च तयोः सम्बन्ध इति। तस्मात् कार्य्यः सयवायः। तथा च यथैष निमित्तकारणमात्राधीनोत्पाद, एवं संयोगोऽपि। अथ समवायोऽपि समवाय्यसमवायिकारणे अपेक्षते तथापि सैवानवस्था। तस्मात्समवायवत् संयोगोऽपि न सम्बन्धान्तरमपेक्षते। यद्युच्येत सम्बन्धिनावसौ घटयति नात्मानमपि सम्बन्धिभ्यां तत् किमसावसम्बद्ध एव सम्बन्धिभ्याम्? एवं चेदत्यन्तभिन्नोऽसम्बद्धः कथं सम्बन्धिनौ सम्बन्धयेत्। सम्बन्धने वा हिमवद्विन्ध्यावपि सम्बन्धयेत्। तस्मात्संयोगः संयोगिनोः समवायेन सम्बद्ध इति वक्तव्यम्। तदेतत्समवायस्यापि समवायिसम्बन्धे समानमन्यत्राभिनिवेशात् तथा चानवस्थेति भावः।।१।।

प्रवृत्तेरप्रवृत्तेर्वेति शेषः। अतिरोहितार्थमस्य भाष्य।।१४।। यतु किल भूतभोतिकानां मूलकारणं तद्रूपादिमान् परमाणुर्नित्य इति भवद्भिरभ्युपेयते, तस्य चेद्रूपादिमत्त्वमभ्युपेयेत परमाणुत्वनित्यत्वविरुद्धे स्थौल्यानित्यत्वे प्रसंज्येयातां, सोऽयं प्रसङ्ग एकधर्माभ्युपगमे धर्मान्तरस्य। नियता प्राप्तिर्हि प्रसङ्गलक्षणं, तदनेन प्रसङ्गेन जगत्कारणप्रसिद्धये प्रवृत्तं साधनं रूपादिमन्नित्यपरमाणुसिद्धेः प्रच्याव्य ब्रह्मगोचरतां नीयते। तदेतद्वैशेषिकाभ्युपगमोपन्यासपूर्वकमाह ***सावयवानां द्रव्याणामिति***। परमाणुनित्यत्वसाधनानि च तेषामुपन्यस्य दूषयति ***यच्च नित्यत्वे कारणमिति***। ***सदिति***। प्रागभावाद्व्यवच्छिनत्ति *अकारणवदिति* घटादेः। *यदपि द्वितीयम् इति*। लब्धरूपं हि क्वचित् किञ्चिदन्यत्र निषिध्यते। तेनानित्यमिति लौकिकेन निषेधेनान्यत्र नित्यत्वसद्भावः कल्पनीयतेः चान्ये परमाणव इति। तन्नः, आत्मन्यपि नित्यत्वोपपत्ते, व्यपदेशस्य च प्रतीतिपूर्वकस्य तदभावे निर्मूलस्यापि दर्शनात्। यथेह वटे यक्ष इति। ***यदपि नित्यत्वे तृतीयं कारणमविद्येति***। यदि सतां परमाणूनां परिदृश्यमानस्थूलकार्याणां प्रत्यक्षेण कारणाग्रहणमविद्या, तया नित्यत्वम्; एवं सति द्व्यणुकस्यापि नित्यत्वम्। ***अथाद्रव्यत्वे सतीति विशेष्येत*** तथा सति न द्व्यणुके न व्यभिचारः, तस्यानेकद्रव्यत्वेनाविद्यमानद्रव्यत्वानुपपत्तेः। **तथाप्यकारणवत्त्वमेव नित्यतानिमित्तमापद्येत** यतोऽद्रव्यत्वमविद्यमानकारणभूतद्रव्यत्वमुच्यते, तथा च पुनरुक्तमित्याह ***तस्य चेति***। अपि चाद्रव्यत्वे सति सत्त्वादित्यत एवेष्टार्थसिद्धेरविद्येति व्यर्थम्। अथाविद्यापदेन द्रव्यविनाशकारण-द्वयाविद्यमानत्वमुच्यते, द्विविधो हि द्रव्यनाशहेतु रवयवयविनाशोऽवयवव्यतिषङ्गविनाशश्च, तदुभयं परमाणौ नास्ति; तस्मान्नित्यः परमाणुः। न च सुखादिभिर्व्यभिचारः, तेषामद्रव्यत्वादित्याह ***अथापीति***। निराकरोति ***नावश्यमिति***। यदि हि संयोगसचिवानि बहूनि द्रव्याणि द्रव्यान्तरमारभेरन्निति प्रक्रिया सिध्येत, सिध्येद्र द्रव्यस्य द्वयमेव तद्विनाशकारणमिति। न त्वेतदस्ति, द्रव्यस्वरूपापरिज्ञानात्। न तादत् तन्त्वाधारस्तद्वयतिरिक्तः पटो नामास्ति यः संयोगसचिवैस्तन्तुभिरारभ्येतेत्युक्तमधस्तात्। षट्पदार्थाश्च दूषयन्नग्रे वक्ष्यति। किन्तु कारणमेव **विशेषवदवस्थान्तरमापद्यमानं** कार्य्यं, तच्च सामान्यात्मकम्। **तथा हि** मृद्वा सुवर्णं वा सर्वेषु घटरुचकादिष्वनुगतं सामान्यमनुभूयते। न चैते घटरुचकादयो मृत्सुवर्णाभ्यां व्यतिरिच्यन्त इत्युक्तंमग्रे च वक्ष्यामः। तस्मान्मृत्सुवर्णे एव तेन तेनाकारेण परिणममाने घट इति च रुचक इति च कपालशर्कराकणमिति च शकलकणिकाचूर्णमिति च व्याख्यायेते; तत्र तत्रोपादानयोर्मृत्सुवर्णयोः प्रत्यभिज्ञानात्, न तु घटादयो वा कपालादिषु कपालादयो वा घटादिषु च रुचकादयो वा शकलादिषु शकलादयो वा रुचकादिषु प्रत्यभिज्ञायन्ते यत्र कार्य्यकारणभावो भवेत्। न च विनश्यन्तमेव घटक्षणं प्रतीत्य कपालक्षणोऽनुपादान एवोत्पद्यते तत्किमुदानप्रत्यभिज्ञानेनेति वक्तव्यं, एतस्या अपि वैनाशिकप्रक्रियाया उपरिष्टादनिराकरिष्यमाणत्वात्। तस्मादुपजनापयधर्माणो विशेषावस्थाः

समान्यस्योपादेया:, सामान्यात्मा तूपादानम् एवं व्यवस्थिते यथा सुवर्णद्रव्यं काठिन्यावस्थामपहाय द्रवावस्थया परिणमते, न च तत्रावयवविभाग: सन्नपि द्रवत्वे कारणं परमाणूनां भवन्मते तदभावेन द्रवत्वानुपपत्ते: तस्माद्यथा परमाणुद्रव्यमग्निसंयोगात्काठिन्यमपहाय द्रवत्वेन परिणमते, न च काठिन्यद्रवत्वे परमाणोरतिरिच्येते, एवं मृद्वा सुवर्णं वा सामान्यं पिण्डावस्थामपहाय कुलालहेमकारादिव्यापाराद्घटरुचकाद्यवस्थामापद्येत। न त्ववयविनाशात्तत्संयोगविनाशाद्वा विनष्टुमर्हन्ति घटरुचकादय:। न हि कपालादयोऽस्योपादानं तत्संयोगो वाऽसमवायिकारणमपि तु समान्यमुपादानं तच्च नित्यम्। न च तत्सयोगसचिवम एकत्वात्, संयोगस्य द्विष्ठत्वेनैकस्मिन्नभावात्। तस्मात्सामान्यस्य परमार्थसतोऽनिर्वाच्या विशेषावस्थास्तदधिष्ठाना भुजङ्गादय इव रज्ज्वाद्युपादाना उपजनापायधर्माण इति साम्प्रतम्। प्रकृतमुपसंहरति ***तस्मादिति***।।१५।।

अनुभूयते हि पृथिवी गन्धरूपरसस्पर्शात्मिका स्थूला, अपो रसरूपस्पर्शात्मिका: सूक्ष्मा:, रूपस्पर्शात्मकं तेज: सूक्ष्मतरं, स्पर्शात्मको वायु: सूक्ष्मतम:। **पुराणेऽपि स्मर्य्यते-**

आकाशं शब्छमात्रं तु स्पर्शमात्रं समाविशत्।
द्विगुणस्तु ततो वायु: शब्दस्पर्शात्मकोऽभवत्।।१।।

रूपं तथैवाविशत: शब्दस्पर्शगुणावुभौ।
त्रिगुणस्तु ततो वह्नि: सशब्दस्पर्शवान् भवेत्।।२।।

शब्द: स्र्पशश्च रूप च रसमात्रं समाविशत्।
तस्माचचतुर्गुणा आपो विज्ञेयास्तु रसात्मिका:।।३।।

शब्द: स्पर्शश्च रूपंच रसश्चगन्धमाविशत्।
संहतान् गन्धमात्रेण तानाचष्टे महीमिमाम्।।४।।
तस्मात्पञ्चगुणा भूमि: स्थूला भूतेषु दृश्यते।
शान्ता घोराश्च मूढाश्च विशेषास्तेन ते स्मृता:।।५।।

परस्परानुप्रवेशाद्धारयन्ति परस्परम्। तेन गन्धादय: परस्परं संहन्यमाना: पृथिव्यादय:। तथा च यथा यथा संहन्यमानानामुपचयस्तथा तथा संहतस्य स्थौल्यं यथा यथाऽपचयस्तथा तथा सौक्ष्म्यतारतम्यं तदेवमनुभवागमाभ्यामवस्थितमर्थ वैशेषिकैरनिच्छद्भिरप्यशक्यापह्नवमाह *गन्धेति*। अस्तु तावच्छब्दो वैशेषिकैस्तस्य पृथिव्यादिगुणत्वेनानभ्युपगमादिति चत्वारि भूतानि

चतुस्त्रिद्व्येकगुणान्युदाहृतवान्। अनुभवागमसिद्धमर्थमुक्त्वा विकल्प्य दूषयति ***तद्वत्*** स्थूलपृथिव्यादिवत्। ***परमाणवोऽपीति***। ***उपचितगुणानां मूर्त्युपचयात्*** उपचितसंहन्यमानानां, सङ्घातोपचयात् ***अपरमाणुत्वाप्रसङ्ग*:** स्थूलत्वादिति। यस्तु ब्रूते न गन्धादिसङ्घातः परमाणुरपि तु गन्धाद्याश्रयो द्रव्यं, न च गन्धादीनां तदाश्रयाणामुपचयेऽपि द्रव्यस्योपचयो भवितुमर्हत्यन्यत्वादिति तं प्रत्याह ***न चान्तरेणापि मूर्त्युपचयं*** द्रव्यस्वरूपोचयमित्यर्थः। कुतः? ***कार्य्येषु भूतेषु गुणोपचये मूर्त्युपचयदर्शनात्***। न तावत् परमाणवो रूपतो गृह्यन्ते किन्तु कार्य्यद्वारा, कार्य्यं च न गन्धादिभ्यो भिन्नं यदा न तदाधारतया गृह्यतेऽपि तु तदात्मकतया, तथा च तेषामुपचये तदुपचितं दृष्टमिति परमाणुभिरपि तत्कारणैरेवं भवितव्यं, तथा चापरमाणुत्वं स्थूलत्वादित्यर्थः। **द्वितीयं विकल्पं** दूषयति ***अकल्प्यमाने तूपचितानुपचितगुणत्व इति***। ***अथ सर्वे चतुर्गुणा इति***। यद्यप्यस्मिन्कल्पे सर्वेषां स्थौल्य प्रसङ्गः तथाप्यतिस्फुटतयोपेक्ष्य दूषयति ***ततोऽप्स्वपिति***। वायो रूपवत्त्वेन चाक्षुषत्वप्रसङ्ग इत्यपि द्रष्टव्यम्।१६।। निगदव्याख्यातेन भाष्येण व्याख्यातम्।।१७।। सम्प्रत्युत्सूत्रं भाष्यकृद्वैशेषिकतन्त्रं दूषयति ***अपि च वैशेषिकाः इति***। **द्रव्याधीनत्वं** द्रव्याधीननिरूपणत्वं। न हि यथा गवाश्वमहिषमातङ्गाः परस्परानधीननिरूपणाः स्वतन्त्रा निरूप्यन्ते, वह्न्याद्यधीनोत्पत्तयो वा धूमादयो यथा वह्न्याद्यनधीननिरूपणाः स्वतन्त्रा निरूप्यन्ते, एवं गुणादयो न द्रव्याद्यनधीननिरूपणाः, अपि तु यदा यदा निरूप्यन्ते तदा तदा तदाकारतयैव प्रथन्ते न तु प्रथायामेषामस्ति स्वातन्त्र्यं, तस्मान्नातिरिच्यन्ते द्रव्यातअपि तु द्रव्यमेव सामान्यरूपं तथा तथा प्रथत इत्यर्थः। द्रव्यकार्यत्वमात्रं गुणादीनां द्रव्याधीनत्वमिति मन्वानश्चोदयति ***नन्वग्रेरन्यस्यापिति***। परिहरति *भेदप्रतीतेस्त्वति*। न तदधीनोत्पादतां तदधीनत्वमाचक्ष्महे, किन्तु तदाकारतां, तथा च न व्यभिचार इत्यर्थः। शङ्कते ***गुणानां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यद्युच्येत***। यत्र हि द्वावाकारिणौ विभिन्नाभ्याभाकाराभ्यामपगम्येते, तौ सम्बद्धौ वा असम्बद्धौ वैयधिकरण्येन प्रतिभासेते यथेह कुण्डे दधि, यथा वा गौरश्व इति न तथा गुणकर्मसामान्यविशेषसमवायाः, तेषां द्रव्याकारतयाकारान्तरायोगेन द्रव्यादाकारिणोऽन्यत्वेनाकारितया व्यवस्थानाभावात्। सेयमयुतसिद्धिः तथा च समानाधिकरण्येन प्रथेत्यर्थः। तामिमामयुतसिर्द्धि विकल्प दूषयति। ***तत्पुनरयुतसिद्धत्वम्मिति***। तत्रापृथग्देशत्वं तदभ्युपगमेन विरुध्यत इत्याह *अपृग्देशत्वे इति*। यदि तु संयोगिनोः कार्य्ययोः सम्बन्धिभ्यामन्यदेशत्वं युतसिद्धिस्ततोऽन्याऽयुतसिद्धिः नित्ययोऽस्तु संयोगिनोर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं युतसिद्धिस्ततोऽन्याऽयुतसिद्धिः तथा चाकाशपरमाण्वोः परमाण्वोश्च संयुक्तयोर्युतसिद्धिः सिद्धा भवति। गुणगुणिनोश्च शौक्ल्यपटयोरयुतसिद्धिः सिद्धा भवति। न हि तत्र शौक्ल्यापटाभ्यां सम्बन्धिभ्यामन्यदेशौ शौक्ल्यापटौ। सत्यपि पटस्य

तदन्यतन्तुदेशत्वे शौक्ल्यस्य सम्बन्धिपटदेशत्वात्। तथा नित्ययोरात्माकाशयोरजसंयोगे उभयस्या अपि युतसिद्धेरभावात्। न हि तयोः पृथगाश्रयातयाऽऽश्रितत्वमनाश्रयत्वात्। नापि द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वमभूर्त्तत्वेनोभयोरपि निष्क्रियत्वात्। न चाजसंयोगो नास्ति, तस्यानुमानसिद्धत्वात्। तथा आकाशमात्मसंयोगि, मूर्त्तद्रव्यसङ्गित्वात्, घटादिवदिस्यनुमानम् पृथगाश्चयाश्रयित्वपृथग्गतिमत्त्व-लक्षणयुतसिद्धेरन्या त्वयुतसिद्धिर्यद्यपि नाभ्युपेतविरोधमावहति, तथापि न सामानाधिकरण्यप्रथामुप-पादयितुमर्हति। एवंलक्षणेऽपि हि समवाये गुणगणिनोरभ्युपगम्यमाने सम्बद्ध इति प्रत्ययः स्यान्न तादात्म्यप्रत्ययः। अस्य चोपपादनाय समवाय आस्थीयते भवद्भिः। स चेदास्थितोऽपि न प्रत्ययमिममुपपादयेत् कृतं तत्कल्पनया। न च प्रत्यक्षः सामानाधिकरण्यप्रत्ययः समवायगोचरः, तद्विरुद्धार्थत्वात्। तद्गोचरत्वे हि पटे शुक्ल इत्येवमाकारः स्यान्न तु पटः शुक्ल इति। न च शुक्लपदस्य गुणविशिष्टगुणिपरत्वादेवं प्रथेति साम्प्रतम्; न हि शब्दवृत्त्यनुसारि प्रत्यक्षम्। न ह्यग्निर्माणवक इत्युपचरिताग्निभावो माणवकः प्रत्यक्षेण दहनात्मना प्रथते। न चअयमभेदविभ्रमः समवायिनिबन्धनो भिन्नयोरपीति वाच्यम्, गुणादिसद्भावे तद्भेदे च प्रत्यक्षानुभवादन्यस्य प्रमाणस्याभावात्तस्य च भ्रान्तत्वे सर्वाभावप्रसङ्गात्, तदाश्रयस्य तु भेदसाधनस्य तद्विरुद्धतयोत्थानासम्भवात्। तदिदमुक्तं ***तस्य तादात्म्येनैव प्रतीयमानत्वादिति*। अपि** चायुतसिद्धिशब्दोऽपृथगुत्पत्तौ मुख्यः, सा च भवन्मते न द्रव्यगुणयोरस्ति, द्रव्यस्य प्राक्सिद्धेर्गुणस्य च पश्चादुत्पत्तेः, तस्मान्मिथ्यावादोऽयमित्याह ***युतसिद्धयोरीति***। अथ भवतु कारणस्य युतसिद्धिः, कार्यस्य त्वयुतसिद्धिः कारणातिरेकेणभावादित्याशङ्क्यान्यथा दूषयति *एवमपीति*। सम्बधिद्वयाधीनसद्भावो हि सम्बन्धो नासत्येकस्मिन्नपि सम्बन्धिनि भवितुमर्हति। न च समवायो नित्यः स्वतन्त्र इति चोक्तमधस्तात्। न च कारणसमवायादनन्या कार्यस्योत्पत्तिरिति शक्यं वक्तुम्; एवं हि सति समवायस्य नित्वत्वाभ्युपगमात् कारणवैयर्थ्वप्रसङ्गः। उत्पत्तौ च समवायस्य सैव कार्यस्यास्तु किं समवायेन। सिद्धयोस्तु सम्बन्धे युतसिद्धिप्रसङ्गः। न चान्याऽयुतसिद्धिः सम्भवतीत्येतदुक्तं, ततश्च यदुक्तं वैशेषिकैर्युतसिद्ध्यभावात् ***कार्यकारणयोः संयोगविभागौ न विद्येते इतीदं दुरुक्तं स्यात्***। युतसिद्ध्यभावस्यैवाभावात्। एतेनाप्राप्तिसंयोगौ युतसिद्धिरित्यपि लक्षणमनुपपन्नम्। मा भूदप्राप्तिः कार्यकारणयोः प्राप्तिस्त्वनयोः संयोग एव कस्मान्न भवति, तत्रास्या असंयोगत्वायान्यायुतसिद्धिर्वक्तव्या। तथा च सैवोच्यतां किमनया परस्पराश्रयदोषग्रस्तया। न चान्या सम्भवतीत्युक्तम्। यद्युच्येताप्राप्तिपूर्विका प्राप्तिरन्यतरकर्मजोभयकर्मजा वा संयोगः, यथा स्थाणुश्येनयोर्मल्लयोर्वा। न च तन्तुपटयोः सम्बन्धस्तथा, उत्पन्नमात्रस्यैव पटस्य तन्तुसम्बन्धात्। तस्मात्समवाय एवायमित्यत आह ***यथा चोत्पन्नमात्रस्येति***। संयोगजोऽपि हि संयोगो भवद्भिरभ्युपेयते न क्रियाज एवेत्यर्थः। न चाप्राप्तिपूर्विकैव प्राप्तिः संयोगः, आत्माकाशसंयोगे नित्ये

तदभावात्, कार्यस्य चोत्पन्नमात्रस्यैकस्मिन् क्षणे कारणप्राप्तिविरहाच्चेति। **अपिच सम्बन्धिरूपातिरिक्ते सम्बन्धे सिद्धे तदवान्तरभेदाय लक्षणभेदोऽनुश्रीयेत, स एव तु सम्बन्ध्यतिरिक्तोऽसिद्धः, उक्तं हि पुरस्तादतिरिक्तः सम्बन्धिभ्यां सम्बन्धोऽसम्बद्धो न सम्बन्धिनौ घटयितुमीष्टे। सम्बन्धिसम्बन्धे** चानवस्थितिः। तस्मादुपपत्त्यनुभवाभ्यां न कार्यस्य कारणादन्यत्वम्, अपितु कारणस्यैवायमनिर्वाच्यः परिणामभेद इति। तस्मात् कार्यस्य कारणादनतिरेकात् किं केन सम्बद्धम्, संयोगस्य च संयोगिभ्यामनतिरेकात् कस्तयोः संयोग इत्याह ***नापि संयोगस्येति***। विचारासहत्वेनानिर्वाच्यतामस्यापरिभावयन्नाशङ्कते ***सम्बन्धिशब्दप्रत्ययव्यतिरेचेणेति***। निराकरोति ***न कत्वेऽपि स्वरूपबाह्यरूपापेक्षया***। तत्तदनिर्वचनीयानेकविशेषावस्थाभेदापेक्षयैकस्मिन्नपि नानाबुद्धिव्यपदेशोपपत्तिरिति। यथैको देवदत्तः स्वगतविशेषापेक्षया मनुष्यो ब्राह्मणोऽवदातः, स्वगतावस्थाभेदापेक्षया बालो युवा स्थविरः, स्वक्रियाभेदापेक्षया श्रोत्रियः, परापेक्षया तु पिता पुत्रः पौत्रो भ्राता जामातेति। निदर्शनान्तरमाह ***यथा चैकापि सती रेखेति***। दार्ष्टान्तिके योजयति ***तथा सम्बन्धिनोरिति**। अंगुल्योर्नैरन्तर्य संयोगः, दधिकुण्डयोरौत्तराधर्यं संयोगः। कार्यकारणयोस्तु तादात्म्योऽप्यनिर्वाच्यस्य कार्यस्य भेदं विवक्षित्वा **सम्बन्धिनोरित्युक्तम्। *नापि सम्बन्धिविषयत्वे संबन्धशब्दप्रत्यययोः*** इत्येतदप्यनिर्वाच्यभेदाभिप्रायम्। अपिचादृष्टवत्क्षेत्रज्ञसंयोगात् परमाणुमनसोश्चाद्यं कर्म भवद्भिरिष्यते अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि इति वनिचनात्। न चाणुमनसोरात्मनाऽप्रदेशेन संयोगः सम्भवति। सम्भवे चाणुमनसोरात्मव्यापित्वात् परममहत्त्वेनानणुत्वप्रसङ्गात्। न च प्रदेशवृत्तिरनयोरात्मना संयोगोऽप्रदेशत्वादात्मनः, कल्पनायाश्च वस्तुतत्त्वव्यवस्थापनासहत्वादतिप्रसङ्गादित्याह *तथाऽणवात्ममनसामिति*। **किञ्चान्यत्** द्वाभ्यामणुभ्यां कारणाभ्यां सावयवस्य कार्यस्य **द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः।** संश्लेषः संग्रहो यत एकसम्बन्ध्याकर्षे सम्बन्ध्यन्तराकर्षो भवति तस्यानुपपत्तिरिति। अत एव संयोगादन्यः **कार्यकारणद्रव्ययोराश्रयाश्रितभावोऽन्यथा नोपपद्यत इत्यवश्यं कल्पनीयः समवाय इति चेत्।** निराकरोति *न* कुतः? ***इतरेतराश्रयत्वात्***। तद्विभजते ***कार्यकारणयोर्हिति***। *किञ्चान्यत् परमाणूनामिति*। ये हि परिच्छिन्नास्ते सावयवाः, यथा घटादयः। तथा च परमाणवःतस्मात्सावयवा अनित्याः स्युः। अपरिच्छिन्नत्वे चाकाशादिवत् परमाणुत्वव्याघातः। शङ्कते ***यांस्त्वमिति***। निराकरोति ***न स्थूला इति***। किं सूक्ष्मत्वात् परमाणवो न विनश्वन्त्यथ निरवयवतया? तत्र पूर्वस्मिन् कल्पे इदमुक्तम् *वस्तुभूतापिति*। भवन्मते उत्तरं कल्पमाशङ्क्य निराकरोति ***विनश्यनतोऽप्यवयवविभागेनेति***। *यथा हि **घृतसुवर्णादीनामविभज्यमानावयवानामपीति इति***। यथा हि पिष्टपिण्डोऽविनश्यदवयवसंयोग एव प्रथते

प्रथमानश्चश्वशफाकारतां नीयमानः पुरोडाशतामापद्यते, तत्र पिण्डो नश्यति पुरोडाशश्चोत्पद्यते, न हि तत्र पिण्डावयवसंयोगा विनश्यन्ति, अपि तु संयुक्ता एव सन्तः परं प्रथनेन नुद्यमाना अधिकदेशव्यापका भवन्ति, एवमग्निसंयोयेन सुवर्णद्रव्यावयवाः संयुक्तां एव सन्तो द्रवीभावमापद्यन्ते, नतु मिथो विभज्यन्ते। तस्माद्यथावयवसंयोगविनाशावन्तरेणापि सुवर्णपिण्डो विनश्यति संयोगान्तरोत्पादमन्तरेण च सुवर्णे द्रव उपजायते, एवमन्तरेणाप्यवयवसंयोगविनाशं परमाणवो विनङ्क्ष्यन्त्वनये चोत्पत्स्यन्त इति सर्वमवदातम्।।१७।।

इति भामती परमाणुजगदकारणत्वाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

पुनरनुपपत्तिमाह-

।।सू।। **उभयथाऽपि न कर्मातस्तदभावः**।।११।।

अणुगताद्यकर्माभावादेव तत्कृताणुगतसंयोगाभावः। जीवादृष्टानां विपाकानपेक्षत्वे प्रागप्यणुगता कर्मोत्पत्तिः स्यात्। तदपेक्षत्वे न तत्कृतकादाचित्काणुगतकर्मसंभवः। विपाको नामादृष्टगतः कश्चिद्धर्मो न जायते। किंतु कर्मविधिना कालविशेषनियतफलदातृत्वं यंस्य कर्मणश्चोदितं तस्य तत्कालागम एव विपाकः। अनियतकालविशेषाणां कर्मणां प्रबलकर्मान्तरप्रतिबन्धाभावो वा विपाकः। अदृष्टानि तत्तत्कर्मानुगुणफलदानस्वभावानि। अतोऽनन्तैरात्मभिर्विविधकालफलदायित्वेनानुष्ठितानामेकदैकरूपविपाको न संभवति। अतः परमाणुकारणवादो न युक्त एव।।

इयं चात्रानुपपत्तिरित्याह-

।।सू।। **समवायाभ्युपगमाञ्च साम्यादनवस्थितेः**।।१२।।

समवाय इति संबन्धोऽभ्युपगम्यते। अत एवासमञ्जसमेतत्। कथम्? समवायस्यापि जातिंगुणादेरिवापृथक्सिद्धहेत्वपेक्षासाम्यादनवस्थानात्। अतः कांणादमतमसमञ्जसम्।।

।।सू।। **नित्यमेव च भावात्**।।१३।।

समवायस्य नित्यत्वाङ्गीकारात् संबन्धिनित्यत्वमन्तरेण तदनुपपत्तेरवयवावयविनोरपि नित्यत्वप्रसङ्गादसमञ्जसमेव तत्।।

।।सू।। **रूपादिमत्त्वाञ्च विपर्ययो दर्शनात्**।।१४।।

परमाणूनामत्र रूपादिमत्त्वमङ्गीक्रियते। ततस्तन्नित्यत्वादिविपर्ययः। तथा घटादिषु दर्शनात्।

तस्मादप्यसमञ्जसम्।।

।।सू।। **उभयथा च दोषात्**।।१५।।

अनित्यत्वादिपरिहाराय रूपादिशून्यत्वाङ्गीकारे कारणगुणपूर्वकत्वासिद्धिः। तत्सिद्धये पुनरपि रूपादिमत्वाङ्गीकारे च अनित्यत्वाद्यनर्थापत्तिरित्युभयथाऽपि दोषादसमञ्जसमेव कणादमतम्।।

।।सू।। **अपरिग्रहाञ्चात्यन्तमनपेक्षा**।।१६।।

साङ्ख्यपक्षस्य श्रुतिन्यायविरुद्धस्यापि सत्कार्यवादादौ क्वचिदंशे वैदिकपरिग्रहोऽस्ति। कणादपक्षस्य तु केनाप्यंशेनापरिग्रहादत्यन्तमनपेक्षैव निश्श्रेयसार्थिभिः कार्या।।

इति श्री कण्ठभाष्य परमाणुजगदकारणत्वाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

परमाणुषु संयोगोत्पत्तिसंभवमंगीकृत्य तत्संयोगस्याव्याप्यवृत्तित्वासंभवात् कार्ये प्रथिमासंभव उक्तः। इदानीं तस्या एवासंभव उच्यते। प्रलयकाले निश्चलाः परमाणवः संतिष्ठन्ते। सर्गाद्यकाले प्राणिनां भोजकादृष्टवशात् तेष्वाद्यं कर्म जायते। ततस्तेषां संयोगे सति व्द्यणुकादिक्रमेण जगदुत्पत्तिरितिहि वैशेषिकैरिष्यते। तददृष्टं विपाकानपेक्षमाद्यं कर्म जनयति तदपेक्षं वा। उभयथापि तत्ततो भवितुं नार्हति। ततः प्रलयकाल इव परमाणवस्सदा निश्चला एवावतिष्ठेरन्निति तेषां संयोगो न संभवतीति सूत्रार्थः। तत्रानपेक्षत्वपक्षे कर्मासंभवमुपपादयति-**जीवादृष्टानामिति।** यदि विपाकानपेक्षमदृष्टं कर्मोत्पादने समर्थं स्यात तदा प्रलयेऽपि अदृष्टसत्वात् कर्मोत्पत्तिः स्यात्। न च तदा त्वया सेष्यते। अतो विपाकानपेक्षात्कर्मणः कालांतरेऽपि कर्म न स्यादिति भावः। द्वितीयपक्षे तदसंभवमुपपादयति-**तदपेक्षत्व इति।** हरीतक्यादेरौषधस्य धातुसाम्यादिकार्योपयोगिविपाक इवादृष्टस्य शास्त्रीयफलोपयोगिविपाकः परिणतिविशेषरूपः बुद्ध्यवस्थाविशेषरूपमदृष्टद्रवयमिति पक्ष इव परपक्षे न संभवतीति तत्पक्षे तस्यात्मगुणविशेषस्यापरिणामित्वादित्याह-**विपाको नामेति। न जायत इति।** परपक्ष इति शेषः। कस्तर्हि परपक्षे कर्मविपाकशब्दार्थो वक्तव्य इत्याकांक्षायामाह-किंत्विति।। **यस्य कर्मण इति।** यथा ब्रह्महननस्य तद्देहपातानन्तरं कल्पपर्यंतो यातनानुभवः ततः परं सप्तसु जन्मसु क्षयरोगादिरूपतञ्चिह्नानुवृत्तिरिति चोदितं तस्य तत्कालागमः विपाक इत्यर्थः। **अदृष्टानीति।** यान्यदृष्टानि नियतकालफलकर्मजन्यानि तानि स्वकारणकर्मानुगुण्येन तत्कालागमं प्रतीक्ष्यैव फलदायकानि न तु ततः पूर्वम्। यान्यदृष्टानि प्रबलकर्मांतरप्रतिबद्ध्यस्वभावकर्मजन्यानि तानि तदानुगुण्येन प्रतिबन्धकापायं प्रतीक्ष्यैव फलदायकानि न तु तत्सत्त्वेऽपीत्यर्थः। यद्यपि प्रतिबन्धकापायप्रतीक्षणं नियतकालफलकर्मजन्यादृष्टानामप्यविशिष्टं तद्विरोधिफलकप्रबलकर्मांतरप्रतिबन्धे सति फलकालागमे सत्यपि फलोदयासंभवात् अनियतकालफलानामेव प्रतिबंधककर्मांतरसंवलनमिति

नियंतुमशक्यत्वात्। तथाप्यनियतकालफलानां प्रतिबन्धकापायमात्रस्य प्रतिक्षणं नियतकालफलानां तु फलकालागमस्यापीत्यभिप्रायेणेत्थं विभागः कृतः। अस्त्वेवं को दोष इत्याकांक्षायामाह-**अतोऽनन्तैरिति।** नानाकालानुष्ठितानां विचित्रप्रतिबन्धकप्रतिबद्धयानां चानंतप्राणिकर्मणां फलकालागमयौगपद्यं प्रतिबन्धकापाययौगपद्यं च कदापि न मिलतीत्यर्थः। न च प्रतिप्राण्यनादिभवसंचितानामनंतानां कर्मणां सत्त्वात् तेष्वेकैकस्य कर्मणः फलकालागमरूपोऽप्रतिबन्धत्वरूपश्च विपाकस्सर्गाद्यकाले युगपन्मिलेदिति वाच्यम्। तथा कर्मानंत्यस्य प्रलयकालेऽप्यविशिष्टत्वेन तदानीमपि तन्मेलनप्रसंगात्। सिद्धांते तु बुद्धिवृत्तिभेदस्यादृष्टस्य कार्यानुकूलपरिणतिविशेषो विपाकः। स चेतनाधिष्ठानसाध्यसंस्काररूपो न स्वयमेव भवति। न च तेनैव द्रव्येण कर्त्तुं शक्यते। यथोक्तम्-'पाकार्हमपि तत्पक्तुं नेशत्यात्मनमात्मना। धर्मस्सामान्य एवायं सर्वस्य परिणामिनः॥' इति। स तु भिषग्व्यापारेणौषधानामिव परमेश्वरसंकल्पेनादृष्टानां क्रियते। यद्यपि प्रलयकालेऽपि प्रतिप्राणि कानिचिददृष्टानि प्राप्तफलकालानि भवेयुः तथापि सर्गकालरूपेऽहनि निरंतरगतागतखिन्नानां प्राणिनां तत्समानपरिमाणं कालं शर्वरीरूपं कृत्वा तस्मिन् तान् महासुषुप्तिं प्रापय्य विशिश्रमयिषोः परमेश्वरस्येच्छया तानि प्रतिबद्धशक्तिकानि अपक्कान्येव सन्ति। यथा सर्गाद्यकाले पक्कानि भवन्ति तथा परमेश्वरेण पाच्यमानान्यवतिष्ठंते। एवं च केषुचित् कर्मविधिषु नियतफलकालश्रवणमौत्सर्गिकं सर्गप्रलयकालमर्यादाश्रुत्यनुसारेण प्रतिबंधकरहितकालविषयमवतिष्ठते। प्रलयाव्यवहितपूर्वकाले कृताश्वमेधब्रह्महननादिकस्य प्रलयारंभे तद्देहपाते सत्यपि तदनंतरमेव तत्फलानुभवाभावेन सत्यपि किंचित्कर्मफलकालागमे तद्विरोधिफलकप्रबलकर्मान्तरप्रतिबन्धे सति तत्फलानुभवाभावेन च तथोत्सर्गापवादमर्यादाकल्पनस्यावश्यकत्वादिति सर्वमुपपद्यते। न चैवं परपक्षेऽप्युपपत्तिश्शंकनीया। तत्पक्षे हि प्रलये सृष्टयभावः कस्य कारणस्य वैकल्येनोपपादनीयः। न तावददृष्टविपाकस्य। तत्पक्षे फलकालागमप्रतिबन्धककर्माभावसाहित्यस्य विपाकशब्दार्थत्वात् तस्य सर्गकाल इव प्रलयकालेऽपि अनंतप्राणिगतानंतकर्ममध्ये केषुचित्कर्मस्ववर्जनीयत्वात्। नापि परमेश्वरसिसृक्षायाः। नित्यसर्वविषयायाः तदिच्छायाः कदापि सिसृक्षारूपत्वानपायात् सृष्टयुपयोग्यदृष्टविपाकोपधानरूपस्य पारिभाषिकसिसृक्षात्वस्यापि तस्यां प्रलयसाधारणत्वात्। न च प्रलयकालांतर्गतिरहितः फलकालागमः प्रतिबन्धकापायश्च विपाकः, अतोऽदृष्टविपाकस्य तदुपहितपरमेश्वरेच्छारूपसिसृक्षायाश्च वैकल्यं वक्तुं शक्यमिति वाच्यम्। केषांचित् कर्मणां फलकालागमप्रतिबन्धकाभावयोस्सदातनत्वेन परपक्षे सर्वदा सृष्टिप्रसक्तया प्रलयस्यैवानवकाशात्। न च सिद्धान्त इव परपक्षे परमेश्वरेच्छया प्रलय इति

वक्तुं शक्यते। वैषम्यात्। सिद्धान्ते पारमेश्वरी जगत्प्रविलिलापयिषारूपेच्छा चिच्छक्तिपरिणतिविशेषत्वात्कादाचित्की तदाविर्भावदशायां तद्विरोधिनी तदीया प्राण्यदृष्टविपाचयिषा न प्रवर्तत इति तदानीमदृष्टानां विपाकोऽपि न भवति। अतस्तदानीं प्रलयः प्रवर्तत इति युज्यते। न तु परपक्षे। तत्पक्षे हि नित्यसर्वविषया परमेश्वरेच्छा सर्वदा प्रविलिलापयिषैव। न च तया कर्मणां फलकालागमो वा भोगादिना कर्मरूपप्रतिबन्धकाभावो वा भवन्निरोद्धुं शक्यते। न च सिसृक्षायामदृष्टविपाकोपहितत्वं तत्प्रविलिलापयिषायां तदनुपहितत्वं विशेषणं वक्तुं शक्यते। केवलफलकालागमप्रतिबन्धकाभावरूपविपाकोपहितत्वस्य सर्वदा सत्त्वेन तदनुपहितस्य कदाप्य-संभवात् प्रलयकालांतर्गतिराहित्यविशेषिततदनुपहितत्वस्यान्योन्याश्रयेण निवेशयितुमशक्यत्वात्। न च यस्मिन्कालविशेषे वस्तुतः प्रलयोऽनुवर्तते तदंतर्गतिराहित्यं स्वरूपतो विशेषणम्। प्रलयाधिकरणत्वातिरेकेण तत्काले कालांतरव्यावृत्तविशेषाभावात्। न च सूर्यास्तमयादिस्तदुदयावसानः कालो रात्रिरिति मध्यगतां प्राणिनां सुषुप्तिमनपेक्ष्य तदाद्यंतगतधर्मद्वयावलबनेन रात्रेरिव प्रलयमनपेक्ष्य तदाद्यन्तगतयत्किंचिद्धर्मद्वयावलम्बनेन तस्य कालस्य कालांतरव्यावृत्तं निर्वचनं संभवति। पारमेश्वरसकलसंजिहीर्षासिसृक्षावलंबनं तु निरस्तप्रायम्। एतेन यदक्षपादसूत्रेषु 'ईश्वरः कारण पुरुशकर्माफल्यदर्शना' दिति ईश्वरस्य कारणत्वं प्रतिज्ञाय 'न पुरुषकर्माभावे फलानिष्पत्ते' रिति तत्र बाधकहेतुमाशंक्य 'तत्कारितत्वादहेतु' रिति सूत्रेण तस्य हेतुत्वं निरस्तम्। यच्च तन्न्यायवार्त्तिकादिषूपपादितं 'न ब्रूमः कर्मानपेक्ष ईश्वरः कारणमिति अपि तु कर्म पुरुषस्येश्वरोऽनुगृह्णाति कोऽनुग्रहार्थः यद्यथाभूतं यस्य च यदा परि पाककालः तत्तथा च तदा च विनियुंक्ते' इत्यादिना तत्सर्वं प्रत्याख्यातम्। ईश्वरस्य फलकालागमादिरूपं कर्मपरिपाकं प्रतीक्ष्य कर्मविनियोक्तृत्वे प्रलयेऽपि केषांचित् कर्मणां परिपाकस्यावर्जनीत्वेन तदानीमपि सृष्टिप्रसंग इत्यादिपूर्वोक्तदूषणानतिवृत्तेः। स्यादेतत्। प्रलये सर्गव्यतिरेकः तदानीं सर्गोपयोगिन्यास्सिसृक्षाय व्यतिरेकादुपपद्यते। न हि कार्येच्छा स्वयं यदायदा वर्त्तते तदातदा कार्यं जनयितुमीष्टे। किं तु यत्कालावच्छिन्नकार्यविषया सा तस्मिन्नेव काले। अत एव यौवनकालमारभ्यानुवृत्तापि वार्धके तीर्थान्यटानीतीच्छा वार्धक एव तीर्थाटन जनयति। ईश्वरेच्छा च कालविशेषावच्छिन्नसर्गविषया अस्मिन्काले सृजेयमिति। अतः प्रलयेऽनुवर्त्तमानापि सा न तदानीं सर्गं जनयतीति चेदुच्यते। ईश्वरस्य कस्मिन्काले सृजेयमितीच्छा। न खल्वखण्डकालस्तत्र विशेषणम्। प्रलयेऽपि सर्गानुवृत्तिप्रसंगात्। न च नित्यकालपरिणतिभेदाः क्षणलवनिमेषादयः क्षणलवनिमेषादयः कालविशेषा इति सिद्धांतपक्ष इव परपक्षे स्वाभाविकः कालविशेषोऽस्ति। न च सर्गाद्यकाले सूर्यक्रियादयः सन्ति,

यदुपाधिकस्तस्मिन्काले विशेषस्तदिच्छाविषयो भवेत्। ननु, पूर्वसर्गकालसमानपरिमाणत्वरूपः पुनस्सर्गकाले विशेषस्तदिच्छाविषयोऽस्तु। ततश्च पूर्वसर्गो यावत्कालमनुवृत्तः तावत्कालसमानपरिमाणं कालं प्राणिनो विश्रमय्य पुनस्तावत्कालसमानपरिमाणं कालं सृजेयमिति सिसृक्षाशरीरं भवति। न च सर्गेच्छाकर्मविपाकयोस्सर्वदा सत्त्वेन पूर्वसर्गानुवृत्त्यविराम एव प्रसज्यते, अतः पूर्वसर्गो यावत्पर्यंतमनुवृत्त इत्यवधिक्रोडीकारो न संभवतीति वाच्यम्। पूर्वसर्गप्रवाहस्यानादित्वेन तदानीमपि तत्पूर्वसर्गसमानपरिमाणं कालं सृजेयमिति तदिच्छावशादेव सर्गकालनियमोपपत्तेः। न च तत्तत्सर्गाद्यकाले तत्तत्पूर्वकल्पकालपरिमाणविषयत्वं क्रमिकं सदा सर्वविषयायामिच्छायां न संभवतीति वाच्यम्। सामान्यतः पूर्वकल्पसमानपरिमाणं कालं पुनस्सृजेयमित्येकरूपाया एव सिसृक्षायास्सर्वकल्पानुयायित्वसंभवात् इति चेन्मैवम्। किं पारमेश्वरी सिसृक्षा पूर्वकल्पसमानपरिमाणं कालं सृजेयमित्येकेनैव रूपेण द्विपरार्द्धात्मककल्पमध्यसृज्यसर्ववस्तुसृष्टौ कारणमुत प्रतिवस्तित्वदमिदानीं सृजेयमिदमिदानीमिति व्यवस्थितेन रूपांतरेणापि तत्तद्वस्तुसृष्टौ कारणम्। आद्ये प्रतिकल्पमेक एव हिरण्यगर्भः एक एवेंद्रः अष्टावेव वसवः एकादशैव रुद्रा इत्यादिव्यवस्था न स्यात्। न ह्यसंख्येषु ब्रह्मेंद्रवसुरुद्रमरुत्साध्यादिपदप्रापकादृष्टवत्सु नियतसंख्यानामेव तत्तत्पदप्रापकादृष्टस्य फलकालागमरूपः प्रतिबन्धकाभावरूपो वा विपाको भवतीति नियंतुं शक्यते। द्वितीयकालोपाधीनां सृष्टिर्न सिध्येत्। अस्मिन्कालविशेषे इदं सृजेयमिति तत्र सिसृक्षाशरीरनिरूपणार्थस्य सृज्यव्यतिरिक्तस्य काले विशेषकान्तरस्याभावात्। न च कालोपाधिव्यतिरिक्तेष्वेव निरुक्तेन रूपांतरेणापि सिसृक्षा कारणम्। कालोपाधिषु तु पूर्वकल्पसमानपरिमाणं कालं सृजेयमिति सामान्यरूपेणैव सा कारणमिति वाच्यम्। सर्वेषामपि सृज्यानां स्वस्वकालपरिच्छेदकत्वेन कालोपाधिव्यतिरिक्तस्य सृज्यस्याप्रसिद्धेः। न हि तपनपरिस्पन्द एव स्वकालस्यावच्छेदको नान्य इति नियंतुं शक्यते। 'हिरण्यगर्भस्य कालो महाकल्पः मनो कालो मन्वंतर' मित्यादिपौराणिकप्रसिद्ध्या च हिरण्यगर्भादीनां कलावच्छेदकत्वमवश्याभ्युपगंतव्यम्। तपनपरिस्पन्दमात्रस्य कालावच्छेदकत्वे च कस्मिन्काले तपनं सृजेयमिति तत्सिसृक्षा भवेत्। तत्रापि सिसृक्षायास्सामान्यरूपेणैव कारणत्वे तत्पदप्रापकानेकादृष्टविपाकयौगपद्ये च युपगदनेकतपनसृष्टिप्रसंगो दुर्वार इत्येषा दिक्।। तस्मात् सिसृक्षायां विशेषकल्पनया सृष्टिनियमोपपादनासंभवात् कर्मविपाकव्यवस्थयैव सृष्टिप्रलयव्यवस्था वक्तव्या। तत्र यदि प्रतिप्राणि कर्मानंत्यात् सर्गाद्यकाले सर्वप्राणिकर्मविपाकयौगपद्यं समर्थ्येत प्रलयेऽपि तत एव तत्प्रसज्येतेति तत्परिहाराय प्रलये तदसंभवस्य समर्थनीयत्वात्। तथैव सगाद्यकालेऽपि तदसंभवः स्यादिति सर्वप्राण्युपभोगार्थमहाभूतसृष्ट्युपयोगिपरमाणुष्वाद्यं कर्म न

स्यादिति भावः। ननु, परमाणुकारणत्वानुपपत्तिप्रदर्शनप्रस्तावे समवायाभ्युपगमप्रयुक्तदोषवर्णन-मसंगतमित्याशंक्य तदपि तदनुपपत्तिपर्यवसायीत्ववतारयति **इयं चेति॥** अत्र पूर्ववाक्यनिर्दिष्टे परमाणुकारणवादे।।सू।। **समवायाभ्युपगमाच्च साम्यादनवस्थितेः**।।१२।। एतत्परमाणुकारणत्वम्। ननु, समवायाभ्युपगमेन परमाणुकारणत्वे किं हीयते इति पृच्छति-**कथमिति**।। **समवायस्यापीति।** अयमाशयः। परमाणुव्द्यणुकादिसमवायिकारणत्वेन जगन्मूलकारणमभ्युपगम्यते। समवायिकारणस्य च यत्समवेतं कार्यमुत्पद्यते तत्त्वमिति लक्षणमुच्यते। तत्र समवायः कार्यस्य विशेषणम्। अयुतसिद्धविशेषणेषु जातिगुणादिष्वयुतसिद्ध्युपपादकस्समवायोऽभ्युपगम्यत इति सवमायस्याप्य-युतसिद्ध्युपपादकस्समवायोऽभ्युपगम्यत इति समवायस्याप्ययुतसिद्ध्युपपादकसंबधापेक्षा समाना। तत्साम्ये सत्यपि संबन्धान्तरं नाभ्युपगम्यते। अतः संबंधरहितस्य समवायस्य कार्येऽवस्थितिर्न संभवतीति परप्रक्रिययैव व्द्यणुकस्य परमाणुसमवायवत्त्वाभावात् न तस्य समवायिकारणमिति तन्मतमसमंजसमिति। ननु, कार्यस्वरूपमेव कारणसमवायस्य संबंधःस्यादिति चेत् किं संबंधिस्वरूपमपि संबन्धो भवितुमर्हति। अर्हत्येवाभावादिष्वभ्युपगम्यते चेति चेत् किमर्थं तर्ह्यवयवगुणक्रियाजातीनां तद्वत्सु समवायः कल्प्यते। तेषामपि हि संबंधस्तद्वतां स्वरूपमेवेति वक्तुं शक्यते। संबंधिस्वरूपाणामनंतत्वा ल्लाघवेन सर्वानुगत एकः समवायः कल्प्यत इति चेन्न। एकस्य अनेकेषां वा कल्पनीयत्वे खलु लाघवादेकस्य कल्पनम्। इहानेकेषां क्लृप्तत्वात् तैरुपपन्ने प्रयोजने किमर्थमेकस्यापि कल्पनम्। नन्ववयव्यादीनां क्लृप्तत्वेऽपि तेषु संबंधत्वं कल्पनीयम्। यद्यपि समवायेऽपि तत्कल्पनीयम्। तथापि समवायपक्षे समवायस्तद्द्रतं संबंधत्वं चेति द्वयमेव कल्पनीयम्। स्वरूपसंबंधपक्षे तु अवयव्यादिस्वरूपानुगतस्य एकस्य संबन्धत्वस्यासंभवादनन्तानि संबंधत्वानि कल्पनीयानीत्यस्ति समवायपक्षे लाघवमिति चेन्न। अवयव्यादिषु तत्तदभावं प्रति संबंधत्वस्यापि क्लृप्तत्वात्। तेष्ववयवादिनिरूपतिसंबंधत्वक्लृप्तिर्नास्तीति तान्यनंतानि कल्पनीयानीति चेत् किं निरूपकोदेनापि संबंधत्वं भिद्यते? भिद्यत इति चेत् एवं तर्हि समवायेऽपि तान्यनंतानि कल्पनीयानि समवायश्च कलपनीय इति समवायपक्ष एव गौरवं स्यात्। ननु, अवयवगुणक्रियाजातीस्तद्वतश्चायुतसिद्धत्वेन क्रोडीकृत्यायुतसिद्धनिरूपितसंबधत्वमेकमेव समवाये कल्प्यत इति चेत् तर्हि तेन ताः क्रोडीकृत्य तत्स्वरूपेष्वेव संबंधत्वमेकमंगीकुर्वन् समवायकल्पनागौरंव परिहृत्य सुखमास्व। पक्षद्वयेऽपि हि प्रतियोगिनामनुयोगिनां चायुतसिद्धत्वेन क्रोडीकारस्तुल्यः। समवायपक्षे तत्कल्पनागौरवमतिरिच्यते। एतेन स्वरूपसंबंन्धस्थले संबंन्धिनोर्मध्ये नैकस्य संबधत्वम्। विनिगमनाविरहात्। नापि द्वयोरपि प्रत्येकम्। गौरवात्। किं तु तदुभयसमुदायस्य

व्यासज्यवृत्ति परस्परप्रतियोगिकमेकमेव तत्। एवं चाभावाधिकरणादिस्वरूपद्वये संबन्धत्वस्य क्लृप्तत्वेऽप्यवयवावयव्यादिस्वरूपद्वये तत्र क्लृप्तमित्यपि शंका निरस्ता। अक्लृप्तत्वस्य क्लृप्तयोस्समवायतद्गतसंबन्धत्वयोः कल्पनादेकस्यावयवावयव्यादिस्वरूपद्वयगतस्य संबंधत्वस्य कल्पने लाघवस्य प्रतिष्ठितत्वात्। वस्तुतस्तु, स्वरूपद्वयगतमेकं संबंधत्वमिति न युज्यते आधाराधेयव्यवस्थित्यसिद्धिप्रसंगात्। किं तु भूतलादिष्वभावादिनिरूपितमाधारत्वरूपं संबधत्वमन्यदभावादिषु भूतलादिनिरूपितामाधेयत्वरूपं तदन्यदित्येवारूथेयम्। एवं तर्ह्यवयवावयव्यादिस्वरूपेषु संबन्धत्वकल्पने गतमयुतसिद्धतया क्रोडीकारेणावयवादिष्ववयव्यादि-निरूपितमाधारत्वरूपमवयव्यादिष्ववयवादिनिरूपितमाधेयत्वरूपमिति सर्वत्र निरूपकभेदेन भिन्नभिन्नस्यैव संबधत्वस्य वक्तव्यत्वादिति चेत्सत्यम्। समवायपक्षेऽपि ते न गतमेव। समवायेऽपि हि अवयवादिनिरूपितमाधारत्वरूपं संबन्धत्वमन्यदन्यञ्चावयव्यादिनिरूपिताधेयत्वरूपमित्यंगी-कर्त्तव्यत्वात्। न ह्याधाराधेयव्यवस्थितिस्समवायपक्षेणोपपादनीया। यद्युच्येतायुतसिद्धमात्रनिरूपितं समवाये संबन्धत्वमेकमेव। आधाराधेयव्यवस्थितिस्तु भूतलाभावादिष्विव स्वरूपसंबधेनोपपाद्यते। एवं च वायो रूपसमवायसत्त्वेऽपि रूपाधारत्वलक्षणस्वरूपसंबधाभावादेव तत्र रूपवत्त्वप्रतीत्यभावः न तु समवायस्य वायुवृत्तित्वावच्छेदेन रूपाधारत्वात्मकरूपसंबधत्वानधिकरणत्वादिति तदा समवायसिद्धिप्रत्याशा समूलकाषं कषिता स्यात्। अवयवावयव्यादिनामाधाराधेयभाव-प्रत्ययनिर्वाहकत्वेन हि तत्सिद्धिरुक्ता काणादसूत्रे। 'इहेदमिति यतः कार्यकारणयोस्समवाय' इति। तस्य चेत् स्वरूपसंबधेन निर्वाहः का तत्सिद्धिप्रत्याशा। स्यादेतत्। इह सूत्रे वर्णितप्रत्ययनिर्वाहकत्वेन समवायसिद्धिरुक्तेति सत्यम्। न तु तन्निर्वाहकत्वं विषयतया विवक्षितम्। तन्मते समवायस्याप्रत्यक्षत्वात्। किं तु कारणतया। अवयवगुणक्रियादिविशिष्टबुद्धीनामनुगत-कारणापेक्षायामनुगतं किंचितत्कारणं सिध्यति स समवाय इति। मैवम्। अवयवादिविशिष्टबुद्धीनां स्वयमननुगतत्वेनानुगतकारणापेक्षत्वाभावात् विशिष्टबुद्धित्वेनानुगतोऽस्तीति चेत् न। दण्डी पुरुषः घटस्य ज्ञानं घटस्याभावः इत्यादिषु द्रव्यविषयप्रतियोग्यादिविशिष्टबुद्धिषु तस्यातिप्रसक्तत्वात्। ननु, स्फुटतरविवेकरहितसंबन्धिद्वयगोचरविशिष्टप्रतयक्षत्वेन तासामनुगमोऽस्तीति चेत्। तर्हि स्फुटतरविवेकरतित्वेनानुगतीकृतानामवयवावयव्यादीनामेव तत्र कारणत्वमस्तु। कृतमतिरिक्तसमवायकल्पनया। अभावाधिकरणयोर्विशिष्टबुद्धावतिप्रसक्तञ्चेदमवच्छेदकं तथा पीतं सुवर्णमिति सुवर्णतदुपष्टंभकविशिष्टबुद्धावपि। ननु, द्रव्यादिविषयविशिष्टबुद्धिसाधारण्येन प्रत्यक्षविशिष्टबुद्धित्वमात्रावच्छेदेनानुगतं कारणमन्विष्यते अनुगतकार्यस्यानुगतकारणनियम्यत्वात्।

तत्तु नित्यत्वादेकत्वाञ्च सर्वत्र संभवन् समवाय एव कल्प्यते। विषयभावं विनापि सर्वासु तासु कारणत्वसंभवात्। न च प्रमेयत्वादयः सन्ति परश्शतं धर्माः तेषामन्यतमस्यात्रानुगतकारणत्वसंभवे कुतस्तदतिरिक्तस्य समवायस्य सिद्धिः स्यादिति वाच्यम्। प्रत्यक्षविशिष्टबुद्धित्वावच्छेदेन लाघवादेकस्य कारणस्यानुमानतस्सिद्धौ प्रमेयत्वादिषु विनिगमकाभावेन तदतिरिक्तस्य तस्य सिद्धेः फलमुखगौरवस्यादोषत्वादिति चेन्न। लाघवादैक्यसिद्धेरीश्वरानुमाननिरासे प्रतिक्षिप्तत्वादिह संयोगस्यानुगतकारणस्य संभवाञ्च। सन्ति हि चाक्षुषादिविशिष्टप्रत्यक्षेषु ग्राह्यगुणाश्रयतत्तद्रव्येन्द्रियसंयोगाः कारणत्वेन क्लृप्ताः। शब्दप्रत्यक्षेऽप्यस्ति श्रोत्रमनस्संयोगः तथाभूतः। तेषामेव संयोगत्वेनास्तु तत्रानुगतकारणता। क्लृप्तकारणेष्वेवावच्छेदकांतरेणापेक्षितकारणत्वांतरकल्पने लाघवात्। अत एव विनिगमनाविरहोऽपि निरस्तः। निर्विकल्पकसाधारणास्ते विशिष्टप्रत्यक्षत्वावच्छेदेन न कारणमिति चेत् तर्हि तत एव समवायोऽपि न भवेत्। यदि समवायनिष्ठकारणता निर्विकल्पकव्यावृत्त कल्प्यते तदा तेषु संयोगत्वावगच्छिन्नकारणतापि तथैव कल्प्यताम्। वस्तुतस्तु, विशिष्टज्ञानत्वं विशेषणज्ञानकार्यतावच्छेदकं जन्यप्रत्यक्षत्वमिन्द्रियकार्यतावच्देदकमित्यवच्छेदकांतरोपपन्नकार्यताधिकरणवृत्तित्वान्नीलघटत्ववदर्थवशसम्पन्नं जन्यविशिष्टप्रतयक्षत्वं न कार्यतावच्छेदकमिति न तदवच्छेदेनानुगतकारणापेक्षास्ति। एतेन तन्तुकपालादिनाशे तन्निष्ठावयविगुणक्रियादिकं यन्नश्यति तत्र तन्निष्ठावयव्यादिनाशत्वेन कार्यतावच्छेदेऽननुगमः तत्संबधिनाशत्वेन तदवच्छेदे तत्संयुक्तस्य तृणादेरपि नाशप्रसंग इति तावदनुगमकसंबन्धविशेषापेक्षायां यस्य संबन्धविशेषस्य तत्र कार्यतावच्छेदके प्रवेशस्स समवाय इत्यपि निरस्तम्। समवायांगीकारेऽपि तन्तुनाशे तंतुसमवायवतामंशूनां नाशप्रसंगानिवारणात्। न च तंतुसमवायवत्त्वे सति तदाधेयत्वरूपं तन्तुसमवेतत्वमवच्छेदके निवेशनीयम्। तथापि तंत्वाश्रिततृणादिनाशप्रसंग इत्यतिप्रसंगतादवस्थ्यात् समवायस्यैकत्वेन तन्तुसमवायस्य तृणेऽपि सत्त्वात्समवायसंबन्धेनाधेयत्वं विवक्षितम्। तृणादिकं तु संयोगसंबधेन तन्त्वाधेयमिति चेन्न। संयोगस्य समवायस्य वा तृणादिस्वरूपात्मकाधेयत्वसबंधाप्रयोजकत्वात् अयुतसिद्धाधेयत्वस्यैवाक्लिष्टस्य कार्यतावच्छेदके निवेशयितुं युक्तत्वाञ्च। न च तथा सति तंतुनाशे तदयुतसिद्धाधेयस्य पटध्वंसादेर्नाशप्रसंगः। परपक्षेऽपि तन्तुसमवेतजात्यादिनाशप्रसंगतौल्यात्। तन्तुनाशे तत्समवेतस्य कार्यस्य नाश इति नियम इति चेत्तर्हि तन्नाशे तदयुतसिद्धाधेयस्यानित्यस्य नाश इति नियमोऽस्तु। न च ध्वंसनाशेनापि किंचिदनिष्टमापद्यते। प्रागभावध्वंसस्य घटस्येव तद्धसस्यापि ध्वंसोपपत्तेः। घटतद्ध्वंसयोरुभयोरपि प्रागभावध्वंसत्वांगी-

कारेण प्रागभावस्यानुन्मज्जनसमर्थने घटतद्ध्वंसतद्ध्वसपरंपराया घटध्वंसत्वांगीकारेण घटानुन्मज्जनं समर्थयेमहि। तस्मात् स्वरूपसंबधांगीकारे समवायापलापप्रसंगात् समवायमभ्युपगच्छता स्वरूपसंबन्धस्त्यक्तव्य इति समवायस्य कार्ये वृत्त्यभावेन यत्समवेतं कार्यमुत्पद्यत इति लक्षणासंभवात्तदनुसारेण परमाणुव्द्यणुकादि कारणमित्येतदसमंजसम्। यदि चैवमपि लाघवलोभादेकस्समवायोऽवयवगुणक्रियादीनां संबंध इत्यभ्युपगम्यते तदा तत एव त्र्यणुकप्रभृतीनां कार्याणामेकमेव ब्रह्म प्रधानं वा कारणमभ्युपगन्तव्यं स्यात्। एकत्वलाघवस्योभयत्राप्यादरणीयत्वसाम्यात्। अन्यथा क्वचिल्लाघवादरोऽन्यत्र तदनादर इत्यव्यवस्थाप्रसंगात्। न हि क्लृप्तेषु स्वरूपसंबधेषु सत्स्वपि लाघवलोभादधिकं समवायमभ्युपगच्छता त्र्यणुकादीनामेकस्मिन्ननेकस्मिन्नप्यक्लृप्ते कारणे लाघवलोभादेकमेव कारणमिति न कल्पनीयम्। यदि त्वल्पपरिमाणानेकद्रव्यमेलने सत्येव तदधिकपरिमाणद्रव्यारंभ इति लोके दृष्टत्वात् त्र्यणुकाद्यारंभार्थमनंतपरमाण्वभ्युपगमस्तदा बहूनां शिल्पिनां समवाये सत्येव रथगोपुरप्रासादादिनिर्माणमिति लोके दृष्टत्वात् कार्यद्रव्यतेषु अनेकारभ्यत्वनियमस्य दध्यादिष्विव महाकार्येष्वनेककर्तृकत्वनियमस्य क्वचिदपि भंगादर्शनेन सर्वाभ्युपगतत्वात् भूधरादेः महाकार्यत्वेन तत्साम्याञ्चानन्तेश्वराभ्युपगमोऽपि कार्यः स्यात्। अन्यथा क्वचित् दृष्टनियमानुसरणमन्यत्र नेत्यव्यवस्थापत्तेः। न चानंतेश्वराभ्युपगमोऽस्ति। तस्माल्लाघवलोभेन दृष्टनियमममप्रयोजकीकृत्य ईश्वरैक्यमभ्युपगच्छतस्तथैव जगदुपादानैक्यमप्यभ्युपगन्तव्यम्। तस्मादसमंजसः सर्वथा परमाणुकारणवादः। सर्वेष्वेतेषु दूषणप्रकारेषु सूत्रमावृत्त्या योजनीयम्। अनंतरप्रकारे समवायशब्दः एककार्यार्थबहुपुरुषमेलनपरः। 'समाजेषु समांशेषु समवायेषु चोच्यते' इत्यादिप्रयोगेषु तस्य तादर्थ्यं प्रसिद्धम्। यद्यन्यत्र लाघवलोभेन दृष्टनियममनाद्रियमाणोऽपि परः त्र्यणुककारणप्रक्रियायां तन्न परित्यजेत् तत्रेदमुपरितनं सूत्रम्–सू।। **नित्यमेव च भावात्**।।१३।। यत्किंचित्संबधिनाशेऽपि संबधनाश इति नियमस्संयोगे दृष्टः। ततश्च त्र्यणुकादिनाशे समवायनाशप्रसंगेन तन्नित्यत्वमभ्युपगच्छता त्र्यणुकादीनामपि नित्यत्वं स्वीकरणीयमिति त्र्यणुकादिकारणत्वेन परमाणुसाधनमप्यसमंजसमित्यर्थः। यदि चाश्रयनाशनाश्यत्वे संयोगत्वं प्रयोजकं लाघवान्न संबधत्वमुपाधिरूपमित्युच्येत तदेत्थमत्रैव लाघवमनुसरता जगन्मूलकारणानुमानेऽप्यैक्यलयलाघवमनुसरणीयमिति न तेन परमाणवस्सिद्धयेयुः। न च कार्यद्रव्याणामवयवसंयोगारभ्यत्वनियमान्नैकस्माद्द्रव्योत्पत्तिः संभवतीत्यत्र लाघवमकिंचित्करमिति वाच्यम्। उक्तनियमासंप्रतिपत्तेः। न च पटादीनां तन्तुसंयोगाद्यारभ्यत्वदर्शनात् नियमोंऽगीकरणीय इति वाच्यम्। एकावयविरूपेण क्षीरेण दध्यारंभे नियमभंगात्क्षीरारंभकावयवाः परस्परं वियुज्य पुनस्संयोगांतरं

लब्ध्वादध्यारभन्ते न तु क्षीरं दध्यारभत इति कल्पनायां प्रमाणाभावात्। 'क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवञ्च तदुपपत्तिः। 'न पयसः परिणामो गुणांतरप्रादुर्भावा' दित्यक्षपादसूत्रयोः प्रमाणमूलकत्वाभावात्। न च 'व्यूहांतरात् द्रव्यांतरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमान'मिति तदनंतर (न्याय० अ-३-आ-२-सू० १७) सूत्रदर्शितमनुमानं तत्र प्रमाणम्। क्षीरमेव दध्यवस्थामापद्यत इति परिणामवादाभ्युपगमे द्रव्यान्तरोत्पत्तेरसिद्धेः द्रव्यांतरस्यावयवसंयोगातररूपव्यूहांतरजन्यत्वनियमस्यापि महापटध्वंसजन्ये खण्डपटे व्यभिचारेणासिद्धेश्च तन्तुसंयोगपटयोस्समानसामग्रीकत्वेन तुलान्तनमनोन्नमनरीत्या समकालोत्पत्तिकतया पटस्य तन्तुसंयोगारभ्यत्वासंप्रतिपत्तेश्च। न च तंतुसंयोगनाशस्य पटनाशकारणतया तयोः कार्यकारणभावो वक्तव्यः अकारणनाशेनाकार्यनाशासंभवादिति वाच्यम्। नाशयोरपि समानसामग्रीकत्वेन समकालत्वोपपत्तेः। अपिच। पटस्य तंतुसंयोगारभ्यत्वसंप्रतिपत्तावपि न त्र्यणुकस्यावयवसंयोगारभ्यत्वं सिद्ध्यति। यदि तत्र पटत्वेन तंतुसंयोगत्वेन च कार्यकारणभावग्रहः न तेन प्रकृतार्थसिद्धिरिति स्पष्टम्। यदि कार्यद्रव्यत्वेन संयोगत्वेन च तद्ग्रहः तदापि नास्ति प्रकृतार्थसिद्धिः। एकेन समावायिकारणेन यत्किंचिदाश्रितसंयोगेन च त्र्यणुकोत्पत्त्युपपत्तेः। कार्यद्रव्यत्वेन समवायिकारणसंयोगत्वेन च तद्ग्रहेऽपि स एव दोषः। स्वसमवायिकारणत्वप्रवेशने त्वननुगमः स्वसमवायिकारणस्यैकस्यैव यत्किंचिद्द्रव्यांतरसंयोगेनापि त्रयणुकोत्पत्तिरुपपद्यत इति प्रकृतार्थसिद्धिश्च। समवायिकारणमात्रगतत्वप्रवेशने त्वप्रयोगजकत्वम्। भेर्याकाशसंयोगात् शब्दस्येव समवायिकारणतदितरसंयोगादपि त्र्यणुकोत्पत्त्युपपत्तेः। तस्मात् त्र्यणुकसमवायिकारणसाधनप्रक्रियायां क्वचिल्लाघवमनुसरतान्यत्रापि तदनुसरणीयमित्यप्रतिबंधेनोक्तलाघवेन तदैक्यसिद्धिरप्रत्यूहेति भावः। एवं त्र्यणुकादिकारणानुमानमनेकविषयत्वात्प्रच्यावितम्। अथ रूपादिमद्विषयत्वात्प्रच्यावयितुं सूत्रम्-**रूपादिमत्वाञ्च विपर्ययो दर्शनात्**॥१४॥ जालसूर्यमरीचिदृश्यात्यन्तसूक्ष्मभागरूपं त्र्यणुकं समवायिकारणारभ्यं महत्त्वे सति चाक्षुषत्वात्। तदपि त्र्यणुकसमवायिकारणं समवायिकारणारभ्यं महदारंभकत्वादित्यनुमानसिद्धतया परस्याभिमतं सिद्धांतिनोऽपि संप्रतिपन्नम्। सकलजगन्मूलकारणमिह पक्षः। तत्र रूपादिमत्त्वहेतुना नानित्यत्वसावयवत्वे प्रसाद्ध्येते। सिद्धांतिनोऽप्यनिष्टत्वात्। किंतु तत्र रूपादिकांगीकारे परं प्रत्यनिष्टापादनार्थं तदभ्युपगमोपपादकं रूपादिमत्त्वमित्यनूद्यते। तथा च यदि जगन्मूलकारणं रूपादिमत्स्यात् तदा तस्मिन् सम्प्रतिपन्नयोर्नित्यत्वनिरवयवत्वयोर्विपर्ययस्स्यादिति तस्य रूपादिमत्त्वे बाधकस्तर्कोऽत्र विवक्षितः। न च तर्कमूलव्याप्तौ विपक्षबाधकाभावात् प्रशिथिलमूलत्वं शङ्कनीयम्। रूपादीनां जन्यत्वे हि

रूपत्वादिकं प्रयोजकमेष्टव्यम्। अनुगतत्वाल्लघुत्वाञ्च। तथा च परमाणुष्वपि रूपादिकांगीकारे अग्निसंयोगजन्या रूपादयः स्वोत्पत्तौ स्वाश्रयकारणगतरूपाद्यपेक्षा इति पराभ्युपगतरीत्यैव जलपरमाणुगतरूपादीनां पार्थिवपरमाणुगतश्यामरूपस्य चोत्पत्तावपेक्षितानां रूपादीनामाश्रयत्वेन परमाणूनां कारणीभूता अवयवास्सिध्यंतो न निवारयितुं शक्यन्ते। सावयवत्वे चानित्यत्वमप्यनिवार्यमेव। यदि चेदृग्निवधं विपक्षबाधकमिह रूपादिमत्त्वसिद्धिलोभात् नाद्रियते तदा परमाणुसाधकानुमानं तेषु रूपादिसाधकानुमानञ्च विपक्षबाधकाभावान्न प्रवर्तेतेति वृद्धिमिच्छतो मूलमपि हीयेत। तथा हि-त्र्यणुककारणसाधकानुमाने तावद्विपक्षबाधकमित्थं परैरुच्यते-महत्त्वपरिमाणस्य जनयत्वे महत्त्वावांतरजातिरूपापकर्षमात्रं प्रयोजकम्। न तु तदुत्कर्षापकर्षरूपतदवांतरजातिद्वयम्। गौरवात्। तथा च त्र्यणुकमहत्त्वस्यापकृष्टमहत्त्वरूपतया जन्यत्वेन कारणापेक्षायां तत्र स्वाश्रयसमवायिकारणगतसंख्यापरिमाणसंयोगविशेषाणामेव कारणत्वेन त्र्यणुकस्य समवायिकारणमवश्यमभ्युपगंतव्यमिति। त्र्यणुककारणेषु रूपादिमत्समवायिकारणत्वेन रूपादिमत्त्वानुमाने च रूपादीनां कारणगुणपूर्वकत्वमेव विपक्षबाधकमुच्यते। तत्र यदि रूपस्य जन्यत्वे रूपत्वं प्रयोजकं नेष्यते तदा महत्त्वस्य जन्यत्वेऽपि किंचित्प्रयोजकं नान्विष्येत। तत्र प्रयोजकापेक्षायामत्रापि तदपेक्षा तुल्या। किञ्च। महत्त्वस्य जन्यत्वे प्रयोजकमुत्कर्षापकर्षरूपजातिद्वयरूपमन्यल्लभ्यतेऽपि। न च रूपस्य जन्यत्वे रूपत्वातिरेकेण गुर्वप्यवच्छेदकान्तरं लभ्यते। न च कार्यगतरूपत्वम्। तथा पार्थिवपरमाणुरूपाननुगतत्वात्। वस्तुतस्तु, महत्त्वस्य जन्यत्वे परिमाणापकर्षः प्रयोजको युक्तः न तु महत्त्वापकर्षः। विशेषरूपत्वात् दैर्घ्याननुगतत्वाञ्च। ततश्च त्र्यणुकावयवकारणे यद्यपकृष्टपरिमाणमभ्युपगम्येत तदा तस्य जन्यत्वेन कारणपरिमाणापेक्षायां तस्य सावयत्वं प्रसज्येतेति तत्परिहाराय तत्र परममहत्त्वस्याभ्युपगन्तव्यत्वात्। परिमाणगतजन्यताप्रयोजकरूपापेक्षया जगन्मूलकारणानुमाने प्रवृत्तौ तेन परममहद्ब्रह्मैव तथात्वेनानुमितं भवेत्। न च कार्यद्रव्यस्य स्वन्यूनपरिमाणद्रव्यारभ्यत्वनियमः। दीर्घैस्तंतुभिः दृढतरावर्त्तितैस्तन्न्यूनपरिमाणस्य विशालैः पटैरावर्तितैस्तन्न्यूनपरिमाणस्य च सूत्रस्यारंभदर्शनात्। एतेन त्र्यणुकव्यणुककारणमनुमीयमानं तद्गतपरिमाणहेतुबहुत्वद्वित्वसंख्याश्रयतयानेकमेव सिद्ध्येन्न तु लाघवादेकमित्यपि शङ्का निरस्ता। विपक्षबाधकानादरे तत्कारणानुमानस्यैवाप्रवृत्तेः तदादरे परममहतः परब्रह्मण एव तत्कारणत्वेन सिद्धेः। तथा रूपादीनां कारणगुणपूर्वकत्वनियमो यदि नेष्येत तदा परमाणूनां रूपादिमत्कारणत्वेन रूपादिमत्त्वानुमानं न प्रवर्तेत। न च कार्यगतरूपाणामेव कारणगुणपूर्वकत्वनियम आद्रियत इति वाच्यम्। कार्यगतत्वविशेषणानादरेण रूपमात्रस्य

जन्यत्वसिद्धावग्निसंयोगाजन्यरूपादिमात्रस्य कारणगुणापेक्षत्वात्। तस्मात् पराभिमतरीत्यैव उपन्यस्ततर्कस्य दृढव्याप्तिमूलत्वात् प्रतिकूलतर्कपराहतं मूलकारणस्य रूपादिमत्त्वानुमानं न प्रवर्तत इति न तत्र रूपादिमत्वसिद्धिरिति भावः। अथ माभूद्रूपादिमत्वसिद्धिः परमाणुरूपधर्मिसिद्धिरविकलेति तावतापि सन्तोषो माभूदित्याह-सू।। **उभयथा च दोषात्**।।१५।। **कारणगुणपूर्वकत्वासिद्धिरिति।** रूपादिमत्त्वाभावे कार्यपृथिव्यादिषु पराभिमतरूपकारणानुपपादनात् स्वरूपमात्रकारणोपपादनेन नाभिमतसिद्धिरिति भावः। **तत्सिद्धय इति।** एतद्दूषणं पूर्वसूत्रोक्तमेव। तृतीयप्रकारासंभवज्ञापनार्थं तु सूत्रभाष्ययोरुक्तदूषणावर्तनम्। यद्यपि सांख्याभिमतः प्रधानकारणवादः तार्किकाभिमतः परमाणुकारणवादश्च प्रत्याख्यातः तथा प्ययमेवात्यंत पापीयानित्याह-सू।। **अपरिग्रहाच्चात्यंतमनपेक्षा**।।१६।। प्रधानरूपकारणात्मना सदेवाकाशादि कार्यं सर्गादावभिव्यज्यत इति वैदिकानामप्यभ्युपगमोऽस्त्येव। तस्य स्वातन्त्र्यं परं नेष्यते। अतोऽस्ति प्रधानकारणवादस्य कथंचिद्वैदिकपरिग्रहः। अस्य तु न कथंचिदप्यस्ति परमाणूनां स्वरूपत एव वैदिकैरनभ्युपगतत्वात्। न च वैकदिक्प्रसिद्धपरमाणुशब्दार्थतया तदभ्युपगम आवश्यकः। त्र्यणुकेष्वेव तस्य शब्दस्य विश्रांतेः। 'जालांतरगते भानुभानौ यो दृश्यते रजः। परमं तत्परं सूक्ष्मं परमाणु प्रचक्षंते'।। इति पौराणिकवचनात्। न च तथापि कथ न्यायशास्त्रस्यात्यन्तानादरणीयत्वं चतुर्दशविद्यास्थानांतर्गतत्वादिति शङ्कनीयम्। वैशेषिकशास्त्रस्य सर्वथैवानादरणीयत्वोपपत्तेर्न्यायशास्त्रस्यापि परमाणुकारणवादाभ्युपगमांशे योगशास्त्रस्य प्रधानस्वातंत्र्याभ्युपगमांश इव उपेक्षणीयत्वोपपत्तेः।।

इति **वैशेषिकाधिकरणम्**।।२।।

इति शिवार्कमणिदीपिका परमाणुजगदकारणत्वाधिकरणम् समाप्तम्

समुदायाधिकरणम्।

शाङ्करभाष्यम्

***समुदाय उभयहेतुकेऽपि तदप्राप्तिः*॥१८॥**

वैशेषिकराद्धान्तो दुर्युक्तियोगाद्वेदविरोधाच्छिष्टापरिग्रहाच्च नापेक्षितव्य इत्युक्तम्। सोऽर्धवैनाशिक इति वैनाशिकत्वसाम्यात्वसर्ववैनाशिकराद्धान्तो नतरामपेक्षितव्य इतीदमिदानीमुपपादयामः। स च बहुप्रकारः ; प्रतिपत्तिभेदात्, विनेयभेदाद्वा॥ तत्रैते त्रयो वादिनो भवन्ति—केचित् सर्वास्तित्व-मात्रवादिनः, केचिद विज्ञानास्तित्वमात्रवादिनः, अन्ये पुनः सर्वशून्यत्ववादिनः—इति। तत्र ये सर्वास्तित्ववादिनो बाह्यमान्तरं च वस्त्वभ्युपगच्छन्ति, भूतं भौतिकं य चित्तं चैत्तं च, तांस्तावत् प्रति ब्रूमः। तत्र भूतं पृथिवीधात्वादयः। भौतिकं रूपादयश्चक्षुरादयश्च, चतुष्टये च पृथिव्यादिपरमाणवः खरस्नेहोष्णेरणस्वभावाः ते पृथित्व्यादिभावेन संहन्यन्त इति मन्यन्ते। यथा रूप—विज्ञान—वेदना—संज्ञा—संस्कारणसंज्ञकाः पञ्चस्कन्धाः। तेऽप्यध्यात्मं सर्वव्यवहारास्पदभावेन संहन्यन्त इति मन्यन्ते। तत्रेदमभिधीयते—योऽयमुभयहेतुक उभयप्रकारः समुदायः परेषामभिप्रेतः—अणुहेतुकश्च भूतभौतिकसंहतिरूपः, स्कन्धहेतुकश्च पञ्चस्कन्धीरूपः, तस्मिन्नुभयहेतुकेऽपि समुदायेऽभिप्रेयमाणे तदप्राप्तिः स्यात्। समुदायाप्राप्तिः=समुदायभावानुपपत्तिरित्यर्थः॥

कुतः? समुदायिनामचेतनत्वात्, चित्ताभिज्वलनस्य च समुदायसिद्ध्यधीनत्वात्, अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहन्तुरनभ्युपगमात्, निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसङ्गात्, आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वात् क्षणिकत्वाभ्युपगमांच्च निर्व्यापारत्वात्प्रवृत्त्यनुपपत्तेः। तस्मात्समुदायानुपपत्तिः। समुदायानुपपत्तौ च तदाश्रया लोकयात्रा लुप्येत॥१८॥

***इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्*॥१९॥**

यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरो नाभ्युपगम्यते; तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा। तस्यां चोपपद्यमानायां न किञ्चिदपरमपेक्षितव्यमस्ति॥

ते चाविद्यादयः-अविद्या, संस्कारः, विज्ञानम्, नाम, रूपम्, षडायतनम्, स्पर्शः, वेदना, उपादानम्, भवः, जातिः जरा, मरणम्, शोकः, परिदेवना, दुःखम्, दुर्मनस्तेत्येवञ्जातीयका इतरेतरहेतुकाः सौगते समये क्वचित् संक्षिप्ता निर्दिष्टाः, क्वचित् प्रपञ्चिताः। सर्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः। तदेवमविद्यादिकलापे परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदनिशमावर्तमानेऽर्थाक्षिप्त उपपन्नः सङ्घातः इति चेत्, तन्न; कस्मात्? उत्पत्तिमात्रनिमित्तत्वात्। भवेदुपपन्नः सङ्घातः, यदि सङ्घातस्य किञ्चिन्निमित्तमवगम्येत, न त्ववगम्यते। यत इतरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्वपूर्वमुत्तरोत्तरस्योत्पत्तिमात्रनिमित्तं भवद्भवेत्, न तु सङ्घातोत्पत्तेः किञ्चिन्निमित्तं सम्भवति॥

ननु-अविद्यादिभिरर्थादाक्षिप्यते सङ्घातः इत्युक्तम्, अत्रोच्यते; यदि तावदयमभिप्रायः-अविद्यादयः सङ्घातमन्तरेणात्मानमलभमाना अपेक्षन्ते सङ्घातमिति, ततस्तस्य सङ्घातस्य निमित्तं वक्तव्यम्। तच्च नित्येष्वप्यणुष्वभ्युपगम्यमानेष्वाश्रयाश्रयिभूतेषु च भोक्तृषु सत्सु न सम्भवतीत्युक्तं वैशेषिकपरिक्षायाम्; किमङ्ग पुनः क्षणिकेष्वप्यणुषु भोक्तृरहितेष्वाश्रयाश्रयिशून्येषु वाऽभ्युपगम्यमानेषु सम्भवेत्?

अथायमभिप्रायः-अविद्यादय एव सङ्घातस्य निमित्तमिति, कथं तमेवाश्रित्याऽऽत्मानं लभमानास्तस्यैव निमित्तं स्युः? अथ मन्यसे-सङ्घाता एवानादौ संसारे सन्तत्याऽनुवर्तन्ते, तदाश्रयाश्चाविद्यादयः-इति, तदाऽपि सङ्घातात्सङ्घातान्तरमुत्पद्यमानं नियमेन वा सदृशमेवोत्पद्येत, अनियमेन वा-सदृशं विसदृशं वोत्पद्येत। नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्यग्योनिनारकप्राप्त्यभावः प्राप्नुयात्, अनियमाभ्युपगमेऽपि मनुष्यपुद्गलः कदाचित्क्षणेन हस्ती भूत्वा देवो वा पुनर्मनुष्यो वा भवेदिति प्राप्नुयात्। उभयमप्यभ्युपगमविरुद्धम्। अपि च यद्भोगार्थः सङ्घातः स्यात्, स नास्ति स्थिरो भोक्तेति तवाभ्युपगमः। ततश्च भोगो भोगार्थ एव, स नान्येन प्रार्थनीयः। तथा मोक्षो मोक्षार्थ एव, इति मुमुक्षुणा नान्येन भवितव्यम्। अन्येन चेत्प्रार्थ्येतोभयम्, भोगमोक्षकालावस्थायिना तेन भवितव्यम्। अवस्थायित्वे क्षणिकत्वाभ्युपगमविरोधः। तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेत्, भवतु नाम, न तु सङ्घातः सिध्येत्; भोक्त्रभावादित्यभिप्रायः॥१९॥

उत्तरोत्पादे च पूर्वनिरोधात्॥२०॥

उक्तमेतत्-अविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्न सङ्घातसिद्धिरस्ति-इति, तदपि तूत्पत्तिमात्र-निमित्तत्वं न सम्भवतीतीदमिदानीमुपपाद्यते। क्षणभङ्गवादिनोऽयमभ्युपगमः-उत्तरस्मिन्क्षण उत्पद्यमाने पूर्वः क्षणो निरुध्यते-इति। न चैवमभ्युपच्छता पूर्वोत्तरयोः क्षणयोर्हेतु फलभावः शक्यते

सम्पादयितुम्। निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वादुत्तरक्षणहेतुत्वानुपपत्तेः। अथ भावभूतः परिनिष्पन्नावस्थः पूर्वक्षण उत्तरक्षणस्य हेतुरित्यभिप्रायतथापि नोपपद्यते; भावभूतस्य पुनर्व्यापारकल्पनायां क्षणान्तरसंबन्धप्रसङ्गात्। अथ भाव एवास्य व्यापार इत्यभिप्रायः तथापि नैवोपपद्यते; हेतुस्वभावानुपरक्तस्य फलस्योत्पत्त्यसंभवात्। स्वभावोपरागाभ्युपगमे च हेतुस्वभावस्य फलकालावस्थायित्वे सति क्षणभङ्गाभ्युपगमत्यागप्रसङ्गः। विनैव वा स्वभावोपरागेण हेतुफलभावमभ्युपगच्छतः सर्वत्र तत्प्राप्तेरतिप्रसङ्गः। अपिचोत्पादनिरोधौ नाम वस्तुनः स्वरूपमेव वा स्याताम् अवस्थान्तरं वा, वस्त्वन्तरमेव वा। सर्वथाऽपि नोपपद्यते। यदि तावद्वस्तुनः स्वरूपमेवोत्पादनिरोधौ स्याताम्, ततो वस्तुशब्द उत्पादनिरोधशब्दौ च पर्यायाः प्राप्नुयुः। अथास्ति कश्चिद्विशेष इति मन्येत–उत्पादनिरोधशब्दाभ्यां मध्यवर्तिनो वस्तुन आद्यन्ताख्ये अवस्थे अभिलप्येते–इति, एवमप्याद्यन्तमध्यक्षणत्रयसंबन्धित्वाद्वस्तुनः क्षणिकत्वाभ्युपगमहानिः। अथात्यन्तव्यतिरिक्तावेवोत्पादनिरोधौ वस्तुनः स्यातामश्वमहिषवत्, ततो वस्तूत्पादनिरोधाभ्यामसंसृष्टमिति वस्तुनः शाश्वतत्वप्रसङ्गः। यदि च दर्शनादर्शने वस्तुनः उत्पादनिरोधौ स्याताम्, एवमपि द्रष्टृधर्मौ तौ, न वस्तुधर्मौ, इति. वस्तुनः शाश्वतत्वप्रसङ्ग एव। तस्मादप्यसंगत सौगतं मतम्॥२०॥

*असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा *॥२१॥

क्षणभङ्गवादे पूर्वक्षणो निरोधग्रस्तत्वान्नोत्तरस्य क्षणस्य हेतुर्भवतीत्युक्तम्। अथासत्येव हेतौ फलोत्पत्तिं ब्रूयात्, ततः प्रतिज्ञोपरोधः स्यात्। चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इतीयं प्रतिज्ञा हीयेत। निर्हेतुकायां चोत्पत्तावप्रतिबन्धात्सर्वं सर्वत्रोत्पद्येत। अथोत्तरक्षणोत्पत्तिर्याव-तावदवतिष्ठते पूर्वक्षण इति ब्रूयात्, ततो यौगपद्यं हेतुफलयोः स्यात्, तथापि प्रतिज्ञोपरोध एव स्यात्; क्षणिकाः सर्वे संस्कारा इतीयं प्रतिज्ञोपरुध्येत॥२१॥

*प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् *॥२२॥

अपि च वैनाशिकाः कल्पयन्ति–बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं चेति। तदपि च त्रयं प्रतिसख्याऽप्रतिसंख्यानिरोधावाकाशं चेत्याचक्षते। त्रयमपि चैतदवस्त्वभावमात्रं निरुपाख्यमिति मन्यन्ते–बुद्धिपूर्वकः किल विनाशो भावानां प्रतिसंख्यानिरोधो नाम भाष्यते, तद्विपरीतोऽप्रतिसंख्यानिरोधः, आवरणाभावमात्रमाकाशमिति। तेषामाकाशं परस्तात्प्रत्याख्यास्यति। निरोधद्वयमिदानीं प्रत्याचष्टे। प्रतिसंख्याऽप्रतिसङ्ख्यानिरोधयोरप्राप्तिः=असम्भव इत्यर्थः। कस्मात्? अविच्छेदात्। एतौ हि प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधौ सन्तानगोचरौ वा स्याताम् भावगोचरौ वा। न तावत्सन्तानगोचरौ सम्भवतः ; सर्वेष्वपि सन्तानेषु सन्तानिनामविच्छिन्नेन हेतु फलभावेन

सन्तानविच्छेदस्यासम्भवात्। नापि भावगोचरौ सम्भवतः। न हि भावानां निरन्वयो निरुपाख्यो विनाशः सम्भवति; सर्वास्वप्यवस्थासु प्रत्यभिज्ञानबलेनान्वय्यविच्छेददर्शनात्, अस्पष्टप्रत्यभिज्ञानास्वप्यवस्थासु क्वचिद् दृष्टेनान्वय्यविच्छेदेनान्यत्रापि तदनुमानात्। तस्मात्परपरिकल्पितस्य निरोधद्वयस्यानुपपत्तिः॥२२॥

उभयथा च दोषात्॥२३॥

योऽयमविद्यादिनिरोधः प्रतिसङ्ख्यानिरोधान्तःपाती परपरिकल्पितः, स सम्यग्ज्ञानाद्वा सपरिकरात्स्यात्, स्वयमेव वा। पूर्वस्मिन् विकल्पे निर्हेतुकविनाशाभ्युपगमहानिप्रसङ्गः, उत्तरस्मिंस्तु मार्गोपदेशानर्थक्यप्रसङ्गः। एवमुभयथाऽपि दोषप्रसङ्गादसमञ्जसमिदं दर्शनम्॥२३॥

आकाशे चाविशेषात्॥२४॥

यच्च तेषामेवाभिप्रेतं निरोधद्वयमाकाशं च निरुपाख्यमिति, तत्र निरोधद्वयस्य निरुपाख्यत्वं पुरस्तान्निराकृतम्। आकाशस्येदानीं निराक्रियते। आकाशे चायुक्तो निरुपाख्यत्वाभ्युपगमः ; प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात्। आगमप्रामाण्यात्तावत् ''आत्मन आकाशः सम्भूतः'' (तै० २/१) इत्यादिश्रुतिभ्य आकाशस्य च वस्तुत्वप्रसिद्धिः। विप्रतिपन्नान् प्रति तु शब्दगुणानुमेयत्वं वक्तव्यम्; गन्धादीनां गुणानां पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्। अपि चावरणाभावमात्रमाकाशमिच्छतामेकस्मि सुपर्णे पतत्यावरणस्य विद्यमानत्वात्सुपर्णान्तरस्योत्पित्सतोऽनवकाशत्वप्रसङ्गः॥

यत्रावरणाभावः, तत्र पतिष्यतीति चेत्, येनावरणाभावो विशेष्यते, तत्तर्हि वस्तुभूतमेवाकाशं स्यात्, नावरणाभावमात्रम्। अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रसज्येत। सौगते हि समये ''पृथिवी भगवः किंसंनिश्रया'' इत्यस्मिन्प्रतिवचनप्रवाहे पृथिव्यादीनामन्ते ''वायुः किंसंनिश्रयः'' इत्यस्य प्रश्नस्य प्रतिवचनं भवति ''वायुराकाशसंनिश्रयः'' इति। तदाकाशस्यावस्तुत्वे न समञ्जसं स्यात्। तस्मादप्ययुक्तमाकाशस्यावस्तुत्वम्। अपि च निरोधद्वयमाकाशं च त्रयमप्येतन्निरुपाख्यमवस्तु नित्यं चेति विप्रतिषिद्धम्। न ह्यवस्तुनो नित्यत्वमनित्यत्वं वा सम्भवति; वस्त्वाश्रयत्वाद्धर्म-धर्मिव्यवहारस्य। धर्म-धर्मिभावे हि घटादिवद्वस्तुत्वमेव स्यात्, न निरुपाख्यत्वम्॥२४॥

अनुस्मृतेश्च॥२५॥

अपि च वैनाशिकः सर्वस्य वस्तुनः क्षणिकतामभ्युपयन्नुपलब्धुरपि क्षणिकतामभ्युपेयात्। न च सम्भवति; अनुस्मृतेः। अनुभवमुपलब्धिमनूत्पद्यमानं स्मरणमेवानुस्मृतिः। सा चोपलब्ध्येककर्तृका

सती सम्भवति; पुरुषान्तरोपलब्धिविषये पुरुषान्तरस्य स्मृत्यदर्शनात्। कथं ह्यहमदोऽद्राक्षमिदं पश्यामीति च पूर्वोत्तरदर्शिन्येकस्मिन्नसति प्रत्ययः स्यात्? अपि च दर्शन-स्मरणयोः कर्तर्येकस्मिन्प्रत्यक्षः प्रत्यभिज्ञानप्रत्ययः सर्वस्य लोकस्य प्रसिद्धः-अहमदोऽद्राक्षमिदं पश्यामीति। यदि हि तयोर्भिन्नः कर्ता स्यात्, ततोऽहं स्मराम्यद्राक्षीदन्य इदति प्रतीयात्, न त्वेवं प्रत्येति कश्चित्। यत्रैवं प्रत्ययः तत्र दर्शन-स्मरणयोर्भिन्नमेव कर्तारं सर्वलोकोऽवगच्छति-स्मराम्यहमसावदोऽद्राक्षी-दिति। इह त्वहमदोऽद्राक्षमिति दर्शन-स्मरणयोर्वैनाशिकोऽप्यात्मानमेवैकं कर्तारमवगच्छति, न 'नाहमि' त्यात्मनो दर्शनं निर्वृत्तं निह्नुते, यथाऽग्निरनुष्णोऽप्रकाश इति वा। तत्रैवं सत्येकस्य दर्शन स्मरणलक्षणक्षणद्वयसम्बन्धे क्षणिकत्वाभ्युपगमहानिरपरिहार्या वैनाशिकस्य स्यात्। तथाऽनन्तरामनन्तरामात्मन एव प्रतिपत्तिं प्रत्यभिजानन्नेकर्तृकाम् ओत्तमादुच्छ्वासादतीताश्च प्रतिपत्तीरा जन्मन आत्मैकर्तृकाः प्रतिसन्दधानः कथं क्षणभङ्गवादी वैनाशिको नापत्रपेत? स यदि ब्रूयात्-सादृश्यादेतत्सम्पत्स्यत-इति। तं प्रति ब्रूयात्। तेनेदं सदृशमिति द्वयायत्तत्वात्सादृश्यस्य, क्षणभङ्गवादिनः सदृशयोर्द्वयोर्वस्तुनोर्ग्रहीतुरेकस्याभावात् सादृश्यनिमित्तं प्रतिसन्धानमिति मिथ्याप्रलाप एव स्यात्। स्याच्चेत्पूर्वोत्तरयोः क्षणयोः सादृश्यस्य ग्रहीतैकः, तथा सत्येकस्य क्षणद्वयावस्थानात्क्षणिकत्वप्रतिज्ञा पीडयेत॥

तेनेदं सदृशमिति प्रत्ययान्तरमेवेदम्, न पूर्वोत्तरक्षणद्वयग्रहणनिमित्तमितिचेत्, न; तेनेदमिति भिन्नपदार्थोपादानात्। प्रत्ययान्तरमेव चेत्सादृश्यविषयं स्यातेनेदं सदृशमिति वाक्यप्रयोगोऽनर्थकः स्यात्; सादृश्यमित्येव प्रयोगः प्राप्नुयात्। यदा हि लोकप्रसिद्धः पदार्थः परीक्षकैर्न परिगृह्यते, तदा स्वपक्षसिद्धिः, परपक्षदोषो वोभयमप्युच्यमानं परीक्षकाणामात्मनश्च यथार्थत्वेन न बुद्धिसन्तानमारोहति। एवमेवैषोऽर्थ इति निश्चितं यत्, तदेव वक्तव्यम्। ततोऽन्यदुच्यमानं बहुप्रलापित्वमात्मनः केवलं प्रख्यापयेत्। न चायं सादृश्यात्संव्यवहारो युक्तः ; तद्भावावगमात् त्सदृशभावानवगमाच्च। भवेदपि कदाचिद् बाह्यवस्तुनि विप्रलम्भसम्भवात्-तदेवेदं स्यात् तत्सदृशं वेति सन्देहः, उपलब्धरि तु सन्देहोऽपि न कदाचिद्भवति-स एवाहं स्याम्, तत्सदृशो वेति; य एवाहं पूर्वेद्युरद्राक्षम्, स एवाहमद्य स्मरामीति निश्चिततद्भावोपलम्भात्। तस्मादप्यनुपपन्नो वैनाशिकसमयः॥२५॥

***नासतोऽदृष्टत्वात्*॥२६॥**

इतश्चानुपपन्नो वैनाशिकसमयः, यतः स्थिरमनुयायिकारणमनभ्युपगच्छतामभावाद्भावोत्पत्ति-रित्येतदापद्यते। दर्शयन्ति चाभावाद्भावोत्पत्तिम्-"नानुपमृद्य प्रादुर्भावात्" इति। विनष्टाद्धि किल बीजादङ्कुर उत्पद्यते, तथा विनष्टात्क्षीराद्दधि, मृत्पिण्डाच्च घटः। कूटस्थाच्चेत्कारणात्कार्य-मुत्पद्येताविशेषात्सर्वं सर्वत उत्पद्येत। तस्मादभावग्रस्तेभ्यो बीजादिभ्योऽङ्कुरादीनामुत्पद्यमान-

त्वादभावाद्भावोत्पत्तिरिति मन्यन्ते। तत्रेदमुच्यते– *नासतोऽदृष्टत्वादिति*।। नाभावाद्भाव उत्पद्यते। यद्यभावाद्भाव उत्पद्येत, अभावत्वाविशेषात्कारणविशेषाभ्युपगमोऽनर्थकः। न हि बीजादीनामुपमृदितानां योऽभावः तस्याभावस्य शशविषाणादीनां च निःस्वभावत्वाविशेषादभावत्वे कश्चिद्विशेषोऽस्ति, येन बीजादेवाङ्कुरो जायते, क्षीरादेव दधीत्येवञ्जातीयकः कारणविशेषाभ्युपगमोऽर्थवान् स्यात्। निर्विशेषस्य त्वभावस्य कारणत्वाभ्युपगमे शशविषाणादिभ्योऽप्यङ्कुरादयो जायेरन्। न चैवं दृश्यते। यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येत, उत्पलादीनामिव नीलत्वादिः, ततो विशेषवत्त्वादेवाभावस्य भावत्वमुत्पलादिवत्प्रसज्येत। नाप्यभावः कस्यचिदुत्पत्तिहेतुः स्यात्; अभावत्वादेव; शशविषाणादिवत्। अभावाच्च भावोत्पत्तावभावान्वितमेव सर्वं कार्यं स्यात्, न चैवं दृश्यते; सर्वस्य च वस्तुनः स्वेन रूपेण भावात्मनैवोपलभ्यमानत्वात्। न च मृदन्विताः शरावादयो भावास्तन्त्वादिविकाराः केनचिदभ्युपगम्यन्ते। मृद्विकारानेव तु मृदन्वितान्भावांल्लोकः प्रत्येति।।

यत्तूक्तम्–स्वरूपोपमर्दमन्तरेण कस्यचित्कूटस्थस्य वस्तुनः कारणत्वानुपपत्तेरभावाद्भावोत्पत्तिर्भवितुमर्हति–इति, तद् दुरुक्तम्; स्थिरस्वभावानामेव सुवर्णादीनां प्रत्यभिज्ञायमानानां रुचकादिकार्यकारणभावदर्शनात्। येष्वपि बीजादिषु स्वरूपोपमर्दो लक्ष्यते, तेष्वपि नासावुपमृद्यमाना पूर्वावस्थोत्तरावस्थायाः कारणमभ्युपगम्यते; अनुपमृद्यमानानामेवानुयायिनां बीजाद्यवयवानामङ्कुरादिकारणभावाभ्युपगमात्। तस्मादसद्भ्यः शशविपाणदिभ्यः सदुत्पत्त्यदर्शनात्सद्भ्यश्च सुवर्णादिभ्यः सदुत्पत्तिदर्शनादनुपपन्नोऽयमभवाद्भावोत्पत्त्यभ्युपगमः। अपि च चतुर्भिश्चित्त चैत्ता उत्पद्यन्ते, परमाणुभ्यश्च भूत-भौतिकलक्षणः समुदाय उत्पद्यत इत्यभ्युपगम्य पुनरभावाद्भावोत्पत्तिं कल्पयद्भिरभ्युपगतमपह्नुवानैर्वैनाशिकैः सर्वो लोक आकुलीक्रियते।।२६।।

***उदासीनानामपि चैवं सिद्धिः*।।२७।।**

यदि चाभावाद्भावोत्पत्तिरभ्युपगम्येत, एवं सत्युदासीनानामनीहमानानामपि जनानामभिमतसिद्धिः स्यात्; अभावस्य सुलभत्वात्। कृषीवलस्य क्षेत्रकर्मण्यप्रयतमानस्यापि सस्यनिष्पत्तिः स्यात्, कुलालस्य च मृत्संस्क्रियायामप्रयतमानस्याप्यमत्रोत्पत्तिः, तन्तुवायस्यापि तन्तूनतन्वानस्यापि तन्वानस्येव वस्त्रलाभः, स्वर्गापवर्गयोश्च न कश्चित्कथञ्चित्समीहेत। न चैतद्युज्यते, अभ्युपगम्यते वा केनचित्। तस्मादप्यनुपपन्नोऽयमभावाद् भावोत्पत्त्यभ्युपगमः।।२७।। इति चतुर्थं समुदायाधिकरणम्।।

इति शाङ्करभाष्यम् समुदायाधिकरणम् समाप्तम्

वार्तिकम्

समुदाय उभयहेतुकेऽपि तदप्राप्तिः।। पूर्वोत्तराधिकरणयोरवान्तरसङ्गतिमाह– *वैशेषिकराद्धान्त इति*।। *सोऽर्द्धवैनाशिक इति*।। सः=वैशेषिक इत्यर्थः ; ''खट्वारूढो देवदत्तस्तस्यामुपविशती'' तिवद् अन्योपसर्जनस्यापि परामर्शोपपत्तेः। कथमस्यार्धवैनाशिकत्वम्? केषाञ्चित् पदार्थानां नित्यत्वमभ्युपगम्य केषाञ्चिद् निरन्वयविनाशाभ्युपगमात्, कस्मिंश्चित् वेदार्थे तत्प्रामाण्यमभ्युपेत्य कस्मिंश्चित् तदर्थे तत्प्रामाण्यानभ्युपगमाद् वा। बौद्धस्य च सर्वभावानां निरन्वयनाशाभ्युपगमात् सर्ववेदवाक्यानामप्रामाण्याभ्युपगमाच्च सर्ववैनाशिकत्वम्।।

नतरामपेक्षितव्य इत्ययुक्तम्; उभयोर्वैनाशिकत्वसाम्येनानपेक्षासाम्यात् तरपोऽर्थाभावादिति चेत्, मैवम्; कैमुतिकन्यायज्ञापनार्थत्वात् तदुपपत्तेः–यत्रार्धवैनाशिकानामियं गतिः, तत्र सर्ववैनाशिकानां कैव कथा–इति। यद्वा–अर्धवैनाशिकानां स्थिरभाववादिनां समुदायारम्भ उपपद्येतापि, क्षणिकभाववादिनां त्वसौ दूरापेत इत्युपपादयिष्यामः ; तेन 'नतरामि' त्युक्तम्।।

अथ केयं सङ्गतिरुक्ता भवति? प्रसङ्गसङ्गतिरिति वदामः ; अर्धवैनाशिकमतेन सर्ववैनाशिकमतस्मरणात्, स्मृतस्योपेक्षाऽनर्हत्वस्य प्रसङ्गत्वात्। प्रत्युदाहरणसङ्गतिर्वा, यथा–संयोगसचिवैरवयवैरवयव्यारम्भवादे परिच्छिन्नपरमाणुनित्यत्वादे च दोषः, नैवमस्मन्मते दोषोऽस्ति; अस्माभिस्तदुभयानभ्युपगमात्–इति। *स च बहुप्रकार इति*।। स च=सर्ववैनाशिकसिद्धान्तः। बहु प्रकारः–त्रिविध इत्यर्थः ; बहुत्वस्य कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवसानात्।।

ननु–वस्तुत ऐकरूप्येण विकल्पासम्भवात् कथं त्रिप्रकारत्वम्? अत आह– *प्रतिपत्तिभेदादिति*।। सत्यं वस्तु न भिद्यते; तस्यैकरूपत्वात्, प्रतिपत्तयस्तु तस्मिन्नेकस्मिन्नपि पुरुषाशयवशाद् भिद्यन्ते। तद्यथा–एकाऽपि परमार्थसति रज्जुः केनचिद् निर्दष्टेन रज्जुत्वेनैव गृह्यते,

स्वदोषेण तु केनचित् सर्पत्वेन, केनचिच्च जलधारात्वेन; तद्वद् एकोऽपि सन् बौद्धसिद्धान्तः कैश्चिदयथार्थदर्शिभिः सर्वनास्तित्वेन गृह्यते, अन्यैश्चायथार्थदर्शिभिर्बाह्याध्यात्मिकस्य सर्वस्यास्तित्वेन कैश्चिच्चालयप्रवृत्त्युभयक्षणविज्ञानमात्रास्तित्वेन, इति प्रतिपत्तिभेदाद् भेदव्यपदेश इति। ननु–एवमपि परमार्थस्यैव सिद्धान्तरूपत्वात् तस्य चैकरूप्योक्तेर्न सिद्धान्तत्रिप्रकारत्वमित्यस्वरसेनाह– *विनेय भेदाद्वेति*॥

हीनमध्यमोत्कृष्टधियो हि शिष्या भवन्ति। तत्र ये हीनमतयः, ते स्थूलारुन्धतीदशनन्यायेन सर्वास्तित्वावादेन तदाशयानुरोधात् शून्यतायामवतार्यन्ते। ये च मध्यमाः, ते ज्ञानमात्रत्वेन, ये तूत्कृष्टमतयः, तेभ्यः साक्षादेव शून्यतातत्त्वं प्रतिपाद्यते, इति विनेयभेदात् सिद्धान्तप्रकारभेद इति। तदुक्तम् बौद्धचित्तविवरणग्रन्थे तैरेव–

''देशना लोकानाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोक उपायैर्बहुभिः पुनः॥
''गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा।
भिन्नाऽपि देशनाऽभिन्ना शून्यताऽद्वयलक्षणा॥''

इति। लोकनाथानाम्=बुद्धानाम्, देशनाः=आगमाः, उपदेश इति यावत्, प्राण्यभिप्रायवशानुसारिण्यः शून्यताप्रतिपत्त्युपायैः क्षणिकसर्वास्तित्वादिभिर्लोके श्रोतृसमुदाये पुनः पुनर्बहुधा भिद्यन्ते। भेदमेवाह– *गम्भीरेति*॥ अगाधो गम्भीरः, तद्विपरीत उत्तानः=स्थूलदृष्टित्वयोग्यः, तद्रूपेण क्वचित्–ग्रन्थप्रदेशे उभयलक्षणा–ज्ञानमात्रास्तित्व- बाह्यार्थास्तित्वलक्षणा, तत्प्रतिपादिनी। भिन्नाऽपि देशना शून्यतैव, अद्वया–तल्लक्षणा=तत्तात्पर्यवती, अभिन्नेत्यर्थः। ननु–सौत्रान्तिकवैभाषिकयोरप्यवान्तरमतभेदोऽस्ति–ज्ञानवैचित्र्याद् अर्थोऽनुमेय इति सौत्रान्तिकाः, अर्थोऽपि ज्ञानविषयतया प्रत्यक्ष इति वैभाषिकाः। तथा च–चतुर्णामुपन्यासे कर्तव्ये त्रयाणामेवोपन्यासो न युक्त इति–चेत्, मैवम्; अवान्तरभेदेऽपि सौत्रान्तिक वैभाषिकयोर्बाह्याध्यात्मिकसर्वास्तित्ववादितयैकत्वेनोपन्यासाद् वादित्रित्योपपत्तेः॥

तत्र तेषु मतभेदेषु मध्ये ये सर्वास्तित्ववादिनः सौत्रान्तिका वैभाषिकाश्च बाह्यमभ्यन्तरञ्च सर्वं वस्त्वभ्युपगच्छन्ति, तान्प्रतीदमधिकरणमुत्तिष्ठति। तत्र बाह्यं भूतं भौतिकं च, आभ्यन्तरं चित्तं चैत्तं च, तत्र भूतं चतुर्विधाः परमाणवः। तत्र पृथिवीपरमाणवः खरस्वभावाः, यान् पृथिवीधातुरित्याचक्षते। तेजः परमाणव उष्णस्वभावाः, यान् तेजोधातुरित्याचक्षते। वायुपरमाणवस्तु ईरणस्वभावाः, यान्

वायुधातुरित्याचक्षते। तानेव च सङ्घातापन्नान् भौतिकमित्याचक्षते–रूप–रस–गन्ध स्पर्शाः चक्ष–रसना–घ्राण–त्वश्चेति। चित्तं चैत्तं चाभ्यन्तरम्–रूपस्कन्धः, विज्ञानस्कन्धः, वेदानास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धश्चेति पञ्चस्कन्धाः। तत्र रूप्यन्त एभिः विषया इति रूपम्, रूप्यन्त इति च रूपम्, इति करण–कर्मव्युत्पत्त्या सविषयेन्द्रियाणि रूपस्कन्ध इत्याचक्षते। स्कन्धः=समूहः, गण इति यावत्। ननु–एवं तर्हि भूतभौतिकानामेव रूपमिति संज्ञाकरणात् तेषां च बाह्यत्वेनोक्तत्वात् कथमाभ्यन्तरत्वमिति–चेत्, नैष दोषः ; बाह्यत्वेऽपि तेषां कार्याकारेण संहतत्वात् संहतानामपीन्द्रियसम्बन्धादाध्यात्मिकत्वेनाभ्यन्तरत्वोपपत्तेरिति। अहमित्यालयविज्ञानम्, इन्द्रियादिजन्यं च विषयविषयकं प्रवृत्तिविज्ञानम्, एतद्द्वयं निर्विकल्पकप्रवाहीभूतं विज्ञानस्कन्ध इत्याचक्षते। या प्रियाप्रियानुभवविषयसम्बन्धे सुखदुःखतद्रहितविशेषावस्था चित्तस्य जायेत, तां वेदनास्कन्ध इत्याचक्षते। सविकल्पप्रत्ययं संज्ञास्कन्ध इत्याचक्षते; तस्य संज्ञासंसर्गयोग्यप्रतिभासत्वात्। रागादयः क्लेशाः, उपक्लेशाश्च मद–मानादयः, धर्माधर्मौ च, इत्येतत् सर्वं संस्कारस्कन्ध इत्याचक्षते; संस्काररूपेण तेषामवस्थानात्। तत्र विज्ञानस्कन्धः चित्तम्, अवशिष्टं च स्कन्धत्रयं चैत्तमित्यवगन्तव्यम्।।

तत्र तस्मिन्नुभयहेतुकेऽपि–योऽयं भूतभौतिकहेतुकः समुदायो बाह्योऽभिहितः, यश्च चित्तचैत्तहेतुक आध्यात्मिकः समुदायः पञ्चस्कन्धीरूपः, तस्मिन्नुभयहेतुकेऽपि समुदायद्वये पराभ्युपगत आरम्भवाद इव दोषोऽस्ति। को दोषः? तदप्राप्तिः=समुदायस्याप्राप्तिरेव दोष इत्यर्थः। कुतोऽप्राप्तिः? समुदायिनां भूतभौतिकादीनामचेतनत्वेन संहननानुपपत्तेः। चेतनो हि कुलालादिः सर्वं मृत्पिण्डादिकमुपसंहत्य पराभिमतसमुदायात्मकं घटादिकार्यमारचयन् दृष्टः। न ह्यसति मृद्दण्डादिव्यापारविदुषि कुलाले स्वयमचेतना मृद्दण्डादयो व्यापृत्य जातु घटमारचयन्ति, न चासति कुविन्दे तन्तुवेमादयः पटम्। अथैवं मन्यसे–सत्यं चेतनाधीनो भूतभौतिकादिसङ्घातः, अस्ति चास्मन्नये़ऽप्युभयविधं चित्तं चेतनम्, अतो न काचिदनुपपत्तिरिति–चेत्, मैवम्; चित्ताभिज्वलनस्यापीन्द्रियादिलक्षणसमुदायसिद्ध्यधीनत्वाद् दुरुत्तरमितरेतराश्रयापत्तेः, प्रागभवीयचित्ताभिदीप्तेस्त्वतीतत्वेन् तत्सामर्थ्यविरहात्, क्षणिकचित्तसन्तानादन्यस्य स्थायिनश्चेतनस्य भोक्तुः प्रशासितुर्वा संहननकर्तुस्त्वयाऽनङ्गीकरणात्।।

ननु–असमवहितान्येव स्वकार्ये परस्परानपेक्षाणि च कारणानि स्वकार्यं करिष्यन्ति, कृतमत्र समवधात्रा चेतनेनेति–चेत्, न; एवमप्युपगमे प्रवृत्त्यनुपरमप्रसङ्गात्, असहकारिविश्वप्रसङ्गाच्च। तच्च दर्शनेन वाध्यते। कारणानां क्षणिकत्वाभ्युपगमेन सकृत्कृत्वैव नाशात् कथं प्रवृत्त्यनुपरमप्रसङ्ग इति चेत्, एवमपि प्रवाहरूपेण तत्प्रसङ्गस्यावश्यकत्वात्। तथा च सुषुप्तिप्रलययोरभावप्रसंङ्गः।।

अथैवं मन्यसे–अस्त्यालयविज्ञानमहङ्कारास्पदं पूर्वपरानुसन्धातृ, तदेव च कारणं समवधातृ भविष्यतीति–चेत्, मैवम्; विकल्पासहत्वात्। तथाहि–किं तदालयविज्ञानं स्थाय्यभ्युपगम्यते, क्षणिकं वा। नाद्यः ; नामान्तरेण स्थाय्यात्मनोऽभ्युपगमप्रसङ्गात्, क्षणिकत्वाभ्युपगमविरोधाच्च। नापि द्वितीयः ; तस्य सङ्घाताधीनत्वस्योक्तत्वात्, अन्यथेतरेतराश्रयाएत्तेः। अपिच कथं क्षणिकानां कारणानां प्रवृत्तिरपि स्यात्? प्रवृत्तिर्हि व्यापारः। स च व्यापारवदाश्रयः, तज्जन्यश्च। न च क्षणिकस्योभयकालसम्बन्धो घटते। न चोभयकालसम्बन्धं विना तत्कारणत्वम्, तदाश्रयत्वं च तस्य सम्भवेत्; कारणत्वस्य तत्पूर्वसत्त्वनियतत्वात्, तदाश्रयत्वस्य च तत्कालनियतत्वात्, भिन्नकालयोराश्रयाश्रयिभावानुपपत्तेः। तस्मात् परमते समुदायानुपपत्तेस्तदाश्रया लोकयात्रा लुप्येतेति।।१८।।

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्।। अथ=मा भूत् स्थिरो भोक्ता प्रशासिता वा चेतनः संहन्ता, तथापि बाह्याध्यात्मिकानां भावानां परस्परकारणत्वादेवोपपत्स्यते लोकयात्रा।।

द्वाभ्यां हि कारणाभ्यां प्रतीत्यसमुत्पादो भवति–हेतूपबन्धात्, प्रत्ययोपबन्धाच्च। प्रतीत्यसमुत्पाद इति कार्यं ब्रूमः ; कारणं प्राप्य समुत्पन्नत्वात्। हेतोरेकस्य कार्येणानुबन्धो हेतूपबन्ध इत्युच्यते। प्रत्यगानां मिलितानां कारणानां कार्येणोपबन्धः प्रत्ययोपबन्ध इत्युच्यते। तत्र बाह्यस्य प्रतीत्यसमुत्पादस्य हेतूपबन्धो यथा–बीजादङ्कुरः, अङ्कुरात् पत्रम्, पत्रात् काण्डम्, काण्डाद् नालम्, नालाद् गर्भः, गर्भात् शूकः, शूकात् पुष्पम्, पुष्पात् फलम्–इति। प्रतययोपबन्धो यथा–वस्त्वाधारधातुसमवायाद् बीजहेतुरङ्कुरो जायते। तत्र पृथिवीधातुः कठिनस्वभावत्वाद् बीजस्य संग्रहकृत्यं करोति, यतोऽङ्कुरः कठिनो भवति। अब्धातुः स्नेहस्वभावत्वाद् बीजं स्नेहयति। तेजोधातुर्बीजं परिपाचयति। वायुधातुर्बीजमभिनिर्हरति, यतोऽङ्कुरो बीजान्निर्गच्छति। आकाशधातुर्बीजस्यानावरणकृत्यं करोति। ऋतुधातुरपि बीजस्य परिणामितां करोति। तदेतेषां धातूनां समवाये बीजे रोहत्यङ्कुरो जायते, नान्यथा।।

एवमाध्यात्मिकोऽपि प्रतीत्यसमुत्पादो द्वाभ्यामेव कारणाभ्यां भवति–हेतूपबन्धतः, प्रत्ययोपबन्धतश्च। तत्र हेतूपबन्धस्तावत्–येयं पृथिव्यप्तेजोवाय्वाकाशविज्ञानधातूनां षण्णां समुदायरूपे काये–एकसंज्ञा, पिण्डसंज्ञा, नित्यसंज्ञा, सुखसंज्ञा, सत्त्वसंज्ञा, पुद्गलसंज्ञा, मनुजसंज्ञा, मातृदुहितृसंज्ञा, अहङ्कार-प्रमकारसंज्ञा, इत्येवमादिलक्षणमिथ्याप्रत्ययरूपाऽविद्या, ततो राग-द्वेष-मोह मद-मानादि-धर्माधर्मलक्षणसंस्कारः प्रभवति। संस्काराच्चालयप्रवृत्तिलक्षणमुभयविधं विज्ञानम्, विज्ञानाच्च नामरूपे।।

अत्र पृथिव्यादीनि चत्वारि भूतान्युपादानलक्षणानि नामेत्युच्यते। तानयुपादानानि स्वीकृत्य शुक्लादिरूपवच्छरीरादि कार्यं यदभिनिर्वर्तते, तद्रूपमित्युच्यते। तदेतदुभयमेकधा संक्षिप्य नामरूपमित्युच्यते। तस्माच्च नामरूपात् षडायतनसंज्ञक इन्द्रियवर्गः, इन्द्रियाणां पृथिव्यादिषड्धात्वायतनत्वात्। षडायतनाच्च नामरूपेन्द्रियाणां त्रयाणां संनिपातलक्षणः स्पर्शः, स्पर्शाच्च वेदना सुखदुःखादिका, वेदानायां सत्याम् ''कर्तव्यमेतत् सुखं पुनर्मया'' इत्यध्यवसानं तृष्णा भवति। तत उपादानं वाक्कायचेष्टा भवति। ततो भवत्यस्माज्जन्मेति। भवो धर्माधर्मौ, तद्धेतुकश्च स्कन्धप्रादुर्भावो जातिः, जन्महेतुका जरा जातानां स्कन्धनां परिपाकः, ततः स्कन्धानां नाशः=मरणम्, म्रियमाणस्य मूढस्य साभिषङ्गस्य पुत्रकलत्रादावन्तर्दाहः शोकः, तदुत्थम् 'हे मातः! हे तात!'' इति प्रलपनं परिदेवना, पञ्चविज्ञानं कार्यसंयुक्तमसाध्वनुभवनं दुःखम्, ततश्च मानसं दुःखं दौर्मनस्यम्, एवमन्ये च तज्जातीयका उपक्लेशाः मद-मानादयो धर्माधर्मौ चेति। सोऽयं हेतूपनिबन्ध आध्यात्मिको दर्शितः।।

अथ प्रत्ययोपनिबन्धः-पृथिव्यप्तेजोवाय्वाकाशविज्ञानधातूनां समवायाद् भवति। तत्र कायस्य पृथिवीधातुः काठिन्यं निर्वर्तयति, अब्धातुः स्नेहयति कायम्। तेजोधातुः कायस्याशित-पीते परिपाचयति। वायुधातुः कायस्य श्वासादि कार्यं करोति। आकाशधातुः कायस्यान्तः सुषिरभावं करोति। यस्तु नामरूपाङ्कुरमभिनिर्वर्तयति पञ्चविज्ञानकार्यसंयुक्तं सास्रवं च मनोविज्ञानम्, सोऽयमुच्यते षष्ठो विज्ञानधातुः, यदा ह्याध्यात्मिकाः पृथिव्यादिषड्धातवो भवेन्त्यविंकलाः, तदा सर्वेषां समवायाद् भवति कार्योत्पत्तिः। न चैषां कार्यकारणभूतानां भावानामेवमीक्षणमस्ति-अहमेभ्य उत्पन्नम्, अस्माभिरेदुत्पाद्यते-इति वा। न चान्यः कश्चित् तदुभयाभिज्ञश्चेतनः सङ्घातकर्ताऽस्ति; बीजाङ्कुरादौ तददर्शनात्। तस्मादविद्यादीनां जन्मादीनां च परस्परं निमित्तनैमित्तिकभावस्य घटीयन्त्रन्यायेन सर्वेषामप्रत्याख्येयत्वाद् अर्थाक्षिप्तः सर्वेषां सङ्घातो भविष्यतीति-चेत्, मैवम्; यतः=तेषामुत्पत्तिमात्रनिमित्तत्वात्। सत्यं सम्भवेदविद्यादीनां बीजाङ्कुरन्यायेन पूर्वस्योत्तरोत्पादनिमित्तत्वलक्षणो हेतूपनिबन्धः; पूर्वं प्रतीत्यैवोत्तरस्य जायमानत्वाभ्युपगमात्, प्रत्ययोपनिबन्धस्तु न तेषां सम्भवेत्; तन्मेलनकारणासम्भवस्य भवन्मते प्रदर्शितत्वात्।।

ननु-प्रत्ययोपबन्धं विना हेतूपबन्धस्यानुपपत्तेः सर्वस्य कार्यस्य सामग्रीसाध्यत्वाद् एककारणेन कार्योत्पत्तेरदर्शनाद्, अविद्यादिभिरेवार्थात् सङ्घात आक्षिप्यते-इत्युक्तम्, सत्यमुक्तम्; एतावता सङ्घाते प्रमाणं दर्शितं भवद्भिः, न निमित्तम्, निमित्तं तु वक्तव्यमवशिष्यते। तच्च निमित्तं नित्येषु परमाणुषु परस्परमुपकार्योपकारकभावेनाश्रयाश्रयिषु सत्सु, नित्येषु च भोक्तृषु वैशेषिकैरभ्युपगतेषु न

सम्भवतीत्युक्तम्। किमङ्ग! पुनस्तद्विपरीतेषु क्षणिकेषु परस्परमुपकार्योपकारकभावशून्येषु भोक्तृरहितेषु भवदभ्युपगतेषु सम्भवेत्?... ... ... तथाचाविद्यादीनामेव सङ्घातनिमित्तत्वाद् न तन्निमित्तान्तरमपेक्षितव्यमिति चेत्, न; तेषामुत्पत्तिमात्रनिमित्तत्वेन सङ्घातनिमित्तत्वानुपपत्तेरुक्तत्वात्, अन्योन्याश्रयापत्तेश्च। मनुष्यपुद्गलादिलक्षणसङ्घातमाश्रित्यैवाविद्यादय अत्मानं लभन्ते। तथा च कथं तमेवाश्रित्याऽऽत्मानं लभमानास्तस्यैव निमित्तं स्युः? निमित्तत्वे वा कथं नान्योन्याश्रयः—सङ्घातसिद्धौ तमाश्रित्याविद्यादिसिद्धिः, अविद्यादिसिद्धौ च सङ्घातसिद्धिः—इति? प्रत्ययोपबन्धं विना केवलं हेतूपबन्धतः कार्यानुपपत्तेश्च; कार्यस्य सङ्घाताधीनत्वादित्युक्तत्वात्। बीजाङ्कुरवदनादित्वात् संसारस्य पूर्वसङ्घात एवोत्तरस्य सङ्घातस्य निमित्तं भविष्यति। तथा च न केवलं हेतूपबन्धात् कार्यम्, नाप्युक्तान्योन्याश्रय इति चेत्, मैवम्; तथा सति सततकार्यापत्तिप्रसङ्गः। न चैतद् युक्तम्; मोक्षप्रलयाभावप्रसङ्गात्। अपि च सङ्घातात् सन्तत्या सङ्घातान्तरमुत्पद्यमानं किं नियमेन तादृशमेवोत्पद्यते, अथानियमेन—कदाचित् सदृशम्, कदाचिद् विसदृशं चोत्पद्यत इति। तत्र नाद्यः ; मनुष्यपुद्गलस्य देवादिभावाभावप्रसङ्गात्। नापि द्वितीयः ; मनुष्यपुद्गल एव कदाचित् क्षणेन गजो देवो वा भूत्वा पुनस्तस्मिन्नेव जन्मनि मनुष्यो भवेत्। न चैतदुभयमपीष्टम्; अनभ्युपगमात्। तस्माद् एतदद्दोषपरिहारार्थमवश्यमागन्तुकं किञ्चिद् निमित्तमभ्युपगन्तव्यम्। तच्च तव मते न सम्भवतीत्युक्तम्। किञ्चाप्राप्तभोगो हि भोगमाप्तुकामस्तत्साधने प्रवर्तते, इति प्रत्यात्मसिद्धम्। सेयं प्रवृत्तिर्भोगादन्यस्मिन् भोक्तरि स्थिरे भोगंतत्साधनसमयव्यापिनि कल्पते, नास्थिरे, न वा भोगादनन्यस्मिन्। न हि भोगो भोगाय भवेत्। एवं मोक्षेऽपि द्रष्टव्यम्। तत्र यदि बुभुक्षु-मुमुक्ष् स्थिरावाश्रीयेताम्, तदा ह्युपपन्नौ भोग-मोक्षौ, अस्थिरत्वे च तयोः, तदर्थितया प्रवृत्त्यनुपपत्तिः। तस्मादविद्यादीनां यदि कथञ्चिदितरेतरोत्पत्तिनिमित्तत्वं भवेत्, तद्भवतु नाम; तथापि न तेषां सङ्घातः सिद्धयति; तत्कर्तुरभावादिति। ''कर्तुरभावादि''ति वक्तव्ये ''भोक्तुरभावादि'' ति वचनं कर्तुरेव भोक्तृत्वमिति ज्ञापनार्थम्; अकर्तुर्भोगाभावात्।।१९।।

पूर्वं हेतूपबन्धमभिप्रेत्य प्रत्ययोपबन्धः कर्तुरभावाद् न सम्भवतीत्युक्तम्, सम्प्रति हेतूपबन्धोऽपि क्षणिकवादिनां न सम्भवतीत्याह—*उत्तरोत्पादे च पूर्वनिरोधात्*।।२०।। चकारात् ''तदप्राप्तिरि'' ति मण्डूकप्लुत्याऽनुषज्यते। क्षणिकवादिभिरुत्तरक्षणोत्पादकाले पूर्वक्षणनिरोधाभ्युपगमात्, अन्यथा क्षणिकवादहानात् समुदायवत् हेतुफलभावस्याप्राप्तिः। कुतः? निरुद्धयमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वाद् उत्तरक्षणहेतुत्वानुपपत्तेः। ननु—निरुद्धस्य विनाशग्रस्तत्वेऽपि न निरुध्यमानस्य विनाशग्रस्तताऽस्ति; निरोधसामग्रीसंनिधानस्यैव निरुध्यमानत्वशब्दार्थत्वात्। तथा च

निरुध्यमानस्य हेतुत्वमविरुद्धमिति–चेत्, मैवम्; वैनाशिकैरकारणविनाशाभ्युपगमेन तदनिष्टत्वात् निरुद्धवत् निरुध्यमानस्यापि विनाशग्रस्तत्वध्रौव्यात्। ननु–उभयोरपि निरुद्धयमाननिरुद्धयोर्विनाशग्रस्तत्वाविशेषे न व्यवहारभेदो नास्तिकानां स्यादिति–चेत्, मैवम्; चिराचिरभेदेन तद्व्यवहारभेदोपपत्तेः–यद् अचिरं निरुद्धम्, तद् निरुध्यमानमित्युच्यते, यच्च चिरनिरुद्धम्, तन्निरुद्धम्–इत्युपपद्यते तेषां व्यवहारभेदः। ननु–अनन्यथासिद्धनियतपूर्वसत्त्वं हि कारणत्वं नाम। तच्च कार्यकाले कारणस्य सत्त्वं विनाऽप्युपपद्यते; अन्यथा तवापि मते यागादीनामाशुविनाशिनां कलान्तरभाविस्वर्गादीन् प्रत्यकारणत्वप्रसङ्गः। तथा च कार्यकाले कारणस्य विनाशग्रस्तत्वेऽपि तत्पूर्वकाले परिनिष्पन्नावस्थस्य भावभूतत्वाद् उपपद्यते पूर्वक्षणस्योत्तरक्षणहेतुत्वमिति–चेत्, मैवम्; तथाप्यकुर्वतोऽकारणत्वात् अग्रे तत्कुर्वद्रूपतासिद्ध्यर्थं तत्परिकल्पनायां क्षणान्तरसम्बन्धप्रसङ्गात् क्षणिकत्वहानिः। तदुक्तम्– *नाकुर्वत् कारणं दृष्टं कार्यमेव क्रियमाणकमिति*।। ननु–सत्यं नाकुर्वत् कारणं भवति। कुर्वद्भूयत्वं चास्य न क्रियां विना। तयाऽपि भाव एवास्य कार्यानुकूलव्यापारः, नान्यः ; पूर्वसत्त्वस्यैव कारणत्वोक्तेः। भावोऽप्युत्पत्तिरेव, न सत्ता सामान्यम्। तदुक्तम्–"भूतिर्येषां क्रिया सैव चोच्यते"। इति। भूतिः=उत्पत्तिरित्यर्थः। तथा च क्षणान्तरसम्बन्धाभावाद् न क्षणिकत्वहानिरिति–चेत्, मैवम्; मृत्सुवर्णादिहेतूपरक्ततया घट–रुचकादिकार्यस्यानुभवात् तद्विरोधेन हेतुस्वभावानुपरक्तस्य फलस्योत्पत्त्यसंभवात्। अथानुभवाविरोधसिद्ध्यर्थं हेतुस्वभावोपरागः फलस्याभ्युपगम्यते, तर्हि हेतोः फलकालसत्त्वेन स्थायित्वसिद्धेः क्षणिकत्वाभ्युपगमपरित्यागप्रसङ्गः। ननु–हेतु–फलयोः सादृश्यात् कार्यकारण-भावोपरागानुभव इति–चेत्, मैवम्; विसदृशयोरपि तन्तुपटयोर्हेतु–फलभावेन तत्र तदुपरागदर्शनात् सादृश्यकल्पनानुपपत्तेः। अपि च स्वभावोपरागं विनोपादानोपादेयभावमभ्युपगच्छतो नास्तिकस्य सर्वस्मात् सर्वोत्पत्तेरतिप्रसङ्गः। यदनन्तरं यद् भवति, तत् तस्योपादानम्, इति तद्भावभावस्योपादानोपादेयभावनियामकत्वाद् नातिप्रसङ्ग इति चेत्, मैवम्; एकस्मिन् पदार्थक्षणे तद्भावभावस्य ग्रहीतुमशक्यत्वात्, रासभादावपि तत्प्रसङ्गात्। सामान्योपाधौ तद्ग्रह इति चेत्, एवं तर्हि सामान्यस्यैव कारणत्वं स्यात्, व्यक्तयस्तु तदवस्थाः स्युः, नान्यत्र; अन्यकारणत्वस्यान्यत्र ग्रहासंभवात्। न चैतदिष्टम्; अनभ्युपगमात्, सामान्यस्य त्वन्मते तुच्छत्वात्। अभ्युपगमे वा क्षणिकत्वहानेरस्मत्पक्षप्रसङ्गात्। अपि चोत्पत्ति–निरोधौ नाम क्षणिकस्य वस्तुनः स्वरूपमेवाभ्युपगम्यते, अवस्थान्तरं वा, वस्त्वन्तरमेव वा। सर्वथाऽपि वस्तुनः क्षणिकत्वहानिः, शाश्वतत्वप्रसङ्गश्च। कथम्? यदि तावदाद्यः, तर्हि उत्पत्ति–निरोध–वस्तुशब्दानां पर्यायत्वात्

कालत्रयेऽपि वस्तुनः सत्त्वेन नित्यत्वम्। अथ द्वितीयपक्षः, तथापि मध्यवर्तिवस्तुन आद्यन्तावस्थासम्बन्धेन त्रिकालस्थायित्वाद् नित्यत्वम्। अथ तृतीयः पक्षः, तथाप्यश्व–महिषवत् वस्तुनोऽत्यन्तभिन्नाभ्यामुत्पत्तिनिरोधाभ्यां तस्यासंसर्गाद् नित्यत्वमिति। दर्शनादर्शनयोरप्युत्पत्ति निरोधत्वेऽभ्युपगम्यमाने तयोर्द्रष्टृधर्मत्वेन वस्त्वसंसर्गित्वात् पूर्ववस्तुनः शाश्वतत्वम्। तस्मादप्यसमञ्जसं सोगतदर्शनमिति।।२०।।

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा।।२१।। पूर्वक्षणो निरोधग्रस्तत्वाद् नोत्तरक्षणस्य हेतुर्भवतीत्युक्तम्–"उत्तरोत्पादे च पूर्वनिरोधादि" त्यत्र। अथैवंविधं दोषं परिजिहीर्षुर्यदि वैयात्यात् असत्येव हेतौ क्षणभङ्गवादी फलोत्पत्तिं ब्रूयात्, ततः प्रतिज्ञोपरोधः स्यात्। चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इति हि क्षणभङ्गवादिनः प्रतिज्ञा। सा तस्य हीयेत; नीलाभासस्य हि चित्तस्य नीलादालम्बनप्रत्ययाद् नीलाकारता, समनन्तरप्रत्ययात् पूर्वविज्ञानाद् बोधरूपता, चक्षुषोऽधिपतिप्रत्ययात् रूपग्रहणनियमः, आलोकात् (सहकारिप्रत्ययात्) हेतोः स्पष्टार्थता। एवं सुखादीनामपि चैत्तानां चित्ताभिन्नहेतुजानां चत्वार्येतान्येव कारणानि तैरभ्युपगतानि, तद्बाधः प्रसज्येत। अकारणिकायां च कार्योत्पत्तावभ्युपगम्यमानायां निष्प्रत्यूहा सर्वत्र सर्वोत्पत्तिः प्रसज्येत। अथ एतद्दोषपरिजिहीर्षया यावदुत्तरक्षणोत्पत्तिं पूर्वक्षणोऽवतिष्ठत इत्युच्यते। कोऽभिप्रायः? यदि तावत् कार्यक्षणोत्पत्तिकाल एव कारणक्षणोत्पत्तिरित्यभिप्रायः, ततो हेतुफलयोर्यौगपद्यं स्यात्, यौगपद्याच्च सव्येतरविषाणवद् न हेतुफलभावः। अथ पूर्वक्षणे समुत्पद्य कार्यक्षणोऽप्यवतिष्ठते कारणक्षण इत्यभिप्रायः, तर्हि कारणक्षणस्य क्षणद्वयसम्बन्धात् क्षणिकत्वहानिरित्यर्थः। तथा च सर्वभावानां क्षणिकत्वप्रतिज्ञोपरोध इति।।२१।।

प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात्।।२२।। अपि च निरोधत्रयादन्यत् सर्वं बुद्धिबाध्यं क्षणिकं संस्कृतं च, इत्यभ्युपेत्य त... ... ... (इतः परम् अत्रादर्शे जीर्णं पत्रमिति न प्रतिलिपीकर्त्तुं पारितो दशपङ्क्तिपरिमितो भागः।।) ... ...रन्वयविनाशः स्यादिति चेत्, मैवम्; अस्पष्टप्रत्यभिज्ञानस्वरूपेण क्वचिद् दृष्टेनान्वय्यविच्छेदेन तदनुमानोपपत्तेः। तत्रापि हि तत्तोयं तेजसा मार्तण्डमण्डलमम्बुदत्वमन्वीयत (?) इत्यनुमीयते; मृदादीनामन्वयिनामविच्छेददर्शनादिति।।२२।।

प्रतिसङ्ख्यानिरोधे दोषान्तराभ्युच्चयार्थमिदं सूत्रम्– *उभयथा च दोषात्*।।२३।। निगदव्याख्यातेन भाष्येण व्याख्यातमेतत्। सपरिकरादिति।। सम्यग् ज्ञानस्य परिकरः– यमनियमादि,

श्रवण मननादि च। *मार्गेति*।। मोक्षमार्ग:=वैनाशिकानां क्षणिकनैरात्म्यादिचतुर्विधभावना, तदुपदेशानर्थक्यप्रसङ्ग इत्यर्थ:।।२३।।

निरोधद्वयं निराकृत्याऽऽकाशं प्रत्याचष्टे–*आकाशे चाविशेषात्*।।२४।। आकाशेऽप्यविशिष्टं पूर्वोक्तं दूषणम्। कुत:? आवरणाभावरूपस्याकाशस्य निरोधद्वयान्त:पातित्वादित्यर्थ:। अवशिष्टं भाष्ये। यथा चाऽऽकाशं नावरणाभावरूपम्, किन्तु भावरूपम्, तथोपपादितमस्माभिरधस्तात् संभावनाभाष्यवार्तिके।।२४।।

अनुस्मृतेश्च।।२५।। अत्रापि ''तदप्राप्तिरि''ति प्रथमसूत्रादनुषज्यते। अनुस्मृतिरिति स्मरणं प्रत्यभिज्ञानं वोच्यते। तथा च स्मरणात् प्रत्यभिज्ञानाद्वा स्थाय्यात्मसिद्धेर्न क्षणिकनैरात्म्यवादस्य प्राप्तिरिति सूत्रार्थ:। स्मरणमेवानुभवपश्चाद्भावित्वादनुस्मृतिरिति पक्षमादाय सूत्रं व्याचष्टे–*अपि च वैनाशिक इति*।।

संप्रति प्रत्यभिज्ञानमेवानुस्मृतिरिति पक्षमादाय सूत्रं व्याचष्टे–*अपि च दर्शन-स्मरणयोरिति*।। ''अहमिदमद्राक्षम्'' ''अहमिदं पश्यामी''ति स्मरणयो: कर्तर्येकस्मिन् प्रत्यक्ष:=प्रत्यभिज्ञाप्रत्यय: सर्वस्य लोकस्य प्रसिद्ध इति भाष्ययोजना। प्रत्यभिज्ञाप्रत्ययस्तु–''योऽहमदोऽद्राक्षं सोऽहमिदं पश्यामी'' त्येवमाकारक:। ननु–दर्शन स्मरणकर्तृत्वेनाहमिति प्रतिभासमानयोरालयविज्ञानयोर्भिन्नयोरेव सादृश्यनिबन्धनो ज्वालायामिवैकत्वप्रतिभासो न कर्तुरैक्यं ज्ञापयितुमलमिति, नेत्याह–*यदि हि तयोरिति*।। तयो:=दर्शन-स्मरणयोरित्यर्थ:। *ततोऽहं स्मराम्यद्राक्षीदन्य इति प्रतीयादिति*।। एवं तर्हि ''अहमदोऽद्राक्षमि'' त्यस्य पूर्वापरिभूतदर्शन-स्मरणात्मकज्ञानद्वयरूपत्वेन परस्परसम्बन्धाभावात् ''अहमि''ति ''अदोऽद्राक्षीदि''ति च प्रतीयात् सर्वो लोक:, न तु–''अहमदोऽद्राक्षमि''ति परस्परमेकाहङ्कारसम्बद्धतयेत्यर्थ:। ओत्तमादुच्छ्वासात्=आ मरणादित्यर्थ:। ननु–उक्तं प्रत्यभिज्ञाने सर्वत्रैककर्तृत्वानुसन्धानमिति, तस्य क: परिहार इत्याशङ्कते–*स यदि ब्रूयादिति*।। स्थायिन: प्रतिसन्धातुरेकस्याभावे सादृश्यग्रहस्याप्यनुपपत्तेर्नानुसन्धानभ्रमसिद्धि; अन्यथाऽन्योन्याश्रयापत्तेरिति परिहरति–*तेनेदं सदृशमिति द्वयायत्तत्वात् सादृश्यस्येति*।। विषयेण विषयी लक्ष्यते; सदृशद्वयग्रहायत्तत्वात् सादृश्यग्रहस्येत्यर्थ:। ननु–एकस्यां सन्ततौ ''तेने''ति ''इदमि''ति ''सदृशमि''ति च विकल्पत्रयानन्तरं तद्वासनामात्रासञ्जितसंकलनात्मकं ''तेनेदं सदृशम्'' इति विकल्पप्रत्ययान्तरमात्रमुत्पद्यते, न तत्र पूर्वापरक्षणद्वयग्रहणापेक्षाऽस्ति। तत् कुत: एकस्यानेकदर्शिन: स्थिरस्य प्रसङ्ग:? इत्याशङ्कते–*तेनेदं सदृशमिति प्रत्ययान्तरमेवेदमिति*।। यद्वा–''तेनेदं सदृशम्''

इति नैकप्रत्ययेन पूर्वोत्तरक्षणद्वयग्रहणापेक्षा स्यात्। किं तर्हि? ''तेने'' ति ''इदमि''ति च प्रत्ययाभ्यां प्रत्ययान्तरमेवेदं सदृशमिति। न च पूर्वोत्तरक्षणद्वयसम्बन्धो भासते। तत् कथमनेकदर्शिन एकस्य स्थायिनोऽप्रसङ्गः? इत्याशङ्कते-*तेनेदं सदृशमिति प्रत्ययान्तरमेवेदमिति*।। मैवम्; तथा सति सदृशमित्येव तन्मूलाभिलापः स्यात्, न-''तेनेदं सदृशम्'' इति वाक्यप्रयोगः ; पदार्थत्रयसंसर्गप्रतीत्यधीनत्वात् तत्प्रयोगस्येति परिहरति-*तेनेदमिति भिन्नपदार्थोपादानादिति*।। ''तेनेदं सदृशमि'' ति वाक्यार्थे सादृश्याद् भिन्नयोरपि तेनेदमिति पदार्थयोरुपादानादित्यर्थः। संग्रहवाक्यं विभजते-*प्रत्ययान्तरमेव चेदिति*।। संव्यवहारस्य ''सिंहो देवदत्तः'' इतिवत् सादृश्यनिबन्धनत्वेन प्रत्यभिज्ञाजन्यत्वाभाव इति चेत्, नेत्याह-*न चायमिति*।।

अपि चात्मनि कदाचिदपि बहिर्विषयवत् तद्भावसन्देहादर्शनाद् न प्रत्यभिज्ञाभ्रान्तत्वं संभावयितुमपि शक्यत इत्याह-*भवेदपि कदाचिदिति*।। सूत्रार्थमुपसंहरति-*तस्मादपीति*।। निश्चिततद्भावोपलम्भापरनामधेयप्रत्यभिज्ञानादपीत्यर्थः।।२५।।

नासतोऽदृष्टत्वात्।।२६।। ''उत्तरोत्पादे च पूर्वनिरोधात्'' इत्यत्रोत्तरक्षणोत्पत्तिकाले पूर्वक्षणस्याभावग्रस्तत्वाद् न तयोः कार्य-कारणभाव इत्युक्तम्; तत्रोच्यते-नाभावग्रस्तत्वमस्मद्दर्शने कारणत्वविरोधि, किन्तु तदनुगुणमेव; ध्वंसादेव कारणात् कार्योत्पत्त्यभ्युपगमात्, तथा दर्शनात्। ध्वस्ताद्धि मृत्पिण्डबीजादेर्घटाङ्कुराद्युत्पत्तिर्दृश्यते। तदुक्तम्-''नानुपमृद्य प्रादुर्भावादि''ति।।

ननु-एवं तर्हि निरन्वयविनाशादेव कार्योत्पत्तिरभ्युपगता भवति, सत्यम्; को दोषः? न चैवमभावस्य सर्वत्र सुलभत्वात् सर्वत्र सर्वोत्पत्तिप्रसङ्गः ; ध्वंसस्य प्रतियोगिदेश एव विद्यमानत्वेन सर्वत्र सौलभ्याभावात्। एतेन-अभावत्वाविशेषात् सर्वत्र सर्वोत्पत्तिप्रसङ्ग इति-अपास्तम्; प्रतियोगिनाऽभावस्य विशेषितत्वेनाविशेषासिद्धेः, अन्यथा तवापि मते भावत्वाविशेषेण सर्वत्र सर्वोत्पत्तिप्रसङ्गो दुर्वारः स्यात्-इति, तत्रेदं सूत्रयति-*नासतोऽदृष्टत्वादिति*।। असतः=अभावाद् न भावोत्पत्तिर्युक्ता। कुतः? अदृष्टत्वात्। न ह्यसतो निरन्वयविनाशाद् भावोत्पत्तिर्दृश्यते; अन्वयिन एव मृद्धेम-बीजावयव-क्षीरावयवादेर्भावाद् घट-कटकाङ्कुर-दधिकार्यदर्शनात्, मृत्पिण्ड बीजादेर्निमित्तत्वेऽप्युपादानत्वाभावेनादृष्टान्तत्वात्। अपि चाभावस्य तुच्छत्वाविशेषात् सर्वाभावात् सर्वभावोत्पत्तिप्रसङ्गः। तत्रापि विशेषाभ्युपगमे वा भावत्वप्रसङ्गः। न च-अभावे विशेषान्तरासंभवेऽपि प्रतियोगिविशेषोऽस्तीति-वाच्यम्; विरोधित्वेन प्रतियोगिनस्तद्विशेषत्वानुपपत्तेः, घटत्व-पटत्वयोरिव विरुद्धत्व-विशेषत्वयोः परस्परात्यन्ताभावव्याप्तत्वेनैकत्रानवस्थानात्। अपि च विशेषो हि विशेषवतो

धर्मः। न च प्रतियोगी भावोऽभावस्य धर्मो भवितुमर्हति; अभावधर्मत्वेनाभावत्वप्रसङ्गात्, भावत्ववत्, भावधर्मकत्वेनाभावस्यापि घटादिवद् भावत्वप्रसङ्गाच्च। प्रमेयत्वादेरभावधर्मत्वेऽपि नाभावत्वं दृष्टम्, नापि तदाश्रयाभावस्य भावत्वमिति चेत्, न; धर्मविशेष एव तथा नियमोक्तेः। प्रमेयत्वादेः सामान्यधर्मत्वेन धर्मविशेषत्वाभावात् तत्र व्यभिचारोद्भावनस्यायुक्तत्वात्, अर्थान्तरोद्भावनेन निग्रहस्थानापत्तेः। न च प्रमेयत्वादिधर्मोऽप्यभावेऽस्ति; तस्य तुच्छत्वाभ्युपगमेन नरविषाणवत् तदधिकरणत्वानुपपत्तेः। तदिदमभिप्रेत्योक्तम्—*यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येतेत्यादि*।। एतेन—अभावस्योपादानकारणत्ववद् निमित्तकारणत्वमपि—प्रत्युक्तम्, इत्याह—*नाप्यभावः कस्यचिदिति*।। अभावस्योपादानकारणत्वे दोषान्तरमाह—*अभावाच्च भावोत्पत्ताविति*।। यद्वाअभावस्य विशेषवत्त्वमङ्गीकृत्यापि व्याप्तिविरोधेन हेतुत्वं दूषयति *नाप्यभाव इति*।। अप्रयोजकत्वमाशङ्क्य, विपेक्षे बाधकमाह—*अभावाच्चेति*।। पूर्वपक्ष्युक्तमनुभाष्य निराकरोति—*यदुक्तमित्यादिना*।। *अपि च चतुर्भ्यश्चित्त—चैत्ता उत्पद्यन्त इति*।। चत्वारो रूपिण उपादानस्कन्धाः पृथिव्यादयो गृह्यन्ते—यन्नामरूपमित्याचक्षत इति व्याख्यातमधस्तात्। निगदव्याख्यातमन्यत्।।२६।।

उदासीनानामपि चैवं सिद्धिः।।२७।। निगदमस्य भाष्यम्। अनेन सूत्रद्वयेन शून्यवादोऽप्यर्थाद् निराकृतो भवतीति द्रष्टव्यम्। तन्निराकरणार्थमेतदधिकरणान्तरं वा।।२७।। इति तृतीयं समुदायाधिकरणम्।।

इति वार्तिकम् समुदायाधिकरणम् समाप्तम्

प्रदीपः

समुदाय उभयहेतुकेऽपि तदप्राप्तिः।।१८।। एतावता प्रसङ्गेन साङ्ख्य वैशेषिकमतयोर्ब्रह्मकारणतावादिविरोधिनोर्निरासः कृतः, अचेतनकारणतावादो न सम्भवतीति। संप्रति तद्विरोधिसौगतमतनिराकरणार्थमधिकरणद्वयम्। तत्र प्रथमं सौत्रान्तिक वैभाषिकयोर्मतनिरासार्थम्, द्वितीयं तु विज्ञानवादनिराकरणार्थम्। सर्वशून्यवादिनां माध्यमिकानां ''चत्वारः प्रत्यया हेतुश्चालम्बनमनन्तरम्। तथवाधिपतेयं यत् प्रत्ययो नास्ति पञ्चमः।'' इति वैभाषिकादिमतनिरासपूर्वकं ''यस्मान्न हि स्वभावानां प्रत्ययादिषु विद्यते। अविद्यमाने स्वभावे परभावो न विद्यते।।'' इति स्वभाववाद एव कार्येष्विति स्वीकर्तृणां तु भावाकार्यतावादिनामजातकार्यवादिनां वा तत्कारणस्य कस्याप्यनङ्गीकारात्तु कारणस्वरूपविषयिणी विप्रतिपत्तिरेव न विषयीकर्तुं शक्नोतीति न तन्निराकरणार्थमधिकरणान्तरम्। क्षणिकत्वं तु कारणस्य कार्यस्य वाऽर्थक्रियाकारित्वलक्षणं कार्यकारणभावत्रादिनां सर्वेषामपि सम्मतमेव। इदमपि सर्वसम्मतमन्वयव्यतिरेकगम्यः कार्यकारणभाव इति; ''उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैषा धर्माणां धर्मते''ति वचनाच्च।।

इदमेवात्रालोचनीयम्–पञ्चस्कन्धसमुदायात्मकः संसारः कथं वाऽऽत्मानं लभेत विना संहन्तारं चेतनम्। अतः समुदायस्य पञ्चस्कन्धरूपस्य सौत्रान्तिक-वैभाषिकाभ्यामभिमतं परहेतुकत्वं न ब्रह्मवादानङ्गीकारे सम्भवतीति तन्मतनिराकरणमनेनाधिकरणेन क्रियते। एतदुपपादयिष्यन् पूर्वाधिकरणेन सङ्गतिं सूचयन् सौगतविभागं दर्शयति–*वैशेषिकसिद्धान्त इत्यादिना–सर्वशून्यत्ववादिन इत्यन्तेन*।। त्रय इति प्रकृताभिप्रायम्; कार्यकारणभावस्वीकारा-स्वीकारनिबन्धनमतभेदस्यैवात्र प्रस्तुतत्वात्। सर्वास्तित्ववादिनः विज्ञानानामर्थानां चास्तित्ववादिनः सौत्रान्तिकवैभाषिका इत्यर्थः ; हेतूपबन्धप्रत्ययोपबन्धांशेनार्थसत्त्वांशेन च तेषामवैषम्यात अर्थप्रत्यक्षत्वानुमेयत्वादिवैलक्षण्यस्य प्रकृतसन्दर्भानपेक्षितस्याकिञ्चित्करत्वादिति भावः। केचित्पदप्रयोगः पक्षद्वयानुवादेऽपि आलम्बनादिप्रत्ययनिबन्धनत्वस्य साकारविज्ञानेषु योगाचारैरपि

स्वीकारात् कार्यकारणभावस्वीकारांशे परतः कार्यवादे च सौत्रान्तिकादिभिः साकं साम्यसूचनाय, तन्मतसमालोचनस्यापि प्रकृतोपयोगसूचनाय च।।

अन्ये पुनरिति।। अत्र भिन्नपरेणान्यपदेन पुनः पदेन च तुशब्दसमानार्थेन पूर्वविच्छेदसूचकेन शून्यवादावतारः, तन्मते पूर्वोक्तरीत्या स्वभाववादस्वीकारात् सौत्रान्तिकादिमतविरोधिता, प्रकृते तदनुपयोगश्च सूच्यते। *सर्वशून्यत्ववादिनः इति*।। विज्ञानस्यार्थस्य च प्रतीत्यसमुत्पादस्य वस्तुगत्या शून्यरूपत्वमेव, निराकारकेवलसंविद्रूपत्वमेव वा सर्वदर्शनसंग्रहोक्तप्रकारेणेति ज्ञानस्य साकारस्येव सार्थकस्येव वा न सहेतुकत्वम्; तस्य सांवृतत्वादिति न तद्विचारस्य प्रकृतोपयोग इति त्वन्यदिति सूचनाथमन्येपदमिति भावः।।

अत्र प्रकृतोपयोगिनः सौगतान् सौत्रान्तिकवैभाषिकान् तन्मतप्रक्रियानुवादपूर्वं संगृह्णाति– *तत्रेति*।। साम्प्रतमिति शेषः। तेन ''नाभाव उपलब्धेरि'' त्यनेन योगाचारमतनिरासोऽपि न विरुद्ध इति भावः। सर्वास्तित्ववादिन इत्यत्र सर्वपदार्थमाह– *बाह्यमान्तरं चेति*।।

ननु–सर्वं बाह्यमान्तरं च न कार्यकोटौ प्रविष्टम्; स्कन्धताऽयोग्यानां निर्वाण निरोधद्वयाकाशानामसंस्कृतानामपि बाह्यान्तराणां सत्त्वादित्यत आह– *भूतं भौतिकं चित्तं चैत्तं चेति*।। भूतम्=वर्णसंस्थानरूपपृथिव्यपतेजोवायुधातवः, भौतिकम्=खरस्नेहोष्णेरणस्वभावाः, अभिधर्मकोशे तु ''स्प्रष्टव्यं द्विविधमि''ति श्लोकांशव्याख्यावसरे ''स्प्रष्टव्यं द्विप्रकारकं भौतिकमभौतिकं च। तत्र पृथिव्यादिचतुष्टयं भौतिकम्, खरादिचतुष्टयमभौतिकमित्युक्तम्। इदं तु पृथिव्याद्यवान्तरविभागभिप्रेत्य। चित्तम्=मनोधातुरात्मा वेत्यभिधर्मकोशे। तथा च संस्कृतानां भूत भौतिक–चित्त–चैत्तानां बाह्यान्तराणामेवात्र ग्रहणाद् न प्रकृतानुपयोगः। सामान्यतो निर्वाणकाशादीनामपि संग्रहणं तु वस्तुगत्याऽकाशासंस्कृतत्वादिसिद्धान्तस्य स्वरूपव्याक्रियैव पराक्रियेति नीत्या तदीयप्रक्रियाऽसाधुत्वसूचनार्थम्, यदर्थं सूत्रकारोऽपि–''आकाशे चाविशेषादि''ति विशिष्य प्रयतिष्यत इति मन्तव्यम्। *पृथिवीधात्वादय इति*।। आदिशब्देनापतेजोवायूनां ग्रहणम्। यथा च पृथिव्यादीनामिव वायोरपि रूपं वर्तते, तथाऽभिधर्मकोशे व्यक्तमिति वायोरपि धातुत्वं न विरुद्धम्; वर्णसंस्थानयोरेव धातुत्वाङ्गीकारात्। *रूपादय इति*।। आदिशब्देनोपात्तमहाभूतकः (१) (हस्तवागादीन्द्रियजः), (२) अनुपात्तमहाभूतकः (बाह्यमनुष्याकृतिनिर्माणपुरस्सरो हस्तवाक्शब्दः), (३) सत्त्वाख्यः (सत्त्वोऽयमिति ज्ञापकः) (४) असत्त्वाख्यः (असत्त्वानां वायु वनस्पत्यादीनां सन्तानैर्जातः) (५-८)। त इमे प्रत्येकं मनोज्ञामनोज्ञभेदेन भिन्ना इत्यष्टविधः शब्दः, मधुराम्ललवण–कटु–कषाय–तिक्तभेदेन षड्विधो रसः, पृथिव्यप्तेजोवायुस्पर्शाः, श्लक्ष्ण–मृदु–कर्कश–गुरुत्व–लघुत्व–शीत–बुभुक्षा–पिपासाश्चेत्येकादशात्मकः स्पर्शश्च गृह्यन्ते। तत्र रूप

शब्दयोर्व्याकृतत्वम्, अपरेषां पञ्चेन्द्रियाणां गन्ध–रस–स्पर्शानां चाव्याकृतत्वम्; ''अव्याकृता अष्टौ ते–रूप–शब्द–विवर्जिताः'' इत्यभिधर्मकोशात्। रूपादिधातवस्तु त्रिधा कुशलाकुशलोभयभेदेन। *चक्षुरादयश्चेति*।। ''रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञाप्तिरेव च।'' आदिशब्देनापरेषां चतुर्णामिन्द्रियाणां ग्रहणम्। एतेन–

''भूतानि पृथिवीधातुरप्तेजोवायुधातवः।
धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णतेरणाः।।
पृथिवी वर्णसंस्थानमुच्यते लोकसंज्ञया।
आपस्तेजश्च वायुस्तु धातुरेव तथापि च।।
इन्द्रियार्थास्त एवेष्टा दशायतनधातवः।''

इत्यभिधर्मकोशसंगृहीतो रूपस्कन्धो व्याख्यातः।।

''विक्षिप्ताचित्तकस्यापि यो नु बन्धः शुभाशुभः। महाभूतान्युपादाय च ह्यविज्ञप्तिरुच्यते।।''

इत्युक्ताविज्ञप्तिरपि रूपादय इत्यादिपदेन ग्रहीतव्येत्यनेन सूच्यते। *चित्तमिति*।। ''विज्ञानं प्रतिविज्ञप्तिरि''ति सूत्रितविज्ञानस्कन्धैकदेशमनोविज्ञानायतनं ''मन आयतनं च तत्'' इति सूत्रितं मनो वा, आत्मा वा। *चैत्तमिति*।। वेदना–संज्ञा–संस्काराः स्कन्धा ''धर्मायतनधात्वाख्या सहाविज्ञप्त्यसंस्कृतैरि''ति वर्णितधर्मधात्वेकदेशाः, विज्ञानस्कन्धश्च चैत्तमिति कथ्यते। तदेतदग्रे स्पष्टीकरिष्यते। एतत्प्रक्रियां सामान्यतोऽनूद्य प्रकृतविप्रतिपत्त्युपयोगिनमंशं संगृह्णाति–*चतुष्टये चेति*।। यद्यप्याकाशधातुरपि सर्वास्तित्ववादिभिः स्वीक्रियते; तथाप्यालोकरूपत्वं तमोरूपत्वं वा दिवारात्रिभेदेन तस्याङ्गीक्रियते, इति तस्य भूते भौतिके वा रूपस्कन्धे नान्तर्भावो मन्यत इति चतुष्टय इति वर्णितम्। तदुक्तम्–''छिद्रमाकाशधात्वाख्यमालोक–तमसी किले''ति।। *पृथिव्यादिपरमाणव इति*।। वर्णसंस्थानरूपाः। पृथिव्यादिधातव इत्यर्थः। तत्तद्वर्णसंस्थानरूपा धर्मा एव तत्तत्परमाणुशब्देनोच्यन्त इति भावः।।

ननु–सर्वेषां पृथिव्यादिधातूनां वर्णसंस्थानरूपत्वाविशेषत् कथं विशेषावगम इति–चेत्, स्वभावविशेषादित्याह– *खरस्नेहेति*।। पृथिवी खरस्वभावा, आपः स्नेहस्वभावाः, तेज उष्णस्वभावम्, वायुरीरणस्वभाव इति व्यवस्था। अत्र स्वभाव इति कर्मणोऽप्युपलक्षणम्। तदुक्तम्–''धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णतेरणाः''। इति।।

तत्रायं विभागः–पृथिवी धृतिकर्मिका। एतेन पृथिवीचलस्वभावतावादो निरस्यते। आपः संग्रहकर्मिकाः, समूहापादानकर्मिका इति यावत्, तेजः पक्तिक्रियम्, वायुर्व्यूहनकर्म-इति। एतैर्धृत्यादिभिः कर्मभिः पृथिव्यादीनां खरादिस्वभावानां सिद्धिरिति भावः। *पृथिव्यादिभावेन*।। खर-स्नेहादिस्वभावविशिष्टपृथिव्यादिरूपेणेत्यर्थः। तथा च केवलं पृथिव्यादिधातूनां कारणत्वं खरादिस्वभावानां च तेषां सहंतानां कार्यत्वमिति फलितम्। सङ्घातोऽयं किंनिबन्धन इति तु चर्चायां तत्तद्धृत्यादिकर्माधीन इति पूर्वोक्तप्रकारेण सिद्धमेव। तच्च कर्म पृथिव्यादिधातुषु स्वाभाविकमिति तेन स्वयं संहननं भवति। तथा च चेतनब्रह्माधीनं पृथिव्यादिकार्यजातमिति ब्रह्मकारणतावादविरोधिनः सर्वेऽपि सर्वास्तित्ववादिन इति तन्निराकरणार्था प्रवृत्तिरियं सूत्रकाराणामुपपन्नैव।।

भूत भौतिकसङ्घातमिव चित्त–चैत्तसङ्घातानामपि वेदना–संज्ञा–संस्कार–विज्ञानस्कन्धानां सङ्घातं तन्मतसिद्धमनुवदति– *तथेति*।। *रूप–विज्ञान–वेदना–संज्ञा–संस्कारस्कन्धा इति*।। अत्र रूपस्कन्ध इति दृष्टान्तार्थम्। तेन न पौनरुक्तयम्। रूप–विज्ञानेत्यादिस्कन्धस्वरूपमात्राभिप्रायेण, न तु क्रमाभिप्रायेणापि। क्रमस्तु तेषाम्–वेदना–संज्ञा–संस्कार–विज्ञानस्कन्धा इत्यभिधर्मकोशे व्यक्तम्। *अध्यात्मम्*।। चैत्तमित्यर्थः। सर्वव्यवहारास्पदभावेन उपाख्यत्वेन। *संहन्यन्त इति*।। स्कन्धरूपतां प्राप्नुवन्तीत्यर्थः। उपाख्यत्वमेव स्कन्धत्वमिति यावत्।।

अत एव–''स्कन्धेष्वसंस्कृतं नोक्तमर्थायोगादि'' त्यभिधर्मकोशेऽसंस्कृतानामाकाश प्रतिसङ्ख्यानिरोधाप्रतिसङ्ख्यानिरोध मार्गसत्याख्यनिर्वाणानां निरुपाख्यत्वेन स्कन्धानन्तर्भावः प्रतिपादित उपपद्यते। एतेन–''प्रतिसङ्ख्याप्रतिसङ्ख्ये''ति सूत्रविवरणावसरगतः ''त्रयमपि चैतदवस्त्वभावमात्रं निरुपाख्यमिति मन्यते'' इत्यनुवादोऽपि भाष्यकाराणां व्याख्यातः।।

तदयं निष्कर्षः–पञ्च रूपादिस्कन्धाः, अस्कन्धाश्चाकाश–निरोधद्वय–निर्वाणानि चेति सर्वास्तित्ववादिनां पदार्थाः। तत्र भूत–भौतिकादिस्कन्धाः समुदायरूपाः सोपाख्याः, अन्ये च निरुपाख्या अकार्या असंस्कृता वा। तत्राकाशादीनामसंसकृतानामङ्गीकारादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधः, सङ्घातानामचेतनेतरेतरहेतुत्वाङ्गीकाराद् ब्रह्मकारणतायाः श्रुत्यवगताया विरोध इति नोभयमपि सर्वास्तित्ववादिनां समादरणीयमित्यभिप्रायेण तन्मतानुसारेणात्र पूर्वपक्षोऽनूद्यत इति।।

अत्रोभयहेतुकः समुदायः सर्वास्तित्ववादिभिरेव मन्यते, इति समुदाय उभयहेतुकेऽपीत्यंशेन पूर्वपक्षानुवादः। अपिशब्देन समुच्चयः समुदायद्वयस्य। तेन पञ्चस्कन्ध्याः परामर्शोऽर्थसिद्धो भवति।

तदेवं पूर्वपक्षनिष्कर्षः। अत्रापिशब्दस्य समुदायेऽपीति न सम्बन्धः, किन्तूभयहेतुकेऽपीति। तेन पृथिव्यादिधातुषु परमाणुपदाभिधेयेषु प्रतिसङ्ख्यानिरोधादौ च मात्र विरोधः प्रतिपाद्यते; प्रकृतमुख्यसमन्वयाविरोधित्वात्। यत्तूत्तरत्र–प्रतिसङ्ख्यानिरोधादिपदार्थानामपि तदभिमतानां निरसनम्, तदिदं सूत्रकारैरनुषङ्गतः साङ्ख्यमतनिरासावसरे वैशेषिकमतनिरासावसरे च ''विप्रतिषेधाच्चासमञ्जसम्'' ''अपरिग्रहाच्चात्यन्तमनपेक्षे''ति तत्तत्प्रक्रियान्तरायोगस्यापि व्यवस्थापनात् अत्रापि सैव नीतिरवलम्बनीयेति कृत्वैव। *अणुहेतुकः*।। पृथिव्यादिधातुहेतुकः। भूतभौतिकसंहतिः=रूपादिप्रत्येकस्कन्धः। सङ्घातो नामास्मिन् मते धर्मबहुत्वमेव, धर्मबहुत्वमेव, धर्मव्यतिरेकेण धर्म्यनङ्गीकारात्। अत एवोक्तम्–''ते पुनः संस्कृता धर्मा रूपादिस्कन्धपञ्चकम्'' इति।।

पूर्वपक्षनिरासार्थं तदप्राप्तिरिति पदं व्याचष्टे–*तदप्राप्तिरिति*।। *समुदायभावानुपपत्तिरिति*।। एकस्मिन् शरीरे बहूनां धर्माणां समवस्थानमेव समुदायापत्तिरित्यर्थः। समुदायाप्राप्तौ हेतुं सूत्रकारानिर्दिष्टमपि बहुशः पूर्वाधिकरणादिषु सूचितत्वात् स्वयमनुषज्याध्याहृत्य वा निर्दिशति–*समुदायिनामिति*।। प्रत्येकधातूनां प्रत्येकस्कन्धानां वेत्यर्थः। चित्तस्य चेतनस्य संहन्तृत्वशङ्कां निराचष्टे–*चित्ताभिज्वलनस्येति*।। मनोविज्ञानस्यापि समुदायरूपत्वात् स्वतोऽसिद्धत्वेन संहन्तृत्वासम्भवादित्यर्थः। ननु–मनोविज्ञानधातोरालम्बनं ''षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः'' इति प्रमाणसिद्धपूर्वोत्तरकालीनंसजातीयसंस्कारविशेषाख्यमेव तर्हि संहन्तृ भवत्विति शङ्कायामाह–*अन्यस्य चेति*।। पूर्वोक्तस्य मनआयतनस्येत्यर्थः। *चेतनस्येत्यादि*।। संस्कारस्यापि मनः शब्दवाच्यस्याचेतनत्वादित्यर्थः। तस्यैव चेतनत्वमप्यङ्गीक्रियत इति वादेऽपि न संहन्तृत्वमित्याह–*स्थिरस्येति*।। *अनभ्युपगमादिति च*।। क्षणिकत्वाभ्युपगमादिति भावः। तदेव विशदयति–*आशयस्येत्यादिना*।। पूर्वकालीनं मन एवाशयः, आलयविज्ञानं वेति भावः।।१८।।

ननु–रचनानुपपत्तिन्यायेनैव गतार्थत्वात् किमनेनाधिकरणेनेति शङ्कायामधिकाशङ्कासत्त्वात् तद्वारणार्थमिदमधिकरणमिति वक्तुमधिकाशङ्कामनूद्य परिहरति सूत्रकारः–*इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वादिति*।।१९।। इतरेतरप्रत्ययत्वात्=इतरस्येतरस्य कारणत्वात्, पूर्वपूर्वस्योत्तरोत्तरकारणत्वात्, अविद्यादीनां सङ्घातनिमित्तत्वम्, संघातस्याविद्यादिनिमित्तत्वमितीतरेतरस्य परस्परस्य निमित्तत्वादिति व्याख्यातं भवति। तत्र प्रथमं विवरणमार्यशालिस्तम्बसूत्रानुसारि। तदेतदाह–*तथाप्यविद्यादीनामित्यादिना–उपपन्नः सङ्घात इत्यन्तेन*।। अविद्यादिपदानन्तरं प्रत्येकमविद्याप्रत्ययः, संस्कारप्रत्यय इत्येवं प्रत्ययान्तोऽपि हेतुत्वेन विवक्षणीय इत्यभिप्रायेणाह–

दुर्मनस्तेत्येवञ्जातीयका इति।। अविद्याप्रत्ययादयो दुर्मनस्ताप्रत्ययान्ता अपीति भावः। क्वचित्= माध्यमिककारिकावृत्तौ चन्द्रकीर्तिकृतौ संक्षिप्ताः प्रतिपादिताः। क्वचित् प्रपञ्चिताः– आर्यशालिस्तम्बसूत्रे विस्तृताः। "अविद्याया निरोधस्तु ज्ञानेनैवास्य भावनात्" इति कारिकाव्याख्यायामाध्यात्मिकहेतूपनिबन्धादिकं संगृहीतम्। बाह्यप्रीतत्यसमुत्पादस्य हेतूपनिबन्धादिकं तु शालिस्तम्बसूत्रे व्यक्तम्। सर्वं चैतद् भामत्यां यथावत्संगृहीतमविद्यादिस्वरूपनिरूपणपूर्वकम्। वार्तिकेऽप्येतद् विस्तृतमिति नेह विस्तार्यते। उत्पत्तिमात्रनिमित्तत्वात्=हेतूपनिबन्धनमात्रसिद्धेरित्यर्थः। तथा च प्रत्ययस्य सङ्घातस्यैवासिद्धया प्रत्ययोपनिबन्धनोऽपि प्रतीत्यसमुत्पादः सौगतैरपि निरूपयितुं न शक्यते; तन्मतेऽवयवातिरिक्तसमुदायस्यानङ्गीकाराच्चेति भावः। तदेतदाह *भवेदुपपन्न इत्यादिना–संभवतीत्यन्तेन*।। अर्थाक्षिप्तः सङ्घात इति शङ्कामनूद्य परिहरति–*नन्वित्यादिना संभवेदित्यन्तेन*।। द्वितीयं विवरणमितरेतरप्रत्ययत्वादित्यस्याभिप्रेत्याशङ्कामनूद्य परिहरति–*अथायमित्यादिना*।। वस्तुतस्तु नायं प्रकारः परस्परनिमित्तकत्वरूपः सौगतानामपि सम्मतः ; तदीयशालिस्तम्बादौ तथाऽदर्शनात्। अथाविद्यादीनां संस्कारादिनिमित्तत्वमेव, सङ्घातानामनादीनां सङ्घातान्तरनिमित्तत्वमिति न दोष इति शङ्कते–*अथ मन्यस इत्यादिना*।। अभ्युपेत्यापि सङ्घातानादितां तत्र दूषणमाह–*तदाऽपीत्यादिना*।। *अभ्युपगमविरुद्धमिति*।। तथा च सङ्घातानादितापक्षोऽपि न युक्त इति भावः। एतेन–उत्पत्तिमात्रनिमित्तत्वादिति सूत्रानुसारिणौ नेमौ शङ्कापरिहारौ, किन्तूत्सूत्राविति शङ्काऽपि–परास्ता; सङ्घातनिराकरण एवोक्तग्रन्थस्यापि तात्पर्यात्। "सङ्घातपरार्थत्वादि"ति साङ्ख्यसिद्धान्तानुसारेण सौगतैरपि संघातप्रयोजनं भोक्तुरात्मनो भोग एवेति वक्तव्यम्। तत्र रूपादिस्कन्धसंघातो भोक्तृभोगार्थो न भवति; भोक्तुः सौगतमतेऽस्थिरत्वादिति निष्प्रयोजनत्वादपि सङ्घातासिद्धिरित्याह–*अपि चेत्यादिना*।। तथा च सङ्घातासिद्धया प्रत्ययोपनिबन्धतः प्रतीत्यसमुत्पादस्यासिद्धया तस्य हेतूपनिबन्धनमात्रस्य सिद्धौ युक्तमुक्तमुत्पत्तिमात्रनिमित्तत्वादिति भावः। तदिदमाह–*तस्मादिति*।। *यदि भवेदिति*।। तथा चोत्पत्तिमात्रनिमित्तत्वमप्यभ्युपगमवादेनैव; अचेतनकारणतावादायोगेनाविद्यादीनां हेतूपनिबन्धतोऽप्यसिद्धिरिति तु वस्तुगतिरिति भावः। भोक्तुरभावादित्युपलक्षणम्, संहन्तुरपीति पूर्वमेव सूचितम्।।१९।।

उत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेत्, भवतु नामेत्युक्त्या परमार्थतस्तदपि न संभवतीति यत् सूचितम्, तदेव विशदयति सूत्रकारः–*उत्तरोत्पादे च पूर्वनिरोधादिति*।।२०।। पूर्वपूर्वस्याविद्यादीनां क्षणिकत्वेन कार्यक्षणानवस्थायित्वेन चोत्तरोत्तरहेतुत्वस्यायोग इति सूत्रार्थः।

तदेतदाह- *न चैवमित्यादिना*।। -*अभावग्रस्तत्वादिति*।। कार्यक्षणानवस्थानादिति भावः। न ह्यन्यथा क्षणिकत्वनिर्वाह इति तु तत्त्वम्। तदिदमाह- *अथेत्यादिना-क्षणभङ्गाभ्युपगमत्यागप्रसङ्ग इत्यन्तेन*।।

अयं भावः-सौगता हि भावानां प्रतिसंङ्ख्यानिरोधमप्रतिसंङ्ख्यानिरोधं च मन्यन्ते। तत्र "प्रतिसंङ्ख्यानिरोधो यो विसंयोगः पृथक् पृथक्" इति प्रज्ञया हेतुभूतया प्रत्येकतोऽविद्यादिनिरोधः, येन हेतूपनिबन्ध एव प्रतिबद्धो भवतीति मार्गसत्यमाविष्कृतं भवति। तदिदमभिप्रेत्य वर्णयिष्यति भाष्यकारः-"बुद्धिपूर्वकः किल विनाशो भावानां प्रतिसङ्ख्यानिरोधो नाम भाष्यते" इति। अप्रतिसङ्ख्यानिरोधस्तु "उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसङ्ख्यया" इत्यभिधर्मकोशात्, एकस्मिन् हि रूपे यदा चक्षुर्मनश्च प्रसक्ते, तदा शब्दस्पर्शगन्धादयोऽन्यैरगृहीता एव प्रत्युत्पन्ना अतीतं निरोधगतिं यन्ति; एकस्मिन् समयेऽनेकविज्ञानोत्पादस्यासम्भवात् सत्स्वपि श्रोत्रादिषु न शब्दादीनां प्रतिसङ्ख्यानम्। इत्थमप्रतिसङ्ख्याय=अपरिज्ञायैव तेषां निरोध एव, येन स्वरूपत उत्पन्ना एव निरुद्धाः क्षणिकत्वं प्राप्नुवन्ति। तथा चाप्रतिसङ्ख्यानिरोधोऽयं जातमात्रस्य क्षणिकत्वमापादयति, इति युक्तमुक्तमुत्तरोत्पादे च पूर्वनिरोधादिति। एतौ चोत्पादनिरोधौ वस्तुनः स्वरूपमेवेति हि सौगतसमयः, अन्यथा तु क्षणिकत्वहानिः। तयोर्वस्तुस्वरूपत्वमपि न युक्तम्, घटो जायते, नश्यतीति प्रयोगायोगात्, सर्वेषां पर्यायत्वापत्तेरिति त्वन्यदेतत्। सर्वथा त्वविद्यादीनामुत्पत्तिमात्रनिमित्तत्वमपि बाधितमेवेति। तदिदं सर्वमभिप्रेत्याह- *अपि चेति*।। ननु-पूर्वोद्धृताभिधर्मकोशग्रन्थतो विज्ञान-तदभावयो रेवोत्पादनिरोधरूपत्वाङ्गीकाराद् न वस्तुस्वरूपे उत्पादनिरोधाविति पक्षेऽविद्यादीनां क्षणिकानां पूर्वसूत्रविवरणाव सरोक्तरीत्याऽनादित्वाभ्युपगमाद् नाविद्यादीनां क्षणिकानां स्वरूपतो भावो बाधितः, उत्पादनिरोधौ तु दर्शन-तदभावौ प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाभावदशाम्, तत्सत्त्वदशां चादाय निर्वोढुं पार्येते, इति न दोष इत्याशङ्कते- *यदि चेति*।। यद्येवम्, तर्हि वस्तुनोऽनिरुद्धत्वात् शाश्वतत्वापत्त्या सौगतानां क्षणिकत्वसिद्धान्तभङ्गापत्तिरिति परिहरति- *एवमपीति*।। तथा च-शाश्वतत्वापत्ति- वारणार्थमुत्पादनिरोधयोर्वस्तुधर्मत्वे स्वीक्रियमाणेऽविद्यादीनामुत्पत्तिमात्रनिमित्तत्वमेव, इति समुदायस्यैवासिद्धया प्रत्ययोपनिबन्धतः पञ्चस्कन्धीसिद्धिरसम्भवदुक्तिकैव।।२०।।

अत्रेदं तत्त्वम्-सौगतसमये हि प्रतीत्यसमुत्पादः शून्य इति माध्यमिका मन्यन्ते; "यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्षते" इति माध्यमिकवचनात् एतन्मते हि निर्हेतुक एव प्रतीत्यसमुत्पादः, न हेतूपनिबन्धतः, प्रत्ययोपनिबन्धतश्च। अन्ये तु परप्रत्यय एव प्रतीत्यसमुत्पाद

इति मन्यन्ते। स हेतुरालम्बनादिप्रत्ययश्चतुर्विधः, अविद्यादिस्तत्समुदायो वेति मतभेदस्त्ववान्तरोऽपि तत्र वर्तत एव। तत्र सर्वशून्यत्ववादिनां सौगतविशेषाणां मतं 'वयं पञ्चोत्तरं शत' मिति नीत्या यदि सर्वास्तित्ववादिनो विज्ञानमात्रास्तित्ववादिनो वा स्वीकुर्वन्ति, तर्हि स्वस्वरूपहानिः। इयान् विशेषः–यत् सर्वशून्यवादिनां स्वयूथ्यानां मतप्रवेशे सौत्रान्तिकानां सर्वात्मना हानिः ; प्रतिसङ्ख्यानिरोधादीनां सर्वेषां मार्गादीनामपि बाधात्, अद्वैतमतप्रवेशे तु न निर्हेतुकफलोत्पत्तिरिति "सर्वनाशे समुत्पन्नेऽर्ध त्यजति पण्डित" इति न्यायेनाद्वैतमतप्रवेश एव श्रेयानित्यभिप्रायेणाह सूत्रकारः–*असति प्रतिज्ञोपरोधो यौगपद्यमन्यथेति*।।२१।। अत्र असति प्रतिज्ञोपरोध इति सर्वशून्यवादाङ्गीकारे दूषणपरम्, योगपद्यमन्यथेति तु तस्यापि निरासपरमिति विभागः। एतेन–सौत्रान्तिकादिमतमिव सर्वशून्यतावादः सूत्रकारैर्न निरस्त इति भगवत्पादानां शून्यवादानादरणीयतावचनमुत्सूत्रमिति शङ्का–परास्ता; यौगपद्यमन्यथेत्यंशेन तस्यापि निराकरणात्। एतावत्त्ववश्यमेव मन्तव्यम्–यत् सूत्रकारैः सर्वास्तित्वविज्ञानमात्रास्तित्ववादयोरिव विशेषतः प्रयत्नो नादृत इति। इदमेवाभिप्रेत्य भगवत्पादाः "क्षणिकत्वाच्च" इति सूत्रविवरणावसरे "शून्यवादिपक्षस्तु सर्वप्रमाणविरुद्ध इति तन्निराकरणाय नादरः क्रियते" इति वर्णयन्ति, न तु सर्वात्मना तन्निरासस्यासौत्रत्वमपि। तदिदं सर्वमभिप्रेत्याह–*अथासत्येवेत्यादि*।। *निर्हेतुकायां चेति*।। सर्वशून्यवाद्यभ्युपगतायामिति शेषः। तदुक्तं माध्यमिकैः–

"न हि स्वभावो भावानां प्रत्ययादिषु विद्यते।
अविद्यमाने स्वभावे परभावो न विद्यते।।
भावानां निःस्वभावत्त्वाद् न सत्ता विद्यते यतः।
सतीदमस्मिन् भवतीत्येतन्नैवोपपद्यते।।

न च व्यस्तसमस्तेषु प्रत्ययेष्वस्ति तत्फलम्।
प्रत्ययेभ्यः कथं तच्च भवेन्न प्रत्ययेषु यत्।।
पटः कारणतः सिद्धः सिद्धं कारणमन्यतः।
सिद्धिर्यस्य स्वतो नास्ति तदन्यद् जनयेत् कथम्।।"

इति। क्षणिकत्वेऽपि प्रत्ययानां कार्यक्षणं यावदस्तित्वमङ्गीक्रियत इत्यभिप्रायेण शङ्कते–*अथेति*।। प्रतिज्ञाविरोधापत्त्या शङ्कामिमां परिहरति–*तथापीति*।। तथा च निर्हेतुकत्वे

भावानां सहेतुकत्वप्रतिज्ञाविरोधः, योगपद्यं च। अन्यथा सहेतुकत्वे भावानां कार्यकारणयोरेकक्षणावस्थानापत्तिः, एवमपि प्रतिज्ञाविरोध इति योजनान्तरं सूत्रस्य विवक्षितमिति भावः। *सर्वं संस्कारा इति*।। असंस्कृतनिरोधद्वयाकाशत्र्यतिरिक्ताः सर्वे भावा इत्यर्थः।।२१।।

तदेवं येषां प्रतीत्यसमुत्पादस्य प्रत्ययनिमित्तत्वम्, तेषां ब्रह्मकारणवादानङ्गीकारे नोपपत्तिरिति प्रतिपादितम्, तावतैव ब्रह्मणि समन्वयविरोधः परिहृत एव। सांप्रतं तु सार्वास्तित्ववाद्यभ्युपगतप्रक्रियान्तराणामप्ययोगं साङ्ख्यादिदर्शननिरसनावसरे तदीयप्रक्रिया-विशेषाणामनादरणमिव सूत्रयन् सूत्रकारोऽत्यन्तमनपेक्षां सर्वास्तित्ववादस्य प्रतिपादयति- *प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदादिति*।।२२।। बुद्धिबोध्यं स्कन्धउत्पादविनाश-शालीत्यर्थः। तदुक्तमभिधर्मकोशे-''त्रिविधं चाप्यसंस्कृतम्-आकाशं द्वौ निरोधौ चे'' ति। ''स्कन्धे त्वसंस्कृतं नोक्तमर्थायोगादि''ति च। अनेन च विशदमवगम्यते-निरोधद्वयस्याकाशस्य च न स्कन्धकौटौ प्रवेशः, न वोत्पादविनाशशालित्वम्, सोपाख्यत्वं वेति। तदिदमाह- *तदपि चेति*।। अवस्तु=स्कन्धाद् बाह्यम्। *अभावमात्रमिति*।।

आकाशस्यापि ''तत्राकाशमनावृतिः'' इत्यावरणाभावरूपत्वाङ्गोकाराद् अभावरूपत्वेन त्रयस्याप्यभावरूपत्वमक्षतम्। यद्यप्यभिधर्मकोशे-''छिद्रमाकाशधात्वाख्यमालोक-तमसी किल''। इति प्रकाशरूपत्वं तमोरूपत्वं वाऽऽकाशस्य प्रतिपादितम्; तथापि तदेकदेशमतेनेति न दोषः। आकाशधातुस्त्वयं वर्णसंस्थानानात्मकत्वात् पृथिव्यप्तेजोवायुधातुप्रसङ्गे न संगृहीतः। अत एव-प्रत्ययोपनिबन्धतः प्रतीत्यसमुत्पाद आकाशधातुरवकाशं छिद्रं च जनयतीति सर्वास्तित्ववादिनां सिद्धान्त उपपद्यते। अभावरूपत्वं चैतेषां हेतुप्रत्ययोपनिबन्धनिबन्धनप्रतीत्यसमुत्पादत्वाभावात्। अत एव निरुपाख्यत्वमपीत्याह- *निरुपाख्यामिति*।। प्रतिसंख्यानिरोधपदं व्याचष्टे- *बुद्धिपूर्वक इति*।। प्रज्ञया विरोध इत्यर्थः। अधिकमभिधर्मकोशे। *तद्विपरीत इति*।। विना प्रज्ञामित्यर्थः। अपरिज्ञाय निरोध इति यावत्। अधिकमभिधर्मकोशे। *आवरणाभावमात्रमिति*।। ''तत्राकाशमनावृतिरि''ति वचनादिति भावः। *आकाशमिति*।। असंस्कृताकाशमित्यर्थः। निरोधद्वयासम्भवहेतुमविच्छेदं व्याचष्टे- *एतौ हीत्यादिना*।। प्रतिसंख्यानिरोधो हि सास्रवाणां धर्माणां पृथक् पृथक् प्रज्ञानिमित्तो वियोग इति ''प्रतिसङ्ख्यानिरोधो यो विसंयोगः पृथक् पृथक्।'' इति वचनादवगम्यते। स च सन्तानिगोचर एव, न सन्तानगोचर इत्येव सौगतानां सिद्धान्तः, इति सन्तानगोचरौ निरोधावित्यनभ्युपगमपराहतमित्यभिप्रायेण सन्तानगोचरत्वपक्षं निराचष्टे- *न तावदित्यादिना*।। द्वितीयं पक्षमनूद्य परिहरति- *नापीति*।। *भावगोचरौ सम्भवत इति*।। द्वावपि निरोधौ सन्तानिगोचरौ

न भवत इत्यर्थः। कुत इति चेत्, अप्रतिसङ्ख्यानिरोधे निरन्वयविनाशानङ्गीकारेण तदसंभवः, प्रतिसङ्ख्यानिरोधेऽप्यनुमानाद् निरन्वयविनाशासम्भवसाधनेन तदसंभव इति मन्तव्यम्। तदेतदाह– *न हि भावानामिति*।। अप्रतिसङ्ख्यानिरोधस्थल इति शेषः। प्रतिसङ्ख्यानिरोधेऽपि निरन्वयविनाशासम्भवं साधयति– *अस्पष्टप्रत्यभिज्ञानास्वप्यवस्थास्विति*।। निर्वाणसाधनावस्थास्वित्यर्थः। अनिमित्तनास्रवसमाध्यवस्थाविषयत्वाद् अप्रतिसङ्ख्यानिन्धस्य। तदुक्तम्– अनिमित्ताः शमाकाराः। शुद्धका अमलाश्चैते। अमला मोक्षमुखं त्रिधा। शून्यताऽशून्यतेत्यद्विन्यत् समाधित्रयं पुनः अनिमित्तानिमित्तस्तु शान्ततः। अनिमित्तानिमित्तसमाधेर्विषयः अप्रतिसङ्ख्यानिरोध इति। तस्याप्रतिसङ्ख्यानिरोधस्य मोक्षद्वारस्य साधानावस्थायां विद्यमानस्य निरास्रवसमाधिरूपस्यापि निरन्वयविनाशकत्वमास्रवाणामङ्गीकर्तुं न शक्यते; अन्यथोक्तसमाधिस्थानामाहारादिव्यवहारानुपपत्तेः। अधिकमभिधर्मकोशान्तर्गतध्यानकोशादौ व्यक्तम्। तदिदं सर्वमभिप्रेत्याह– *तस्मादिति*।।

ननु–अद्वैतिनां मतेऽप्यविद्यानिरोधोऽयमात्यन्तिको निरन्वयविनाशः स्वीक्रियत इति कथं प्रतिसङ्ख्यानिरोधस्य निरन्वयविनाशस्यासम्भव इत्यत आह– *परपारकल्पितस्येति*।। असंस्कृतत्वेन परकल्पितस्येत्यर्थः। अद्वैतमते चास्रवाणां कार्यकोटिप्रविष्टत्वादविद्याप्रयुक्तत्वाद्वा ब्रह्मज्ञानेनाविद्यानिवृत्तौ निरन्वयविनाशः, संभवति, नैवं परमत इति विशेषाद् न दोषसाम्यमिति भावः। *अनुपपत्तिरिति*।। उपपत्त्यभावः। यद्यपि परेषां प्रतिसङ्ख्यानिरोधो निरन्वयविनाशरूप एव संमतः, तथापि न तदभ्युपगमोऽयमुपपन्नः, क्षोदक्षमो वा। निरोधद्वयस्येति द्वयस्याप्येकपदेनोपादानमेकस्य दृष्टान्तविधयाऽपरस्य दार्ष्टान्तिकविधया चेति मन्तव्यम्।।

एतेन–प्रतिसङ्ख्यानिरोधेऽपि निरन्वयविनाशाभावमापाद्य तदसम्भवसाधनेन दूषणमिदमनुक्तोपालम्भनमिति शङ्कापि–परास्ता; निर्हेतुनिरन्वयविनाशाङ्गीकारायोगात्। यद्यपि प्रतिसङ्ख्यानिरोधोऽपि प्रज्ञानिमित्तकत्वात् सहेतुरिव प्रतिभाति, तथाऽपि सौगतनये तस्यासंस्कृतत्वाङ्गीकाराद् न सहेतुकत्वमूरीक्रियत इति न निर्हेतुकनिरन्वयविनाशसंभव इति तदनुपपत्तिरिति निगूढो भावः। तमिमं विशदयति सूत्रकारः–*उभयथा च दोषादिति*।।२३।। *निर्हेतुकविनाशाभ्युपगमहानिप्रसङ्ग इति*।। प्रतिसंख्यानिरोधोऽयमसंस्कृतो न हेतुप्रत्ययोपनिबन्धाधीन इति सौगताभ्युपगमहानिप्रसक्तिरित्यर्थः। सम्यग्ज्ञाननिमित्तकोऽसंस्कृतश्चेति व्याहतमिति यावत्। तदेवं निरोधप्रक्रियामादाय सौगतसमयासामञ्जस्य पर्यवसन्नमुपसंहरति–*एवमुभयथाऽपीति*।। इदं दर्शनमिति*।। कार्य–कारणभावविषयातिरिक्तनिरोधद्वयप्रक्रियामादायापीति शेषः।।२३।।

एतावता प्रसङ्गेनासंस्कृतेषु त्रिषु निरोधद्वयपरीक्षा संवृत्ता, साम्प्रतमाकाशपरीक्षयाऽपि

तदसामञ्जस्यं साधयितुं तत्परीक्षामातनुते सूत्रकारः- *आकाशे चाविशेषादिति*।।२४।। आकाशं हि सोगताभिमतमनावरणं नित्यं च; ''नित्या धर्मा असंस्कृताः'' इति वचनात्। तस्य चोपयोगो न व्यवहारकाल एव, किन्तु समाधौ मुक्तावारूप्यधातुसंज्ञके च। अत एवारूप्यगस्यानागमित्वम्, ऋद्धिनामकसमाधिस्थानामूर्ध्वगमनं चाभिधर्मकोशादौ व्यक्तम्। इदमत्र सूत्रकारा मन्यन्ते- यदाकाशस्यापि भावरूपत्वमेव स्वीकर्तव्यम्, नावरणाभावरूपत्वम्; अविशेषात्=सहेतुकत्वाविशेषादिति। तदिदमाह- *आकाशे चेति*।। ननु-आगमप्रमाणसिद्धत्वादाकाशस्यानावरणस्वभावस्यासंस्कृतत्वं नित्यत्वं च स्वीक्रियत इति न संस्कृतभावरूपत्वमिति, अत आह- *आगमप्रमाण्यात्तावदिति*।। तथा चोक्तश्रुतिविरुद्धत्वात् सोगतागमस्य न व्यवस्थापकत्वम्। अत्रागमपदप्रयोगेण बौद्धागमवदेव वेदस्यापि प्रामाण्यं समानयोगक्षेमं स्वीकृत्यैवाकाशनित्यता निरस्यत इति ज्ञाप्यते। तथा च ''स्मृत्यनवकाशदोषप्रसङ्ग'' इति न्यायेनागममात्रगम्यमानताऽऽकाशानावरणरूपत्वादेर्न युक्तेति प्रतिपाद्यते, यद्यागमप्रामाण्येन सौगतैराकाशस्य तदीयस्य साधनं क्रियेतेति भावः। ननु-न वयमागममात्रेणोक्तरूपमाकाशं प्रमाणयामः, किन्त्वनुमानेनापि। तथा च स्वतन्त्रयुक्तिविरोधो यावद् न प्रदर्श्यते, तावदाकाशभारूपता न साधयितुं शक्यत इति-चेत्, शब्दो गुणः, साश्रयः, गुणत्वात्; गन्धादिवदित्यनुमानेनैव भवतामाकाशानुमानं यदि विवक्षितम्, तर्हि तेनैवानुमानेन पृथिव्यादिवद् भावरूपमेवाकाशं साधनीयं स्यादिति विरुद्धमिदं भवदीयमनुमानं स्यादिति न कथमप्यभावरूपाकाशानुमानमित्याह- *वि प्रतिपन्नामिति*।। आगमप्रमाणविप्रतिपन्नानद्वैतिनः प्रतीत्यर्थः। गन्धादीनां गुणानां सपक्षतया विवक्षितानामिति शेषः। *पृथिव्यादिवस्तित्वति*।। वस्तुशब्देनात्र भावरूपता विवक्ष्यते। *दर्शनादिति*।। अनेन च विरुद्धता सौगतानुमाने प्रदर्श्यते। तथा च नागमतो न वाऽनुमानतः सौगताभिमतमाकाशं सिद्ध्यतीति सिद्धम्। न केवलमप्रामाणिकता, किन्त्वनिर्वचनीयताऽपि तदीयाकाशस्येति विकल्पमुखेनोपपादयति- *अपि चेत्यादिना*।। तत्=विशेषणं देश विशेष एव। वस्तुभूतं भावरूपमाकाशमिति योजना। ननु-नाकाशस्याधारत्वमस्माभिः स्वीक्रियत इत्यत आह- *सौगते हीत्यादिना*।। तथा चावरणाभावमात्रस्य वाय्वाधारत्वानुपपत्तेर्देशविशेष एव वस्तुभूत आकाशपदार्थ इति सौगतैरपि स्वीक्रियत इति स्वाभ्युपगमविरोधोऽपीति भावः। आकाशस्य नित्यत्वादिधर्माङ्गीकारादपि नावरणाभावरूपत्वसम्भव इत्याह-अपि चेति*।। ननु-अद्वैतमतेऽविद्यानिवृत्तेरभावरूपाया अपि नित्यत्वं स्वीक्रियते; ''निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः'' इत्युक्तेरित्यत आह- *निरोधद्वयमिति*।। अद्वैतमत इवात्मरूपत्वानङ्गीकाराद् निरोधद्वयस्य न तत्साम्यमिति भावः। एतेन निरोधद्वयाकाशयोरपि भावत्वव्यवस्थापनेनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा व्यवस्थाप्यते। सौगतमते तु ब्रह्ममात्राभिन्ननिमित्तोपादानताविरोध इति भावः। अत्राकाशनिराकरण आगमान्तरविरोधः,

अनुमानान्तरविरोधः, प्रत्यक्षविरोधः, बौद्धागमविरोधश्च हेतवो मन्यन्ते। तत्रागमप्रामाण्यादित्यनेन प्रथमो विरोधः, विप्रतिपन्नानित्यनेन द्वितीयो विरोधः, अपि चावराणाभावेत्यनेन प्रत्यक्षविरोधः, सौगते हि समय इत्यनेन बौद्धागमविरोधः प्रदर्श्यत इति विवेकः॥२४॥

न केवलं निरोधद्वयाकाशप्रक्रियामादायैव सौगतसमयावहेयता, किन्तु तदभिमतात्मस्वरूपप्रक्रियामादायापीति तदीयप्रक्रियामपि परीक्षमाणो निरस्यति– *अनुस्मृतेश्चेति*॥२५॥ को नामात्मेति चेत्, अत्राभिधर्मकोशकाराः–

''नात्मास्ति स्कन्धमात्रं तु कर्मक्लेशादिसंस्कृतम्।
अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत्॥''

इति। कर्मभिरविद्यादिक्लेशैश्च संस्कारमापन्नं पञ्चस्कन्धमात्रमेव अन्तराभवसन्तानक्रमेण गर्भं प्रविशति। क्षणे क्षण उत्पद्यमानं विनश्यमानमपि तत् स्कन्धपञ्चकं स्वसन्तानद्वारा प्रदीपकलिकावद् एकत्वं बोधयतीति प्रतिपादयन्ति। एतन्मते स्कन्धसन्ततिरेव तत्तत्कर्मानुसार परलोकं गच्छति, पुनर्याति भवचक्रं चेति मन्यते। इदमपि तदीयं मतं न क्षोदक्षमम्; सेयं दीपज्वालेतिप्रत्ययवदेकत्वप्रत्यभिज्ञानस्य सादृश्यनिबन्धनत्वस्यात्र वक्तुमशक्यत्वात्, अन्यथा वस्तुगत्याऽऽत्मनां भेदेऽनुस्मृत्यनुपपत्तिरित्याह सूत्रकारः–अनुस्मृतेश्चेति*॥ अनुभवसमानकालिकसंस्कारजन्यं ज्ञानं संस्कारसहकृतेन्द्रियसंनिकर्षजन्यज्ञानं वा प्रत्यभिज्ञानमेवानुस्मृतिः, अन्यथाऽनुपदवैयर्थ्यापत्तेः। अभिज्ञाद्वयजन्यं ज्ञानं प्रत्यभिज्ञानमेव ज्ञानम्, न तु ग्रहणस्मरणात्मकज्ञानद्वयमिति प्रत्यभिज्ञानानङ्गीकारमपि सौगताभिमतं निरसितुमनुस्मृतिपदम्। तदिदमाह– *अनुभवमिति*॥ स्मरणमेव संस्कारजन्यज्ञानमेव, प्रत्यभिज्ञानमिति यावत्। ग्रहणस्मरणात्मकज्ञानद्वयत्वे तु प्रत्यभिज्ञाया नैकत्वावगाहित्वमिति तदेकत्वानुसन्धानस्य दीपकलिकावत् सादृश्यविषयकत्वेन नयनं सौगतानामसङ्गतमेव स्यात्। तत्र यदि परमताभिप्रायेण तदुक्तिरिति मन्यते, एवं चेत्, नेदं क्षोदक्षमम्; सादृश्यनिबन्धनैकत्वावगाहनव्यवस्थाया अयोगादिति प्रकृतसूत्रतात्पर्यम्। तदिदं विशदीभविष्यति– *अपि च दर्शन-स्मरणयोः कर्तर्येकस्मिन् प्रत्यक्षः प्रत्यभिज्ञाप्रत्ययः*॥ इति भाष्यांशेन। अथवा–प्रत्यभिज्ञानानङ्गीकारेऽपि स्मरणमात्रेणाप्यात्मनः क्षणिकत्वं निरसितुं शक्यत इत्यभिप्रायेणानुस्मृतिपदेन स्मरणमेव विवक्षित्वाऽऽत्मक्षणिक्तावादं निरस्यति भाष्यकारः– *अनुस्मृतेरिति*॥ सन्तानैक्यमात्रेण स्मरणनिर्वाह इति शङ्कायां सक्षादेवैकत्वावगाहिप्रत्यभिज्ञाविरोधमाह– *अपि चेत्यादिना*॥ प्रत्यभिज्ञानानुपपत्तिमभिनयति– *यदि हीति*॥ *ततोऽहमिति*॥ ततः=तर्हि। *अहमिति*॥ *पश्यामि*॥ अन्यस्त्विति शेषः। अहमिदं

पश्याम्यन्यस्त्वद्राक्षीदिति प्रतीतिः स्यादित्यर्थः। एतेन–अहंपदप्रयोग उत्तमपुरुषापत्तिः, अन्यथा स्मराम्यहमसावद्राक्षीदित्यनन्तरभाष्येऽसौपदप्रयोगोऽनपेक्षितः स्यादिति शङ्का–परास्ता; अहम्, अद्राक्षीदिति वाक्यभेदाभिप्रायत्वात्। अत्र स्मरणानुपपत्तिः, प्रत्यभिज्ञानुपपत्तिश्च सौगतमत आपाद्यते। तत्रार्थविषयकस्मरणानुपपत्तिः, आत्मविषयिणी च प्रत्यभिज्ञानुपपत्तिरिति विशेषः। स्मरणस्यैवानुपपत्तौ स्मरणानुभवोभयसम्भवाया: प्रत्यभिज्ञायाः कुतः प्रसूतिरिति भावः। न हि सन्तानिनोर्भिन्नयोः कार्य–कारणभावादावपि भिन्नत्वमापतति, येन कार्य–कारणभावादिनान्येन दृष्टमन्येन स्मर्येत। एतेन–एकसन्तानगतत्वात् प्रत्यभिज्ञानं न विरुद्धमिति शङ्कापिपरास्ता; न ह्येकसन्ततिभवमात्रेण पित्रादिभिर्दृष्टानां पुत्रादिभिः स्मरणं सम्भवति। तदेतत् सर्व मनसि निधायाह– *तत्रैवमिति*।। ओत्तमादुच्छ्वासात् आ उत्तमादिति पदच्छेदः। अन्तिमश्वासपर्यन्तमित्यर्थः। दीपकलिकावदिति दृष्टान्तसाधितं सादृश्यनिबन्धनं प्रत्यभिज्ञानमाशङ्क्य निरस्यति– *स यदीत्यादिना*।। दीपकलिकावैषम्यमात्मनि दर्शयति– *भवेदपीति*।।२५।।

तदेवं क्षणिकात्मवादस्वीकारोऽपि सौगतानां जीवब्रह्मैक्यवादविरोधीति तत्प्रक्रियामादायापि क्षणिकवादो निरस्तः। सम्प्रति तु प्रधानः कार्य-कारणभावोऽप्यसतः कारणात् क्षणिकस्योत्पत्तिरिति स्वीकारात् सद्विवर्तवादविरोधीति तदीयाऽपि प्रक्रिया परीक्ष्यमाणा न क्षोदक्षमा भवतीति सूत्रयति– *नासतोऽदृष्टत्वादिति*।।२६।। असतः=अभावात्। न=न कार्योत्पत्तिः–अदृष्टत्वात्, प्रत्यक्षविरोधादिति सूत्रार्थः। तदेवोपपादयति– *नाभावादित्यादिना*।। मृद्धटः सुवर्ण कुण्डलमित्यादीनां कार्येषु कारणानुवृत्तिप्रत्यक्षाणां विरोधात् शशविषणादिभ्यो निःस्वभावेभ्यः कार्योत्पत्त्यदर्शनाच्च नासतः कारणात् कार्यस्योत्पत्तिसम्भवः। वैशेषिकैः कार्यमात्रासत्त्वं मन्यते, वैनाशिकैस्तु कार्य–कारणयोरुभयोरपि क्षणिकत्वेनासत्त्वं मन्यत इति विशेषः। अयमपरो विशेषः–वैशेषिकैरसतोऽपि कार्यस्योत्पद्यमानस्य कारणानुवृत्तेनैव रूपेणोत्पत्तिर्मन्यते, सौगतैश्च न कारणानुवृत्तिरपि स्वीक्रियत इति सर्वात्मना प्रत्यक्षबाधः सौगतमत एव। तदेतत् सर्व मनसि निधायाह– *यद्यभावादित्यादिना*।। तत्र प्रथममभावकारणत्वं निरस्यति– *न हीत्यादिना*।। भावानुवृत्तिप्रत्यक्षविरोधान्तरं निर्दिशति– *न चैवं दृश्यत इत्यादिना*।। कारणोपमर्देन कार्योत्पत्तिवादमनूद्य निरस्यति– *यत्तूक्तमित्यादिना*।। अवस्थोपमर्देऽपि न स्वरूपोपमर्द इत्याह– *तेष्वपीति*।। अपसंहरति– *तस्मादिति*।। न केवलं प्रत्यक्षविरोधः, किन्तु सौगताभ्युपगमविरोधोऽप्यसत्कार्यवाद इत्याह– *अपि चेति*।। तथा च–''अदृष्टत्वादि'' त्यस्य स्वागमदृष्टविरुद्धत्वाच्चेत्यपि योजना सूच्यते; नञो विरोधार्थकत्वस्याप्यमुरादिशब्देषु दर्शनादिति मन्तव्यम्। एतेनोक्तस्य दूषणस्योत्सूत्रत्वशङ्काऽप्यनवसरा। भूतभौतिकसमुदायादिषु प्रत्ययोपनिबन्धतः

प्रतीत्यसमुत्पादनिरूपणावसरे तत्तद्धातुधर्माणामप्यनुवृत्तिप्रतिपादनादिति भावः॥२६॥

अभावाद् भावोत्पत्तिवादे भाष्यकारैरत्र यानि दूषणानि प्रथमं प्रदर्शितानि, न तानि प्रकृतसूत्रारूढानि; सूत्रे तदनुपन्यासात्, प्रत्यक्षादिविरोधस्यैव तत्र प्रतिपादनादिति तदंशस्य भाष्यत्वमेवानुपपन्नमिति शङ्कां तु भाविसूत्रार्थानामपि सुखप्रतिपत्त्यर्थं भाष्यकारैर्बहुशः पूर्वमेवानुवादस्य दर्शनादत्रापि सैव नीतिरवलम्बितेति न दोष इति विधया निरसितुं तदर्थसंग्राहकं सूत्रमुल्लिखति– *उदासीनानामपि चैवं सिद्धिरिति*॥२७॥ निगदमस्य भाष्यम्॥२७॥ इति चतुर्थं समुदायाधिकरणम्॥

इति प्रदीपः समुदायाधिकरणम् समाप्तम्

भामती

अवान्तरसङ्गतिमाह ***वैशेषिकराद्धान्तः इति***। वैशेषिकाः खल्वर्धवैनाशिकाः। ते हि परमाण्वाकाशदिक्कालात्ममनसां च सामान्यविशेषसमवायाना च गुणानाञ्च केषाञ्चिन्नित्यत्वमभ्युपेत्य शेषाणां निरन्वयविनावमुपयन्ति, तेन तेऽर्धवैनाशिकाः। तेन तदुपन्यासो वैनाशिकत्वसाम्येन सर्ववैनांशिकाद् स्मारयतीति तदनन्तरं वैनाशिकमतनिराकरणमिति। अर्धवैनाशिकानां स्थिरभाववादिनां समुदायारम्भ उपपद्येतापि क्षणिकभाववादिनां त्वसौ दूरापेत इत्युपपादयिष्यामः। तेन **नतराम** इत्युक्तम्। तदिदं दूषणाय वैनाशिकमतमुपन्यसितुं तत्प्रकारभेदानाह ***स च बहुप्रकार इति***। वादिवैचित्र्यात् खलु केचित्सर्वास्तित्वमेव राद्धान्तं प्रतिपद्यन्ते। केचिज्ज्ञानमात्रास्तित्वं। केचित्सर्वशून्यताम्। अथ त्वत्रभवतां सर्वज्ञानां तत्त्वप्रतिपत्तिभेदो न सम्भवति; तत्त्वस्यैकरूपादित्येतदपरितोषेणाह ***विनेयभेदाद्वा***। हीनमध्यमोत्कृष्टधियो हि शिष्या भवन्ति। तत्र ये हीनमतयस्ते सर्वास्तित्ववादिन स्तदाशयानुरोधान्यशून्यतायामवतार्य्यन्ते। ये तु मध्यमास्ते ज्ञानमात्रास्तित्वेन शून्यतायामवतार्य्यन्ते। ये तु प्रकृष्टमतयस्तेभ्यः साक्षादेव शून्यतातत्त्वं प्रतिपाद्यते। यथोक्तं बोधिचित्तविवरणे–

देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोक उपायैर्बहुभिः पुनः॥
गम्भीरोत्तानभेदेन क्वचि.च्चोभयलक्षणा।
भिन्नापि देशनाऽभिन्ना शून्यताद्वयलक्षणा॥ इति॥

यद्यपि वैभाषिकसौत्रान्तिकयोरवान्तरमतभेदोऽस्ति, तथापि सर्वास्तितायामस्ति सम्प्रतिपत्तिरित्येकीकृत्योपन्यासः। तथा च त्रित्वमुपपन्नमिति। पृथिवी खरस्वभावा, आपः स्नेहस्वभावाः, अग्निरुष्णस्वभावो वायुरीरणस्वभावः। ईरणं प्रेरणम्। भूतभौतिकानुक्त्वा चित्तचैत्तिकानाह ***तथा रूपेति***। रूप्यन्ते एभिरिति रूप्यन्त इति च व्युत्पत्त्या सविषयाणिन्द्रियाणि **रूपस्कन्धः**। यद्यपि रूप्यमाणाः पृथिव्यादयो वाह्याःतथापि कायस्थत्वाद्वा इन्द्रियसम्बन्धाद्वा

भवन्त्याध्यात्मिकाः। विज्ञानस्कन्धोऽहमित्याकारो रूपादिविषय इन्द्रियादिजन्यो वा दण्डायमानः। **वेदनास्कन्धो** या प्रियाप्रियानुभवविषयस्पर्शे सुखदुःखतद्रहितविशेषवस्था चित्तस्य जायते, स **वेदानास्कन्धः। संज्ञास्कन्धः** सविकल्पप्रत्ययः संज्ञासंसर्गयोग्यप्रतिभासो यथा डित्थः कुण्डली गौरौ ब्राह्मणो गच्छतीत्येवञ्जातीयकः। **संस्कारस्कन्धो** रागादयः क्लेशाः उपक्लेशाश्च मदमानामादयः धर्माधर्मौ चेति। तदेतेषां समुदायः पञ्चस्कन्धी। ***तसिमन्नुभयहेतुकेऽपीति***। बाह्ये पृयिव्याद्यणुहेतुके भूतभौतिकसमुदाये रूपविज्ञानादिस्कन्धहेतुके च समुदाय आध्यात्मिकेऽभिप्रेयमाणे तदप्राप्तिस्तस्य समुदायस्यायुक्तता। **कुतः? *समुदायिनामचेतनत्वात्***। चेतनो हि कुलालदिः सर्वं मृद्दण्डाद्युपसहृत्य समुदायात्मकं घटमारचयन् दृष्टः। न ह्यसति मृद्दण्डादिव्यापारिणी विदुषि कुलाले स्वयमचेतना मृद्दण्डादयो व्यापृत्य जातु घटमारचयन्ति। न चासति कुविन्दे तन्तुवेमादयः पटं वयन्ते। तस्मात् कार्योत्पादस्तदनुगुणकारणसमवधानाधीनस्तदभावे न भवति। कार्योत्पादानगुणं च कारणसमवधानं चेतनप्रेक्षाधीन मसत्यां चेतनप्रेक्षायां न भवितुमुत्सहत इति कार्य्योत्पत्तिश्चेतनप्रेक्षाधीनत्वव्याप्ता व्यापकविरुद्धोपलब्ध्या चेतनानधिष्ठितेभ्यः कारणेभ्यो व्यावर्त्तमाना चेतनाधिष्ठितत्व एवावतिष्ठत इति प्रतिबन्धसिद्धिः। यद्युच्येत अद्धा चेतनाधीनैव कार्य्योत्पत्ति; अस्ति तु चित्तं चेतनं तद्धीन्द्रियादिविषयस्पर्शे सत्यभिज्वलत् तत्कारणचक्रं यथा यथा कार्य्याय पर्य्याप्तं तथा तथा प्रकाशयदचेतनानि कारणान्यधिष्ठाय कार्य्यमभिनिर्वर्त्तयतीति तत्राह ***चित्ताभिज्वलनस्य च समुदायसिद्ध्यधीनत्वात्***। न खलु बाह्याभ्यंन्तरसमुदायसिद्धिमन्तरेण चित्ताभिज्वलनं, ततस्तु तामिच्छन् दुरुत्तरमितरेतराश्चयमाविशेदिति। न च प्राग्भवीया चित्ताभिदीप्तिरुत्तरसमुदायं घटंयति; घटनसमये तस्याश्चिरातीतत्वेन सामर्थ्यविरहात्, अस्मद्राद्धान्तवदन्यस्य **चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य सङ्घातकर्तुरनभ्युपगमात्।** कारणविन्यासभेदं हि विद्वान् कर्ता भवति। न चान्वयव्यतिरेकावन्तरेण तद्विन्यासभेद वेदितुमर्हति। न च स क्षणिकोऽन्वयव्यतिरेककालानवस्थायी ज्ञातुमन्वयव्यतिरेकावुत्सहते। अत उक्तं ***स्थिरस्येति***। यद्युच्येत असमवहितान्येव कारणानि कार्य्यं करिष्यन्ति परस्परानपेक्षाणि, कृतमत्र समवधापयित्रा चेतनेनेत्यत आह ***निरपेक्षप्रवृत्त्यभ्युपगमे चेति***। यद्युच्येत अस्त्यालयविज्ञानमहङ्कारास्पदं पूर्वापरानुसन्धातृ तदेव कारणानां प्रतिसन्धातृ भविष्यतीति, तत्राह ***आशयस्यापिति***। तत् खल्वेकं यदि स्थिरमास्थीयेत, ततो नामान्तरेणात्मैव। अथ क्षणिकं तत उक्तदोषापत्तिः। न च तत्सन्तानःतस्यान्यत्वे नामान्तरेणात्माऽभ्युपगतोऽनन्यत्वे च विज्ञानमेव तञ्च क्षणिकमेवेत्युक्तदोषापत्तिः। आशेरतेऽस्मिन् कर्मानुभवासना इत्याशय आलयविज्ञानं तस्य। **अपिच** प्रवृत्तिः समुदायिनां व्यापारः। न च क्षणिकानां व्यापारो युज्यते। व्यापारो हि व्यापारवदाश्रयस्तत्कारणकश्च लोके प्रसिद्धः। तेन व्यापारवता व्यापारात्पूर्वं व्यापारसम्ये च

भवितव्यम्। अन्यथा कारणत्वाश्रयत्वयोरयोगात्। न च समसमययोरस्ति कार्य्यकारणभावः। नापि भिन्न कालयोराधाराधेयभावः। तथा च क्षणिकत्वहानिरित्याह ***क्षणिकत्वाभ्युपगमाच्चेति*॥१८॥** ***यद्यपीति*।**

अयमर्थः – संक्षेपतो हि प्रतीत्यसमुत्पादलक्षणमुक्तं बुद्धेन-'इदं प्रत्ययफलम्' इति। ''उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषा धर्माणां धर्मता। धर्मस्थितिता धर्मनियामकता प्रतीत्यसमुत्पादानुलोमताइति''। अथ पुनरयं प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति **हेतूपनिबन्धश्चः** प्रत्ययोपनिबन्धतश्च। स पुनर्द्विविधः - बाह्य आध्यात्मिकश्च। तत्र बाह्यस्य प्रतीत्यसमुत्पादस्य **हेतूपनिबन्धः**-यदिदं बीजादङ्कुरमङ्कुरात्पत्रं पत्रात्मकाण्डं काण्डान्नालो नालादग्भ्रो गर्भाच्छूकः शूकात्पुष्पं पुष्पात्फलमिति। असति बोजेऽङ्कुरो न भवति, यावदसति पुष्पे फलं न भवति। सति तु बीजेऽङ्कुरो भवति, यावत् पुष्पे सति फलमिति। तत्र बीजस्य नैवं भवति ज्ञानमहमङ्कुरं निर्वर्त्तयामीति। अङ्कुरस्यापि नैवं भवति ज्ञानमहं बीजेन निर्वर्त्तित इति। एवं यावत्-पुष्पस्य नैवं फलं निर्वर्त्तयामीति। एवं लस्यापि नैवं भवत्यहं पुष्पेणाभिनिर्वत्तितमिति। तस्मादसत्यपि चैतन्ये बीजादीनामसत्यपि चान्यस्मिन्नधिष्ठतरि कार्यकारणभावनियमो दृश्यते। उक्तो हेतूपनिबन्धः। **प्रत्ययोपनिबन्धः** प्रतीत्यसमुत्पादस्योच्यते। प्रत्ययो हेतूनां समवायः। हेतुं हेतुं प्रत्ययन्ते हेत्वन्तराणीति, तेषामयमानानां भावः प्रत्ययः। समवाय इति यावत्। यथा षण्णां धातूनां समवायाद् बीजहेतुरङ्कुरौ जायते। तत्र च पृथिवीधातुर्बीजस्य संग्रहकृत्यं करोति, यतोऽङ्कुरः कठिनो भवति, अब्धातुर्बीजं स्नेहयति, तेजोधातुर्बीजं परिपायति, वायुधातुर्बीजमभिनिर्हरति, यतोऽङ्कुरो बीजान्निर्गच्छति, आकाशधातुर्वीजस्यानावरणकृत्यं करोति, ऋतुरपि बीजस्य परिणामं करोति, तदेतेषामविकलानां धातूनां समवाये वीजे रोहत्यङ्कुरो जायते नान्यथा। तत्र पृथिदीधातोर्नैवं भवत्यहं वीजस्य संग्रहकृत्यं करोमीति, यावदृतोर्नैवं भवत्यहं बीजस्य परिणामं करोमीति। अङ्कुरस्यापि नैवं भवत्यहमेभिः प्रत्ययैर्निर्वर्त्तित इति। तथाध्यात्मिकः प्रतीत्यसमुत्पादौ द्वाभ्यां कारणाभ्यां भवति हेतूपनिबन्धतः प्रत्ययोनिबन्धतश्च। **तत्रास्य हेतूपनिबन्धोः–** यदिदमविद्याप्रत्ययाः संस्कारा यावज्जातिप्रत्ययं जारामरणादीति। अविद्या चेन्नाभविष्यन्नैव संस्कारा अजनिष्यन्त। एवं यावज्जातिः। जातिश्चेन्नाभविष्यन्नैवं जरामरणादय उदपत्स्यन्त। तत्राविद्याया नैवं भवत्यंह संस्कारानभिनिर्वर्त्तयामीति। संस्काराणामपि नैवं भवति वयमविद्यया निर्वर्त्तिता इति। एवं यावज्जात्या अपि नैवं भवत्यहं जरामरणाद्यभिनिर्वर्त्तयामीति। जरामरणादीनामपि नैवं भवति वयं जात्यादिभिर्निर्वर्त्तिता इति। अथ च सत्स्वविद्यादिषु स्वयमचेतनेषु चेतनान्तरानधिष्टितेष्वपि संस्कारादीनामुत्पत्तिः बीजादिष्विव सत्स्वचेतनेषु चेतनान्तरानधिष्ठितेष्वप्यङ्कुरादीनाम्। इदं प्रतीत्य

प्राप्येदमुत्पद्यत इत्येतावन्मात्रस्य दृष्टत्वाच्चेतनाधिष्ठानस्यानुपलब्धेः। सोऽयमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूवनिबन्धः। **अथ प्रत्ययोपनिबन्धः** पृथिव्यप्तेजोबाय्वाकाशविज्ञानधातूनां समवायाद्भवति कायः। तत्र कायस्य पृथिवीधातुः काठिन्यं निर्वर्त्तयात। अधातुः स्नेहयति कायं। तेजोधातुः कायस्याशितपीते परिपाचयति। वायुधातुः कायस्य श्वासादि करोति। आकाशधातुः कायस्यान्तः सुषिरभावं करोति। यस्तु नामरूपाङ्कुरमभिनिर्वर्त्तयति पञ्चविज्ञानकार्यसंयुक्तं सास्रवं च मनोविज्ञानं, सोऽयमुच्यते विज्ञानधातुः। यदा ह्याध्यात्मिकाः पृथिव्यादिधातवो भवन्त्यविकलास्तदा सर्वेषां समवायाद्भवति कायस्योत्पत्तिः। तत्र पृथिव्यादिधातूनां नैवं भवति वयं कायस्य काठिन्यादि निर्वर्त्तयाम इति। कायस्यापि नैवं भवति ज्ञानमहमेभिः प्रत्ययैरभिनिर्वर्त्तित इति। अथ च पृथिव्यादिधातुभ्योऽचेतनेभ्यच्चेतनान्तरानधिष्ठितेभ्योऽङ्कुरस्येव कायस्योत्पत्तिः। सोऽयं प्रतीत्यसमुत्पादो दृष्टत्वान्नान्यथयितव्यः। तत्रैतेष्वेव षट्सु धातुषु यैकसंज्ञा पिण्डसंज्ञा नित्यसंज्ञा सुखसंज्ञा सत्त्वसंज्ञा पुद्गलसंज्ञा मनुष्यसंज्ञा मातृदुहितसंज्ञा अहङ्कारममकारसंज्ञा सेयमविद्या संसारानर्थसम्भारस्य मूलकारणं, तस्यामविद्यायां सत्यां संस्कारा रागद्वेषमोहा विषयेषु प्रवर्त्तन्ते। वस्तुविषया विज्ञप्तिर्विज्ञानं विज्ञानाच्चत्वारोह रूपिण उपादानस्कन्धास्तन्नाम, तान्युपादाय रूपमभिनिर्वर्त्तते। तदैकध्यमभिसंक्षिप्य नामरूपं निरुच्यते शरीरस्यैव कललबुद्बुदाद्यवस्थाः नामरूपसंमिश्रितानीन्द्रियाणि षडायतनं, नामरूपेन्द्रियाणां त्रयाणां सन्निपातः स्पर्शः, स्पर्शाद्वेदना सुखादिका, वेदनायां सत्यां कर्त्तव्यमेतत्सुखं पुनर्मयेत्यध्यवसानं **तृष्णा** भवति। तत **उपादानं** वाक्कायचेष्टा भवति। ततो भवो, भवत्यस्माज्जन्मेति भवो धर्माधर्मौ तद्धेतुकः स्कन्धप्रादुर्भावो **जातिः** जन्म। जन्महेतुका उत्तरे जरामरणादयः। जातानां स्कन्धानां परिपाको जरा। स्कन्धानां नाशो मरणम्। म्रियमाणस्य मूढस्य साभिषङ्गस्य पुत्रकलत्रादावन्तर्दाहः शोकः। तदुत्थं प्रलपनं हा मातः। हा तात! हा च मे पुत्रकलत्रादीति **परिदेवना**। पञ्चविज्ञानकार्यसंयुक्तमसाध्वनुभवनं दुःखं। मानसं च दुःखं दौर्मनस्यम्। एवंजातीयकाश्चोपायास्त उपक्लेशाः' गृह्यन्ते। तेऽमी परस्परहेतुका जन्मादिहेतुका अविद्यादयोऽविद्यादिहेतुकाश्च जन्मादयो घटीयन्त्रवदनिशमावर्त्तमानाः सन्तीति तदेतैरविद्यादि-भिराक्षिप्तः सङ्घात इति। तदेतद्दूषयति। ***तन्न*** कुतः? ***उत्पत्तिमात्रनिमित्तत्वादिति***। **अयमभिमन्धिः**- यत् खलु हेतूपनिबद्धं कार्यं तदन्यानपेक्षं हेतुमात्राधीनोत्पादत्वादुत्पद्यतां नाम। पञ्चस्कन्धसमुदायस्तु प्रत्ययोपनिबद्धो न हेतुमात्राधीनोत्पत्तिः, अपितु नानाहेतुसमवधानजन्मा। न च चेतनमन्तरेणान्यः सन्निधापयिताऽस्ति कारणानामित्युक्तम्। वीजादङ्कुरोत्पत्तेरपि प्रत्ययोपनिबद्धाया विवादाध्यासितत्वेन पक्षनिक्षिप्तत्वात्। पक्षेण च व्यभिचारोद्भावनायामतिप्रसङ्गेन सर्वानुमानोच्छेद-प्रसङ्गात्। **स्यादेतत्**-अनपेक्षा एवान्त्यक्षणप्राप्ताः क्षित्यादयोऽङ्कुरमारभन्ते। तेषां

तूपसर्पणप्रत्ययवशात्परस्परसमवधानम्। न एकस्मादेव कारणात्कार्यसिद्धेः किमन्यैः कारणैरिति वाच्यम्, कारणचक्रानन्तरं कार्योत्पादात् सिद्धमित्येव नास्ति। न चैकोऽपि तत्कारणसमर्थ इत्यन्य उदासत इति युक्तम्। नहि ते प्रेक्षावन्तो येनैवमालोचयेयुरस्मासु समर्थ एकोऽपि कार्ये इति कृतं नः सन्निधिनेति। किन्तूपसर्पणप्रत्ययाधीनपरस्परसन्निधानोत्पादा नानुत्पत्तुं नाप्यसन्निधातुमीशते। तांश्च सर्वाननपेक्षान् प्रतीत्य कार्यमपि न नोत्पत्तुमर्हति। न च स्वमहिम्ना सर्वे कार्यमुत्पादयन्तोऽपि नानाकार्याणामीशते तत्रैव तेषां सामर्थ्यात्। नच कारणभेदात् कार्यभेदः, सामग्र्या एकत्वात् तद्भेदस्य च कार्यनानात्वहेतुत्वात्तथा दर्शनात्। तन्नः, यद्यनत्यक्षणप्राप्ता अनपेक्षाः स्वकार्योपजनने हन्तानेन क्रमेण ततः पूर्वे ततः पूर्वे सर्व एवानपेक्षास्तत्तत्स्वकार्योपजनन इति कुसूलस्थत्वाविशेषेऽपि येन बीजक्षणेन कुसूलस्थेन स्वकार्यक्षणपरम्परयाङ्कुरोत्पत्तिसमर्थो बीजक्षणो जनयितव्यः, सोऽनपेक्ष एव बीजक्षणः स्वकार्योपजनने। एवं सर्व एव तदनन्तरानन्तरवर्तिनो वीजक्षणा अनपेक्षा इति कुसूलनिहितबीज एव स्यात् कृती कृषीबलः, कृतमस्य दुःखबहुलेन कृषिकर्मणा। येन हि बीजक्षणेन स्वक्षणपरम्परयाऽङ्कुरो जनयितव्यस्तस्यानपेक्षाऽसौ क्षणपरम्परा कुसूल एवाङ्कुरं करिष्यतीति। तस्मात्परम्परापेक्षा एवान्त्या वा मध्या वा पूर्वे वा क्षणाः कार्योपजनन इति वक्तव्यम्। यथाहुः- 'न किञ्चिदेकमेकस्मात्सामग्रयाः सर्वसम्भव': इति। तच्चेदं समवधानं कारणानां विन्यासभेद-तत्प्रयोजनाभिज्ञप्रेक्षावत्पूर्वकं दृष्टमिति नाचेतनाद्भवितु मर्हति। तदिदमुक्तम्- ***भवेदुपपन्नः सङ्घातो यदि सङ्घातस्य किञ्चिन्निमित्तमवगम्यतेति***। ***इतरेतरप्रत्ययत्वेऽपीति***। इतरेतरहेतुत्वे-ऽपीत्यर्थः। उक्तमभिसन्धिमविद्वान् परिचोदयति ***नन्वविद्यादिभिरर्थादाक्षिप्यत इति***। परिहरति ***अत्रोच्यते, यदि तावदिति***। किमाक्षेप उत्पादनम्, आहो ज्ञापनम्? तत्र न तावत् कारणमन्यथानुपपद्यमानं कार्यमुत्पादयति, किन्तु स्वासामर्थ्येन। तस्मात्ज्ज्ञापनं वक्तव्यम्। तथा च ज्ञापितास्यान्यदुत्पादकं वक्तव्यं, तच्च स्थिरपक्षेऽपि सत्यपि च भोक्तर्यधिष्ठातारं चेतनमन्तरेण न सम्भवति, किमङ्ग पुनः क्षणिकेषु भावेषु। भोक्तुर्भोगेनापि कदाचिदाक्षिप्येत सङ्घातः, स तु भोक्तापि नास्तीति दूरोत्सारितत्वं दर्शयति। ***भोक्तृरहितेष्विति***। **अपिच** वहव उपकार्योपकारकभावेन स्थिताः कार्यं जनयन्ति। न च क्षणिकपक्ष उपकार्योपकारकभावोऽस्ति, भावस्योपकारानास्पदत्वात्। क्षणस्याभेद्यत्वादनुपकृतोपकृतत्वासम्भवात्। कालभेदेन वा तदुपपत्तौ क्षणिकत्वव्याघात। तदिदमाह ***आश्रयाश्रयिशून्येषु चेति***। ***अथायमभिप्राय इति***। यदा हि प्रत्ययोपनिबन्धनः प्रतीत्य समुत्पादो भवेत्तदा चेतनोऽधिष्ठाताऽपेक्षेतापि, न तु प्रत्ययोपनिबन्धनोऽपि तु हेतूपनिबन्धनः। तथाच कृतमत्राधिष्ठात्रा हेतुः स्वभावत एव कार्यसङ्घातं करिष्यति केवल इति भावः। अस्तु तावद्यथा

केवलाद्धेतोः कार्यं नोपजायत इति, अन्योन्याश्रयप्रसङ्गोऽस्मिन् पक्ष इत्याशयवानाह ***कथं तमेवेति***। सम्प्रति प्रत्ययोपनिबन्धनं प्रतीत्यमुत्पादमास्थाय चोदयति ***अथ मन्यसे सङ्घाता एवेति***। अस्थिरा अपि हि भावाः सदा संहता एवोदयन्ते व्ययन्ते च। न पुनरितस्ततोऽवस्थिताः केनचित् पुञ्जीक्रियन्ते। तथा च कृतमत्र संहन्त्रा चेतनेनेति भावः। ***अनादौ इति*** परस्पराश्रयं निवर्त्तयति। तदेतद्विकल्प्य दूषयति ***तदापि संघातादिति***। स खलु सङ्घातसन्ततिवर्ती धर्माधर्माह्वयः संस्कारसन्तानो यथायथं सुखदुःखे जनयन्नागन्तुकं कञ्चनानासाद्य स्वत एव जनयेत्? आसाद्य वा? अनासाद्य जनने सदैव सुखदुःखे जनयेत्, समर्थस्यानपेक्षस्याक्षेपायोगात्। आसाद्य जनने तदासादनकारणं प्रेक्षावानभ्युपेयः। तथा च न प्रत्ययोपनिबन्धनः प्रतीत्यसमुत्पादः। तस्मादनेनागन्तुकानपेक्षस्य संघातसंतानस्यैव सदृशजनने विसदृशजनने वा स्वभाव आस्थेयः। तथा च भाष्योक्तं दूषणमिति। ***अपि च यद्भोगार्थः संघातः स्यादिति***। अप्राप्तभोगो हि भोगार्थो भोगमाप्तुकामस्तत्साधने प्रवर्त्तत इति प्रत्यात्मसिद्धम्। सेयं प्रवृत्तिर्भोगादन्यस्मिन् स्थिरे भोक्तरि भोगतत्साधनसमयव्यापिनि कल्पते नास्थिरे। न च भोगादनन्यस्मिन्। नहि भोगो भोगाय कल्पते नाप्यन्यो भोगायान्यस्य। एवं मोक्षेऽपि द्रष्टव्यम्। तत्र वुभुक्षुमुमुक्षू चेत् स्थिरावास्थीयेयातां तदाभ्युपेतहानम अथैर्य्ये वाप्रवृत्तिप्रसङ्ग इत्यर्थः। ***न तु सङ्घातः सिध्येद्भोक्त्रभावाद् इति***। भोक्त्रभावेन प्रवृत्त्यनुपपत्तेः कर्त्रभावः। ततः कर्माभावात्सङ्घातासिद्धिरित्यर्थः।।१९।। पूर्वसूत्रेण सङ्गतिमस्याह ***उक्तमेतदिति***। हेतूपनिबन्धनं प्रतीत्यसमुत्पादमभ्युपेत्य प्रत्ययोपनिबन्धनः प्रतीत्यसमुत्पादो दूषितः सम्प्रति हेतूपनिबन्धनमपि तं दूषयतीत्यर्थः। दूषणमाह ***इदमिदानीमिति***। ***निरुध्यमानस्येति***। न तावद्वैशेषिकवन्निरोधकारणसान्निध्यं निरुध्यमानता स्वीक्रियते वैनाशिकैरकारणं विनाशमभ्युपगच्छद्भिस्ततस्यानिष्टत्वात्। तस्माद्विनाशग्रस्तत्वमचिरनिरुद्धत्वं निरुध्यमानत्वं वक्तव्यम्। निरुद्धत्व च चिरनिरुद्धत्वं विवक्षितं, तथा चोभयोरप्यभावग्रस्तत्वाद्धेतुत्वानुपपत्तिः। शङ्कते ***अथ भावभूतः इति***। कारणस्य हि कार्य्योत्पादात् प्राक्कालसत्तार्थवती न कार्य्यकाला, तदा कार्य्यस्य सिद्धत्वेन तत्सिद्ध्यर्थायाः सत्ताया अनुपयोगादिति भावः। तदेतल्लोकदृष्टया दूषयति ***भावभूतस्येति***। भूत्वा व्यापृत्य भावाः प्रायेण हि कार्य्यं कुर्वन्तो लोके दृश्यन्ते। तथा च स्थिरत्वम्, इतरथा तु लोकविरोध इति। पुनः शङ्कते ***अथ भाव एवेति***। यथाहुः– ''भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते'' इति। भवत्वेवं व्यापारवत्ता, तथापि क्षणिकस्य न कारणत्वमित्याह ***तथापि नैवोपपद्यते*** क्षणिकस्य कारणभावः। मृत्सुवर्णकारणा हि घटादयश्च रुचकादयश्च मृत्सुवर्णात्मानोऽनुभूयन्ते। यदि च न कार्य्यसमये कारणं सत् कथं तेषां

तदात्मनानुभवः। न च कारणसादृश्यं कार्य्यस्य, न तु तादात्म्यमिति वाच्यम्: असति कस्यचिद्रूपस्याननुगमे सादृश्यस्याप्यनुपपत्तेः। अनुगमे वा तदेव कारणं तथा च तस्य कार्य्यतादात्म्यमिति सिद्धमक्षणिकत्वमित्यर्थः। सर्वथा वैलक्षण्ये तु हेतुफलभावस्तन्तुघटादावपि प्राप्त इत्यतिप्रसङ्ग इत्याह ***विनैव वेति***। न च तद्भावभावो नियामकःस्तस्यैकस्मिन् क्षणेऽशक्यग्रहत्वात्। सामान्यस्य चाकारणत्वात्। कारणत्वे वा क्षणिकत्वहानेरस्मत्पक्षपातप्रसङ्गाच्चेति भावः। अपि चोत्पादनिरोधयोर्विकल्पत्रयेऽपि वस्तुनः शाश्वतत्वप्रसङ्ग इत्याह ***अपि चोत्पादनिरोधौ नामेति***। पर्यायत्वापादनेऽपि नित्यत्वापादनं मन्तव्यम्। ***वस्तूत्पादनिरोधाभ्यामसंसृष्टमिति** वस्तुनः शाश्वतत्वप्रसङ्गः*। संसर्गेऽप्यसता संसर्गानुपपत्तेः। सत्त्वाभ्युपगमे शाश्वतत्त्वमित्यपि द्रष्टव्यम्। शेषं निगदव्याख्यातम्।।२०।। नीलाभासस्य हि चित्तस्य नीलादालम्बनप्रत्ययान्नीलाकारता।, समनन्तरप्रत्ययात्पूर्वविज्ञानादोधरूपता, चक्षुषोऽधिपतिप्रत्ययाद्रूपग्रहणप्रतिनियमः। आलोकात्सहकारिप्रत्ययाद्धेतोः स्पष्टार्थता। एवं सुखादीनामपि **चैत्तानां** चित्ताभिन्नहेतुजानां चत्वार्य्येतान्येव कारणानि। सेयं प्रतिज्ञा चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इत्यभावकारणत्व उपरुध्येत। ***अथोत्तरक्षणोत्पर्त्ति यावदवतिष्ठत इति***। उत्पत्तिरुत्पद्यमानाद्भावादभिन्ना, तथा च क्षणिकत्वहानिरिति प्रतिज्ञाहानिः।।२१।। भावप्रतीपा संख्या बुद्धिः प्रतिसंख्या, तया निरोधः प्रतिसंख्यानिरोधः। सन्तमिममसन्तं करोमीत्येवमाकारता च बुद्धेर्भावप्रतीपत्वम्। एतेनाप्रतिसंख्यानिरोधोऽपि व्याख्यातः। सन्तानगोचरो वा निरोधः, सन्तानिक्षणगोचरो वा? न तावत्सन्तानस्य निरोधः सम्भवति। हेतुफलभावेन हि व्यवस्थिताः सन्तानिन एवोदयव्ययधर्माणः सन्तानः। तत्र योऽसावन्त्यः सन्तानी, यन्निरोधात्सन्तानोच्छेदेन भवितव्यं स किं फल किञ्चिदारभते न वा। आरभते चेत्, नान्त्यः। तथा च न सन्तानोच्छेदः। अनारम्भे तु भवेदन्त्यः सः, किन्तु स्यादसन् अर्थक्रियाकारितायाः सत्तालक्षणस्य विरहात्। तदसत्त्वे तज्जनकमप्यसज्जनकत्वेनासदित्यनेन क्रमेणासन्तः सर्व एव सन्तानिन इति तत्सन्तानो नितरामसन्निति कस्य प्रतिसंख्यया निरोधः? न च सभागानां सन्तानिनां हेतुफलभावः सन्तानःतस्य विसभागोत्पादो निरोधः, विसभागोत्पादक एव च क्षणः सन्तानस्यान्त्यः। तथासति रूपविज्ञानप्रवाहे रसादिविज्ञानोत्पत्तौ सन्तानोच्छेदप्रसङ्गः। कथञ्चित्सारूप्ये वा विसभागेऽप्यन्ततः सत्तया तदस्तीति न सन्तानोच्छेदः। तदनेनाभिसन्धिनाह ***सर्वेष्वपि सन्तानेषु सन्तानिनामविच्छिन्नेन हेतुफलभावेन सन्तानविच्छेदस्यासम्भवादिति***। **नापि भावगोचरौ सम्भवतः** प्रतिसंख्याऽप्रतिसंख्यानिरोधौ। अत्र तावदुत्पन्नमात्रापवृक्तस्य भावस्य न प्रतिसंख्यानिरोधः सम्भवति, तस्य

पुरुषप्रयत्नापेक्षाभावादित्यस्त्येव दूषणम्, तथापि दोषान्तरमुभयस्मिन्नपि निरोधे ब्रूते ***नहि भावानामिति***। यतो निरन्वयो विनाशो न सम्भवत्यतो निरुपाख्योऽपि न सम्भवति, तेनैवान्वयिना रूपेण भावस्य नष्टस्याप्युपाख्येयत्वात्। निरन्वयविनाशाभावे हेतुमाह ***सर्वास्वप्यवस्थास्विति***। यद्यदन्वयिरूपं तत्तत्परमार्थसद्भावः। अवस्थास्तु विशेषाख्या उपजनापायधर्माणःतासां सर्वासामनिर्वचनीयतया स्वतो न परमार्थसत्त्वम अन्वय्येव तु रूपं तासां तत्त्वं। तस्य च सर्वत्र प्रत्यभिज्ञायमानत्वान्न विनाश इत्यवस्थातत्वाविनाशान्नावस्थानां निरन्वयो विनाश इति। तासां तत्त्वस्यान्वयिनः सर्वत्राविच्छेदात्। **स्यादेतत्**-मृत्पिण्डमृद्‌टमृत्कपालादिषु सर्वत्र मृत्तत्त्वप्रत्यभिज्ञानाद्भवत्वेवम्। तप्तोपलतलपतितनष्टस्य तूदविन्दोः किमस्ति रूपमन्वयि प्रत्यभिज्ञायमानं येनास्य न निरन्वयो नाशः स्यादित्यत आह ***अस्पष्टप्रत्यभिज्ञानास्वपीति***। अत्रापि तत्तोयं तेजसा मार्त्तण्डमण्डलमम्बुदत्वाय नीयत इत्यनुमेयं; मृदादीनामन्वयिनामविच्छेददर्शनात्। शक्यं तु तत्र वक्तुम्-

उदविन्दौ च सिन्धौ च तोयभावो न भिद्यते।
विनष्टेऽपि ततो विन्दावस्ति तस्यान्वयोऽम्बुधौ॥
तस्मान्न कश्चिदपि निरन्वयो नाश इति सिद्धम्॥२२॥

परिकरः सामग्री सम्यग्ज्ञानस्य यमनियमादिः श्रवणमननादिश्च। मार्गाः क्षणिकनैरात्म्यादिभावनाः। अतिरोहितमन्यत्॥२३॥ **आकाशे चविशेषात्।** एतद्व्याचष्टे ***यच्च तेषामिति***। वेदप्रामण्ये विप्रतिपन्नानपि प्रतिशब्दगुणानुमेयत्वमाकाशस्य वक्तव्यम्। **तथाहि**-जातिमत्त्वेन सामान्यविशेषसमवायेभ्यो विभर्त्तस्य शब्दस्यास्पर्शत्वे सति बाह्येकेन्द्रियग्राह्यत्वेन गन्धादिवदणत्वमनुमितम्। नायमात्मगुणो बाह्येन्द्रियगोचरत्वात्। अत एव न मनोगुणः, तदुणानामप्रत्यक्षत्वात्। न पृथिव्यादिगुणः, तद्‌गुणगन्धादिसाहचर्य्यानुपलब्धेः। तस्माद्‌गुणो भूत्वा गन्धादिवदसाधारणेन्द्रियग्राह्यो यद्द्रव्यमनुमापयति तदाकाशं पञ्चमं भूतं वस्त्विवति। ***अपि चावरणाभावमाकाशमिच्छत इति***। निषेध्यनिषेधाधिकरणनिरूपणाधीननिरूपणो निषेधो नासत्यधिकरणनिरूपणे शक्यो निरूपयितुम्। तच्चावरणाभावाधिकरणमाकाशं वस्तिवति। अतिरोहितार्थमन्यत्॥२४॥ विभजते *अपि च वैनाशिकः सर्वस्य वस्तुनः इति*। यस्तु सत्यप्येतस्मिन्नुपलब्धृस्मर्त्रोरन्यत्वेऽपि समानायां सन्ततौ कार्यकारणभावात् स्मृतिरूपपत्स्यत इति मन्यमानो न परितुष्यति तं प्रति प्रत्यभिज्ञासमाज्ञातप्रत्यक्षविरोधमाह ***अपि च दर्शनस्मरणयोः***

कर्त्तरिति*। **ततोऽहमद्राक्षीदिति प्रतीयात्** अहं स्मराम्यन्यस्त्वद्राक्षीदित्यर्थः। प्रत्यभिज्ञाप्रत्यक्षविरोधप्रपञ्चस्तूत्तर। ***आजन्मनः आ चोत्तमादुच्छ्वासात्*** आमरणादित्यर्थः। नच सादृश्यर्निबन्धनं प्रत्यभिज्ञानं, पूर्वापरक्षणदर्शिन एकस्याभावे तदनुपपत्तेः। शङ्कते ***तेनेदं सदृशमिति*** प्रत्ययान्तरमिति। अयमर्थः-विकल्पप्रत्ययोऽयम्, विकल्पश्च स्वाकारं बाह्यतयाऽध्यवस्यति, न तु तत्त्वतः पूर्वापरौ क्षणौ तयोः सादृश्यं वा गृह्णाति। तत्कथमेकस्यानेकदर्शिनः स्थिरस्य प्रसङ्गः, इति? निराकरोति ***न तेनेदमिति*** *भिन्नपदार्थोपादातामिति*। नानापदार्थसम्भिन्नवाक्यार्थाभासस्तावदयं विकल्पः प्रथते। तत्रैते नानापदार्था न प्रथन्त इति ब्रुवाणः स्वसंवेदनं बाधेत। न चैकस्य ज्ञानस्य नानाकारत्वं सम्भवति, एकत्वविरोधात्। न च तावन्त्येव ज्ञानानीति, युक्तम्, तथा सति प्रत्याकारं ज्ञानानां समाप्तेस्तेषा च परस्परवार्ताज्ञानाभावान्नानेत्येव न स्यात्। तस्मात् पूर्वापरक्षणतत्सादृश्यगोचरत्वं ज्ञानस्य वक्तव्यं। न चैतत्पूर्वापरक्षणावस्थायिनमेकं ज्ञातारं विनेति क्षणभङ्गभङ्गप्रसङ्गः। यद्युच्येत-अस्त्येतस्मिन् विकल्पे तेनेदं सदृशमिति पदद्वयप्रयोगो न त्विह तत्तेदन्तास्पदौ पदार्थो तयोश्च सादृश्यमिति विवक्षितम् अपित्वेवमाकारता ज्ञानस्य कल्पितेति, तत्राह ***यदा हि लोकप्रसिद्धः पदार्थः इति***। एकाधिकरणविप्रतिषिद्धधर्मद्वयाभ्युपगमो विवादः। तत्रैकः स्वपक्षं साधयत्यन्यश्च तत्साधनं दूषयति। न चैतत्सर्वमसति विकल्पानां बाह्यालम्बनत्वेऽसति च लोकप्रसिद्धपदार्थकत्वे भवितुमर्हति। ज्ञानाकारत्वे हि विकल्पप्रतिभासिनां नित्यत्वानित्यत्वादीनारमेकार्थविषयत्वाभावात् ज्ञानानां च धर्मिणां भेदान्न विरोधः। नह्यात्मनित्यत्वं बुद्ध्यनित्यत्वञ्च च ब्रुवाणौ विप्रतिपद्येते। न चालौकिकार्थेनानित्यशब्देनात्मनि विभुत्वं विवक्षित्वाऽनित्यशब्दं प्रयुञ्जानो लौकिकार्थ नित्यशब्दमात्मनि प्रयुञ्जानेन विप्रतिपद्यते। तस्मादनेन स्वपक्षं प्रतितिष्ठापयिषता परपक्षसाधन च निराचिकीर्षता विकल्पानां लोकसिद्धपदार्थकता बाह्यालम्बनता च वक्तव्या। यद्युच्येत द्विविधो हि विकल्पानां विषयो ग्राह्यश्चाध्यवसेयश्च। तत्र स्वाकारो ग्राह्योऽव्यवसेयस्तु बाह्यः। तथाच पक्षप्रतिपक्षपरिग्रहलक्षणा विप्रतिपत्तिः प्रसिद्धपदार्थकत्व चोपपद्य इत्याह ***एवमेवैषोऽर्थ इति* निश्चितं यत्तदेव वक्तव्यं ततोऽन्यदुच्यमानं बहुप्रलापित्वमात्मनः केवलं प्रख्यापयेत्। अयमभिसन्धिः**-केयमध्यवसेयता बाह्यस्य? यदि ग्राह्यता, न द्वैविध्यम्। अथान्या सोच्यतां, ननूक्ता तैरेव स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तिरिति। अथ विकल्पाकारस्य कोऽयमर्थावसायः? किं करणमाहो योजनमुतारोपणमिति? न तावत् करणम्, नह्यन्यदन्यत् कर्तुं शक्यम्। न हि जातु सहस्रमपि शिल्पिनो घटं पदयितुमीशते। न चान्तरं बाह्येन योजयितुम्। **अपि च** तथासति युक्त इति प्रत्ययः

स्यात्। न चास्ति। आरोपोऽपि कि गृह्यमाणे बाह्ये उतागृह्यमाणे? यदि गृह्यसाणे, तदा किं विकल्पेनाहो तत्समयजेनाविकल्पकेन? न तावद्विकल्पोऽभिलापसंसर्गयोग्यगोचरोऽशक्याभिलापसमयं स्वलक्षणं देशकालाननुगतं गोचरयितुमर्हति। यथाहु:-

अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक्।

तेषामतः स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी॥ इति॥

न च तत्समयभाविना निर्विकल्पकेन गृह्यमाणे वाह्ये विकल्पेनागृहीते तत्र विकल्पः स्वाकारमारोपयितुमर्हति। न हि रजतज्ञानाप्रतिभासिनि पुरोवर्त्तिनि वस्तुति रजतज्ञानेन शक्यं रजतमारोपयितुम्। अगृह्यमाणे तु बाह्ये स्वाकार इत्येव स्यानन बाह्य इति। तथा च नारोपणम्। **अपि** चायं विकल्प स्वसंवेदन सन्तं विकल्पं किं वस्तु सन्तं स्वाकारं गृहीत्वा पश्चाद्बाह्यमारोपति अथ यदा स्वाकांर गृह्णाति तदैवारोपयति? न तावत् क्षणिकतया क्रमविरहिणो ज्ञानस्य कमवर्त्तिनी ग्रहणारोपणे कल्पेते। तस्माद्यदेव स्वाकारमनर्थ गृह्णाति तदैवार्थमारोपयतीति वक्तव्यम् न चैतद्युज्यते। स्वाकारो हि स्वसंवेदनप्रत्यक्षतयातिविशदः। बाह्यं चारोप्यमाणमविशदं सत्ततोऽन्यदेव स्यान्न तु स्वाकारः समारोपितः। न च भेदाग्रहमात्रेण समारोपाभिधानम, वैशद्यावैशद्यरूपतया भेदग्रहस्योक्तत्वात्। **अपि** चागृह्यमाणे चेद्वाह्येऽवाह्यातस्वलक्षणाद्भेदाग्रहणे तदभिमुखी प्रवृत्तिः, हन्त तर्हि त्रैलोक्यत एवानेन न भेदो गृहीत इति यत्र क्वचन प्रवर्तेताविशेषात्। एतेन ज्ञानाकारस्यैवालोकस्यापि वाह्यत्वसमारोपः प्रत्युक्तः। तस्मात्सुष्ठूक्तं **ततोऽन्यदुच्यमानं बहुप्रलापित्वमात्मनः केवल प्रख्यापयेत् इति**। अपि च सादृश्यनिबन्धनः संव्यवहारस्तेनेदं सदृशमित्येवमाकारबुद्धिनिबन्धनो भवेन्न तु तदेवेदमित्याकाबुद्धिनिबन्धन इत्याह ***न चायं सादृश्यात्संव्यवहार इति***। ननु ज्वालादिषु सादृश्यादसत्यामपि सादृश्यबुद्धौ तद्भावावगमनिबन्धनः संव्यवहारो दृश्यते यथा, तथेहापि भविष्यतीति पूर्वापरितोषेणाह ***भवेदपि कदाचिद्वाह्यवस्तुनीति***। **तथाहि** विविधजनसङ्कीर्णगोपुरेण पुरं निविशगानं नरान्तरेभ्य आत्मानिर्धारणायासधारणं चिह्नं विदधतमुपहसन्ति पाशुपतं पृथग्जना इति॥२५॥ ***इतश्चानुपपन्नो वैनाशिकसमय इति***। अस्थिरात् कार्य्योत्पत्तिमिच्छन्तो वैनाशिका अर्थादभावादेव भावोत्पत्तिमाहुः। उक्तमेतदधस्तात्। निरपेक्षात् कार्य्योत्पत्तौ पुरुषकर्मवैयर्थ्यम्। सापेक्षतायां च क्षणस्याभेद्यत्वेनोपकृतत्वानुपकृतत्वानुपपत्तेः अनुपकारिणि चापेक्षाभावादक्षणिकत्वप्रसङ्गः। सापेक्षत्वानपेक्षत्वयोश्चान्यतरनिषेधस्यान्यतर-विधाननान्तरीयकत्वेन प्रकारान्तराभावान्नास्थिराद्भावाद्भावोत्पत्तिरिति क्षणिकपक्षेऽर्थाद-

भावाद्भावोत्पत्तिरिति परिशिष्यत इत्यर्थः। न केवलमर्थादापद्यते दर्शयन्ति च ***नानुपमृद्य प्रादुर्भावात् इति***। एतद्विभजते ***विनष्टाद्धि किलेति***। किलकारोऽनिच्छायां। **कूटस्थाच्चेत्कारणात् कार्यमुत्पद्येताविशेषात् सर्वं सर्वत उत्पद्येत। अयमभिसन्धिः**-कूटस्थो हि कार्यजननस्वभावो वा स्यादतत्स्वभावो वा। स चेत्कार्यजननस्वभावस्ततो यावदनेन कार्यं कर्त्तव्यं तावत्सहसैव कुर्यात्, समर्थस्य क्षेपायोगात्। अतत्स्वभावत्वे तु न कदाचिदपि कुर्यात्। यद्युच्येत समर्थोऽपि क्रमवत्सहकारिसचिवः क्रमेण कार्याणि करोतीति तदयुक्तम्, विकल्पासहत्वात्। किमस्य सहकारिणः कञ्चिदुपकारमादधति न वा? अनाधानेऽनुपकारितया सहकारिणो नापेक्षेरन्। आधानेऽपि भिन्नमभिन्नं वोपकारमादध्युः। अभेदे तदेवाभिहितमिति कौटस्थ्यं व्याहन्येत। भेदे तूपकारस्य तस्मिन् सति कार्यस्य भावादसति चाभावात्सत्यपि कूटस्थे कार्यानुत्पादादन्वयव्यतिरेकाभ्यामुपकार एव कार्यकारी, न भाव इति नार्थक्रियाकारीति भावः। **तदुक्तम्-**

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः॥ इति॥

तथा चाकिञ्चित्करादपि चेत् कूटस्थात्कार्यं जायेत सर्वं सर्वस्माज्जायेतेति सूक्तम्। उपसंहरति ***तस्मादभावग्रस्तेभ्य इति***। ***तत्रेदमुच्यते***- *नासतोऽदृष्टत्वादिति*। नाभावात् कार्योत्पत्तिः। कस्मात्? अदृष्टत्वात्। न हि शशविषाणादङ्कुरादीनां कार्याणामुत्पत्तिर्दृश्यते। यदि त्वभावाद्भावोत्पत्तिः स्यात्ततोऽभावत्वाविशेषात् शशविषाणादिभ्योऽप्यङ्कुरोत्पत्तिः। नह्यभावो विशिष्यते। विशेषणयोगे वा सोऽपि भावः स्यान्न निरुपाख्य इत्यर्थः। विशेषणयोगमभावस्याभ्युपेत्याह ***नाप्यभावः कस्यचिदुत्पत्तिहेतुरिति***। अपि च यद्येनानन्वितं न तत्तस्य विकारः, यथा घटशरावोदञ्चनादयो हेम्नानन्विता न हेमविकाराः। अनन्विताश्चेते विकारा अभावेन। तस्मान्नाभावविकाराः। भावविकारास्तु ते, भावस्य तेनान्वितत्वादित्याह ***अभावाच्च भावोत्पत्तविति***। अभावकारणवादिनो वचनमनुभाष्य दूषयति *यत्तूक्तम् इति*। स्थिरोऽपि भावः क्रमवत्सहकारिसमवधानात् क्रमेण कार्याणि करोति। न चानुपकारकाः सहकारिणः। स चास्य सहकारिभिराधीयमान उपकारो न भिन्नो नाप्यभिन्नः किन्त्वनिर्वाच्य एव। अनिर्वाच्याच्च कार्यमप्यनिर्वाच्यमेव जायते। न चैतावताअस्थिरस्याकारणत्वं; तदुपादानत्वात् कार्यस्य रज्जूपादानत्वमिव भुजङ्गस्येत्युक्तम्। **तथा च** श्रुतिः 'मृत्तिकेत्येव सत्यम्'' इति। **अपि च** येऽपि

सर्वतो विलक्षणानि स्वलक्षणानि वस्तुसन्त्यास्थिषत, तेषामपि किमिति बीजजातीयेभ्योऽङ्कुरजातीयान्येव जायन्ते कार्याणि, न तु क्रमेलकजातीयानि। न हि बीजाद्बीजान्तरस्य वा क्रमेलकस्य वात्यन्तवैकक्षण्ये कश्चिद्विशेषः। न च बीजाङ्कुरत्वे सामान्ये परमार्थसती येनैतयोर्भाविक: कार्यकारणभावो भवेत्। तस्मात्काल्पनिकादेव स्वलक्षणोपादानाद्बीज-जातीयात्तथाविधस्यैवाङ्कुरजातीयस्योत्पत्तिनियम आस्थेयः। अन्यथा कार्यहेतुकानुमानोच्छेदप्रसङ्गः। दिङ्मात्रमत्र सूचितं। प्रपञ्चस्तु ब्रह्मतत्त्वसमीक्षान्यायकणिकयो: कृत इति नेह प्रतन्यते विस्तरभयात्।।२६।। **उदासीनानामपि चैवं सिद्धिः।** भाष्यमस्य सुगमम्।।२७।।

इति भामतीः समुदायाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ समुदायाधिकरणम्।।३।।

।।सू।। **समुदाय उभयहेतुकेऽपि तदप्राप्तिः**।।१७।।

वैदिकैकदेशिनां मतं निराकृतम्। इदानीं वेदबाह्यानां मतं निरस्यते। प्रथममिह बौद्धसिद्धान्तसिद्धः समुदायकारणवादो युक्तो न वेति संदेहः।

युक्त इति पूर्वः पक्षः। तथा ह्यामनन्ति–द्वौ समुदायौ बाह्याभ्यन्तरौ। बाह्यः पृथिव्यादिः। आन्तरश्चित्तचैत्त्यात्मकः। समुदायद्वयमेव सर्वं जगत्। तथा हि–बाह्यसमुदायस्य परमाणवः कारणम्। ते च चतुर्विधाः। पार्थिवाप्यतैजसवायव्याः। तेभ्यो युगपत्पुञ्जीभूतेभ्यः समुदायो बाह्यो जायते। आन्तरस्य समुदायस्य स्कन्धपञ्चकं कारणम्। रूपवेदनाविज्ञानसंज्ञासंस्काररूपाः पञ्च स्कन्धाः। चित्तेन निरूप्यमाणाः शब्दस्पर्शरूपादयो रूपस्कन्धः। तदभिव्यक्तिर्विज्ञानस्कन्धः। तज्जन्यं दुःखं वेदनास्कन्धः। देवदत्तादिनाम संज्ञास्कन्धः। तेषां वासना संस्कारस्कन्धः। तेभ्यः पुञ्जीभूतेभ्य आन्तरः समुदायो जायते। अतः समुदायद्वयकारणवादे न कोऽपि विरोध इति।।

एवं प्राप्ते निरूप्यते–न युक्तः समुदायद्वयकारणवाद इति। ते हि क्षणिकत्ववादिनः। कथमेतेषां समुदायः संभवति? कारणानां क्षणिकत्वेन तदानीमेव नष्टत्वात् कार्योत्पादनासमर्थत्वात्।।

।।सू।। **इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात्**।।१८।।

अस्थिरेषु स्थिरत्वबुद्धिरूपाया अविद्याया रागादीनां चान्योन्यकारणत्वात् संघातभावादिकमुपपन्नमिति चेत्–न, अविद्यायाः संघातभावानिमित्तत्वात्। न हि शुक्तिकादिषु रजतादिबुद्धिरूपाविद्यया शुक्तिकादिर्वस्तुतो रजतादिकार्यं करोति। विदुषस्तदानीमेव तत्र नष्टत्वात् तन्निमित्तरागादयोऽपि न संभवन्ति। तस्मादयुक्तः समुदायकारणवादः।।

युक्त्यन्तरमाह—

।।सू।। **उत्तरोत्पादे च पूर्वनिरोधात्**।।१९।।

उत्तरघटक्षणोत्पत्तौ पूर्वघटक्षणस्य नष्टत्वात् अभावस्यैवोत्पादकत्वाविशेषात सर्वदा सर्वत्र सर्वोत्पत्तिरपि स्यात्।।

।।सू।। **असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा**।।२०।।

असति हेतावुत्पत्तौ अधिपतिसहकार्यादीनां ज्ञानहेतुत्वप्रतिज्ञाविरोधः स्यात्। तस्यापि स्थित्यभ्युपगमे युगपत् घटद्वयोपलब्धिप्रसक्तिः। अस्थितौ संप्रयोगज्ञानादेः यौगपद्यम्।।

।।सू।। **प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्**।।२१।।

निरोधो निरन्वयविनाशः। स स्थूलः सूक्ष्मश्च न संभवति। कपालादिभावरूपावस्थाप्राप्तेरेव विनाशशब्दवाच्यत्वात् सतो द्रव्यस्याविच्छेदात्। **ततो** न क्षणिकत्वसिद्धिः।।

।।सू।। **उभयथा च दोषात्**।।२२।।

उत्पन्नस्य तुच्छत्तापत्तौ तुच्छादुत्पत्तौ चाभावादुत्पत्यसंभवात्। अभावात्मककार्योत्पत्तिरूपाद्दोषादसमञ्जसमिदं दर्शनम्।।

।।सू।। **आकाशे चाविशेषात्**।।२३।।

आकाशे च न तुच्छत्वमुपपद्यते। अबाधितप्रतीतिसिद्धत्वादस्य श्येनादिपतनदेशत्वेन।।

।।सू।। **अनुस्मृतेश्च**।।२४।।

प्रत्यभिज्ञानादपि न क्षणिकत्वसिद्धिः। तदेवेदमिति सामानाधिकारण्येनातीतवर्तमानकालविशिष्टं वस्त्वेकमिति हि विज्ञायते। सामग्री च तस्याः पूर्वानुभवजनितसंस्कारवतः पुरुषस्येन्द्रियसंयोगः। ततः क्षणिकात्वाद्यनुपपन्नार्थाभिधानात् असंबद्ध एव समुदायकारणवादः।।

इति समुदायाधिकरणम्।।३।।

अथ दृष्टत्वाधिकरणम्।।४।।

बाह्यार्थास्तित्ववादिषु गोघटादीनां प्रत्यक्षत्ववादिनो बौद्धा निरस्ताः। ज्ञानानुमेयत्ववादिनो निरस्यन्ते—

।।सू।। **नासतोऽदृष्टत्वात्**।।२५।।

इह बौद्धैकदेशिनो ज्ञानानुमेयत्ववादो युक्तो न वा।।

इति संशये पूर्वपक्षप्रसङ्गः - ज्ञाने स्वाकारं समर्प्य विनष्टमंर्थ ज्ञानाकारवैचित्र्येणानुमिनोति ज्ञाता, ततो ज्ञानवैचित्र्येण बाह्यार्थवैचित्र्यमनुमीयत इति।।

तदेतन्न संभवति, अर्थस्य क्षणिकत्वादसतो विनष्टस्य धर्मिणो धर्मसंक्रमणस्यादृष्टत्वात्।।

।।सू।। **उदासीनानामपि चैवं सिद्धिः**।।२६।।

क्षणिकत्वाभ्युपगमादन्य एवानुष्ठातान्य एव फलस्वामी। अतो निष्प्रयत्नानामपि सर्वार्थसिद्धिः स्यादिति दुरुपपादोऽयं वाद इति।।

इति दृष्टत्वाधिकरणम्।।४।।

इति श्री कण्ठभाष्य समुदायाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ समुदायाधिकरणम्।।३।।

सू०।। **समुदाय उभयहेतुकेऽपि तदप्राप्तिः।।१७।।** माध्यमिकयोगाचारसौत्रांतिकवैभाषिक-संज्ञाश्चतुर्विधा बौद्धाः। ते सर्वेऽप्यादिबुद्धस्य शिष्याः क्रमेण सर्वशून्यत्वबाह्यार्थशून्यत्वबाह्यार्थानुमेयत्वबाह्यार्थप्रत्यक्षत्ववादिनः। तत्र 'बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलप्यास्ते निःस्वभावाश्च देशिकाः। यथा यथा विचार्यंते विशीर्यन्ते तथा तथे' त्यादिन्यायैर्गुरुणा सर्वशून्यत्वं बोधितेषु शिष्येषु ये गुरूक्तं तथैवाङ्गीकृत्य पर्यनुयोगं नाकुर्वन् ते गुरूक्तस्य श्रद्धयाङ्गीकरणादुत्तमाः, तत उपरि पर्यनुयोगाकरणादधमाश्चेति उत्तमाधमत्वयोगान्मध्यमां स्थितिमास्थिता माध्यमिकाः। ये तु बाह्यार्थानां शून्यत्वमङ्गीकृत्य कथं विज्ञानस्यापि शून्यत्वं जगदान्ध्यप्रसङ्गादिति पर्यनुयोगमकुर्वन् ते गुरूक्तङ्गीकरणस्याचारसंज्ञया बौद्धमते परिभाषितस्य तत उपरि पर्यनुयोगस्य योगसंज्ञया तन्मते परिभाषितस्य च सद्भावाद्योगाचाराः। गुरुणा तान्प्र 'त्यान्तरं विज्ञानमात्रमस्ति, तदेव नीलाद्याकारं न तु तद्व्यतिरेकेण बाह्यं नीलादिकमस्ति, सहोपलम्भनियमेन नीलादीनां तत्तद्विज्ञानानां चाभेदसिद्धेः, भेदे गवाश्ववत्तन्नियमाभावप्रसङ्गात्, तदेव विज्ञानाकारात्मकं नीलादिकमनादिवासनावशात् बहिर्वदवभासत, इति बोधिते कथं सर्वथैव बाह्यार्थस्य शून्यत्वं बाह्यस्य नीलादेरवभासात् अहमुल्लेखेन विज्ञानस्यान्तरतया इदमुल्लेखेन नीलादेर्बाह्यतया च भेदेऽवभासमाने सहोपलम्भनियममात्रस्याप्रयोजकस्याभेदसाधनाक्षमत्वात् 'सहत्वोक्तयैव भेदानुमतेश्चे' ति यैः पर्यनुयुक्तं तान्प्रति 'सत्यमस्ति बाह्यं नीलादिकम्। न तु तत्प्रत्यक्षम्। अनुत्पन्नस्याविद्यमानस्य प्रत्यक्षत्वायोगात् उत्पन्नस्य क्षणिकस्य स्थित्यभावात्। किंतूत्पद्यमानं नीलादिकं विज्ञाने स्वाकारमर्पयित्वा नश्यति। ततो विज्ञानगतेनाकारेणातीतं नीलादिकमनुमीयत' इति बोधिते सति तै 'रित्थं शिष्यप्रश्नानुरोधेन कियत्पर्यन्तमुपदेशसूत्रं प्रवर्तिष्यत' इति सूत्रस्यांते पृष्टे गुरुणाभिहितं 'भवन्तः सूत्रस्यान्तं पृष्टवन्तः सौत्रांतिका भवंत्विति। अतस्ते सौत्रांतिकाः। ततो 'विज्ञानेनानुमेयं बाह्यमितीयं विरुद्धा भाषा, तस्यैव विज्ञानस्य

तद्विषयप्रत्यक्षत्वात् प्रत्यक्षस्य कस्यचिदर्थस्याभावे व्याप्तिसंवेदनस्थानाभावेनानुमानाप्रवृत्तेश्चे' ति यैः पर्यनुयुक्तं ते वैभाषिकाः। तान्प्रति बाह्यप्रत्यक्षत्वमप्युपदिष्टम्। एवं विनेयबुद्ध्यनुसारेण चतुर्धोपदेशेऽपि क्षणिकत्वादिभावनया सर्वेऽपि क्रमेण सर्वशून्यत्वं प्रपित्स्यंत इति गुरोरभिप्रायः। तथाऽपि पर्यनुयोक्तारो यथाश्रुतं गुरोरुत्तरवाक्यस्यार्थं श्रद्दधाना मतांतराण्यास्थिषत। तत्र वैभाषिकादिक्रमेण चतुर्विधानपि बौद्धान्निरसितुं चत्वार्यधिकरणानि। ततः क्षपणकान्निरसितुमेकमधिकरणम्। एतेषामधिकरणानां पूर्वाधिकरणाभ्यां पेटिकासंगतिमाह- **वैदिकेति।** वैदिकत्वेन सिद्धांतप्रत्यासन्नतया बुद्धिस्थाः कापिलकाणभुजाक्षचरणाः पूर्वं निराकृताः। इदानीमवैदिका निरस्यन्त इति पेटिकासङ्गतिः। अर्धवैनाशिकनिरासानंतरं सर्ववैनाशिका निरस्यंत इति अवांतरसङ्गतिः। केषाञ्चित्क्षणिकत्वमभ्युपगच्छन्तस्तार्किकाः अर्धवैनाशिकाः। ते हि जाठराग्निना पच्यमानानां भुक्तपीताहारौषधरसद्रव्यरूपेणावयवानां प्रतिक्षणमुपचयापचयवैषम्यादवयवि शरीरमपि प्रतिक्षणमुपचयापचयवदन्यदन्यद्भवति। यद्यपि शरीरस्य प्रतिकलमुपचयापचयदर्शनं नास्ति, तथाऽपि वर्षधारानिपातैस्तटाकजलस्येव घटीयन्त्रोत्क्षेपणैः कूपजलस्येव चान्ते दर्शनाद्यौक्तिकं प्रतिक्षणं किञ्चित्किञ्चिदुपचयापचयज्ञानमस्त्येव, चन्द्रतारकादीनां मुहूर्तादिकालव्यवधानेन बहुदेशान्तरप्राप्तिदर्शनात् प्रतिक्षणं स्वल्पदेशान्तरप्राप्तिज्ञानवदित्यभ्युपगच्छन्ति। एवं प्रतिक्षणमवश्यंभाविभिः खननपूरणादिभिः भूगोलकस्य नदीजलसंसर्गशीकरोत्पतनैः समुद्रस्य चोपचयापचयवतः क्षणिकत्वमभ्युपगच्छंति। अतस्तेऽर्धवैनाशिकाः। बौद्धास्तु सर्वस्य प्रपञ्चस्य क्षणिकत्वमभ्युपगच्छन्तस्सर्ववैनाशिकाः। बौद्धेष्वपि वैभाषिकसौत्रांतिकाः परमाणुकारणवादिन इति तत्प्रत्यासत्त्या तदुभयसाधारणदूषणोक्तया तेषामुभयेषां प्रथमाधिकरणे निरासः। द्वितीयाधिकरणे बाह्यार्थानुमेयत्ववादेन किञ्चिद्वैषम्यवतां सौत्रांतिकानामसाधारणदूषणोक्तया निरासः। ततः क्षणिकत्वाभ्युपगमसाम्यात् योगाचाराणां ततो बौद्धत्वसाम्यात् माध्यमिकानां तदनंतरमवैदिकत्वसाम्यात् क्षपणकानामिति विवेकः। यद्यपि क्षपणका अपि परमाणुवादिनः। तथा वैभाषिकसौत्रांतिकैः खरस्नेहोष्णेरणस्वभावाश्चतुर्विधाः परमाणव इति परमाणुचातुर्विध्यं तार्किकवदभ्युपगम्यते। परमाणूनां तार्किकैः स्थिरत्वैकान्त्यवत्तैः क्षणिकत्वैकांत्यमुच्यते। क्षपणकास्तु परमाण्वैकविध्यवादिनः स्थैर्यास्थैर्याद्यनैकान्त्यवादिनश्चेति वैभाषिकसौत्रांतिकानां तार्किकप्रतयासत्त्यतिशयो द्रष्टव्यः। इत्थमवांतरसंगतिं सूचयन् संशय दर्शयति-**प्रथममिहेति।** सूत्रोक्तदूषणं विशदयितुं परमते दूषणीयांशमनुवदति-**तथा हीति। पृथिव्यादिरिति।** भूभूधरसमुद्रादिर्विषय इत्यर्थः। **चित्तेति**। चित्तविज्ञानचैत्यानि स्कंधांतराणि। **समुदायद्वयमेवेति**। परमाणव एव व्यणुकादिभूतभौतिकपर्यंतं बाह्यसमुदायरूपेण संहन्यंते नावयविनमारभन्ते। एवं पञ्च स्कंधाः आंतरसमुदायरूपेण संहन्यंत इत्यनेन प्रकारेण सर्वं जगत्समुदायद्वयात्मकमित्यर्थः। तदेव

प्रपञ्चयति-**तथा हीति। चित्तेन निरूप्यमाणा इति।** रूपादीनां बाह्यत्वेऽपि आन्तरेण चित्तेन निरूप्यमाणत्वात् आंतरसमुदायमध्ये परिगणनमित्यभिप्रायेणेदं विशेषणम्। यद्वा। अत्र शब्दस्पर्शादय इत्यनेनांतरसमुदायांतर्गतशरीरेंद्रियादिरूपेण संहन्यमानानि भूतानि विवक्षितानि। तेषु चैत्त्यशब्दप्रवृत्त्यर्थमिदं विशेषणम्। **तदभिव्यक्तिरिति।** रूपाद्युपलब्धिरित्यर्थः। केचित्तु 'तस्यादालयविज्ञानं यद्भवेदहमास्पदम्। तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखे'दिति बौद्धैर्विभक्तं द्विविधमपि ज्ञानं प्रवाहापन्नं विज्ञानस्कंध इत्याहुः। **तज्जन्यं दुःखमिति।** दुःखग्रहण सुखोपेक्षावस्थयोरप्युपलक्षणम्। **देवदत्तादिनामेति।** केचित्तु देवदत्तादिनामोल्लेखी सविकल्पकप्रत्ययस्संज्ञास्कंध इत्याहुः। तन्मते निर्विकल्पकमेव विज्ञानस्कन्धः। **तेभ्य इति।** उक्तेभ्यः पञ्चभ्यः स्कंधेभ्य इत्यर्थः। केचित्तु रूपस्कंधो बाह्यः तव्द्यतिरिक्तमेव स्कन्धचतुष्टयं चित्तचैत्यात्मकमित्याहुः। सूत्रकारस्याशयस्थितं हेतुमुत्तरसूत्रपर्यालोचनोन्नेयं दर्शयति-**ते हीत्यादिना।** समुदाययोरेकैकाणुस्कंधहेतुकत्वे मेलनार्थव्यापाररहिततद्धेतुकत्वे वा सदातनत्वापत्तेः मेलनहेतुव्यापाराविष्टानेकहेतुकत्वं वक्तव्यम्। न च तत्क्षणिकत्ववादिभिरुपपादयितुं शक्यम्। येषां व्यापारावेशस्तेषां मेलनक्षणे नष्टत्वात् येषां मेलनं तेषां व्यापारक्षणेऽनुत्पन्नत्वात् केषांचिन्मेलनहेतुव्यापारेणान्येषां मेलनाभ्युपगमेऽतिप्रसंगात्। न च व्यापारवतां मेलनवतां चैकसंतानवर्त्तित्वादनतिप्रसंगः। क्षणिकसंतानिव्यतिरिक्तस्य तावदनुयायिनः स्थिरस्य संतानस्य सर्वक्षणिकत्ववादिभिरनभ्युपगतत्वादिति भावः।।सू०।। **इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात्**।।१९।। अस्थिरेषु स्थिरत्वभ्रातिंरूपाविद्या रागादिहेतुः, रागादिपारवश्यं च **तद्धेतुरित्यनुभवसिद्धम्।** एवमितरेतरहेतुत्वेनानुभवसिद्धस्याविद्यारागादिरूपस्य संसारचक्रस्य शरीरेंद्रियविषयादिरूपसमुदायाभावेऽनुपपत्तेः तदाक्षिप्तस्समुदायः सिध्यन्प्रतिक्षेप्तुं न शक्यत इति शंकार्थः। सूत्रे प्रत्ययशब्दस्तन्मतपरिभाषया हेतुवाची। भाष्ये रागादिशब्दस्तन्मते अविद्याकार्यत्वेन परिगणितानां संस्कारादीनां संग्राहकः। ते हि परिगणयंति-अविद्या, संस्कारः, विज्ञानं, नामरूपं, षडायतनं, स्पर्शः, वेदना, तृष्णा, उपादानं, भवः, जातिः, जरा, मरणं, शोकः, परिदेवना, दुःखं दुर्मनस्ता, इत्येवंजातीयकान्। तत्र क्षणिकार्यदुःखशून्येषु स्थायिनित्यसुखवस्तुबुद्धिरविद्या। ततो रागद्वेषमोहास्ततो धर्माधर्मसंस्कारा इत्येतत्सर्वं संस्कारः। संस्कारवशाज्जीवस्य गर्भाशयद्रव्ये वृत्तिलाभो विज्ञानम्। विज्ञानसंसर्गाभिद्द्भद्रव्यन्य कललपेश्याद्याकारेणाभिव्यक्तिर्नामरूपम्। तदभिव्यक्तिक्रमेण षडिन्द्रियायतनशरीरनिर्वृत्तिष्षडायतनम्। निर्वृत्तशरीरेंद्रियस्य गर्भगतविषयेन्द्रियसंसर्गजं ज्ञानं स्पर्शः। तन्निमित्ते सुखदुःखे वेदना। सुखप्राप्तिदुःखपरिहारार्था विषयोपादानेच्छातृष्णा। तया विषयेषु प्रवृत्तिरुपादानम्। ततः क्रमेण गर्भान्निष्क्रमणं भवः। निर्गतस्य मनुष्यत्वादिजात्यभिमानो जातिः। क्रमभाविनि जरामरणे प्रसिद्धे। म्रियमाणस्य पुत्रकलत्राद्यभिषंगादन्तर्दाहः शोकः। तदुत्थः प्रलापः

परिदेवना। मरणक्लेशो दुःखम्। मानसं दुःखं दौर्मनस्यमित्यादि व्याचक्षते। 'न सङ्घातभावानिमित्तत्वा' दिति परिहारसूत्रांशं व्याचष्टे-**नेत्यादिना।** कारणाभावेन समुदायभावानुपपत्तावुक्तायां कारणप्रदर्शनेन हि तदुपपत्तिस्समर्थनीया। तत्र किमविद्याकार्यरागादिमध्ये समुदायद्वयमप्यंतर्भूतमित्यविद्यैव कारणमिति शङ्क्यते। उताविद्यारागद्वेषादिप्रवाहस्यानुभवसिद्धस्य उपपादनार्थमवश्यांगीकरणीये शरीरेंद्रियविषयादिरूपबाह्याभ्यन्तरसमुदायभावे तत्कारणं किंचिदवश्यं कल्पनीयमिति। आद्य आह-**अविद्याया इति।** यद्यविद्यैव केवला परमाण्वादिव्यापारनिरपेक्षा समुदायहेतुः स्यात् तदा शुक्तिरजतभ्रांतिरूपयाप्यविद्यया शुक्तेश्शुक्तिरूपसमुदायताप्रहाणेन रजतरूपसमुदयतापत्तिः स्यादित्यर्थः। अविद्यादीनामितरेतरप्रत्ययत्वमनुपपन्नमित्याह-**विदुष इति।** अन्यस्याविद्ययान्यस्य रागादिजननेऽतिप्रसंग इति भावः। द्वितीये तु क्षणिकवादे परमाण्वादिव्यापाररूपकारणासंभव उक्त एवेति भावः।। स्यादेतत्। नायं कारणासंभवदोषः प्रसरति। विरलपरमाणुभ्यः सन्निकृष्टाः परमाणवो जायन्ते। परस्परसंनिकर्ष एव तेषां समुदायभाव इत्यभ्युपगमात्। न चैवमभ्युपगमेऽन्येषां कर्मणान्येषु संयोगजननेऽतिप्रसंग इति दोषः प्रसरति। न हि बौद्धमते क्षणिकेषु परमाण्वादिषु कर्मसंयोगो वा जायते। किं तु देशांतरस्थेन देशांतरस्थस्योत्पादः कर्मप्रत्ययस्यालम्बनं विप्रकृष्टदेशेन सन्निकृष्टदेशे तदुत्पादस्संयोगप्रत्ययस्य। ततश्च यथा न्यायमते नानादिक्प्रभवशब्दमूलकशब्दपरंपराजननक्रमेण बहूनां शब्दानां मेलने सति कोलाहलप्रत्ययः। एवं बहूनां परमाणूनां तथा मेलने सति घटोऽयं पटोऽयमित्यादि प्रत्यक्षमुपपद्यते। दृष्टं हि एकैकस्य केशस्य दूरे दृश्यत्वाभावेऽपि बहूनां केशानां कबर्यादिरूपेण पुंजीभावे सति तत्समुदायस्य दृश्यत्वम्। न चादृश्यसमुदायस्यादृश्यत्वनियमः। अप्रयोजकत्वात्। एकैकस्य तंतोः स्यंदनाकर्षणशक्तयभावेऽपि तत्समुदायस्य तदाकर्षणशक्तिवदेकैकस्य परमाणोरदृश्यत्वेऽपि तत्समुदायस्य दृश्यत्वोपपत्तेः। यदाहुः-'प्रत्येकं दृष्टययोग्यत्वेऽप्यणूनां दृश्यता भवेत्। सामग्न्ये सति तंतूनां नौकाद्याकर्षशक्तिवत्।।' इति। तस्मान्न कारणासंभवेन समुदायभावानुपपत्तिः इत्येवमाशङ्कानिराकरणार्थं युक्तयंतरपरत्वेनोत्तर-सूत्रवतारयति-**युक्तयंतरमाहेति।** सू०।। **उत्तरोत्पादे च पूर्वनिरोधात्**।।१९।। घट एव क्षणो घटक्षणः। बौद्धमते वस्तुतः कालो नास्ति। उद्यन्नेव स्वरसंभगुरो घटादिः क्षणपरिकल्पनामात्रनिमित्तं भवति। स च घटादिः स्वोदयविनाशपरिकल्पितक्षणवत्त्वात् क्षणिकोऽपि भवति। वपुष्मान् शिलापुत्रक इतिवत्। वस्तुतः स्वव्यतिरिक्तक्षणाभावात् स्वयमेव क्षणोऽपि भवतीति तेषां प्रक्रिया। ननु, नष्टस्य न कारणत्वासंभवः। उक्तं हि तत्वसंग्रहे-'भावानां कारणत्वं नानष्टतया न स्थिततया वा अपि तु भूततया। भूतश्च स्थितो वा भवतु नष्टो वा कारणान्तरपौष्कल्ये सति स्वकार्यमविलंबेन करोति। न च नष्टस्यात्यंतासत्त्वम्। येन न ह्यसतः सतः कार्यक्रिया युज्यत इति चोद्येत। स्ववर्तमानक्षणे सत्त्वात्। सतश्चासद्रूपता नास्ति। तस्मात् स्वकीयेन सद्रूपेणेह वा जन्मांतरे वा फलदायको भवति।

यथा बीजे कृतसंस्कारात् पुष्पफलादिषु वर्णरसविशेषा मध्यावस्थास्वद्रष्टास्समुत्पद्यन्त' इति। तस्मान्नष्टत्वेन न कारणत्वे किञ्चिदपराध्यते इत्याशङ्क्याह-**अभावस्येति।** भावरहितस्य कार्यकाले असत इति यावत्। ततश्च यदि कार्यदशायामसदपि यदा कदाचित्पूर्वं सत्त्वमात्रेण कारणं स्यात् तदा सर्वदा सर्वत्र सर्वस्याप्युत्पत्तिः स्यात्। घटोत्पत्तिदशायामंकुरादेरप्युत्पत्तिः स्यात्। अनादौ कालप्रवाहे नष्टस्य बीजादेस्सत्त्वात्। न च क्षेत्रतत्कर्षणादिसहकारिपौष्कल्याभावश्शङ्कनीयः। तस्याऽपि नष्टस्य सत्त्वाविशेषादित्यर्थः। अतो नष्टस्य कारणत्वायोगात् दोहलद्रव्याणामपि यावत्कार्योत्पत्ति सूक्ष्मरूपेणानुवृत्तिरङ्गीकरणीयेति भावः।। स्यादेतत्। चिरनष्टस्य निर्व्यापारस्य माभूत्कारणत्वम्। स्वरूपेण स्वव्यापाररूपेण वा पूर्वक्षणवर्त्तिनस्तु स्यात्। अवश्यं च कारणस्य पूर्ववर्त्तित्वं वाच्यम्। तेनैव कारणत्वोपपत्तौ किं कार्यकालवर्त्तित्वेन। लोके च विनष्टस्यैव बीजस्याङ्कुरे क्षीरस्य दन्धि मृत्पिण्डस्य घटे च कारणत्वं सम्प्रतिपन्नं दृश्यते। यदि तु कारणस्य कार्यकालवर्तित्वमपेक्ष्यते तदा बीजादिविनाशोऽङ्कुरादिकारणं पूर्वघटक्षणादिविनाशः उत्तरघटक्षणादिकारणमित्यस्त्वित्याशंकानिराकरणार्थमग्रिमं सूत्रत्रयम्। तत्राद्यशंकानिराकरणार्थमिदं सूत्रम्-**असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा**।।२०।। **असतीति।** कार्यदशायामिति शेषः। **अधिपतीति।** अधिपतिसहकार्यालम्बनसमनंतरप्रत्ययाः चत्वारः चित्तचैत्त्योत्पत्तिहेतव इति बौद्धानां प्रतिज्ञा। तथा हि-बुद्धसूत्रम्-'चतुर्विधान्हेतून्प्रतीत्य चित्तचैत्त्या उत्पद्यंत' इति। अधिपतिरिंद्रियम्। तद्धि ज्ञानस्य रूपादिषु पंचस्वेकैकमात्रविषयत्वनियामकम्। नियामकश्च लोके अधिपतिरुच्यते। सहकारिआलोकादिकम्। आलंबनं घटादिर्विषयः। समनन्तरप्रत्ययः पूर्वज्ञानम्। एतांश्चतुर्विधान् हेतून्प्राप्य चित्तं ज्ञानं चेत्त्याः तदभिन्नाः सुखादयश्च जायन्त इति प्रतिज्ञार्थः। इयं प्रतिज्ञा हीयेत यदि पूर्वोत्तरक्षणवर्त्तित्वं विषयस्य न स्यात्। पूर्वक्षणवर्त्तित्वाभावे हि कारणत्वं भज्येत उत्तरक्षणवर्तित्वाभावे वर्त्तमानत्वग्राहिप्रत्यक्षविषयत्वम्। अन्यथा एतद्दोषसमाधानाय कारणस्य विषयतासिद्ध्यर्थं तस्याऽपि कार्योत्पत्तिक्षणे स्थित्यभ्युपगमे घटद्वययौगपद्यं प्रसज्येत। क्षणिकत्वहानिश्च स्यात्। अथैतद्दोषद्वयपरिजिहीर्षया कारणस्य कार्योत्पत्तिक्षणे स्थितिमनभ्युपगम्य कारणक्षण एव तस्य विषयत्वमभ्युपगम्येत तदा सम्प्रयोगज्ञानयोर्हेतुहेतुमतोर्यौगपद्यं स्यादित्यर्थः। सू०।। **प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्**।।२१।। यद्यपि प्रतिज्ञोपरोधादेव विनाशकारणत्वशङ्कानिरासोऽपि सिद्ध्यति, तथापि तत्र हेत्वंतरप्रदर्शनार्थमिदं सूत्रम्। निरोध इति। असत्कार्यवादिनां बौद्धानां नानुवर्त्तमानस्य द्रव्यस्यावस्थांतरप्राप्तिर्विनाशः किंतु निरन्वयो निरनुवृत्तिको विनाशः। स तैर्निरोधशब्देन परिभाष्यते। स द्विविधः। स्थूलः सूक्ष्मश्च। मुद्गरपाताद्यनंतरं सर्वैरुपलभ्यमानो घटादीनां विनाशः स्थूलः प्रतिसंख्यानिरोध इत्युच्यते। प्रतिसंख्या विषयसत्त्वप्रतिकूला तदसत्त्वग्राहिणी लौकिकानां बुद्धिस्तद्विषयो निरोधः इत्यवयवार्थान्वयात्।

तद्विपरीतो निरोध: अप्रतिसंख्यानिरोध: सूक्ष्म: लौकिकोपलब्ध्ययोग्यो बौद्धैर्युत्तया साध्यमान: प्रतिक्षणविनाश:। तयोरुभयोरप्यप्राप्तिरसंभव:। कुत:। अविच्छेदात्। घटादिरूपेण स्थितस्य द्रव्यस्य स्वरूपतो विच्छेदाभावात्। न च द्रव्यानुवृत्तौ विनष्टौ घट इत्यादिप्रतीतिव्यवहारयोर्निर्विषयत्वापत्ति:। अवस्थांतरापत्तेस्तद्विषयत्वादित्यर्थ:। अत्रायमाशय:। तंतूनां वियोजने सति पटनाश: तंतुसमुदायात्मकस्य पटस्य तंतूनां विप्रकर्षेण नाश इति वा तन्तुसमुदायारब्धस्य पटस्य तंतुसंयोगरूपासमवायिकारणनाशे नाश इति वा यथाकथञ्चिदुत्प्रेक्ष्येत। नैवं घटनाश: कपालसमुदायनाश इति वा कपालसंयोगरूपासमवायिकारणनाशजन्यनाश इति वोत्प्रेक्षितुं शक्यते। घटोत्पत्तिसमये कपालानां मेलनाभावात् घटोत्पत्ते: पूर्वं मृत्पिण्डस्यैव घटनाशानंतर कपालानामेव च व्यवस्थया दर्शनात्। तस्मादेकस्यैव मृद्व्यस्य क्रमभाविपिण्डघटकपालचूर्णाद्यवस्था-शालित्वमित्येवाभ्युपगन्तव्यम्। एवञ्च स एव मृत्पिण्डो घटरूपापन्नो दृश्यते स एव घट: कपालरूपापन्न इति प्रत्यभिज्ञाप्यनुगृहीता भवति। अत: पटादिष्वप्यवस्थान्तरापत्तिरेव विनाश: न तु निरन्वयविनाश:। अय: पीतजलादिष्ववस्थान्तरापत्त्यदर्शनेऽपि सूक्ष्मावस्थान्तरापत्तिरनुमातव्या। एवं प्रतिसंख्यानिरोधस्याप्यसम्भावनायामप्रतिसङ्ख्यानिरोधो दूरापास्त:। एवं च बीजादिषु प्रतिसङ्ख्यानिरोधरूपस्य पूर्वघटक्षणादिष्वप्रतिसङ्ख्यानिरोधरूपस्य चानेकक्षणानुयायिनो विनाशस्याप्रामाणिकत्वात् बीजादिविनाश: कार्यसहभावेन कारणमित्येतदयुक्तमिति। इदं च निरोधाभावसाधनं कार्यसहभाविकारणनिरास इव क्षणिकत्वनिरासेऽप्युपयुज्यत इति तेन क्षणिकत्वाभावोऽपि सिद्ध्यतीत्याह-**तत इति**। प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधयो: अप्राप्ति: कारणत्वासम्भव:। 'आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृत' मिति बौद्धैर्नित्यत्वेनाङ्गीकृतयो: तयो: क्वचिदऽपि कदापि विच्छेदाभावेन सर्वदा सर्वत्र सर्वकार्योत्पत्तिप्रसङ्गात्। न च सहकारिसमवधानवशात् देशकालनियम:। समानन्यायतया सहकारिणामपि निरोधयोरेव कारणत्वप्राप्ते:। न चोपादानत्वाभिमतकारणत्वविषय एव विनाशकारणत्वनियम:। नियामकाभावात्। वस्तुतस्तु मृत्तन्तुसुवर्णाद्युपादानत्वाभिमतगतरूपस्पर्शादिस्वभावानां कार्येऽनुवृत्तिदर्शनात् स्वभाववन्तं विहाय स्वभावस्यानुवृत्त्यसंभवाञ्च उपादानकारणत्वमेव विनाशकारणत्वप्रतिक्षेपकम्। उत्तरघटक्षणादिषु पूर्वघटक्षणादिसादृश्यमात्रं न तु तत्स्वभावानुवृत्तिरिति चेत्, अस्तु नामैवम्। तथाऽपि मृदादीनां घटरूपादत्यन्तसदृशरूपादिमत्त्वे लोकप्रसिद्ध्यनुसारिकार्यानुगतकारणत्वरूपं प्रयोजकं कल्पयितुं युक्तम्। कारणत्वमात्रस्य दण्डचक्रादावतिप्रसक्तत्वात् मृत्त्वादेरननुगतत्वात् उपादानत्वस्यायुतसिद्धिगर्भत्वेन उत्तरूपानतिरेकात्। तस्मादयुक्तं निरोधयो: कारणत्वमिति सूत्रस्यार्थांतरमुपन्यस्तरीतिभिरुन्नेतुं शक्यमिति भाष्ये न प्रदर्शितम्। निरोधयो: कारणत्वनिरासे हेत्वंतरप्रदर्शनार्थं सूत्रम्-सू।। **उभयथा च दोषात्**।।२२।। चकारो भिन्नक्रम:। प्रकारद्वयेन

दोषप्रसंगाच्चेत्यर्थः। बौद्धाः किल कल्पयंति 'बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं चे'ति। संस्कृतमुत्पाद्यं किं तत्त्रयं यस्मादन्यद्बुद्धिबोध्यमुत्पाद्यं क्षणिकं चेत्याकांक्षायां तदपि त्रयं ते परिगणयन्ति, 'प्रतिसंख्याप्रतिसंख्यानिरोधावाकाशं चे' ति। तत्त्रयमवस्तु अभावात्मकं निरूपाख्यं तुच्छमिति मन्यंते। तत्र पूर्वोत्पन्नस्य घटक्षणस्य तदानीमेव निरुद्धत्वप्राप्त्या तुच्छान्निरोधादेव कार्यघटक्षणस्योत्पत्तिरिति यदप्यभ्युपगम्यते तत्र तुच्छादुत्पत्त्यसंभवस्तादवदेको दोषः। तुच्छादुत्पत्त्यभ्युपगमे हि तुच्छस्य निर्विशेषत्वेन कारणविशेषकृतः कार्यविशेष इति व्यवस्थोपपादनासंभवात् घटक्षणानंतरं सर्वस्य जगत उत्पत्तिः स्यात्। तथा तुच्छादुत्पत्तावुत्पद्यमानं कार्यमपि तुच्छमेवोत्पद्येत न तु सद्रूपं कारणानुसारित्वात् कार्यस्येत्यपरो दोषः इति। सू।। **आकाशे चाविशेषात्**।।२३।। यद्यप्याकाशस्य तुच्छत्वनिरासः प्रकृते क्षणिकत्वप्रतिक्षेपे नोपयुज्यते तथाऽपि निरोधप्रसंगात् तत्सहपरिगणितस्याकाशस्य बुद्धिस्थ तया प्रासंगिकस्तस्य तन्निरासः। 'अविशेषा' दित्यस्य तात्पर्यतो व्याख्या**नमबाधितेति**। अबाधितप्रतीतिसिद्धत्वेन पृथिव्याद्यविशेषादित्यर्थः। अन्यथा पृथिव्यादिकमप्यपह्नूयेतेति भावः। **श्येनादीति**। ननु 'इह श्येनः पतती'त्यादिप्रतीतिषु यः श्येनादिपतनदेशत्वेन विषयस्स आकाश इति प्रत्यक्षप्रमाणमनेनोपन्यस्यते?। उत श्येनादिपतने नावकाशसाध्येन लिंगेनानुमीयमानोऽवकाश आकाश इति अनुमानप्रमाणमुपन्यस्यते?। नाद्यः। आलोकस्यैव श्येनपतनाधारतया प्रत्यक्षविषयत्वोपपत्तेः महान्धकारे तस्यैव खद्योतपतनाधारतया प्रत्यक्षविषयत्वोपपत्तेश्च। इह चन्द्र इह सूर्यः इत्यादिप्रत्यक्षे चंद्रसूर्याद्याश्रितस्यालोकस्य तदाधारतया विषयत्वं न संभवतीति चेन्न। 'वने तिलक' इत्यादि प्रतीतौ वृक्षसमुदायरूपस्य वनस्य तिलकाद्याधारत्वेनेव तदाश्रितस्यालोकस्य स्वरूपसंबधविशेषेणोक्तप्रतीतौ तदाधारतया विषयत्वोपपत्तेः। आकाशस्याऽपि हि श्येनाधारता स्वरूपसंबंधविशेषेणैवोपपादनीया। निबिडमूर्त्तद्रव्यस्य भूतलादेरिव तस्य मुख्याधारत्वासंभवात् नीरूपद्रव्यस्याकाशस्य प्रत्यक्षविषयत्वं न संभवतीति तु विशेषः। न च पञ्चीकरणेनाकाशेऽपि रूपमस्तीति वाच्यम्। स्पर्शादेरपि सत्त्वप्रसंगात् त्रिवृत्कारणस्यैव श्रुतिसूत्रसिद्धत्वाच्च। आकाशादिवत् प्रदीपालोकोऽप्यप्रत्यक्षः। विनिगमनाविरहेण उद्भूतरूपवदुद्भूतस्पर्शस्यापि बहिर्द्रव्यप्रत्यक्षताप्रयोजकत्वात् इति चेन्न। आत्मभिन्नद्रव्यप्रत्यक्षत्वरूपस्य बहिर्द्रव्यप्रत्यक्षत्वस्य प्रत्यक्षसामान्यसामग्रयां सत्यां तत्तदिंद्रिययोग्यविषयविशेषरूपविशेष-कारणयोगादर्थवशसम्पन्नस्य घटभिन्नद्रव्यप्रत्यक्षत्वस्येव बहिर्गुणप्रत्यक्षत्वस्येव च कार्यतानवच्छेद-कत्वात्। तस्य कार्यतावच्छेदकत्वेऽपि द्रव्यचाक्षुषप्रयोजकस्य उद्भूतरूपस्य तत्स्पार्शनत्वप्रयोजकोद्भूत-स्पर्शस्य च द्रव्यग्राहकबहिरिंद्रियव्यवस्थापकोद्भूतगुणत्वेनानुगतेन रूपेण तत्प्रयोजकत्वोपपत्तेः लोकसिद्धप्रभाप्रत्यक्षसंग्राहकत्वेनास्यैव तत्प्रयोजकत्वौचित्यात् प्रभाप्रत्यक्षत्वानंगीकारेऽपि प्रत्यक्षस्य तदीयरूपस्यैव श्येनादिपतनाधारत्वप्रतीतिविषयत्वोपपत्तेश्च। स्वरूपसंबंधविशेषमात्रेण

द्रव्याद्याधारताया निरवयवद्रव्य इव गुणेऽप्यविरोधात्। यदि तु नीरूपद्रव्यस्याप्याधारतया प्रत्यक्षविषयत्वमुपपाद्यते तदा दिशामेव तथात्वोपपादनं युक्तम्। इह प्राग्भागे श्येनः प्रतयग्भागे कपोत इत्यादिप्रतीत्यनुसारात्। अपि च। आकाशस्य इह पक्षी नेह पक्षीति आधारत्वानाधारत्वप्रतीतिद्वयं न स्वावयवभेदावच्छेदेन उपपादयितुं शक्यम्। तस्य निरवयवत्वात्। किं तु तत्प्रसृतालोकान्धकारान्यतरावयवावच्छेदेन दिग्भेदावच्छेदेन वोपपादनीयम्। ततो वरमालोकांधकारयोरेव स्वस्वावयवविशेषावच्छेदेनाधारत्वानाधारत्वव्यवस्था दिग्विशेषाणामेव वा। न च तत्तदधः क्षितिभागभेद एवावच्छेदकभेदः स्यादिति वाच्यम्। ऊर्ध्वाधरदेशयोरिह पक्षी नेह पक्षीत्याधारत्वानाधारत्वव्यवस्थायां तद्भेदाभावात्। तस्मान्नेदं भाष्यमाकाशसद्भावे प्रत्यक्षप्रमाणोपन्यासपरं नाप्यनुमानोपन्यासपरमिति युक्तम्। आवश्यकस्य निबिडमूर्तद्रव्याभावस्यैवावकाशरूपत्वोपपत्तेः। आकाशांगीकारेऽपि हि तदभावोऽपेक्षितः। अन्यथा कुड्याद्यावरणेऽप्यप्रतिघातश्येनादिपतनापत्तेः। न च यत्र कुड्याद्यावरणं तत्राकाश एव नास्तीति शंक्यम्। तस्यासर्वगतत्वप्रसंगादावरणापाये तत्रावकाशदर्शनाञ्च। न ह्याकाशस्तत्रासन्नावरणापाये समुत्पद्यते। अपि चावकाशः प्रत्यक्षः। चक्षुरुन्मीलनानंतरमिहावकाशोऽस्ति इह नास्तीत्यसंदिग्धाविपर्यस्तानुभवदर्शनात्। न च नीरूपद्रव्यस्याकाशस्य प्रत्यक्षत्वं युक्तम्। युक्तं तु निबिडमूर्त्तद्रव्याभावस्य प्रत्यक्षघटकुड्यादिप्रतियोगिकस्य। मूर्त्तद्रव्यस्य अभावः प्रागभावः प्रध्वंसो वेत्यादिविकल्पस्त्वत्र न प्रसरति। प्रत्यक्षयावन्निबिडमूर्तद्रव्यसंसर्गाभावकूटस्स इत्युपपत्तेः। आकाशांगीकारेऽपि श्येनादिपतनार्थमपेक्षितस्य मूर्त्तद्रव्याभावस्यैवंरूपस्यैव वक्तव्यत्वात्। ननु, भावांतरमभावो नातिरिक्त इत्यभ्युपगम्यते, ततश्च सर्वतः श्येनादिपतनार्थं मूर्तद्रव्याभावात्मा व्यापको योऽभावोऽभ्युपगम्यते स एवाकाशः स्यादिति चेन्न। तत्र तत्र प्रसृतस्यालोकस्यान्धकारास्य वा तथात्वोपपत्तावतिरिक्तभावकल्पनानपेक्षणात्। तस्मादनुपपन्नमिवेदं भाष्यमाभाति। अत्रोच्यते। प्राग्भागे श्येनः पततीत्यादिप्रतीतिषु प्रागादिदेशरूपो यः श्येनाद्याधारो भासते स एवाकाशः। तद्व्यतिरेकेण दिशोऽनंगीकारात्। स च नीरूपद्रव्यत्वेऽपि इदानीं श्येन इत्यादिप्रतीतिषु काल इव श्येनाद्यधिकरणतया प्रत्यक्षविषय इत्युपपद्यते। न च आलोकादिरेव देशोऽस्तु यदुपाधिसंबन्धेनाकाशे प्रागादिविभागः कार्यः तदुपाधिसम्बन्धस्य तत्राऽपि सम्भवादिति वाच्यम्। प्राग्भागे चंद्रालोकस्समुन्मिषति प्रत्यग्भागे तमोऽनुवर्तत इत्यादिप्रतीतिषु आलोकादेरप्याधारत्वेन प्रागादिदेशप्रतिभासात्। एतेनाकाशेऽपयाधारत्वानाधारत्वव्यवस्थार्थमवच्छेदकत्वेनालोकप्रदेशापेक्षणमावश्यकमित्यपि शङ्का निरस्ता। क्लप्तैः प्रागाद्युपाधिभिस्तदवच्छेदोपपत्तेः। न च प्राग्भागेऽवकाशोऽस्तीत्यादिव्यवहारदर्शनेनावकाशात्मकादाकाशादप्यन्स्तदाधारो देशः स्यादिति वाच्यम्। तत्रावकाशशब्दस्याभिमत मूर्त्तद्रव्यावस्थानविरोधिमूर्तद्रव्यांतरनिरोधाभावपरत्वात्। अत एव

प्राग्भागेऽवकाशोऽस्ति न प्रत्यग्भागे भुञ्जानैर्ब्राह्मणैर्निबिड इति क्वचिद्देशभेदेऽवकाशनिषेधोऽपि द्रश्यते। एवं च मूर्त्तद्रव्याभावरूप एवावकाशस्तत्तदुपाध्यवच्छिन्नः प्रागादिव्यवहारालम्बनं स्यादित्यपि शङ्का निरवकाशा। तस्य देशाधेयत्वेन प्रतीतेः प्राग्भागेऽवकाशो नास्ति तत्र 'नीरंध्रमासते द्विजा' इत्यावरणाभावरूपावकाशप्रतिषेधेऽपि प्रागादिदेशसत्त्वव्यवहाराञ्च। न चैवमावरणाभाव-रूपावकाशस्येव प्राग्भागादिरूपदेशस्यापि देशाधेयत्वेन प्रतीतिरस्ति येन ततोऽपि व्यतिरिक्तो देशः सिद्ध्येत। अयं प्राग्देशः अयं प्रत्यग्देशः इत्यादिरेव हि व्यवहारः न त्वस्मिन्देशे प्राग्देशः इत्यादिरूपः। इहाकाश इति प्रतीतेस्तव्द्यतिरिक्तो देशः स्यादिति चेन्न। लौकिकानामाकाशप्रतीतेरुपरितलवद्दृश्यमाने परितश्चावाङ्मुखेन्द्रनीलमहाकटाहवदवभासमाने मेरुशिखरप्रभाविशेषत्वेनागमसिद्धे नीलद्रव्य एव व्यवस्थितत्वात् तस्य देशविशेषाधेयत्वेन प्रतीतावपि विरोधाभावात् देशरूपस्याकाशस्य व्याप्तस्येदानीमिह घट इत्यादिप्रतीतिषु कालवत्पदार्थविशेषणत्वेन विषयत्वं विना क्वचिदपि लौकिकप्रतीतौ स्वातंत्र्येण विषयत्वाभावात्। तांत्रिकैः स्वस्वकल्पितमर्यादानुसारेण नियमितायाः प्रतीतेरर्थतत्वाव्यवस्थापकत्वात्। तस्मादिदं भाष्यमाकाशे श्येनादिपतनाद्याधारदेशावगाहिप्रत्यक्षप्रमाणोपन्यासपरमिति तावदुपपद्यते। अत एव भाष्ये 'श्येनादिपतनदेशत्वेने' ति देशग्रहणम्। एवमनुमानप्रमाणोपन्यासपरमिदं भाष्यमित्यप्युपपद्यते। न च निबिडमूर्त्तद्रव्याभावेनार्थांतरम्। तदतिरिक्तदेशानंगीकारे यत्रैकः श्येनः पतति तत्रैव श्येनांतरस्यापि पतनप्रसंगात्। समीपे मूर्त्तद्रव्याभावसत्त्वात् तत्र स नास्तीति चेत् सत्यम्। यत्र नास्तीत्युच्यते स एवाकाशाख्यो देशः सिद्ध्येत्। आलोकोऽन्धकारो वा स देशः स्यादिति चेन्न। तदुभयातिरिक्तस्यापि देशस्यानंगीकारे यत्र प्रदीपालोकमण्डलमवतिष्ठते तत्राऽपि तमःप्रसरणप्रसंगात्। आलोकाभावमपेक्ष्य तमः प्रसरति स नास्तीति चेद्यत्र नास्तीत्युच्यते स ताभ्यामप्यन्यो देशः सिद्ध्यन् आकाशः पर्यवस्येदित्येषा दिक्। तस्माद्युक्तमिदं भाष्य 'मबाधितप्रतीतिसिद्धत्वादस्य शेनादिपतनदेशत्वेने' ति। प्रसंगागतमाकाशस्यावस्तुत्वनिराकरणमवसितम्। प्रकृतं क्षणिकत्वनिराकरणमनुवर्तते। अत्रेयं शंका समुन्मिषति। प्रत्यक्षानुमानसिद्धं भावानां क्षणिकत्वं प्रतिक्षेप्तुमशक्यम्। प्रत्यक्षं तावद्वर्तमानवस्तुविषयमवर्तमानादतीतात् पूर्वक्षणवर्त्तिनोऽनागताच्चोत्तरक्षणवर्त्तिनः स्वविषयं व्यावृत्तमवगमयति यथा नीलो घट इति ज्ञानं स्वविषयमरुणादिव्यावृत्तम्। तथानुमानमपि घटादिः क्षणिकः अर्थक्रियाकारित्वात् शरीरादिवत् व्यतिरेकेण तुच्छवत्। न चान्वयदृष्टांतासिद्धिः। शीर्यते हि प्रतिक्षणं शरीरम्। तथाहि-जातमात्रस्य शिशोः शरीरं प्रतिदिवसमुपचितपरिमाणमनुभूयते। तदनुभवो वर्षधारापूर्यमाणतटाकस्येव सूक्ष्मतमसूक्ष्मतरादिप्रणाडिकया क्रमोपचितदर्शनयोग्यपूर्वपरिमाण-वैलक्षण्यस्थूलपरिमाणविषयतयैव समर्थनीयः। न तु झटिति मृत्पिण्डद्वयसंयोजनेन जातस्य महामृत्पिण्डस्येव उक्तप्रणाडीनिरपेक्षोत्पत्तिकमहापरिमाणविषयतया। शरीरे तथा

महापरिमाणोत्पत्तेरदर्शनात्। क्रमोपचीयमानपरिमाणभेदाश्च मुहूर्तनाडिकादिव्यवधानेन लवनिमेषादिव्यवधानेन वा विलंब्य विलंब्य जायंत इत्यत्र न किञ्चिद्विनिगमकमस्ति। ततः क्रमिकेषु क्षणेषु प्रतिक्षणं जायन्त इत्यभ्युपगन्तव्यम्। एकस्मिन्क्षणे परिमाणद्वयादर्शनेन क्षणभेदमात्रस्यापेक्षितत्वादिति देहपरिमाणस्य तावत्सिद्धं क्षणिकत्वम्। अयं न्यायः क्रमसंवर्धमानतृणतरुगुल्मलतादिपरिमाणेषु क्रमिकोच्छूनतापत्तिमन्नीरनिक्षिप्तव्रीहिबीजादिपरिमाणेषु च योजनीयः। परिमाणभेदश्च द्रव्यभेदनियतः तद्भेदमवगमयति। न चाप्रयोजकत्वम्। प्रागवस्थापेक्षयावयवसङ्ख्योत्कर्षं प्रशिथिलावयवसंयोगं वा विना तदसंभवात्। आगंतुकानामवयवांतराणां पूर्वसिद्धं प्रति कारणत्वायोगेन द्रव्यांतरोत्पत्तेः पूर्वद्रव्यनाशस्य चाप्यभ्युपगंतव्यत्वात् निबिडतरसंयोगविनाशं विना प्रशिथिलावयवंसयोगोत्पत्त्यसंभवेन पूर्वसंयोगनाशे सत्यसमवायिकारणनाशेन पूर्वद्रव्यनाशस्य द्रव्यांतरोत्पत्तेश्चाभ्युपगत्वयत्वाञ्च। एवञ्च परिमाणभेदादर्शनेऽपि समुद्रादीनां प्रतिक्षणसमापतन्नदीजलादिरूपावयवान्तरान्वयात् भेदः क्षयरोग्रस्तशरीरादिषु प्रतिक्षणमवयवापचयात् भेदः। समवायिकारणनाशस्य द्रव्यनाशकत्वात्। तस्मान्नान्वयदृष्टांतासिद्धिः। न चापि व्यतिरेकदृष्टांतासिद्धिः। अर्थक्रियाकारित्वमेव सत्त्वमिति 'तुच्छमसन्नार्थक्रियाकारि, नापि क्षणिकम्, किं तु नित्य'मिति बौद्धसिद्धांतादित्येवमाशङ्का-निराकरणार्थं सूत्रम्-सू.।। **अनुस्मृतेश्च**।।२४।। यथा खल्वभिज्ञानं विषयस्य वर्तमानकालसम्बंधमपि विषयीकरोति। तथा च द्विविधज्ञानप्रामाण्यादेकस्य वर्तमानावर्तमानकालद्वयसम्बंधसिद्धौ द्वयोरपि क्रमिकत्वेनाविरोधावगमाद्वर्तमानकालसंबधविषयं ज्ञानं तदयोगव्यवच्छेदमात्रमवगमयेत्। नान्ययोगव्यवच्छेदम्। स्वावच्छेदेन वान्ययोगव्यवच्छेदमवगमयेत्। न तु सर्वात्मना। अत एव चित्रपटे नीलोऽयमिति ज्ञानं नानीलव्यावृत्तिं गमयति प्रदेशविशेषावच्छेदेन वा तां गमयति इत्यभ्युपगम्यते। न हि धर्मयोर्विरोधो भिन्नत्वादेव कल्पनीयः। अपि तु सामानाधिकरण्यप्रमित्यनुदपेन। तदुदये तु स्वमनीषिकामात्रकल्पितो विरोधो न प्रमाणशरणानां हृदयंगमः। अनुमानमपि प्रत्यभिज्ञाप्रत्यक्षविरुद्धं कालात्ययापदिष्टं न क्षणिकत्वं साधयितुं क्षमते। ननु प्रत्यभिज्ञेति नैकं ज्ञानं संभवति। तद्धि न तावदैंद्रियकानुभवरूपमिंद्रियाणामतीततत्तांशे सामर्थ्याभावात्। नाऽपि स्मृतिरूपं संस्कारस्याननु-भूतेदन्तांशे सामर्थ्याभावात्। न च संस्कारेंद्रिययोः परोक्षापरोक्षज्ञानजनकयोः प्रत्यक्षानुमिति-सामग्रयोरिवैकज्ञानजनकत्वं संभवति। येन कालद्वयविशिष्टाभेदविषयं तदेकं ज्ञानं स्यात्। तस्मान्निरंतरोत्पन्नस्मृत्यनुभवरूपज्ञानद्वयात्मिका सा। ततस्सोऽयं देवदत्त इत्यादिव्यवहारमात्रमिति युक्तम्। अभेदज्ञानाभावेऽपि हि सामानाधिकरण्यव्यवहारमात्रमस्ति। यथा शैशवावस्थां परामृश्य वार्धकेऽपि स एवायं चैत्र इति व्यवहरंति। न खलु शिशुवृद्धदेहयोरत्यन्तविलक्षणयोरैक्यप्रत्यभिज्ञा कस्यापि भवितुमर्हति। तदाहुः-'स्मृतिः पूर्वानुभूतेऽर्थे दर्शनं वार्तमानिके। तयोरत्यन्तभेदे च कस्याभेदः

प्रतीयताम्। रूपशक्तयादिभेदेन बालाद्वृद्धोऽस्ति भेदवान्। दर्शनस्मरणे चापि यथास्वं समवस्थिते। परस्मिन्पूर्वरूपस्य न लेशोऽप्युपलभ्यते। परस्याऽपि न पूर्वत्र कथमेकं तु तद्भवेत्। सामानाधिकरण्यं च दृष्टं भेदेऽपि वस्तुनोः। तावन्मात्रादभेदे तु भेदः स्यान्नैव कस्यचित्।।' इति। अस्तु वा यथाकथंचित् एकज्ञानरूपा कालद्वयविशिष्टाभेदविषया प्रत्यभिज्ञा। भ्रांतिरूपैव सा दृश्यते। क्रमसंबर्धमानेषु शरीरतरुगुल्मादिषु संततसंतन्यमानावयवोपचयापचयवत्सु भूगोलकगिरिनदीसमुद्रादिषु च घटकुड्यादिषु कदाचिदवयवापचयं प्राप्तेष्वपि तथैव प्रत्यभिज्ञा दृश्यते। यत्रावयवापचयो न दृष्टः तत्रापि कियताप्यवयवेनान्ततः परमाणुमात्रेण कदाचिदपचयो भवन् नास्तीति न केनाऽपि निश्चेतुं शक्यते। अतः कूटसाक्षिणी प्रत्यभिज्ञा कुत्रापि न विश्वसनीयेति कथं तद्बलेन प्रत्यक्षस्य विषयव्यवस्थानुमानस्य बाधश्च सिद्ध्येत् इत्याशङ्क्याह-**तदेवेदमिति।** अयमाशयः। कालद्वयविशिष्टाभेदावगाहि सर्वानुभवसिद्धं तदिदमित्येकं ज्ञानं तावन्नापह्नवार्हम्। तदनंतरं तदर्थिन इदमर्थे पुरोवर्त्तिनि प्रवृत्तिदर्शनात्। तस्य ज्ञानद्वयरूपत्वेन पुरोवर्त्तिनि तत्तावैशिष्ट्यावगाहिनः कस्यापि ज्ञानस्याभावे तदर्थिनः पुरोवर्त्तिनि प्रवृत्त्यसंभवात्। लाघवेन विशिष्टज्ञानस्यैव प्रवर्तकतया भेदाग्रहात् प्रवृत्तेरनुपपत्तेः। तञ्च ज्ञानं प्रत्यक्षम्। 'तमिमं साक्षात्करोमी' त्यनुभवात्। अतः कार्यबलात् तत्र संस्कारसहितमिंद्रियं कारणमिति कल्प्यते। यदि तत्तांशे नेंद्रियसन्निकर्षः, तदा तदंशे परोक्षत्वमस्तु। शुक्तिरजतज्ञानस्य धर्म्यंशे प्रमात्ववत् संयुक्तविशेषणतायाः सन्निकर्षत्वकल्पने तु नापरोक्षत्वस्याव्यनुपपत्तिः। तस्य च शरीरादिषु बाल्ययौवनाद्यवस्थाभेदेऽपि न भ्रमत्वम्। अवस्थावद्द्रव्यैक्यविषयत्वात्। न हि बाल्यवार्धकावस्थाद्वयैक्यं प्रत्यभिज्ञाविषयः। किंत्ववस्थावद्रव्यैक्यमेव। तदप्यंततः प्रदर्शितप्रत्यभिज्ञाबलादेव सिद्ध्यति। अवस्थानामागमापायित्वेनानुयाय्यवस्थावदनङ्गीकारे प्रत्यभिज्ञाया निर्विषयत्वापत्तेः। एतेनागमापाठयवस्थातिरेकेणावस्थावदनुयायि द्रव्यं क्वचिदपि नास्ति। परमाणवोऽपि केवलं गन्धरसरूपस्पर्शात्मका इत्यङ्गीकृत्य यद्बौद्धाः प्रत्यभिज्ञायाः विषयाभावमुपपादयंति 'अवस्थानामयं भेदो नावस्थातुर्मतो यदि। अवस्था एव दृश्यंते न स्वेप्नेऽपि ततोऽपरमि'ति तन्निरस्तम्। अनुयाय्यर्थविषये प्रमाणे जाग्रति तदनंगीकारायोगात्। ननु, अवस्थावद्रव्यांगीकारेऽपि तदभेदः प्रत्यभिज्ञाविषय इति न शक्यमुपपादयितुम्। परिमाणरूपावस्थाभेदे तन्निर्वाहकावयवोपचयाकृत पचयकृतद्रव्यभेदावश्यंभावादिति चेत्स्यादयं दोषस्तार्किकाणामारंभवादे नास्माकं परिणामवादे। अवयवोपचये पूर्वसिद्धमेव द्रव्यमनेकत्वावस्थामपहाय एकत्वावस्थामापद्यते तदपचये पुनरप्यनेकत्वावस्थामिति हि परिणामवादप्रक्रिया प्रागारंभणाधिकरणे प्रतिपादिता। तस्मादबाधितार्थविषयया प्रत्यभिज्ञया घटादिद्रव्यस्थैर्यसिद्धिरप्रत्यूहा। आत्मविषयया योऽहं बाल्य इत्यादिरूपया तयात्मस्थैर्यसिद्धिरतितरामप्रत्यूहा। किञ्च। 'तस्माद्भ्रांतिरियं भिन्नेष्वभेदाध्यवसायतः।

प्रत्यभिज्ञा सदृक्षेषु ज्वालादिविषया यथे'ति ज्वालालूनपुनर्जातकेशनखादिप्रत्यभिज्ञादृष्टांतेन घटादिप्रत्यभिज्ञानामपि सादृश्यनिबन्धनभ्रांतित्वमुपपादयद्भिरप्यात्मप्रत्यभिज्ञायाः प्रमात्वमास्थेयमेव। पूर्वापरानुसंधातरि तदनुयायिसादृश्यानुसंधातरि च स्थिरात्मन्यसति भ्रमरूपाया अपि प्रत्यभिज्ञाया उत्पत्त्यसंभवात्। तथा क्षणिकत्वानुमानमुपपादयद्भिरपि तत्स्थैर्यमास्थेयम्। साध्यसाधनभूयस्सहचारदर्शनव्याप्तिग्रहपक्षगतलिंगदर्शनव्याप्तिस्मरणानुमितीनां व्यधिकरणानां हेतुहेतुमद्भावेऽतिप्रसंगात्। अतः प्रत्यभिज्ञाभ्रांतित्वानुमानस्यात्मप्रत्यभिज्ञायां घटादिक्षणिकत्वानुमान-स्यात्मनि चापरिहार्यो व्यभिचारः। प्रतिकूलतर्कपराहतं च क्षणिकत्वानुमानम्। न हि क्षणिकत्वे ज्ञानेच्छाकृतिफलव्यवस्था, अनुभवस्मरणव्यवस्था, संशयनिर्णयव्यवस्था, किञ्चिदर्थनिधान-तत्प्रत्यनुमार्गणव्यवस्था, किञ्चिदर्थदर्शनतत्कुतूहलविरमणव्यवस्था, कर्मफलभोगव्यवस्था, बंधमोक्षव्यवस्था चेति संभवति। अन्यस्य ज्ञानं ततोऽन्यस्येच्छेत्याद्यव्यवस्थाप्रसंगादिति।। **इति समुदायाधिकरणम्**।।३।।

अथ दृष्टत्वाधिकरणम्।।४।।

एवं वैभाषिकमतं, निराकृत्य तत्संगत्या सौत्रांतिकमतनिराकरणार्थमधि-करणांतरमवतारयति-**बाह्यार्थेति।** यद्यपि समुदायभावनिराकरणं क्षणिकत्वनिराकरणञ्च सौत्रांतिकानामपि समानं तथापि प्रागुक्तः समुदायभावनिराकरणहेतुर्न सौत्रांतिकमते प्रवर्तते। तथाहि-कारणाभावेन तन्निराकरणं कृतम्। असिद्धः कारणाभावः। पूर्वपूर्वकारणक्षणानामुत्तरोत्तरकार्यक्षणान्प्रति पूर्ववर्तनमात्रेण कारणत्वसंभवात्। तत्र हि पक्षे वर्तमानत्वग्राहिप्रत्यक्षविषयस्य तत्कारणत्वं न स्यादिति प्रत्यभिज्ञाविरोधमात्रमुक्तम्। सा प्रत्यभिज्ञा बाह्यार्थप्रत्यक्षवादिनामेव न तदनुमेयत्ववादिनाम्। यत्तु कारणस्य कार्यात्यन्तसदृशरूपादिमत्त्वे तदनुगतकारणत्वमनुगतं प्रयोजकं कल्प्यमित्युक्तम्। तत्कल्पनापि न प्रवर्तते। क्षणिकत्वानुमानविरोधात्। बाधकाभावे ह्यनुगतप्रयोजककल्पनम्। तथा क्षणिकत्वानुमानविरोधात्। बाधकाभावे ह्यनुगतप्रयोजककल्पनम्। तथा क्षणिकत्वानुमाने प्रत्यभिज्ञया बाध उक्तः सोऽपि न प्रवर्तते। वाह्यार्थेषु प्रत्यक्षप्रत्यभिज्ञाया असिद्धेः। अनुमितिरूपायाः विपक्षबाधकतर्कसहकृतप्रबलक्षणिकत्वानुमानविरोधेनानुत्थानात्। विपक्षे बाधकतर्कश्चात्र सत्त्वोच्छित्तिप्रसंगः। अर्थक्रियाकारित्वमेव हि सत्त्वम्। न ततोऽन्यज्जात्यादिरूपम्। प्रमाणाभावात्। तञ्च स्थायित्वपक्षे न संभवति। तथाहि स्थायी भावः स्वीयामर्थक्रियां किं क्रमेण कुर्यात् युगपद्वा। आद्ये कालान्तरभाविनीं प्रत्यपि इदानीं समर्थो न वा। प्रथमे तामपीदानीमेव कुर्यात्। समर्थस्य क्षेपायोगात्। द्वितीये कालान्तरेऽपि न कुर्यात्। इदानीमसमर्थः कालान्तरे समर्थ

इत्येकस्मिन्विरुद्धधर्माध्यासस्तु न संभवति। द्वितीये त्विदानीमेव कर्तव्यस्य सर्वस्य कृतत्वात् कालांतरे तस्यासत्त्वं भवेदिति। ननु, क्षणिकत्वे बहवः प्रतिकूलतर्काः प्राग्दर्शिताः। किं बहुना। अयमपि विपक्षबाधकतर्कः क्षणिकत्वपक्षे न प्रवर्तते। तदुपयोग्यापाद्यापादकभूयस्सहचारदर्शनोपाध्यभावावधारणव्याप्तिग्रहणादीनामैकाधिकरण्यनियमात्। मैवम्। एवमादीनामैकाधिकरण्यनियमे क्षणिकत्ववादिनामसंप्रतिपत्तेः। अतिप्रसंगशंका तु कार्यकारणभावापन्ननिरंतरसन्तन्यमानालय (विज्ञानाश्रितप्रवृत्ति) विज्ञानक्षणनिचयात्मकाः यथा चैत्रादिमासाः प्रत्येकं पूर्वापरभावापन्ननिरन्तरसन्तन्यमानदिवसनिचयात्मकाः। ततश्च यथा तत्तन्मासव्रतानामनेकदिवसाश्रयाणमपि तत्तन्मासान्तर्गतेष्वेव दिवसेषु व्यवस्थितिः नान्यमासांतर्गतदिवसाश्रयव्रतविशेषस्य मासान्तरदिवससंबंधः तथा चैत्रमैत्रादिगतज्ञानेच्छानुभवस्मरणादीनामनेकालयविज्ञानाश्रितानामपि चैत्रमैत्राद्यन्तर्गतेष्वेव तेषु व्यवस्थितिः। नान्यपुरुषांतर्गतालयविज्ञानाश्रितप्रवृत्तिविज्ञानादिकार्येच्छादीनां पुरुषान्तरान्तर्गतालयविज्ञानसंबंध इति युक्तैव व्यवस्था। तस्मान्न क्वाप्यतिप्रसंग इति। एवमधिकाशंकानिराकरणार्थमधिकरणांतरम्-सू।। **नासतोऽदृष्टत्वात्।** अत्रेदं सौत्रांतिकमतम्। ज्ञानगतैर्नीलाद्याकारैर्बाह्यार्थगतास्तेऽनुमीयते। यद्यपि नीलादिज्ञानमपरोक्षतयानुभूयते इंद्रियव्यापारान्वयव्यतिरेकानुविधायि च भवति। तथापि इंद्रियसन्निकृष्टेन येनार्थेन यत् ज्ञानं जायते न तज्ज्ञानं तद्विषयकम्। किं तु स्वयमप्यर्थवन्नीलाद्याकारं भवति। तज्ज्ञानं स्वप्रकाशतया स्वात्मानं विषयीकुर्वत् स्वगतं नीलाद्याकारमपि विषयीकरोति। अतो नीलादिज्ञानस्य नापरोक्ष्यानुभवविरोधः। न वा इंद्रियव्यापारानुविधानविरोधः। नीलाद्यर्थिनो बहिः प्रवृत्तिस्तु नापरोक्षज्ञानात् किं तु तदनंतरभाविन अनुमानिकज्ञानात्। यथा वायुनिषेवणार्थिनः शाखाचलनं दृष्ट्वा वृक्षमूले प्रवृत्तिर्न चाक्षुषशाखाचलनज्ञानात् किं तु तल्लिंगकवायुसंचारविषयानुमानिकज्ञानादिति। अत्रेदं दूषणम्। इंद्रियसन्निकृष्टभावक्षणानंतरक्षणे हि ज्ञानं जायते। तत्र यथा वर्त्तमानत्वग्राहिण्यतीतस्य तस्य भावस्य विषयत्वं न युज्यते। एवं स्वधर्मसंक्रमणनिमित्तत्वमपि न युज्यते। विद्यमानस्यैव जपाकुसुमादेः स्फटिकादिषु स्वधर्मसंक्रमणस्य दृष्टत्वात्। तथापि नीलादिसंक्रमणाभ्युपगमे तद्वत् पुरोवर्त्तित्वनेदीयस्त्वदवीयस्त्वजडत्वादिकमपि संक्रामति। न वा संक्रामति चेदान्तरत्वज्ञानत्वादेस्तद्विरोधिनोऽवभासो न स्यात् स्फटिके लौहित्यसंक्रातौ तद्विरोधिनश्शौक्लयस्येव। अथ न संक्रामति दर्पणे मुखगतप्राङ्मुखत्वनेदीयस्त्वादिवत्तदा लिंगाभावेन तदवभासो न स्यात्। अतः क्षणिकवादे बाह्यार्थप्रत्यक्षत्वस्येव तदनुमेयत्वस्याप्यसंभवात् बाह्यार्थव्यवहारसिद्धयर्थं तेषां स्थायित्वमेवांगीकरणीयमिति वैभाषिकसौत्रांतिकसाधारणं क्षणिकवादे दूषणमाह-सू।। **उदासीनानामपि चैवं सिद्धिः**।।२६।। ननूदासीनानां सिद्धिरापादयितुं न शक्यते तेषां तत्कारणकर्मतज्जन्यव्यापाररहितत्वात्। न च क्षणिकपक्षे यागाद्यनुष्ठानानंतरं स्वर्गादिफलभाजामपि तद्राहित्यं तुल्यमिति वाच्यम्। तेषां स्थायिव्यापाररहितत्वेऽपि यावत्फलप्राप्तिसन्तन्य-

मानक्षणिकव्यापारशालित्वादित्याशंक्य कर्मतव्द्यापारक्षणिकत्वप्रयुक्तं नेदमापादनं किंत्वनुष्ठातृभोक्तृ-भेदप्रयुक्तमिति सूत्रतात्पर्यमाह-**क्षणिकत्वेति**। ननु कार्यकारणभावेनैकप्रवाहान्तर्गतौ सत्यामिहान्य-कृतकर्मफलमन्यो भुंक्ते इति नियमान्नातिप्रसंग इति चेत्। सत्यपि कार्यकारणभावेऽन्यस्य फलभोगार्थमन्यस्य बहुवित्तव्ययायाससाध्येषु कर्मसु प्रवृत्त्यनुपपत्तेः। ऐक्यभ्रमात्प्रवृत्तिः स्यादिति चेन्न। क्षणिकत्वनिश्चयवतः प्रवृत्त्यनुपपत्तेः। ननु सत्यपि भेदग्रहे पुत्रपौत्रादिपरंपरानुभाव्यफलेच्छया कर्मसु प्रवृत्तिर्दृष्टेति तद्वदिहापि स्यात् तत्र कार्यकारणभावनियामकस्य क्लृप्तेरिति चेत्तर्हि पितृकृतानामन्येषामपि कर्मणां फलं पित्रनुभवादिकार्यस्मरणादिकं च पुत्रपौत्रादिपरंपरायां भवेत्। कार्यकारणभावसंबन्धस्य स्वकीयविज्ञानसंतान इव पुत्रपौत्रादिपरंपरायां भवेत्। कार्यकारणभावसंबन्धस्य स्वकीयविज्ञानसंतान इव पुत्रपौत्रादिसंतानेऽपि सत्त्वाविशेषात्। तस्मात् कार्यकारणभावस्यानियामकत्वात् कर्मतत्फलादिव्यवस्थासिद्धये प्रत्यभिज्ञाप्रामाण्यनिर्वाहाय चात्मनोऽन्येषां च स्थैर्यमेवांगीकरणीयम्। क्षणिकत्वानुमानस्य विपक्षबाधकतर्कस्तु न प्रवर्तते। समर्थस्यापि सहकारिसमवधानक्रमात् क्रमिककार्यजनकत्वोपपत्तेरित्यादिः क्षणिकवादिनिराकरण-प्रपंचस्तत्रतत्र ग्रंथांतरे द्रष्टव्यः। ननु तथापि कथं सर्वात्मना क्षणिकत्वनिराकरणं शरीरभूगोलकगिरिनदीसमुद्रादिषु द्रव्यस्थैर्येऽपि तदीयपरिमाणादिरूपावस्थाविशेषाणां क्षणिकत्व-स्यानिवार्यत्वादिति चेन्मैवम्। तद्भेदस्यावयवोपचयाद्यागन्तुकहेत्वधीनत्वांगीकारेण वैनाशिकमत इव हेत्वंतरनिरपेक्षप्रतिक्षणनियतस्वरसंभगवत्वरूपक्षणिकत्वाप्राप्तेः। तर्हि तार्किकैश्शरीरादिद्रव्यनाशोऽपि सहेतुक एवांगीकृत इति कथं तेऽर्धवैनाशिकपरिभाषया वैनाशिककोटौ निक्षिप्यन्ते?। उच्यते। द्रव्यभेदांगीकारे अतिस्थिरत्वेन प्रसिद्धेष्वप्यर्थेषु व्यक्तयभेदप्रत्यभिज्ञा भ्रांता स्यादिति कूटसाक्षिण्याः प्रत्यभिज्ञायाः क्वचिदपि व्यक्तिस्थैर्ये प्रमाणयितुमशक्यत्वात् द्रव्यभेदवादिनः सर्ववैनाशिकपक्ष एव पतिताः स्युः। प्रत्यभिज्ञैव हि सारमवलम्बनं व्यक्तिस्थैर्यसिद्धौ। अनेन विशेषेणोच्यन्ते अर्धवैनाशिकास्तार्किका इति।।

इति दृष्टत्वाधिकरणम्।।४।।

इति शिवार्कमणिदीपिका समुदायाधिकरणम् समाप्तम्

अभावाधिकरणम्।

शाङ्करभाष्यम्

***नाभाव उपलब्धेः*२८॥**

एवं बाह्यार्थवादमाश्रित्य समुदायाप्राप्त्यादिषु दूषणेषूद्भावितेषु विज्ञानवादी बौद्ध इदानीं प्रत्यवतिष्ठते। केषांञ्चित् किल विनेयानां बाह्ये वस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन बाह्यार्थवादप्रक्रियेयं विरचिता। नासौ सुगताभिप्रायः; तस्य तु विज्ञानैकस्कन्धवाद एवाभिप्रेतः। तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणान्तस्थ एव प्रमाणप्रमेयफलव्यवहारः सर्व उपपद्यते; सत्यपि बाह्येऽर्थे बुद्ध्यारोहमन्तरेण प्रमाणादिव्यवहारानवतारात्॥

कथं पुनरवगम्यतेऽन्तस्थ एवायं सर्वव्यवहारो, न विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति? तदसम्भवादित्याह। स हि बाह्योऽर्थोऽभ्युपगम्यमानः परमाणवो वा स्युः तत्समूहा वा स्तम्भादयः स्युः। तत्र न तावत्परमाणवः स्तम्भादिप्रत्ययपरिच्छेद्या भवितुमर्हन्ति; परमाण्वाभासज्ञानानुपपत्तेः। नापि तत्समूहाः स्तम्भादयः ; तेषां परमाणुभ्योऽन्यत्वानन्यत्वाभ्यां निरूपयितुमशक्यत्वात्। एवं जात्यादीनपि प्रत्याचक्षीत॥

अपिचानुभवात्रेण साधारणात्मनो ज्ञानस्य जायमानस्य योऽयं प्रतिविषयं पक्षपातः–स्तम्भज्ञानम्, कुडयज्ञानम्, घटज्ञानम्, पटज्ञानमिति, नासौ ज्ञानगतविशेषमन्तरेणोपपद्यते, इत्यवश्यं विषयसारूप्यं ज्ञानस्याङ्गीकर्तव्यम्। अङ्गीकृते च तस्मिन् विषयाकारस्य ज्ञानेनैवावरुद्धत्वादपार्थिका बाह्यार्थसद्भावकल्पना॥ अपि च सहोपलम्भनियमादभेदो विषयविज्ञानयोरापतति। न ह्यनयोरेकस्यानुपलम्भेऽन्यस्योपलम्भोऽस्ति। न चैतत्स्वभावविवेके युक्तम्; प्रतिबन्धकारणाभावात्। तस्मादप्यर्थाभावः। स्वप्नादिवच्चेदं द्रष्टव्यम्। यथा हि स्वप्न मायामरीच्युदक गन्धर्वनगरादिप्रत्यया विनैव बाह्येनार्थेन ग्राह्य-ग्राहकाकारा भवन्ति, एवं जागरितगोचरा अपि स्तम्भादिप्रत्यया भवितुमर्हन्तीत्यवगम्यते; प्रत्ययत्वाविशेषात्॥

कथं पुनरसति बाह्यार्थे प्रत्ययवैचित्र्यमुपपद्यते? वासनावैचित्र्यादित्याह। अनादौ हि संसारे बीजाङ्कुरवद्विज्ञानानां वासनानां चान्योन्यनिमित्त नैमित्तिकभावेन वैचित्र्यं न विप्रतिषिध्यते। अपि, चान्वय व्यतिरेकाभ्यां वासनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते; स्वप्नादिष्वन्तरेणाप्यर्थं वासनानिमित्तस्य ज्ञानवैचित्र्यस्योभाभ्यामप्यावाभ्यामभ्युपगम्यमानत्वात्, अन्तरेण तु वासनामर्थ-निमित्तस्य ज्ञानवैचित्र्यस्य मयाऽनभ्युपगम्यमानत्वात्। तस्मादप्यभावो बाह्यार्थस्येति॥

एवं प्राप्ते ब्रूमः–*नाभाव उपलब्धेरिति*॥ न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते। कस्मात्? उपलब्धेः। उपलभ्यते हि प्रतिप्रत्ययं बाह्योऽर्थः–स्तम्भः, कुडयम्, घटः पटः–इति। न चोपलभ्यमानस्यैवाभावो भवितुमर्हति। यथा हि कश्चिद् भुञ्जानो भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात्–नाहं भुञ्जे, न वा तृप्यामिति, तद्वदिन्द्रियसनिकर्षेण स्वयमुपलभमान एव बाह्यमर्थम् नाहमुपलभे, न च सोऽस्तीति ब्रुवन् कथमुपादेयवचनः स्यात्?

ननु–नाहमेवं ब्रवीमि–न कञ्चिदर्थमुपलभे–इति, किं तूपलब्धिव्यतिरिक्तं नोपलभ इति ब्रवीमि? बाढमेवं ब्रवीषि; निरङ्कुशत्वात्ते तुण्डस्य, न तु युक्त्युपेतं ब्रवीषि, यत उपलब्धिव्यतिरेकोऽपि बलादर्थस्याभ्युपगन्तव्यः; उपलब्धेरेव। न हि कश्चिदुपलब्धिमेव–स्तम्भः, कुडंय चेत्युपलभते। उपलब्धिविषयत्वेनैव तु स्तम्भ कुडयादीन्सर्वे लौकिका उपलभन्ते। इतश्चैवमेव सर्वे लौकिका उपलभन्ते-यत्प्रत्याचक्षाणा अपि बाह्यार्थमेवं व्याचक्षते–यदन्तर्ज्ञेयरूपं तद्बहिर्वदवभासते इति। तेऽपि सर्वलोकप्रसिद्धां बहिरवभासमानां संविदं प्रतिलभमानाः प्रत्याख्यातुकामाश्च बाह्यमर्थम्, बहिर्वदिति वत्कारं कुर्वन्ति; इतरथा हि कस्माद्बहिर्वदिति ब्रूयुः? न हि विष्णुमित्रो बन्ध्यापुत्रवदवभासत इति कश्चिदाचक्षीत। तस्माद्यथानुभवं तत्त्वमभ्यु-पगच्छद्भिर्बहिरेवावभासत इति युक्तमभ्युपगन्तुम्, न बहिर्वदवभासत इति॥

ननु–बाह्यस्यार्थस्यासम्भवाद् बहिर्वदवभासत– इत्यध्यवसितम्, नायं साधुरध्यवसायः ; यतः प्रमाणप्रवृत्तिपूर्वकौ सम्भवासम्भवाववधार्येते, न पुनः सम्भवासम्भवपूर्विके प्रमाणप्रवृत्त्यप्रवृत्ती। यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते, तत्सम्भवति, यत्तु न केनचिदपि प्रमाणेनोपलभ्यते, तन्न सम्भवति। इह तु यथास्वं सर्वैरेव प्रमाणैर्बाह्योऽर्थ उपलम्यमानः कथं व्यतिरेकाव्यतिरेकिविकल्पैर्न सम्भवतीत्युच्येतोपलब्धेरेव। न च ज्ञानस्य विषयसारूप्याद्विषयनाशो भवति; असति विषये विषयसारूप्यानुपपत्तेः, बहिरुपलब्धेश्च विषयस्य। अत एव सहोपलम्भनियमोऽपि प्रत्यय विषययोरुपायोपेयभावहेतुकः, नाभेदहेतुक इत्यभ्युपगन्तव्यम्। अपि च घटज्ञानं पटज्ञानमिति विशेषणयोरेव घट पटयोर्भेदः, न विशेष्यस्य ज्ञानस्य। यथा शुक्लो गौः, कृष्णो गौरिति

शौक्ल्यकार्ष्ण्ययोरेव भेदः, न गोत्वस्य। द्वाभ्यां च भेद एकस्य सिद्धो भवत्येकस्माच्च द्वयोः। तस्मादर्थ ज्ञानयोर्भेदः। तथा घटदर्शनं घटस्मरणमित्यत्रापि प्रतिपत्तव्यम्। अत्रापि हि विशेष्ययोरेव दर्शन स्मरणयोर्भेदः, न विशेषणस्य घटस्य। यथा क्षीरगन्धः, क्षीररस इति विशेष्ययोरेव गन्धरसयोर्भेदो, न विशेषणस्य क्षीरस्य; तद्वत्। अपि च द्वयोर्विज्ञानयोः पूर्वोत्तरकालयोः स्वसंवेदनेनैवोपक्षीणयोरितरेतरग्राह्य ग्राहकत्वानुपपत्तिः। ततश्च विज्ञानभेदप्रतिज्ञा, क्षणिकत्वादिधर्मप्रतिज्ञा, स्वलक्षण-सामान्यलक्षण वास्यवासकत्वाविद्योपप्लव, सदसद्धर्म बन्ध मोक्षादिप्रतिज्ञाश्च स्वशास्त्रगतास्ता हीयेरन्॥ किञ्चान्यत्। विज्ञानं विज्ञानमित्यभ्युपगच्छता बाह्योऽर्थःस्तम्भः, कुडयमित्येवञ्जातीयकः कस्मान्नाभ्युपगम्यत इति वक्तव्यम्। विज्ञानमनुभूयत इति चेत्, बाह्योऽप्यर्थोऽनुभूयत एवेति युक्तमभ्युपगन्तुम्। अथ-विज्ञानं प्रकाशात्मकत्वात्प्रदीप-वत्स्वयमेवानुभूयते, न तथा बाह्योऽप्यर्थ इति-चेत्, अत्यन्तविरुद्धां स्वात्मनि क्रियामभ्युपगच्छसि-अग्निरात्मानं दहतीतिवत्, अविरुद्धं तु लोकप्रसिद्धं स्वात्मव्यतिरिक्तेन विज्ञानेन बाह्योऽर्थोऽनुभूयत इति नेच्छसि अहो पाण्डित्यं महद् दर्शितम्! न चार्थाव्यतिरिक्तमपि विज्ञानं स्वयमेवानुभूयते; स्वात्मनि क्रियाविरोधादेव॥ ननु-विज्ञानस्य स्वरूपव्यतिरिक्तग्राहित्वे तदप्यन्येन ग्राह्यं तदप्यन्येनेत्यनवस्था प्राप्नोति। अपि च प्रदीपवदवभासात्मकत्वाज्ज्ञानस्य ज्ञानान्तरं कल्पयतः समत्वादवभासकभावानुपपत्तेः कल्पनानर्थक्यमिति, तदुभयमप्यसत्; विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणो ग्रहणाकाङ्क्षानुत्पादादनवस्थाशङ्कानुपपत्ते, साक्षि प्रत्यययोश्च स्वभाववैषम्यादु-पलब्धृुपलभ्यभावोपपत्तेः, स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वात्॥ किञ्चान्यत्। प्रदीपवद्विज्ञानमवभासकान्तरनिरपेक्षं स्वयमेव प्रथत इति ब्रुवताऽप्रमाणगम्यं विज्ञानमनवगन्तृकमित्युक्तं स्यात्। शिलाघनमध्यस्थप्रदीपसहस्त्रप्रथनवत्॥ बाढमेवम्, अनुभवरूपत्वात्तु विज्ञानस्येष्टो नः पक्षस्त्वयाऽनुज्ञायत इति चेत्, न; अन्यस्यावगन्तुश्चक्षुः साधनस्य प्रदीपादिप्रथनदर्शनात्। अतो विज्ञानस्याप्यवभास्यत्वाविशेषात् सत्येवान्यस्मिन्नवगन्तरि प्रथनं प्रदीपवदित्यवगम्यते॥

साक्षिणोऽवगन्तुः स्वयंसिद्धतामुपक्षिपता स्वयं प्रथते विज्ञानमित्येष एव मम पक्षस्त्वया वाचोयुक्त्यन्तरेणाश्रित इति चेत्, न; विज्ञानस्योत्पत्तिप्रध्वंसानेकत्वादिविशेषवत्त्वाभ्युपगमात्। अतः प्रदीपवद्विज्ञानस्यापि व्यतिरिक्तावगम्यत्वमस्माभिः प्रसाधितम्॥२८॥

***वैधर्म्याच्च न स्वप्नादिवत्*॥२९॥**

यदुक्तम्-बाह्यार्थापलापिना स्वप्नादिप्रत्ययवज्जागरितगोचरा अपि स्तम्भादिप्रत्यया विनैव बाह्येनार्थेन भवेयुः ; प्रत्ययत्वाविशेषात्-इति, तत्प्रतिवक्तव्यम्; अत्रोच्यते; न स्वप्नादिप्रत्यय-वज्जाग्रत्प्रत्यया भवितुमर्हन्ति॥

कस्मात्? वैधर्म्यात्। वैधर्म्यं हि भवति स्वप्न जागरितयोः। किं पुनर्वैधर्म्यम्? बाधाबाधाविति ब्रूमः। बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य–मिथ्या मयोपलब्धो महाजनसमागमः–इति, न ह्यस्ति मम महाजनसमागमः, निद्राग्लानं तु मे मनो बभूव, तेनैषा भ्रान्तिरुद्बभूव-इति। एवं मायादिष्वपि भवति यथायथं बाधः। नैवं जागरितोपलब्धं वस्तु स्तम्भादिकं कस्याञ्चिदप्यवस्थायां बाध्यते। अपि च स्मृतिरेषा–यत् स्वप्नदर्शनम्, उपलब्धिस्तु जागरितसंयोगदर्शनम्। स्मृत्युपलब्ध्योश्च प्रत्यक्षमन्तरं स्वयमनुभूयतेऽर्थविप्रयोगसंयोगात्मकम्मिष्टं पुत्रं स्मरामि, नोपलभे, उपलब्धुमिच्छामीति। तत्रैवं सति न शक्यते वक्तुम्–मिथ्या जागरितोपलब्धिरुपलब्धित्वात्स्वप्नोपलब्धिवदित्युभयोरन्तरं स्वयमनुभवता। न च स्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुम्। अपि चानुभवविरोधप्रसङ्गाज्जागरितप्रत्ययानां स्वतो निरालम्बनतां वक्तुमशक्नुवता स्वप्नप्रत्ययसाधर्म्याद् वक्तुमिष्यते। न च यो यस्य स्वतो धर्मो न सम्भवति, सोऽन्यस्य साधर्म्यात्तस्य सम्भविष्यति। न ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्याच्छीतो भविष्यति। दर्शितं तु वैधर्म्यं स्वप्न-जागरितयोः॥२९॥

***न भावोऽनुपलब्धेः*॥३०॥**

यदप्युक्तम्–विनाऽप्यर्थेन ज्ञानवैचित्र्यं वासनावैचित्र्यादेवावकल्पते– इति। तत्प्रतिवक्तव्यम्। अत्रोच्यते–न भावो वासनानामुपपद्यते त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानाम्। अर्थोपलब्धिनिमित्ता हि प्रत्यर्थं नानारूपा वासना भवन्ति। अनुपलभ्यमानेषु त्वर्थेषु किंनिमित्ता विचित्रा वासना भवेयुः? अनादित्वेऽप्यन्धपरम्परान्यायेनाप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यात्, नाभिप्रायसिद्धिः। यावप्यन्वय व्यतिरेकावर्थापलापिनोपन्यस्तौ–वासनानिमित्तमेवेदं ज्ञानजातं नार्थनिमित्तमिति, तावप्येवं सति प्रत्युक्तौ द्रष्टव्यौ। विनाऽर्थोपलब्ध्या वासनानुपपत्तेः॥ अपि च विनाऽपि वासनाभिरर्थोपलब्ध्युपगमाद्विना त्वर्थोपलब्ध्या वासनोत्पत्त्यनभ्युपगमादर्थसद्भावमेवान्वयव्यतिरेकावपि प्रतिष्ठापयतः॥ अपि च वासना नाम संस्कारविशेषाः। संस्काराश्च नाश्रयमन्तरेणावकल्पन्ते; एवं लोके दृष्टत्वात्। न च तव वासनाश्रयः कश्चिदस्ति; प्रमाणतोऽनुपलब्धेः॥३०॥

***क्षणिकत्वाच्च॥३१॥**

यदपि-आलयविज्ञानं नाम वासनाश्रयत्वेन परिकल्पितम्, तदपि क्षणिकत्वाभ्युपगमादनवस्थितस्वरूपं सत्प्रवृत्तिविज्ञानवन्न वासनानामधिकरणं भवितुमर्हति। न हि कालत्रयसम्बन्धिन्येकस्मिन्नन्वयिन्यसति, कूटस्थे वा सर्वार्थदर्शिनि देश काल निमित्तापेक्षवास-

नाधीनस्मृतिप्रतिसन्धानादिव्यवहारः सम्भवति। स्थिरस्वरूपत्वे त्वालयविज्ञानस्य सिद्धान्तहानिः।। अपि च विज्ञानवादेऽपि क्षणिकत्वाभ्युपगमस्य समानत्वाद्यानि बाह्यार्थवादे क्षणिकत्वनिबन्धनानि दूषणान्युद्भावितानि ''उत्तरोत्पादे च पूर्वनिरोधात्'' इत्येवमादीनि, तानीहाप्यनुसन्धातव्यानि। एवमेतौ द्वावपि वैनाशिकपक्षौ निराकृतौ बाह्यार्थवादिपक्षो विज्ञानवादिपक्षश्च। शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्धः, इति तन्निराकरणाय नादरः क्रियते। न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम्; अपवादाभाव उत्सर्गप्रसिद्धेः।।३१।।

***सर्वथाऽनुपपत्तेश्च।।३२।।**

किं बहुना। सर्वप्रकारेण यथा यथाऽयं वैनाशिकसमय उपपत्तिमत्त्वाय परीक्ष्यते, तथा तथा सिकताकूपवद्विदीर्यत एव। न काञ्चिदप्यत्रोपपत्तिं पश्यामः। अतश्चानुपपन्नो वैनाशिकतन्त्रव्यवहारः। अपि च बाह्यार्थ विज्ञान शून्यवादत्रयमितरेतरविरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्मनोऽसम्बद्धप्रलापित्वम्, प्रद्वेषो वा प्रजासु–विरुद्धार्थप्रतिपत्त्या विमुह्येयुरिमाः प्रजा इति। सर्वथाऽप्यनादरणीयोऽयं सुगतसमयः श्रेयस्कामैरित्यभिप्रायः।।३२।। इति पञ्चममभावाधिकरणम्।।

इति शाङ्करभाष्यम् अभावाधिकरणम् समाप्तम्

वार्तिकम्

नाभाव उपलब्धेः।।२८।। रूपादिरहितब्रह्मजगदुपादानत्ववादिसमन्वयस्य विज्ञानं नीलाद्याकारमित्यनुमानविरोधाविरोधसन्देहं पूर्वोक्तसमुदायाप्राप्त्यादिदूषणाद्युपजीव्य बाह्यापलापाद् हेतुहेतुमल्लक्षणां सङ्गतिमस्य पूर्वाधिकरणेनाह- *बाह्यार्थवादमाश्रित्येति*।। ननु-"उत्तरोत्पादे च पूर्वनिरोधात्" "अनुस्मृतेश्चे"ति च सूत्रोपात्तदूषणानि क्षणिकविज्ञानमात्रवादेऽपि प्रभवन्ति, तत् कथं तदुपजीवनेनैतस्य समुत्थानं स्यात्? विरोधात्, तेनैव तस्य गतत्वाच्चेति-चेत्, सत्यम्; तथापि स्वप्नादिदृष्टान्तेन क्षणिकादपि विज्ञानमात्रात् सर्वव्यवहारं वक्ष्यमाणरीत्योपपादयिष्यामीत्यभिमानाद् वाह्यार्थदूषणमुपजीव्य प्रवर्तते विज्ञानवादी। अत उपपद्यत एतस्यारम्भ इति। बाह्यार्थवादिभ्यो विज्ञानमात्रवादिसुगताभिप्रेतप्रक्रियाविशेषमाह- *केषांचित्किलेति*।। *विरचिता*।। सुगतेनेति शेषः।।

ननु-विज्ञानस्कन्धमात्रं तत्त्वं व्यवस्थापयतो लोकव्यवहारो विरुद्ध्यते; प्रमातृ-प्रमाण-प्रमेय प्रमितिषु चतसृषु विधास्वेव लोकव्यवहारपरिसमाप्तेः, विज्ञानमात्रवादे तदसंभवादिति-चेत्, मैवम्; विज्ञानवादमात्रवादेऽपि तत्संभवादविरोध इत्याह- *तस्मिंश्च विज्ञानवाद इति*।। प्रमातृव्यवहारश्चेत्यपि द्रष्टव्यम्। यद्यप्यनुभवाद् नान्योऽनुभाव्योऽनुभविताऽनुभवनं चास्ति; तथाप्यर्थाकारयुक्ततया विज्ञानस्वरूपमेव प्रमेयम्, प्रमेयप्रकाशनरूपतया च प्रमाणफलम्, तत्प्रमाणशक्तिरूपेण च प्रमाणम्, तच्छक्तिमत्त्वेन च प्रमातृ, इति बुद्ध्यारूढप्रमातृत्वादिरूपेणान्तःस्थ एव प्रमातृ-प्रमाण-प्रमेय-फलव्यवहारः सर्व उपपत्स्यत इत्यर्थः। अपि च वाह्यार्थवादिभ्यामपि सौत्रान्तिक-वैभाषिकाभ्यामवश्यं बुद्ध्यारूढ एव प्रमाणफलव्यवहारो वाच्य इत्याह- *सत्यपि वाह्यार्थ इति*।। प्रमाणं हि करणम्, प्रमितिः प्रमाणफलम्; तयोर्भिन्नाधिकरणत्वे प्रमाणफलव्यवहारो न स्यात्। न हि खदिरगोचरे परशौ पलाशे द्वैधीभावो भवति। तस्माद् अनयोरैकाधिकरण्यं वक्तव्यम्। न च तयोर्बुद्धिस्थत्वं विनैकाधिकरण्यं भवति, अतो बुद्धिस्थ एव बाह्यार्थवादिनामपि प्रमाणफलको व्यवहार इत्यर्थः। ननु-परशुः स्वावयवेषु समवेतः, द्वैधीभावस्तु खदिरे; अतः कथं दृष्टान्ते फल करणयोरैकाधिकरण्यमिति-चेत्, मैवम्; व्यापाराविष्टः परशुः संयोगेन खदिराधिकरणः, इति

तयोरैकाधिकरण्योपपत्तेः। ननु–ज्ञानस्वलक्षमनंशम्, कथमंशभेदेन तत्र प्रमाणादिव्यवहार इति–चेत्, मैवम्; निरंशत्वेऽपि कल्पितांशैस्तत्र तद्व्यवहारोपपत्तेः। प्रश्नपूर्वकं च बाह्यार्थाभाव उपपत्तीराह– *कथं पुनरवगम्यत इत्यादिना*।।

योऽयं विज्ञानालम्बनत्वेन स्तम्भादिलक्षणो बाह्यार्थः सौत्रान्तिक–वैभाषिकाभ्यामभ्युपगम्यमानः, स च बाह्योऽर्थः किं परमाणुरूपः किं वा तत्समूहरूप इति विकल्पार्थः। अवयविनोऽर्थस्य सौत्रान्तिकवैभाषिकाभ्यामनङ्गीकरणाद् वैशेषिकमतपरीक्षायां निराकृतत्वाच्च न स विकल्पारूढः कृत इति द्रष्टव्यम्। तत्र प्रथमपक्षं दूषयति– *न तावदिति*।। यदि स्तम्भादिप्रत्ययाः परमाणव एवालम्बनाः स्युः, तह्यतिसूक्ष्मपरमाण्वाभासाः स्युः। न च तेषां परमाण्वाभासरूपेणोत्पत्तिरस्ति; अप्रत्यक्षत्वप्रसङ्गात्, अतिस्थूलस्तम्भाद्याकारप्रतिभासाच्च। न ह्यन्यगोचरः प्रत्ययोऽन्याभासो भवति; अतिप्रसङ्गात्। न च–भासमानं स्थौल्यं प्रतिभासधर्मः, नार्थधर्म इति–वाच्यम्; एवं सति ज्ञानाकारस्यैव स्थौल्यस्य तत्प्रतिभासविषयत्वात् तदतिरिक्तप्रतिभासमानपरमाणुलक्षणार्थास्तित्वे प्रमाणाभावादस्मदिष्टसिद्धेरिति। अस्तु तर्हि द्वितीयः पक्षः–समूहस्य स्थूलप्रत्ययालम्बनोपपत्तेः, प्रत्यक्षत्वोपपत्तेश्चेति, नेत्याह– *नापि तत्समूहाः स्तम्भादय इति*।। तेषाम्=परमाणुसमूहानामित्यर्थः। अन्यत्वेऽपसिद्धान्तः ; नामान्तरेणावयव्युपगमात्। तदभ्युपगमे चारम्भवादोक्तदोषः, अनन्यत्वे च पूर्वोक्तदोष इति। *एवमिति*।। परमाणुभ्योऽन्यत्वानन्यत्वविकल्पाभ्यामित्यर्थः। इतश्च न ज्ञानव्यतिरेकेण बहिर्विषयोऽस्तीत्याह– *अपि चानुभवमात्रेणेति*।। न केवलमन्यथासिद्धे-र्बहिस्थाभावः ; सहोपलम्भनियमेन ज्ञान-ज्ञेययोरभेदादपीत्याह– *अपि च सहोपलम्भनियमादिति*।। ननु ज्ञानाद् विवेकेन बाह्यार्थप्रतिभासदर्शनात् तद्विरोधेन कथमेवं स्यादिति–चेत्, तत्राह– *स्वप्नादिवच्चेदं द्रष्टव्यमिति*।। तस्माद् न ज्ञानाकारव्यतिरेकेण बहिर्विषयोऽस्तीति। ननु–ज्ञानाकारवैचित्र्यमपि बहिर्विषयाभावे कथमुपपद्यते? निमित्तान्तराभावात्, इत्याशङ्क्ते– *कथं पुनरिति*।। निमित्तान्तराभावोऽसिद्ध इति परिहरति– *वासनावैचित्र्यादित्याहेति*।। अन्योन्याश्रय-माशङ्क्य परिहरति– *अनादौ हीति*।। अपि चान्वयव्यतिरेकाभ्यामपि वासनावैचित्र्यस्यैव ज्ञानवैचित्र्यहेतुता नार्थवैचित्र्यस्येत्याह– *अपि चान्वयव्यतिरेकाभ्यामिति*।।

एवं प्राप्तेऽभिधीयते– *नाभाव उपलब्धेरिति*।। नाभावो बहिरर्थानां भवितुमर्हति। "द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायाद् विज्ञानव्यतिरेकेण बहिरर्थोऽस्तीति प्रतिजानीते। कुतः? उपलब्धेः=स्तम्भः, कुड्यम्, घटः, पट इति विज्ञानव्यतिरेकेण तेषामुपलम्भादित्यर्थः। भाष्यं तु विकल्पपूर्वकं योजनीयम्। तथा हि–किमनुपलम्भाद् बहिरर्थाभाव उच्यते, सत्यप्युपलम्भे तस्य बाह्यार्थाविषयत्वाद्वा अथ सत्यपि तस्य बाह्यार्थविषयत्वे बाह्यार्थबाधकप्रमाणसद्भावाद्वा। तत्र

प्रथमपक्षं दूषयति-*उपलभ्यते हीति*।। द्वितीयपक्षमाशङ्कते-*ननु नाहमेवं ब्रवीमीति*।। निराकरोति-*बाढमेवं ब्रवीषीति*।। स्वानुभवविरुद्धश्च तवायं पक्ष इत्याह-*इतश्चैवमेवेति*।।

तृतीयपक्षमाशङ्कते-*ननु बाह्यस्यार्थस्यासंभवादिति*।। प्रमाणेन बाह्यार्थस्य संभवाध्यवसानाद् असंभवोऽसिद्ध इति परिहरति-*नायं साधुरध्यवसाय इति*।।

कथं व्यतिरेकाव्यतिरेकिविकल्पैरिति।। किं परमाणुभ्यो व्यतिरिक्तः स्तम्भादिलक्षणो बाह्यार्थः, अथाव्यतिरिक्त इत्यादिविकल्पयोरित्यर्थः। यदुक्तम्-ज्ञानस्य प्रत्यर्थं विषयत्वव्यवस्थायै विषयसारूप्यमास्थेयम्, तथा च तैनेव लोकव्यवहारोपपत्तौ किं बाह्यार्थकल्पनेनेति? तत्राह-*न चेति*।। इतश्च न ज्ञानाकाराभिन्नत्वं विषयस्येत्याह-*वहिरुपलब्धेश्च विषयस्येति*।। ज्ञानाद् भिन्नतयोपलब्धेरित्यर्थः। यदपि-''सहोपलम्भनियमादभेदो नील-तद्धियोः'' इत्युक्तम्, तत्र वक्तव्यम्-किमेकत्वेनोपलम्भः सहोपलम्भः, आहोस्विद् एक एवोपलम्भो ज्ञान-ज्ञेययोः सहोपलम्भः-इति। तत्र न तावदाद्य इत्याह-*अत एवेति*।। विषयस्य ज्ञानाद् बहिरुपलब्धेरेव हेतोः प्रत्यय-विषययोः सहोपलम्भोऽपि नाभेदहेतुक इत्यर्थः। द्वितीयस्त्वन्यथाऽप्युपपद्यत इत्याह-*उपायोपेयभावहेतुक इति*।। यथा हि सर्वं चाक्षुषं प्रभारूपानुविद्धमेव चक्षुषा गृह्यते, न चैतावता घटादिरूपं प्रभात्मकं भवति, किन्तु प्रभोपायसाक्षात्कारविषयत्वादेकोपलम्भनियमः, एवमिहाप्यात्मसाक्षात्कारानुभवोपायत्वादर्थस्यैकोपलम्भनियमः ; अन्यथा चाक्षषवस्तुन अलोक-साक्षात्कारव्यतिरेकेणानुपलब्धावपि तदैक्यादर्शनाद् अनैकान्तिको हेतुरित्याशयः। अपि चानुवृत्त-व्यावृत्तरूपभेदोपलम्भादपि ज्ञानार्थयोर्भेद इत्याह-*अपि च घटज्ञानमिति*।। तथाऽर्थाभेदेऽपि ज्ञानभेददर्शनाद् न तयोरैक्यमित्याह-*तथा घटदर्शनं घटस्मरणमित्यत्रापीति*।। इतश्च विज्ञानवादिमतमयुक्तमित्याह-*अपि च द्वयोर्ज्ञानयोरिति*।। एतच्च सर्वमसत्येकस्मिन् अनेकार्थज्ञानप्रतिसन्धातरि नोपपद्यत इत्यभिप्रायः। अपि चात्मनि वृत्तिविरोधाद् नैकस्य विज्ञानस्य विषयविषयिभाव उपपद्यते।।

न खलु छिदा छिद्यते, न वा पाक एव पच्यते। अतोऽपि भिन्नाश्रय एव ज्ञान-ज्ञेयभावो वाच्य इति भूमिरचनापूर्वकमाह-*किञ्चान्यत्। विज्ञानं विज्ञानमित्यभ्युपगच्छतेति*।। निलीनस्य ज्ञानस्य विषयप्रकाशकत्वायोगात् चक्षुरादिवत् प्रकाशान्तराजननात् स्वयं प्रकाशरूपत्वाच्च प्रकाशमानस्यैव विषयप्रकाशकत्वं वाच्यम्। न हि दीपः स्वयमप्रकाशमानो विषयं प्रकाशयति। तथा च विज्ञानस्य स्वरूपव्यतिरिक्तग्राह्यत्वे तदप्यन्येन ग्राह्यं तदप्यन्येनेत्यनवस्थापाताद् दीपस्य दीपान्तरप्रकाश्यत्ववत् समत्वाद् विज्ञानान्तरप्रकाश्यत्वानुपपत्तेश्च स्वग्राह्यत्वेऽवश्यमभ्युपेतव्ये तेनैवोपक्षीणत्वाद् न

बहिर्विषयग्राहकत्वमित्याशङ्कते– *ननु विज्ञानस्येति*।। विज्ञानस्य साक्षिग्राह्यत्वाभ्युपगमात् साक्षिणश्च स्वप्रकाशत्वेन ग्राहकान्तरानपेक्षणाद् अनवस्थाया असंभवात् साक्षि विज्ञानयोर्जडाजडरूपत्वेनात्यन्तवैलक्षण्याद् ग्राह्य–ग्राहकभवोपपत्तेश्च नोभयमपि दूषणमिति परिहरति– *तदुभयमप्यसदिति*।। कुतो न तत् तस्येति? अत्र हेतुमाह– *विज्ञानग्रहणमात्र एवेति*।। कुतो न समत्वाद् ग्राह्य–ग्राहकभावाभाव इति? अत्राह– *साक्षि–प्रत्यययोश्चेति*।। ननु–यद् यत् प्रकाशते, तत्तदन्येन प्रकाश्यते, यथा–ज्ञानार्थौ, अतो नास्ति स्वयंप्रकाशः साक्षी। तथा च कुतो वा न साम्यम्? इत्याशङ्क्याह– *स्वयंसिद्धसाक्षिणोऽप्रत्याख्येयत्वादिति*।। यथा च सर्वप्राणभृतामसन्दिग्धाविपर्यस्तरूपतया नित्यापरोक्षत्वेन स्वंयप्रकाशोऽवस्थात्रयतदभावद्रष्टृत्वेन साक्षी नित्यानुभवोऽप्रत्याख्येयः, तथोपपादितमस्माभिरध्यासभाष्ये।।

इतश्च बाधकाद् विज्ञानवादिनाऽपि साक्षी स्वीकर्तव्य इत्याह– *किञ्चान्यदिति*।। विज्ञानमेवावगतिरिरिति मन्वान इष्टप्रसञ्जनमाशङ्कते– *बाढमेवमिति*।। तत्क्रियाफलस्य कर्तृत्वासंभवात् कर्त्रन्तरमनेनाप्येषितव्यमिति परिहरति– *न; अन्यस्यावगन्तुरिति*।। ननु–साक्षिस्थानेऽस्मदभिमतविज्ञानमेवास्तु। तथा च नास्त्येवावयोर्विप्रतिपत्तिरिति पुनर्विज्ञानवादी शङ्कते– *साक्षिणोऽवगन्तुरिति*।। भवता हि विज्ञानस्योत्पत्त्यादयो धर्मा अभ्युपगताः। तथा चास्य फलतया नावगन्तृत्वम्; कर्तृ फलभावस्यैकत्र विरोधादित्युक्तत्वात्, किन्तु प्रदीपतुल्यतेति परिहरति– *न विज्ञानस्येति*।।२८।।

वैधर्म्याच्च न स्वप्नादिवत्।।२९।। किं स्वप्नादिदृष्टान्तेन जाग्रत्प्रत्ययानां मिथ्याविषयत्वं साध्यते, किं वा व्यावहारिकविषयाभावः, आहोस्वित् स्वातिरिक्तविषयराहित्यम्। तत्र नाद्यः ; सिद्धसाधनत्वात्। नापि द्वितीयः ; रजत–तदधिष्ठानशुक्तिप्रत्यययोरिव जाग्रत्स्वप्नादिप्रत्यययोर्वैधर्म्यात् साधर्म्यदृष्टान्तत्वानुपपत्तेः। वैधर्म्यं च तयोर्व्यवहारभूमौ बाधाबाधकृतं सर्वलोकप्रत्यक्षम्। नापि तृतीयः; स्वप्नादिप्रत्ययस्यापि स्वातिरिक्तमिथ्याविषयाङ्गीकारेण दृष्टान्तस्य साध्यविकलत्वात्–इति। *निद्राग्लानं तु मे मन इति*।। आगन्तुकदोषजन्यत्वाजन्यत्वाभ्यां जाग्रत्प्रत्ययात् स्वाप्नप्रत्ययस्य वैधर्म्यं प्रदर्शितं भवति। संस्कारजन्यत्वाजन्यत्वाभ्यां च तयोर्वैधर्म्यान्तरमाह– *अपि च स्मृतिरेषेति*।। यथा च स्वप्नदर्शनस्य न मुख्यस्मृतित्वम्, यथा च भ्रमणरूपानुभवे स्मृतिशब्दप्रयोगः, तथा तदुभयमप्युपपादितमस्माभिरध्यासलक्षणभाष्ये। उपलब्धिः–संप्रयोगमात्रजन्येत्यर्थः। *तत्रेवं सतीति*।

अयमभिप्रायः–किमुपलब्धित्वादित्यनेन हेतुना स्वप्नोपलब्धिदृष्टान्तेन जागरितोपलब्धि-स्वरूपमिथ्यात्वं साध्यते, किं वा विषयमिथ्यात्वमिति। तत्र नाद्यः ; अनभ्युपगमात्,

क्षणिकविज्ञानस्वरूपस्य पारमार्थिकत्वाङ्गीकारात्। द्वितीयेऽपि किं तद्विषयमात्रस्य मिथ्यात्वं साध्यते, किं वा बाध्यविषयस्य। तत्र नाद्यः ; विज्ञानस्य स्वविषयत्वाभ्युपगमेन तस्यापि मिथ्यात्वप्रसङ्गात्। द्वितीयेऽपि किं मिथ्यात्वम्–असत्त्वमुच्यते, किं वा पराभ्युपगतानिर्वचनीयत्वम्, आहोस्विद् व्यवहारासमर्थत्वम्–इति। तत्र नाद्यः ; बहिर्विषयसत्त्वस्य प्रत्यक्षादिप्रमाणोपपादितत्वात् तेन तद्बाधानुपपत्तेः, दृष्टान्तस्य साध्यविकलत्वाच्च। नापि द्वितीयः ; सिद्धसाधनत्वात्। नापि तृतीयः ; शुक्ति–तद्रजतज्ञानविषययोरिव जाग्रत्स्वप्नप्रत्ययविषययोर्व्यवहारक्षमत्वाक्षमत्वलक्षणवैलक्षण्यस्य स्वयमप्यनुभूयमानत्वेन तद्विरोधात् तद्वैलक्षण्यस्य साधयितुमशक्यत्वात्–इति।।

ननु–अस्माभिर्जाग्रत्स्वप्नप्रत्ययविषययोरुक्तवैलक्षण्यं नानुभूयत एव। तथा च न स्वानुभवविरोध इति–चेत्, तत्राह–*न च स्वयमनुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुमिति*।। ननु–न वयं स्वानुभवमपलपामः, किं तर्हि, देहात्मानुभववद् अनुमानेनैव तद्बाधमध्यवस्याम इति–चेत्, तत्राह–*अपि च स्वानुभवविरोधप्रसङ्गादिति*।। देहात्मभावानुभवोऽपि नानुमानेन बाध्यते, किं तर्हि? सर्वदोषशङ्कारहितागमप्रामाण्यादित्यभिप्रायः।।२९।।

न भावोऽनुपलब्धेः।।३०।। ननु–उक्तमन्वय व्यतिरेकाभ्यां वासनावैचित्र्यादेवानुभव-वैचित्र्यमुपपत्स्यते, न विषयवैचित्र्यात्, तदन्तरेणापि वासनावैचित्र्यमात्रेण स्वप्नानुभववैचित्र्यदर्शनात्। न च–वासनावैचित्र्यस्य विषयानुभववैचित्र्यसापेक्षत्वात् तद्वैचित्र्यस्य च विषयवैचित्र्याधीनत्वादन्यान्याश्रयत्वात् तदुपजीव्यविरोधाच्च तेन विषयान्यथासिद्धिः कर्तुं शक्यत इति–वाच्यम्; बीजाङ्कुरन्यायेनानादित्वादन्योन्याश्रयानुपपत्तेः–इति। अत्रोच्यते–न भावो वासनानामुपपद्यते। कुतः? विषयोपलब्धेस्तत्कारणस्यासंभवात्। न च–वासनात एव तत्संभव इति–वाच्यम्; अन्योन्याश्रयापत्तेः। न च–बीजाङ्कुरवदनादित्वाद् नान्योन्याश्रय इति–वाच्यम्; अन्धपरम्परात्वेन बीजाङ्कुरवैलक्षण्यात्। न च–अन्वय–व्यतिरेकाभ्यां वासनाकारणता-सिद्धेर्नान्धपरम्परेति–वाच्यम्; विनाऽपि वासनाभिस्सर्वार्थोपलब्ध्यभ्युपगमात् तदन्वय–व्यतिरेकयोः परं प्रति दर्शयितुमशक्यत्वात्। अपि चार्थोपलब्धौ सत्यां वासनोदयदर्शनाद् अर्थसद्भावमेवान्वय व्यतिरेकौ प्रतिष्ठापयतः। अपि च वासना नाम ज्ञानजनितसंस्कारविशेषः ; तत्रैव लोके वासनाशब्दप्रसिद्धेः। न च तव मते स सिद्ध्यति; तस्य निराश्रयस्य स्थित्यनुपपत्तेः। न च त्वयाऽऽश्रयोऽभ्युपगम्यते। तथा सति स्थाय्यात्मसिद्धेः। नापि क्षणिकविज्ञानातिरिक्तः संस्कारोऽभ्युपगम्यते; विज्ञानमात्रवादहान्यापत्तेः। न च–क्षणिकं विज्ञानमेव पूर्वभावि स इति–वाच्यम्; घटज्ञानानन्तरं पटज्ञानोत्पत्तौ घटज्ञानस्यापि पटज्ञानजनकवासनात्वप्रसङ्गात्, तत्सन्ताने कदाचिज्जातं तज्जातीयं पटज्ञानमेव तद्वासनेति चेत्, न; तस्य चिरातीतत्वेनतत्कारणत्वानुपपत्तेरिति।।३०।।

ननु–अस्त्यालयविज्ञानसन्तानोऽस्मन्नये वासनाधार इति–चेत्, तत्राह– *क्षणिकत्वाच्चेति*।।३१।। आलयविज्ञानस्येति शेषः। क्षणिकत्वादालयविज्ञानस्य वासनाधारत्वानुपपत्तेः सन्तानिव्यतिरेकेण सन्तानस्यानभ्युपगमात् तस्यापि तदाधारत्वानुपपत्तेरित्यर्थः। शेषं भाष्यते। निष्प्रयोजनत्वाच्च विज्ञानवादनिराकरणे विस्तारो न कृतः।। ''नाभाव उपलब्धेरि'' त्यारभ्य बाह्यार्थस्थापनेन विज्ञानमात्रवादे निराकृते सुतरां निरालम्बनशून्यवादो निराकृतो भवति, इति न पृथक् निराकरणं सूत्रकृता कृतम्; अन्यथा कृतकरणात् पिष्टमेव पुनः पिष्टं स्यात्। एवं स्थितेऽपि तदनिराकरणे हेत्वन्तरं दर्शयति स्म भाष्यकारः– *शून्यवादिपक्षस्त्विति*।।३१।।

सर्वथाऽनुपपत्तेश्च।।३२।। सुगममस्य भाष्यम्।।३२।। इति चतुर्थं विज्ञानवादनिरासाधिकरणम् (अभावाधिकरणम्)।।

इति वार्तिकम् अभावाधिकरणम् समाप्तम्

प्रदीपः

नाभाव उपलब्धेः॥२८॥ इदं खल्वधिकरणं विज्ञानवादनिराकरणार्थम्। तत्र हि पूर्वपूर्ववासनानामुत्तरोत्तरबीजाङ्कुरादिज्ञानानां प्रवाहतो नित्यानां निमित्त-नैमित्तिकभाव इति न किमप्युपादानकारणमर्थानाम्, येन तेषामुत्पाद विनाशावभ्युपगम्येताम्, केवलमर्थाकारकारणता विज्ञानानां वासनानिमित्तेति मन्यते। अतोऽयमपि वादो ब्रह्मकारणतावादविरोधीति तन्मतनिराकरणार्थमिदमधिकरणम्। अभावः=बाह्यार्थानामभावः=स्वरूपतोऽसत्त्वम्, न=न सम्भवति; उपलब्धेः=*ज्ञानाकारव्यतिरेकेण बाह्यार्थानामपि प्रत्यक्षदर्शनात्। तथा च–विप्रतिपन्नाः प्रत्ययाः, निरालम्बनाः, प्रत्ययत्वादिति विज्ञानवादिनामनुमाने प्रत्यक्षबाधोऽनेन सूत्रेण प्रदर्श्यते। तत्र ज्ञानस्यैव प्रत्यक्षत्वम्, अर्थानां त्वनुमेयत्वमेव, न प्रत्यक्षत्वमिति सौत्रान्तिका इव विज्ञानवादिनोऽपि मन्यन्ते। इयान् विशेषः–अर्थस्य स्वरूपसतः संस्कृतस्यानुमेयत्वमिति तदीयं मतम्, विज्ञानवादिनां तु तदाकारस्यैवानुमेयत्वमिति। सर्वथा त्वर्थानुमेयतामतनिरासार्थमिदमधिकरणम् सौगतैकदेशवैभाषिक-मतावलम्बेनापीति तत्त्वम्॥

तस्य च विज्ञानवादस्य नाद्वैतिन एव विरोधिनः, किन्तु सर्वेऽपि दार्शनिकाः। इयान् विशेषः–दर्शनान्तराणां विज्ञानवादेन साकं न लेशतोऽपि साम्यम्, अद्वैतमते तु विज्ञानव्यतिकेणार्थाभावात् किञ्चिदिव साम्यं वर्तते। एतेन–स्वप्नप्रत्ययदृष्टान्तोऽपि व्याख्यातः ; तस्याप्यद्वैतमतरीत्यैव कथञ्चन योजनसम्भवात्। अतो ज्ञायतेऽद्वैतमतेनैव स्वाप्नसाधर्म्यादिना पूर्वपक्षं प्रसक्तं निरसितुमिदमधिकरणमिति। यद्यपि मतान्तरेष्वपि स्वाप्नसाधर्म्य जागरितप्रत्ययानां वर्तते; उभ्योरर्थसत्यत्वादिस्वीकारात्, तथापि न तद् अर्थमिथ्यात्वस्य तदभावरूपस्य साधकं भवितुमर्हति; दृष्टान्तेऽप्यर्थमिथ्यात्वस्यानङ्गीकारेणाप्रयोजक्तवात्। अतो ज्ञायते विज्ञानवादनिरासं जागराणां स्वाप्नवैधर्म्यादिना कर्तु प्रयतमानः सूत्रकारोऽद्वैतमतमेव सूत्राणां तात्पर्यविषयं सूचयति। तत्र श्रीभाष्यानुयायिनो "वैधर्म्याच्च न स्वप्नादिवदि"ति सूत्रगतश्रुतप्रकाशिकादौ कृत्वाचिन्तयैवेदमिति मन्यन्ते, इति नाद्वैतवादं विहाय वादान्तरमवलम्त्योक्तं सूत्रं प्रवृत्तमिति मन्यन्त एव। अधिकमन्यत्र

व्यक्तम्। सर्वथा तु–ज्ञानव्यतिरेकेणार्थाभाव इति मतनिरासार्थमिदमधिकरणमिति सर्वसम्मतमिदम्।।

पूर्वाधिकरणेन–''नासतोऽदृष्टत्वादि'' त्यदृष्टत्वेनाप्रत्यक्षत्वेनासत्कारणवादनिरासे, तेनैव दृष्टान्तेनार्थस्याप्यप्रत्यक्षत्वाद् न स्वरूपतोऽभाव इति शङ्काया दृष्टत्वेन हेतुनाऽत्र निरासात् प्रत्युदाहरणसङ्गतिः ; उपलब्धेरित्यस्य दृष्टत्वादित्यर्थात्। अन्यथा प्रत्ययमात्रपरत्वे पूर्वोत्तरहेत्वोरविशेषापत्तिरित्यप्रयोजकत्वमापद्येत। यदा तु–प्रत्ययत्वमर्थतथात्वस्यैव प्रयोजकम्, स्वप्नाप्रत्ययादीनामर्थातथात्वं तु दोषप्रयुक्तम्, न प्रत्ययत्वप्रयुक्तमिति शबरस्वामिनां सिद्धान्त आलोच्यते, तदा तु ''उपलब्धेरि'' त्यस्य प्रत्ययादिति सामान्यतः प्रत्ययविवक्षणेऽपि न दोषः ; पूर्वपक्षिणामनुमाने विरोधप्रदर्शनमात्रे विरोधप्रदर्शनमात्रे सूत्रतात्पर्यात्। भगवत्पादास्तु प्रत्यक्षादित्यर्थविवक्षणेनानुमानस्य प्रत्यक्षबाधितत्वेनाप्रामाण्यं सूत्रव्यवस्थाप्यं मन्यन्ते।।

तदयं विवेकः–अत्राधिकरणे पञ्च सूत्राणि (१) नाभाव उपलब्धेः, (२) वैधर्म्याच्च न स्वप्नादिवत्, (३) न भावोऽनुपलब्धेः (४) क्षणिकत्वाच्च (५) सर्वथाऽनुपपत्तेश्चेति। तत्र प्रथमेन सूत्रेण–सर्वे प्रत्ययाः, निरालम्बनाः, प्रत्ययत्वात्, स्वप्नप्रत्ययवदित्यनुमाने विरोधो बाधो वाऽप्रमाण्यकारणं प्रदर्श्यते। द्वितीयेन–*निर्णीतबाधिविषयत्वं पक्षे साधनाव्यापकमुपाधिरुक्तानुमाने प्रदर्श्यते। तृतीयेन तु सूत्रेण स्वप्नप्रत्ययस्यापि सालम्बनत्वसाधनद्वारा दृष्टान्तासिद्धिः प्रदर्श्यते; स्वाप्नानामपि निराश्रयवासनामात्रनिमित्तकत्वायोगात्। चतुर्थं तु सूत्रं विज्ञानबादरीत्या वासनाश्रयव्यवस्थापनासम्भवनिरूपणार्थम्। यथा च सन्तानः स्कन्धरूपो न प्रामाणिकः, तथा पूर्वाधिकरण एव विशदीकृतम्। पञ्चमं तूपसंहारपरमिति। तदेतत्सर्वं तत्तत्सूत्रविवरणावसरे विशदीभविष्यति।।

प्रकृतमनुसरामः। विज्ञानवादं पूर्वाधिकरणार्थसंग्रहपूर्वकमनुवदति भाष्यकारः पूर्वपक्षमुखेन–*एवमित्यादिना–बाह्यार्थस्याध्यवसातुं शक्यत इत्यन्तेन*।। केषाञ्चित्=सौत्रान्तिक वैभाषिकाणाम्। बाह्यार्थः=ज्ञानाकारव्यतिरेकेणार्थाकार इत्यर्थः। समुदायाप्राप्त्यादिषु=समुदायाप्राप्ति प्रतिज्ञाविरोधासत्कारणवादायोगादिषु। विज्ञानवादी=अर्थसामान्यस्य वासनामात्रेण ज्ञानाकारत्वमेवेति विज्ञानस्कन्धवादमात्रवादी, निरालम्बनविज्ञानवादीति यावत्। तथा च सौत्रान्तिकादीनामपि विज्ञानस्कन्धवादित्वेऽपि तेषां रूपादिस्कन्धस्याप्यङ्गीकारात् सालम्बनविज्ञानवादित्वात् ततो वैलक्षण्यमिति भावः। संस्काराणां वासनापरपर्यायाणामेतैरप्यङ्गीकारेऽपि तेषां स्कन्धत्वं न स्वीक्रियत इति तु तत्त्वम्। तदिदमाह–*तस्य तु विज्ञानैकस्कन्धवाद इति*।।

अथ विज्ञानवादप्रक्रियाः संगृह्णाति–*तस्मिंश्चेत्यादिना*।। बाह्यार्थासम्भवमुपपादयति–*स

हीत्यादिना*।। प्रतिविषयं ज्ञानभेदे कारणमाह-*योऽयमिति*।। ज्ञानगताकारणविशेषणैव निर्वाहेऽर्थानामपि पृथक् कल्पनं वितथमिति भावः। ज्ञानार्थयोः सहोपलम्भनियम एव ज्ञान-विषययोरभेदे प्रमाणम्, स चाभेद एकस्यापराकारतास्वीकारेणैव निर्वहणीयः, तत्र च ज्ञानस्य प्रत्यक्षत्वम्, विषयाणां परोक्षत्वमित्यन्यतरापलापेऽर्थापलाप एव युक्त इति भावः। *तस्मादपीति*।। अपिना लाघवस्य पूर्वोक्तस्य परामर्शः। तथा च लाघवम्, सहोपलम्भनियमश्च द्वितयमर्थस्य ज्ञानाकारतायां गमकमिति सिद्धम्, न केवलमिदम्, किन्तु विमताः प्रत्ययाः, निरालम्बनाः, प्रत्ययत्वादित्यनुमानमपि तत्र प्रमाणमिति दृष्टान्तविवरणव्याजेन विशदयति-*स्वप्नादिवच्चेति*।। एवम्=ज्ञानव्यतिरेकेणार्थशून्यत्वमित्यर्थः। दृष्टान्तं विभजते-*यथा हीत्यादिना-।। ज्ञानवैचित्र्यहेतुमाशङ्कासमाधानाभ्यामाह-*कथं पुनरित्यादिना*।। ज्ञानवैचित्र्यस्य वासनावैचित्र्यनिमित्तकत्वमपि स्वप्नदृष्टान्तेनैवेत्याह-*अपि चेत्यादिना*।। तस्मादपीत्युपसंहारः।।

तदयं निष्कर्षः-ज्ञानम्, निरालम्बनम्, अर्थस्य ज्ञानाकारत्वस्वीकारेणैव निर्वाहेऽर्थकल्पनस्य गौरवपराहतत्त्वात्, अर्थ-ज्ञानयोः सहोपलम्भनियमात्, स्वप्नादिवत्। वासनावैचित्र्येणैव ज्ञानवैचित्र्योपपत्तौ तत्सालम्बनत्वस्यायोगाच्चेति पूर्वपक्षसंग्रहः।।

अत्र संगृहीतपूर्वपक्षांशानां प्रधानतमोऽन्तिम एवांश इति स्वप्नादिप्रत्ययवैषम्यप्रदर्शनपूर्वकं सूत्रव्याख्यानमिषेण तमादौ निरस्यति-*उपलब्धेरित्यादिना*।। तथा च प्रत्यक्षबाधितत्वादुक्तानुमानमसाधकमिति भावः। बाह्यार्थप्रत्यक्षं तत्तदाशङ्कानिरासपूर्वकमुपपादयति-*यथा हीत्यादिना-*न संभवतीत्युच्येतोपलब्धेरवेत्यन्तेन*।। ज्ञानस्यार्थाकारक्तां निरस्यति-*न च ज्ञानस्येति*।। सहोपलम्भनियममन्यथा साधयति-*अत एवेति*।। सहोपलम्भनियमस्याभेद-हेतुत्वाभावे विनिगमकमाह-*अपि चेति*।। विज्ञानस्य प्रत्यक्षत्वमर्थस्य तु परोक्षत्वमिति प्रक्रियामाशङ्क्योभयोरपि प्रत्यक्षत्वेन परिहरति-*विज्ञानमिति*।। विज्ञानस्य स्वयंप्रकाशत्वम्, अर्थस्य तु न तथा; अनुमेयत्वादिति शङ्कते-*अथेति*।। स्वस्यैव स्वप्रकाश्यत्वं तु बाधितमिति ज्ञानस्यापि परप्रकाश्यत्वमविशिष्टमिति समाधत्ते-*अत्यन्तेति*।। तथापि लोकप्रसिद्धार्थगतपरप्रकाश्यत्वा-बाधेनैवोपपत्तौ स्वप्रकाशत्वकल्पनया ज्ञानमात्रव्यवस्थापनमयुक्तम्।।

अयं भावः-यदि प्रत्यक्षत्वमादाय ज्ञानार्थयोरन्यतरस्य व्यवस्थापनं मन्यते, तर्हि काममर्थ एव व्यवस्थापनमर्हति, न परोक्षं ज्ञानमिति मीमांसकमतरीत्या समाधानम्। अद्वैतमतरीत्या तु ज्ञानस्यापि वृत्तिव्याप्यत्वात् परप्रकाश्यत्वं समानम्; आवरणाभिभवार्था वृत्तिरिति सिद्धान्तादित्यन्यतरापलापे न कारणमस्तीति। तदिदमाह-*न चेति*।।

ननु–वृत्तिभास्यत्वं चैतन्यस्येति पक्षो न संभवति; वृत्तेरपि वृत्त्यन्तरेण भानकल्पनापत्त्याऽनवस्थापत्तेः, अतः स्वप्रकाशत्वमेवाङ्गीकर्तव्यमित्याशयेन शङ्कते–*नन्विति*।। अद्वैतिनो हि वयं चैतन्यस्य वृत्तेश्चोभयोरपि वृत्त्युपहितचैतन्येन साक्षिणैव भानं मन्यामहे। अत एव ज्ञानानन्तरं तत्साक्षिणोऽपि भानात् कथं साक्षिणो भानमिति न शङ्कोदेतीति सर्वेषां ज्ञाततयाऽज्ञाततया वा साक्षिभास्यतावदिनामस्माकं न किमपि छिन्नमित्यभिप्रायेण समाधत्ते–*विज्ञानग्रहणमात्र एवेति*।। वृत्तिग्रहणमात्र एवेत्यर्थः। विज्ञानसाक्षिणो वृत्तिसाक्षिणो वृत्त्युपहितचैतन्यस्येति यावत्। तत्र साक्षी स्वयंप्रकाशोऽपि प्रमातैव, न प्रमेय इति नास्मन्मतेऽपि दोषसाम्यापादनमित्याह–*साक्षिप्रत्यययोश्चेति*।। प्रमातृचैतन्य–वृत्त्यवच्छिन्नचैतन्ययोः ज्ञातृ ज्ञानयोर्वेत्यर्थः। ननु–एवं तर्हि भवतां साक्ष्यपलापापत्तिः ; तस्यानुपलभ्यत्वात्, अन्यथा ज्ञानोपलभ्यत्व इवानवस्थानापत्तेरित्यत आह–*प्रदीपवदिति*।। तथा चार्त्तृकज्ञानवादापेक्षया स्वयंप्रकाशसर्त्तृकज्ञानवाद एव युक्त इति साक्षिवैलक्षण्यं सिद्धमिति भावः।।

इदमत्र तत्त्वम्–अनुभवरूपत्वेन विज्ञानस्य प्रत्यक्षत्वं तु साक्षिण इव यद्यपि न विरुद्धम्; तथापि नार्त्तृकमसाधनं च प्रकाशनं प्रदीपप्रथनादावपि दृष्टमिति तत्सापेक्षोपलब्धिविषयत्वस्यैव सूत्रे हेतुत्वेन विवक्षणात् तस्य चार्थ ज्ञानयोरविशेषात् प्रत्यक्षबाधितं विज्ञाननिरालम्बनत्वमिति। तदिदं सर्वमाशङ्कासमाधानाभ्यामाह–*बाढमेवेत्यादिना–प्रसाधितमित्यन्तेन*।।२८।।

एतावताऽर्थ ज्ञानयोरुभयोरपि प्रत्यक्षत्वं स्वीकृत्यार्थानुमेयतावादं च निरस्य विज्ञाननिरालम्बनता प्रत्यक्षविरुद्धत्वादप्रामाणिकीति प्रतिपादितम्। संप्रति प्रत्ययत्वं तथाभावस्यार्थगतस्य प्रयोजकम्, अतः स्वप्नप्रत्ययस्यापि न निरालम्बनत्वम्, किन्त्वनिर्वचनीयार्थालम्बनत्वमेव वर्तते। तच्च दोषप्रयुक्तमेव, न प्रत्ययत्वप्रयुक्तम्। कथमिदमवगम्यते दोषप्रयुक्तमनिर्वचनीयालम्बनत्वमेव स्वाप्नप्रत्ययानामिति चेत्, जागरे बाधादित्यादि मनसि निधाय बाधितार्थक्तवम्, दोषनिबन्धनत्वं वोपाधिरत्र स्वप्नविमतप्रत्यययोर्वैषम्यं वर्तत इति सूत्रयति–*वैधर्म्याच्च न स्वप्नादिवदिति*।।२९।। अत्र वैधर्म्यादित्यनेन विलक्षणधर्मक्तवादिति विवक्षितम्। तथा च स्वप्नप्रत्ययस्यापि न सर्वथा निरालम्बनत्वमिति साध्याप्रसिद्धिरेकं दूषणं सूच्यते। परं तु परैः साकं विवादावसरे स्वमतप्रक्रिया नावलम्बनीयेति लोकसिद्धानुभवमादायोपाधिपरतयैव सूत्रं योजयति–*वैधर्म्य हीति*।। बाधाबाधावुपपादयति–*बाध्यते हीति*।। विमते प्रत्ययेऽवाधमुपपादयति–*नवमित्यादिना*।। कस्याञ्चिदप्यवस्थायामिति*।। ब्रह्मसाक्षात्कारपूर्वक्षणस्यैवावस्थापदवाच्यत्वाद् व्यवहारदशायां बाधाबाधावेव भाष्यकारैरत्र वैधर्म्यपदेन विवक्ष्यते, न तु जागरितप्रत्ययानां सर्वथाऽबाधितार्थक्तवम्, इत्येतद्भाष्यमहिम्ना भगवत्पादानामपि प्रपञ्चसत्यत्ववाद एव तात्पर्यम्, इति केषाञ्चन कल्पना न

क्षोदक्षमा, यदि हि मतान्तरेष्विव त्रैकालिकं सत्यत्वमेव भाष्यकारस्यात्राभिमतं स्यात्, तर्हि तन्मत इव स्वाप्निकानामपीश्वरसृष्टत्वाविशेषेण सत्यत्वाद् बाधाबाधाख्यं वैधर्म्यमपि निरवसरमेव स्यात्। यथा च स्वाप्निकानामपि सत्यत्वमिति मतं न सौत्रम्, तथा सन्ध्याधिकरणे व्यक्तीकरिष्यते॥

एतावत्त्विह सूच्यते—वैधर्म्यमत्र सूत्रितं नाद्वैतमतप्रक्रियादरणं विना भवितुमर्हतीति। वक्तव्यं चात्र पूर्वमेवोक्तम्। अधिकं तु वेदान्तरक्षामणावद्वैतमार्तण्डे च व्यक्तम्। स्वप्नवैधर्म्यमर्थभेदनिबन्धनं प्रतिपादितम्॥

इतः परं तु "स्वप्नादिष्वन्तरेणाप्यर्थं ज्ञानवैचित्र्यस्य वासनानिमित्तस्योभयसम्मतत्वाद् विमताः प्रत्ययाः, निरालम्बनाः, वासनानिमित्तवैचित्र्यवत्त्वात्, स्वप्नप्रत्ययवदिति परषामनुमानान्तरं कर्तव्यमिति तदनुगुणं वैधर्म्यं विवृणुते— *अपि चेति*॥ स्वप्नदर्शनं वासनामात्रनिमित्तकमिति युक्तम्; स्मृतित्वात्, स्मृतिरूपत्वाद्वा। जागरितप्रत्ययस्तु न वासनामात्रनिमित्तकः, उपलब्धित्वादिति स्मृतित्वस्य द्वितीयानुमान उपाधित्वमिति भावः। यद्यप्यद्वैतमते स्वप्नस्यापि वासनामात्रनिमित्तकत्वं वा स्मृतित्वं वा बाधितम्, तथापि कृत्वाचिन्तया योजनान्तरमभिप्रेत्य स्मृतित्वं वर्णितम्; दृष्टान्ते पराभिमतप्रक्रियावलम्बमात्रेण स्वतात्पर्यकल्पनायोगात्। तथा च लौकिकानां साधारणप्रसिद्ध्यनुसारेणापि विमतप्रत्ययानां स्वाप्नसाम्यं वक्तुं शक्यते; लौकिकानां विमतप्रत्ययेषु स्मृतित्वासंप्रतिपत्तेः। तदिदमाह— *स्मृत्युपलब्ध्योरिति*॥ तथा च विमतप्रत्ययानां प्रत्यक्षत्वाद् अनुमानेन प्रत्यक्षबाधो न भवतीति प्रथमसूत्रार्थ एवात्रापि संगृहीतो भवति। इयान् विशेषः—यत् प्रथमसूत्रे विमतप्रत्ययानां केवलं प्रत्यक्षत्वं वर्णितम्, अनेन तु स्वप्नप्रत्ययानां स्मृतित्वमिति नोक्तसूत्रवैयर्थ्यमिति। तदिदं विशदयति— *तत्रैवं सतीत्यादिना*॥ *स्वप्नप्रत्ययसाधर्म्यादिति*॥ स्मृतित्वेऽपि प्रत्ययत्वमात्रमादाय स्वप्नप्रत्ययदृष्टान्तताविवक्षणादिति भावः। *वैधर्म्यं स्वप्न जागरितयोरिति*॥ स्मृतिप्रत्यक्षत्वादिकृतम्, वासनामात्रनिमित्तत्व-तदभावकृतं वेत्यादि॥२९॥

अथ वासनामात्रनिमित्तकत्वेन साधर्म्यमपि न सम्भवदुक्तिकम्; विज्ञानवादिमते वासनाया एव विज्ञानातिरिक्ताया दुर्वचत्वात्। तथा च द्वितीयेऽनुमाने हेत्वसिद्धिरपीत्याह— *न भावोऽनुपलब्धेः*॥३०॥ अर्थानामिति शेषः। वासनानामित्यादिः। तथा चार्थानामनुपलम्भे वासनानामप्यभाव इति सूत्रार्थः। अनेन च सौगतमतरीत्या वासनानामभावः, तत्समर्थनार्थमर्थोपलब्धिर्वा स्वीकर्तव्येति साध्यते, आद्ये हेत्वसिद्धिः, द्वितीये बाधः प्रतिपाद्यते। तत्र वैधर्म्यादिबाधार्थं यद्यर्थानामनुपलब्धिर्मन्यते, तर्हि वासनानामसिद्धिः, इतरथा त्वर्थोपलब्धिरित्युभयथाऽपि न विज्ञाननिरालम्बनत्वसिद्धिरिति निष्कर्षः। तदिदं मनसि निधायाह— *अत्रोच्यत इत्यादि*॥

तत्र प्रथमं तन्मतानुसारेण दूषणमभिधाय विज्ञानवादिभिरद्वैतिनोऽधिकृत्योक्तानुमानप्रयोगात् स्वमतानुसारेण दूषणमाह– *अपि चेति*।। *प्रतिष्ठापयत इति*।। अनेन च वासनानिमित्तकत्वहेतोरपि विज्ञानसालम्बनताऽप्रयोजकत्वस्य व्यवस्थापनात् विरुद्धता द्वितीयानुमानस्य ज्ञाप्यते। आश्रयानुपलब्धेः=वासनाश्रयस्य भवन्मतेऽनभ्युपगमात्, वासनानां न भाव इति वा सूत्रस्य योजनेति मत्वाऽर्थान्तरमाह– *अपि चेति*।। अत्रापि योजनायां प्रथमयोजनायामिव हेत्वसिद्धिरेव विवक्षिता। अन्यत् सर्वं विशदम्।।३०।।

ननु–आलयविज्ञानं वासनानामाश्रयो भविष्यतीत्याशङ्क्य समाधत्ते सूत्रकारः– *क्षणिकत्वाश्च्चेति*।।३१।। आलयविज्ञानस्य क्षणिकत्वाद् युगपदयुगपद्वा भवतां वासनाऽलयविज्ञानानां नाधाराधेयभावानुपपत्तिरिति भावः। तदिदमाह– *यदपीति*।। तदेवं वासनाश्रयानुपपत्तिपरतया सूत्रं व्याख्याय क्षणिकविज्ञानानामु 'त्तरोत्पादे च पूर्वनिरोधादि'ति न्यायेन वासनानिमित्तताऽभावपरतयाऽपि योजनमभिप्रेत्याह– *अपि चेति*।। प्रवृत्तिविज्ञानानामालयविज्ञानस्य वा क्षणिकत्वादपि न वासनानां भाव इति सूत्रयोजना–न भाव इति पूर्वसूत्रतोऽनुषङ्गेणेति निष्कर्षः। *इत्येवमादीनीति*।। आदिपदेन–"असति प्रतिज्ञाविरोधो योगपद्यमन्यथे" त्यादि गृह्यते।। तेन चोपसंहारे–सर्वशून्यतावादनिरासोऽपि पूर्वोक्तप्रकारेण सूच्यते। तदिदमभिप्रेत्यास्य वादत्रयनिरासेऽपि तात्पर्यमुपसंहारव्याजेन सूचयति– *एवमेताविति*।। *शून्यवादपक्षस्त्विवति च*।। अधिकमन्यत्र व्यक्तम्।।३१।।

सर्वथाऽनुपपत्तेश्च।।३२।। निगदमस्य भाष्यम्।।३२।। इतिपञ्चममभावाधिकरणम्।।

इति प्रदीपः अभावाधिकरणम् समाप्तम्

भामती

पूर्वाधिकरणसङ्गतिमाह *एवमिति*। बाह्यार्थवादिभ्यो विज्ञानमात्रवादिनां सुगताभिप्रेयतया विशेषमाह *केषाञ्चित् क्लेति*। अथ प्रमाता प्रमाणं प्रमेयं प्रमितिरिति हि चतसृषु विधासु तत्त्वपरिसमाप्तिः, आसामान्यतमाभावेऽपि तत्त्वस्याव्यवस्थानात्। तस्मादनेन विज्ञानस्कन्धमात्रं तत्त्वं व्यवस्थापयता चतस्रो विधा एषितव्याः तथा च न विज्ञानस्कन्धमात्रं तत्त्वं। न ह्यस्ति सम्भवो विज्ञानमात्रं चतस्रो विधाश्वेत्यत आह *तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणेति*। यद्यप्यनुभवान्नान्योऽनुभाव्योऽनुभवितानुभवनं चः तथापि बुद्ध्यारूढेन बुद्धिपरिकल्पितेनान्तस्थ एवैष प्रमाणप्रमेयफलव्यवहारः प्रमातृव्यवहारश्चेत्यपि द्रष्टव्यं, न पारमार्थिक इत्यर्थः। एवं च न सिद्धसाधनम्। न हि ब्रह्मवादिनो नीलाद्याकारां वित्तिमभ्युपगच्छन्ति, किन्त्वनिर्वचनीय नीलादीति। **तथाहि**-स्वरूपं विज्ञानस्यासत्याकारयुक्तं प्रमेयम्, प्रमेयप्रकाशनं प्रमाणफलं, तत्प्रकाशनशक्तिः प्रमाणम्। बाह्यवादिनोरपि वैभाषिकसौत्रान्दिकयोः काल्पनिक एव प्रमाणफलव्यवहारोऽभियत इत्याह *सत्यपि बाह्येऽर्थ इति*। भिन्नाधिकरणत्वे हि प्रमाणफलयोस्तद्भावो न स्यात्। नहि खदिरगोचरे परशौ पलाशे द्वैधीभावो भवति। तस्मादनयोरैकाधिकरण्यं वक्तव्यम्। कथंच तद्भवति? यदि ज्ञानस्थे एव प्रमाणफले भवतः। न च ज्ञानं स्वलक्षणमनशंमशाभ्यां वस्तुसद्भ्यां युज्यते। तदेव ज्ञानमज्ञानव्यावृत्तिकल्पितज्ञानत्वांशं फलम्। अशक्तिव्यावृत्तिपरिकल्पितात्मानात्मप्रकाशनशक्त्यंशं प्रमाणम् प्रमेयं त्वस्य बाह्यमेव। एवं सौत्रान्तिकसमयेऽपि। ज्ञानस्यार्थसारूप्यमनीलाकारव्यावृत्त्या कल्पितनीलाकारत्वं प्रमाणं व्यवस्थापनहेतुत्वात्। अज्ञानव्यावृत्तिकल्पित च ज्ञानत्वं फलं व्यवस्थाप्यत्वात्। तथाचाहुः-''न हि वित्तिसत्तैव तद्वेदना युक्ता, यस्याः सर्वत्राविशेषात्। तां तु सा रूप्यमाविशत्सरूपयत्तद् घटयेत्।'' प्रश्नपूर्वकं बाह्यार्थाभाव उपपत्तीराह *कथं पुनरवगम्यते इति*। स हि विज्ञानालम्बनत्वाभिमतो बाह्योऽर्थः परमाणुस्तावन्न सम्भवति। एकस्थूलनीलाभासं हि ज्ञानं, न परमसूक्ष्मपरमाण्वाभासम्। न चान्याभासमन्यगोचरं भवितुमर्हति; अतिप्रसङ्गेन सर्वगोचरतया सर्वसर्वज्ञत्वप्रसङ्गात्। न च प्रतिभासधर्मः स्थौल्यमिति युक्तम्, विकल्पासहत्वात्। किमयं

प्रतिभासस्य ज्ञानस्य धर्म उत प्रतिभासनकालेऽर्थस्य धर्मः? **यदि पूर्वः कल्पः अद्धा**, तथासति हि स्वांशालम्बनमेव विज्ञानमभ्युपेतं भवति। एवं च कः प्रतिकूलीभवत्यनुकूलमाचरति? द्वितीय इति चेत्, तथाहि रूपपरमाणव एव निरन्तरमुत्पन्ना एकविज्ञानोपारोहिणः स्थौल्यम्। न चात्र कस्यचिद्भ्रान्तता। न हि न ते रूपपरमाणवः। न च न निरन्तरमुत्पन्नाः। न चैकविज्ञानानुपारोहिणः। तेन मा भून्नीलत्वादिवत्। प्रत्येक परमाणुष्वभावात्। प्रतिभासदशापन्नानां तु तेषां भविष्यति बहुत्वदिवत्सांवृतं स्थौल्यम्। **यथाहुः**-

ग्रहेऽनेकस्य चैकेन किञ्चिद्रूपं हि गृह्यते।
सांवृतं प्रतिभासस्थं तदेकात्मन्यसम्भवात्॥१॥

न च तद्दर्शनं भ्रान्तं नानावस्तुग्रहाद्यतः।
सांवृतं ग्रहणं नान्यन्न च वस्तुग्रहो भ्रमः॥२॥ इति।

तन्न, नैरन्तर्य्याभासस्य भ्रान्तत्वात्। गन्धरसस्पर्शपरमाण्वन्तरिता हि ते रूपरमाणवो न निरन्तराः। तस्मादारात्सान्तरेषु वृक्षेष्वेकघनवनप्रत्ययवदेष स्थूलप्रत्ययः परमाणुषु सान्तरेषु भ्रान्त एवेति पश्यामः। तस्मात् कल्पनापोढत्वेऽपि भ्रान्तत्वाद्टादिप्रत्ययस्य पीतशङ्खादिज्ञानवन्न प्रत्यक्षता परमाणुगोचरत्वाभ्युपगमे। तददिमुक्तं ***न तावत्परमाणवः स्तम्भादिप्रत्ययपरिच्छेद्या भवितुमर्हन्ति*। *नापि तत्समूहःस्तम्भादयोः***ऽवयविनः। तेषामभेदे परमाणुभ्यः परमाणव एव। तत्र चोक्तं दूषणम्। भेदे तु गवाश्वस्येवात्यन्तवैलक्षण्यमिति न तादात्म्यम्। समवायश्च निराकृत इति। एवं भेदाभेदविकल्पेन जातिगुणकर्मादीनपि प्रत्याचक्षीत। तस्माद्यद्यत्प्रतिभासते तस्य सर्वस्य विचारासहत्वाद्, अप्रतिभासमानसद्भावे च प्रमाणाभावान्न बाह्यालम्बनाः प्रत्यया इति। **अपि च न** तावद्विज्ञानमिन्द्रियवन्निलीनमर्थ प्रत्यक्षयितुमर्हति। न हि यथेन्द्रियमर्थविषयं ज्ञानं जनयत्येवं विज्ञानमपरं विज्ञानं जनयितुमर्हति। तत्रापि समानत्वादनुयोगस्यावस्थाप्रसङ्गात्। न चार्थाधारं प्राकट्यलक्षणं फलमाधातुमुत्सहते, अतीतानागतेषु तदसम्भवात्। नह्यस्ति सम्भवोऽप्रत्युत्पन्नो धर्मी धर्मश्चास्य प्रत्युत्पन्न इति। तस्माज्ज्ञानस्वरूपप्रत्यक्षतैवार्थप्रत्यक्षताऽभ्युपेया। तच्चानाकारं सदा जानतो भेदाभावात् कथमर्थभेदं व्यवस्थापयेदिति। तद्भेवव्यवस्थापनायाकारभेदोऽस्यैषितव्यः। तदुक्तम्- न हि वित्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राविशेषात्। तां तु सारूप्यमाविशत्सरूपयत्तद्घटयेदिति।'' एकश्चायमाकारोऽनुभूयते। स चेद्विज्ञानस्य नार्थसद्भावे किञ्चन प्रमाणमस्तीत्याह ***अपि चानुभवमात्रेण साधारणात्मनो ज्ञानस्येति*। *अपि च सहोपलम्भनियमादिति***। यद्येन स नियतसहोपलम्भनं तत्ततो न भिद्यते, यथैकस्माच्चन्द्रमसो द्वितीयश्चन्द्रमाः। नियमसहोपलम्भश्चार्थो

ज्ञानेनेति व्यापकविरुद्धोपलब्धिः। निषेध्यो हि भेदः सहोपलम्भानियमेन व्यापतो यथा भिन्नावश्विनौ नावश्यं सहोपलभ्येते, कदाचिदभ्रापिधानेऽन्यतरस्यैकस्योपलब्धेः। सोऽयमिह भेदव्यापकानियम-विरुद्धो नियम उपलभ्यमानस्तद्व्याप्यं भेदं निवर्त्तयतीति। **तदुक्तम्-**

सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिनिज्ञानैर्दृश्येतेन्दाविवाद्वये॥ इति॥

स्वप्नादिवच्चेदं द्रष्टव्यम्।

यो यः प्रत्ययः स सर्वो वाह्यानालम्बनः यथा स्वप्तमायादिप्रत्ययः स्तथा चैष विवादाध्यासितः प्रत्यय इति स्वभावहेतुः। वाह्यानालम्बनता हि प्रत्ययत्वमावानुबन्धिनी वृक्षतैव शिंशपात्वमात्रानुबन्धिनीति तन्मात्रानुबन्धिनि निरालम्बनत्वे साध्ये भवति प्रत्ययत्वं स्वभावहेतुः। अत्रान्तरे सौत्रान्तिकश्चोदयति ***कथं पुनरसति बाह्येऽर्थे*** नीलमिदं पीतमित्यादि ***प्रत्ययवैचित्र्यमुपपद्यते***। स हि मेने ये यस्मिन् सत्यपि कादाचित्कास्ते सर्वे तदतिरिक्तहेतुसापेक्षाः, यथाऽविवक्षत्यजिगमिषति मयि व्रचनगमनप्रतिभासाः प्रत्ययाश्चेतनसन्तानान्तरसापेक्षाः। तथा च विवादाध्यासितास्तस्य सत्यप्यालयविज्ञानसन्ताने षडपि प्रवृत्तिप्रत्यया इति स्वभावहेतुः। यश्चासावालयविज्ञानसन्तानातिरिक्तः कादाचित्कप्रवृत्तिज्ञानभेदहेतुः, स बाह्योऽर्थ इति। वासनापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पाद इति चेत्, **नन्वेकसन्ततिपतिताना** मालयविज्ञानानां तत्प्रवृत्तिविज्ञानजननशक्तिर्वासना, तस्याश्च स्वकार्योपजनं प्रत्याभिमुख्यं परिपाकस्तस्य च प्रत्ययः स्वसन्तानवर्त्ती पूर्वक्षण सन्तानान्तरापेक्षानभ्युपगमात्, तथा च सर्वेऽप्यालयसन्तानपतिताः परिपाकहेतवो भवेयुः। न वा कश्चिदपि, आलयसन्तानपातित्वाविशेषात्। क्षणभेदाच्छक्तिभेदस्तस्य च कादाचित्कत्वात्कार्यकादाचित्कत्वमिति चेत्। **नन्वेव**मेकस्यैव नीलज्ञानोपजननसाम्यर्थ्यं तत्प्रबोधसामर्थ्यं चेति क्षणान्तरस्यैतन्न स्यात्। सत्त्वे वा कथं क्षणभेदात्सामर्थ्यभेद इत्यालयसन्तानवर्त्तिनः सर्वे समर्था इति समर्थहेतुसद्भावे कार्यक्षेपानुपपत्तेः। स्वसन्तानमात्राधीनत्वे निषेध्यस्य कादाचित्कत्वस्य विरुद्धं सदातनत्वं, तस्योपलब्ध्या कादाचित्कत्वं निवर्त्तमानं हेत्वन्तरापेक्षत्वे व्यवतिष्ठत इति प्रतिबन्धसिद्धिः। न च ज्ञानसन्तानान्तरनिबन्धनत्वं सर्वेषामिष्यते प्रवृत्तिविज्ञानानां विज्ञानवादिभिअपितु कस्यचिदेव विच्छिन्नगमनवचनप्रतिभासस्य प्रवृत्तिविज्ञानस्य। **अपि च** सत्त्वान्तरसन्ताननिमित्तत्वे तस्यापि सदा सन्निधानान्न कादाचित्कत्वं स्यात्। न हि सत्त्वान्तरसन्तानस्य देशतः कालतो वा विप्रकर्षसम्भवः। विज्ञानवादे विज्ञानातिरिक्तदेशानभ्युपगमादमूर्त्तत्वाच्च विज्ञानानामदेशात्मकत्वात्संसारस्यादिमत्वप्रसङ्गेनापूर्वसत्त्व-

प्रादुर्भावानभ्युपगमाच्च न कालतोऽपि विप्रकर्षसम्भवः। तस्मादसति बाह्येऽर्थे प्रत्ययवैचित्र्यानुपपत्तेरस्यानुमानिको बाह्योऽर्थ इति सौत्रान्तिकाः प्रतिपेदिरे, तान्निराकरोति ***वासनावैचित्र्यादित्याह*** विज्ञानवादी। **इदमत्राकूतम्**-स्वसन्तानमात्रप्रभवत्वेऽपि प्रत्ययकादाचित्कत्वोपपत्तौ सन्दिग्धविपक्षव्यावृत्तिकत्वेन हेतुरनैकान्तिकः। **तथाहि**-वाह्यनिमित्तकत्वेऽपि कथं कदाचित् नीलसंवेदेनं कदाचित् पीतसंवेदनम्? वाह्यनीलपीतसन्निधानासन्निधानाभ्यामिति चेत्, अथ पीतसन्निधानेऽपि किमिति नीलज्ञानं न भवति, पीतज्ञानं भवति? तत्र तस्य सामर्थ्यादसामर्थ्याच्चेतरस्मिन्निति चेत्, कुतः पुनरयं सामर्थ्यासामर्थ्यभेदः? हेतुभेदादिति चेत्, एवं तर्हि क्षणानामपि स्वकारणीभेदनिबन्धनः शक्तिभेदौ भविष्यति। सन्तानिनो हि क्षणाः कार्यभेदहेतवस्ते च प्रतिकार्य्यं भिद्यन्ते। न च सन्तानो नाम कश्चिदेक उत्पादकः क्षणानां यदभेदात् क्षणा न भिद्येरन्। **ननूक्तं** न क्षणभेदाभेदाभ्यां शक्तिभेदाभेदौ, भिन्नानामपि क्षणानामेकसामर्थ्योपलब्धेः। अन्यथैक एव क्षणो नीलज्ञानजननसमर्थ इति न भूयो नीलज्ञानानि जायेरन्। तत्समर्थस्यतीतत्वात् क्षणान्तराणां चासामर्थ्यात्। तस्मात् क्षणभेदेऽपि न सामर्थ्यभेदः, सन्तानभेदे तु सामर्थ्यं भिद्यत इति। तन्न, यदि भिन्नानां सन्तानानां नैकं सामर्थ्यं हन्त तर्हि नीलसन्तानानामपि मिथो भिन्नानां **नैकमस्ति** नीलाकाराधानसामर्थ्यमिति सन्निधानेऽपि नीलसन्तानान्तरस्य न नीलज्ञानमुपजायेत। तस्मात्सन्तानान्तराणामिव क्षणान्तराणामपि स्वकारणभेदाधीनोपजनानां केषाञ्चिदेव सामर्थ्यभेदः केषाञ्चिन्नेति वक्तव्यम्। तथा चैकालयविज्ञानसन्तानपतितेषु कस्यचिदेव ज्ञानक्षणस्य स तादृशः सामर्थ्यातिशयो वासनापरनामा स्वप्रत्ययासादितः; यतो नीलाकारं प्रवृत्तिविज्ञानं जायते, न पीताकारम्। कस्यचित्तु स तादृशो यतः पीताकारं ज्ञानं न नीलाकारमिति वासनावैचित्र्यादेव स्वप्रत्ययासादिताज्ज्ञानवैचित्र्यसिद्धेर्न तदतिरिक्तार्थसद्भावे किञ्चनास्ति प्रमाणमिति पश्यामः। आलयविज्ञानसन्तानपतितमेवासंविदितं ज्ञानं वासना तद्वैचित्र्यान्नीलाद्यनुभववैचित्र्यम्, पूर्वनीलाद्यनुभववैचित्र्याच्च वासनावैचित्र्यमित्यनादितानयोर्विज्ञानवासनयोः। तस्मान्न परस्पराश्रयदोषसम्भवो वीजाङ्कुरसन्तानवदिति। अन्वयव्यतिरेकाभ्यामपि वासनावैचित्र्यस्यैव ज्ञानवैचित्र्यहेतुता नार्थवैचित्र्यस्येत्याह ***अपि चान्वयव्यतिरेकाभ्यामिति***। *एवं प्राप्ते, ब्रूमः* ''नाभाव उपलब्धे'' रिति। न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते। स ह्युपलम्भाभावाद्वाध्ययसीयेत, सत्यप्युपलम्भे तस्य बाह्याविषयत्वाद्वा, सत्यपि बाह्यविषयत्वे बाह्यार्थबाधकप्रमाणसद्भावाद्वा। न तावत् सर्वथोपलम्भाभाव इति प्रश्नपूर्वकमाह *कस्मात् ? उपलब्धेरिति*। नहि स्फुटतरे सर्वजनीन उपलम्भे सति तदभावः शक्यो वक्तुमित्यर्थः। द्वितीयं पक्षमवलम्बते ***ननु नाहमेवं ववीमीति***। निराकरोति ***वाढमेवं ब्रवीषि***। उपलब्धिग्राहिणा हि साक्षिणोपलब्धिर्गृह्यमाणा बाह्यविषयत्वेनैव गृह्यते

नोपलब्धिमात्रमित्यर्थः ***अतश्च इति*** वक्ष्यमाणोपपत्तिपरामर्शः। तृतीयं पक्षमालम्बते ***ननु बाह्यस्यार्थस्यासंभवादिति*। निराकरोति-*नायं साधुरध्यवसाय इति*।** इदमत्राकृतम्-घटपटादयो हि स्थूला भासन्ते नतु परमसूक्ष्माः। तत्रेदं नानादिग्देशव्यापित्वलक्षणं स्थौल्यं यद्यपि ज्ञानाकारत्वे नावरणानावरणलक्षणेन विरुद्धधर्मसंसर्गेण युज्यते, ज्ञानोपाधेरनावृतत्वादेवः तथापि तद्देशत्वातद्देशत्वकम्पाकम्पत्वरक्तारक्तत्वलक्षणैर्विरुद्धधर्मसंसर्गैरस्य नानात्वं प्रसज्यमानं ज्ञानाकारत्वेऽपि न शक्यं शक्रेणापि वारयितुम्। व्यतिरेकाव्यतिरेकवृत्तिविकल्पौ च परमाणोरंशवत्त्वं चोपपादितानि वैशेषिकपरीक्षायाम्। तस्माद्बाह्यार्थवन्न ज्ञानेऽपि स्थौल्यसम्भवः। न तावत् परमाण्वाभासमेकं ज्ञानम एकस्य नानात्मत्वानुपपत्तेः। आकाराणां वा ज्ञानतादात्म्यादेकत्वप्रसङ्गात्। न च यावन्त आकारास्तावन्त्येव ज्ञानानि तावतां ज्ञानानां मिथो वार्त्तानभिज्ञतया स्थूलानुभवाभावप्रसङ्गात्। न च-तत्पृष्ठभावी समस्तज्ञानाकारसङ्कलनात्मक एकः स्थूलविकल्पो विजृम्भत इति साम्प्रतम्, तस्यापि साकारतया स्थौल्यायोगात । **यथाह धर्मकीर्त्तिः-**

तस्मान्नार्थे न च ज्ञाने स्थूलाभासस्तदात्मनः।
एकत्र प्रतिषिद्धत्वाद्बहुष्वपि न सम्भवः॥ इति॥

तस्माद्भवतापि ज्ञानाकारं स्थौल्यं समर्थयमानेन **प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ सम्भवासम्भवावास्येयौ**। तथा चेदन्तास्पदमशक्यं ज्ञानाद्भिन्नं वाह्यमपह्नोतुमिति। यच्च ज्ञानस्य प्रत्यर्थं व्यवस्थायै विषयसारूप्यमास्थितं, नैतेन विषयोऽपह्नोतुं शक्यः। असत्यर्थे तत्सारूप्यस्य तव्द्यवस्थायाश्चानुपपत्तेरित्याह ***न च ज्ञानस्य विषयसारूप्यादिति*।** यश्च सहोपलम्भनियम उक्तः सोऽपि विकल्पं न सहते। यदि ज्ञानार्थयोः साहित्येनोपलम्भस्ततो विरुद्धो हेतुर्नाभेदं साधयितुमर्हति साहित्यस्य तद्विरुद्धभेदव्याप्तत्वादभेदे तदनुपपत्तेः। अथैकोपलम्भनियमः। न, एकत्वयावाचकः सहशब्दः। **अपि च** किमेकत्वेनोपलम्भः, आहो एक उपलम्भो ज्ञानार्थयोः। न तावदेकत्वेनोपलम्भ इत्याह ***वहिरुपलब्धेश्च । विषयस्य***। अथैकोपलम्भनियमः, तत्राह ***अत एव सहोपलम्भनियमोऽपि प्रत्ययविषययोरुपायोपेयभावहेतुको नाभेदहेतुक इत्यवगन्तव्यम्***। यथा हि सर्वं चाक्षुषं प्रभारूपानुविद्धं बुद्धिबोध्यं नियमेन मनुजैरुपलभ्यते, न चैतावता घटादिरूपं प्रभात्मकं भवति, किन्तु प्रभोपायत्वान्नियमः एवमिहाध्यात्मसाक्षिकानुभवोपायत्वादर्थस्यौकोपलम्भनियम इति। **अपि च** यत्रैकविज्ञानगोचरौ घटपटौ तत्रार्थभेदं विज्ञानाभेदं चाध्यवस्यन्ति प्रतिपत्तारः। न चैतदैकात्म्येऽवकल्पत इत्याह *अपिच घटज्ञानं पटज्ञानमिति*। तथार्थाभेदेऽपि विज्ञानभेददर्शनान्न विज्ञानात्मकत्वमर्थस्येत्याह ***तथा**

घटदर्शनं घटस्मरणमिति*। **अपिच** स्वरूपमात्रपर्य्यवसितं ज्ञानं ज्ञानान्तरवार्त्तानभिज्ञामिति ययोर्भेदस्ते द्वे न गृहीते इति भेदोऽपि तद्गतो न गृहीतः। एवं क्षणिकशून्यानात्मत्वादयोऽप्यनेकप्रतिज्ञाहेतुदृष्टान्तज्ञानभेदसाध्याः। एवं स्वमसाधारणमन्यतो व्यावृत्तं लक्षणं यस्य तदपि यद्व्यावर्त्तते यतश्च व्यावर्त्तते तदनेकज्ञानसाध्यम् एवं सामान्यलक्षणमपि विधिरूपमन्यापोहरूपं वाऽनेकज्ञानगम्यम्। एवं वास्यवासकभावोऽनेकज्ञानसाध्यः। एवमविद्योपप्लववशेन यत् सदसद्धर्मत्वं यथा नीलमिति सद्धर्मः नरविषाण मित्यसद्धर्मः, अमूर्त्तमिति सदसद्धर्मः। शक्यं हि शशविषाणममूर्तं वक्तुम्। शक्यं च विज्ञानममूर्तं वक्तुम्। यथोक्तम्-

अनादिवासनोद्भूतविकल्पपरिनिष्ठितः।
शब्दार्थस्त्रिविधो धर्मो भावाभावोभयाश्रयः॥ इति॥

एवं मोक्षप्रतिज्ञा च यो मुच्यते यतश्च मुच्यते येन मुच्यते तदनेकज्ञानसाध्या। एवं विप्रतिपन्नं प्रतिपादयितुं प्रतिज्ञेति यत्प्रतिपादयति येन प्रतिपादयति यश्च पुरुषः प्रतिपाद्यते यश्च प्रतिपादयति तदनेकज्ञानसाध्यमित्यसत्येकस्मिन्ननेकार्थप्रतिसन्धातरि नोपपद्यते। तत्सर्वं विज्ञानस्य स्वांशालम्बनेऽनुपपन्नमित्याह ***अपिच द्वयोर्विज्ञानयोः पूर्वोत्तरकालयोरिति***। **अपिच** भेदाश्चयः कर्मफलभावो नाभिन्ने ज्ञाने भवितुमर्हति। नो खलु छिदा छिद्यते किन्तु दारु। नापि पाकः पच्यतेऽपि तु तण्डुलाः। तदिहापि न ज्ञानं स्वांशेन ज्ञेयमआत्मनि वृत्तिविरोधादपि तु तदतिरिक्तोऽर्थः, पाच्या इव तण्डुलाः पाकातिरिक्ता इति। भूमिरचनापूर्वकमाह ***किचान्यत् विज्ञानं विज्ञानमित्यभ्युपगच्छतेति***। चोदयति ***ननु विज्ञानस्य स्वरूव्यतिरिक्तग्राह्यत्व इति***। **अयमर्थः**-स्वरूपादतिरिक्तमर्थ चेद्विज्ञानं गृह्णाति ततस्तदप्रत्यक्षं सन्नार्थं प्रत्यक्षयितुमर्हति। न हि चक्षुरिव तन्निलीनमर्थे कंचनातिशयमाधत्ते येनार्थमप्रत्यक्षं सत्प्रत्यक्षयेत्, अपि तु तत्प्रत्यक्षतैवार्थप्रत्यक्षता। **यथाहुः**-*अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति इति*। तच्चेत् ज्ञानान्तरेण प्रतीयेत तदप्रतीतं नार्थविषयं ज्ञानमपरोक्षयितुमर्हति। एवं तत्तदित्यनवस्था। तस्मादनवस्थाया बिभ्यता वरं स्वात्मनि वृत्तिरास्थिता। **अपि च** यथा प्रदीपो न दीपान्तरमपेक्षते, एवं ज्ञानमपि न ज्ञानान्तरमपेक्षितुमर्हति समत्वादिति। तदेतत्परिहरति ***तदुभयमप्यसत्। विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणो ग्रहणाकाङ्क्षानुत्पादादनवस्थाशङ्कानुपपत्तेः***। **अयमर्थः**- सत्यमप्रत्यक्ष- स्योपलम्भस्य नार्थदृष्टिः प्रसिध्यति न तूपलब्धारं प्रति तत्प्रत्यक्षत्वायोपलम्भान्तरं प्रार्थनीयम्, अपि तु तस्मिन्निन्द्रियार्थसन्निकर्षान्तः करणविकारभेद उत्पन्नमात्र एव प्रमातुरर्थश्चोपलम्भश्च प्रत्यक्षौ भवतः। अर्थो हि निलीनस्वभावः प्रमातारं प्रति स्वप्रत्यक्षत्वायान्तः करणविकारभेदमनुभवमपेक्षते, अनुभवस्तु जडोऽपि स्वच्छतया

चैतन्यबिम्बोद्ग्रहणाय नानुभवान्तरमपेक्षते येनानवस्था भवेत्। न ह्यस्ति सम्भवोऽनुभव उत्पन्नश्च न च प्रमातुः प्रत्यक्षो भवति यथा नीलादिः। तस्माद्यथा छेत्ता छिदया छेद्यं वृक्षादि व्याप्नोति, न तु छिदां छिदान्तरेण, नापि छिदैव छेत्री, किन्तु स्वत एव देवदत्तादिः, यथा वा पक्ता पाक्यं पाकेन व्याप्नोति न तु पाकं पाकान्तरेण। नापि पाक एव पक्ता किन्तु स्वत एव देवदत्तादिः, एवं प्रमाता प्रमेयं नीलादि प्रमया व्याप्नोति, न तु प्रमां प्रमान्तरेण नापि प्रमैव प्रमात्री, किन्तु स्वत एव प्रमायाः प्रमाता व्यापकः। न च प्रमातरि कूटस्थनित्यचैतन्ये प्रमापेक्षासम्भवो यतः प्रमातुः प्रमायाः प्रमात्रन्तरापेक्षायामनवस्था भवेत्। तस्मात् सुष्ठूक्तं विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणः प्रमातुः कूटस्थनित्यचैतन्यस्य ग्रहणाकाङ्क्षानुत्पादात् इति। यदुक्तम् समत्वादवभास्यावभासक-भावानुपपत्तेःइति, तत्राह ***साक्षिप्रत्यययोश्च स्वभाववैषम्यादुप लब्धुपलभ्यभावोपपत्तेः****। मा भूत् ज्ञानयोः साम्येन ग्राह्यग्राहकभावः। ज्ञातृज्ञानयोस्तु वैषम्यादुपपद्यत एव। ग्राह्यत्वं च ज्ञानस्य न ग्राहकक्रियाजनितफलशालितया यथा बाह्यार्थस्य, फले फलान्तरानुपपत्तेः। यथाहुः-''न संविदर्यते फलत्वात्'' इति, अपि तु प्रमातारं प्रति स्वतः सिद्धप्रकटतया। ग्राह्योऽप्यर्थः प्रमातारं प्रति सत्यां संविदि प्रकटः संविदपि प्रकटा। **यथाहुरन्ये**-''नास्याः कर्मभावो विद्यते'' इति। **स्यादेतत्**-यत्प्रकाशते तदन्येन प्रकाश्यते यथा ज्ञानार्थौ, तथा च साक्षीति नास्ति प्रत्ययंसाक्षिणोर्वैषम्यमित्यत आह ***स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वात्****। **तथा हि**-अस्य साक्षिणः सदाऽसन्दिग्धाविपरीतस्य नित्यसाक्षात्कारताऽनागन्तुकप्रकाशत्वे घटते। **तथाहि**-प्रमाता सन्दिहानोऽप्यसन्दिग्धो विपर्यस्यन्नप्यविपरीतः परोक्षमर्थमुत्प्रेक्षमाणोऽप्यपरोक्षः स्मरन्नप्यानुभविकः प्राणभृन्मात्रस्य। न चैतदन्याधीनसंवेदनत्वे घटते। अनवस्थाप्रसङ्गश्चोक्तः तस्मात् स्वयंसिद्धता तस्यानिच्छताप्यप्रत्याख्येया प्रमाणमार्गायत्तत्वादिति। किञ्चोक्तेन क्रमेण ज्ञानस्य स्वयमवगन्तृत्वाभावात्प्रमातुरनभ्युपगमे च **प्रदीपवद्विज्ञानमवभासकान्तरनिरपेक्षं स्वयमेव प्रथत इति** ब्रुवताऽप्रमाणगम्यं विज्ञानमनवगन्तृकमित्युक्तं स्यात् शिलाघनमध्यस्थप्रदीपसहस्त्रप्रथनवत्। अवगन्तुश्चेत्कस्यचिदपि न प्रकाशते कृतमवगमेन स्वयंप्रकाशेनेति। विज्ञानमेवावगन्त्रिति मन्वान शङ्कते-*बाढमेवम। अनुभवरूपत्वाद् इति*। न फलस्य कर्तृत्वं कर्मत्वं वास्तीति प्रदीपवत्कर्त्रन्तरमेषितव्यम्, तथा च न सिद्धसाधनमिति परिहरति *न। **अन्यस्यावगन्तुरिति***। ननु साक्षिस्थानेऽस्त्वस्मदभिमतमेव विज्ञानम्, तथा च नाम्न्येव विप्रतिपत्तिर्नार्थ इति शङ्कते ***साक्षिणोऽवगन्तुः स्वयंसिद्धतामुपक्षिपता*** *अभिप्रेयता। **स्वयं प्रथते विज्ञानमित्येष एवेति***। निराकरोति *नेति*। भवता हि विज्ञानस्योत्पादादयो धर्मा अभ्युपेतास्तथा चास्य फलतया नावगन्तृत्वम्, कर्तृफलभावस्यैकत्र विरोधात्, किन्तु प्रदीपादितुल्यतेत्यर्थः।।२८।।

बाधाबाधौ वैधर्म्यं, स्वप्नप्रत्ययो बाधितो जाग्रत्प्रत्ययश्चाबाधित:। त्वयापि चावश्यं जाग्रत्प्रत्ययस्याबाधितत्वमास्थेयं तेन हि स्वप्नप्रत्ययो बाधितो मिथ्येत्यवगम्यते। जाग्रत्प्रत्ययस्य तु बाध्यत्वे स्वप्नप्रत्ययस्यासौ न बाधको भवेत्। न हि बाध्यमेव बाधकं भवितुमर्हति। तथा च न स्वप्नप्रत्ययो मिथ्येति साध्यविकलो दृष्टान्त: स्यात् **स्वप्नवदिति**। तस्माद्बाधावाधाभ्यां वैधर्म्यान्न स्वप्नप्रत्ययदृष्टान्तेन जाग्रत्प्रत्ययस्य शक्यं निरालम्बनत्वमध्यवसातुम्। ***निद्राग्लानमिति*** करणदोषाभिधानं। मिथ्यात्वाय वैधर्म्यान्तरमाह ***अपि च स्मृतिरेषेति***। संस्कारमात्रजं हि विज्ञानं स्मृति:। प्रत्युत्पन्नेन्द्रियसम्प्रयोगलिङ्गशब्दसारूप्यान्यथानुपपद्यमानयोग्यप्रमाणानुपलब्धलक्षणसामग्री-प्रभवं तु ज्ञानमुपलब्धि:। तदिह निद्राणस्य सामग्रयन्तरविरहात्संस्कार: परिशिष्यते, तेन संस्कारजत्वात्स्मृति:, सापि च निद्रादोषाद्विपरीताऽवर्त्तमानमपि पित्रादि वर्त्तमानतया भासयति। तेन स्मृतेरेव तावदुपलब्धेर्विशेषस्तस्याश्च स्मृतेर्वैपरीत्यमिति। अतो महदन्तरमित्यर्थ:। **अपि च** स्वत: प्रामाण्ये सिद्धे जाग्रत्प्रत्ययानां यथार्थत्वमनुभवसिद्धं नानुमानेनान्यथयितुं शक्यम अनुभवविरोधेन तदनुत्पादात्। अबाधितविषयादाप्यनुमानोत्पादसामग्रीग्राह्यतया प्रमाणम्। न च कारणाभावे कार्यमुत्पत्तुमर्हतीत्याशयवानाह ***अपि चानुभवविरोधप्रसङ्गादिति***।।२९।।

यथा लोकदर्शन चान्वयव्यतिरेकावनुश्रियमाणावर्थ एवोपलब्धेर्भवतो नार्थानपेक्षायां वासनायां। वासनाया अप्यर्थोपलब्ध्यधीनत्वदर्शनादित्यर्थ:। **अपि चाश्र**याभावादपि न लौकिकी वासनोपपद्यते। न च क्षणिकमालयविज्ञानं वासनाधारो भवितुमर्हति; द्वयोर्युगपदुत्पद्यमानयो: सव्यदक्षिणश्रृङ्गवदाधारधेयभावाभावात्। प्रागुत्पन्नस्य चाधेयोत्पादसमयेऽसत: क्षणिकत्वव्याघात इत्याशयवानाह *अपि च वासना नामेति*। शेषमतिरोहितार्थम्।।३०।।

स्यादेतत्-यदि साकारं विज्ञानं न संभवति बाह्यश्चार्थ: स्थूलसूक्ष्मविकल्पेनासम्भवी, हन्तैवमर्थज्ञाने सत्वेन तावद्विचारं न सहेते। नाप्यसत्त्वेन; असतो भासनायोगात्; नोभयत्वेन; विरोधात् सदसतोरेकत्वानुपपत्ते:, नाप्यनुभयत्वेन, एकनिषेधस्येतरविधाननान्तरीयकत्वात्। तस्माद्विचारा-सहत्वमेवास्तु तत्त्वं वस्तूनाम्। यथाहु-

इदं वस्तुबलायातं यद्वदन्ति विपश्चित:।
यथा यथाऽर्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा।।इति।।

न क्वचिदपि पक्षे व्यवतिष्ठन्त इत्यर्थ:। तदेतन्निराचिकीर्षुराह ***शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध: इति तन्निराकरणाय नादर: क्रियते***। लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि। तै: खलु सत्सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्यते। असच्चासदिति

गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्यते। सदसतोश्च विचारासहत्वं व्यवस्थापयता सर्वप्रमाणविप्रतिषिद्धं व्यवस्थापितं भवति। तथा च सर्वप्रमाणविप्रतिषेधान्नेयं व्यवस्थोपपद्यते। यद्युच्येत तात्त्विकं प्रामाण्यं प्रमाणानामनेन विचारेण व्युदस्यते न सांव्यवहारिकम्। तथा च भिन्नविषयत्वान्न सर्वप्रमाणविप्रतिषेध इत्यत आह ***न ह्ययं सर्वप्रमाणप्रसिद्धो लोक व्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम्***। प्रमाणानि हि स्वगोचरे प्रवर्त्तमानानि तत्त्वमिदमित्येव प्रवर्त्तन्ते। अतात्त्विकत्वं तु तद्गोचरस्यान्यतो बाधकादवगन्तव्यं। न पुनः सांव्यवहारिकं नः प्रामाण्यं न तु तात्त्विकमित्येव प्रवर्तन्ते। बाधकं चातात्त्विकत्वमेषां तद्गोचरविपरीततत्त्वोपदर्शनेन दर्शयेत्। यथा शुक्तिकेयं न रजतं मरीचयो न तोयमेकश्चन्द्रो न चन्द्रद्वयमित्यादि, तद्वदिहापि समस्तप्रमाणगोचरविपरीततत्त्ववान्तरव्यवस्थापनेनातात्त्विकत्वमेषां प्रमाणानां बाधकेन दर्शनीयं न त्वव्यवस्थापिततत्त्वान्तरेण प्रमाणानि शक्यानि बाधितुम्। विचारासहत्वं वस्तूनां तत्त्वं व्यवस्थापयद्बाधकमतात्त्विकत्वं प्रमाणानां दर्शयतीति चेत्, किं पुनरिदं विचारासहत्वं वस्तु यत्तत्त्वमभिमतं, किं तद्वस्तु परमार्थतः सदादीनामन्यतमत् केवलं विचारं न सहते, अथ विचारासहत्वेन निस्तत्त्वमेव। तत्र परमार्थतः सदादीनामन्यतमद्विचारं न सहत इति विप्रतिषिद्धम्। न सहते चेन्न सदादीनामन्यतमत्न्यतमच्चेत् कथं न विचारं सहते? अथ निस्तत्त्वं चेत्, कथमन्यतमत्तत्त्वमव्यवस्थाप्य शक्यमेवं वक्तुम् ? न च निस्तत्त्वतैव तत्त्वं भावानां। तथासति हि तत्त्वाभावः स्यात्। सोऽपि च विचारं न सहत इत्युक्तं भवद्भिः। अपि चारोपितं निषेधनीयम्। आरोपश्च तत्त्वाधिष्ठानो दृष्टो यथा शुक्तिकादिषु रजतादेः। न चेत् किञ्चिदस्ति तत्त्वं कस्य कस्मिन्नारोपः तस्मान्निष्प्रपञ्चं परमार्थसद्ब्रह्मानिर्वाच्यप्रपञ्चात्मनारोप्यते, तच्च तत्त्व व्यवस्थाप्यातात्त्विकत्वेन सांव्यवहारिकत्वं प्रमाणानां बाधकेनोपपाद्यत इति युक्तमुत्पश्यामः।।

विभजते-*किं बहुनाउक्तेन यथायधा* ग्रन्थतोऽर्थतश्च ***अयं वैनाशिकसमय इति***। ग्रन्थतस्तावत्पश्यना तिष्ठना मिद्ध-पोषधाद्यसाधुपदप्रयोगः। अर्थतश्च नैरात्म्यमभ्युपेत्यालयविज्ञानं समस्तवासनाधारमभ्युपगच्छन्नक्षरमात्मानमभ्युपैति। एवं क्षणिकत्वमभ्युपेत्य उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषा धर्माणां धर्मता धर्मस्थितिता इति नित्यतामुपैतीत्यादि बहून्नेतव्यमिति।।३२।।

इति भामती अभावाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ उपलब्ध्यधिकरणम्।।५।।

।।सू।। **नाभाव उपलब्धेः**।।२७।।

इह बौद्धानां केवलविज्ञानवादो युक्तो न वा।।

इति संशये युक्त इति पूर्वः पक्षः। तथा हि-साकारं विज्ञानमेव तत्त्वमान्तरम्, न बाह्याः पदार्थाः, स्वप्ने बाह्यपदार्थाननपेक्ष्य केवलया बुद्ध्या व्यवहारदर्शनात्। तद्वत् जाग्रद्व्यवहारस्यापि व्यवस्था युज्यते। ततो विज्ञानमात्रं तत्त्वमिति।।

एवं प्राप्तेऽभिधीयते-घटं जानामीति कर्तुः कर्मतयार्थस्योपलब्धेस्तदभावो न शक्यते वक्तुम्। पुरुषस्यार्थविशेषव्यवहारानुगुण्यापादनमेव हि ज्ञानस्याकारः।।

यदुक्तम्, स्वप्नदृष्टान्तेन जाग्रद्व्यवहारस्यापि शून्यत्वं, तत्राह-

।।सू।। **वैधर्म्याच्च न स्वप्नादिवत्**।।२८।।

कारणदोषबाधराहित्यरूपवैधर्म्याच्च न स्वप्नादिवज्जागरितज्ञानस्य मिथ्यात्वम्। अतो न विज्ञानमात्रं तत्त्वम्।।

युक्त्यन्तरमाह-

।।सू।। **न भावोऽनुपलब्धेः**।।२९।।

अर्थशून्यस्य ज्ञानस्य सद्भावो न संभवति, तस्य कुत्राप्यनुपलम्भात्। स्वप्न ज्ञानस्याप्यर्थवत्ता संभवत्येव।। ततो विज्ञानमात्रवादोऽनुपपन्न एव।।

इत्युपलब्ध्यधिकरणम्।।५।।

अथ सर्वथानुपपत्त्यधिकरणम्।।६।।

।।सू।। **सर्वथानुपपत्तेश्च**।।३०।।

इहाधिकरणे सर्वशून्यवादो युक्तो न वेति संदेह:।।

युक्त इति पूर्व: पक्ष:। तथा हि-सर्वं जगन्न सत्, बाधितत्वात्। नासत्, प्रतीयमानत्वात्। नोभयात्मकं, विरोधात्। नानुभयात्मकम्, असंभवात्। किंतु चतुष्कोटिविनिर्मुक्तं सर्वं शून्यमेव। प्रत्यक्षावभासस्तु संवृतिमूल:। तस्माच्छून्यवाद: समीचीन इति।।

एवं प्राप्ते सिद्धान्त उच्यते-न संभवति सर्वशून्यवाद:। कुत:? सदिति प्रतिज्ञायामिव असदिति प्रतिज्ञायामन्यथा प्रतिज्ञायां च तुच्छत्वानुपपत्ते: सदसद्बुद्धितच्छब्दानां वस्तुगतान्योन्य-विरुद्धभावाभावरूपावस्थाविशेषविषयत्वात्। यत्तु संवृतिमूल: प्रत्यक्षावभास इति, तदप्यपहास्यम्। सर्वस्य शून्यत्वे क: संवृतेराश्रय:? यस्यैवमवभास:। तत: सर्वशून्यवाद: सर्वविरुद्ध एव।।

इति सर्वथानुपपत्त्यधिकरणम्।।६।।

इति श्री कण्ठभाष्य अभावाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ उपलब्ध्यधिकरणम्॥५॥

सू०॥ नाभाव उपलब्धेः॥२७॥

क्षणिकत्वे नीलाद्यर्थानां प्रत्यक्षत्वमनुमेयत्वं वा नोपपद्यत इति बाह्यार्थव्यवहारार्थं तेषां स्थैर्यमास्थेयमिति वैभाषिकसौत्रांतिकमतयोः दूषणमुक्तम्। तदयुक्तम्। नीलाद्यर्थानामांतरविज्ञानरूपत्वेन स्वप्रकाशैस्तैरेव विज्ञानैस्तत्प्रत्यक्षीकरणसंभवात् विज्ञानरूपाणामेव तेषां बर्हिवदवभासो भ्रम इति तव्द्यतिरिक्तानां बाह्यार्थानामभावादिति योगाचारप्रत्यवस्थानेन संगतिमभिप्रेत्य संशयं दर्शयति-**इहेति**। नन्वहमिदं जानामीति ज्ञातृज्ञेयज्ञानरूपांशत्रये भासमाने कथञ्च विज्ञानमात्रमेव तत्त्वमिति वादः प्रवृत्त इत्याशंक्य तन्मतमुपपादयति-**तथाहीति**। विज्ञानमेव तत्त्वं नान्यत्परमाणुसमुदायरूपं तदारब्धावयविरूपं वा किंचिदस्ति। परमाणूनामप्रामाणिकत्वात्। तेषां क्षणिकानां समुदायभावासंभवात् परमाणुषु संयोगस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वविकल्पदुःस्थत्वेनावयवेष्ववयविनः कृत्स्नैकदेशवृत्तिविकल्पदुःस्थत्वेन च परस्परसंयुक्तावयवजन्यतदाश्रितावयव्यसंभवात् बाह्यार्थानामांतरविज्ञानसंबधानिरूपणेन तद्विषयत्वासंभवाच्च। संबंध विना विषयत्वे सर्वविषयाणामेकस्मिन्नेव ज्ञानेऽवभासप्रसंगात्। न च बाह्यार्थाभावे नीलपीतादिज्ञानानां निरालंबनत्वापातः। ज्ञानानामेव नीलपीताद्याकारत्वात् नीलपीतादिकं ज्ञानाभिन्नं भासमानत्वात् ज्ञानाज्ञानसहोपलंभनियतत्वात् ज्ञानवदित्यनुमानात्। न च सहत्वस्य भेदगर्भत्वात् द्वितीयहेतुर्विरुद्ध इति शंकनीयम्। ज्ञानोपलंभव्याप्योपलंभविषयत्वस्य तदर्थत्वात् तदविनाभावरूपस्य तव्द्याप्यत्वस्याभेदेऽपि संभवात्। न च नीलतद्विज्ञानयोरभेदे इदं जनामीति क्रियाकर्मभावरूपभेदावभासविरोधः। तस्य द्विचंद्रज्ञानवत् भ्रांतत्वात्। तदाहुः-'सहोपलंभनियमादभेदो नीलतद्धियोः। भेदस्तु भ्रांतिविज्ञाने दृश्येतेन्दाविवाद्वये'॥ इति। बाह्यस्य नीलादेः कथमान्तरज्ञानभेदावभासो भ्रम इति चेत्। बाह्यत्वावभासोऽपि भ्रम एव। उपरि स्थितानां नक्षत्रादीनामुद्यतां भूमिस्थत्वावभासवत्। एतेनाहं जानामीति क्रियाकर्तृभावेन भेदावभासोऽपि व्याख्यातः। तदप्याहुः -'अविभागोऽपि बुद्ध्यात्मा

विपर्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते।।' इति। इत्थं प्रवृत्तौ विज्ञानवादः। ननु बाह्यार्थतदवभासयोरभावे कथं बाह्यार्थव्यवहारः इत्याशंक्य दृष्टांतेनोपपादयति-**स्वप्न इति**। ज्ञानातिरिक्तस्यार्थस्य नाभावः उपलब्धेः प्रत्यक्षोपलब्धिविरोधेन ज्ञानाभेदानुमानानुत्थानादिति सूत्रार्थं दर्शयन् सिद्धांतयति-**घटं जानामीति**। न च दृढविपक्षबाधकतर्कानुगृहीतानुमानविरोधात् प्रत्यक्षोपलब्धिरेव भ्रांतिरिति शंकनीयम्। विपक्षबाधकतर्काणां प्रशिथिलत्वात् समुदायारंभवादोक्तदोषाणां श्रुतिपरिगृहीते परिणामवादे प्रसराभावात् चिच्छक्तिपरिणामरूपस्य प्रदीपप्रभावद्रव्यस्य ज्ञानस्य चक्षुरादिगोलकद्वारा बहिर्दीर्घप्रभाकारेण निर्गतस्य विषयैः संयोगसंभवेन ज्ञानविषयसंबधानिरूपणासिद्धेश्चेति भावः। स्यादेतत्। बाह्यं नीलादिकमभ्युपयद्भिरपि ज्ञानानां नीलाद्याकारत्वमनुभवसिद्धमवश्यमंगीकरणीयम्, तेनैव सर्वव्यवहारोपपत्तौ किं बाह्यार्थकल्पनया, न हि नीलाद्याकारद्वयमुपलभ्यत इत्याशंक्याह-**पुरुषस्येति**। पुरुषस्य नीलाद्यर्थविशेषेषु यो व्यवहार इच्छाप्रवृत्त्यादिरूपः तदानुगुण्यमेव ज्ञानस्य नीलाद्याकारः, न तु बाह्यार्थस्येव मुख्यं नीलाद्याकारत्वमस्ति। नीलपीतशीतोष्णादिसमूहालंबनानां परस्परविरुद्धानेकरूपत्वापत्तेरिति भावः। स्वप्नदृष्टांतेन नीलादिज्ञानानां बाह्यार्थशून्यत्वं यदुच्यते तत्स्वप्नमायादीनां बाह्यार्थशून्यत्वं परमतानुसारेणाभ्युपगम्यैव दृष्टांतवैधर्म्यप्रदर्शनार्थम्। उत्तरसूत्रमवतारयति-**यदुक्तमिति**। सू०।। **वैधर्म्याच्च न स्वप्नादिवत्**।।१८।। स्वप्नादिषु हि निद्रादिदोषोपलुप्तानि करणानि अनंतरं बाधश्च दृश्यते नैतदुभयं नीलादिज्ञानेष्वस्तीति वैधर्म्यमुपपादयति-**कारणेति**। वस्तुतः क्वचिदपि ज्ञानानामर्थशून्यत्वं संप्रतिपन्नं नास्तीति स्वमतप्रदर्शनार्थं सूत्रम्-सू०।। **न भावोऽनुपलब्धेः**।।२९।। **संभवत्येवेति**। सन्ध्याधिकरणे तथा समर्थयिष्यत इति भावः।।

इत्युपलब्ध्यधिकरणम्।।५।।

अथ सर्वथानुपपत्त्यधिकरणम्।।६।।

निराकृतो विज्ञानवादः। अथ बौद्धसिद्धांतरहस्यभूतशून्यवादनिराकरणार्थमधिकरणांतरम् सू।। **सर्वथानुपपत्तेश्च**।।३०।। माध्यमिकाः किल कल्पयंति शून्यमेव तत्वं सुगतस्याभिमतम्। शिष्ययोग्यतानुसारेण तत्तदर्थास्तित्वोपदेशः। वस्तुतः विज्ञानमात्रमपि न निरूपयितुं शक्यम्। तथा हि-न तावद्विज्ञानं सत् नीलपीतशीतोष्णाद्येकानेकस्वभावत्वविकल्पदौःस्थ्यात्। असत्त्वादिपक्षाश्चा-परोक्षावभासादिविरुद्धाः। ततः शून्यमेव तत्वमिति। तदाहुः '-नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम्। एकानेकस्वभावेन वियोगाद्वियदब्जवत्। न सन्नासन्नसदसत् न वाप्यनुभयात्मकम्। चतुष्कोटिविनिर्मुक्तं तत्वं माध्यमिका विदु'रिति। शून्यस्य सत्त्वेन प्रत्यक्षावभासः सव्द्यवहारविषयत्वादिकं च संवृतिमहिम्ना। यया शून्यतत्वं संमीयते संवृतिः भ्रांतिवासनारूपेत्याद्यपि

कल्पयन्ति। अत्र दूषणमुक्तं सूत्रकृता सर्वथानुपपत्तेश्चे' ति। चकारो भिन्नक्रमः। सर्वप्रकारेण च इत्यन्वयः। सत्त्वादिप्रकारचतुष्टयेन हि निषेधः शून्यवादिना प्रतिज्ञायते 'चतुष्कोटिविनिर्मुक्त'मिति। तेन सर्वेणापि प्रकारेण निषेधप्रतिज्ञायां सर्वशून्यत्वरूपं तुच्छत्वं नोपपद्यते किंत्ववश्यं सद्वस्तुपरिशेषस्संपद्यत इत्यतो न युक्तः शून्यवाद इति सूत्रार्थः। अमुं सूत्रार्थमाविष्कुर्वन् सिद्धांतमाह-**न संभवतीति**। **सदिति प्रतिज्ञायामिति**। **दृष्टांतोक्तिः**। **असदिति प्रतिज्ञायामिति**। सन्न भवतीति प्रतिज्ञायामित्यर्थः। **अन्यथा प्रतिज्ञायामिति**। असन्नभवति सन्न भवति सदसद्विलक्षणं न भवतीत्यवशिष्टत्रिविधप्रतिज्ञायामित्यर्थः। नन्वासु चतसृषु प्रतिज्ञासु तावद्विलक्षणत्वरूपं तुच्छत्वं संपद्यत एव कुतस्तुच्छत्वानुपपत्तिरुक्तेत्याकांक्षायां तत्र सूत्रकाराशयस्थं हेतुमाह-**सदसदिति**। यथा सद्बुद्धिशब्दौ देशकालवस्तुस्वरूपान्यतमवस्तुगतभावरूपावस्थाविशेषविषयौ। एवं सत्त्वनिषेधादि बुद्धिशब्दावपि तद्गताभावरूपावस्थाविशेषविषयौ। तद्यथा-इदमिहास्ति इदमिदानीमस्ति, इदमेवंरूपं भवतीति सत्त्वबुद्धिशब्दौ देशकालवस्तुपरिच्छिन्नसत्त्वविषयौ। एवमिदमिह नास्ति इदमिदानीं नास्ति इदमेवंरूपं न भवतीत्यसत्त्वबुद्धिशब्दौ देशकालवस्तुपरिच्छिन्नासत्त्वविषयावेव लोके प्रसिद्धौ। निरुपाधिकस्तु सत्त्वनिषेधः क्वचिदपि न प्रसिद्धः। असत्त्वनिषेधादिष्वप्येषैव रीतिः। तस्मात्सर्वात्मना जगतस्सत्त्वासत्त्वादिनिषेधो नोपपद्यत इति भावः। **सर्वस्य शून्यत्व इति**। संवृतिर्हि संवरणीयमाश्रयति। सर्वस्य शून्यत्वे संवृतेः कश्चिदाश्रय एव नास्ति यन्निष्ठा सती तदाच्छाद्यासत्यं प्रपंच सत्यतयावभासयेदित्यर्थः। **यस्यैवमवभास इति**। यस्य वस्तुतो निष्प्रपंचस्य सत्यस्यासत्यप्रपंचात्मनावभासो भवेत् तादृशं किंचित्संवृतिशब्दिताविद्याश्रयभूतमधिष्ठानं नास्तीत्यर्थः।

इति सर्वथानुपपत्त्यधिकरणम्॥६॥

इति शिवार्कमणिदीपिका अभावाधिकरणम् समाप्तम्

एकस्मिन्नसम्भवाधिकरणम्।

शाङ्करभाष्यम्

नैकस्मिन्नसम्भवात्।।३३।। निरस्तः सुगतसमयः। विवसनसमय इदानीं निरस्यते। सप्त चैषां पदार्थाः संमता जीवाजीवास्रव संवरनिर्जर बन्धमोक्षा नाम। संक्षेपतस्तु द्वावेव पदार्थौ जीवाजीवाख्यौ। यथायोगं तयोरेवेतरान्तर्भावादिति मन्यन्ते। तयोरिममपरं प्रपञ्चमाचक्षते पञ्चास्तिकाया नाम–जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः, आकाशास्तिकायश्चेति। सर्वेषामप्येषामवान्तरप्रभेदान्बहुविधान्स्वसमयपरिकल्पितान्वर्णयन्ति। सर्वत्र चेमं सप्तभङ्गीनयं नाम न्यायमवतारयन्ति-स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति। एवमेवैकत्व-नित्यत्वादिष्वपीमं सप्तमर्भिनय योजयन्ति। अत्राचक्ष्महे–नाअयमभ्युपगमोऽयुक्त इति।। कुतः? एकस्मिन्नसम्भवात्। न ह्येकस्मिन्धर्मिणि युगपत्सदसत्त्वादिविरुद्धधर्मसमावेशः सम्भवति शीतोष्णवत्। य एते सप्त पदार्था निर्धारिता एतावन्त, एवंरूपाश्चेति, ते तथैव वा स्युः, नैव वा तथा स्युः ; इतरथा हि तथा वा स्युः अतथा वेत्यनिर्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्।।

ननु-अनेकात्मकं वस्त्विति निर्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयज्ञानवन्नाप्रमाणं भवितुमर्हति। नेति ब्रूमः; निरङ्कुशं ह्यनेकान्तत्वं सर्ववस्तुषु प्रतिजानानस्य निर्धारणस्यापि वस्तुत्वाविशेषात् स्यादस्ति, स्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्धारणात्मकतैव स्यात्, एवं निर्धारयितुर्निर्धारणफलस्य च स्यात्पक्षेऽस्तिता, स्याच्च पक्षे नास्तितेति। एवं सति कथं प्रमाणभूतः संस्तीर्थकरः प्रमाण-प्रमेय प्रमातृ-प्रमितिष्वनिर्धारितासूपदेष्टुं शक्नुयात्? कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थेऽनिर्धारितरूपे प्रवर्तेरन्? ऐकान्तिकफलत्वनिर्धारणे हि सति तत्साधनानुष्ठानाय सर्वो लोकोऽनाकुलः प्रवर्तते, नान्यथा। अतश्चानिर्धारितार्थं शास्त्रं प्रणयन्मत्तोन्मत्तवदनुपादेयवचनः स्यात्।।

तथा पञ्चानामस्तिकायानां पञ्चत्वसङ्ख्याऽस्ति वा, नास्ति वेति विकल्प्यमाना स्यात्तावदेकस्मिन्पक्षे, पक्षान्तरे तु न स्यात्, इत्यतो न्यूनसङ्ख्यात्वमधिकसङ्ख्यात्वं वा प्राप्नुयात्। न

चैषां पदार्थानामवक्तव्यत्वं सम्भवति। अवक्तव्याश्चेत्, नोच्येरन्। उच्यन्ते चावक्तव्याश्चेति विप्रतिषिद्धम्—उच्यमानाश्च तथैवावधार्यन्ते, नावधार्यन्त इति च। तथा तदवधारणफलं सम्यग्दर्शनमस्ति वा, नास्ति वा, एवं तद्विपरीतमसम्यग्दर्शनमप्यस्ति वा नास्ति वेति प्रलपन्मत्तोन्मत्तपक्षस्यैव स्यात्, न प्रत्यायितव्यपक्षस्य। स्वर्गापवर्गयोश्च पक्षे भावः, पक्षे चाभावः, तथा पक्षे नित्यता, पक्षे चानित्यतेत्यनवधारणायां प्रवृत्त्यनुपपत्तिः। अनादिसिद्धजीवप्रभृतीनां च स्वशास्त्रावधृतस्वभावानामयथावधृतस्वभावत्वप्रसङ्गः, एवं जीवादिषु पदार्थेष्वेकस्मिन् धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोर्धर्मयोरसम्भवात्सत्त्वे चैकस्मिन्धर्मेऽसत्त्वस्य धर्मान्तरस्यासम्भवादसत्त्वे चैवं सत्त्वस्यासम्भवादसङ्गतमिदमार्हतं मतम्।। एतेनैकानेक नित्यानित्य व्यतिरिक्ताव्यतिरिक्ताद्यनेकान्ताभ्युपगमा निराकृता—मन्तव्याः।। यत्तु—कल्पयन्ति—पुद्गलसंज्ञकेभ्योऽणुभ्यः सङ्घाताः सम्भवन्ति, इति, तत्पूर्वेणैवाणुवादनिराकरणेन निराकृतं भवतीत्यतो न पृथक् तन्निराकरणाय प्रयत्यते।।३३।।

*एवं चात्माऽकार्त्स्न्यम्।।३४।।

यथैकस्मिन्धर्मिणि विरुद्धधर्मासम्भवो दोषः स्याद्वादे प्रसक्तः, एवमात्मनोऽपि जीवस्याकार्त्स्न्यमपरो दोषः प्रसज्येत।। कथम्? शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते। शरीरपरिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत। शरीराणां चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित्कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात्। पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयेत। समान एष एकस्मिन्नपि जन्मनि कौमार यौवन—स्थाविरेषु दोषः।।

स्यादेतत्—अनन्तावयवो जीवः। तस्य त एवावयवा अल्पे शरीरे संकुचेयुमहति च विकसेयुः—इति, तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्यते वा, न वेति वक्तव्यम्। प्रतिघाते तावन्नानन्तावयवाः परिच्छिन्ने देशे संमीयेरन्। अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेर्जीवस्याणुमात्रत्वप्रसङ्गः स्यात्। अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानन्त्यं नोत्प्रेक्षितुमपि शक्यम्।।३४।। अथ—पर्यायेण बृहच्छरीरप्रतिपत्तौ केचिज्जीवावयवा उपगच्छन्ति, तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्तित्युच्येत, तत्राप्युच्यते—*न च पर्यायादप्यविरोधो विकारादिभ्यः*।।३५।।

न च पर्यायेणाप्यवयवोपगमापगमाभ्यामेतद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते। कुतः? विकारादिदोषप्रसङ्गात्। अवयवोपगमापगमाभ्यां ह्यनिशमापूर्यमाणस्यापक्षीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्यम्, विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्येत, ततश्च बन्ध

मोक्षाभ्युपगमो बाध्येत-कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत्संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्ध्वगामित्वं भवति-इति।। किञ्चान्यत्। आगच्छतामपगच्छतां चावयवानामागमापायधर्मवत्त्वादेवानात्मत्वम्; शरीरादिवत्। ततश्चावस्थितः कश्चिदवयव आत्मेति स्यात्। न च स निरूपयितुं शक्यते-अयमसाविति।। किञ्चान्यत्। आगच्छन्तश्चैते जीवावयवाः कुतः प्रादुर्भवन्त्यपगच्छन्तश्च क्व वा लीयन्त इति वक्तव्यम्। न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च निलीयेरन्, अभौतिकत्वाज्जीवस्य। नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते; प्रमाणाभावात्।। किञ्चान्यत्। अनवधृतस्वरूपश्चैवंसत्यात्मा स्यात्; आगच्छतामपगच्छतां चावयवानामनियतपरिमाणत्वात्। अत एवमादिदोषप्रसङ्गाद् न पर्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते।।

अथवा-पूर्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचितशरीरान्तरप्रतिपत्तावकार्त्स्न्यप्रसञ्जनद्वारेणानित्यतायां चोदितायां पुनः पर्यायेण परिमाणानवस्थानेऽपि स्त्रोतःसन्ताननित्यतान्यायेनात्मनो नित्यता स्यात्। यथा रक्तपटानां विज्ञानानवस्थानेऽपि तत्सन्ताननित्यता, तद्वद् विसिचामपीत्याशङ्क्यानेन सूत्रेणोत्तरमुच्यते। सन्तानस्य तावदवस्तुत्वे नैरात्म्यवादप्रसङ्गः, वस्तुत्वेऽप्यात्मनो विकारादिदोषसङ्गादस्य पक्षस्यानुपपत्तिरिति।।३५।।

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः।।३६।।

अपि चान्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैः। तद्वत्पूर्वयोरप्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसङ्गादविशेषप्रसङ्गः स्यात्, एकशरीरपरिमाणतैव स्यात्, नोपचितापचितशरीरान्तरप्राप्तिः।। अथवा-अन्त्यस्य जीवपरिमाणस्यावस्थितत्वात्पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात्, ततश्चाविशेषेण सर्वदैवाणुर्महान् वा जीवोऽभ्युपगन्तव्यः, न शरीरपरिमाणः। अतश्च सौगतवदार्हतमपि मतमसङ्गतमित्युपेक्षितव्यम्।।३६।।

इति शाङ्करभाष्यम् एकस्मिन्नसम्भवाधिकरणम् समाप्तम्

वार्तिकम्

नैकस्मिन्नसम्भवात्।।३३।। निरस्तो मुक्तकच्छानां बुद्धानां समयः, अथेदानीं विवसनाऽऽर्हतसमयो बुद्धिसंनिधापितो निराक्रियत इत्याह–*निरस्त इति*।। मुक्तकच्छेन विवसनस्य पञ्चस्कन्धीसमयेन च पञ्चास्तिकायसमयस्य बुद्धिसंनिधापितत्वात् तत्समयं निरसितुमुपन्यस्य दर्शयति संक्षेप-विस्तराभ्यामिति।।

तत्र संक्षेपमाह–*संक्षेपतस्त्विति*।। तत्र बोधोत्मको जीवपदार्थः, अबोधात्मकस्तु जडवर्गोऽजीवपदार्थः। तयोरेव–जीवाजीवपदार्थयोर्मध्ये, इतरेषाम्–आस्रव-सम्बर-निर्जर बन्ध मोक्षपदार्थानां यथायोगमन्तर्भावादिति। जीवाजीवयोरपरः प्रपञ्चः पञ्चास्तिकायो नाम तेषां समयेऽस्तीति दर्शयति–*तयोरिममपरमिति*।। *सर्वेषामप्येषामवान्तरप्रभेदान् बहुविधानिति*।।

तत्र जीवास्तिकायं त्रिधा वर्णयन्ति–नित्यसिद्धो बद्धो मुक्तश्चेति। तत्र चार्हन् नित्यसिद्धः। इतरे केचित् साधनानुष्ठानैर्मुक्ताः, तदनुष्ठानहीनश्चान्ये बद्धाः, इति व्याख्यातो जीवास्तिकायः। पुद्गलास्तिकायस्तु षोढा–पृथिव्यादीनि चत्वारि भूतानि, स्थावरं जङ्गमं च –इति। धर्मास्तिकायोऽपूर्वाख्यः सम्यक् प्रवृत्त्यनुमेयः। शास्त्रीयबाह्यप्रवृत्त्या ह्यान्तरोऽपूर्वाख्यो धर्मोऽनुमीयत इति। अधर्मास्तिकायः स्थित्यनुमेयः–सततमूर्ध्वगमनशीलो हि जीवः, तस्य देहेऽवस्थानेन तदुद्गमनप्रतिबन्धकोऽधर्मोऽनुमीयते–इति। आकाशास्तिकायो द्वेधा–लोकाकाशः, अलोकाकाशश्च–इति। तत्र उपर्युपरि स्थितानां लोकानामन्तर्वर्ती लोकाकाशः, तेषामुपरि मोक्षस्थानमलोकाकाशः। तत्र हि न लोकाः सन्ति। तदेवं जीवाजीवपदार्थौ पञ्चधा प्रपञ्चितौ। आस्त्रव-संवरादयस्त्रयोऽन्ये तद्भेदाः।।

त इदानीं प्रपञ्च्यन्ते। तत्र आस्त्रव-संवर-निर्जरास्त्रयः पदार्थाः प्रवृत्तिलक्षणाः। तत्रापि मिथ्याप्रवृत्तिरास्रवः, सम्यक्प्रवृत्तिस्तु संवर-निर्जरौ। आस्त्रावयति पुरुषं विषादेषु, इतीन्द्रियप्रवृत्तिरास्रव इत्युच्यते। इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशत् रूपादिविज्ञानरूपेण

परिणमत इति। अन्ये पुनः कर्माण्येवास्रवं मन्यन्ते। तानि हि कर्तारमभिव्याप्य स्रवन्ति, कर्तारमनुगच्छन्ति वा, इत्यास्रवः। उभयथाऽप्यनर्थहेतुत्वाद् मिथ्याप्रवृत्तिर्भवत्यास्रव इति। संवरनिर्जरौ तु तद्विपरीतफलत्वात सम्यक् प्रवृत्ती भवतः। तत्र शम-दमादिलक्षणा प्रवृत्तिः संवरः। सा ह्यास्रवस्त्रोतोद्वारं संवृणोति, इति सवंर इत्युच्यते। निर्जरस्तु- अनादिकालप्रवृत्तकषायकलुषपुण्यापुण्यप्रहाणहेतुस्तप्तशिलारोहणादिः। स हि निःशेषं पुण्यापुण्ये सुख-दुःखभोगेन जरयतीति निर्जरः।।

बन्धोऽष्टविधं कर्म। यद्यपि पूर्वोक्तास्रवोऽपि भवति बन्धः ; तथापि तस्यापि कर्महेतुकत्वात् कर्मैव मुख्यबन्धत्वेन गणितम्, इत्यदोषः। तत्र घातिकर्म चतुर्विधम्, तद्यथा–ज्ञानावरणीयम्, दर्शनावरणीयम्, मोहनीयम्, आन्तरायम्–इति। तथाऽघातिकम चतुर्विधमेव–वेदनीयम्, नामिकम्, गोत्रिकम्, आयुष्कं च–इति, इति मिलित्वाऽष्टविधं भवति कर्म। तत्र "सम्यग्ज्ञानं न मोक्षसाधनम्, न हि ज्ञानाद् वस्तुसिद्धिः ; तथा सत्याशामोदकादिज्ञानेभ्योऽपि मोदकादिसिद्धिप्रसङ्गात्" इति विपर्ययः–ज्ञानावरणीयं कर्मोच्यते। "आर्हतदर्शनाभ्यासाद् न मोक्षः" इति ज्ञानम्–दर्शनावरणीयं कर्म। बहुषु विप्रतिषिद्धेषु तीर्थकरैश्च दर्शितेषु मोक्षमार्गेषु विशेषानवधारणम्–मोहनीयं कर्म। मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानम्–आन्तरायं कर्म। तान्येतानि श्रेयोहन्तृत्वाद् घातिकर्माण्युच्यन्ते।।

अथाघातिकर्माणि–तद्यथा–शुक्रस्य पुद्गलाकारेण परिणामकरणात्–वेदनीयं कर्म। तद्धि बन्धोऽपि न निःश्रेयसप्रतिबन्धी; शरीरद्वारेण तत्त्ववेदनहेतुत्वादिति। शुक्रपुद्गलारम्भकवेदनीयकर्मानुगुणम्–नामिकं कर्म। तद्धि शुकपुद्गलाद्यवस्थां कललबुद्बुदादिमारभते। गोत्रिकं तु–अव्याकृतं ततोऽप्याद्यं शक्तिरूपेणावस्थितम्। आयुष्कम्–आयुः कायति=कथयत्युत्पादनद्वारेण, इत्यायुष्कम्। तान्येतानि शुक्रपुद्गलाश्रयत्वाद् अघातीनि कर्माणि। तदेतदष्टविधं कर्म पुरुषं बध्नाति इति बन्ध इत्युच्यते। व्याख्यातो बन्धपदार्थः।।

अथ मोक्षः–विगलितनिखिलक्लेश तद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मनोऽलोकाकाशदेशावस्थानम्–इत्येके।।

अपरे तु–उर्ध्वगमनशीलो हि जीवो धर्माधर्मास्तिकायेन बद्धस्तद्विमोकाद् ऊर्ध्वं गच्छत्येव, स मोक्ष इत्यूचिरे। त एते सप्त पदार्थाः जीवादयः सहावान्तरप्रभेदैरुपन्यस्ताः।।

एतेषु च सर्वेषु पदार्थेष्विमं सप्तभङ्गीनयं नाम न्यायमवतारयन्ति–(१) स्यादस्ति, (२) स्यान्नास्ति, (३) स्यादस्ति च नास्ति च, (४) स्यादवक्तव्यः, (५) स्यादस्ति चावक्तव्यश्च, (६) स्यान्नास्ति चावक्तव्यश्च, (७) स्यादस्ति च नास्ति चावक्तव्यश्च–इति। स्याच्छब्दोऽत्रतिडन्तप्रतिरूपको निपातोऽनेकान्तद्योती। तदुक्तं तैरेव–

''वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात् तिङन्तप्रतिरूपकः''॥ इति॥

एषु=स्यादस्तीत्यादिवाक्येषु स्याच्छब्दः तिङन्तसदृशो निपात इत्यन्वयः॥ कोऽस्यार्थः? इत्यपेक्षायामाह–*अनेकान्तद्योतीति*॥ तत्किमनेकान्तः स्वातन्त्र्येण द्योत्यते? नेत्याह–*गम्यं प्रति विशेषणमिति*॥ गम्यम्=अस्तीत्यादि। कुतोऽस्यानेकान्तद्योतित्वम्? अत आह–*अर्थयोगित्वादिति*॥ यदि पुनरयमनेकान्तद्योतकः स्याच्छब्दो न भवेत्, स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात्, अनेकान्तद्योतकत्वेन स्यादस्ति=कथञ्चिदस्ति, इति स्यात्पदात् कथञ्चिदर्थः–''अस्ती'' त्यनेनानुक्तं प्रतीयते, इति नानर्थक्यम्। अनेकान्तद्योतनस्य चेदं प्रयोजनम्–यदि हि वस्त्वस्त्येवैकान्ततः, ततः सर्वथा सर्वदा सर्वत्र सर्वात्मनाऽस्त्येव, इति न तदीयजिज्ञासायां क्वचित्, कदाचित् कश्चित् प्रवर्तेत, निवर्तेत वा; प्राप्ताप्रापणीयत्वात्, हेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु क्वचित् कदाचित् कस्यचित् कथञ्चित् सत्त्वे हानोपादाने प्रेक्षावतां कल्प्येते–इति॥

सप्त चैत एकान्तभङ्गाः कथं कथं कदा कदा च प्रसरन्ति? इत्यपेक्षायां तत्रैवोपपादितमेतद् अनन्तवीर्येण–

''तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात् तन्निषेधे विवक्षिते॥
क्रमेणोभयवाच्यायां प्रयोगः समुदायभृत्।
युगपत् तद्विवक्षायां स्यादवाच्यमशक्तितः॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः।
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते॥''

इति। तमेतं सप्तभङ्गीनयमाचार्यो दूषयति स्म–*नैकस्मिन्नसम्भवादिति*॥ तद् व्याचष्टे–*न=अयमभ्युपगमोऽयुक्त इति*॥ सप्तानामेकानन्तभङ्गानां योऽयमेकस्मिन् वस्तुन्यभ्युपगमस्तीर्थकरैः, स न युक्तः। कस्मात्? असम्भवात्। कथमेकस्मिन् वस्तुनि तेषामसम्भव इति चेत्, वस्तुनि विकल्पानुपपत्तेः, इत्याह–*न ह्येकस्मिन् धर्मिणीति*॥ ननु–उक्तम्–यदि

वस्त्वस्त्येवैकान्ततः, ततः सर्वथा सर्वदा सर्वत्र सर्वात्मनाऽस्त्येव, इति न तदीप्सा-जिहासाभ्यां क्वचित् कदाचित् कश्चित् प्रवर्तेत निवर्तेत वा; प्राप्ताप्रापणीयत्वात्, हेयहानानुपपत्तेश्च, अनेकान्तपक्षे तु क्वचित् कदाचित् कस्यचित् कथञ्चित् सत्त्वे हानोपादाने प्रेक्षावतां कल्प्येते-इति, सत्यं यदस्ति वस्तुतः, तत्सर्वथा सर्वदा सर्वत्र सर्वात्मना निर्वचनीयेन रूपेणास्त्येव, न नास्ति; यथा प्रत्यगात्मा; यत्तु क्वचित् कथञ्चित् कदाचित् केनचिदात्मनाऽस्तीत्युच्यते, यथा प्रपञ्चः, तद् व्यवहारतः, न तु वस्तुतः ; तस्य विचारासहत्वस्य-"तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र दर्शितत्वात्। न च प्रत्यक्षमात्रं वास्तवत्वं व्यवस्थापयति; शुक्तिशकल-मरु-मरीचिकादिषु रजत तोयादेरपि वास्तवत्वप्रसङ्गात्, लौकिकानामबाधेन तु तद्व्यवस्थायां देहात्माऽभिमानस्याप्यबाधेन तात्त्विकत्वे सति लोकायतमतापातेन नास्तिकत्वप्रसङ्गात्। पण्डितरूपाणां च देहात्माभिमानस्य विचारतो बाधनं प्रपञ्चस्याप्यनेकान्तस्य तुल्यमिति। किञ्च समदसत्त्वयोः परस्परविरुद्धत्वेन समुच्चयाभावे विकल्प एव स्यात्। न च वस्तुनि विकल्पः सम्भवति। तस्मात् "स्थाणुर्वा पुरुषो वे"ति ज्ञानवत् सप्तत्व-पञ्चत्व-सदसत्त्व-संयम-निर्धारण फलस्य, निर्धारयितुश्च प्रमातुः तत्करणस्य प्रमाणस्य, तत्प्रमेयस्य च सप्तत्त्व-पञ्चत्वस्य सदसत्त्वसंशये साधु समर्थितं भवताऽऽत्मनस्तीर्थ- करत्वम्। तन्निर्धारणस्य च एकान्तसत्त्वाभ्युपगमे सर्वत्र नानेकान्तवाद इत्याह-*य एते सप्त पदार्था इति*।। सुगममन्यत्।।३३।।

एवं चात्माकात्स्न्र्यम्।। यथाऽनेकान्ताभ्युपगमासम्भवो दोषो जैनमते प्रसक्तः, एवमात्मनो जीवस्याकात्स्न्र्यदोषोऽप्यपरः प्रसज्यत इत्यर्थः। कथम्? शरीरपरिमाणो हि जीव इत्यार्हतानां सिद्धान्तः। एवं च सति मध्यपरिमाणत्वेनानित्यत्वापत्तौ बन्ध-मोक्षकालास्था- यित्वेनात्मनोऽ-कृत्स्नतापत्तिः, स्वीकृतनित्यत्वविरोधाच्चान्याऽकृत्स्नापत्तिः, असर्वगतत्वाच्चापरा; बाल्यशरीर-परिमितस्य यौवनादिशरीराव्यापनादन्या, मनुष्यपुद्गलादिपरिमितस्य केनचित् कर्मविपाकेन गजादिशरीरप्राप्तौ तद्व्यापनासम्भवादन्या, ततः पुत्तिकादिजन्मप्राप्तौ च गजादिशरीरपरिमितस्य कृत्स्नस्य पुत्तिकाशरीरे समावेशासम्भवाद् अन्याऽकृत्स्नता। एवं बहवोऽकृत्स्नतालक्षणा दोषा आर्हतात्माश्रयाः प्रसज्यन्ते। एतेन-प्रदीपवदात्मनः संकोच विकासशालित्वम्, अनन्तावयवत्वञ्च-प्रत्युक्तम्; विरोधात्। न ह्यनन्तावयवः, अथ च देहपरिमितः संकोच-विकासशीलश्चेति सम्भवति; मूर्तानां सादेश्यविरोधादिति।।३४।।

अवयवोपचयापचयशीलत्वाद् जीवस्य क्रमेण स्थूल-सूक्ष्मशरीरपरिमाणोपपत्तेरविरोध इति चेत्, तत्राह-*न च पर्यायादप्यविरोधो विकारादिभ्यः*।।३५।। अवयवोपचयापचयाभ्यामात्मनः क्रमेण

देहपरिमाणत्वोपपादनेऽपि नैव विरोधः परिहर्तुं शक्यते। कुतः? विकारवत्त्वानित्यत्व बन्ध मोक्षाभ्युपगमबाधादिदोषाणां तादवस्थ्यात्। उपचयापचयवत्त्वे हि देहवद् विक्रियावत्त्वमात्मनो निश्चीयते, ततश्चर्मवदनित्यत्वम्, ततश्च ज्ञानावरणीयादिलक्षणपूर्वोक्तकर्माष्टकपरिवेष्टितस्य जीवस्यालाबुफलवत् संसारसागरे निमग्नस्य बन्धनोच्छेदाद् ऊर्ध्वगामित्वं भवतीति बन्ध मोक्षाभ्युपगमस्य बाध इति। अपि चागमापायधर्मत्वेन तेषामवयवानां शरीरादिवदनात्मत्वाद् न तैरवयवैरात्मनो देहपरिमाणत्वसिद्धिरित्याह– *किञ्चान्यदागच्छतामिति*।।

भवतु, ततः किमिति? अत आह– *ततश्चेति*।। तस्य चावस्थितावयवस्य न हस्त्यादिदेहपरिमाणत्वसम्भव इत्यभिप्रायः। दूषणान्तरमाह– *न च स निरूपयितुं शक्यतेऽयमसावितीति*।। आगमापायधर्मवद्भ्योऽवयवेभ्यो विविच्येति शेषः। तथा च तदज्ञानाद् न मोक्षसिद्धिरित्याशयः। अवयवानामुपचयापचयाधानाधिकरणासम्भवादपि नैतादृशी कल्पना युक्तेत्याह– *किञ्चान्यदागच्छन्तश्चेति*।।

आगच्छतामपगच्छताञ्च जीवावयवानामात्मत्वमभ्युपेत्यापि दूषणमाह– *किञ्चान्यदनवधृत-स्वरूपश्चैवं सत्यात्मा स्यादिति*।। तथा च पूर्ववदनिर्मोक्षप्रसङ्ग इत्यभिप्रायः। सूत्रार्थमुपसंहरति– *अत एवमादिदोषप्रसङ्गादिति*।। अत्रादिशब्देन–किमेते जीवावयवाः प्रत्येकं चेतयेरन्, समूहीभूता वा। प्रत्येकं चैतन्ये बहूनां जीवानामेकाभिप्रायत्वनियप्राभावात् कदाचिद् विरुद्धदिक्क्रियत्वेन शरीमुन्मथ्येत। समूहचैतन्ये तु हस्तिशरीरस्य पुत्तिकादेहवत्त्वे द्वित्रावयवशेषो जीवो न चेतयेत्, विगलितबहुसमूहितया समूहस्याभावात् पुत्तिकाशरीरे–इत्येवमादयो दोषाः परिगृह्यन्ते।।

यद्वा–पूर्वसूत्रेण जीवस्यानित्यत्वदोषे प्रसञ्जिते बौद्धवत् सन्ताननित्यतया तन्नित्यतामाशङ्क्येदं सूत्रमित्याह– *अथवेति*।। विसिचाम्=विवस्त्राणामित्यर्थः।।३५।।

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः।।३६।। अपि च–अन्त्ये=मोक्षावस्थायाम्, जीव परिमाणस्य नित्यत्वेनावस्थितिर्जैनैरभ्युपगम्यते। स एव हि भावो नित्य आख्यायते, यः कालत्रयावस्थायी। एवं च सति मोक्षदशावस्थितजीवपरिमाणस्य संसारदशायामपि भावाद् एकपरिमाणावच्छिन्ने परिमाणान्तरायोगात् संसार-मोक्षोभयदशायामपि जीवपरिमाणस्य नित्यत्वात् सर्वशरीरेषु तत्परिमाणाविशेषः स्यात्। तथा च शरीरभेदेन जीवपरिमाणभेदः, तत्तच्छरीरपरिमाणत्वं च जीवस्य, इत्यभ्युपगमः स्वाभ्युपगमेनैव जैनस्य विरुध्यत इत्यर्थः। अन्त्योभयपदे

परिमाणविशेषाभिधायित्वेन व्याचष्टे- *अपि चान्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्येति *।। *नित्यत्वप्रसङ्गादिति *।। एकस्मिन् युगपत् परिमाणत्रयासम्भवेन तयोर्मोक्षकालीनपरिमाणाभेदादित्यभिप्रायः। तमेवाभिप्रायं प्रकटीकरोति- *एकशरीरपरिमाणतैव स्याद् नोपचितापचितशरीरान्तरप्राप्तिरिति *।। शरीरान्तरपरिमाणप्राप्तिरित्यर्थः।।

सम्प्रत्युभयपदमवस्थापरत्वेन व्याख्यायान्यथा सूत्रं योजयति- *अथवेति *।।३६।। इति पञ्चमं नैकस्मिन्नसम्भवाधिकरणम्।।

इति वार्तिकम् एकस्मिन्नसम्भवाधिकरणम् समाप्तम्

प्रदीपः

नैकस्मिन्नसंभवात्।।३३।। इदमार्हतमतनिराकरणार्थमधिकरणम्। अत्र चत्वारि सूत्राणि–(१) नैकस्मिन्नसंभवात्, (२) एवं चात्माकात्स्न्र्यम्, (३) न च पर्यायादप्यविरोधो विकारादिभ्यः (४) अन्त्यावस्थितेश्चोभयनित्यत्वादविरोधः–इति। तत्र प्रथममनेकान्तवादनिराकरणार्थम्, अपराणि शरीरपरिमाणः, परिणामी, मुक्तिकाले परम्, अपरिणाम्यात्मेति तदीयप्रक्रियानिराकरणार्थम्। तत्रानेकान्तवादः प्रपञ्चस्य सर्वस्य सदसद्रूपत्वाङ्गीकारात सद्विवर्तवादविरोधित्वात् समन्वयविरोधी, एवमात्मविचारोऽपि जीव-ब्रह्मैक्यवादविरोधित्वादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधित्वाच्च समन्वयविरोधीति तन्निराकरणात् पादसङ्गतिः, अध्यायसङ्गतिश्च। अनन्तरेण सर्वथाऽनुपपत्तौ हेतूकृतायाम्, सर्वथोपपत्तिर्यत्रानेकान्तवादे, तस्य प्रामाण्यशङ्कोदेतीति प्रासङ्गिकी सङ्गतिः, यथा मनुष्याधिकारित्वे शास्त्रस्य वर्णिते देवताधिकरणस्येति मन्तव्यम्।।

तत्रार्हतमते द्वे प्रमाणे–प्रत्यक्षम्, परोक्षं च। प्रमेयं च जीवाजीवभेदेन द्विविधम्, अथवा पञ्चास्तिकायाः –जीवास्तिकायः, पुद्गलास्तिकायः, धर्मास्तिकायः, अधर्मास्तिकायः, आकाशास्तिकायश्चेति। सर्वे चेमे सदसद्रूपाः, नित्यानित्यरूपाः, भिन्नाभिन्नरूपाः, अभिलप्यानभिलप्यरूपाः, सामान्य-विशेषात्मकाश्च। तत्र स्वरूपेण सत्त्वम्, रूपान्तरेणासत्त्वम्, एवं सद्रूपेणोर्ध्वतासामान्येन नित्यत्वादि, विशेषरूपेण पर्यायेणानित्यत्वादि च। तत्र सत्त्वं द्रव्यार्थिकम्, असत्त्वं तु पर्यायान्तरार्थिकम्।।

तत्र द्रव्यार्थिके नैगम-संग्रह-व्यवहारा नया उपयुज्यन्ते, पर्यायेषु तु ऋजुसूत्र-शब्द-संग्रह-रूढैवं भूतनयाः। तदुक्तं प्रमाणनयतत्त्वालोके–"धर्मयोर्धर्मिणोर्धर्म-धर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैगमो निगमः। यथा सच्चैतन्यमात्मनीति धर्मयोः।।७-८।। वस्तुपर्यायवद् द्रव्यमिति धर्मिणोः।।७-९।। क्षणमेकं सुखी विषयासक्तजीव इति धर्मधर्मिणोः।।७-१०।। सच्चैतन्यमात्राग्राही परामर्शः संग्रहः।।७-१३।। विश्वमेकं सदविशेषादिति यथा। संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते, स व्यवहारः। यथा यत् सत्, तद् द्रव्यं पर्यायो वेत्यादिः।

वर्तमानक्षणस्थापि पर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्रायः ऋजुसूत्रः–यथा सुखविवर्तः संप्रत्यस्तीति। कालादिभेदेन ध्वनिरर्थभेदं प्रतिपद्यमानः शब्दः–यथा बभूव भवति भविष्यति सुमेरुरित्यादिः। पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः। इन्दनादिन्द्रः, शकनाच्छकः, पूर्दारणात् पुरन्दर इत्यादिषु यथा। शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविशिष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवम्भूतः। यथेन्दनमनुभवन्निन्द्रः, शकनक्रियापरिणतः शक्रः, पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते" इति।

तत्र ते नया यदा स्वविषयीकृतस्य तत्तत्कालादिभिरभेदं गोचरयन्ति, तदा सकलादेशः, भेदं गोचरयन्तस्तु विकलादेशाः। तत्र नयवाक्यं प्रमाणसदृशमेव; प्रवर्तकत्वमात्रसामान्यात्, न तु प्रमाणमपि; विषयाध्यवसायकत्वाभावात्। तत्र ह्यंशत एव प्रमाण्यम्, अत एव प्रमाणैकदेश एव। प्रमाणवाक्यं तु–स्यादस्त्येव घट इत्यादिकं नयगर्भितं त्वर्थव्यवस्थापकमपि। अत एव नयेनानेकात्मताऽनवगमेऽपि प्रमाणवाक्येनानेकात्मतावगमात् सर्वेषामनेकान्तवादः स्वीक्रियते।।

विधि-निषेधयोः प्रत्येकं पृथक् पृथग् उभयोरपि क्रम यौगपद्यादिविवक्षया नयवाक्येन प्रमाणवाक्येन च सप्तभङ्गी जैना मन्यन्ते। तत्र विधिप्राधान्ये 'स्यादस्त्येव घटः,' निषेधप्राधान्ये 'स्यान्नास्त्येव घटः,' उभयप्राधान्ये क्रमविवक्षायां 'स्यादस्ति' 'नास्ति च घटः' तत्रैव यौगपद्यविवक्षायां 'स्यादवक्तव्यम्' तत्र पुनर्विधि-निषेधयोः पूर्वोक्तरीत्या त्रेधा पुनर्योजने 'स्यादस्ति-चावक्तव्यं च' 'स्यान्नास्ति चाव्यक्तव्यं च' 'स्यादस्ति च नास्ति चावक्तव्यं चे' ति सप्त भङ्गाः।।

एतैः सप्तप्रकारैरेव सर्वेषां संग्रहाद् न भङ्गान्तराणि। तथा च घटोऽस्तीत्यादिप्रमाणवाक्यानि सामान्य-विशेषात्मकं सदसद्रूपादिकं घटादिकं विषयीकरोति, तत्रैकः स्पष्टोऽपरोऽस्पष्ट इति त्वन्यदेतत्। तत्राद्वैतिन इव सन्मात्रविषयकं निराकरं ज्ञानमेतेऽपि स्वीकुर्वन्ति, परं तु तस्यावग्रहादिरूपत्वाभावाद् न प्रामाण्यम्, सन् घट इत्यादिकमपि सद्रूपघटमात्राविषयकत्वेन मतान्तर इवैतन्मते न प्रमाणम्, किन्तूभयविषयकत्वेनैव। सामान्यविशेषात्मक एव यथासंभवं सप्तभङ्गी विधि निषेधप्राधान्येन विवक्ष्यते, न केवले सामान्ये, केवले वा विशेषे यदा प्रमाणसप्तभङ्गी मन्यते, नयसप्तभङ्गी तु भेदेनोपदेशाद् विकलादेशत्वाच्च केवले सामान्ये विशेषेऽपि संभवति। एतदेवाभिप्रेत्य सप्तानां नयानां केचन सामान्यमात्रगोचराः, केचन विशेषमात्रगोचरा इति मन्यन्ते। एषु सर्व एव नया अद्वैतिनामप्यविरुद्धा एव। इयान् विशेषः–परमात्मनि संग्रहनयमात्रम्, तद्व्यतिरिक्तेषु अपरे नयाः। सर्वेऽपि प्रमाणमेव, परं तु संग्रहस्यैव मुख्यं प्रमाण्यम्; सन्मात्रविषयं प्रत्यक्षमेव मुख्यं प्रमाणमित्यद्वैतिनां सिद्धान्तात्, अन्येषां तु व्यावहारिकमेव प्रामाण्यं सर्वथाऽप्रामाण्यमेव वा। तदतिरिक्तं तु प्रमाणवाक्यमनेकान्तविषयकं न स्वीक्रियते। तथा च घटादिषु केवलविधिपक्षो

निषेधपक्ष उभयपक्षो वा विवक्षितुं न शक्यते; सदसद्विलक्षणत्वात् घटादीनाम्। अवक्तव्यत्वमात्रं तु भवति। सति चैवमद्वैतिनो विधिपक्षं ब्रह्मण्येव, अवक्तव्यत्वपक्षं प्रपञ्च एवेति भङ्गद्वयमेव स्वीकुर्वन्ति। इयान् विशेषः—युगपद्विधि-निषेधप्राधान्येनावक्तव्यत्वं जैनमते, मिथ्यात्वेन तु केवलाद्वैते, जैनास्त्वात्मसाधारण्येन सर्वत्र सर्वान् भङ्गानिति। सति चैवमद्वैतिनामार्हतैस्साकं न तदीयप्रमाणवाक्येनैव साकम्, किन्तु नयैरपि साकं विरोधो वर्तते; सप्तानां नयानां स्वीकारे ब्रह्ममात्रसत्यत्व-प्रपञ्चमिथ्यात्वयोर्बाधात्। तथा च तदीयनयप्रक्रियानिराकरणेनैव गतार्थता भवति। अतः सूत्रकारास्तदीयनयसप्तभङ्गीमात्रमत्र निरसनीयं मन्यन्त इत्यभिप्रायेण भाष्यकार आर्हताभिमतपदार्थविभागं तदीयनयसप्तभङ्गीनयं चानुसन्धत्ते—*सप्त चैषामित्यादिना—सप्तभङ्गीनयं नाम योजयन्तीत्यन्तेन*।। *सर्वत्रेति*।। आत्मानात्मसाधारण्येनेत्यर्थः। सप्तभङ्गीनयम्=विधि निषेधयोः पृथक् क्रम-यौगपद्यस्य, तद्यौगपद्ये पुनर्विधि निषेधपृथक्क्रमयोश्च विवक्षया सप्तभङ्गीनीतिम्।।

स्यादस्ति।। अत्र सर्वत्रैवकारप्रयोगे प्रमाणवाक्यत्वम्, अन्यथा तु नयवाक्यत्वमिति नयप्रकाशविवृतौ व्यक्तमिति नयसप्तभङ्ग्येवात्र विवक्ष्यते, न प्रमाणसप्तभङ्गी। नयवाक्यातिरिक्तप्रमाणवाक्यस्याद्वैतिभिरनङ्गीकारदपि नात्र तद्विवक्षाया उपयोगः। तथा च सप्तनयानां सर्वत्राविवक्षायामपि सप्तभङ्गीनयस्य सर्वत्र विवक्षाऽबाधितैव। सप्तभङ्ग्यामपि सप्तभङ्ग्यन्तरकल्पने प्रयोजनाभावात् सप्तैव भङ्गा मन्यन्ते; सप्तप्रकाराणामेव कल्पनासंभवात्। तत्र स्यादस्तीति विधिपक्षः, स्यान्नास्तीति निषेधपक्षः, स्यादस्ति नास्तीतिक्रमेण विधि निषेधपक्षः, युगपद्विधि-निषेध विवक्षायां स्यादवक्तव्यम्, विधि युगपद्विधि-निषेधपक्षे स्यादस्त्यवक्तव्यम्, निषेध युगपद्विधि निषेधोभयपक्षे स्यान्नास्ति चावक्तव्यम्, क्रमेण विधि-निषेधयुगपद्विधिनिषेधेषु स्यादस्ति च नास्ति चाव्यक्तव्यमिति विभागः। तत्र सार्वदिकेऽस्तित्वे कदाचन नास्तित्वप्रतीतिरनुपपन्ना स्यात्, एवं सार्वदिके नास्तित्वे कदाचनास्तित्वप्रतीतिर्न स्यादित्युभयरूपत्वे स्वीकर्तव्य उभयोरपि युगपद्विवक्षायां तद्वाचकशब्दाभावादवक्तव्यत्वम्, सदसच्छब्दयोस्तु क्रमेण विधि-निषेधगोचर एव सामर्थ्यम्। यद्यपि सन् घटः, असम् घट इति वोत्पाद-विनाशावस्थाविशेषमात्रमादाय सत्त्वप्रतीतिरसत्त्वप्रतीतिर्वा भवतीति युक्तम्; सदसत्प्रतीतिस्तु न कुत्रापि दृष्टचरी, तथापि केषांचनावस्थाविशेषे साऽपि भवितुमर्हतीत्यभिप्रेत्य तृतीयो भङ्गः। एतेन तुरीयादयोऽपि भङ्गा व्याख्याताः। एतन्मते हि उत्पाद-व्यय ध्रौव्यशालित्वमेव सत्त्वमित्यात्मनोऽपि तत्तद्रूपान्तरेण परिणामोऽवश्यमेव स्वीकर्तव्य इति तस्यापि सदसद्रूपत्वमवश्यमेव स्वीकर्तव्यम्। तथा च घटः सन् इत्यादिप्रतीतिसमये शब्दानुपात्तानामप्यनुवर्तमान मृत्कालादीनां व्यय-ध्रौव्य-रूपादीनां घटस्य च भानमेव विषयः, असत्त्वं

तु तन्तुजन्यत्वादिधर्मान्तरेणैव। तथा चानुवृत्ताकारेणेव व्यावृत्ताकारेणापि, तत्तत्पदार्थभानस्य शब्दानुपादानेऽपि स्वीकरणीयत्वेन सदसद्रूपता वस्तुसामान्येऽवश्यमेव स्वीकर्तव्येति केवलाद्वैतिनामात्मनो नित्यत्वमात्रत्वम्, अस्तीत्येव प्रतीति:, तदितरेषां तु न सत्त्वेन न वाऽसत्त्वेन प्रतीति:, किन्तु सत्तादात्म्यमात्रेणेति कल्पना ब्रह्ममात्रविवर्तोपादानताभिप्रायप्रयुक्ता न शोभत इति जैनानामाशय:।।

अत्राद्वैतिनो मन्यन्ते–अस्तिपक्षो नास्तिपक्षश्चेति प्रथम-द्वितीयभङ्गौ नास्माकमपि विरुद्धौ। इयान् विशेष:–यदद्वैतमतेऽस्तित्वपक्षो ब्रह्मण्येव, नास्तित्वपक्षस्तु शशश्रृङ्गादावेव। अपरेषां तु प्रपञ्चानां न भङ्गद्वयमपि, न वा तत्र तृतीयादिभङ्गोऽपि। यदस्ति, तत्सर्वदाऽस्ति, यन्नास्ति, तत्सर्वदा नास्ति, प्रपञ्चास्तु कदाचन सन्ति, कदाचन न सन्तीति सदसद्विलक्षणा:। तथा च तृतीयभङ्गस्यापि न विषया:; सदसद्रूपत्वासम्भवात्। न हि सदसद्रूपतयाऽपि कोऽपि कदापि प्रतीयते। तृतीयभङ्गस्यैवानवसरे चतुर्थादिभङ्गानां नावसरलेशोऽपि।।

तथाहि–तुरीयो हि भङ्गो युगपत्सत्त्वासत्त्वप्राधान्यमवलम्ब्यैव। तत्र न युगपत्सत्त्वासत्त्वप्राधान्यं सम्भवदुक्तिकमपि; तद्वाचकशब्दाभावात् सदसत्पदेन व्यवहारस्तत्र विरुद्ध एव; क्रमेण सदसत्त्वपक्षेणैव सदसत्पदेन व्यपदेशसम्भवात्। अत एवावक्तव्यपदेन तस्य व्यपदेश इति जैना मन्यन्ते। युगपत्सत्त्वासत्त्वे विरुद्धे इति नियतमेव स्वीकर्तव्यम्। तदुक्तम्–"एकत्र धर्मा युगपद्विरुद्धा: कालाद्यभेदान्निहिता हि येन। आदेशमासाद्य तमत्र शासने जयन्ति जैना: परवादिदर्शनम्।।" इति सत्त्वासत्त्वयोरपि विरोधो युगपत्प्रतिपादित उपपद्यते। तथा चेदमेवात्रालोचनीयम्–यत् युगपत्सत्त्वासत्त्वावगाही तुरीयो भङ्गस्तदुपजीव्यका: पञ्चमादयश्च कथं क्षोदक्षमा:? शीतोष्णादिषु परस्परविरुद्धेषु तथाऽदर्शनात्। तत्र पर्यायेण शीतप्राधान्यमुष्णप्राधान्यं च यथा दृश्यते, न तथा युगपच्छीतोष्णप्राधान्यं दृश्यते। एतेन तृतीयभङ्गोऽपि परास्त: ; सत्त्वप्राधान्यपक्षमसत्त्वप्राधान्यपक्षं चातिरिच्य क्रमेण तदुभयप्राधान्यपक्षस्यासंभवात्। तथा च कथं सप्तभङ्गीनयो जैनानामित्यभिप्रायेणोक्तं मतं निराचष्टे–*अत्राचक्ष्मह इति*।।

अयमभ्युपगम:=सप्तभङ्गनयात्मको न युक्त इति योजना। कथमिति शङ्कते–*कुत इति*।। सूत्राक्षरै: समाधास्यन् सूत्रमुपक्षिपति–*नैकस्मिन्नसम्भवादिति*।। असमञ्जसोऽनेकान्तवाद एकस्मिन्निति शेष:। असंभवशब्देन साकं पूर्वसूत्रगतसर्वथापदस्याप्यनुषक्तस्यान्वयात् सर्वथाऽसम्भवादित्यर्थ: पर्यवस्यति। तथा च पूर्वाधिकरणेनास्य दृष्टान्तसङ्गतिरपि सूच्यते। एकस्मिन्ननेकान्तवादोऽत्यन्तमेव विरुद्ध:। अत्रानेकान्तवादशब्देन युगपत्सदसद्रूपतैव हि जैनानां

सप्तभङ्ग्यां तुरीयभङ्गात्मिका मध्यगतत्वात् प्राणतुल्या विवक्ष्यते। तस्यां हि निरस्तायां निष्प्राणैव सप्तभङ्गी स्यादिति भावः। तदेतदाह भाष्यकारः- *न ह्येकस्मिन् धर्मिणि युगगत् सदसत्त्वादिविरुद्धधर्मसमावेशः संभवति शीतोष्णवदिति*।। युगपत् सदसत्त्वादिः तुरीय-पञ्चम षष्ठभङ्गादिः। स हि विरुद्ध एव; असंभवग्रस्त एव। अत एव जीवादीनामवक्तव्यत्वमपि मन्यते। तत्र दृष्टान्तः- *शीतोष्णवदिति*।। शीतोष्णे हि क्रमिके अविरुद्धे अपि युगपत्सर्वैरपि परस्परविरोधादेकत्र नानुभूयेते, इति तुरीयादिभङ्गा असंभूता एवेति निष्कर्षः।।

यत्तु-केचनैतद्भाष्यं जैनसंप्रदायानवबोधनिबन्धनम्; सत्त्वासत्त्वयोरेकत्र जैनमते स्वरूपेण पररूपेण च स्वीकारेण "स्वरूप-पररूपाभ्यां नित्यं सदसदात्मके" इति मीमांसकसिद्धान्तवत् सर्वेषां सदसद्रूपत्वेन तयोरविरोधात् सत्त्वासत्त्वादिविरुद्धधर्मेतिसमुल्लेखयोगादिति-मन्यन्ते, तदिदं मीमांसकैः-"वस्तुनी, ज्ञायते किञ्चिद्रूपं कैश्चित् कदाचन।" इति विधि-निषेधपक्षयोरेव क्रमिकसत्त्वासत्त्वयोरङ्गीकारात् युगपत्सत्त्वासत्त्वयोरस्वीकारात्, व्यवहारायोग्यत्वेनावक्तव्यता-रूपत्वस्य जैनैरपि स्वीकाराद् वेदान्तिभिरपि सत्तैक्यवादे विधि निषेधपक्षयोर्ब्रह्मशशश्रृङ्गमात्रविषयकत्वेन नियमनेऽपि सत्तात्रैविध्यवादे कालभेदेन प्रपञ्चेऽपि स्वीकाराच्च प्राणभूतावक्तव्यतादिपक्षेणैव जैनानामसाधारणानेकान्तवादस्य प्रवृत्तत्वाञ्च न क्षोदक्षमम्। अन्यथा भाष्ये "युगपत्सदसत्त्वादिविरुद्धधर्मसमावेश" इति प्रकृतवाक्ये युगपत्पदम्, आदिपदम्, विरुद्धपदं चानुपपन्नमेव स्यादिति मन्तव्यम्। एतेन-स्वरूपेण सत्त्वम्, पररूपेणासत्त्वमिति प्रक्रियैव भगवत्पादैरपि न ज्ञातेति केषाञ्चनोपहासवादो न भगवत्पादान् विषयीकर्तुं शक्नोतीति-सूचितम्।।

तदेवं स्वरूपेण सत्त्वं पररूपेणासत्त्वमिति सत्त्वासत्त्वकथामाश्रित्यानेकान्तवादोऽनुपपन्न इति निरूपितम्। वस्तुतस्तु नायमपि नियमस्तेषामभ्युपगमे; स्वरूपेण सत्त्वमात्रस्य पदार्थसप्तत्वाद्यवधारणादौ तैरेव स्वीकारात्। न हि तत्रापि पररूपेणासत्त्वमपि भवति; पररूपस्यैव तन्मते शशश्रृङ्गायमाणत्वात्, अष्टमादिपदार्थानङ्गीकारात्। तथा चानेकान्तवाद एकान्तत्वस्वीकारात् तत्रेवान्यत्राप्यनैकान्तवादस्यासंभवाद् नानेकान्तवादो युक्त इत्याह-*य एते सप्त पदार्था इत्यादिना-न्यूनत्वमधिकसंख्यात्वं वा प्राप्नुयादित्यन्तेन*।। अत्राधिकसङ्ख्यात्व एव तात्पर्यम्, तदानीमेव पररूपेणासत्त्वव्यवस्थापनसंभवात्। न्यूनसङ्ख्यात्वमिति त्ववयुत्यानुवाद एव।।

तदेवं तुरीयादिभङ्गासम्भवः, पदार्थविभागादौ प्रथम-द्वितीयादिभङ्गत्रयस्याप्यसम्भव इति सप्तभङ्गीनयस्यासम्भवः प्रतिपादितः। इतः परं तु सप्ताधिका अपि भवितुमर्हन्ति, इति सप्तभङ्ग्यवधारणमपि तेषामसम्भवमिति प्रतिपादयति- *न चैषां पदार्थानामवक्तव्यत्वं संभवतीति*।।

तुरीयादौ प्रथम-द्वितीय-तृतीयभङ्गानामिव तुरीयादीनामप्यवक्तव्यत्वादीनां युगपद्विधिनिषेधसहकृत-युगपद्विधि-निषेधादिरूपाणां कल्पनाया आवश्यकत्वेन च सप्तैव प्रकारा भङ्गानामिति नियमनायोगात्, प्राणभूतावक्तव्यताया अप्यवक्तव्यतापत्त्या तेषां वक्तव्यभङ्गकोटिप्रवेशायोग इति भावः। अवक्तव्यत्वम्=अवक्तव्यत्वमात्रमित्यर्थः। अवक्तव्यत्वमप्यापाद्येतेत्यर्थः। न चेष्टापत्तिः ; उच्यममानत्वादिति वाच्यम्; तावता हि तुरीयभङ्गो भज्यत इति। तदेतदाह-*उच्यन्ते चावक्तव्याश्चेति*।। न केवलमसम्भवोऽनेकान्तवादस्य, किन्तु फलानियमात् प्रवृत्त्यनुपपत्तेरपि तदसम्भव इति ''सर्वथाऽनुपपत्तेरि''ति सूत्रमप्यनुकृष्य विवरणमप्यत्र विवक्षितमित्याह-*तथेत्यादिना*।। न केवलमियत्-जीवादिलक्षणानां स्वशास्त्रोदितानामपि सत्त्वासत्त्वयोरनियतसत्त्वेन लक्षणत्वायोग इत्याह-*एवमिति*।।

अत्रेदमालोचनीयम्-जीवादिपदार्थेष्विव विधि-निषेधयोरपि परस्परविरुद्धयोः सप्तभङ्गी योज्यते वा, न वा। आद्ये सत्त्वासत्त्वयोः सत्त्वासत्त्वव्यतिरिक्तरूपान्तराभावात् स्वरूपेणैव सत्त्वमसत्त्वं चोरीकर्तव्यम्। तच्चेदं विरुद्धमित्यन्ततो गत्वा सत्त्वासत्त्वयोः समावेशायोगाद् न तत्सम्भवः। अन्त्ये तु सर्वत्र सप्तभङ्गीति नियमभङ्गापत्तिरित्यभिप्रायेणाह-*सत्त्वे चैकस्मिन्निति*।। न केवलं विधि निषेधायोगेनानेकान्तवादायोगः, किन्तु नित्यत्वानित्यत्वादिविरुद्धधर्मावाशाथोगेनापि। तथाहि-घटादीनां मृद्रूपेण नित्यत्वम्, कपालरूपेणानित्यत्वमिति खलु भवतां सिद्धान्तः। तत्र च स्वरूपेण न नित्यत्वमनित्यत्वं वेति स्वरूपेण नित्यत्वं रूपान्तरेणानित्यत्वम्; एवं स्वरूपेणैकत्वमभिन्नत्वं वा, पररूपेणानेकत्वमभिन्नत्वम्, स्वरूपेण सामान्यत्वम्; रूपान्तरेण विशेषत्वमिति वा भवदभिमतनित्यानित्याद्यात्मकतया पदार्थसामान्यस्यानेकान्ततावादो न कथमपि विकल्पसह इत्युपसंहारव्याजेन निरूपयति-*एतेनेति*।। भेदाभेदवदो हि ''कार्यात्मना तु नानात्वमभेदः कारणात्मना'' इति भेदाभेदवादिमतेन यदि मन्यते, तर्हि भवतां मते पुद्गलसंज्ञकपरमाणूनामेव कारणत्वात् तैरेव भेदाभेदौ घटादीनां वक्तव्यम्। तच्च परमाणुकारणवादव्यवस्थायामेव सम्भवति। न च तत्सम्भवति; पूर्वमेव निरस्तत्वादित्याह-*यत्त्विति*।।३३।।

तदेवमेकस्मिन्ननेकान्तवादासम्भवेनार्हतमतासामञ्जस्यं व्यवस्थापितम्, संप्रति तदभिमतात्म-स्वरूपमपि न सम्भवदुक्तिकमिति विवेचयति सूत्रकारः-*एवं चात्माकात्स्र्न्यमिति*।। अत्र जैना आत्मस्वरूपम् ''प्रमाता प्रत्यक्षादिप्रमाणसिद्ध आत्मा'' ''चैतन्यस्वरूपः परिणामी कर्ता साक्षाद्भोक्ता स्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्गलिकादृष्टवांश्चायम्।'' इति जडात्मवादिनैयायिक कूटस्थनित्यताऽकर्तता व्यापकत्वादिवादिकपिलाद्यात्मैकत्ववादिकेवलाद्वैतमतनिरासपूर्वकम् चिद्रू-

पतादिविशिष्टमात्मस्वरूपं मन्यन्ते। अत्र प्रतिक्षेत्रं तद्भेदांशवादोऽद्वैतमतमात्रविरुद्धः। तस्य देहपरिमाणता तु नैयायिकादीनामपि विरुद्धा; तद्व्यापक्तादेस्तैरूरीकारात्। साऽपि तु वक्ष्यमाणरीत्या तदेकतावाद एव संभवति, न तद्भेदवाद इत्युत्तरत्र सूत्रकारा एव विशदयिष्यन्ति, इति वस्तुगत्या देहपरिमाणतावादोऽप्यद्वैतमतस्यैव विशेषतो विरोधी। यस्तु तदणुपरिमाणतावादः केषांचन, तैरपि तद्धर्मभूतज्ञाने नित्ये संकोचविकासयोरङ्गीकाराद् आर्हतानां परिणामिनित्यतावादस्य स्वीकाराच्च न स जैनसिद्धान्तस्यात्यन्ततो विरोधी; यतो विकारानापत्तिरुभयोरपि परिणामिनः समाना। अतो देहपरिमाणतावादनिरासमात्रमात्मनोऽनित्यत्वापत्त्यादिनाऽऽदधानः सूत्रकारोऽद्वैतसिद्धान्तमेव स्वध्येयं मन्यते। आत्माकार्त्स्न्यमपि एवम्=असमञ्जसम्; परिच्छिन्नत्वेन देहादिवदनित्यत्वापत्तेरिति सूत्रार्थः। तदेतदाह– *शरीरपरिमाणतायामित्यादिना–प्रसज्येतेत्यन्तेन*।। यद्वा–आत्मनोऽकार्त्स्न्यापत्तिः, कृत्स्नशरीरपरिमाणत्वानुपपत्तिरिति सूत्रयोजनान्तरमभिप्रेत्याह– *शरीराणां चेत्यादिना–दोष इत्यन्तेन*।।

एवमकार्त्स्न्यशब्दस्य परिच्छिन्नपरतां कृत्स्नशरीराव्यापितां चाभिप्रेत्य व्याख्यानद्वयम्। यदा तु अकार्त्स्न्यशब्दस्याणुपरिमाणपरत्वं मन्यते, तदाऽऽत्माणुपरिमाणतापत्तिरिति सूत्रार्थः। अस्मिंश्च विवरणे न केवलमार्हतमतनिराकरणमस्य सूत्रस्यार्थः, किन्त्वेकत्वपर्यवसायितद्व्यापकतासिद्धान्तविरुद्धस्य जीवाणुतावादस्य तच्छरीरपरिमाणतावादस्य चोभयस्य निराकरणम्। तदिदं सर्वं मनसि निधायाह–*स्यादेतदिति*।। *अणुमात्रत्वप्रसङ्गः स्यादिति च*।। अत्र प्रसङ्गः स्यादित्यनेन तदप्यनिष्टमिति सूच्यते। यथा च शरीरपरिमाणत्वे पुद्गलगतेनादृष्टेन व्यवस्था, एवमणुपरिमाणत्वेऽपि धर्मभूतज्ञानेन व्यवस्था परिणामिनित्यतास्वीकारेण निरुध्यत इति न कोऽपि विशेषो देहपरिमाणपक्षस्य, अणुपरिमाणपक्षस्य चेति भावः। एतेन–श्रीभाष्यकारादीनामात्माणुपरिमाणतासिद्धान्तोऽप्युक्तसूत्रन्यायविरुद्ध इति–सूच्यते। आत्मनोऽनन्तावयवतावादायोगपरतया वैतत् सूत्रमित्याह–*अपि चेति*।। तथा चोक्तसूत्रस्य शरीरपरिमाणवादायोगप्रतिज्ञामात्रपरतया, आत्मनः सर्वशरीरव्यापकत्वानुपपत्तिपरतया, तदणुपरिमाणापत्तिपरतया, आत्मनोऽनन्तावयवकल्पनायोगपरतया वा योजनमिति निष्कर्षः।।३४।।

ननु–नात्मस्वरूपस्य जैनाभिमतस्य निरसनं युक्तम्; आत्मनोऽपि द्रव्यत ऊर्ध्वतासामान्यरूपेण नित्यत्वेऽपि तिर्यक्सामान्येन पर्यायेण तत्तदात्मविशेषरूपेणानित्यत्वस्य स्वीकारात्। न ह्यन्यथोत्पाद व्यय-ध्रौव्यशालित्वेन तस्य सद्रूपत्वमपि स्यादिति नायं प्रथमो दोषः संभवति; पूर्वाकारपरित्यागेनोत्तराकारपरिणामाख्यस्य कार्यत्वस्यात्मन्यपि स्वीकारात्। बालादिशरीरत्यागेन युवादिशरीरपरिमाणावस्थायामपि सर्पस्येव सर्वथा विनाशाभावात् शरीरपरिमाणानुगुणं संकोच

विकासाभ्युपगमाद् न कृत्स्नशरीरव्यापित्वासम्भवः। एतेन–पिपीलिकाशरीरस्य हस्तिशरीरप्रवेशोऽपि व्याख्यातः। तथा च नियतावयवानामेव जीवानां तत्तच्छरीरानुगुणपरिमाणत्वं न विरुद्धमिति न दोष इत्याशङ्क्य समाधत्ते–*न च पर्यायादप्यविरोधो विकारादिभ्यः*।।३५।। पर्यायात्=तत्तज्जीव-विशेषमादाय, अविरोधः=कार्यत्वादिस्वीकारनिबन्धनविराधाभावः, न च=न सम्भवति; विकारादिभ्यः=विक्रियावत्त्वानित्यत्व-बन्ध-मोक्षबाधानुपपत्त्यादिदोषेभ्य इति सूत्रयोजना।।

अयं भावः–द्रव्यस्य सदृशरूपान्तरापत्तिः खलुकार्यत्वं जैनाभिमतम्, यथा मृदादीनां घटादिभावः। तथा च घटादिरूपेण पर्यायेण कार्यत्वमिव पर्यायरूपेण जीवस्य कार्यत्वं यदि मन्यते, तर्हि पर्यायाणां स्वरूपतोऽनित्यत्वाद् जीवानामपि स्वरूपतोऽनित्यत्वमापद्येत। सति चैवमन्यो बद्धोऽन्यो मुक्त इति बन्धमोक्षव्यवस्थानुपपत्तिः, कृतहानाकृताभ्युपगमप्रसङ्गश्च। तथा च कृत्स्नशरीरसम्बन्धानापत्तिरूपदूषणस्य जीवसंकोचाद्यङ्गीकारेण परिहारेऽप्यनित्यत्वदोषस्य तन्निबन्धनबन्ध-मोक्षव्यवस्थानुपपत्तेश्च न परिहारः संभवति; पर्यायतोऽनित्यानां घटादीनामत्यन्तभेदाभ्युपगमात्। पर्यायो हि तिर्यक्सामान्यं विशेष एव; न सामान्यमिति जैनसिद्धान्तात् पर्यायाणां सदृशानां नाभेदः संभवति, येनोक्तदोषपरिहारः स्यात्। तदिदं सर्वमुपपादयति भाष्यकारः–*विकारादिदोषप्रसङ्गादिति*।। *ततश्चेति*।। कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत् संसारसागरे निमग्नस्य बन्धनोच्छोदादूर्ध्वगमनमिति बन्ध-मोक्षाभ्युपगमो वाध्येतेति योजना। यस्य कर्माष्टकवेष्टनं बन्धः, तस्य तदुच्छेदेनोर्ध्वगमनं मोक्ष इति सिद्धान्तो भज्येतेत्यर्थः। न ह्यच्छिन्नबन्ध ऊर्ध्वगामी च जीवः पर्यायरूपेण कार्यः, किन्तु नित्य एवेति हि तदीयः सिद्धान्तः, इति पर्यायेण जीवानित्यतासिद्धान्तो जैनानामपि नैकान्तत इति भावः।।

यत्तु–सर्पदृष्टान्तेन बाल-युवादिशरीरभेदेऽप्यात्मनः शरीरसमानपरिमाणत्वमुपगम्यते, तद्यदि सर्पशरीरादेव केषांचनावयवानामाविर्भावः, तत्रैव केषाञ्चन लय इतिवत् कस्य च जीवस्यैव केंचनावयवा आगच्छन्ति, केचनापगच्छन्तीति मन्यते, तर्हि कोऽसौ व्यवस्थितो जीवावयवः, कुतो वाऽवयवा आगच्छन्ति? कुतश्च लीयन्त इति वक्तव्यम्। किमप्यत्र वर्णयितुं न शक्यत इति न सङ्कोच - विकासाभ्यां शरीरपरिमाणभेदेऽप्यात्मव्यवस्थासम्भव इत्याह–*किञ्चान्यदित्यादिना –अनियतपरिमाणत्वादित्यन्तेन*।। आत्मानित्यतापत्तिपरिहारासम्भवमुपसंहरति–*अत इति*।।

तदेवं पर्यायशब्दस्य तिर्यक्सामान्यरूपविशेषपरत्वमभिप्रेत्य पर्यायरूपेणानित्यत्वं स्वीकृत्य शङ्का परिहृता। इतः परः पर्यायात्=प्रवाहादित्यर्थं स्वीकृत्य प्रवाहतो नित्यत्वाद् नानित्यत्वादिदोष इत्याशङ्कानिराकरणपरतया सूत्रस्य योजनान्तरमाह–अथवेति।। *प्रवाहतो नित्यत्वं नाम सन्तानतो

नित्यत्वम्, तत्र चेदमालोचनीयम्—यत् सन्तानोऽयं सन्तानिभ्यो वस्त्वन्तरं वा, सन्तानिन एव वा। आद्ये तस्यैव सन्तानरूपेणापरिणामाद् अनित्यत्वापत्तिः, द्वितीये तु सन्तानस्य सन्तानिन आत्मानो भवन्तीति भावः। तदिदमाह— *सन्तानस्य तावदित्यादिना*।।३५।।

एतावता प्रसङ्गेन जीवानित्यतावादाभ्युपगममार्हतानां निरस्य जीवस्यावयवोपगमापगमाभ्यां शरीरपरिमाणभेदोऽयं मुक्त्यवस्थापन्नस्य बाधितः, तत्रावयवोपगमापगमयोनङ्गीकारात्। तथा च सैव गतिः सर्वत्राङ्गीकारणीया, इति स्वपरिमाणेनैव नियतेन जीवस्य परिमाणं वक्तव्यम्। तच्चाणुपरिमाणं वा, महद्वेति तु विचारान्तरमित्याह सूत्रकारः— *अन्त्यावस्थितेश्चोभयनित्यत्वादविशेष इति*।। अन्त्यस्य जीवपरिमाणस्य, अवस्थितेः व्यवस्थिततत्वात् उभयस्य आद्य-मध्यमपरिमाणस्य, नित्यत्वात्=व्यवस्थिततत्वात्, अविशेषः=कालत्रयेऽपि परिमाणस्येति सूत्रार्थः। अत्रोभयशब्देन कालद्वयमात्रविवक्षेति वा विवरणान्तरम्। तदिदमाह— *अपि चेत्यादिना*।। अणुरिति शरीरपरिमाणतानिरासमात्राभिप्रायेण, न वस्तुगत्या, न वा भगवत्पादानां तत्रास्थेति आत्माकात्स्न्यर्शब्दस्याणुपरिमाणतापत्तिपरताया विवरणेनैव ज्ञायते। ततश्च भगवत्पादानामास्था तन्महापरिमाण एवेति न दोषः। अथवाऽन्तः-करणावच्छिन्नस्यैव चैतन्यस्य जीवत्वे तस्य कूटस्थे जीवे कल्पितत्वे च ब्रह्मानन्दोक्तरीत्या स्वीकारेऽणुपरिमाणत्वमेव; तत्त्वमसीति बाधायां सामानाधिकरण्यस्यैव तदभ्युपगमात्। यदि त्वविद्यावच्छिन्नचैतन्यस्यैव जीवत्वम्, तदा तु व्यापकत्वमिति पक्षद्वयेऽप्यनास्थासूचनार्थमत्राणुर्वा महान् वेति वर्णितमिति मन्तव्यम्।।

एतेन—सिद्धान्तलेशसंगृहीतजीवत्रैविध्यप्रक्रिया, तद्विकारत्वप्रक्रिया, तत्प्रतिबिम्बत्वादिप्रक्रियाः सर्वा अपि भाष्यारूढा इति सूच्यते। *शरीरपरिमाण इति*।। सर्वथेति शेषः। अनेन च ''सर्वथाऽनुपपत्तेश्चे''ति पूर्वाधिकरणान्तिमसूत्रमप्यनुसन्धेयं सूच्यते। तत्प्रयोजनं तु सौगतमतवदेवात्यन्तमवहेयत्वसूचनमेव। तमिममर्थमुपसंहारव्याजेनाह— *अतश्च सौगतमतवदिति*।। अनेन पूर्वोक्तदृष्टान्तसङ्गतिरपि भाष्यकारैरेव व्यवस्थापितेति ज्ञायते। *उपेक्षितव्यमिति*।। अनेन च ''शिष्टापरिग्रहाच्चात्यन्तमनपेक्षे''ति सूत्रगतानपेक्षाशब्दस्यैव सौगतार्हतमत-परीक्षयोरप्यनुषङ्गः, न तु साङ्ख्यादिमतवदंशविशेषासमञ्जसत्वमात्रस्येति सूच्यते।।

तथा च द्वितीयाध्यायद्वितीयपादेऽत्यन्तानपेक्ष्याणि त्रीणि दर्शनानि सूत्रकारैर्मन्यन्ते—वैशेषिकमतम्, सौगतमतम्, आर्हतमतं च। त्रीणि तु अंशविशेषमात्रेऽप्रमाणानि मन्यन्ते-साङ्ख्ययोगदर्शनम्, पशुपतदर्शनम्, पाञ्चरात्रदर्शनं च, यन्निराकरणावसरेऽसमञ्जसत्वमात्रं सूत्रकारा निर्दिशन्ति, नात्यन्तमनपेक्षाम्। तद्यथा— ''विप्रतिषेधाच्चासमञ्जसमि''ति

साङ्ख्यमतनिराकरणावसरेऽसमञ्जसपदम्। ''पत्युरसामञ्जस्यादि'' त्यत्राप्यसामञ्जस्यपदम्। पाञ्चरात्राधिकरणेऽप्यन्तिमं सूत्रं ''विप्रतिषेधाच्चे''ति। इदं ''विप्रतिषेधाच्चासमञ्जसमि''ति प्रथमाधिकरणान्तिमसूत्रस्यैव प्रत्यभिज्ञापकम्, इति तदिवासामञ्जस्यमात्राभिप्रायेणैव प्रवृत्तमिति विज्ञायत इति द्वितीयाध्यायद्वितीयपादनिरस्येषु सूत्रकाराणामत्यन्तानादरस्थानानि कानिचन, किञ्चिदनादारस्थानानि कानिचनाधिकरणानीति निष्कर्षोऽवगम्यते। एतत्सूचनार्थमेवात्रार्हतमतनिरसनोपसंहारावसरे–सौगतमतमुपेक्ष्यमिति प्रयुक्तम्। तथा च सौगतवदिति दृष्टान्तो न सङ्गतिमात्रसूचनाय, किन्तु शिष्टापरिग्रहादत्यन्तमनपेक्षेत्यस्योभयत्रानुषङ्गसूचनायापीति मन्तव्यम्।।३६।। इति षष्ठं नैकस्मिन्नसंभवाधिकरणम्।।

इति प्रदीपः एकस्मिन्नसम्भवाधिकरणम् समाप्तम्

भामती

निरस्तो मुक्तकच्छानां सुगतानां समयः। विवसनानां समय इदानीं निरस्यते। तत्समयमाह संक्षेपविस्तराभ्याम् ***सप्त चैषां पदार्थाः सम्मता इति***। तत्र संक्षेपमाह ***संक्षेपतस्तु द्वावेव पदार्थाविति***। बोधात्मको जीवो जडवर्गस्त्वजीव इति। यथायोगं तयोर्जीवाजीवयो रिममपरं प्रपञ्चमाचक्षते। तमाह ***पञ्चास्तिकाया नामेति***। ***सर्वेषामप्येषामवान्तरप्रभेदानिति***। जीवास्तिकायस्त्रिधा-बद्धो मुक्तो नित्यसिद्धश्चेति। पुद्गलास्तिकायः षोढा-पृथिव्यादीनि चत्वारि भूतानि स्थावरं जङ्गमं चेति। धर्मास्तिकायः प्रवृत्त्यनुमेयोऽधर्मास्तिकायः स्थित्यनुमेयः। आकाशास्तिकायो द्वेधा-लोकाकाशोऽलोकाकाशश्चेति। तत्रोपर्युपरि स्थितानां लोकानामन्तवर्त्ती लोकाकाशस्तेषामुपरिमोक्षस्थानमलोकाकाशः। तत्र हि न लोकाः सन्ति। तदेवं जीवाजीवपदार्थौ पञ्चधा प्रपञ्चितौ। आस्रवसंवरनिर्जरास्त्रयः पदार्थाः प्रवृत्तिलक्षणाः प्रपञ्चयन्ते। द्विधा प्रवृत्तिः सम्यङ्मिथ्या च। तत्र मिथ्या प्रवृत्तिरास्रवः। सम्यक्प्रवृत्ती तु संवरनिर्जरौ। आस्त्रावयति पुरुषं विषयेष्वितीन्द्रियप्रवृत्तिरास्रवः। इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण परिणमत इति। अन्ये तु कर्माण्यास्त्रवमाहुः। तानि हि कर्त्तारमभिव्याप्य स्रवन्ति कर्त्तारमनुगच्छन्तीत्यास्त्रवः। सेयं मिथ्याप्रवृत्तिरनर्थहेतुत्वात्। संवरनिर्जरौ च सम्यक्प्रवृत्ती। तत्र शमदमादिरूपा प्रवृत्तिः संवरः। सा ह्यास्त्रवस्त्रोतसो द्वारं संवृणोतीति संवर उच्यते। निर्जरस्त्वनादिकालप्रवृत्तिकषांयकलुष-पुण्यप्रहाणहेतुस्तप्तशिलारोहणादिः। स हि निःशेषं पुण्यापुण्यं सुखदुःखोपभोगेन जरयतीति निर्जरः। बन्धोऽष्टविधं कर्म। तत्र धातिकर्म चतुर्विधम्। **तद्यथा**-ज्ञाना .वरणीयं दर्शनावरणीयं मोहनीयमन्तरायमिति। तथा चत्वार्यघातिकर्माणि। **तद्यथा**-वेदनीयं नामिकं गोत्रिकमायुष्कं चेति। तत्र सम्यग् ज्ञानं न मोक्षसाधनम्, नहि ज्ञानाद्वस्तुसिद्धिरतिप्रसङ्गादिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते। आर्हतदर्शनाभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयं कर्म। बहुषु विप्रतिषिद्धेषु तीर्थकरैरुपदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं कर्म मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमन्तरायं कर्म। तानीमानि श्रेयोहन्तृत्वाद्धातिकर्माण्युच्यन्ते। अघातीनि कर्माणि तद्यथा वेदनीयं कर्म

शुक्लपुद्गलविपाकहेतुः, तद्धि बन्धोऽपि न निःश्रेयसपरिपन्थि; तत्त्वज्ञानाविघातकत्वात्। शुक्लपुद्गलारम्भकवेदनीयकर्मानुगुणं नामिकं कर्म, तद्धि शुक्लपुद्गलस्याद्यावस्थां कललबुदबुदादिमारभते। गोत्रिकमव्याकृतम्। ततोऽप्याद्यं शक्तिरूपेणावस्थितम्। आयुष्कं त्वायुः कायति कथयत्युत्पादनद्वारेत्यायुष्कम्। तान्येतानि शुक्लपुद्गलाद्याश्रयत्वादघातीनि कर्माणि। तदेतत् कर्माष्टकं पुरुषं बन्धातीति बन्धः। विगलितसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मोक्ष इत्येके। अन्ये तूर्ध्र्वगमनशीलो हि जीवो धर्माधर्मास्तिकायेन बद्धस्तद्विमोक्षादूर्ध्वं गच्छत्येव स मोक्ष इति। त एते सप्तपदार्था जीवादयः सहावान्तरप्रभेदैरुपन्यस्ताः। तत्र ***सर्वत्र चेमं सप्तभङ्गीनयं नाम न्यायमवतारयन्ति, स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्च इति***। स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योती। यथाहुः-वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्। स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः ।।**इति**।। यदि पुनरयमनेकान्तद्योतकः स्याच्छब्दो न भवेत् स्यादस्तीतिवाक्ये स्यात्पदमनर्थकं स्यात्। **तदिदमुक्तम्**-'अर्थयोगित्वाद' इति। अनैकान्तद्योतकत्वे तु स्यादस्ति कथंचिदस्तीति स्यात्पदात्-कथञ्चिदर्थोऽस्तीत्यनेनानुक्तः प्रतीयत इति नानर्थक्यम्। तथा **च स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधेः। सप्तभङ्गनयापेक्षो हेयादेयविशेषकृत्॥**

किंवृत्ते प्रत्यये खल्वयं चिन्निपातविधिना सर्वथैकान्तत्यागात् सप्तस्वेकान्तेषु यो भङ्गस्तत्र यो नयस्तदपेक्षः सन् हेयोपादेयभेदाय स्याद्वादः कल्पते। तथा हि-यदि वस्त्वस्त्येवेत्येवैकान्ततस्तत् सर्वथा सर्वदा सर्वत्र सर्वात्मनाऽस्त्येवेति न तदीप्साजिहासाभ्यां क्वचित् कदाचित् कथञ्चित् कश्चित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वात्, हेयहानानुपपत्तेश्च। अनैकान्तपक्षे तु क्वचित् कदाचित् कस्यचित् सत्त्वे हानोपादाने प्रेक्षावतां कल्पेते इति। तमेनं सप्तभङ्गीनयं दूषयति ***नैकस्मिन्नसम्भवात्***। विभजते *न ह्येकस्मिन्धर्मिणि* परमार्थसति परमार्थसतां ***युगपत्सत्त्वादीनां धर्माणां*** परस्परपरिहारस्वरूपाणां **समावेशः सम्भवति**। **एतदुक्तं भवति**-सत्यं यदस्ति वस्तुतस्तत्सर्वथा सर्वदा सर्वत्र सर्वात्मना निर्वचनीयेन रूपेणास्त्येव, न नास्ति, यथा प्रत्यगात्मा। यत्तु क्वचित् कथञ्चित् कदाचित् केनचिदात्मनाऽस्तीत्युच्यते यथा प्रपञ्चः; तद्व्य व्यवहारतो न तु परमार्थतः तस्य विचारासहत्वात्। न च प्रत्ययमात्रं वास्तवत्वं व्यवस्थापयति; शुक्तिमरुमरीचिकादिषु रजततोयादेरपि वास्तवत्वप्रसङ्गात्, लौकिकानामबाधेन तु तद्व्यवस्थायां देहात्माभिमानस्याप्यबाधेन तात्त्विकत्वे सति लोकायतमतापातेन नास्तिकत्वप्रसङ्गात्। पण्डितरूपाणां

तु देहात्माभिमानस्य विचारतो बाधनं प्रपञ्चस्याप्यनैकान्तस्य तुल्यमिति। **अपि च** सदसत्त्वयोः परस्परविरुद्धत्वेन समुच्चयाभावे विकल्पः। न च वस्तुनि विकल्पः सम्भवति। तस्मात् स्थाणुर्वा पुरुषो वेति ज्ञानवत् सप्तत्वपञ्चत्वनिर्धारणस्य फलस्य निर्धारयितुश्च प्रमातुस्तत्करणस्य प्रमाणस्य च तत्प्रमेयस्य च सप्तत्वपञ्चत्वस्य सदसत्त्वसंशये साधु समर्थितं तीर्थकरत्वमृषभेणात्मनः। निर्धारणस्य चैकान्तसत्त्वे सर्वत्र नानेकान्तवाद इत्याह ***य एते सप्त पदार्था इति***। शेषमतिरोहितार्थम्।।३३।।

एवं चेति चेन समुच्चयं द्योतयति। शरीरपरिमाणत्वे ह्यात्मनोऽकृत्स्नत्वं परिच्छिन्नत्वम्, तथा चानित्यत्वं। ये हि परिच्छिन्नास्ते सर्वेऽनित्या यथा घटादयस्तथा चात्मेति। तदेतदाह ***यथैकस्मिन् धर्मिणीति***। इदं चापरमकृत्स्नत्वेन सूचितमित्याह ***शरीराणां चानवस्थितपरिमाणत्वादिति***। मनुष्यकायपरिमाणो हि जीवो न हस्तिकायं कृत्स्नं व्याप्तमर्हत्यल्पत्वादित्यात्मनः कृत्स्नशरीराव्यापित्वादकात्स्न्र्यम्, तथा च न शरीरपरिमाणत्वमिति। तथा हस्तिशरीरं परित्यज्य यदा पुत्तिकाशरीरो भवति, तदा न तत्र कृत्स्नः पुत्तिकाशरीरे सम्मीयेतेत्यकात्स्न्र्यमात्मनः। सुगममन्यत्! चोदयति ***स्यादेतत्***। ***अनन्तावयव इति***। यथा हि प्रदीपो घटमहाहर्म्योदरवर्ती सङ्कोचविकासवानेवं जीवोऽपि पुत्तिकाहस्तिदेहयोरित्यर्थः। तदेतद्विकल्प्य दूषयति *तेषां पुनरनन्तानामिति*। न तावत्प्रदीपोऽत्र निदर्शनं भवितुमर्हति, अनित्यत्वप्रसङ्गात्। विशरारवो हि प्रदीपावयवाः, प्रदीपश्चावयवी प्रतिक्षणमुत्पत्तिनिरोधधर्मा, तस्मादनित्यत्वात्तस्य नास्थिरो जीवस्तदवयवाश्चाभ्युपेतव्याः। तथा च विकल्पद्वयोक्तं दूषणमिति। यच्च जीवावयवानामनन्त्यमुदितं तदनुपपन्नतरमित्याह ***अपि च शरीरमात्रेति***।।३४।। शङ्कापूर्वं सूत्रान्तरमवतारयति ***अथ पर्यायेणेति***। तत्राप्युच्यते-न च पर्यायादप्यविरोधो विकारादिभ्यः।

कर्माष्टकमुक्तं ज्ञानावरणीयादि। किंचात्मनो नित्यत्वाभ्युपगमे आगच्छतामपगच्छतां चावयवानामियत्ताऽनिरूपणेन चात्मज्ञानाभावान्नापवर्ग इति भावः। ***अत एवमादिदोष-प्रसङ्गादिति***। आदिग्रहणसूचितं दोषं ब्रूमः-किंचैते जीवावयवाः प्रत्येकं वा चेतयेरन् समूहो वा। तेषां प्रत्येकं चैतन्ये बहूनां चेतनानामेकाभिप्रायत्वनियमाभावात् कदाचिद्विरुद्धदिक्क्रियत्वेन शरीरमुन्मथ्येत। समूहचैतन्ये तु हस्तिशरीरस्य पुत्तिकाशरीरत्वे द्वित्रावयवशेषी जीवो न चेतयेत्। विगलितबहुसमूहिततया समूहस्याभावात्*पुत्तिकाशरीरे इति*। ***अथवेति***। पूर्वसूत्रप्रसञ्जितायां जीवानित्यतायां बौद्धवत्सन्ताननित्यतामाशङ्क्येदं सूत्रम्-'**न च पर्य्यायादप्यविरोधो विकारादिभ्यः**'। न च पर्यायात् परिमाणानवस्थानेऽपि सन्तानाभ्युपगमेनात्मनो नित्यत्वादविरोधो

बन्धमोक्षयोः। कुतः? परिणामादिभ्यो दोषेभ्यः। सन्तानस्य वस्तुत्वे परिणामस्ततश्च वर्मवदनित्यत्वादिदोषप्रसङ्गः। अवस्तुत्वे चादिग्रहणसूचितो नैरात्म्यापत्तिदोषप्रसङ्ग इति। **विसिचो** विवसनाः॥३५॥

एवं हि मोक्षावस्थाभावि जीवपरिमाणं नित्यं भवेत्, यद्यभूत्वा न भवेत्। अभूत्वा भाविनामनित्यत्वाद्धटादीनाम्। कथं चाभूत्वा न भवेद्यदि प्रागप्यासीत्। न च परिमाणान्तरावरोधेऽपूर्वं भवितुमर्हति तस्मादन्त्यमेव परिमाणं पूर्वमप्यासीदित्यभेदः। तथा चैकशरीरपरिमाणतैव स्यान्नोपचितापचितशरीरप्राप्तिः शरीरपरिमाणत्वाभ्युपगमव्याघातादिति। अत्र चोभयोः परिमाणयोर्नित्यत्वप्रसङ्गादिति योजना। एकशरीरपरिमाणतैवेति च दीप्यत्। द्वितीये तु व्याख्याने उभयोरवस्थयोरिति योजना। एकशरीरपरिमाणता न दीप्या, किन्त्वेकपरिमाणतामात्रमणुर्महान् वेति विवेकः॥३६॥

इति भामती एकस्मिन्नसम्भवाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। **नैकस्मिन्नसंभवात्**।।३१।।

गता हि बौद्धाः। जैनमतं निरस्यते–

जैना हि सप्तभङ्गीन्यायेनैकस्मिन्नपि वस्तुनि नानाभावमुपपादयन्ति। तदेतेषां मतं युक्तं न वेति विचारः।।

एवं तेषां प्रक्रिया–जीवोऽजीवश्चेति द्वौ पदार्थौ। जीवश्चेतनः शरीरपरिमाणः सावयवः। अजीवः षड्विधः। वनमहीधरादिरेकः। आस्रवसंवरनिर्जरबन्धमोक्षाख्याः पञ्च। आस्त्रवत्यनेन जीवो विषयेष्वित्यास्त्रव इन्द्रियसंघातः। संवृणोति विवेकमित्यविवेकादिः संवरः। निश्शेषं जीर्यत्यनेन कामक्रोधादिरिति केशोल्लुञ्छनतप्तशिलारोहणादि तपो निर्जरः। कर्माष्टकेनापादिता जन्मपरंपरा बन्धः। चत्वारि घातिकर्माणि पापरूपाणि। चत्वार्यघातिकर्माणि पुण्यरूपाणि। तेभ्यो मुक्तस्य जीवस्य सततोर्ध्वगमनं मोक्षः। एते सप्त पदार्थाः सप्तभङ्गीन्यायेन व्यवस्थाप्याः। स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति चावक्तव्यं, स्यान्नास्ति चावक्तव्यं, स्यादस्ति च नास्ति चावक्तव्यम्, इति सप्तभङ्गीन्यायः। स्याच्छब्द ईषदर्थः। अतः सप्तभङ्गीन्यायात् सप्तपदार्थसिद्धिरिति।।

एतदयुक्तम्। कुतः? एकस्मिन् वस्तुनि सत्त्वासत्त्वनित्यत्वानित्यत्वभेदाभेदादीनामसंभवात्। पर्यायभाविनश्च द्रव्यस्यास्तित्वनास्तित्वादिशब्दबुद्धिविषयाः परस्परविरुद्धाः पिण्डत्वघटत्वकपाल-त्वाद्यवस्थावत् युगपन्न संभवन्ति। अतो विरुद्ध एव जैनवादः।।

।।सू।। **एवं चात्माकात्स्र्न्यम्**।।३२।।

एवं च आत्माकात्स्र्न्यं चानुपपन्नम्। आत्मनः शरीरपरिमाणत्वे हि बृहतश्शरीरादल्पीयसि प्रविशतो विकलत्वं प्रसज्येत। अत आत्मनः शरीरपरिमाणत्वमयुक्तमेव।।

।।सू।। **न च पर्यायादप्यविरोधो विकारादिभ्यः**।।३३।।

तथाविधाल्पत्वावस्थान्तरयोगादप्यविरोधो न संभवति; घटादिवद्विकारादिदोषप्रसङ्गात्।।

।।सू।। **अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः**।।३४।।

अन्त्यस्य मोक्षदशापरिमाणस्यैकरूपावस्थितेस्तस्य स्वाभाविकत्वेनात्मतत्परिमाणयोरुभयोरपि नित्यतया पूर्वावस्थायामप्यविशेषः। विविधदेहपरिमाणत्वे हि वैकल्यं भवेदेव। अत एकस्मिन् सत्त्वासत्त्वादिवादात् आत्मनः शरीरपरिमाणवादाच्च जैनमतमपि विरुद्धमेव।। इत्येकस्मिन्नसंभवाधिकरणम्।।७।।

इति श्री कण्ठभाष्य एकस्मिन्नसम्भवाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सू०।। **नैकस्मिन्नसंभवात्**।।३१।। बौद्धमतनिरासानंतरमवशिष्टावैदिकमतनिरास इति संगतिमाह-**गता इति**। 'स्यादस्ती' त्यादिना वक्ष्यमाणः सप्तभंगीन्यायः। तस्य प्रथमसूत्रेण दूषणं क्रियते। द्वितीयादिसूत्रैर्जीवानां जैनाभिमतस्य देहपरिमाणत्वस्य। तद्दूषणं जैनपरिगणितानां जीवादीनां सर्वेषामपि पदार्थानां तदभिमतप्रकारदूषणस्योपलक्षणम्। तत्तु शिष्यैरूहनीयमिति सूत्रकृता न प्रदर्शितम्। तत्स्वरूपावगतौ तत्र दूषणं शिष्यैः स्वयमेवोहितुं शक्यमिति तत्परिगणितान् जीवादिपदार्थान् संग्रहेण उपन्यस्यति-**एवं तेषामिति**। **वनमहीधरादिरिति**। जीवभोग्यस्य सर्वस्य वस्तुजातस्य उपलक्षणम्। **आस्रवतीति**। विषयेन्द्रियसंबधवशात् जीवस्य रूपादिज्ञानपरिणामित्वमास्त्रवणम्। केचित्तु आस्रवति जीवे गच्छति स्वयमपि सर्वत्रानुगच्छतीति कर्मबन्ध आस्रव इत्याहुः। तदाह जिनदत्तः -'आस्रवः कर्मणा बन्धो निर्जरस्तद्विमोचनम'। इति। **संवृणोति विवेकमिति**। अन्ये तु संवृणोतींद्रियप्रवृत्तिमिति गुप्तिसमित्यादिकं मोक्षकारणं संवर इत्याचक्षते। यदाहुः -'आस्त्रवः स्रोतसां द्वारं संवृणोतीति संवरः। आस्त्रवो भवहेतुः स्यात् संवरो मोक्षकारण' मिति कायवाङ्मनोनिग्रहो गुप्तिरिति जैनैः परिभाष्यते। भूमिगतजंतुहिंसापरिहाराय प्रहते मार्गे सम्यगादित्यरश्मिप्रकाशिते निरीक्ष्य संचरणं मितभाषणं नियताहारनिषेवणमित्यादिकं समितिरिति परिभाष्यते। **कामक्रोधादिरिति**। आदिशब्देन तन्मूलयोः पुण्यपापयोः ग्रहणम्। **चत्वारीति**। ज्ञानदर्शनसुखवीर्यगुणकस्य जीवस्य ज्ञानादीनां चतुर्णां गुणानां मोक्षदशायामाविर्भविष्यतां संसारदशायां प्रतिघातकानि प्रवाहानादीनि चत्वारि पापरूपाणि घातिकर्माणि शरीरसंस्थानतदभिमानतत्स्थितितत्प्रयुक्तसुखादिनिमित्तानि चत्वार्यघातिकर्माणि पुण्यमिश्रित-त्वात्पुण्यरूपाणि। **सततोर्ध्वगमनमिति।** बन्धमुक्तस्य ह्यूर्ध्वगमनं स्वभावः। यथा पंजरमुक्तस्य शुकस्य। यथा वा निर्भिण्णस्य परिणतैरण्डबीजस्य। यथा वा दृढपंकलिप्तस्य जलनिमज्जनप्रक्षीणपंकलेपस्य शुष्कालाबुनः। इह त्वनादिकालप्रवृत्तबन्धविगमात्सततोर्ध्वगमनम्। तन्मते लोकाकाशस्योपर्युपरि स्थितानां लोकानामंतर्वर्तित्वेऽपि तेषामुपरि स्थितो निरवधिः

अलोकाकाशः सततोर्ध्वगमनस्यावकाशः। तथा पठन्ति -'गत्वा गत्वा निवर्तंते चंद्रसूर्यादयो ग्रहाः। अद्यापि न निवर्तंते त्वलोकाकाशमार्गगाः।' इति। अन्ये तु विगतसमस्तक्लेशतद्वासनस्यानावरणज्ञान-दर्शनसुखवीर्यस्यात्मन उपरिदेशावस्थानं मुक्तिरित्याहुः। **सप्तभंगीन्यायेनेति**। सप्तानां भंगानां प्रकाराणां सत्त्वादिनियमभंगानां वा समाहारः सप्तभंगी। के ते सप्त भंगाः तानाह-**स्यादस्तीति**। सत्त्वासत्त्वसदसत्त्वसदसद्विलक्षणत्वरूपानिर्वचनीयत्वविषयाश्चत्वारः पक्षाः। पुनश्चानिर्वचनीयत्वे सत्त्वासत्त्वसदसत्त्वमेलनैस्त्रयः पक्षा इत्येवं सप्त पक्षा वादिभिरुत्प्रेक्षितुं शक्याः। सर्वेऽपि ते पक्षाः जैनेरीषदीषत् स्वांगीकृतेषु सर्वेष्वपि पदार्थेषु अंगीक्रियन्ते। अत्र स्याच्छब्दस्यार्थमाह-**स्यादिति**। अनैकान्त्यार्थ इति केचित्। उभयथापि तिङन्तप्रतिरूपकोयमव्ययशब्दः फलतस्त्वेकार्थः। सत्त्वे प्रदर्शितस्य सप्तभंगीन्यायस्य नित्यत्वभिन्नत्वादिधर्मान्तरेष्वपि योजनमभिप्रेत्योपसंहरति-**अत इति**। सप्तभंगीन्यायो न युक्तः। एकस्मिन्वस्तुनि विरुद्धानेकधर्मसमावेशासंभवादिति सूत्रार्थमाविष्कुर्वन् सिद्धांतयति-**एतदयुक्तमिति**। नन्वेकस्मिन्नपि देशकालाद्युपाधिभेदेन यथा सत्त्वासत्त्वादिविरुद्धधर्म-समावेशः तथोपाधिभेदं विनाप्यस्तु। तत्र लोकसिद्धानि प्रमाणानि सन्तीति चेदिहापि सन्त्येव प्रपञ्चसत्यत्वासत्यत्वादिकं व्यवस्थापयद्भिस्तैस्तैर्वादिभिरुपपादितानि प्रमाणानीत्याशंक्याह-**पर्यायभाविनश्चेति**। सत्त्वासत्त्वादयः पिंडत्वघटत्वादिवत् पर्यायभाविन एव लोकानुभवसिद्धाः। यानि तु वादिभिरुपन्यस्तान्यपर्यायेण सत्त्वासत्त्वादिकमुपनयन्ति तानि सर्वाण्यपि प्रमाणानीत्येतन्न संभवति। परस्परविरोधेन केषांचिदाभासत्वावश्यंभावात्। अन्यथा प्रपञ्चसत्यत्वादिवादि-भिस्तदसत्यत्वाभ्युपगमे दोषाणामप्युच्यमानत्वेन तेषामप्यनुरोध्यत्वापत्त्या अनेकान्तवादिनः तत्तद्वाद्युक्तदोषभाक्तवस्यापि प्रसंगादिति भावः। एतेन यदुक्तं स्याद्वादमञ्जर्याम्-'अन्योन्यपक्षप्रतिपक्षभावाद्यथा परे मत्सरिणः प्रवादाः। नयानशेषानविशेषमिच्छन्न पक्षपाती समयस्तथा नः।।' इति तन्निरस्तम्। अपक्षपातेन समस्तसमयोक्तसत्त्वादिविशेषाभ्युपगमे तत्तदुद्भावितासत्त्वादिपक्षदोषाणामप्यभ्युपगन्तव्यत्वापत्तेः। अर्धजरतीये नियामकाभावात्। ननु तर्हि लोकाविरोधेनैव सप्तभंगीनयं समर्थयामहे। सर्वसंप्रतिपन्ने तावदेकस्य कालभेदेन सत्त्वासत्त्वे। अतस्तयोः स्वस्वकालविवक्षया अस्ति नास्तीति भगंद्वयमुपपद्यते। क्रमविवक्षया सदसदिदमिति तृतीयभंगो युज्यते। युगपत्सत्त्वासत्त्वविवक्षयाऽनिर्वचनीयमिति चतुर्थभंगो घटते। न हि युगपदेकस्य सत्त्वमसत्त्वं च निर्वक्तुं शक्यम्। युगपत्सत्त्वासत्त्वयोरनिर्वचनीयत्वेन सहसत्त्वस्यासत्त्वस्य क्रमिकोभयस्य च मेलने अवशिष्टं भंगत्रयं संपद्यते। तदाहानन्तवीर्यः-'तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते।। क्रमेणोभयवांछायां प्रयोगस्समुदायभाक्। युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः।। आद्यावाच्यविवक्षायां पञ्चमो भंग इष्यते।

अंत्यावाच्यविवक्षायां षष्ठभंगसमुद्भवः।। समुच्चयेन युक्तश्च सप्तमो भंग उच्यते'। इति। यद्येवं पारिभाषिकोऽयं सप्तभंगीनयः स्वीक्रियत एव। घटादिः स्वदेशेऽस्ति अन्यदेशे नास्ति स्वकालेऽस्ति अन्यकाले नास्ति स्वात्मनास्ति अन्यात्मना नास्तीति देशकालप्रतियोगिरूपोपाधिभेदेन सत्त्वासत्त्वसमावेशे लौकिकपरीक्षकाणां विसंप्रतिपत्त्यभावात्। न चैतावता पराभिमतं वस्त्वनैकान्त्यमापद्यते। स्वकाले सदेव अन्यकाले असदेव इत्यदिनियमस्य भंगाभावात्। ननु, वस्तुतो देशकालाद्युपाधिभेदो नापेक्ष्यते। स देश इह नास्ति स काल इदानीं नास्तीत्यादिप्रतीतौ देशकालाद्युपाध्यंतराभावात्। तत्राप्युपाध्यंतरान्वेषणेऽनवस्थानात्। इतरानंगीकारयितुं परं गुडजिह्विकान्यायेन देशकालाद्युपाधिभेदमंतर्भाव्य सत्त्वासत्त्वप्रतीतिरुपन्यस्यते। वस्तुतो विमृश्यमाना सा निरुपाधिकैव सत्त्वासत्त्वादिसंकरे प्रमाणम्। अत एव स्याद्वादिनो 'घटोऽस्ति घटो नास्ति पटस्सन् पटोऽसन्' इत्यादिप्रत्यक्षप्रतीतिमेव सत्त्वासत्त्वाद्यनैकान्त्ये प्रमाणमुपगच्छंति। सर्वमनैकांतिकं वस्तुत्वात् चित्रपटवदित्यनुमानमपि प्रमाणयन्ति। न हि चित्रपटे नीलपीताद्यसंकारार्थं प्रदेशभेद आश्रयितव्यः। प्रदेशभेदासंकरार्थमुपाध्यंतरान्वेषणे अनवस्थानात्। एतेन संयोगतदभावाद्यसंकरोऽपि प्रत्याख्यातः। तस्मात्सर्वं वस्त्वनैकांतिकमेवेति स्याद्वादरहस्यमिति चेत् उच्यते। परस्परविरुद्धधर्मसमावेशे सर्वानुभवसिद्धस्तावदुपाधिभेदो नापह्नोतुं शक्यते। लोकमर्यादामनतिक्रममाणेन देशकालादिसत्त्वनिषेधेऽपि देशकालाद्युपाध्यवच्छेदः अनुभूयत एव। इहात्माश्रयः परस्पराश्रयः अनवस्था वा न दोषः। यथा प्रमेयत्वाभिधेयत्वादिवृत्तौ यथा च बीजांकुरादिकार्यकारणभावे विरुद्धधर्मसमावेशे। सर्वथोपाधिभेदं प्रत्याचक्षाणस्य चायमस्याः पुत्रः अस्याः पतिः अस्याः पिता अस्याश्श्वशुर इत्यादिव्यवस्थापि न सिद्ध्येदिति कथं तत्र तत्र स्याद्वादे मातृत्वाद्युचितव्यवहारान् व्यवस्थयानुतिष्ठेत्। तस्मात्सर्वबहिष्कार्योऽयमनेकान्तवाद इत्यलं विस्तरेण। इत्थं जैनाभिमतः स्याद्वादो दूषितः। अथ तदभिमतेषु पदार्थेषु प्रथमपरिगणितस्य जीवस्य देहपरिमाणत्वं तदुक्तमुत्तरसूत्रैर्दूष्यते। तद्धि सर्वांगीणसुखादियुक्त्याभासोपनीतम्। तस्मिन्दूषिते प्रक्रियामात्रसिद्धमन्यत्सर्वं स्वयमेव दूषितं भवतीति। न हि जीवधर्माधर्मपुद्गलकालाकाशादीनि षड्द्रव्याणि; एतेषु पुद्गलांतर्गतान् परमाणून् कालं चाणुमपहाय जीवो धर्माधर्मौ परमाणुव्यतिरिक्ता महाभूतचतुष्टयस्थिरत्रसरूपेण षड्विधाः पुद्गला आकाशश्चेत्येते पंचास्तिकायाः। जीवाजीवास्रवादयस्सप्त मोक्षोपायत्वेनाधिगन्तव्या' इत्यादिविभागे सिद्धांत्यभिमतपशुपाशादिविभागे श्वेताश्वतरोपनिषदादिवत् किमपि श्रद्धेयं प्रमाणमस्ति। सर्वज्ञप्रणीतागममूलकत्वकल्पनायाः 'कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा। तावुभौ यदि सर्वज्ञौ मतभेदः कथं भवे'दिति न्यायेनानादरणीयत्वात्। नाप्येवंभूता विभागाः तप्तशिलारोहणादिव्रतानि च कयाचन युक्त्योपनेतुं शक्यन्ते। तस्माद्युक्त्याभासावलंबनमात्मनो देहपरिमाणत्वमात्रमिह दूष्यते-सू।। **एवं**

चात्माकात्स्न्र्यम्।।३२।। यथैकस्मिन्सत्त्वासत्त्वादिविरुद्धधर्मसंकरोऽनुपपन्नः एवमात्माकात्स्न्र्यमप्यनुपपन्नमिति सूत्रार्थं दर्शयति-**एवमिति**। एवंशब्देन सत्त्वासत्त्वादिसंकरवत्सूत्रकण्ठोक्तिगृहीतात्माकात्स्न्र्यव्यतिरिक्तमन्यदप्येवंप्रकारं जिनमतकल्पितमनुपपन्नमिति सूच्यते। किं तदकात्स्न्र्यं यदनुपपन्नमिति प्रतिज्ञायते कुतश्च तदनुपपन्नमित्याकांक्षायामाह-**आत्मनश्शरीरपरिमाणत्वे हीति**। अनेन शरीरपरिमाणत्वमकात्स्न्र्यं विवक्षितम्। तदनुपपत्तौ च मातंगदेहान्मशकदेहं प्रविशतस्तत्रामांतमंशं विहाय प्रवेशः स्यादिति जीवस्य पूर्वावस्थातो विकलत्वं प्रसज्येत। एवं मशकदेहान्मातंगदेहं प्रविशतस्तव्द्यापनसमर्थपरिमाणं नास्तीति तत्र तस्य सर्वांगीणसुखादिकं न स्यादित्येवंरूपो हेतुर्विवक्षित इति दर्शितं भवति। अकात्स्न्र्यशब्देन देहपरिमाणत्वमुपाददानेन दूषणांतरमपि विवक्षितम्। यदि तत्तद्देहपरिमाणो जीवस्तदा योगसिद्धस्य कायव्यूहपरिग्रहे कृत्स्नदेहव्यापित्वं नास्तीति तस्यानेककायाधिष्ठातृत्वं न स्यादिति घटमणिकगृहोदरादिगतप्रदीपप्रभावत् जीवस्य संकोचविकासरूपावस्थाविशेषशालित्वं स्यादित्याशंकापरिहारार्थं सूत्रम्-सू०।। **न च पर्यायादप्यविरोधो विकारादिभ्यः**।।३३।। परमते पर्यायशब्दोऽवस्थासु पारिभाषिकः। **अल्पत्वेति**। गजशरीरान्मशकशरीरप्रवेशे इदमुक्तम्। वैपरीत्ये तु महत्त्वमवस्थांतरं द्रष्टव्यम्। **विकारादीति**। विकारो जन्म विनाशश्च। वैपरीत्ये तु महत्त्वमवस्थांतरं द्रष्टव्यम्। विकारादीति। विकारो जन्म विनाशश्च। आदिशब्देन सावयवत्वादिकं गृह्यते। जीवस्य देहपरिमाणत्वाभावे युक्त्यंतरमुच्यते-सू०।। **अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः**।।३४।। मोक्षदशायां यज्जीवस्य परिमाणं तदन्त्यम्। तस्य तथैवावस्थानं भवति। तदनंतरं देहान्तराभावेन देहान्तरोचितपरिमाणान्तराप्रसक्तेः। अतो यथा मोक्षदशावस्थितमेव जीवस्वरूपं पूर्वमप्येवं तत्परिमाणमपि तदेव इत्यविशेषोंऽगीकर्त्तुं युक्तः। जीववत्तत्परिमाणस्यापि मोक्षदशापन्नस्यादेहोपाधिकस्य नित्यत्वादिति सूत्रार्थमाह-**अन्त्यस्येति**। सिद्धान्ते चिच्छक्तेस्संसारदशायां संकोचविकासशालित्वेऽपि न स्वरूपतो जन्मविनाशौ न वा सावयवत्वादिकम्। मोक्षदशायां व्यापित्वेऽपि न पूर्वं तत्परिमाणमिति व्यवस्थायां जैनाभिमतजीवोक्तदोषो न भविष्यति। 'श्रुतेस्तु शब्दमूलत्वा' दिति न्यायात्। जैनानां तु दृष्टानुसारेण कल्पयतां जीवस्य तथैव सावयवत्वादिकमपि स्यात्। तथाभूतानामेव प्रभादीनां संकोचविकासदर्शनात्। तथा मोक्षदशापन्नपरिमाणमेव प्रागपि स्वाभाविकं स्यात्। जीवस्वरूपे तथादर्शनात् इति दोषः प्रसज्यते। एवमेव ह्यग्रिमाधिकरणे स्वाभिमतस्यैव श्रुतिसिद्धस्य परमेश्वरस्यानुमानिकत्वांगीकारेऽधिष्ठातृत्वानुपपत्तिर्वक्ष्यते।। **इत्येकस्मिन्नसंभवाधिकरणम्**।।७।।

इति शिवार्कमणिदीपिका एकस्मिन्नसम्भवाधिकरणम् समाप्तम्

अथ पत्यधिकरणम्।

शाङ्करभाष्यम्

***पत्युरसामञ्जस्यात्*।।३७।।**

इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते।। तत्कथमवगम्यते? ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'', ''अभिध्योपदेशाच्च'' (ब्र० १/४/२३-२४) इत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापितत्वात्। यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत, पूर्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत्। तस्मादप्रकृतिः अधिष्ठाता, केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदान्तविहितब्रह्मैकत्वप्रतिपक्षत्वाद् यत्नेनात्र प्रतिषिध्यते।।

सा चेयं वेदबाह्येश्वरकल्पनाऽनेकप्रकारा। केचित् तावत्साङ्ख्ययोगव्यपाश्रयाः कल्पयन्ति–प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः, इतरेतरविलक्षणाः प्रधान पुरुषेश्वराः–इति। माहेश्वरास्तु मन्यन्ते–कार्य कारण योग विधि-दुःखान्ताः पञ्च पदार्थाः पशुपतिनेश्वरेण पशु पाशविमोक्षणायोपदिष्टाः, पशुपतिरीश्वरो निमित्तकारणमिति–वर्णयन्ति। तथा वैशेषिकादयोऽपि केचित्–कथञ्चित्स्वप्रक्रियानुसारेण निमित्तकारणमीश्वर इति–वर्णयन्ति। अत उत्तरमुच्यते–पत्युरसामञ्जस्यादिति।।

पत्युः=ईश्वरस्य प्रधान पुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते; कस्मात्? असामञ्जस्यात्। किं पुनरसामञ्जस्यम्? हीन-मध्यमोत्तमभावेन हि प्राणिभेदान्विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्मापेक्षितत्वाददोष इति चेत्, न; कर्मेश्वरयोः प्रवर्त्यप्रवर्तयितृत्व इतरेतराश्रयदोषप्रसङ्गात्। न; अनादित्वादिति चेत्, न; वर्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषादन्धपरम्परान्यायापपत्तेः। अपि च ''प्रवर्तनालक्षणा दोषाः'' (न्यायसू० १/१/१८) इति न्यायवित्समयः। न हि कश्चिददोषप्रयुक्तः स्वार्थे परार्थे वा प्रवर्तमानो दृश्यतेः स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसङ्गात्, पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्य, पुरुषस्य चौदासीन्याभ्युपगमादसामञ्जस्यम्।।३७।।

***सम्बन्धानुपपत्तेश्च*॥३८॥**

पुनरप्यसामञ्जस्यमेव। न हि प्रधान पुरुषव्यतिरिक्त ईश्वरोऽन्तरेण सम्बन्धं प्रधान पुरुषयोरीशिता। न तावत्संयोगलक्षणः सम्बन्धः सम्भवति, प्रधानपुरुषेश्वराणां सर्वगतत्वात्, निरवयवत्वाच्च। नापि समवायलक्षणः सम्बन्धः ; आश्रयाश्रयिभावानिरूपणात्। नाप्यन्यः कश्चित्कार्यगम्यः सम्बन्धः शक्यते कल्पयितुम्; कार्य-कारणभावस्यैवाद्याप्यसिद्धत्वात्॥ ब्रह्मवादिनः कथमिति चेत्, न; तस्य तादात्म्यलक्षणसम्बन्धोपपत्तेः। अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति, नावश्यं तस्य यथादृष्टमेव सर्वमभ्युपगन्तव्यमिति नियमोऽस्ति, परस्य तु दृष्टान्तबलेन कारणादिस्वरूपं निरूपयतो यथादृष्टमेव सर्वमभ्युपगन्तव्यमित्ययमस्त्यतिशयः॥

परस्यापि सर्वज्ञप्रणीतागमसद्भावात्समानमागमबलमिति चेत्, न; इतरेतराश्रयत्वप्रसङ्गात्-आगमप्रत्ययात्सर्वज्ञत्वसिद्धिः, सर्वज्ञप्रत्ययाच्चागमसिद्धिः-इति। तस्मादनुपपन्ना साङ्ख्ययोगवादिनामीश्वरकल्पना। एवमन्यास्वपि वेदबाह्यास्वीश्वरकल्पनासु यथासम्भवमसामञ्जस्यं योजयितव्यम्॥३८॥

***अधिष्ठानानुपपत्तेश्च*॥३९॥**

इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य। स हि परिकल्प्यमानः कुम्भकार इव मृदादीनि प्रधानादीन्यधिष्ठाय प्रवर्तयेत्। न चैवमुपपद्यते। न ह्यप्रत्यक्षं रूपादिहीनं च प्रधानमीश्वरस्याधिष्ठेयं सम्भवति; मृदादिवैलक्षण्यात्॥३९॥

***करणवच्चेन्न भोगादिभ्यः*॥४०॥**

स्यादेतत्-यथा करणग्रामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनं च पुरुषोऽधितिष्ठति एवं प्रधानमपीश्वरोऽधिष्ठास्यतीति? तथापि नोपपद्यते। भोगादिदर्शनाद्धि करणग्रामस्याधिष्ठितत्वं गम्यते। न चात्र भोगादयो दृश्यन्ते। करणग्रामसाम्ये वाभ्युपगम्यमाने संसारिणामिवेश्वरस्यापि भोगादयः प्रसज्येरन्॥४०॥

अन्यथा वा सूत्रद्वयं व्याख्यायते- *अधिष्ठानानुपपत्तेश्च*॥३९॥ इतश्चानुपपत्तिस्तार्किक-परिकल्पितस्येश्वरस्य। साधिष्ठानो हि लोके सशरीरो राजा राष्ट्रस्येश्वरो दृश्यते, न निरधिष्ठानः। अतश्च तद्दृष्टान्तवशेनादृष्टमीश्वरं कल्पयितुमिच्छत ईश्वरस्यापि किञ्चिच्छरीरं करणायतनं वर्णयितव्यं स्यात्। न च तद्वर्णयितुं शक्यते; सृष्ट्युत्तरकालभावित्वाच्छरीरस्य प्राक्सृष्टेस्तदनुपपत्तेः। निरधिष्ठानत्वे चेश्वरस्य प्रवर्तकत्वानुपपत्तिः ; एवं लोके दृष्टत्वात्॥

कारणवच्चेन्न भोगादिभ्यः॥४०॥ अथ लोकदर्शनानुसारेणेश्वरस्यापि किञ्चित्करणानामायतनं

शरीरं कामेन कल्प्येत, एवमपि नोपपद्यते। सशरीरत्वे हि सति संसारिवद्भोगादिप्रसङ्गादीश्वरस्याप्यनीश्वरत्वं प्रसज्येत।।४०।।

***अन्तवत्त्वमसर्वज्ञता वा*।।४१।।**

इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य। स हि सर्वज्ञस्तैरभ्युपगम्यतेऽनन्तश्च। अनन्तं च प्रधानम् अनन्ताश्च पुरुषा मिथो भिन्ना अभ्युपगम्यन्ते। तत्र सर्वज्ञेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्येत वा, न वा परिच्छिद्येत। उभयथाऽपि दोषोऽनुषक्त एव।।

कथम्? पूर्वस्मिंस्तावद्विकल्प इयत्तापरिच्छिन्नत्वात्प्रधान पुरुषेश्वराणामन्तवत्त्वमवश्यं भावि; एवं लोके दृष्टत्वात्। यद्धि लोक इयत्तापरिच्छिन्नं वस्तु पटादि, तदन्तवद् दृष्टम्; तथा प्रधान पुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादन्तवत्स्यात्। सङ्ख्यापरिमाणं तावत्प्रधानपुरुषेश्वरत्रयरूपेण परिच्छिन्नम्। स्वरूपपरिमाणमपि तद्गतमीश्वरेण परिच्छिद्येतेति। पुरुषगता च महासङ्ख्या। ततश्चेयत्तापरिच्छिन्नानां मध्ये ये संसारिणः संसारान्मुच्यन्ते, तेषां संसारोऽन्तवान् संसारित्वं च तेषामन्तवत्। एवमितरेष्वपि क्रमेण मुच्यमानेषु, संसारस्य संसारिणां चान्तवत्त्वं स्यात्। प्रधानं च सविकारं पुरुषार्थमीश्वरस्याधिष्ठेयं संसारित्वेनाभिमतम्, तच्छून्यतायामीश्वरः किमधितिष्ठेत्? किंविषये वा सर्वज्ञतेश्वरते स्याताम्? प्रधान-पुरुषेश्वराणां चैवमन्तवत्त्वे सत्यादिमत्त्वप्रसङ्गः। आद्यन्तवत्त्वे च शून्यवादप्रसङ्गः। अथ-मा भूदेष दोषः, इत्युत्तरो विकल्पोऽभ्युपगम्येत-न प्रधानस्य, पुरुषाणामात्मनश्चेयत्तेश्वरेण परिच्छिद्यते-इति, तत ईश्वरस्य सर्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत। तस्मादप्यसङ्गतस्तार्किकपरिगृहीत ईश्वरकारणवादः।।४१।।

इति शाङ्करभाष्यम् पत्यधिकरणम् समाप्तम्

वार्तिकम्

पत्युरसामञ्जस्यात्।।३७।। सत्त्वासत्त्वादेरेकत्रासम्भववद् अधिष्ठातृत्वोपादानत्वयोरेकत्रासम्भवः, इति प्रत्यवस्थानात् सङ्गतिः। अविशेषेणेश्वरकारणवादोऽत्र निषिध्यत इति मन्दमतेर्भ्रमनिरासार्थमाह– *केवलाधिष्ठात्रीश्वरकारणवाद इति*।। *साङ्ख्ययोगव्यपाश्रया इति*।। हिरण्यगर्भपतञ्जलिप्रभृतयः। *माहेश्वरास्तु मन्यन्त इति*।। माहेश्वराश्चत्वारः–शैवाः, पाशुपताः, कास्कसिद्धान्तिनः (कारुणिकसिद्धान्तिनः,) कापालिकाश्चेति। चत्वारोऽप्यमी महेश्वरप्रणतिसिद्धान्तानुगामितया माहेश्वराः। *कार्य कारण-योग-विधि-दुःखान्ताः पञ्च पदार्था इति*।। कार्यम्=महदादि, कारणम्=प्रधानेश्वरौ, योगः=ध्यानधारणादिः, विधिः=त्रिषवणस्नानादिर्गूढचर्यावसानः, दुःखान्तः=मोक्षः। पशवः=जीवात्मानः, तेषां पाशः=संसारबन्धः, तद्विमोक्षो दुःखान्तः, तस्मा इत्यर्थः।।

लोके चेतनकारणताया निमित्तत्वेनैव व्याप्तत्वात् कुम्भकारादिषु तथा दर्शनाद् ईश्वरोऽपि चेतनः कारणं भवन् निमित्तमेव भवितुमर्हति, नोपादानम्; तद्दर्शितव्याप्तिविरोधादिति तेषां सर्वेषामभिप्रायः। अत्रोच्यते– *पत्युरसामञ्जस्यादिति*।। पत्युः=ईश्वरस्य, पराभ्युपगतरूपं कारणत्वं नोपपद्यते। कुतः? असामञ्जस्यात्। असामञ्जस्यं त्वनीश्वरत्वप्रसक्तिरेव। कथम्? इत्थम्। यदि हि भवता लोकदृष्टानुसारेणेश्वरे कुलालादिवत् निमित्तत्वमात्रमध्यवसीयते, तर्हि उत्तमाधम मध्यम-विभागेन प्राणिसृष्टिदर्शनाद् अनेकविधदुः खाशय-नरकादिसर्गदर्शनाच्च वैषम्य-नैर्घृण्ये अप्यनुमीयेताम्; लोके तथाविधेषु तद्द्वैविध्यदर्शनात्। ताभ्यां च रागद्वेषादिदोषा अनुमातव्याः स्युः। ततश्च लोकवदेव क्लेशादिमत्त्वादनीश्वरत्वापत्तिरिति; क्लेशकर्मविपाकाशयैरपरामृष्टस्य पुरुषविशेषस्येश्वरत्वाभ्युपगमात्।।

सृष्टिवैचित्र्यस्य प्राणिकर्मसापेक्षत्वाद् अयमदोष इति चेत्, अथैवं मन्यसे–न सर्गवैषम्येणेश्वरस्य वैषम्य नैर्घृण्यादिदोषोऽनुमातुं शक्यते; तत्सृष्टौ प्राणिकर्मसापेक्षत्वादीश्वरस्य, यदि

लौकिकदुष्टपुरुषवद् अनपेक्ष्यैव प्राणिनां धर्माधर्मभेदलक्षणकर्मभेदं स्वाशयवशेनेश्वरो विषमं सृजेत्, स्यादेव तद्दृष्टान्तेनेश्वरस्यापि दोषवत्त्वम्। न चैवमस्ति। किं तर्हि? लौकिकेश्वरवत् तत्सापेक्षः। यथा हि लौकिकेश्वरो राजा कञ्चित् पुरुषं तत्कर्मावलोक्य तदनुसारेण ग्रामदानादिनाऽनुगृह्णाति, कञ्चिद् झटिति निग्रहादिना निगडादिना निगृह्णाति, कञ्चित् प्रत्युदास्ते; नैतावता रक्तः, द्वेष्टा, उदासीनो वा लोके स भवति, तद्वदिति–चेत्, मैवम्; अन्योन्याश्रयापत्तेः–कर्मणेश्वरः प्रवर्तनीयः, ईश्वरेण च कर्म–इति॥

बीजाङ्कुरवदनादित्वाद् अयमदोष इति चेत्, न; वैषम्यात्। तत्र हि पूर्वपूर्वबीजान्तरेण पूर्वपूर्वाङ्कुरान्तरारम्भाद् नान्योन्याश्रयः, अत्र त्वेक एवेश्वरः पूर्वपूर्वकर्मणामप्यारम्भकः, इति तान्यादाय प्रवर्त्य-प्रवर्तकभावकल्पने कथमन्योन्याश्रयदोषो भवता परिहृतः स्यात्? अतः कर्मप्रवाहकल्पनेऽपि तत्तत्कर्मेश्वरयोः प्रवर्त्य-प्रवर्तकभावेनान्योन्याश्रयपरम्पाराया अपरिहार्यत्वात् ''अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे'' इति वैषम्यम्। अपि च या या लोके बुद्धिपूर्वकारिप्रवृत्तिः, सा सर्वेष्टसाधनताज्ञानपूर्विकैव, इति तार्किकैरेवाभ्युपगमाद् ईश्वरप्रवृत्तिरपि तथा, इति साऽपि तत्पूर्विकैवेति निश्चीयते। तथा च रागीश्वरः, इत्यसामञ्जस्यम्, अभ्युपगतव्याप्तिविरोधो वा। न (?)

(एतदनन्तरमादर्शे १४६ तम पृष्ठं जीर्णं पठनायोग्यं वर्तत इति न प्रतिलिपीकरणं पारितम्।)

... ... गमसिद्धिरिति*॥ एवं परिणामकारणवादे प्रधानेन सहेश्वरस्य संयोगादिसम्बन्धो निराकर्तव्यः ; तयोरप्यप्रदेशत्वात् संयोगानुपपत्तेः, अकार्यकारणद्रव्यत्वाच्च समवायानुपपत्तेः, अत एव तादात्म्यानुपपत्तेः ; स्वरूपसम्बन्धस्य चातिप्रसज्जकत्वात्, सर्वदा सृष्टि-प्रलयप्रसङ्गाच्च। एतेन–ईश्वरस्य नित्येच्छादिपरिकल्पनमपि–प्रत्याख्यातम्; सर्वदा सर्ग प्रलयादि प्रसङ्गादिति। क्षणिकविज्ञानादिवादिनां त्वीश्वरस्य क्षणिकत्वादेवान्येन सम्बन्धानुपपत्तिः–इति॥३८॥

अधिष्ठानानुपपत्तेश्च॥३९॥ शरीरादिमत एव वर्धक्यादेर्वास्याद्यधिष्ठानं दृष्टम्, शरीरादिहीनस्य त्वीश्वरस्य रूपादिहीनस्य प्रधानादीनामधिष्ठानं नोपपद्यते; दृष्टविरोधात्॥३९॥

करणवच्चेन्न भोगादिभ्यः॥४०॥ अथ–एतद्दोषजिहीर्षयेश्वरस्यापि पिठरादिकरणानामधिष्ठानं शरीरमभ्युपगन्तव्यमिति–चेत्, न; तथा सति संसारिवदीश्वरस्यापि भोगादिप्रसङ्गेना-नीश्वरत्वापत्तिरिति॥४०॥

अन्तवत्त्वमसर्वज्ञता वा।।४१।। इतश्चासामञ्जस्यं (तार्किक) परिकल्पितस्येश्वरस्य, प्रधानपुरुष संयोगानां ह्यतीतानागतवर्तमानानां परिसङ्ख्यातुमशक्यत्वेन प्रधानानां पुरुषेषु (संयोगस्य) तेषु पुरुषाणां वाऽपरिसङ्ख्यातत्वेनाऽऽनन्त्यम्, तेषां परिसङ्ख्याभ्युपगमे क्रमेण सर्वमोक्षोपपत्तौ प्रधाननाशापत्तिः। ईश्वरस्य च तदुभयनियतत्वे नापरिमितशक्तित्वम्, सर्वज्ञत्वं च। तत्र सर्वाः प्रधानमात्राः, सर्वे पुरुषाः, सर्वाश्च स्वशक्तय ईश्वरज्ञानेन स्वस्वविशेषवत्तया परिच्छिद्यन्ते वा, न वा। आद्ये प्रधानमात्रा पुरुषेश्वरशक्तीनामन्तवत्त्वप्रसक्तेर्नानन्त्यम्। यावद्धि वस्तु लोके विशेषवत्तया येन विज्ञायते, तावत् तेनावश्यं परिसङ्ख्यायत इति दृष्टम्। द्वितीये चेश्वरस्यासर्वज्ञत्वापत्तिः ; तेन ज्ञानेन सर्वापरिच्छेदात्।।

ननु—यत्र सैवास्ति, तत्र तदग्रहणेऽसर्वज्ञतापत्तिः स्यात्, यत्र तु सैव नास्तीत्युच्यते, तत्र तदग्रहणे कथमसर्वज्ञता स्यात्? न हि शशविषाणं न ज्ञायत इत्येतावताऽसर्वज्ञता भवतीति —चेत्, सत्यम्; परं तु तेषामीश्वरज्ञानेन परिच्छेदनं वादिनि त्वावश्यकं स्यादित्युच्यते। कथम्? इत्थम्—एवं हि तैरीश्वरस्य सार्वज्ञ्यं साध्यते। ज्ञानेच्छ्रादितरतमः, क्वचिद् विश्रान्तः, तरतमवत्त्वात्; परिमाणोत्कर्षतरतमवत्—इति। तत्र ज्ञानोत्कर्षतारतम्यम्—एक-द्वि-त्रि-चतुः पञ्चादिक्रमेणाधिक-विषयसङ्ख्योत्कर्षतारतम्यादेव। अतोऽन्यस्य स्वतो ज्ञान उत्कर्षापकर्षाभावात्। एवं च सति यत्र गत्वा विषयसङ्ख्योत्कर्षो विश्राम्यति, तत् सर्वविषयं ज्ञानमैश्वरमिति सिद्धयति। तथा च कुतो नानन्त्यव्याहतिरिति? अपि च सर्वं हि प्रत्यक्षज्ञानं स्वविषयं व्याप्नोतीति घटादौ दृष्टम्। ईश्वरज्ञानमपि प्रत्यक्षं तरतमविषयं व्याप्नुवद् विषयाकारपरिच्छेदात् सर्वस्वेश्वरप्रत्यक्षविषयत्वे परिच्छिन्नपरिमाणयोगि (स्यात्, इत्यन्तव) त्त्वप्रसङ्गः स्यात्। तस्मादीश्वरस्यासर्वज्ञत्वप्रसङ्गः। वेदान्तनये तु स्वाकाशब्रह्मस्वरूपव्यतिरेकेण सर्वज्ञत्वाद्यभावाद् नान्तवत्त्वदोषोऽस्तीति। यस्तु सर्वज्ञेश्वरवादो माहेश्वरसम्मतः, स एव तार्किकपरिकल्पितेश्वरवाद इति।।४१।। इति सप्तमं पत्यधिकरणम्।।

इति वार्तिकम् पत्यधिकरणम् समाप्तम्

प्रदीपः

पत्युरसामञ्जस्यात्।।३७।। निरधिष्ठानाचेतरकारणवादे प्रतिक्षिप्तेऽधिष्ठातुरेव केवलस्य चेतनस्योरीकारो युक्तः, न तस्यैवोपादनत्वमपि, उपादानत्वस्यापि स्वीकारेऽपि तस्यौपचारिकं मुख्यं वा परिणामिकारणत्वमेव युक्तम्, न विवर्तोपादानत्वमिति मतद्वयनिरसनमवसरप्राप्तम्। "अपरिग्रहाच्चात्यन्तमनपेक्षा" "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" इति सूत्रद्वयेन केवलाधिष्ठात्रीश्वरकारणवादोऽपि निरस्त एवेति नास्त्यस्याधिकरणस्य यद्यपि प्रयोजनम्; तथापि ताभ्यां शिष्टापरिगृहीतांशबाहुल्यानामेव मतानां निरासात् शिष्टपरिगृहीत-पाशुपत-पाञ्चरात्रयोः केवलाधिष्ठात्रीश्वरकारणवादे तत्परिणामितावादे चाधिकाशङ्कासत्त्वादुक्ताधिकरणसार्थक्यम्। तेन च "साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै" इति शिष्टपरिगृहीतविरुद्धमतेषु परिशेषितं मतद्वयमपि विचारितप्रायं भवति। अत्र हि केनचनांशेन भिन्नताऽपि वर्तत इति विवक्षणाद् वेदविरुद्धान्येव कस्मिंश्चनांश इति न वैदिकं दर्शनत्वमेतेषामिति ज्ञाप्यते। स चांशः प्रधानतमश्चेतनाभिन्ननिमित्तोपादानतैव। सा च चेतनमात्रोपादानतया, चेतननिमित्तमात्रकारणतया, जीवाजीवसाधारणसर्वोपादानतया, जडप्रपञ्चमात्रविवर्तोपादानतया चेति वस्तुस्थितिः। यद्यप्यत्र श्लोके पाञ्चरात्र-वेद-पाशुपतानां क्रमात् पाशुपतस्यैव सर्वोत्तमत्वं प्रतीयते; तथापि चेतनकारणवादिषु निमित्तकारणत्वप्रक्रिया तदीयैव सर्वैरपि ग्रहीतव्येति तस्यान्ततो ग्रहणेऽपि चेतनकेवलनिमित्तकारणताया उक्तश्लोकनिर्दिष्टेषु कैरप्यस्वीकारात् तदसामञ्जस्यमेव प्रथममुपपादनीयमिति प्रथमं पाशुपताधिकरणम्, अनन्तरं तु पाञ्चरात्राधिकरणम्। अवशिष्टं वैदिकं दर्शनं "तत्तु समन्वयादि" ति सर्वादरणीयतया पूर्वमेव व्यवस्थितमिति सुष्ठु लगति।।

अस्मिन्नधिकरणे-(१) पत्युरसामञ्जस्यात्, (२) सम्बन्धानुपपत्तेः, (३) अधिष्ठानानुपपत्तेः, (८) करणवच्चेन्न भोगादिभ्यः, (५) अन्तवत्त्वमसर्वज्ञता वेति पञ्च सूत्राणि वर्तन्ते। अत्र पाशुपतानामपि प्रायेण योगमार्गप्रधानत्वात् पातञ्जलप्रक्रियैवाभिमता। इयान् विशेषः-पातञ्जलमते योगः फलम्, ईश्वरप्रणिधानं साधनम्, पाशुपतमते तु तद्विपरीतम्। अनुमानगम्यत्वं

त्वीश्वरस्योभयसम्मतमेव। तत्राप्ययं विशेषः–अनुमितेश्वररचितानामागमानामपि तत्र प्रामाण्यं पाशुपतमते, पातञ्जले तु नागमोऽपि तदीयः कश्चन प्रमाणं तत्र मन्यते। तथा च क्लेश कर्मादिभिरपरामृष्टोऽसङ्गोऽशरीरो नित्यो जगतः केवलं निमित्तकारणमात्रमधिष्ठातृत्वादिति तदीया प्रक्रिया।

तत्र प्रथमेन सूत्रेण क्लेशकर्मादिभिरपरामर्शभङ्गापत्तिः, द्वितीयेनासङ्गत्वानुपपत्तिः, पञ्चमेन सर्वज्ञत्वनित्यत्वाद्यनुपपत्तिश्च प्रतिपाद्यते। साक्षात् पाशुपतमतनिराकरणपरस्याप्यस्य प्रायेण न्यायसाम्याद् वैशेषिकपातञ्जलादिमतनिरासेऽपि तात्पर्यं तु वर्तत एव। अत्र पत्युरिति पतिशब्दप्रयोगात् पति-पशु-पाशादिसामयिकपदानां पाशुपतमत एव विद्यमानत्वाच्च प्राधान्येन पाशुपतमेव सूत्रकारैर्विवक्षितमिति ज्ञायते। तथा च कारणवादमात्रनिरासे तात्पर्यमिति कल्पनाऽपि न सावसरा। तदिदं सर्वं सावतरणं ससङ्गतिनिर्देशं च निर्दिशति भाष्यकारः– *इदानीमित्यादिना–ईश्वर इति वर्णयन्तीत्यन्तेन*।। कार्य-कारण-योग-विधि-दुःखान्ता इति*।। सूत्रं व्याचष्टे– *पत्युरित्यादिना–प्रसज्येतेत्यन्तेन*।। तथा च क्लेश कर्मादिपरामर्शापत्तिरित्यर्थः। न ह्यन्यथा कर्माधीनमीश्वरप्रवर्तकत्वमुपपन्नमिति भावः। पुरुषत्वप्रसिद्धिरपि तत्रानुकूलेत्याह– *अपि चेत्यादिना*।। पुरुषत्वमीश्वरत्वं च परस्परव्याहतमिति भावः। असङ्गत्वादपि न तस्याधिष्ठातृत्वमित्यादिनिरूपणार्थमपराणि सूत्राणि। भाष्यमेषां निगदव्याख्यातम्। अधिकं वार्तिकतोऽवगन्तव्यम्।। ३८।। ३९।। ४०।। इति सप्तमं पत्यधिकरणम्।।

इति प्रदीपः पत्यधिकरणम् समाप्तम्

भामती

पत्युरसामञ्जस्यात्॥

अविशेषेणेश्वरकारणवादोऽनेन निषिध्यत इति भ्रमनिवृत्त्यर्थमाह ''**केवलेति**। सांख्ययोगव्यपाश्रया हिरण्यगर्भपतञ्जलिप्रभृतयः। **प्रधानमुक्तं**, दृक्शक्तिः पुरुषः प्रत्ययानुपश्यः। स च नानाक्लेशकर्मविपाकाशयैरपरामुष्टः पुरुशविशेष ईश्वरः प्रधानपुरुषाभ्यामन्यः। **माहेश्वराश्**चत्वारः-शैवाः, पाशुपताः, कारुणिकसिद्धान्तिनः, कापालिकाश्चेति। चत्वारोऽप्यमी महेश्वरप्रणीतसिद्धान्तानुयायितया माहेश्वराः। कारणमीश्वरः। कार्यं प्राधानिकं महदादि। योगोऽप्योङ्कारादिध्यानधारणादिः। विधिस्त्रिषवणस्नानादिर्गूढचर्य्यावसानः, दुःखान्तो मोक्षः। पशव आत्मानस्तेषां पाशो बन्धनं तद्विमोक्षो दुःखान्तः। **एष तेषामभिसन्धिः**-चेतनस्य खल्वधिष्ठातुः कुम्भकारादेः कुम्भादिकार्य्ये निमित्तकारणत्वमात्रं न तूपादानत्वमपि। तस्मादिहापीश्वरोऽधिष्ठाता जगत्कारणानां निमित्तमेव, न तूपादानमप्येकस्याधिष्ठातृत्वाधिष्ठेयत्वविरोधादिति प्राप्तम्। एवं प्राप्तेऽभिधीयते-**पत्युरसामञ्जस्यात इति**। इदमत्राकूतम्-ईश्वरस्य निमित्तकारणत्वमात्रा-मागमाद्वोच्यते, प्रमाणान्तराद्वा। प्रमाणान्तरमप्यनुमानमर्थापत्तिर्वा? न तावदागमात्, तस्य निमित्तोपादानकारणत्वप्रतिपादनपरत्वादित्यसकृदावेदितम्। तस्मादनेनास्मिन्नर्थे प्रमाणान्तरमास्थेयम्।

तत्रानुमानं तावन्न संभवति। तद्धि दृष्टानुसारेण प्रवर्तते, तदनुसारेण चासामञ्जस्यम् तदाह हीनमध्यमेति। **एतदुक्तं भवति**-आगमादीश्वरसिद्धौ न दृष्टमनुसर्त्तव्यं। न हि स्वर्गापूर्वदेवतादिष्वागमादवगम्यमानेषु किञ्चिदस्ति दृष्टम्। न ह्यागमो दृष्टसाधर्म्यात्प्रवर्तते। तेन श्रुतसिद्ध्यर्थमदृष्टानि दृष्टविपरीतस्वभावानि सुबहून्यपि कल्प्यमानानि न लोहगन्धितामावहन्ति, प्रमाणवत्त्वात्। यस्तु तत्र कथञ्चिद्दृष्टानुसारः क्रियते, स सुहृद्भावमात्रेण। आगमानपेक्षमनुमानं तु दृष्टसाधर्म्येण प्रवर्तमानं दृष्टविपर्यये तुषादपि विभेतितरामिति। **प्राणिकर्मापेक्षितत्वाददोष इति चेत्**, न; कुतः? कर्मेश्वरयोर्मिथः **प्रवर्त्यप्रवर्तयितृत्व इतरेतराश्रयत्वदोषप्रसङ्गात्**। **अयमर्थः**-यदीश्वरः करुणापराधीनो वीतरागस्ततः प्राणिनः कपूये कर्मणि न प्रवर्त्तयेत्,

तच्चोत्पन्नमपि नाधितिष्ठेत् तावन्मात्रेण प्राणिनां दुःखानुत्पादात्। न हीश्वराधीना जनाः स्वातन्त्र्येण कपूयं कर्म कर्तुमहन्ति। तदनधिष्ठितं वा कपूयं कर्म फलं प्रसोतुमुत्सहते। तस्मात्स्वतन्त्रोऽपीश्वरः कर्मभिः प्रवर्त्यत इति दृष्टविपरीतं कल्पनीयम्। तथा चायमपरो गण्डस्योपरि स्फोट इतरेतराश्रयः प्रसज्येत-कर्मणेश्वरः प्रवर्त्तनीय ईश्वरेण च कर्मेति। शङ्कते- **नानादित्वादिति चेत्**, पूर्वकर्मणेश्वरः सम्प्रतितने कर्मणि प्रवर्त्यते, तेनेश्वरेण सम्प्रतितनं कर्म स्वकार्ये प्रवर्त्यत इति। निराकरोति -न **वर्त्तमानकालवदिति**। अथ पूर्वं कर्म कथमीश्वराप्रवर्त्तितमीश्वरप्रवर्तनलक्षणं कार्यं करोति? तत्रापि प्रवर्त्तितमीश्वरेण पूर्वतनकर्मप्रवर्त्तितेनेत्येवमन्धपरम्परादोषः। चक्षुष्मता ह्यन्धो नीयते, नान्धान्तरेण। तथेहापि द्वावपि प्रवर्त्याविति कः कं प्रवर्तयेदित्यर्थः। **अपि च** नैयायिकानामीश्वरस्य निर्दोषत्वं स्वसमयविरुद्धमित्याह **अपि चेति**। अस्माकं तु नायं समय इति भावः। ननु कारुण्यादपि प्रवर्तमानो जनो दृश्यते। न च कारुण्यं दोष इत्यत आह **स्वार्थप्रयुक्त एव चेति**। कारुण्ये हि सति अस्य दुःखं भवति, तेन तत्प्रहाणाय प्रवर्तत इति कारुणिका अपि स्वार्थप्रयुक्ता एव प्रवर्तन्त इति। **ननु** स्वार्थप्रयुक्त एव प्रवर्ततामेवमपि को दोष इत्यत आह **स्वार्थवत्त्वादीश्वरस्येति**। अर्थित्वादित्यर्थः। **पुरुषस्य चौदासीन्याभ्युपगमान्न** वास्तवी प्रवृत्तिरिति॥३७॥ अपरमपि दृष्टानुसारेण दूषणमाह **सम्बन्धानुपपत्तेश्च**। दृष्टो हि सावयवानामसर्वगतानाम् च संयोगः। अप्राप्तिपूर्विका हि प्राप्तिः संयोगो न सर्वगतानां सम्भवत्यप्राप्तेरभावान्निरवयवत्वाच्च। अव्याप्यवृत्तिता हि संयोगस्य स्वभावः। न च निरवयवेष्वव्याप्यवृत्तिता सयोगस्य सम्भवतीत्युक्तम्। तस्मादव्याप्यवृत्तितायाः संयोगस्य व्यापिकाया निवृत्तेस्तव्द्याप्यस्य संयोगस्य विनिवृत्तिरिति भावः। नापि समवायलक्षणः। स ह्ययुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः सम्बन्ध इत्यभ्युपेयते। न च प्रधानपुरुषेश्वराणां मिथोऽस्त्याधाराधेयभाव इत्यर्थः। नापि योग्यतालक्षणः कार्यगम्यः सम्बन्ध इत्याह **नाप्यन्य इति**। न हि प्रधानस्य महदहङ्कारादिकारणत्वमद्यापि सिद्धमिति। शङ्कते-**ब्रह्मवादिन इति**। निराकरोति **न**। कुतः? तस्य **मतेऽनिर्वचनीयतादात्म्यलक्षणसम्बन्धोपपत्तेः**। **अपि चेति**। आगमो हि प्रवृत्तिं प्रति न दृष्टान्तमपेक्षत इत्यदृष्टपूर्वे तद्विरुद्धे च प्रवर्त्तितुं समर्थः। अनुमानंतु दृष्टानुसारि नैवंविधे प्रवृर्तितुमर्हतीति। शङ्कते परस्यापि इति। परिहरति नेति। अस्माकं त्वीश्वरागमयोरनादित्वादीश्वर-योनित्वेऽप्यागमस्य न विरोध इति भावः॥३८॥

यथादर्शनमनुमानं प्रवर्त्तते नालौकिककार्थविषयमितीहापि न प्रस्मर्तव्यम्। सुगममन्यत्॥३९॥ **रूपादिहीनमिति**। अनुद्भूतरूपादित्यर्थः। रूपादिहीनमरणाधिष्ठानं हि पुरुषस्य स्वभोगादावेव दृष्टं नान्यत्र। न हि बाह्यं कुठाराद्यपरिदृष्टं व्यापारयन् कश्चिदुपलभ्यते। तस्माद्रूपाविहीनं करणं व्यापारयत ईश्वरस्य भोगादिप्रसक्तिः तथा चानीश्वरत्वमिति भावः। कल्पान्तरमाह **अन्यथेति**।

पूर्वमधिष्ठितिरधिष्ठानमिदानीन्तु अधिष्ठानं भोगायतनं शरीरमुक्तम्। तथा भोगादिप्रसङ्गेनानीश्वरत्वं पूर्वमापादितम्। सम्प्रति तु शरीरित्वेन भोगादिप्रसङ्गादनीश्वरत्वमुक्तमिति विशेषः।।४०।।

अपि च सर्वत्रानुमानं प्रमाणयतः प्रधानपुरुषेश्वराणामपि संख्याभेदवत्त्वमन्तवत्त्वं च द्रव्यत्वाद्वा संख्यान्यत्वे सति प्रमेयत्वाद्वनुमातव्यं, ततश्चान्तवत्त्वमसर्वज्ञता वा। अस्माकं त्वागमगम्येऽर्थे तद्बाधितविषयतया नानुमानं प्रभवतीति भावः। **स्वरूपपरिमाणमपि** यस्य यादृशमणु महत् परममहद्दीर्घं ह्रस्वं चेति। ***अथ मा भूदेष दोष इत्युत्तरो विकल्पः।** यस्यान्तोऽस्ति तस्यान्तवत्त्वाग्रहणमसर्वज्ञतामापादयेत्। यस्य त्वन्त एव नास्ति तस्य तदग्रहणं नासर्वज्ञतामावहति। न हि शशविषाणाद्यज्ञानादज्ञो भवतीति भावः। परिहरति- **तत इति**। आगमानपेक्षसयानुमानमेषामन्तवत्त्वमवगमयतीत्युक्तम्।।४१।।

इति भामती पत्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ पाशुपताधिकरणम्॥८॥

॥सू॥ **पत्युरसामञ्जस्यात्**॥३५॥

पत्युः परमेश्वरस्य श्रुतिसिद्धजगदुभयकारणत्वस्यापि तदागमनिष्ठास्तन्मताभिप्रायानभिज्ञा एकदेशिनस्तान्त्रिकाः केवलनिमित्तत्वं वदन्ति। तद्युक्तं न वेति संदेहः॥

तत्रैवं पूर्वः पक्षः - कुलालादिरनुपादानभूत एव दण्डादिकं नियच्छन् कर्ता भवति। तथा तटस्थ ईश्वरोऽपि निमित्तमात्रम्। (माया उपादानम्।) शक्तिः करणम्। अन्यथा मृदादिवदीश्वरस्योपादानत्वे विकारादिप्रसक्तिः। अतो निमित्तमेव परमेश्वर इति॥

अत्रोच्यते–पत्युरीश्वरस्य केवलनिमित्तत्वमपि न युक्तम्, श्रुतिविरोधेनासामञ्जस्यात्॥

न्यायाविरोधमाह-

॥सू॥ **अधिष्ठानानुपपत्तेश्च**॥३६॥

अशरीरस्य परमेश्वरस्य मायोपादानाधिष्ठानं नोपपन्नम्। लोके शरीरिण एव कुलालादेर्मृत्पिण्डाद्युपादानाधिष्ठानं दृष्टम्। अतः कुलालादिदृष्टान्तो विरुद्धः। अनधिष्ठाने मायायाः ईश्वरस्यानङ्गीकारात् सांख्यमतमेव युक्तम्, ईश्वरेण प्रयोजनाभावात्। अतः परमेश्वरस्य निमित्तत्वं न संभवति॥

आशङ्क्याह-

॥सू॥ **करणवच्चेन्न भोगादिभ्यः**॥३७॥

अधिष्ठाने शरीरापेक्षा नास्ति। यथा करणमिन्द्रियं शरीरमपि अशरीरोऽधितिष्ठति तद्वत् प्रधानमपीश्वर इति चेत्–न, तद्वतानर्थभोगादिभ्यः। यथाऽऽत्मनोऽशरीरस्य शरीराधिष्ठाने

शरीरगतसुखदु:खभोगादि: तथा परमेश्वरस्यापि तदधिष्ठाने तद्गतभोगोदिप्रसक्ति:। अतो न निमित्तमात्रमीश्वर:।।

।।सू।। अन्तवत्त्वमसर्वज्ञता वा।।३८।।

वाशब्दश्चार्थे। सशरीर एव परमेश्वर: कुलाल इव मृत्पिण्डं पार्थक्येनोपादानमधितिष्ठतीति चेत्-न, तथा सति पत्युरीश्वरस्य संसारिण इवान्तवत्त्वमसर्वज्ञत्वं च भवति। अतो भोगादिप्रसक्ते: प्रधानाधिष्ठानमीश्वरस्य न संभवति। प्रधानाधिष्ठातृत्वेऽपि परमेश्वरस्य 'अनश्नन्नन्यो अभिचाकशीति' इति श्रुतेस्तद्गतभोगादिप्रसक्तिर्न भवतीति चेत्-तथा सति तर्कबलमपहाय श्रुतिरेवावलम्बनीयेति 'तदात्मानं स्वयमकुरुत' 'बहु स्यां प्रजायेय' 'सर्वो वै रुद्र:' इत्यादिश्रुतिभिरुपादानमपि परमेश्वर इत्यभ्युपेयम्। जगदुपादाननिमित्तभूतस्यापि परमेश्वरस्य 'निष्कलं निष्क्रियम्' इत्यादिश्रुतिभिर्निर्विकारत्वमप्युपपद्यते।।

'शक्ति: प्रथमसंभूता शान्त्यतीतपदोत्तरा।

ततो माया ततोऽव्यक्तं शिवाच्छक्तिमत: प्रभो:।।

शान्त्यतीतपदं जज्ञे तत: शान्तिपदं क्रमात्।'

इत्यादिना मायादिप्रपञ्चे शक्तिमत: शिवस्यैवोपादानत्वमवगम्यते वायुसंहितायाम्। पुनश्च-

'शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्।

तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा।।'

इत्यादिना तत्रैव शिवेनोपादानभूतेन जगद्व्याप्तं मृद्घटादिन्यायेनावगम्यते।।

'चिदात्मैव हि देवोऽन्त: स्थितमिच्छावशाद्बहि:।

योगीव निरुपादानमर्थजातं प्रकाशयेत्।।'

इत्याद्यागमप्रामाण्याच्च परमेश्वरस्य जगदुभयकारणत्वमित्यनवद्यमिति।।

शिवागमैकदेशे शिवस्य परब्रह्मण: केवलनिमित्तत्वमुपपादितम्। तत्परिहोरार्थमिदमधिकरणमिति पूर्वाचार्याणां व्याख्या। वयं तु वेदशिवागमयोर्भेदं न पश्याम:। वेदेऽपि शिवागम इति व्यवहारो युक्त:, तस्य तत्कर्तृकत्वात्। अत: शिवागमो द्विविध: त्रैवर्णिकविषयस्सर्वविषयश्चेति। वेद: त्रैवर्णिकविषय:। सर्वविषयश्चान्य:। उभयोरेक एव शिव: कर्ता। 'ईशान: सर्वविद्यानाम्' 'अस्य महतो भूतस्य नि:श्वसितम्' इत्यादिश्रुत्या।

'अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्।
आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः।।'

इति स्मृत्या च वेदे तस्य कर्तृत्वमवगतम्। अन्यत्रापि तस्यैव परमेश्वरस्य। अतः कर्तृसामान्यादुभयमप्येकार्थपरं प्रमाणमेव। यद्वा-पञ्चब्रह्मप्रणवपञ्चाक्षरीप्रासादादिमन्त्राणां पशुपतिपाशादिवस्तुव्यवहाराणां भस्मोद्धूलनत्रिपुण्ड्रधारणलिङ्गार्चनरुद्राक्षधारणादिपरधर्माणामन्येषां च सर्वेषां व्यवहाराणमुभयत्रापि सममेव दर्शनादुभावपि प्रमाणभूतौ वेदागमौ। कर्तृसामान्योदेकार्थपरत्वेन च विरोधाभावादिदमधिकरणं केवलेश्वरनिमित्तत्ववादिहिरण्यगर्भोक्तयोगस्मृतिविषयमिति वंय वदामः। अतो हिरण्यगर्भागमनिरसनपरमिदमधिकरणमिति युक्तम्।।

अथवा वियदाद्युत्पत्तिशङ्कापरिहारवदवान्तरशङ्कापरिहारप्रवृत्तौ न दोष इति कश्चित्। सर्वथा न केवलमीश्वरो निमित्तमित्यस्माकं राद्धान्तः।।

इति पाशुपताधिकरणम्।।८।।

इति श्री कण्ठभाष्ये पत्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सू०॥ पत्युरसामञ्जस्यात्॥३५॥

इहाधिकरणे परमेश्वरस्यानुमानात्सिद्धिस्तस्यानुमानतस्सिद्धं निमित्तत्वमेव केवलं नोपादानत्वमपीति मतं निराक्रियते। अत्रेऽयं शंका समुन्मिषति। शास्त्रयोनित्वाधिकरणे शास्त्रमेव परमेश्वरे प्रमाणं नानुमानमिति व्यवस्थापितम्। शास्त्रतश्च तस्योपादानत्वस्यापि सिद्धिः प्रकृत्यधिकरणे प्रतिपादिता। अनुमानिकेश्वरवादिनां काणभुजाक्षचरणानां मतं च पूर्वमेव तर्काप्रतिष्ठानवैदिकापरिग्रहाभ्यां निराकृतम्। किमत्र निराकरणीयमवशिष्यते यदर्थोऽयमधिकरणान्तरारंभ इतीमां शङ्कां निरसनीयमतविशेषोपन्यासेन परिहरति-**पत्युरिति**। अयमत्र परिहाराभिप्रायः। परमेश्वरस्यानुमानिकत्वं केवलं निमित्तत्वं च वैशेषिकादिशास्त्रेष्वेव नोच्यते सकलवेदसामरस्यरहस्यनिधानभूतेषु शिवागमेष्वपि प्रतिष्ठाप्यते। तत्कथं प्रत्याख्येयम्। न हि वेदसमानैः शिववाक्यैः पूर्वपूर्वशैवाचार्यप्रणीतैस्तव्द्याख्यानैश्च महता प्रबंधेन प्रतिष्ठापितं परमेश्वरसाधकानुमानं तस्य केवलनिमित्तत्वं च कतिपयवेदवाक्यविरोधेन पुरुशबुद्धिप्रभवतर्कविरोधेन च प्रत्याख्यातुं युक्तम्। बहुवाक्यानुरोधेन कतिपयवाक्यानामर्थांतरवर्णनस्योचितत्वात् वेदविरोधेनेव शिवागमविरोधेनापि किंपचानपुरुषबुद्धिप्रभवतर्काणामाभासीकरणस्योचितत्वाच्चेति शङ्कांतरनिराकरणार्थमिदमधिकरणम्। तन्निराकरणंत्वित्थम-शिवागमानां परमेश्वरस्य स्वतंत्रानुमानतस्सिद्धौ तस्य केवलनिमित्तत्वे च न तात्पर्यम्। तथाप्युत्तानहृदयाः यथाश्रुतार्थग्राहिणस्तत्तात्पर्यसारानभिज्ञाः केचन तान्त्रिकास्तव्द्याख्यातारः तथा मतं प्रत्यतिष्ठिपन्। अनादिव्याख्यानपरंपराप्राप्तं तन्मतं शृण्वतां तत्रैव शिवागमानामपि तात्पर्यमिति भ्रांतिः स्यात्, तन्निराकरणार्थोऽयमधिकरणांतरारंभयत्न इति। यद्येवं शैवानामपि प्रधानकारणवादित्वात् सांख्याधिकरणानंतरमनेनाधिकरणेन भाव्यम्। सत्यम्। अवांतरसङ्गतिवशादिह कृतम्। पूर्वाधिकरणे हि सत्त्वासत्त्वयोर्विरो धादेकत्रासंभव उक्तः। एवमेवाधिष्ठातृत्वोपादानत्वयोरप्येकत्रासंभव इत्यत्र प्रत्यवस्थानमिति। तथैव

पूर्वपक्षमुपपादयति-**कुलालादिरिति**। यद्यपि प्रकृत्यधिकरणेऽप्ययं पूर्वपक्ष उपन्यस्तः तथापि तत्रोपादानत्वविषयश्रुतीनां केवलनिमित्तविषयत्वे पूर्वपक्ष्युन्नीतन्यायाभासो निर्विकारत्वश्रुति-विरोधोत्प्रेक्षा च मुख्यं पूर्वपक्षावलंबनम्। अत एव श्रुत्यवष्टंभान्येव तत्र सिद्धांतसूत्राणि। तदुपष्टंभकतया परं भाष्यकृतात्रत्या कुलालमृत्पिंडादिदृष्टांतमूला युक्तिस्तत्रोपन्यस्ता। अत्र तु सैव मुख्यं पूर्वपक्षावलंबनमिति न पौनरुक्तयम्। चिच्छक्तिरपि नोपादानं चेतनत्वात् परमेश्वरवत्। अतश्शक्तिर्जगत्कर्तुः परमेश्वरस्य करणापेक्षायां करणतयावतिष्ठते। उपादानं तु जडाश्शुद्धाशुद्धमायाप्रकृतय इत्यभिप्रेत्याह-**शक्तिः करणमिति**। शक्तय इति पाठश्चेदौपाधिकभेदाभिप्रायं बहुवचनम्। **श्रुतिविरोधेनेति**। प्रकृत्यधिकरणनिर्णीततात्पर्योपादा-नत्वप्रतिपादकश्रुतिनिकुरुंबविरोधेनेत्यर्थः। काणभुजादिरीत्या युक्तिप्रधान्यं मन्यमानः पूर्वपक्षयुक्तिभिर्व्यवस्थापितेऽर्थे श्रुतयस्तदनुसारेण नेतव्या इति श्रुतिविरोधं नाद्रियेत। अतस्तद्युक्तीनां प्रतियुक्तिपराहतिप्रदर्शनेन सोऽपि स्वमतव्यवस्थापनार्थं श्रुतिशरणतां प्रापणीय इत्यभिप्रेत्य तदभिमतेश्वरानुमानस्य प्रतियुक्तिपराहतिप्रदर्शकान्युत्तरसूत्राणि तान्यवतारयति- **न्यायविरोध-माहेति**।।सू०।। **अधिष्ठानानुपपत्तेश्च**।।३६।। **मायोपादानेति**। मायाशब्दोऽत्र शुद्धमायापरः। अशुद्धमायाप्रकृतिरूपोपादानाधिष्ठाने परमेश्वरस्यानंतेशश्रीकण्ठशरीराभ्यां शरीरवत्वस्य पूर्वपक्षिणाङ्गीकृतत्वात्। **दृष्टमिति**। कुलालमृत्पिण्डादिषु निमित्तोपादानभेदो दृष्ट इति दृष्टांतमात्रमवलंब्य हि पूर्वपक्षिणा परमेश्वरादन्यदेवोपादानमिति व्यवस्थाप्यते। तस्य शरीरवानेव कुलालादिरूपाधिष्ठाता दृष्ट इति पूर्वपक्ष्यभिमतानुमानात् जगत्कर्तृत्वेन सिध्यन् परमेश्वरस्तेनैव कुलालादिदृष्टांतेन शरीरी सिद्ध्येत्। अतः परमेश्वरः शरीररहितः शुद्धमायाधिष्ठातेति तथाभूतमीश्वरमनुमानेन सिसाधयिषतः कुलालादिदृष्टांतो विरुद्धः। तद्विपरीतशरीरवदधिष्ठात्रु-पनायकत्वादित्यर्थः। तर्ह्युदासीन एवेश्वरस्साध्यत इति मन्दशङ्कां निराचष्टे-**अनधिष्ठान इति**। **प्रयोजनाभावादिति**। क्षित्यादिकार्यकर्तृत्वेन खल्वनुमानादीश्वरस्साधनीयः। तत्कर्तृत्वानंगीकारे स साधयितुं न शक्यते लिंगाभावादिति भावः। यदि त्वधिष्ठातृत्वे शरीरित्वमप्रयोजकं किंत्वपरोक्षज्ञानादिमात्रमतो जगत्कर्तृत्वेनानुमानादशरीरस्य परमेश्वरस्य सिद्धिरुपपद्यत इत्युच्येत तदा तथैव तत्र उपादानभिन्नत्वमप्यप्रयोजकमिति तस्य श्रुतिबलादुपादानत्वेनापि सिद्धिरुपपद्यत इति तुल्यम्। वस्तुतस्त्वपरोक्षज्ञानादिकमधिष्ठातृत्वे प्रयोजकमभ्युपगच्छता शरीरित्वमपि तत्प्रयोजकमिति पर्यायेणाभ्युपगतं भवत्येव। अपरोक्षज्ञानत्वावच्छेदेनेंद्रियस्य कारणतया तदाश्रयत्वेन शरीरस्यापि प्राप्तेः। न च तत्र कार्यतावच्छेदके जन्यत्वं विशेषणम्। गौरवात् न च लाघवादेकस्य नित्यस्येश्वरज्ञानस्यानुमानात्सिद्धौ तत्र जन्यत्वविशेषणगौरवं प्रामाणिकमिति वाच्यम्। ईश्वरानुमानस्य प्रथमप्रवृत्तौ (नियामका) प्रमाणाभावात्। किञ्च। कर्तृजन्यत्वे कार्यत्वमवच्छेदकं लाघवात्, न तु

घटत्वपटत्वादिकमनंतं गौरवात्। इति विपक्षबाधकबलाद्धि कार्यत्वलिंगेन कर्तृजन्यत्वं क्षित्यादीनां साध्यते। एवं शशरीरजन्यत्वेऽपि तदेव कार्यत्वमवच्छेदकं लाघवादिति नित्यज्ञानादिमत्त्वेनेव नित्यशरीरवत्त्वेनापि कर्तृसिद्धिः केन वार्यते। तस्मादशरीरस्याधिष्ठानानुपपत्तेः शरीरिण एव कर्तुरनुमानतस्सिद्धिः स्यात्। न तु पूर्वपक्ष्यभिमतस्याशरीरस्य कर्तुरित्याशयः। स्यादेतत्। अनुप्रविश्य नियम्यत्वं साक्षात्प्रयत्नाधिष्ठेयत्वं वा शरीरत्वम्। लौकिकवैदिकशरीरव्यवहारास्पदसकलानुगतस्य जातिरूपस्योपाधिरूपस्य वान्यादृशस्य तस्यासंभवात्। तच्च परमेश्वरं प्रति मायादीनां सर्वेषामप्यविशिष्टम्। तथा च यन्नियम्यं तेनैव शरीरवान् परमेश्वरस्तस्याधिष्ठातेत्युपपद्यत इति न तस्य करचरणादिमच्छरीरांतरसिद्धिः प्रसज्यते। न च नियम्यातिरिक्तशरीरेण शरीरवत एव तदधिष्ठातृत्वमिति नियमोस्ति। जीवानां स्वस्वशरीराधिष्ठाने तदभावादित्याशंका-निराकरणार्थमुत्तरसूत्रमित्यवतारयति-**आशंक्याहेति**। सू०।। **करणवच्चेन्न भोगादिभ्यः**।।३७।। करणग्रहणं शरीरस्याप्युपलक्षणमिति व्याचष्टे-**शरीरमपीति**। **अशरीर इति**। नियम्यातिरिक्तशरीररहित इत्यर्थः। **तद्गतभोगादिप्रसक्तिरिति**। अयमाशयः। अधिष्ठातृत्वशरीरित्वव्याप्तौ नोक्तलक्षणं शरीरत्वं निवेशयामः। किं तु भोगाश्रयत्वरूपम्। तत्रैव विपक्षबाधकसत्त्वात्। भोगार्थं शरीरमधितिष्ठतो हि सुखार्थं दुःखपरिहारार्थं वा क्वचित् कर्तृत्वं दृष्टम्। तथा च नियम्यमेव मायादिकं यदि परमेश्वरस्य भोगाश्रयरूपं शरीरं यदि वा तदतिरिक्तं करचरणादिमदन्यच्छशरीरमिष्यते उभयथापि तस्य सुखदुःखभोस्तन्मूलपुण्यपापवत्वं च प्रसज्यत इति करचरणादिमच्छरीरांगीकारे दोषांतरसमुच्चयार्थं सूत्रम्-**अतंवत्त्वमसर्वज्ञता वा**।।३८।। अंतवत्त्वं करचरणादिमतश्शरीरस्यानित्यत्वनियमदृष्टेः असर्वज्ञता च जननमरणावृत्तिमतां किंचिज्ज्ञत्वदृष्टेः। योगाभ्यासात् सार्वज्ञ्यसमर्थनेऽपि ततः प्रागनिवार्यमसर्वज्ञयमिति सूत्रार्थमभिप्रेत्य व्याचष्टे-**वाशब्द इत्यादिना**। एवमनुमानादीश्वरस्सिद्ध्यति चेत् कुलालादिरिव शरीरसुखदुःखभोक्ता पुण्यपापवश्यो जननमरणवानसर्वज्ञश्च सिद्ध्येत्, न तु यथाभिमतरूपविशिष्ट इति सूत्रैः प्रतिपादितं भवति। शास्त्रयोनित्वाधिकरणोपन्यस्तमीश्वरानेकत्वापत्त्यादिदूषणमप्यत्रत्यमेव। अत्रैव सूत्रकारस्यानु-मानदूषणकण्ठोक्तिदर्शनात्। तत्र सूत्रकृता 'तन्त्वौपनिषद' मित्यादिश्रुतितात्पर्यविचारेणैव परमेश्वरस्य **शास्त्रयोनित्वं** व्यवस्थापितम्। भाष्यकृता परं शिष्याकांक्षोपशांत्यर्थमत्रत्यमेव किंचिद्दूषणं तत्रोद्भावितम्। तद्व्याख्यानप्रसङ्गादस्माभिरपि तत्र प्रपंचितमतो न पौनरुक्तयम्। 'रचनानुपपत्ते' श्चेति सांख्यधिकरणे मृद्धटादिषु दृष्टं कार्यानुसारिणा कारणेन भाव्यमिति नियममवलम्ब्य सुखदुःखमोहात्मकस्य जगतस्तथाभूतं कारणमनुमिमानं साख्यं प्रति मृदादिदृष्टांतैरेवाचेतनस्य जगत्कारणस्य तादृशेन चेतनेनाधिष्ठानमपि सिद्ध्येत्, स्वतंत्रं प्रधानं जगत्कारणमिति सांख्याभिमतं न सिद्ध्येत्। इत्येतावन्मात्रमुक्तं, न तु स्वतंत्रमीश्वरानुमानमनवद्यमिति तेनेश्वरः प्रसाधितः। अतः

क्वचिदीश्वरानुमानमनुमोदितं क्वचिद्दूषितमिति न विरोधः। तदेवं युक्तया केवलनिमित्तमीश्वरं साधयन्तं प्रति स्वतंत्रयुक्तयाश्रयणे परमेश्वरस्यानभिमतमपि शारीरित्वभोक्तृत्वादिकं सिद्ध्येदिति दोषे सूत्रैरुद्भाविते तेषां सूत्राणां, स्वतन्त्रयुक्तिभिः श्रुतिविरुद्धोऽर्थो न सिद्ध्यति, पुरुषबुद्धिकल्पितयुक्तिभ्यः श्रुतीनां प्रबलत्वादित्यस्मिन्नर्थे तात्पर्यमाविष्कर्तुं परमुखेन शङ्कामुद्भावयति-**प्रधानेति**। **तद्गतभोगादीति**। आदिशब्देन पुण्यपापवत्त्वमनेकत्वमभवत्वम-सर्वज्ञत्वमित्येतानि गृह्यंते। अधिष्ठानानुपपत्तिसूत्रापादितं शरीरित्वं तु नोपात्तम्। श्रुत्यवलम्बनेऽपि कैवल्योपनिषदादिसिद्धस्य तस्याप्रत्याख्येयत्वात्। तर्हि प्राप्तोऽसि पंथानमिति परिहरति-**तथा सतीति**। **श्रुतिरेवेति**। 'अनश्नन्नन्य' 'न कर्मणा वर्धते नो कनीयान्' 'द्यावाभूमी जनयन्देव एकः' 'यः सर्वज्ञः सर्ववित्' इत्यादिश्रुतिरित्यर्थः। **परमेश्वर इति**। शक्तेरप्युपलक्षणम्। **निर्विकारत्वमपीति**। प्रकृत्यधिकरणे तथोप पादितत्वादिति भावः। एवमनेनाधिकरणेन निराकरणीयः शिवस्य केवलनिमित्तत्ववादो नागममूलः किं तु तदभिप्रायानभिज्ञव्याख्यातृपरंपरामूलः इत्येतदाविष्कर्तुं शिवस्योपादानत्वसंप्रतिपत्तौ सर्वज्ञानोत्तरागममूलं वायुसंहितावचनजातमुदाहरति-**शक्तिरिति**। सूक्ष्मचिदचिद्रूपापन्नविच्छक्तिविशिष्टः। सकलतत्वातीतशिव एक एव सर्गाद्यसमयेऽवतिष्ठते। सिसृक्षोस्ततः प्रथमं शिवतत्वपरबिंदुपरमायाशुद्धमायामहामायाकुटिलाकुण्डलिन्यादिशब्दालंबनत्वेन प्रसिद्धा शुद्धाध्वगतसकलतनुभुवनभोगस्थानभोगोपकरणानामुपादानभूता पराशक्तिरुत्पद्यते। ततश्शक्तिः सदाशिवो महेश्वरः शुद्धविद्येति चत्वारि तत्वान्युत्पद्यन्ते। तदनन्तरमपरमाया मिश्राध्वगतसकलतनुभुवनाद्युपादानभूता जायते। ततः कालो नियतिः कला विद्या रागः पुरुष इति षट्तत्त्वानि जायन्ते। तदनंतरमशुद्धाध्वगततनुभुवनाद्युपादानभूतमव्यक्तमाविर्भवति। ततो बुद्धिरहंकारो मनः पञ्च ज्ञानेंद्रियाणि पञ्च कर्मेंद्रियाणि पंच शब्दादीनि तन्मात्राणि पंच वियदादीनि भूतानीति त्रयोविंशतिस्तत्वान्याविर्भवंति। एवमेतानि परशक्तयादीनि पृथिव्यंतानि जडानि षट्त्रिंशत्तत्वानि शिवशास्त्रेषु प्रसिद्धानि तत्र तत्र श्रुतिन्यायैर्व्यवस्थापितानि। एतेषां परशक्तिव्यतिरिक्तानां तत्वानां तत्तत्तत्वप्रतिष्ठितभुवनानां चाधारभूताः पञ्च कलाः परशक्तिप्रभवाः। तत्र शतकोटियोजनमितब्रह्माण्डरूपं पृथिवीतत्वं निवृत्तिकलायामवतिष्ठते। जलाद्यव्यक्तांतानि त्रयोविंशतिस्तत्वानि प्रतिष्ठायाम्। पुरुषादीनि मायान्तानि सप्त तत्वानि विद्यायाम्। शुद्धविद्या महेश्वरश्च शांतिकलायाम्। सदाशिवश्शक्तिश्च शांत्यतीतायाम्। परशक्तिस्तु तत्वांतराणां तत्तत्प्रतिष्ठितभुवनानां च भेदोपभेदैर्विना षष्टिसंख्यानां तैस्सह चतुर्विंशत्युत्तरद्विशत-संख्यानामाधारभूताः पञ्चापि कलाः कारणत्वेन व्याप्यं तत उपर्युपरिस्थिता शांत्यतीतपदोत्तरा भवति। तदेतत्सर्वं संक्षिप्योच्यते -'**शक्तिः प्रथमसंभूते**' त्यादिभिः श्लोकैः। अत्र शक्तिशब्दश्शिवत्तत्वरूपपरशक्तिपरः। स तत्कार्याणां शक्तयादीनां चतुर्णां तत्त्वानामप्युपलक्षकः। ततो

मायेति। मायाशब्दस्त्वपरमायापर:। स तत्कार्याणां कालादीनां पुरुषांतानां मिश्रतत्वानामप्युपलक्षक:। अव्यक्तशब्दस्तु तत्कार्याणां बुद्ध्यादीनां पृथिव्यंतानां त्रयोविंशतिसंख्यानामशुद्धतत्वानामप्युपलक्षक:। एवमनेन श्लोकेन संक्षिप्य शिवात् षट्त्रिंशत्तत्वोत्पत्तिर्व्याख्याता। 'शांत्यतीतपदं शक्तेस्तत: शांतिपदं क्रमात्। ततो विद्यापदं तस्मात्प्रतिष्ठापदसंभव:। निवृत्तिपदमुद्भिन्नं प्रतिष्ठापदत: क्रमात्'। इति गाथया परशक्तित: कलापञ्चकोत्पत्तिर्वर्णिता। अत्र 'शिवा'दिति पंचम्योपादानत्वप्रतिपादनं नातिस्फुटमिति तत्रत्यमेव श्लोकांतरमुदाहरति-**पुनश्चेति**। **शक्तयादीति**। शक्तिशब्देन शिवतत्त्वरूपा परा शक्तिरुच्यते। शिवतत्वशब्देन तु शिव एवोच्यते। न त्वत्र शिवतत्त्वरूपा परा शक्तिरुच्यते। शिवतत्वशब्देन तु शिव एवोच्यते। न त्वत्र शिवतत्त्वशब्द: परशक्तिपर:। शक्तिशब्दस्तत्कार्यद्वितीयतत्त्वरूपशक्तिपर:। 'शिवतत्वादि भूम्यन्तं शरीरादि घटादि च। व्याप्याधितिष्ठति शिवस्ततो विष्णुरुदाहृत:' इति तत्रत्यनामाष्टकनिर्वचनप्रस्तावपठितश्लोकैकार्थ्यात्। शिवतत्वशब्दस्तु वायुसंहितायामेव शिवेऽपि प्रयुक्त:। 'आदिमध्यान्तरहितं भेषजं भवरोगिणाम्। शिवतत्वमिति ख्यातं शिवार्थं जगत: स्थितम्।। पञ्चोपचारवद्भक्तया पूजयेल्लिंगमूर्धनी'ति। आगमांतरश्लोके 'अंत: स्थित' मित्यस्य स्वात्मनि सूक्ष्मरूपेण स्थितमित्यर्थ:। अतस्तस्योपादानत्वे प्रामाण्यसिद्धि:। एवमागमानां शिवस्योपादानत्वेऽपि तात्पर्यसद्भावात् तन्निराकरणार्थं नेदमधिकरणं किंतु तदभिप्रायानभिज्ञव्याख्यातृमतनिराकरणार्थमित्येकं मतं प्रदर्शितम्। मतांतरमाह**शिवागमैकदेश इति**। यद्यपि वायुसंहितैकार्थे सर्वज्ञानोत्तराख्ये वैदिकशिवागमे ततोऽन्यत्रापि क्वचित्क्वचिदागमे शिवस्य उपादानत्वमपि प्रतिपादितम्। तथापि कामिककारणादिषु सिद्धांततंत्राख्येषु शिवागमेषु कण्ठोतक्त्या तत्प्रत्याख्यातमतस्तद्विषयमिदमधिकरणमिति केषांचिदाचार्यदेशीयानां व्याख्यानमित्यर्थ:। किमत्र तत्त्वमित्याकांक्षायामाचार्य: स्वयं निर्धारयति-**वयंत्विति**। ननु कर्त्रैक्येऽपि बृहस्पतिप्रणीताया: स्मृतेर्लोकायतसूत्राणाञ्च प्रामाण्याप्रामाण्यवैषम्यं दृष्टमित्याशङ्क्याह-**एकार्थपरमिति**। ऐकार्थ्यमुपपादयति-**पञ्चब्रह्मेति**। 'ईशानस्सर्वविद्याना' मित्यादयो यजुर्वेदारण्यके समाम्नाता: पञ्चब्रह्ममन्त्रा:। प्रणव 'ओमिति ब्रह्मे' त्यादिप्रदेशेष्वाम्नात:। पञ्चाक्षरी यजुस्संहितायामाम्नाता। एवं प्रासादस्याम्नानप्रदेशोऽन्वेष्य:। ह्रींकारादिसंग्रहार्थमादिपदम्। पशुपाशपतिव्यवहार: श्वेताश्वतराणां मन्त्रोपनिषदि प्रसिद्ध:। आदिशब्देन 'काल: स्वभावो नियतिर्यदृच्छा भूतानि योनि: पुरुष इति चिंत्य' मित्यादिप्रदेशगतो नियतिपुरुषतत्त्वादिव्यवहारस्संगृहीत:। भस्मोद्धूलनत्रिपुण्ड्ररुद्राक्षधारणान्यथर्वशिर: कालाग्निरुद्रबृहज्जाबालोपनिषत्सु प्रसिद्धानि। लिंगार्चनं 'तव श्रिये मरुतो मर्जयंते' त्यादिमंत्रे प्रसिद्धम्। उपबृंहितश्च स मन्त्र: पौराणिकै: 'रौद्रं लिंगं महाविष्णुर्भक्तया शुद्धं शिलामयम्। चारु चित्रं समभ्यर्च्य लब्धवान्परमं पद'मिति। **अन्येषां च सर्वेषामिति**। शिवागमेषु श्रुत्यवगतपरब्रह्मभावस्यैव हि शिवस्य भूयान्महिमा प्रतिपाद्यते

तदवगतकर्तव्यताकस्यैव तत्पूजनस्य भूयानङ्गकलापः प्रतिपाद्यते। अतः प्रत्यक्षश्रुत्यवगतकतिपयेतिकर्तव्यताकक्रत्व- नुष्ठानापेक्षितांगकलापप्रपञ्चनपराणां कल्पसूत्राणां प्रत्यक्षश्रुत्यदृष्टांगविशेषेष्विव तेषां प्रत्यक्षश्रुत्यनवगतशिवमहिमतत्पूजनप्रकारविशेषेष्वपि श्रुत्यनुसारित्वमवसीयते। अतो वेदशिवागमयोः प्रतिपाद्यानि सर्वाणि समानान्येव। इयांस्तु विशेषः। कल्पसूत्रेषु प्रत्यक्षश्रुतिविरुद्धांशे प्रणेतृभ्रांतिमूलत्वमाशंकास्पदं न तु शिवकर्तृकेष्वागमेष्विति। शिवस्य उपादानत्वनिराकरणं तेषु श्रूयत इति चेत् वेदेषु निर्विकारत्वं किं न श्रूयते। तस्यैव प्रपञ्चनपरं तत्। अत एव एतेषु निराकार्यस्य उपादानत्वस्य विकारित्वरूपतयैवानभिमतत्वं प्रदर्शितं 'परिणामो हि वस्तूनां पूर्वावस्थापरिच्युतिः। अवस्थांतरसम्प्राप्तिः क्षीरस्य दधिभावव'दित्यादिना। यत्तु 'नात्र शक्तिरुपादानं चिद्रूपत्वाद्यथा शिवः। परिणामोचितः प्रोक्तश्चेतनस्य न युज्यते'इत्यादिना शक्तेः परिणामित्वनिराकरणं तच्छक्तेश्चेतनत्वेऽपि परिणामित्वे तद्वच्छिवस्याऽपि तदस्त्विति शंकावकाशनैराश्यसिद्ध्यर्थं प्रौढिवादमात्रम्। तेष्वपि सिसृक्षासंजिहीर्षादिव्यवहारेण शिवचिच्छक्तेः 'चिच्छक्तिरर्थसंयोगोऽध्यामिंद्रियमार्गत' इति चिच्छक्तिवृत्तिनिर्गमव्यवहारेण जीवचिच्छक्तेश्च परिणामित्वमाविष्कृतमेवेति भावः। नन्वस्तु वेदागमयोः कर्तृसामान्यं क्वचित्क्वचिदैकार्थ्यं च। तावन्मात्रेण सर्वात्मना न तयोरेकार्थ्यमुपपादयितुं युक्तम्। अवैदिकत्वमोहशास्त्रत्वादि- प्रसिद्धिविरोधापत्तेः। तथाहि-महाभारते-'सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै'इति शैवागमस्य सांख्ययोगादिवद्वैदिकप्रस्थानात्प्रस्थानांतरत्वं तावत्प्रतिपादितम्। तथाभूतस्य च तस्य मोहशास्त्रत्वं कूर्मपुराणे प्रतिपादितम्। 'एवं संचोदितो रुद्रो माधवेन मुरारिणा। चकार मोहशास्त्राणि केशवोऽपि शिवेरितः। कापालं लागुडं शाक्तं भैरवं पूर्वपश्चिमम्। पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः'।। इति। तन्निष्ठानां वैदिकापरिग्राह्यत्वञ्च तत्रैव प्रतिपादितम्। 'बुद्धश्रावकनिर्गन्धाः पाञ्चरात्रविदो जनाः। कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः। यस्याश्नंति हवींष्येते दुरात्मानस्तु तामसाः। न तस्य तद्भवेत् श्राद्धं प्रेत्येह च न तत्फल'मिति। प्रमाणभूतेनापि मोहशास्त्रं कृतमिति युज्यते। तत्र च विप्रलंभार्थं वैदिकार्थस्पर्शोऽपि संभवति। तस्मात्तावन्मात्रेण वेदैकार्थ्यमुपपादयितुमयुक्तमित्याशंक्याह- **एकार्थपरत्वेन च विरोधाभावादिति**। कल्पसूत्रादिवदेकार्थपरत्वकल्पनेन यो मोहशास्त्रत्वादिप्रसिद्धिविरोध आपादितः तस्याभावादित्यर्थः। मोहशास्त्रत्वादिप्रसिद्धिः वामपाशुपतादिविषयेति भावः। तथाहि-कूर्मपुराण एव 'निर्मितं हि मया पूर्वं व्रतं पाशुपतं शुभम्। गुह्याद्गुह्यतमं सूक्ष्मं वेदसारं विमुक्तये' इत्यारभ्य 'एष पाशुपतो योगस्सेवनीयो मुमुक्षुभिः। भस्मच्छन्नैर्हि सततं निष्कामैरिति हि श्रुति' रित्यंतेन प्रमाणभूतं वैदिकं पाशुपतमुक्त्वा 'वामं पाशुपतं सोमं लागुडं चैव भैरवम्। न सेव्यमेतत्कथितं वेदबाह्यं तथेतर'दिति मोहशास्त्ररूपमवैदिकं पाशुपतमन्यत्संकीर्तितम्। नन्वेतावता कामिकाद्यष्टाविंशति-

प्रभेदस्य सिद्धांततन्त्रस्य वैदिकत्वं नोपपादितं भवति। वायुसंहितायां- शैवागमोऽपि द्विविधः श्रौतोऽश्रौतश्च स स्मृतः। श्रुतिसारमयः श्रौतः स्वतंत्र इतरो मतः। स्वतंत्रो दशधा पूर्वं तथाष्टादशधा पुनः। कामिकादिप्रभेदेन बहुधा स व्यवस्थितः। श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः। परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यत' इति शैवागमस्य वैदिकावैदिकविभागपूर्वकं कामिकादेरवैदिकत्वस्य वायुसंहितैकार्थसर्वज्ञानोत्तरादेर्वैदिकत्वस्य च विभज्य प्रतिपादनात् इति चेत् सत्यम्। तत्र कामिकादेरवैदिकत्वोक्तिस्सर्वथैवावैदिकत्वाभिप्रायेण न भवति किं तु वेदानुक्तमपि तत्र वेदोक्तपूजाद्यपेक्षितं कर्षणादिप्रतिष्ठांतप्रभृति प्रमेयरूपं प्रतिपादितमस्तीत्येतदभिप्रायेण। वराहपुराणे निश्वाससंहितायां हि-'लक्षमात्राप्रमाणतः। सैव पाशुपती दीक्षा योगः पाशुपतश्च सः। एतस्माद्वेदमार्गाद्धि यदन्यदिह जायते तच्छूद्रकर्म विज्ञेयं रौद्रं शौचविवर्जित' मिति निश्वासंसहितोपलक्षितसकलसिद्धांततंत्रव्यतिरिक्तस्य वामाचारयुक्ततया शौचवर्जितस्य लागुडपाशुपतकापालिकालामुखादेरेव रौद्रागमस्यावैदिकत्वप्रतिपादनात्। न च तेषामपि सर्वथैवाप्रामाण्यम्। वैदिकाधिकारिप्रवर्तनाद्यंशेषु मोहशास्त्रत्वेऽप्यवैदिकाधिकारिविषये प्रामाण्यसद्भावादिति। तेषामधिकारिभेदमुत्तराधिकरणे विवेचयिष्यामः। एवमुपादानत्वनिराकरण-स्याप्यभिप्रायांतरकल्पनेन सिद्धांततंत्रस्यापि प्रामाण्यव्यवस्थापने तव्द्याख्यानानामपि तथैव प्रामाण्यं भवेदिति किंविषयमिदमधिकरणं स्यात् इत्याकांक्षायामाह-**इदमधिकरणमिति**। आचार्यांतरोक्तमधिकरणस्य विषयमाह-**अथवेति**। तंत्रान्तरनिराकरणार्थं नेदमधिकरणं किं तु यथा वियदाद्युत्पत्तिशंकापरिहारार्थानि वियदधिकरणादीनि एवमिदं केवलनिमित्तत्वशंका-परिहारार्थमधिकरणम्। न चैवं सति तंत्रांतरनिराकरणार्थेऽस्मिन्पादे संगत्यभावो दोषः स्यादिति वाच्यम्। पादसंगत्यभावेऽपि पूर्वाधिकरणन्यायप्रसक्तावान्त रशंकापरिहारार्यत्वेन प्रासंगिकत्वोप-पत्तेरित्यर्थः। किमत्र मतं ग्राह्यमित्याकांक्षायामाह-**सर्वथेति**। केवलनिमित्तेश्वरवाद-निराकरणस्योभयथापि सिद्धेनैकत्राभिनिवेशे किंचित्फलमस्तीति भावः। पादसंगतेरपि लाभाद्धैरण्यगर्भविषयमिति मतं ज्याय इति स्पष्टमेव।।

इति पाशुपताधिकरणम्।।८।।

इति शिवार्कमणिदीपिका पत्यधिकरणम् समाप्तम्

उत्पत्त्यधिकरणम्।

शाङ्करभाष्यम्

***उत्पत्त्यसम्भवात्*॥४२॥**

येषामप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वरोऽभिमतः, तेषां पक्षः प्रत्याख्यातः ; येषां पुनः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोऽभिमतः, तेषां पक्षः प्रत्याख्यायते॥

ननु—श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राङ् निर्धारितः—प्रकृतिश्चाधिष्ठाता चेति। श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः। तत्कस्य हेतोरेष पक्षः प्रत्याचिख्यासितः—इति. उच्यते; यद्यप्येवञ्जातीयकोंऽशः समानत्वान्न विसंवादगोचरो भवत्यस्तित्वंशान्तरं विसंवादस्थानमित्यतस्तत्प्रत्याख्यानायारम्भः॥

तत्र भागवता मन्यन्ते—भगवानेवैको वासुदेवो निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वम्, स चतुर्धाऽऽत्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण संकर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च। वासुदेवो नाम परमात्मोच्यते। सङ्कर्षणो नाम जीवः। प्रद्युम्नो नाम मनः। अनिरुद्धो नामाहङ्कारः। तेषां वासुदेवः परा प्रकृतिः इतरे सङ्कर्षणादयः कार्यम्। तमित्थम्भूतं परमेश्वरं भगवन्तमभिगमनोपादानेज्या स्वाध्याय योगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यते—इति॥

तत्र यत्तावदुच्यते—योऽसौ नारायणः परोऽव्यक्तात्प्रसिद्धः परमात्मा, सर्वात्मा स आत्मनाऽऽत्मानमनेकधा व्यूह्यावस्थितः-इति, तत्र निराक्रियते; "स एकधा भवति त्रिधा भवति" (छा० ७/२६/२) इत्यादिश्रुतिभ्यः परमात्मनोऽनेकधाभावस्याधिगतत्वात्। यदपि—तस्य भगवतोऽभिगमनादिलक्षणमाराधनमजस्रमनन्यचित्ततयाऽभिप्रेयते, . तदपि न प्रतिषिध्यते; श्रुति स्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्॥

यत्पुनरिदमुच्यते—वासुदेवात्सङ्कर्षण उत्पद्यते—सङ्कर्षणाच्च प्रद्युम्नः, प्रद्युम्नाच्चानिरुद्धः—इति,

अत्र ब्रूमः—न वासुदेवसंज्ञकात्परमात्मनः सङ्कर्षणसंज्ञकस्य जीवस्योत्पत्तिः सम्भवति; अनित्यत्वादिदोषप्रसङ्गात्। उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन्। ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात्; कारणप्राप्तौ कार्यस्य प्रविलयप्रसङ्गात्। प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिम्—''नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः'' (ब्र० सू० २/३/१७) इति। तस्मादसङ्गतैषा कल्पना।।४२।।

***न च कर्तुः करणम्*।।४३।।**

इतश्चासङ्गतैषा कल्पना। यस्मान्न हि लोके कर्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते। वर्णयन्ति च भागवताः—कर्तुर्जीवात्सङ्कर्षणसंज्ञकात्करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते। कर्तजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यते—इति। न चैतद् दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः। न चैवम्भूतां श्रुतिमुपलभामहे।।४३।।

***विज्ञानादिभावे वा तदप्रतिषेधः*।।४४।।**

अथापि स्यात्—नचैते सङ्कर्षणादयो जीवादिभावेनाभिप्रेयन्ते। किं तर्हि? ईश्वरा एवैते सर्वे ज्ञानैश्वर्य शक्ति बल वीर्यतेजोभिरैश्वरै-र्धर्मैरन्विता। अभ्युपगम्यन्ते—वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्याश्च—इति। तस्मान्नायं यथावर्णित उत्पत्त्यसम्भवो दोषः प्राप्नोतीति, अत्रोच्यते; एवमपि तदप्रतिषेध=उत्पत्त्यसम्भवस्याप्रतिषेधः=प्राप्नोत्येवायमुत्पत्त्यसम्भवो दोषः प्रकारान्तरेणेत्यभि-प्रायः।। कथम्? यदि तावदयमभिप्रायः—परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो, नैषामेकात्मकत्वमस्तीति, ततोऽनेकेश्वरकल्पनानर्थक्यम्; एकेनैवेश्वरेणेश्वरकार्यसिद्धेः। सिद्धान्तहानिश्च; भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्।। अथायमभिप्रायः—एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माणः—इति, तथापि तदवस्थ एवोत्पत्त्यसम्भवः। न हि वासुदेवात्सङ्कर्षणस्योत्पत्तिः सम्भवति, सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य; अतिशयाभावात्। भवितव्यं हि कार्य कारणयोरतिशयेन; यथा मृद्घटयोः। न ह्यसत्यतिशये कार्यं कारणमित्यवकल्पते। न च पाञ्चरात्रसिद्धान्तिभिर्वासुदेवादिष्वेकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादि-तारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते। वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते। न चैते भगवद्व्यूहाश्चतुः सङ्ख्यायामेवावतिष्ठेरन्; ब्रह्मादिस्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात्।।४४।।

***विप्रतिषेधाच्च *।।४५।।**

विप्रतिषेधश्चास्मिञ्छास्त्रे बहुविध उपलभ्यते; गुणगुणित्वकल्पनादिलक्षण:, ज्ञानैश्वर्य शक्ति-बल वीर्यतेजांसि गुणा:, आत्मान एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात्। वेदविप्रतिषेधश्च भवति; ''चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानि'' त्यादिवेदनिन्दादर्शनात्।। तस्मादसङ्गतैषा कल्पनेति ।।४५।।

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य द्वितीय: पाद: समाप्त:।।२।।

इति द्वितीयाध्यायस्य साङ्ख्यादिमतानां दुष्टत्वप्रदर्शनं नाम द्वितीय: पाद:।।

इति शाङ्करभाष्यम् उत्पत्त्यधिकरणम् समाप्तम्

वार्तिकम्

उत्पत्त्यसंभवात्।। अधिष्ठातैवेश्वर इति मते निरस्ते प्रकृतिरपि स इति मतस्य वेदसङ्गतार्थत्वात् जीवोत्पत्तावपि प्रमाणत्वम्, अतो जीवस्वरूपतया बोध्यमानाद् ब्रह्मणो जगत्सर्वं ब्रुवतः समन्वयस्य तेन मतेन बाध इति शङ्कायामिदमारभ्यते। एवमविद्वानधिकरणमाक्षिपति- *ननु श्रुतिसमाश्रयणेनेति*।। मैवम्; भागवता हि-परमेश्वरस्य जगदुपादान-निमित्तत्वे पारमार्थिके इत्यभ्युपगच्छन्ति। न च जगत्पारमार्थिकत्वं श्रुतिसंमतम्; तन्मायिकत्वस्यैव श्रुतितात्पर्यसिद्धत्वात्, अन्यथाऽद्वैतविषयत्वक्षतेः। यथा च-श्रुतीनामेतद्विषयत्वम्, तथा समन्वयं प्रदर्शयद्भिरस्माभिरुपपादितम्।।

उत्पत्त्यसंभवाच्च।। न हि निरञ्जनत्वेनावगतात् परमेश्वरात् जगदुत्पत्तिः संभवति। अथोत्पत्तिसिद्धयर्था स्वरूपश्रुतिरसंसारसिद्धयर्था च, तथाऽपि तन्मायिकत्वमभ्युपगम्यते, तथा च न विरोध इति, तत्राह- *उच्यते यद्यप्येवंजातीयकोऽंश इति*।।

विसंवादस्थानं दर्शयितुं तन्मतमाह- *भगवानेवैक इति*।। यत्रांशे विसंवादः, तमंशमह- *यत्पुनरिदमुच्यत इति*।। उपपादयिष्यति च सूत्रकारो जीवस्योत्पत्त्य-संभवमित्याह- *प्रतिषेधिष्यति चाचार्य इति*।।

न च कर्तुः करणम्।।४३।। न च वासुदेवादेः कर्तुः संकर्षणादिकार्योत्पादने स्वव्यापारविषयः किञ्चित् करणकारकं तव मते संभाव्यते। न च करणकारकमव्यापारयन् कर्ता, कार्यं वा निष्करणकं क्वचिद् दृष्टम्। मायायाः करणत्वाभ्युपगमे च संकर्षणादेः कार्यस्य मायिकत्वं प्राप्तम्। एतेन-धर्माधर्मादिकरणत्वम्-प्रत्याख्यातम्; ईश्वरे तदसंभवात्। अथैवं ब्रूषे-अकरणकैव कर्तस्तदुत्पत्तिरभ्युपगम्यते। न चैवं सति व्याप्तिविरोधः ; करणव्यापारे करणविषयकर्तृव्यापारे च व्यभिचारात् तदनङ्गीकार इति-चेत्, मैवम्; तथा सति प्रद्युम्नाख्यकरणव्यूहनिर्माणाभ्युपगम-वैयर्थ्यापत्तेस्तदतिरेकिण्यपि करणसंभवादिति।।

भाष्यं त्वेवं योज्यम्—कर्तुर्हि संकर्षणसंज्ञकाद् जीवात् करणं मनः प्रद्युम्नाख्यं तस्य भवतीति भागवतैरभ्युपगम्यते। किमयमभ्युपगमो भवतां लोकसिद्धनियमबलात्, किं वा श्रुतिबलादिति। नाद्यः; व्यभिचारादित्याह— *न हि लोक इति*।। *न चैतद् दृष्टान्तमन्तरेणेति*।। व्याप्त्यसिद्धया दृष्टान्तस्य दर्शयितुमशक्यत्वादित्यर्थः। नापि द्वितीय इत्याह— *न चैवम्भूतामिति*।।४३।।

विज्ञानादिभावे वा तदप्रतिषेधः।।४४।। अथैवं मन्यसे— *वासुदेवा एवैते चत्वारोऽपि संकर्षणादयः, यतः सर्वेऽपि विज्ञानस्वरूपाः, अविद्यादिदोषरहिताः, निर्विशेषाः, निरुपादानाः, नित्याश्च, अत उत्पत्त्यसम्भवोऽनुगुण एव, न दोषः—इति, तन्न; विज्ञानादिभावे तेषामङ्गीक्रियमाणेऽपि प्रकारान्तरेणोत्पत्त्यसम्भवदोषस्याप्रतिषेधः। कथम्? यदि चत्वार एवैते परस्परभिन्ना जगतश्च, तदा हि तेषां स्वतन्त्रेच्छत्वेन परस्परवैमत्यसम्भवात् जगदुत्पत्त्यसम्भवाद् यस्यैव प्राधान्यम्, स एवेश्वरः, इति न चत्वारोऽपीश्वरा भवेयुः, स्वतन्त्रेभ्यश्चतुर्भ्य उपादानेभ्यः सकलजगदुत्पत्त्यसम्भवः। एकेनैवेश्वरेणेशनायाः कृतत्वाद् इतरेषामानर्थक्यप्रसङ्गाच्च। सम्भूयेशनाकरणे च, नैकोऽपि परमेश्वरस्यात्।।

सिद्धान्तहानिश्च भागवतैरेव—भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्। अथ—एकस्यैव भगवत एते वासुदेवादय एकत्वाद् व्यूहाः समानधर्माणश्चेत्यभ्युपेयते, तर्हि, तदवस्थ एवोत्पत्त्यसम्भवो दोषः, न हि समानधर्मत्वे तेषां परस्परकार्य-कारणभावसम्भवः ; तद्भावस्यातशयकृतत्वात्।।४४।।

विप्रतिषेधाच्च।।४५।। विप्रतिषेधोऽस्मिन् शास्त्रे बहुधोपलभ्यते; यतो ज्ञानैश्वर्यशक्ति तेजसां भगवद्गुणत्वमुक्त्वा—"आत्मानो भगवन्त एवैते सन्तः" इति तेषामेव गुणानां भगवत्त्वमुच्यते। "चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवान्" इत्यादिवेदनिन्दालक्षणो विप्रतिषेधश्च। तस्मादप्यनुपपन्नैषा कल्पनेति सिद्धम्।।४५।। इत्यष्टममुत्पत्त्यधिकरणम्।।

रामकाननतल्पेऽस्मिन् मज्ज्ञाने प्रविशत्वयम्।
परमानन्ददे तस्मिन् अनानन्दः कथं भवेत्।।

इति श्रीमत्परमहंसपरिव्राजकायार्यचगोविन्दानन्दसरस्वतीपूज्यपादशिष्यनारायणसरस्वतीकृतौ श्रीमच्छङ्करभगवत्पादभाष्यवार्तिके द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः।।

वासुदेवाय नमः। रामाय परमात्मने नमः। ॐ नमः श्रीश्रीरामचन्द्राय।।

इति वार्तिकम् उत्पत्त्यधिकरणम् समाप्तम्

प्रदीपः

उत्पत्त्यसम्भवात्।। पाञ्चरात्रमतनिराकरणार्थमिदमधिकरणम्। असम्भवपदघटितत्वादिदं सिद्धान्तसूत्रमेव। एतत्पादगतानां "रचनानुपपत्तेः" "उभयथाऽपि न कर्मातस्तदभावः", "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" "नाभाव उपलब्धेः" "नैकस्मिन्नसम्भवात्" "पत्युरसामञ्जस्यादि" त्यधिकरणादिमसूत्राणामभावपदघटितानां सर्वेषां सिद्धान्तसूत्रत्वात्, 'वा' शब्दघटितोत्तरसूत्रवत्त्वं तु "पत्युसामञ्जस्यादि" त्यत्रापि वर्तते; "अन्तवत्त्वमसर्वज्ञता वे" त्युत्तरसूत्रवत्त्वात्, इत्यस्य सूत्रस्य पूर्वपक्षपरतया योजनं श्रीभाष्यकाराणां नोपपद्यते; सूत्रशैलीविरुद्धत्वात्। अत एवास्याधिकरणस्य पाञ्चरात्रमतसमर्थनपरत्वमपि परास्तम्; स्वार्थासामञ्जस्यसाधकविप्रतिषेधघटितसूत्रवत्त्वात्, रचनानुपपत्त्यधिकरणवत्। विपूर्वकप्रतिषेधशब्दो हि विरोधार्थपर एव, न तु पूर्वप्रस्तुतनिषेधमात्रपरः; कुत्रापि तथाऽदृष्टत्वादिति पाञ्चरात्रप्रमाण्यसमर्थनपरतयाऽस्याधिकरणस्य योजनं प्रौढिवादमात्रम्, न वस्तुस्थित्यनुगुणम्। एवमर्थतैवास्याधिकरणस्यान्यैरपि बहुभिर्भाष्यकारैरवलम्ब्यते। तथा च जीवानामुत्पत्त्यसंभवेन पाञ्चरात्रमतनिराकरणमेवात्र विवक्ष्यते।।

अस्मिन्नधिकरणे–(१) उत्पत्त्यसंभवात्, (२) न च कर्तुः करणम् (३) विज्ञानादिभावे वा तदप्रतिषेधः, (४) विप्रतिषेधाच्चेति चत्वारि सूत्राणि।।

इयमत्र पाञ्चरात्रप्रक्रिया श्रीमहाभारतमोक्षधर्मसंगृहीता–

"धर्मज्ञानेन चानेन सुप्रयुक्तेन कर्मणा।
अहिंसाधर्मयुक्तेन प्रीयते हरिरीश्वरः।।

एकव्यूहविभागो वा क्वचिद् द्विव्यूहसंज्ञितः।
त्रिव्यूहश्चापि सङ्ख्यातश्चतुर्व्यूहश्च दृश्यते।।

हरिरेव च क्षेत्रज्ञो निर्ममो निष्फलस्तथा।
जीवश्च सर्वभूतेषु पञ्चभूतगुणातिगः॥

अकर्ता चैव कर्ता च कार्यं कारणमेव च।
यथेच्छति तथा राजन् क्रीडते हरिरव्ययः॥''

''साङ्ख्यतुल्यो हि भूपाल धर्म एकान्तसंज्ञितः।
नारायणात्मको मोक्षस्ततो याति परां गतिम्॥''

''सोऽनिरुद्ध इति ख्यातस्तत् प्रधानं प्रचक्षते।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम॥''

''आदित्यरन्ध्रगात्राश्च अदृश्याः केनचित् क्वचित्।
परमाण्वात्मभूतास्ते तं देवं प्रविशन्त्युत॥

तस्मादपि विनिर्मुक्ता अनिरुद्धतनौ स्थिताः।
मनोभूतास्ततो भूयः प्रद्युम्नं प्रविशन्त्युत॥

प्रद्युम्नाच्चापि निर्मुक्तो जीवः संकर्षणं ततः।
विशन्ति विप्रप्रवरा साङ्ख्ययोगाश्च तैः सह॥

ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा।
प्रविशन्ति द्विजश्रेष्ठा क्षेत्रज्ञं निर्गुणात्मकम्॥

''पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्।
सर्वावासं वासुदेवं क्षेत्रां विद्धि तत्त्वतः॥

ते समेत्य महात्मानः शरीरमिति संज्ञिताः।
तदा विशत्यन्तरात्मा ह्यदृश्यो लघुविक्रमः।
उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः॥

स जीवः परिसङ्ख्यातः शेषः संकर्षणः प्रभुः।
तस्मात् सनत्कुमारत्वं लभते यः स्वकर्मणा॥

यस्मिंश्च सर्वभूतानि प्रलयं यान्ति संक्षये।
स मनः सर्वभूतानां प्रद्युम्नः परिकथ्यते॥
तस्मात् प्रसूतो यः कर्ता कार्यं कारणमेव च।
सोऽनिरुद्धो य ईशानो व्यक्तिसात्वतकर्मस्तु॥
यस्मात् सर्वं सम्भवति जगत् स्थावरजङ्गमम्।
स वासुदेवो भगवान् क्षेत्रज्ञो निर्गुणात्मकः॥
श्रेयः स एव राजेन्द्र जीवः सङ्कर्षणः प्रभुः।
सङ्कर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते॥
प्रद्युम्नाद्योऽनिरुद्धस्तु सोऽहङ्कारो महेश्वरः।"
"अतो भूयो जगत्सर्वे करिष्यामीति विद्यया॥
आत्ममूर्तिश्चतुर्थी साऽसृजच्छेषमव्ययम्।
स हि सङ्कर्षणाः प्रोक्तः प्रद्युम्नं सोऽप्यजीजनत्॥
प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुनः पुनः॥"

इति। एतैर्हि वचनैः सात्त्वतधर्मनिष्ठाऽहिंसाव्रतं नारायणैकनिष्ठा, कर्तृ-कार्य-करणादीनां नारायणात्मनानुसन्धानम्, अनिरुद्धमात्रव्यूहता, अनिरुद्ध-प्रद्युम्न-सङ्कर्षण-वासुदेवात्मकचतुर्व्यूहः, तत्रापि सङ्कर्षणादीनां परमात्मांशानामपि ततस्तत उत्पत्तिः, परमात्मनः सर्वशरीरकत्वादिकं च प्रतिपाद्यते, सर्वेऽप्यमी अंशा श्रीभाष्यानुयायिभिरपि प्रायेणानुमन्यन्ते। यज्ञकर्मणो हिंसामिश्रस्यापि धर्मत्वं तु केचन वैष्णवावान्तरविभागा अवलम्बन्ते। अपरे तु तेङ्गलैविभागावलम्बिनस्तु सर्वानंशानवलम्बन्त इति त एव मुख्याः पाञ्चरात्राः। अद्वैतिनस्तु बहुषु अंशेषु पाञ्चरात्रमतमनादरणीयं मन्यन्त इति वस्तुस्थितिः॥

संप्रति तु समन्वयविरोधप्रसङ्गे जीवादिसाधारण्येनोत्पत्तिर्जीवशब्दोच्चारणपूर्वकं कुत्रापि नाम्नायते। श्रूयमाणा वोत्पत्तिरन्यपरैवेत्यनन्तरपादे विचारयिष्यते। तत्र प्रथमसूत्रेण जीवोत्पत्तिवादः, विशिष्य संकर्षणात् प्रद्युमनोत्पत्तिवादायोगः, तृतीयेन संकर्षणादीनां परमात्मांशतायामपि तद्दोषतादवस्थ्यम्, तुरीयेण संकर्षणादीनामुत्पद्यमानानामेव परमात्मतावाद-वेदाधिकप्रामाण्य वैदिकयागहिंसादिनिन्दादिवादायोगश्च प्रतिपाद्यत इति विभागः॥

सर्वाणीमानि सिद्धान्तसूत्राणि, न तु श्रीभाष्यादिमत इवाद्यं सूत्रं पूर्वपक्षपरम्, अन्त्यं सूत्रद्वयं सिद्धान्तपरमिति। अत्र तृतीयसूत्रस्य 'वा' शब्दघटितत्वं न सिद्धान्तसूत्रत्वप्रयोजकम्;

अनुपदपूर्वाधिकरणगते ''अन्तवत्त्वमसर्वज्ञता वा'' इति सूत्र एव व्यभिचारात्, ''विप्रतिषेधाच्चे'' ति सूत्रवैयर्थ्यापत्तेश्च, वाशब्देनैव जीवोत्पत्तिप्रतिषेधस्य सिद्धत्वात् तदप्रतिषेधपदवैयर्थ्यापत्तेश्च। यथा च विप्रतिषेधपदमपि ''विप्रतिषेधाच्चासमञ्जसमि'' त्यादाविवाऽप्रामाण्यप्रयोजकार्थसमर्पणपरमेव, न सामञ्जस्यप्रयोजकार्थसमर्पणपरम्, तथा पूर्वमेव विवेचितम्।।

एतेन–तदप्रतिषेधपदमपि–व्याख्यातम्; प्राक्प्रक्रान्तोत्पत्तेरेव परामर्शौचित्येन श्रीभाष्याभिमत-पाञ्चरात्रप्रामाण्यपरामर्शस्यायोगात्। तथा च सूत्राक्षरानुगुण्यं सूत्रकाराशयानुगुण्यं च पाञ्चरात्रमतनिराकरण एव, न तत्समर्थने। यत्तु पाञ्चरात्रस्य मोक्षोपयोगित्वं साङ्ख्यादिशास्त्रस्येव पूर्वोद्धृतमहाभारतवचनैरवगम्यते, तदिदमंशविशेषस्य तदीयस्य भक्तिमार्गादिद्वारा परम्परया मोक्षोपयोगाभिप्रायेणैव, अत एव तदीयात्मबहुत्वम्, पञ्चविंशतितत्त्वैरेव समाप्तिरिति तदीयसिद्धान्तादिकम्, उत्तरत्र–''अशुद्धमिति चेन्न शब्दात्'' इति वैदिकपशुहिंसाद्यधर्मवादश्च तदीयो विशदं सूत्रकारैर्निरस्यते। तदिदं सर्वमभिप्रेत्य पूर्वाधिकरणार्थसङ्कलन- पूर्वकमुक्ताधिकरणप्रतिपाद्यार्थं संक्षिपति–*येषामित्यादिना–पक्षः प्रत्याख्यायत *इत्यन्तेन*।। यद्यप्यभिन्ननिमित्तोपादानमीश्वर इति सामान्यमद्वैत पाञ्चरात्रयोः, तथापि न कारणावलम्बिनीयं चर्चा, किन्तु कार्यालम्बिनी। कार्यं तु जीवसाधारणं जगत् पाञ्चरात्रमते, तेन च प्रपञ्चमात्रे ब्रह्मविवर्तोपादानतया चतन्यमात्रसत्यता जीव-ब्रह्माभेदश्च विरुद्ध्यते, इति तंदशमादायैव पाञ्चरात्रमतनिरसनमिति वस्तुस्थितिः। तदिदमाक्षेपसमाधानाभ्यामाह– *नन्वित्यादिना*- तत्प्रत्याख्यानायारम्भ इत्यन्तेन*।।

पाञ्चरात्रप्रक्रियामनुवदति–*तत्रेत्यादिना–प्रतिपाद्यत इत्यन्तेन*।। अत्राविप्रतिपन्नानंशान् संगृह्णाति–*तत्रेत्यादिना–प्रसिद्धत्वादित्यन्तेन*।। विप्रतिपन्नं संकर्षणाद्युत्पत्तिवादमनूद्य सूत्रव्याख्यानपुरस्सरं तदयोगं प्रतिपादयति–*यत्पुनरित्यादिना–प्रविलयप्रसङ्गादित्यन्तेन*।। पाञ्चरात्रप्रक्रियायां सङ्कर्षणाद्युत्पत्तिवादा मोक्षधर्मतोऽनुपदमेव संगृहीताः। येषां श्रीभाष्यकारादीनां पाञ्चरात्रमतेऽपि जीवनत्यित्वमेव, तदुत्पत्तिवादस्य पाञ्चरात्रग्रन्थेषु प्रतिषेधादिति मतम्, तन्मते निर्मूलैवेयं शङ्का सूत्रकाराणां तैर्वक्तव्येत्युक्ताधिकरणवैयर्थ्यमेव समापतति। अत उत्पत्त्यसम्भवः सूत्रकारैः सिद्धान्त एव हेतुतया विवक्ष्यते। तथा च पाञ्चरात्राणामपि यद्युत्पत्त्यसंभव एव विवक्षितः, तर्हि कथमस्य पूर्वपक्षयुक्तितेति मन्तव्यम्। तदिदं सूचयन्–*जीवोत्पत्तिनिषेधपरं सूत्रमप्युपरितनपादगतमत्रानुसन्धत्ते–प्रतिषेधिष्यति चेति*।। तथा च जीवोत्पत्तिवादस्योपरि निरसिष्यमाणत्वादिदमधिकरणम्, अनेनैव गतार्थत्वात् तदधिकरणं वा वितथमापद्येतेति भावः। तथा च पूर्वपक्षानुत्थितिः, ''विप्रतिषेधाच्चे''ति सूत्रवैयर्थ्यम्, नात्माश्रुतेरित्यधिकरणेन पौनरुक्त्यं च श्रीभाष्यमत इति निष्कर्षः। उपसंहरति–*तस्मादिति*।।

सङ्कर्षणोत्पत्तिवाद-योगेन-तन्मतं निरस्य प्रद्युम्नोत्पत्तिवादायोगेनापि तन्मतं निरस्यति-*न च कर्तुः करणमिति*।। कर्तुरिति पञ्चमी, करणं मनः। सङ्कर्षणाद् जीवात् प्रद्युम्नस्योत्पत्तिवादो न संभवतीति-परमात्मनः सङ्कर्षणस्य कथञ्चनोत्पत्तिः संभवदुक्तिका, प्रद्युम्नस्य तु जीवात् कर्तुस्तत्संभव एव न युज्यत इत्याह-*यस्मादित्यादिना*।।

ननु-सङ्कर्षणप्रद्युम्नादीनां परमात्मस्वरूपत्वाद् नोत्पत्तिसम्भवः, इत्युत्पत्त्यसम्भवोऽयं नाप्रामाण्यप्रयोजकः ; अविरुद्धत्वादित्याशङ्क्य तन्निषेधार्थं सूत्रम्-*विज्ञानादिभावे वा तदप्रतिषेध इति*।। वाशब्दोऽप्यर्थकः विज्ञानादिभावे वेति सप्तम्यन्तेनान्वीयते। तेन विज्ञानादिभावेऽपीत्यर्थ। तदिदमाह-*एवमपीति*।। श्रीभाष्याद्युक्तरीत्या 'तु'-शब्दपर्यायत्वेन भिन्नार्थप्रतिपादकत्वे तु तदप्रतिषेधपदेनान्वयः स्यात्। तत्र तु ''विज्ञानादिभावे तदप्रतिषेधस्त्विति सूत्राकारापत्तिः ; ''एकं वा संयोगरूपचोदनाख्याविशेषात्'' ''महदीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्'' इति प्रथमान्तोत्तरवाशब्दस्यैव सिद्धान्तसूचकत्वस्य दर्शनात्। अत आक्षेपानुवादपूर्वकमतनिरास एवात्रार्थ इति स्वीकर्तव्यम् ''समुदाय उभयहेतुकेऽपि तदप्राप्तिरि'' त्यादाविव।।

वस्तुतस्तु पूर्वपक्षसूत्रानन्तरसिद्धान्तसूत्रेषु कुत्रापि न सिद्धान्तः केरलेन वापदेन सूच्यते, इति वाशब्दस्यास्य सिद्धान्तसूचकतावादः सूत्रशैलीविरुद्ध एव। एतेन-सूत्राक्षराननुगुणत्वं भगवत्पादानां भाष्यस्येति श्रीभाष्योक्तिरपि-नावसरति। यद्यपि श्रीभाष्ये कथं सूत्राक्षरानानुगुण्यमिति न प्रदर्शितम्, तथापि श्रुतप्रकाशिकायां वाशब्दस्वारस्यभङ्गस्तत्र कारणं प्रतिपादितमिति मन्तव्यम्।।

तदप्रतिषेधपदं व्याचष्टे-उत्पत्त्यसम्भवस्याप्रतिषेध इति*।। सङ्कर्षणाद्युत्पत्तिर्महाभारतादौ प्रतिपादिता, तथापि विरुद्धैव; परमात्मनोऽप्युत्पत्त्यसम्भवात्। तथा चोत्पत्त्यसम्भवदोषो दुरपह्नव एवेति भावः। श्रीभाष्यकारास्तु-तदप्रतिषेधपदम् पाञ्चरात्रप्रामाण्यप्रतिषेधासम्भवपरमिति-व्याचक्षते। तत्र च तदुक्तरीत्या वाशब्देनैव गतार्थत्वादुक्तपदवैयर्थ्यम्, तत्पदेन सूत्रोपात्तोत्पत्तिपरित्यागेन पाञ्चरात्रप्रामाण्यस्य परामर्शानुपपत्तिः, परमात्मभावेऽपि तदुत्पत्तिवाक्यानामनन्वयदोषापरिहारश्च। अत्र वाशब्दस्याप्यर्थकत्वेन विज्ञानादिभावस्य विरोधः सूच्यते। तदिदमाह-*यदीत्यादिना-अभ्युपगमादित्यन्तेन*।। विज्ञानादिभावे वेत्यादिपदेन विज्ञानसमानत्वं विवक्ष्यते, तथा च परमात्मभेदेऽपि तत्सादृश्यादुत्पत्त्यसम्भवोऽपि न सम्भवतीति सूचनार्थमादिपदमित्यभिप्रायेणाह-*अथायमित्यादिना*।।

अत्रायंशब्देन तत्साम्यमपि विरुद्धं सूचितमित्याह-*न च पाञ्चरात्रेति*।। श्रीभाष्यमते तु विज्ञानपदेनैव परमात्मपरिग्रहादादिपदवैयर्थ्यमिति मन्तव्यम्। वस्तुतस्तु सङ्कर्षणादीनां

जीवत्वमुल्लिख्यैवोत्पत्तिरुक्तमहाभारतादाववगम्यत इति परमात्मव्यूहानामपि तेषां परमात्मसाधर्म्यकल्पनाऽनुपपन्ना; जीव-ब्रह्मणोस्तन्मतेऽभेदायोगात्। अन्यथाऽस्मदादीनामपि परमात्मव्यूहत्वापत्तिः। इष्टापत्तौ चोक्तवचनानां सर्वजीवीत्पत्तौ तात्पर्यमङ्गीकरणीयम्, इति जीवसामान्योत्पत्त्यङ्गीकाराद् उत्पत्त्यसम्भवदोषः सङ्कर्षणादिपरमात्मभावस्वीकारेऽप्यपरिहरणीय इत्याह– *न चैत इति*।।

अन्येऽपि केचनांशा विरुद्धा अत्र वर्तन्त इत्याह सूत्रकारः– *विप्रतिषेधाच्चेति*।।४५।। ''विप्रतिषेधाच्चासमञ्जसमित्यत्र विप्रतिषेधपदस्य विरोधार्थ एव प्रयोगाद् लोकेऽपि तत्रैव प्रयोगाद् अन्यथा वि-पदवैयर्थ्याच्च केवलनिषेधपरतया विवरणमसम्भवं मत्वा व्याचष्टे– *विप्रतिषेधाच्चेति*।। विरोधादित्यर्थः। विरोधानेव दर्शयति– *गुणगुणित्वकल्पनादीति*।। निर्गुणस्यैव गुणगुणित्वादिकल्पनादित्यर्थः। वेदनिन्दादर्शनमपि विरुद्धं दृश्यत इत्याह– *वेदेति*।।

चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानिति। भूमविद्योपक्रमे ''ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चममि'' त्यारभ्य सर्वं विद्यास्थानमभिधाय सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्''इति तु मन्त्रज्ञानमेव, नार्थज्ञानमिति प्रतिपादनपरम्, न तु भूमविद्यातिरिक्तभानेष्वात्मविद्याऽभावपरम्, इति न विरुद्धम्, नैवमत्र; सर्वेषु वेदेषु विचार्यापि श्रेयः प्राप्तिनिमित्तं न ज्ञातमिति विरुद्धार्थप्रतिपादकत्वात्, इदं शास्त्रमधिगतवानित्यस्यैव प्रामाण्यस्यापि व्यवस्थापनाच्चेति वेदनिन्दापरमेवेदं वाक्यम्।।

परमसंहितायां तु–

''श्रुता हि भगवन् वेदाः साङ्गोपाङ्गाः सविस्तराः।
न चैतेषु समस्तेषु संशयेन विना क्वचित्।।
श्रेयोमार्गं प्रपश्यामि केन सिद्धिर्भविष्यति।
वेदान्तेषु यथा सारं संगृह्य भगवान् हरिः।।
भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथासुखम्।।''

इत्यत्र तु वेदार्थसंग्राहकमिदं शास्त्रमिति प्रतिपाद्यत इति परस्परविरुद्धव्यपदेशाद् विप्रतिषेध इति भावः। सर्वथा तु–

"एवमेकं साङ्ख्योगं वेदारण्यकमेव च।
परस्पराङ्गान्येतानि पाञ्चरात्रं तु कथ्यते॥"

इति वाक्यं तु साङ्ख्योग-वेदारण्यकपाञ्चरात्राणां त्रयाणामङ्गाङ्गिभावमेव प्रतिपादयति, न तु साङ्ख्ययोगवेदारण्यकानामेव पाञ्चरात्रत्वम्, अन्यथा-

"साङ्ख्य योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै॥"

इति साङ्ख्योगवेदव्यतिरेकेण पाञ्चरात्रस्य वेदविलक्षणमतताप्रतिपादनासङ्गत्यापत्तेः। तथा च "पाञ्चरात्रं च कथ्यते" इत्यत्र यच्च पाञ्चरात्रमिति कथ्यत इत्येव योजना युक्ता। तथा च वेदव्यतिरिक्तत्वेन पाञ्चरात्रस्य "सांख्यं योगः पाञ्चरात्रमि"ति वाक्ये परिगणनेनापि ज्ञायते वेदनिन्दयैव "चतुर्षु वेदेषु श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानि"ति वाक्यं प्रवृत्तमिति ज्ञायत इति नास्य वाक्यस्य वेदनिन्दायां तात्पर्यमिति कल्पनापि परास्ता॥

सति चैवम्-"साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।" इति परिगणितानां वेदव्यतिरिक्तानां नानामतानां सर्वेषां निरासो वेदविरुद्धांशमादय क्रियत इत्येव सूत्राशयः। अविरोधाध्याये प्रथमाध्याय-प्रतिपादितप्रतिज्ञाविरुद्धानां विरोधपरिहारो निरासो वा कर्तु शक्यते, नापूर्वप्रतिज्ञान्तरमपि। अद्वैतिनां मतरीत्या-"महद्दीर्घ वद्वे"ति सूत्रेणानुषङ्गतः स्वमतसमर्थनं क्रियमाणमपि नापूर्वप्रतिज्ञाविशेषः। श्रीभाष्यकारास्तु पाञ्चरात्रप्रामाण्यमपि न केनापि सूत्रेण प्रतिज्ञातं प्रथमाध्यायविवरणावसरे प्रतिपादयन्ति, इति कथमकस्मात् पाञ्चरात्रप्रामाण्यप्रतिज्ञाया अवसरः। तदिदं सिद्धं यत् पाञ्चरात्रस्यापि साङ्ख्ययोगादिप्रायपठितस्य निरास एवात्राधिकरणार्थः, विप्रतिषेधाच्चेत्यस्याप्यत्रैव स्वारस्यात्॥

अयं भावः-प्रतिपादमन्तिमेनाधिकरणेन तत्तत्पादार्थमपि सूत्रकाराः सूचयन्ति। तद्यथा-"जीवमुख्यप्राणलिङ्गादिति चेन्ने"ति सूत्रेण स्पष्टब्रह्मलिङ्गवाक्यविषयता, "आमनन्ति चैनमि"त्यनेन त्वस्पष्टब्रह्मलिङ्गविषयता, "सुषुप्त्युत्क्रान्त्योर्भेदेने"ति निर्गुणवाक्यप्राधान्यम्, सर्वे व्याख्याता इति पदविशेषो व्याख्यायत इति शब्दविशेषविचारः, "सर्वधर्मोपपत्ते"रिति स्वमतसमर्थनमिति। सति चैवं विप्रतिषेधपदमपि विरोधार्थकमेव युक्तम्; अनुपपत्तिप्रदर्शनमुखेन प्रामाण्यनिरसनोपयोगितया॥

किञ्चान्यत्। सूत्रकारैः—ब्रह्मस्वरूपविचारपरयोः प्रथमद्वितीयाध्याययोर्जीवब्रह्माभेदपर्यवसायिन एव भावाः सङ्कल्प्यन्ते—यथा—प्रथमाध्यायप्रथमपादान्ते मांपदेन परमात्मनो ग्रहणव्यवस्था, द्वितीयपादान्ते प्रत्यगात्मत्वाभिप्रायाऽभिविमानत्वश्रुतिव्यवस्था, तृतीयपादान्ते ''योऽयं विज्ञानमय'' इत्यस्य शुद्धप्रत्यगात्मपरत्वव्यवस्था, चतुर्थपादान्ते एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाद्वारा ब्रह्मव्यतिरिक्ताभावव्यवस्था, द्वितीयाध्यायप्रथमपादान्ते पूर्वाधिकरणेषु विचारितमनोमयत्व सत्यकामत्व-निर्गुणत्वादिसर्वधर्मव्यवस्था, द्वितीयाध्यायतृतीयपादान्ते''ऽंशो नानाव्यपदेशादि'' त्यभेद एव तात्पर्यव्यवस्था, द्वितीयचतुर्थपादान्ते च ''हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्ये''ति वाक्यार्थव्यवस्थायां जीवब्रह्मैक्यानुसन्धानमित्यद्वितीय- प्रयोगभिन्न-ब्रह्मात्मतायामेव तात्पर्ये स्वीकरणीये कथमकारणमेव तद्विरुद्धं पाञ्चरात्रप्रामाण्यसमर्थनमिति सर्व एव भावयन्तु।।

यदा तु—प्रतिपादान्तमुपरितनपादार्थोऽपि सूच्यते—यथा ''जीवमुख्यप्राणलिङ्गादि''त्येतावन्मात्र-समालोचनेनोपरितनपादेऽस्पष्टब्रह्मलिङ्गविचारः, आमनन्तिपदेन द्वितीयपादान्त्ये उपदेशविचारः, न व्यपदेशविचार इति निर्गुणवाक्यचर्चा भाविनी, ''पत्यादिशब्देभ्यः'' इति तुरीयपादे शब्दानामेव विचारो भावी, ''एतेन सर्वे व्याख्याता'' इति मतान्तराविरोधो द्वितीयप्रथमपादे, ''सर्वधर्मोपपत्ते'' रित्यनेन धर्मोपपत्तिमात्रेण मतान्तराणां केषांचनासामञ्जस्यव्यवस्था, तृतीयपादे ''प्रदेशादिति चेन्नान्तर्भावात्'' इति सूत्रेऽन्तर्भावपदेन द्वितीय-चतुर्थपादे आन्तरप्राणादिविचारो भविष्यतीति सूच्यत इति सूत्रशैल्यपि समालोच्यते, तदा तु ''विप्रतिषेधाञ्चेति सूत्रेणापि द्वितीयतृतीयपादे भाविनी श्रुतिपरस्परविरोधचर्चेति सूचनमेव सूत्रकाराभिमतमिति वक्तव्यमिति विप्रतिषेधपदस्य प्रतिषेधमात्रपरत्वं सर्वथाऽनुपपन्नमित्यवगन्तव्यम्।।४५।। इत्यष्टममुत्पत्त्यधिकरणम्।।

इति शारीरकमीमांसाभाष्यप्रदीपे युक्तिविरोधपरिहारो नाम द्वितीयः पादः।।

इति प्रदीपः उत्पत्त्यधिकरणम् समाप्तम्

भामती

अन्यत्र वेदाविसंवादाद्यत्रांशे विसंवादः स निरस्यते, तमंशमाह। ***यत्पुनरिदमुच्यते***। *वासुदेवात्संङ्कर्षणो जीवः-इति जीवस्य कारणवत्त्वे सत्यनित्यत्वम्, अनित्यत्वे पर लोकिनोऽभावात्परलोकाभावः, ततश्च स्वर्गनरकापवर्गाभावापत्तेर्नास्तिक्यमित्यर्थः। अनुपपन्ना च जीवस्योत्पत्तिरित्याह **प्रतिषेधिष्यति चेति** ।।४२।। यद्यप्यनेकशिल्पपर्यवदातः परशुं कृत्वा तेन पलाशं छिनत्ति, यद्यपि च प्रयत्नेनेन्द्रियार्थात्ममनः सन्निकर्षलक्षणं ज्ञानकरणमुपादायात्मार्थं विजानाति, तथापि सङ्कर्षणोऽकरणः कथं प्रद्युम्नाख्यं मनः करणं कुर्यात्। अकरणस्य वा करणनिर्माणसामर्थ्ये कृतं करणनिर्माणेनाअकरणादेव निखिलकार्यसिद्धेरिति भावः।।४३।। वासुदेवा एवैते सङ्कर्षणादयोः ***निर्दोषा*** अविद्यादिदोषरहिताः। **निरधिष्ठाना** निरुपादाना अत एव **निरवद्या** अनित्यत्वादिदोषरहिताः। तस्मादुत्पत्त्यसम्भवोऽनुगुणत्वान्न दोष इत्यर्थः। **अत्रोच्यते एवमपीति**। मा भूदभ्युपगमेन दोषः, प्रकारान्तरेण त्वयमेव दोषः। प्रश्नपूर्वं प्रकारान्तरमाह ***कथं? यदि तावदिति***। न तावदेते परस्परं भिन्ना ईश्वराः परस्परव्याहतेच्छा भवितुमर्हन्ति; व्याहतकामत्वे च कार्यानुत्पादात्। अव्याहतकामत्वे वा प्रत्येकमीश्वरत्वे एकेनैवेशनायाः कृतत्वादानर्थक्यमितरेषाम्। सम्भूय चेशनायां परिशुद्धो न कश्चिदीश्वरः स्यात्, सिद्धान्तहानिश्च, भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्। तस्मात्कल्पान्तरमास्थेयम्। तत्र चोत्पत्त्यसम्भवो दोष इत्याशयवान् कल्पान्तरमुपन्यस्योत्पत्त्यसम्भवेनापाकरोति ***अथायमभिप्राय इति***। सुगममन्यत्।।४४।। **गुणिभ्यः** खल्वात्मभ्यो ज्ञानादीन् गुणान् भेदेनोक्त्वा पुनरमेदं ब्रूते ***आत्मान एवैते भगवन्तो वासुदेवा इति***। आदिग्रहणेन प्रद्युम्नानिरुद्धयोर्मनोऽहङ्कारलक्षणतथात्मनो भेदमभिधायात्मान एवैत इति तद्विरुद्धाभेदाभिधानमपरं संगृहीतम्। वेदविप्रतिषेधो व्याख्यातः।।४५।। इत्यष्टममुत्पत्त्यधिकरणम्

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे

भामत्यां द्वितीयाध्यायस्य द्वितीयः पादः।

इति भामती उत्पत्त्यधिकरणम्समाप्तम्

श्री कण्ठभाष्य

अथ पाञ्चरात्राधिकरणम्।।९।।

।।सू।। **उत्पत्त्यसंभवात्**।।३९।।

पञ्चरात्रमतं वासुदेवोक्तम्। तत्र जीवोत्पत्त्यादिकमुच्यते। तत् संभवति न वेति संदेहः।।

संभवतीति पूर्वः पक्षः। कुतः? भगवता वासुदेवेन प्रोक्तस्य प्रमाणत्वात्। तथा ह्यत्र प्रक्रिया-भगवानेको वासुदेवः परमात्मा। तस्मात् संकर्षणाख्यो जीवो जायते। जीवाच्च प्रद्युम्नाख्यं मनः। मनसश्चानिरुद्धाख्योऽहंकारः। एते चत्वारो व्यूहा सर्वात्मान इति। अतो वासुदेवस्य हिरण्यगर्भादिभ्योऽपि परत्वेन तदुक्तस्य प्रामाण्यादिदं सर्वमुपपन्नम्।।

इति प्राप्ते ब्रूमः। जीवोत्पत्त्यभिधायकमिदं शास्त्रमप्रमाणम्; कृतनाशाकृताभ्यागमप्रसङ्गेत जीवोत्पत्त्यसंभवात्। एकस्मिन् किंचित् पुण्यापुण्यात्मकं कर्म कृत्वा प्रलये नष्टे तदन्यः कश्चिज्जीवः प्राप्नोतीत्यकृताभ्यागमः। पूर्वस्य कृतस्य नाश इत्यादिर्दोषः। ततो जीवोत्पत्त्यभिधायकं शास्त्रमप्रमाणम्।।

इयं चान्यानुपपत्तिरित्याह-

।।सू।। **न च कर्तुः करणम्**।।४०।।

संकर्षणाख्याज्जीवात् प्रद्युम्नाख्यं मनो जायत इत्युच्यते। कर्तुर्जीवाच्च करणोत्पत्तिर्न संभवति, तस्य प्रकृतिकार्यत्वेन चेतनकार्यत्वानुपपत्तेः।।

।।सू।। **विज्ञानादिभावे वा तदप्रतिषेधः**।।४१।।

विज्ञानशब्दो जीववाचकः। अत्र जीवादीनामुत्पत्तिर्नाभिधीयते। किंतु संकर्षणादीनां जीवादिभाव उच्यते। जीवाद्यधिष्ठातृत्वं जीवादिभाव इति ततस्तच्छास्त्रप्रामाण्यप्रतिषेधो मा भूदिति शङ्कार्थः।।

।।सू।। **विप्रतिषेधाच्च**।।४२।।

एवं जीवोत्पत्त्यभिधाने परिहृतेऽपि पाञ्चरात्रमतस्य नाभ्युपगमः, श्रुतिविरुद्धेश्वरकारणवाद-मुक्तिहेतुत्वतप्तमुद्राधारणादिधर्मपरत्वादिना विप्रतिषेधात्। अतः पाञ्चरात्रमतमसमञ्जसम्।।

'पाञ्चरात्रे च बौद्धे च तथा कालामुखेऽपि च।

श्रद्धया दीक्षिता यूयं भवत ब्राह्मणाधमाः।।'

इत्यादिषु च विशेषेणास्य प्रतिषेधो दृश्यते। अतो विप्रतिषेधात् अप्रमाणं पाञ्चरात्रं मतम्।।

ननु 'पुरुषो वै रुद्रः' इत्यादिश्रुत्या परमेश्वर एव पुरुषो वासुदेवः, तज्ज्ञानाराधनादिकमपि क्रमेण परमेश्वरपदप्राप्तिसाधनमिति श्रूयते। तदाराधनप्रतिपादकस्य पाञ्चरात्रस्याप्रामाण्ये तस्यानाराध्यत्वप्रसङ्ग इति चेत्-न। श्रुतिविरोधात् पाञ्चरात्रस्याप्रामाण्येऽपि तस्य का हानिः। श्रुतिप्रसिद्धमार्गेण तदाराधनसंभवात्। अतो न विरोधः।। इति पाञ्चरात्राधिकरणम्।।९।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये

द्वितीयस्याध्यायस्य द्वितीयः पादः।।२।।

इति श्री कण्ठभाष्य उत्पत्त्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ पाञ्चरात्राधिकरणम्॥९॥

हैरण्यगर्भमतनिराकरणानंतरं वैष्णवमतनिराकरणार्थमधिकरणम्-सू॥ **उत्पत्त्यसंभवात्**॥३९॥ **जीवोत्पत्त्यादिकमिति**। आदिशब्देन जीवान्मनउत्पत्तिर्वासुदेवस्य परमकारणत्वमित्यादि गृह्यते। यद्यपि जीवविशेषे हिरण्यगर्भे भ्रांतिसंभवात्तदुक्तमीश्वरस्य केवलनिमित्तत्वं न ग्राह्यम्। तथाऽपि पारमेश्वरपरशक्तयंशतया परमेश्वरस्यैवावस्थाविशेषरूपे भगवति वासुदेवे भ्रांतिलेशस्याप्यसंभवात् तदुक्तं जीवोत्पत्त्यादिकं तथैव ग्राह्यमिति पूर्वपक्षयति-**संभवतीति**। ननु शरीराद्युपाधिका जीवोत्पत्तिः सिद्धांतेऽपि संमता कथं पूर्वपक्षतया निवेश्यते इत्यशङ्क्य पाञ्चरात्रे जीवस्योच्मानोत्पत्तिर्न शरीराद्युपाधिका। मनोहंकारयोरपि सृष्टेः प्रागुच्यमानत्वादिति दर्शयितुं तत्प्रक्रियामुपन्यस्यति-**तथा हीति**। **एते चत्वार इति**। भगवव्द्यूहचतुष्टयात्मकः सर्वः प्रपञ्च इत्यर्थः। जीवोत्पत्तिवादे 'न जायते म्रियते वा विंपश्चि' दित्यादिश्रुतिविरोधो 'नात्माश्रुते' रि(ब्र-२-३-१४-सू) त्यधिकरणे व्यक्तो भविष्यतीति युक्तिविरोधमाह-**एकस्मिन्निति**। जीवोत्पत्तिरिव जीवान्मन उत्पत्तिरपि नोपपद्यत इत्येतदर्थमुत्तरसूत्रमित्याह-**इयञ्चेति**। सू॥ **न च कर्तुः करणम्**॥४०॥ **चेतनकार्यत्वानुपपत्तेरिति**। पंचम्योच्यमानं जीवोपादानकत्वं नैवोपपद्यत इत्यर्थः। सू॥ **विज्ञानादिभावे वा तदप्रतिषेधः**॥४१॥ वाशब्दात् पक्षविपरिवृत्तेरिदं पूर्वपक्षसूत्रम्-**जीववाचक इति**। 'विज्ञानं यज्ञं तनुते' इत्यादिश्रुतिप्रयोगादित्यर्थः। परमकारणात् परब्रह्मभूतात् वासुदेवात्संकर्षणो नाम जीवो जायते। संकर्षणात् प्रद्युम्नसंज्ञमनो जायते। तस्मादनिरुद्धसंज्ञोऽहंकारो जायत इति पाञ्चरात्रग्रंथे जीवाद्युत्पत्त्यभिधानमनभ्युपगम्य तेशु सकंर्षणप्रद्युम्नानिरुद्धानां भावे अधिष्ठातृत्वेन सद्भावेऽभिधेयेऽभ्युपगम्यमाने तस्य ग्रंथस्याप्रतिषेधः प्रामाण्यनिषेधो न भवति। परिपूर्णषाङ्गुण्यशालिनो वासुदेवस्य एकैककगुणयुगलाभिव्यक्तिमज्जीवा- द्यधिष्ठातृसंकर्षणा- दिव्यूहरूपेण प्रादुर्भावेतात्पर्योपपत्तेरिति सूत्रस्यार्थं दर्शयति-**अत्र जीवादीनामिति**।सू॥ **विप्रतिषेधाच्च**॥४२॥ परिहृतेऽपीत्यपिशब्देन परिहारस्याभासतां सौत्रचकारसमुच्चितयुक्तिसिद्धां

द्योतयति। तत्रायमभिप्रायः। जीवादिशब्दानां प्रसिद्धार्थमपहायाप्रसिद्धजीवाद्यधिष्ठातृत्वरूपार्थांतरकल्पनायां किं प्रमाणम्। उदाहृतग्रंथे तेषां संकर्षणादिविशेषणत्वमिति चेत् भ्रांतोऽसि। संकर्षणादिशब्दाः खल्वत्र संज्ञात्वेन जीवादिविशेषणतया निर्दिष्टाः। तेन प्रसिद्धानामेव जीवमनोऽहंकाराणां पाञ्चरात्रपरिभाषया संकर्षणप्रद्युम्नानिरुद्धनामानि भवन्ति। संकर्षणादिनामभिरनूद्य तस्मिन् शास्त्रे विग्रहायुधादिविधानं तेषामेव ध्यानार्थं भवति। ककाराद्यक्षराणां वर्णविशेषविधानवत् संकर्षणाद्यर्चनविधानञ्च जीवादिविषयमेव भवति। यत्र शास्त्रे यश्शब्दो यत्रार्थे परिभाषितः, तत्र तस्य शब्दस्य स एव खल्वर्थो ग्राह्यः। शब्दशास्त्रगतनदीवृद्ध्यादिसंज्ञार्थवत्। ननु, पांचरात्र एव जीवं प्रकृत्य 'स ह्यनादिरनंतश्च परमार्थेन निश्चित' इत्युक्तम्। एवं तर्हि वक्ष्यमाणो वेदविरोध इव परस्परविरोधोऽपि कश्चन सूत्रार्थभूतो विप्रतिषेधो भविष्यति। ननु यत्र भ्रांतिलेशस्यापि शङ्का न प्रवर्तते स कथं भगवान् वासुदेवः श्रुतियुक्तिस्ववचनविरुद्धां जीवोत्पत्तिं ब्रूयात्? सत्यम्। भ्रांत्या न ब्रूयादिति। विप्रलिप्सया तु ब्रूयादेव। दृष्टो हि तस्यावतारविशेषे विप्रलंभः। क्लृप्तश्च पांचरात्रेऽपि सः। मोहशास्त्रत्वप्रसिद्धेः। ननु भारतादिषु पाञ्चरात्रस्य प्रामण्यमपि प्रतिपादितं तर्हि अयमपि कश्चन विप्रतिषेधः सूत्रोक्तो भविष्यति। वस्तुतस्तु नायं विप्रतिषेधोऽस्ति। अननुष्ठेयांशेषु कुण्डगोलकस्त्रीशूद्रादिवेदानधिकृतविषयतया प्रामाण्यं तत्र वैदिकाधिकारवर्णनविषये जीवोत्पत्त्यादिश्रुतियुक्तिस्ववचनविरुद्धविषये चाप्रामाण्यमिति व्यवस्थोपपत्तेः। इयं व्यवस्था कौर्मे दर्शिता। तत्र हि 'स तेषां मायया जातं गोवध्रं गौतमो मुनिः। केनापि हेतुना ज्ञात्वा शशापातीव कोपनः। भविष्यथ त्रयीबाह्या महापातकिभिः समाः'। इत्यादिना वेदबाह्यत्वेन गौतमशपतान्प्रस्तुत्य 'सर्वे संप्राप्य देवेशं शंकरं विष्णुमव्ययम्। अस्तुवन् लौकिकैः स्तोत्रैरुच्छिष्टा इव सेवकाः।।' इत्यादिना शिवकेशवसन्निधौ तेषां वैदिकमन्त्रैः स्तोत्रेऽनधिकारात् भाषाप्रबंधैः स्तुतिपूर्वकं गतिप्रार्थनामुपन्यस्य 'तस्माद्वै वेदबाह्यानां रक्षणार्थं तु पापिनाम्। संमोहनाय शास्त्राणि करिष्यावो वृषध्वज। एवं संचोदितो रुद्रो माधवेन मुरारिणा। चकार मोहशास्त्राणि केशवोऽपि शिवेरितः।' इत्यादिना वेदबाह्यत्वेऽप्यन्तःकरणशुद्धिमतां रक्षणार्थं वैदिकत्वेऽपि मलिनचित्तानां विमोहनार्थं च शिवकेशवाभ्यां पाशुपतपाञ्चरात्रादीनि निर्मितानीति श्रुतम्। कुण्डगोलकादीनां पांचरात्रेऽधिकारोऽपि कौर्मे दर्शितः। अथांशोस्सात्वतो नाम विष्णुभक्तः प्रतापवान्। महात्मा दाननिरतो धनुर्वेदविदां वरः। स नारदस्य वचनात् वासुदेवार्चने रतः। शास्त्रं प्रवर्तयामास कुण्डगोलादिभिः श्रितम्। तस्य नाम्ना तु विख्यातं सात्वतं नाम शोभनम्। प्रवर्तते महाशास्त्रं कुण्डादीनां हितावह'मिति। पांचरात्रे स्त्रीशूद्राधिकारस्त्रिवक्रापुत्रमुपश्लोकं प्रस्तुत्य भागवते वर्णितः। 'तेनात्तं सात्वतं तन्त्रं यज्ज्ञात्वा मुक्तिभाग्भवेत्। यत्र स्त्रीशूद्रदासानामधिकारः परः स्मृतः। संस्कारो वैष्णवः' इति। पाञ्चरात्रप्रविष्टस्य च क्रमेण वैदिकमार्गावाप्तिद्वारा श्रेयः प्राप्तिरित्युक्तम्। वासिष्ठलैंगे तत्र हि शांडिल्यं प्रति

भगवद्वचनम्-'मत्तंत्राश्रयणेनैव मत्पूजा च कृता त्वया। तया न प्रीतवानस्मि तव शाण्डिल्य दुर्मते। कुमार्गेणापि शांडिल्य कृता पूजा मम त्वया। अतः कालेन महता वेदमार्गं गमिष्यसि'। इति ये तु पांचरात्रमार्गेण विष्णुं प्रपन्ना अपि प्राचीनदधीच्यादिशापदोषेण शिवनिंदादिषु प्रवर्तंते तेषामाकल्पं निरय एव न तु भवांतरेऽपि वेदमार्गप्राप्तिः। तदुक्तं कौर्मे-'एवमुक्त्वा तु विप्रर्षिश्शशापेश्वरविद्विषः। समागतान्ब्राह्मणांस्तान् दक्षसाहाय्यकारिणः। यस्माद्बहिष्कृता वेदा भवद्भिः परमेश्वरः। विनिंदितो महादेवः शंकरो लोकवंदितः। भविष्यथ त्रयीबाह्यास्सर्वेऽवीश्वरविद्विषः। निन्दन्तो ह्यैश्वरं मार्गं कुशास्त्रासक्तमानसाः। मिथ्याधीतसमाचारा मिथ्याज्ञानप्रलोभिनः। प्राप्य घोरं कलियुगं कलहैः कलिपीडिताः। त्यक्त्वा तपोबलं कृत्स्नान् गच्छध्वं नरकान्पुनः। भविष्यति हृषीकेशः स्वाश्रितोऽपि पराङ्मुखः।' इति। तानधिकृत्य सौरपुराणे पठ्यते-'पुरुषोत्तममाश्रित्य शिवनिंदापरा द्विजाः। कलौ युगे भविष्यंति त्राता तेषां न माधवः'। स्कान्दे शंकरसंहितायां शिवपूजाविधौ-'नेक्षेत पूजावेलायां नरं वत्स बहिष्कृतम्।' इत्युक्त्वा 'कोऽसौ बहिष्कृत' इति जिज्ञासायामुक्तं 'दधीचिना गौतमेन ये शप्ता ब्राह्मणाधामाः। कलाववतरिष्यन्ति निन्दकास्ते बहिष्कृताः।।'इति। दुष्करप्रायश्चित्तपापापादितवैदिक-मार्गबहिर्भावानामपि तंत्रेष्वधिकारस्साबपुराणे दर्शितः 'श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्ते भयं गतः। क्रमेण श्रुतिसिद्ध्यर्थं मनुष्यस्तंत्रमाश्रयेत्। धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणांतिकम्। प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम्। कलौ दुर्बलचित्तानां मरणे जायते भयम्। तेषामेव हि रक्षार्थं तान्त्रिकं मार्गमुक्तवा'निति। 'पांचरात्रं भागवतं तन्त्रं वैखानसाभिधम्। वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवा'निति च। तानेव कृतमहापातकान् धर्मशास्त्रोक्तप्रायश्चित्ताशक्ततया तंत्राण्याश्रितानधिकृत्योक्त-मापस्तंबेन- 'अथाभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः' (प्र. १. प० १. ख० २८. सू. ९.) इति। अत्राभिशस्तशब्दोक्तानां पतितानामितरेतरयाजनाध्यापनोक्तिः तांत्रिकविषयैवेति लभ्यते। पतितानां वेदमार्गेऽनधिकारात् उदाहृतपुराणवचनैस्तेषां तंत्रमार्गेऽधिकारसद्भावावगमाच्च। न चात्राभिशस्तशब्दः पतितविषयो न भवतीति शंकनीयम्। 'पुत्रान्सन्निष्पाद्य ब्रूयुः विप्रव्रजतास्मदेवं ह्यस्मत्स्वार्यास्संप्रत्यपत्स्यतेति। (प्र० १. प० १. ख० २६, सू० १०) अथापि न सेंद्रियः पतति (सू ११.) तदेतेन वेदितव्यमंगहीनो हि सागं जनयति। (सू० १२.) मिथ्यैतदिति हारीतः। (सू० १३) दधिधानीसधर्मा स्त्री भवति। (सू० १४.) यो हि दधिधान्यामप्रयतं पय आतच्य मन्थति न तेन धर्मकृत्यं क्रियत एवमशुद्धि शुक्लं यन्निर्वर्तते न तेन सह संप्रयोगो विद्यते (सू० १५) इत्यग्रिमसूत्रैः अभिशस्तशब्दसंकीर्तनपूर्वकं पूर्वपक्षसिद्धांताभ्यां तत्पुत्राणामपि असंव्यवहार्यत्वप्रतिपादनात्। एवं चोदाहृतनानापुराणवचनानुसारेण भारतादिषु पांचरात्रप्राशस्त्यवचनान्यधिकारिविशेषविषयतया तत्प्रामाण्यव्यवस्थापनपराणीत्युपपादनीयम्। भारतेऽपि हि-'सांख्यं योगः पांचरात्रं वेदाः पाशुपतं तथा। किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा

मुने'। इति प्रश्ने 'ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै।' इति पांचरात्रादीनां वैदिकमार्गान्मार्गांतरत्वोक्त्यैवावैदिकत्वमाविष्कृतम्। अवैदिकेषु च न वैदिकानामधिकारः। 'या वेदबाह्याः स्मृतंयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रोक्ता निष्ठा तेषां हि तामसी' इति मनुस्मरणात्। वराहपुराणे च बहुधा पांचरात्रप्रशंसां प्रस्तुत्यापि अवैदिकाधिकारित्वमाविष्कृतम्। 'अभावे वेदमन्त्राणां पांचरात्रोदितेन च। मार्गेण मां प्रपद्यंते ते मां प्राप्स्यंति मानवाः'इति। अत्र हि नित्यानां वेदमंत्राणां स्वरूपेणाभावो न विवक्षितः। किं तु तेष्वधिकाराभाव एव। न च पाशुपत इव पांचरात्रे वैदिकावैदिकविभागः कृतो दृश्यते। येन 'ज्ञानान्येतानि राजर्षे' इत्यादिषु पाशुपतस्येव पांचरात्रस्याप्यवैदिकस्य ग्रहणमिति नीयेतेत्यलं प्रसक्तानुप्रसक्त्या। विस्तरोऽन्यत्रानुसन्धेयः। तस्मात्स्थितमेतत्पाञ्चरात्रस्यानुष्ठेय-भागेष्वधिकारिविशेषविषयतया प्रामाण्यमस्तीति तत्प्ररोचनार्थं भारतादिषु बहुधा तत्प्रशंसनम्। जीवोत्पत्त्यादिवचनं त्वप्रमाणमेव। मोहशास्त्रत्वेन प्रसिद्धे प्रतीताप्रामाण्यनिरासहेत्वभावात्। तत्प्रसिद्धिरहितेष्वपि हि सर्ववेष्टनादिस्मरणेषु श्रुतिविरोधमात्रेणाप्रामाण्यमभ्युपगम्यते। यत्रापि श्रुतिविरोधो नास्ति तत्रापि हेतुदर्शनमात्रेणाप्रामाण्यमभ्युपगम्यते। उक्तं चापस्तंबेन-'ब्राह्मणोक्ता विधयः। तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते। यत्र तु प्रीत्युपलब्धितः प्रवृत्तिः न तत्र शास्त्रमस्ति। तदनुवर्तमानो नरकाय राध्यती'ति। किमु वक्तव्यं मोहशास्त्रे प्रतिपाद्यमानं श्रुतिन्यायस्ववचनविरुद्धमप्रमाणमिति। यत्तु भारते 'भविष्यति प्रमाणं वै एतदेवानुशासनम्'। इति पांचरात्रं प्रस्तुत्य वचनं तत्तु कूर्मपुराणादिगतकलिदोषकीर्तनप्रकरणेषु 'कुर्वंति चावताराणि ब्राह्मणानां कुलेषु वै। दधीचिशापनिर्दग्धा पुरा दक्षाध्वरे द्विजाः। निंदंति च महादेवं तमसाविष्टचेतसः'। इत्यादिवचनैः येषां कलौ प्राचुर्यमुक्तं ते सर्वेऽपि वैदिकान्प्रति वस्तुतोऽप्रमाणमपि प्रमाणत्वेन ग्रहीष्यंति। तस्मिन्युगे वैदिकमार्गप्रच्युतिप्राचुर्यात् तेऽपि तद्ग्रहीष्यंतीत्येतत्परं न तु बदरफलरक्तत्वादिवद्भाविप्रामाण्यपरम्। पूर्वमप्रमाणस्य पश्चात्प्रमाणत्वायोगात् इति न कश्चिद्विरोधः। **श्रुतिविरुद्धेति**। श्रुतिविरुद्धेश्वरकारणवादः शिवादन्यो वासुदेवः परमकारणमिति वादः। स तावत्समन्वयाध्यायोदाहृतसकलश्रुतिविप्रतिषिद्धः। तस्य मुक्तिहेतुत्वं 'यदा चर्मवदाकाश' मित्यादिश्रुतिविप्रतिषिद्धम्। तप्तमुद्राधारणस्य श्रुतिस्मृतिपुराणादिप्रतिषिद्धत्वमन्यत्र प्रपंचितमनुसंधेयम्। आदिशब्देन सकलवैदिकदेवतापरित्यागः सकलत्रयीधर्मपरित्यागः इत्यादि पांचरात्रोक्तं श्रुतिविप्रतिषिद्धं गृह्यते। 'किं भोस्त्रयीधर्मेणासंयुक्त इमं धर्मं जिज्ञासीत ओं भोः जिज्ञासीते' त्यादिप्रश्नप्रतिवचनरूपमेकायनशाखागतं श्रुतिवचनं पांचरात्रोक्तसकलवैदिककर्मपरित्यागे मूलमिति कल्पना त्वेकायनशाखां कल्पयतामेव शोभते। 'विप्रतिषेधादि'ति सूत्रस्य निषेधादित्यर्थमभिप्रेत्य पांचरात्रदीक्षानिषेधोन्नायकं स्कांदवचनमुदाहरति-**पांचरात्रे चेति**।

नन्वित्याशंका- परिहारस्यायमभिप्रायः। सत्यं नारायणः परमेश्वरशक्त्यवस्थाविशेषत्वात् तदनन्यः तदाराधनाधिकञ्च क्रमेण परमेश्वरप्राप्तिसाधनमिति। तथापि वैदिकानां तदाराधनार्थं पांचरात्रं नादरणीयम् वैदिकेष्वेव बोधायनवैखानसादिसूत्रेषु तत्प्रतिष्ठोत्सवादिप्रपञ्चनादिति।। **इति पांञ्चरात्राधिकरणम्**।।९।।

इति शिवतिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापक-
श्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाण**श्रीसांब**शिवप्रेरितस्य
श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वविद्याजि**श्रीरंगराजाध्व-**
रिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचित-
ब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपि-
काख्यायां द्वितीयस्याध्यायस्य
द्वितीयः पादः।।२।।

इति शिवार्कमणिदीपिका उत्पत्त्यधिकरणम् समाप्तम्

जन्म — ६-११-१९३७

जन्मस्थानम् — ग्रामः — रोहटः, मण्डलम् सोनीपतः (हरियाणा)।

शिक्षा — शास्त्री १९५३, पञ्जाबविश्वविद्यालये सर्वप्रथमः, एम.ए १९६३ दिल्ली विश्वविद्यालयः, पी.एच.डी. १९७० दिल्ली विश्वविद्यालयः।

अध्ययनक्षेत्रम् — साहित्यशास्त्रम्, व्याकरणम् च।

प्रकाशितानि शोधपत्राणि — दिल्ली विश्वविद्यालयदक्षिणपरिसरे समवेतानां परिचर्चानां पुस्तकाकारेषु प्रकाशनेषु बहवो लेखाः।

प्रकाशितो ग्रन्थः — अभिधाविमर्शः, दिल्ली १९८० आचार्यो दण्डी (राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितः)

कार्यक्षेत्रम् — दिल्ली विश्वविद्यालयस्थे, हिन्दूमहाविद्यालये,

प्राध्यापकः — १९६९-१९८६

प्रवाचकः — १९८७-१९८८

गुरुकुलकांगड़ी विश्वविद्यालये प्राचार्यो विभागाध्यक्षश्च —१९८८-१९८९

वर्तमाने हिन्दूमहाविद्यालये प्रवाचकः।

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00
Bhagavata Mahapurana-
4vols 2304 pp Set 1500.00
Bhavishya Mahapurana
3vols 1400 pp Set 1200.00
Brahma Mahapurana
728 pp 450.00
Devi Bhagavata Mahapurana
1154 pp 800.00
Ganesha Purana
832 pp 1993 450.00
Garuda Mahapurana
668 pp 400.00
Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 900.00
Kurma Mahapuran
298 pp 300.00
Linga Mahapurana
774 pp 400.00
Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 450.00
Narada Mahapurana
932 pp 600.00
Padma Mahapurana
2381pp 4vols set 1600.00
Shiva Mahapurana
1504 pp 2vols set 900.00
Shiva Mahapurana (Small Type)
412 pp 400.00
Skanda Mahapurana
5600 pp 8 vols set 4000.00
Skanda Mahapurana (small type)
1452 pp 3vols set 1500.00
Vamana Mahapurana
472 pp 400.00
Vayu Mahapurana
540 pp 400.00
Vishnudharmottara Mahapurana
1246 pp 900.00
Vishnu Mahapurana-with two commentaries
680 pp 500.00
विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
2 vols Press
Maha Bhagavat Devipurana
Press
Ekamara Purana
490 pp 150.00
Kalki Purana
316pp 120.00
Kuber Purana (Text With Study) Press
Narasimha Purana
380 pp 100.00
Saura Purana
290 pp 100.00
Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 Rs. 124.00
Vasuki Purana
260 pp 100.00
Ashtadasha Purana Darpana Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana – *H.H. Wilson*
1065 pp 2 vols Set 500.00
Matsya Purana – *N.S. Singh*
1252 pp 2 vols 500.00
Narasimha Purana —*Dr.S.Jena*
750 pp 400.00
Kalika Purana
Prof. Biswanarayan Shastri
1770 pp 3vols set 900.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)